BRAHMASUTRA BHASHYA

OF

SRI SANKARABHAGAVATPADACHARYA

WITH

BHAMATI of Vachaspati Misra,

KALPATARU of Amalananda

AND

PARIMALA of Appaya Dikshita.

Vol. I.—CHATUSSUTRI.

SRI VANI VILAS PRESS

SRIRANGAM

Sri Vani Vilas Sastra Series. No. 2.

Published under the Esteemed Patronage of



His Holiness Sri Chandrasekharendra Sarasvati Swamigal
of Sri Kanchi Kamakoti Peetha.

BRAHMASUTRA BHASHYA

OF

Sri Sankara Bhagavatpadacharya

WITH

BHAMATI of Vachaspati Misra, KALPATARU of Amalananda and PARIMALA of Appaya Dikshita.

EDITORIAL COMMITTEE:

Mahamahopadhyaya SUBRAHMANYA SASTRIGAL, *Professor of Vedanta, Sanskrit Institute, Bangalore.*

S. SUBRAHMANYA SASTRIGAL, *Sanskrit Pandit, Tanjore.*

YAGNYASWAMY SASTRIGAL, *Grandson of the late Mahamahopadhyaya* RAJU SASTRIGAL *of Mannargudi.*

VAIDYANATHA SASTRIGAL, *Professor of Mimamsa, Sanskrit Institute, Bangalore.*

and Gurubhaktasikhamani T. K. BALASUBRAHMANYA AIYAR, B. A.,



ब्रह्मसूत्रशांकरभाष्यम्

भामतीकल्पतरुपरिमलोपेतम् ॥



युष्मदस्मत्प्रत्ययगोचरयोर्विषयविषयिणोस्तमःप्रकाशवद्विरुद्धस्वभा-

---

भामती ।

अनिर्वाच्याविद्याद्वितयसचिवस्य प्रभवतो
विवर्ता यस्यैते वियदनिललेजोबवनयः ।
यतश्चाभूद्विश्वं चरमचरमुच्चावचमिदं
नमामस्तद्ब्रह्मापरिमितसुखज्ञानममृतम् ॥ १ ॥

कल्पतरुः ।

यदज्ञातं जीवैर्बहुविधजगद्विभ्रमधरं
वियद्यद्वद्वालैस्तलमलिनतायोगि कलितम् ।
तदुन्मुद्रज्ञानप्रततसुखसद्ब्रह्म परमं
नमस्यामः प्रत्यक्छ्रुतिशताशिरोभिः प्रकटितम् ॥ १ ॥

परिमलः ।

गुरुभिरुपदिष्टमर्थं विस्मृतमपि तत्र बोधितं प्राज्ञैः ।
अवलम्ब्य शिवमधीयन्यथामति व्याकरोमि कल्पतरुम् ॥ १ ॥

कल्पकतरुमुपकुर्यो कमधिकमाकाङ्क्षितार्थमुपहृत्य ।
तद्दत्तैरेवार्थैर्मम मतिमीहे परिष्कर्तुम् ॥ २ ॥

यावन्तो निविशन्ते विदुषां व्याख्यानचातुरीभेदाः ।
सर्वेषामपि तेषामयमवकाशं ददाति पुष्पकवत् ॥ ३ ॥

कल्पतरुः ।

माद्यन्मोहमहेभकुम्भदलनप्रोद्भूतसन्मौक्तिक-
द्योतालंकृतसत्सुखाद्वयवपुः श्रीमान्नृकण्ठीरवः ।
प्रह्लादोक्तगिरः प्रमाणनविधौ दिव्याकृतिः स्तम्भतो
निर्यातः प्रकटीभवेत्स हृदयाम्भोजे ममाखण्डितम् ॥ ३ ॥

ललितैः पदविन्यासैर्या नृत्यति विबुधवदनरङ्गेषु ।
सच्छास्त्रवेदवाद्यैः सरस्वतीं तां नमस्यामः ॥ ४ ॥

परिमलः ।

अथ कृतश्रवणमननिदिध्यासनस्य साक्षात्कारोदयेन प्राप्यं फलमपि ब्रह्मैवेति दर्शयति— माद्यदिति । माद्यन् प्रपञ्चरूपेणोज्जृम्भमाणो मोह एव महेभः तस्य कुम्भ इव कुम्भः मूलाविद्याभागः, वक्ष्यमाणमौक्तिकद्योतालंकार्यकर्तृकदलनविषयत्वसाम्यात् । अत एव महेभत्वरूपणस्य मोहवत् कुम्भत्वरूपणस्याधिष्ठानरूपः कश्चित्तदंशो नोक्त इति न्यूनता न शङ्कनीया, 'मयूखनखरत्रुट्यत्तिमिरकुम्भिकुम्भस्थलोच्चलत्तरलतारकाकपटकीर्ण-मुक्तागणः' इत्यत्र प्रत्यग्रोदितचन्द्रमयूखसंसृष्टतिमिरपुरोभागस्येवात्र ब्रह्मसाक्षात्कार-दलनीयमूलाविद्याभागस्यातिशयोक्त्या कुम्भत्वेनाध्यवसानात् । तस्य दलनं निवर्तकं प्रोद्भूतं जननं यस्य तथाभूतः सन् उत्तमो मौक्तिको मुक्तिप्रयोजनः द्योतः प्रकाशो वृत्तिसाक्षात्कारः तेनालंकृतम् अभिव्यक्तं सत्सुखात्मकं वपुः स्वरूपमस्येति तथोक्तः । मुक्तिः प्रयोजनमस्येत्यर्थे 'प्रयोजनम्' इति सूत्रेण ठञ्प्रत्ययान्तो मौक्तिकशब्दः । यद्वा माद्यन्मोहमहेभकुम्भस्य दलनेन निवर्तनेन प्रोद्भूतः अभिव्यक्तः सन्मौक्तिकसदृशः घर्षणनिर्मलीभूतमुक्ताफलसदृशः द्योतः स्वरूपसाक्षात्कारः तेनालंकृतं प्रकाशमानं स-त्सुखाद्वयं वपुरस्येति तथोक्तः । सन्मौक्तिकद्योतेत्यत्र शाकपार्थिवादिवत् मध्यमपदलोपि-समासः । द्योतस्य सुखाभेदेऽपि 'राहोः शिरः' इतिवत् भेदव्यपदेशः । माद्यन्मदशाली मोहयति मदगन्धमात्रेण प्रतिगजादीनिति मोहः । मोहयतेः पचाद्यच् । 'णेर-निटि' इति णिलोपः । तथाभूतस्य महेभस्य कुम्भदलनेन प्रोद्भूतानां निर्गतानां शुद्ध-मौक्तिकानां नखाग्रलग्नानां प्रकाशेनालंकृतं सत्सुखं रिपुसंहरणेन जायमानानन्दम् अद्वयं शौर्यं द्वितीयरहितं वपुरस्येति तथोक्तः । पूर्ववदलंकारः । एवमेभिस्त्रिभिर्नमस्कार-श्लोकैः सामान्यतः शास्त्रस्य विषयः अध्यायानां चार्थः सूचितः ॥ ३ ॥

ललितैरिति । अत्र वदनरङ्गादिरूपणस्य शाब्दतया विशिष्य वाच्यत्वेन वर्त-मानत्वात् सरस्वत्यां नर्तकीरूपणस्य तद्गम्यत्वाच्चैकदेशविवर्तिरूपकालंकारः ॥ ४ ॥

कल्पतरुः।

भजमानविघ्नभित्तिप्रभित्तिकुद्दालमिव करेण रदम्।
दधतं महागणेशं प्रणौमि सकलेष्टसंपदं ददतम् ॥ ९ ॥

यन्न्यायसूत्रग्रथितात्मबोधसौरभ्यगर्भा श्रुतिपद्ममाला।
प्रसाधयत्यद्वयमात्मतत्त्वं तं व्यासमाद्यं गुरुमानतोऽस्मि ॥ ६ ॥

वेदान्तार्थतदाभासक्षीरनीरविवेकिनम्।
नमामि भगवत्पादं परहंसधुरंधरम् ॥ ७ ॥

स्वयंप्रभसुखं ब्रह्म दयाचितविग्रहम्।
यथार्थानुभवानन्दपदगीतं गुरुं नुमः ॥ ८ ॥

विद्याप्रश्रयसंयमाः शुभफला यत्संनिधिस्थानतः
पुंसां हस्तगता भवन्ति सहसा कारुण्यवीक्षावशात्।
आनन्दात्मयतीश्वरं तमनिशं वन्दे गुरूणां गुरुं
लब्धं यत्पदपद्मयुग्ममनघं पुण्यैरनन्तैर्मया ॥ ९ ॥

ग्रन्थग्रन्थ्यभिधाः स्फुटन्ति मुकुला यस्योदये कौमुदा
व्याकुर्वत्यपि यत्र मोहतिमिरं लोकस्य संशाम्यति।
प्रोद्यत्तारकदिव्यदीप्ति परमं व्योमापि नीराज्यते
गोभिर्यस्य सुखप्रकाशशशिनं तं नौमि विद्यागुरुम् ॥ १० ॥

परिमलः।

भजमानेति। भजमानानां विघ्न एव भित्तिः तस्याः प्रभित्तिः नाशकरणं **कुद्दालमिवेति** स्वरूपोत्प्रेक्षा। दशभुजस्य महागणपतेर्बाधःकरेण स्वविषाणधारणं **शुण्डाग्रधृतकलशस्थितरत्नवर्षेण** भक्तेभ्यः सकलसंपत्प्रदानं च मन्त्रशास्त्रप्रसिद्धम्। **प्रभिद्यते नाश्यते** अनेनेति प्रभित्तिशब्दोऽत्र नाशकरणवाची, न तु विदारणक्रियावाची। **अतो विदारणे भिदा अन्यत्र भित्तिरिति** शाब्दिकमर्यादाया न विरोधः ॥ ५ ॥

ग्रन्थेति। ग्रन्थग्रन्थय इत्यभिधानमात्रेण भेदः। मुकुला एवैते इत्यनभिव्यक्तत्वसाम्यात् मुकुलत्वाध्यवसानरूपा अतिशयोक्तिः। यस्योदये स्फुटन्तीत्यनेन **अस्योदयात्पूर्वं शास्त्रेषु** केचन कठिनप्रदेशाः केनापि नोद्घाटिता मुद्रिता एव **स्थिता इति** प्रतीतेः अस्यान्येभ्यो व्याख्यातृभ्य उत्कर्षरूपो व्यतिरेकालंकारो व्यज्यते। **व्याकुर्वत्यपीत्यनेन** अस्य शब्दश्रवणतोऽपि तिमिरं शाम्यति न तु प्रादुर्भावमपेक्षते इति **प्रसिद्ध-**

कल्पतरुः ।

वैदिकमार्गं वाचस्पतिरपि सन्यः सुरक्षितं चक्रे ।
नयविजितवादिदैत्यः स जयति विबुधेश्वराचार्यः ॥ ११ ॥

रूढोऽयं वेदकाण्डान्नयमयविटपो भूरिशाखाविचारः
सद्वर्णानन्तपर्णः समुदितपरमब्रह्मबोधप्रसूनः ।
साक्षाद्धस्तावचेयं दददमृतफलं जीवविश्वेशवीन्द्रः
संसारार्कोत्थतापप्रशमननिपुणस्तन्यते कल्पवृक्षः ॥ १२ ॥

[1]कीर्त्या यादववंशमुन्नमयति श्रीजैत्रदेवात्मजे
कृष्णे क्ष्माभृति भूतलं सह महादेवेन संबिभ्रति ।

परिमलः ।

चन्द्रादुत्कर्षरूपो व्यतिरेकालंकारो व्यज्यते । **प्रोद्यदिति** । प्रोद्यन्ती प्रसर्पन्ती तारकेषु प्रणवेषु दिव्यस्य द्युसंबन्धिनः 'यः पुनरेतं त्रिमात्रेण—' इति श्रुतौ ब्रह्मलोकाख्योक्त-द्युलोकप्राप्तिफलकत्वेन श्रुतस्य त्रिमात्रप्रणवस्य दीप्तिः प्रकाशनशक्तिर्यस्मिन् तत्तथोक्तम् । यद्वा प्रोद्यन्ती तारकशब्दोपलक्षितानाम् 'न तत्र सूर्यो भाति' इत्यादिश्रुत्युक्तानां सूर्य-चन्द्रविद्युन्नक्षत्राणां दिव्या दिवि भवा गगने प्रसृता दीप्तिर्येन तत्तथोक्तम् । यद्वा प्रोद्य-न्त्यः उन्नमन्त्यः तारकाः जनानामक्षिकनीनिकाः यया सा तथोक्ता तथाभूता दिव्या दिवि प्रसृता दीप्तिर्यस्य तत्तथोक्तम् । 'अथ यदतः परो दिवो ज्योतिर्दीप्यते' इति श्रुतौ हि ब्रह्मणो दिवि प्रसृता दीप्तिरुक्ता, तद्विशिष्टब्रह्मोपासनस्य फलं श्रुतम् 'चक्षुष्यः श्रुतो भवति' इति; अत इयं दीप्तिरुपासकस्य चक्षुष्यत्वफलप्रदानद्वारा तमवलोकयतां सुन्दर-वस्तुदर्शनकौतुकेन चक्षुर्विस्फारणहेतुर्भवतीत्ययमर्थः प्रोद्यत्तारकेति दीप्तिविशेषणेनोक्तः । परमं व्योम 'सैषा भार्गवी वारुणी विद्या परमे व्योमन् प्रतिष्ठिता' इति श्रुतिप्रसिद्धं परं ब्रह्म । चन्द्रपक्षे प्रोद्यन्त्या नक्षत्राणां दिव्यया स्वर्लोकभवया दीप्त्या परा प्रकृष्टा मा शोभा यस्य तथाभूतं व्योमेति योज्यम् । नीराज्यते प्रकाश्यते ॥ १० ॥

रूढ इति । वेदस्यैकदेशः काण्डः ब्रह्मकाण्ड एव काण्डः समुद्रसलिलं तस्मा-त्प्रादुर्भूतः । 'काण्डोऽस्त्री दण्डबाणार्ववर्गावसरवारिषु' इति निघण्टुः । वृक्षपक्षे भूरिः शाखासु वीनां पक्षिणां चारोऽस्येत्यर्थः । वीन्द्र इति जीवेश्वरयोः प्रधानपक्षित्वोक्त्या वृक्षपक्षे तेन विशेषणेनापौनरुक्त्यम् । कल्पवृक्षः सर्वेषां विबुधानामिवायं ग्रन्थः सर्वेषां वेदान्तानां तात्पर्यविषयस्यार्थस्य प्रतिपादने समर्थ इति कल्पवृक्षत्वाध्यवसानम् ॥१२॥

1. अयं श्लोकः दाक्षिणात्यकोशेषु न दृश्यते ।

भामती ।

निःश्वसितमस्य वेदा वीक्षितमेतस्य पञ्च भूतानि ।
स्मितमेतस्यं चराचरमस्य च सुप्तं महाप्रलयः ॥ २ ॥

षड्भिरङ्गैरुपेताय विविधैरव्ययैरपि ।
शाश्वताय नमस्कुर्मो वेदाय च भवाय च ॥ ३ ॥

कल्पतरुः ।

भोगीन्द्रे परिमुञ्चति क्षितिभरप्रोद्भूतदीर्घश्रमं
वेदान्तोपवनस्य मण्डनकरं प्रस्तौमि कल्पद्रुमम् ॥ १३ ॥

श्रीमच्छारीरकमीमांसाव्याख्यायाः प्रारिप्सितायाः अविघ्नपरिसमाप्त्यादिसिद्धये शास्त्रप्रतिपाद्यां परां देवतां प्रणमन् शास्त्रीयं विषयादि दर्शयति— **अनिर्वाच्येति ।** एका हि अविद्या अनादिर्भावरूपा देवताधिकरणे वक्ष्यते; अन्या पूर्वपूर्वभ्रमसंस्कारः । तदविद्याद्वितयं सत्त्वासत्त्वाभ्यामनिर्वाच्यं सचिवं सहकारि यस्य तत्तथा । तत्साचिव्यं ब्रह्मणस्तद्विषयता, तदाश्रयास्तु जीवा एवेति वक्ष्यते । न चाविद्यासाचिव्ये ब्रह्मणोऽनीश्वरत्वम्, उपकरणस्य स्वातन्त्र्याविघातकत्वादित्याह— **प्रभवत इति ।** अतत्त्वतोऽन्यथाभावो विवर्तः । न केवलं भूतानां ब्रह्मविवर्तत्वम्, अपि तु जीवानामपि चराचरशरीरोपाधिकानां तत्प्रतिबिम्बत्वेन तद्विवर्ततेत्याह— **यतश्चेति ।** अथ वा भूतसृष्टिवत् भौतिकसृष्टेरपि हिरण्यगर्भद्वारा ब्रह्मैव कर्तृ इत्यनेनोक्तम् । एवमज्ञातत्वविपर्यस्तत्वाभ्यां विषयत्वमुक्त्वा प्रयोजनतामाह— **अपरिमितेति ॥ १ ॥**

जगद्विवर्ताधिष्ठानत्वेन ब्रह्मणः सर्वकर्तृत्वमुक्त्वा सर्वज्ञत्वं ज्ञानपदेन सूचितं वेदकर्तृत्वादिना साधयति— **निःश्वसितमिति ।** वीक्षणमात्रेण सृष्टत्वात् भूतानि वीक्षितम् । हिरण्यगर्भद्वारा साध्यं चराचरं वीक्षणाधिकप्रयत्नसाध्यस्मितसाम्यात् स्मितम् । सर्वज्ञत्वसिद्ध्यर्थं चेतनधर्मसुप्तिमत्त्वेन चेतनतां संभावयति— **अस्य चेति ।** यद्वा विनायासेन नामरूपसृष्टिप्रलयकर्तृत्वात् ब्रह्मानेन स्तुतम् ॥ २ ॥

षड्भिरिति । ईश्वरस्य षडङ्गानि पुराणोक्तानि— 'सर्वज्ञता तृप्तिरनादिबोधः स्वतन्त्रता नित्यमलुप्तशक्तिः । अनन्तशक्तिश्च विभोर्विधिज्ञाः षडाहुरङ्गानि महेश्वरस्य' इति । अव्ययानि वायुप्रोक्ते पुराणे पठ्यन्ते— 'ज्ञानं विरागतैश्वर्यं तपः सत्यं क्षमा धृतिः । स्रष्टृत्वमात्मसंबोधो ह्यधिष्ठातृत्वमेव च । अव्ययानि दशैतानि नित्यं तिष्ठन्ति शंकरे' इति । वेदस्य षडङ्गानि निरुक्तादीनि । अव्ययानि च चादयः ॥

भामती ।

मार्तण्डतिलकस्वामिमहागणपतीन्वयम् ।
विश्ववन्द्यान्नमस्यामः सर्वसिद्धिविधायिनः ॥ ४ ॥

ब्रह्मसूत्रकृते तस्मै व्यासायापरवेधसे ।
ज्ञानशक्त्यवताराय नमो भगवतो हरेः ॥ ५ ॥

नत्वा विशुद्धविज्ञानं शंकरं करुणानिधिम् ।
भाष्यं प्रसन्नगम्भीरं तत्प्रणीतं विभज्यते ॥ ६ ॥

आचार्यकृतिनिवेशनमप्यवधूतं वचोऽस्मदादीनाम् ।
रथ्योदकमिव गङ्गाप्रवाहपातः पवित्रयति ॥ ७ ॥

कल्पतरुः ।

तिलकप्रियः स्वामी तिलकस्वामी । सर्वसिद्धिविधायित्वं स्मृतिसिद्धम्—'आदित्यस्य सदा पूजां तिलकस्वामिनस्तथा । महागणपतेश्चैव कुर्वन्सिद्धिमवाप्नुयात्' इति ॥ ४ ॥

वेधसे विधात्रे ईश्वराय । हरेः ज्ञानशक्तेरवतारः प्राप्तिर्यस्मिन्स तथोक्तः । तथा चाह श्रीपराशरः—'द्वापरे द्वापरे विष्णुर्व्यासरूपी महामुने । वेदमेकं सुबहुधा कुरुते जगतो हितम्' इति ॥ ५ ॥

परिमलः ।

ईश्वरायेति । सर्वज्ञायेत्यपि शक्यं व्याख्यातुम् । 'मेधावी तु विधाता स्याद्वेधाः सर्वज्ञ उच्यते' इति, 'वेधास्त्रिषु स्यात्सर्वज्ञे नरि विष्णुविरिञ्चयोः' इति च नैघण्टुकाः । **अवतारः प्राप्तिर्यस्मिन्निति** । ननु ज्ञानशक्त्यवतारायेत्यत्र अवतारशब्दस्य प्राप्त्यर्थत्वमाश्रित्य बहुव्रीहिसमासप्रदर्शनमयुक्तम्, समानाधिकरणानां बहुव्रीहिरिति वार्त्तिककारेण नियमितत्वात्; 'न धातुलोप आर्धधातुके' इति पाणिनिसूत्रे धातुलोपशब्दे षष्ठीगर्भव्यधिकरणबहुव्रीह्याश्रयणात् तद्वदिह तदुपपादनेऽपि 'ऋदोरप्' इत्यबन्तस्यावतरशब्दस्येव घञन्तस्यावतारशब्दस्य भावार्थत्वाभावात्, 'अवे तॄस्रोर्घञ्' इति सूत्रेण अवपूर्वात्तरतेः करणाधिकरणयोरेव घञ्विधानात्; अतः अवतारशब्दस्याधिकरणार्थत्वमाश्रित्य ज्ञानशक्तेरवतारायेति षष्ठीतत्पुरुषः प्रदर्शयितुं युक्त इति चेत्, यद्येवं स एवाचार्यैः प्रदर्शित इति ब्रूमः; प्राप्तिर्यस्मिन्नित्युभयमप्यवतारपदव्याख्यानार्थम्, न तु प्राप्तिपदमात्रम् । प्राप्तिर्यस्मिन् सोऽवतार इत्यर्थः ॥

भामती।

अथ यदसंदिग्धमप्रयोजनं च न तत्प्रेक्षावत्प्रतिपित्सागोचरः, यथा समनस्केन्द्रियसंनिकृष्टः स्फीतालोकमध्यवर्ती घटः करटदन्ता वा; तथा चेदं ब्रह्मेति

कल्पतरुः।

इह भगवता सूत्रकारेण साधनचतुष्टयसंपत्त्यनन्तरं ब्रह्मजिज्ञासामुपदिशता जिज्ञास्यस्य ब्रह्मणः संदिग्धत्वसप्रयोजनत्वे समसूचिषाताम्। ते चाध्याससिद्ध्यधीनसिद्धिनी इति तदाक्षेपसमाधानपरताम्– आह कोऽयम्– इत्यतः प्राक्तनभाष्यस्य दर्शयति— **अथेत्यादिना आशयवानाशङ्क्य परिहरतीत्यन्तेन**। अथशब्दः प्रतिग्रन्थव्याख्यानप्रारम्भार्थः। इहाहंप्रत्ययगम्यमात्मानम् उपनिषत्प्रतिपाद्यमापाद्य जिज्ञास्यत्वाक्षेपः। तत्पुनर्ब्रह्मेत्यादौ तु तदतिरिक्तं ब्रह्मोररीकृत्य तस्य वेदान्तेभ्य एव सिद्धेः विचारविषयत्वाक्षेप इति भेदः। जिज्ञास्यत्वव्यापके संदिग्धत्वसप्रयोजनत्वे, तद्विरुद्धे चासंदिग्धत्वनिष्प्रयोजनत्वे, तयोरुपलब्धिः; ततश्च व्यापकाभावे व्याप्यजिज्ञास्यत्वाभाव इत्यर्थः। अत्र प्रयोगौ—मुमुक्षुणा ब्रह्म न विचार्यम्, तं प्रत्यसंदिग्धत्वात्

परिमलः।

अथशब्द इति। मङ्गलश्लोके शास्त्रीयविषयप्रयोजनप्रदर्शनेन तथाभूते ब्रह्मणि भाष्यस्य तात्पर्यमिति कृत्स्नं भाष्यं सामान्यतो व्याख्यातम्; इदानीं प्रतिग्रन्थव्याख्यानं प्रारभ्यते इत्येतदर्थः अथशब्द इत्यर्थः। यद्यपि प्रारभ्यत इत्यनुक्तेऽपि प्रारम्भादेवेदं प्रारभ्यत इत्यवगन्तुं शक्यम्, तथापि श्रोतॄणां श्रद्धेयत्वप्रतिपत्त्यर्थं तदुक्तिः। दृश्यते हि तदर्थमेव लोकेऽप्तासः 'किंचिदहं वक्ष्यामि' इत्युक्त्वा हितमुपदिशन्तीति॥

मुमुक्षुणेति। ननु– हेतुसाध्ययोर्मुमुक्षुविशेषणं किमर्थम्? न च अमुमुक्षोः सर्वप्रपञ्चविषयो येन केनचित्प्रकारेण संदेहः तन्निवर्तनार्थो विचारश्च संभवतीति कुम्भाहमर्थयोरपि तद्विषयत्वावश्यंभावात् दृष्टान्ते हेतुसाध्यवैकल्यं पक्षे हेत्वसिद्धिर्बाधौ च स्यातामिति तद्वारणार्थं मुमुक्षुविशेषणमिति वाच्यम्, मुमुक्षोरपि तथाविधसंदेहविचारयोः संभवेन तत उक्तदोषानिवारणात्। न च यस्य मुमुक्षोस्तौ न स्तः सोऽत्र विशेषणमिति वाच्यम्, 'ब्रह्मविचारार्थमिदं शास्त्रमारभ्भणीयम्' इति वदतः सिद्धान्तिनो मते 'प्रपञ्चः सत्यो मिथ्या वा, सन् असन्वा' 'जीवः स्वाभाविकचैतन्य आगन्तुकचैतन्यो वा' इत्यादिसंदेहस्य तत्तदधिकरणनिरूपितन्यायानुसंधाननिवर्तनीयस्यावश्यंभावेन प्रतिवादिनं प्रति पक्षदृष्टान्तयोर्हेत्वसिद्धेरनिवारणात्। मुमुक्षुज्ञातव्येन रूपेणासंदिग्धत्वं हेतुर्विवक्षित इति चेन्न, स्वाभाविकचैतन्यत्वादेरपि मुमुक्षुज्ञातव्यतायाः सिद्धान्तिनां वा-

भामती ।

व्यापकविरुद्धोपलब्धिः । तथा हि— बृहत्त्वाद्बृंहणत्वाद्वात्मैव ब्रह्मेति गीयते। स चायमा कीटपतङ्गेभ्य आ च देवर्षिभ्यः प्राणभृन्मात्रस्येदंकारास्पदेभ्यो देहेन्द्रियमनोबुद्धिविषयेभ्यो विवेकेन 'अहम्' इत्यसंदिग्धाविपर्यस्तापरोक्षानुभवसिद्ध इति न जिज्ञासास्पदम् । न हि जातु कश्चिदत्र संदिग्धे 'अहं वा नाहं वा' इति। न च विपर्यस्यति 'नाहमेव' इति । न च 'अहं कृशः, स्थूलः' 'गच्छामि' इत्यादिदेहधर्मसामानाधिकरण्यदर्शनाद्देहालम्बनोऽयमहंकार इति सांप्रतम् । तदालम्ब-

कल्पतरुः ।

तथाविधकुम्भवत्; तथा अप्रयोजनत्वात् काकदन्तवत् इति। आद्यं हेतुं विवृणोति— तथा हीत्यादिना । बृंहणत्वात् देहादीनां परिणमयितृत्वात् । नन्वहंप्रत्ययस्य देहादिमिश्रविषयत्वात् कथं विविक्तविषयत्वम्? अत आह— न चाहमिति । देहा-

परिमलः ।

च्यत्वात्, अन्यथा तेन मोक्षार्थमारभ्यमाणे अस्मिञ्शास्त्रे तद्विचारानुपपत्तेः— इति चेत्; उच्यते— मोक्षजनकत्वाभिमतज्ञानविषयेण रूपेणासंदिग्धत्वं हेतुः । न चाहंत्वादन्यत् मोक्षजनकत्वाभिमतज्ञानविषय इति सिद्धान्तिना वक्तुं शक्यम्, 'ब्रह्मज्ञानं मोक्षहेतुः' इति वदतः सिद्धान्तिनो मते 'अहम्' इति ज्ञानमेव मुक्तिहेतुः स्यादित्यापाद्य पूर्वपक्षप्रवृत्तेः । पक्षदृष्टान्तयोर्बाधसाध्यवैकल्यपरिहारार्थं साध्येऽपि मुमुक्षुविशेषणम् । अन्यथा सर्वप्रपञ्चविषयसत्यत्वमिथ्यात्वारम्भपरिणामादिविचारं मुमुक्षुकृतं प्रति पक्षदृष्टान्तीकृताहमर्थकुम्भव्यक्त्योरपि विषयत्वावश्यंभावात् बाधसाध्यवैकल्ये स्याताम् । न च मुमुक्षुविशेषणबललभ्ये मोक्षजनकत्वाभिमतज्ञानविषयेण रूपेण विचार्यत्वाभावे विवक्षितेऽपि साध्ये दोषतादवस्थ्यम्, पक्षे अहंत्वस्य दृष्टान्ते तद्व्यतिरेकस्य च लोकसिद्धत्वेऽप्यनुमित्सया विचारसंभवादिति वाच्यम्, मोक्षजनकज्ञानप्रकारप्रकारकसंदेहनिवृत्त्यर्थविचारविषयत्वाभावस्य साध्यार्थस्य विवक्षितत्वात् । एवं च 'अहम्' इति सदावभासमानं ब्रह्म नाहंत्वप्रकारकसंदेहनिवर्तकविचारविषयः अहंत्वेन निश्चीयमानत्वात् यो यदा येन प्रकारेण निश्चीयते स तदा न तत्प्रकारकसंदेहनिवर्तकविचारविषयः यथा समनस्केन्द्रियसंनिकर्षस्फीतालोकमध्यवर्तितादशायां घट इत्यनुमाननिष्कर्षः । न च प्रतियोग्यप्रसिद्धया साध्याप्रसिद्धिर्दोषः, साध्यविशेषप्रसिद्धिं विनापि घटे सामान्यव्याप्तिग्रहोपपत्तेः । विशिष्टवैशिष्ट्यज्ञानरूपायाः प्रतियोगिविशिष्टाभावरूपसाध्यविशिष्टानुमितेः अहंत्वप्रकारकत्वसंदेहनिवर्तकविचारविषयत्वयोर्विशकलितप्रसिद्धया विशेष्ये विशेषणं तत्र च विशेषणान्त-

भामती।

नत्वे हि 'योऽहं बाल्ये पितरावन्वभूवं स एव स्थाविरे प्रणप्तृनननुभवामि' इति प्रतिसंधानं न भवेत्। न हि बालस्थविरयोः शरीरयोरस्ति मनागपि प्रत्यभिज्ञानगन्धो येनैकत्वमध्यवसीयेत। तस्माद्येषु व्यावर्तमानेषु यदनुवर्तते तत्तेभ्यो भिन्नं यथा कुसुमेभ्यः सूत्रम्। तथा च बालादिशरीरेषु व्यावर्तमानेष्वपि परस्परमहंकारास्पदमनुवर्तमानं तेभ्यो भिद्यते। अपि च स्वप्नान्ते दिव्यं शरीरभेदमास्थाय तदुचितान्भोगान्भुञ्जान एव प्रतिबुद्धो मनुष्यशरीरमात्मानं पश्यन् 'नाहं देवो मनुष्य एव' इति देवशरीरे बाध्यमानेऽप्यहमास्पदमबाध्यमानं शरीराद्भिन्नं प्रतिपद्यते। अपि च योगव्याघ्रः शरीरभेदेऽप्यात्मानमभिन्नमनुभवतीति नाहंकारालम्बनं देहः। अत एव नेन्द्रियाण्यप्यस्यालम्बनम्, इन्द्रियभेदेऽपि 'योऽहमद्राक्षं स एवैतर्हि स्पृशामि' इत्यहमालम्बनस्य प्रत्यभिज्ञानात्। विषयेभ्यस्त्वस्य विवेकः स्थवीयानेव। बुद्धिमनसोश्च करणयोः 'अहम्' इति कर्तृप्रतिभासप्रख्यानालम्बनत्वायोगः। 'कृशोऽहम्' 'अन्धोऽहम्' इत्यादयस्तु प्रयोगा असत्यप्यभेदे कथंचित् 'मञ्चाः क्रोशन्ति' इत्यादिवदौपचारिका इति युक्तमुत्पश्यामः। तस्मादिदं-

कल्पतरुः।

लम्बन इति। आत्मैक्याध्यस्तदेहालम्बन इत्यर्थः। देहादात्मनोऽहंप्रत्ययगम्यस्य भेदग्रहान्नाध्यास इत्याह— तदालम्बनत्वे हीति। बालस्थविरदेहयोः परिमाणभेदान्न प्रत्यभिज्ञेत्युक्तम्। परिमाणभेदेऽपि देहैक्यं मन्वानं प्रत्याह— अपि च स्वप्नान्त इति। जाग्रत्यप्याह— योगेति। मनुष्यः सन् कृत्रिमव्याघ्रशरीरमभिमन्यमानः योगव्याघ्रः। नाहंकारालम्बनं देह इति। अत्रापि देहशब्दः आत्मैक्याध्यस्तदेहपरः। अन्यथा हि जिज्ञास्यत्ववादिनापि तन्मात्रालम्बनत्वानङ्गीकारादनुक्तोपालम्भः

परिमलः।

रमित्युक्तरूपविशिष्टवैशिष्ट्यज्ञानसामग्र्योपपत्तेः। न च प्रतियोग्यप्रसिद्धिरपि, देहेन्द्रियेषु तत्प्रसिद्धेः सुलभत्वात्। देहादात्मन इति। 'मम देहः' इत्यभिज्ञारूपोऽपि भेदग्रहो विवक्षितः। परिमाणभेदेऽपीति। काष्ठपाषाणादिषु तक्षणादिना शरीरेषु कालभेदेन च परिमाणभेदेऽप्यभेदप्रत्यभिज्ञोदयः तथा अभिमानबीजम्। कृत्रिमेति। योगमहिम्ना 'ह्रस्वता स्थूलता बाल्यं वार्द्धकं यौवनं तथा। नानाजातिस्वरूपं च तथा सुरभिगन्धता॥ पार्थिवांशं विना भूतैश्चतुर्भिर्देहधारणम्। गन्धतन्मात्रतत्त्वोत्थमेतदष्टगुणं महत्' इत्युक्तरूपपार्थिवैश्वर्याष्टकलाभाल्लीलाद्यर्थं व्याघ्रशरीरं कृत्वा तदभिमन्यमान इत्यर्थः। तत्

भामती ।

कारास्पदेभ्यो देहेन्द्रियमनोबुद्धिविषयेभ्यो व्यावृत्तः स्फुटतराहमनुभवगम्य आत्मा संशयाभावादजिज्ञास्य इति सिद्धम् । अप्रयोजनत्वाच्च । तथा हि— संसारनिवृत्तिरपवर्ग इह प्रयोजनं विवक्षितम् । संसारश्च आत्मयाथात्म्याननुभवनिमित्त आत्मयाथात्म्यज्ञानेन निवर्तनीयः । स चेदयमनादिरनादिना आत्मयाथात्म्यज्ञानेन सहानुवर्तते, कुतोऽस्य निवृत्तिः अविरोधात् ? कुतश्चात्मयाथात्म्याननुभवः? न हि 'अहम्' इत्यनुभवादन्यदात्मयाथात्म्यज्ञानमस्ति । न च 'अहम्' इति सर्वजनीनस्फुटतरानुभवसमर्थित आत्मा देहेन्द्रियादिव्यतिरिक्तः शक्य उपनिषदां सहस्रैरप्यन्यथयितुम्, अनुभवविरोधात् । न ह्यागमाः सहस्रमपि घटं पटयितुमीशते । तस्मादनुभवविरोधादुपचरितार्था एवोपनिषद इति युक्तमुत्पश्याम इत्याशयवानाशङ्क्य परिहरति— **युष्मदस्मत्प्रत्ययगोचरयोरिति** । अत्र च युष्मदस्मदित्यादिर्मिथ्येति भवितुं युक्तमित्यन्तः शङ्काग्रन्थः । तथापीत्यादिः परिहारग्रन्थः । तथापीत्यभिसंबन्धाच्छङ्कायां यद्यपीति पठितव्यम् । इदमस्मत्प्रत्ययगोचरयोरिति वक्तव्ये युष्मद्ग्रहणमत्यन्तभेदोपलक्षणार्थम् । यथा ह्यहंकारप्रतियोगी त्वंकारो नैवमिदंकारः, 'एते वयम्, इमे वयम्, आस्महे' इति बहुलं प्रयोगदर्शनादिति । चित्स्वभाव आत्मा विषयी, जडस्वभावा बुद्धीन्द्रियदेहविषया विषयाः ।

कल्पतरुः ।

स्यादिति । अथ वा लोकायतमतं प्रसङ्गादिहाशङ्क्य निरस्यते । प्रख्यानं शब्दः । असत्यप्यारोपितेऽपि अभेदे इत्यर्थः, वास्तवाभेदस्याध्यासवादिनोऽप्यनिष्टेः । लोकायतमतनिरासे तु यथाश्रुतोऽर्थः । द्वितीयं हेतुं विभजते— **अप्रयोजनत्वाच्च इत्यादिना** । ननु किमिति नास्त्यन्यदात्मयाथात्म्यज्ञानं ब्रह्मात्मभावस्योपनिषद्भिरवबोधनादित्यत आह— **न चाहमिति** । युक्तमिति निर्देशात् पूर्वभागस्यैव सिद्धान्तत्वं व्यावर्तयति— **अत्र चेति** । ननु पुरुषान्तरवचनो युष्मच्छब्दः कथमचेतने देहादौ प्रयुक्तः ? अत आह— **इदमस्मदिति** । नन्विदंकारप्रयोगेऽपि प्रत्यक्पराग्भावेन भवति भेदप्रतीतिः; 'एते वयम्' इति तु सामानाधिकरण्यं गौणम्; तथा त्वंकारप्रयोगेऽपीति न विशेषः कश्चिदित्यत आह— **बहुलं प्रयोगदर्शनादिति** । यद्यप्युभयत्र गौणत्वमविशिष्टं तथापि विरलप्रयोगात्स्फुटम् 'त्वमहम्' इति सामानाधिकरण्ये गौणत्वम्; ततस्तत्र भेदं तिरोदधीतेत्यत्यन्तभेदासिद्धिः । 'एते वयम्' इति तु बहुलप्रयोगत्वेन निरूढमिति तिरोदधीत भेदम्; अतो नात्यन्तभेदसिद्धिः । दृश्येते च लाक्ष-

वयोरितरेतरभावानुपपत्तौ सिद्धायाम्, तद्धर्माणामपि सुतरामितरेतर-

भामती।

एते हि चिदात्मानं विसिन्वन्ति अवबध्नन्ति; स्वेन रूपेण निरूपणीयं कुर्वन्तीति यावत्। परस्परानध्यासहेतौ अत्यन्तवैलक्षण्ये दृष्टान्तः— **तमःप्रकाशवदिति**। न हि जातु कश्चित्समुदाचरद्वृत्तिनी प्रकाशतमसी परस्परात्मतया प्रतिपत्तुमर्हति। तदिदमुक्तम्— **इतरेतरभावानुपपत्ताविति**। इतरेतरभावः **इतरेतरत्वम्,**

कल्पतरुः।

णिकत्वाविशेषेऽपि प्रयोगबाहुल्याबाहुल्याभ्यां निरूढसांप्रतिकते, यथा 'पटः शुक्लः' 'रथाङ्गनामा चक्रवाकः' इति। प्रयुञ्जते बहुलं वेदाश्च कवयश्च 'अयमहमस्मि' इति 'एते वयमिमे दाराः कन्येयं कुलजीवितम्' इत्यादि। न चेह सहानवस्थानं दृष्टान्ते विवक्षितम्, दार्ष्टान्तिके तदभावात्; किं त्वन्योन्यानात्मकत्वेन स्फुरणमित्यभिप्रेत्याह—**परस्परेति**। ननु उल्लूकादेः प्रकाशेऽप्यस्ति तमस्त्वारोपः; तत्राह—**न हीति**। समुदाचरन्त्यौ भेदेन भासमाने वृत्ती वर्तने ययोस्ते तथा। उल्लूकादेरविवेकादारोप इत्यर्थः। इतरेतरभावानुपपत्तिर्नाम इतरेतरभावप्रतीत्यनुपपत्तिर्विवक्षिता, तन्मात्रानुपपत्तिसाधनेऽध्यासवादिनं प्रति सिद्धसाधनत्वात् इत्यभिप्रेत्य दृष्टान्ते स्थित्वा वक्ति— **परस्परात्मतया प्रतिपत्तुमिति**। इतरस्येतरत्र भाव इति योजनायां धर्मिणो-

परिमलः।

व्याघ्रशरीरं योगिसंकल्पकरणेन कृतमिति कृत्रिमम्। पटः शुक्ल इति गुणशब्दः तद्वतिं निरूढलक्षणया प्रयुज्यते। रथाङ्गशब्दश्चक्रवाकशब्दैकदेशपर्यायः तद्वाच्ये सांप्रतिकलक्षणया प्रयुज्यते। एवं च 'अहमेव त्वम्' इत्यत्रैव भाष्यकारीयेऽपि युष्मत्प्रयोगे सांप्रतिकी गौणी वृत्तिः। सा चात्यन्तभेदावभासद्योतनार्था। इदंकारस्याहंकाराविरोधकतया स्फुटभेदानवभासादिति भावः। 'अयमहमस्मि' इति च्छन्दोगतैत्तिरीयाणां श्रुतिः। **अविवेकादिति**। येषां तु तमःप्रकाशयोर्विवेको भेदग्रहोऽस्ति तेषां तयोरन्योन्यात्मत्वेन अस्फुरणं नियतमेवेति भावः। नन्वितरेतरभावानुपपत्तिः तत्प्रतीत्यनुपपत्तिरिति किमर्थमिदं क्लिष्टव्याख्यानम्? अधिष्ठानसामान्यांशाध्यस्यमानविशेषांशयोः क्वचिद्वास्तवतादात्म्ये सत्येव तत्प्रमितिजन्यसंस्कारापेक्षः 'इदं रजतम्' इत्याद्यध्यासो दृष्टः, तदसंभव इहाध्यासासंभवहेतुत्वेनोच्यत इत्यस्त्वित्याशङ्क्य आह—**तन्मात्रानुपपत्तिसाधने इति**। आत्मानात्मनोर्वास्तवतादात्म्यासंभवस्य सिद्धान्तिनाप्यङ्गीकृतत्वात् विरोधहेतुना तत्सा-

भामती ।

तादात्म्यमिति यावत्; तस्यानुपपत्ताविति । स्यादेतत् । मा भूद्धर्मिणोः परस्परभावः; तद्धर्माणां तु जाड्यचैतन्यनित्यत्वानित्यत्वादीनाम् इतरेतराध्यासो भविष्यति । दृश्यते हि धर्मिणोर्विवेकग्रहणेऽपि तद्धर्माणामध्यासः, यथा कुसुमाद्ध्देन गृह्यमाणेऽपि स्फटिकमणावतिस्वच्छतया जपाकुसुमप्रतिबिम्बोद्ग्राहिणि 'अरुणः स्फटिकः' इत्यारुण्यविभ्रम इत्यत इदमुक्तम्— **तद्धर्माणामपीति** । इतरेतरत्र धर्मिणि धर्माणां भावो विनिमयः, तस्यानुपपत्तिः । अयमभिसंधिः— रूपवद्धि द्रव्यमतिस्वच्छतया रूपवतो द्रव्यान्तरस्य तद्विवेकेन गृह्यमाणस्यापि

कल्पतरुः ।

रपि संसर्गाध्यासनिषेधः स्यात्; तथा च सिद्धसाधनं तादात्म्याध्यासाभ्युपगमात्; तन्निवृत्त्यर्थमाह— **इतरेतरत्वमिति** । विनिमयो व्यत्यासः । **रूपवत इति** । गगनस्य तु स्वगतसवितृकरादिप्रतिबिम्बद्वारा सलिले प्रतिबिम्बितत्वभ्रमः । ततश्च

परिमलः ।

धनं सिद्धसाधनदूषितमित्यर्थः । ननु बुद्धिपूर्विकायां गृहक्षेत्रादिपरिवर्तनायां प्रसिद्धस्य विनिमयशब्दस्य कथमत्र प्रयोग इत्याशङ्क्य व्यत्यासमात्रे लक्षणयेत्याह—**विनिमय इति** ॥

ननु 'रूपवत एव प्रतिबिम्बः' इति नास्ति नियमः, जानुदघ्ने कूपजले दूरविशालतलमलिनतादियुक्तगगनप्रतिबिम्बदर्शनात् इत्याशङ्क्याह— **गगनस्येति** । ननु 'रूपवत एव प्रतिबिम्बः' इति नियममाश्रित्य आलोकप्रतिबिम्बे गगनप्रतिबिम्बत्वविभ्रममात्रं न तु गगनस्य प्रतिबिम्बोऽस्तीति कल्पने 'रूपवत एव चाक्षुषत्वम्' इति नियममनुरुध्य गगनप्रसृतालोके एव तलमलिनताध्यासः गगने तलमलिनताध्यास इति विभ्रममात्रमित्यपि कल्प्येत, तथा च 'अप्रत्यक्षेऽपि ह्याकाशे बालास्तलमलिनताद्यध्यस्यन्ति' इति भाष्यविरोधः । यदि 'रूपवदेव चाक्षुषम्' इति न नियमः किं तु 'रूपवदरूपं वा रूपोपधानेन चाक्षुषम्' इति नियमः अतो नीरूपस्यापि गगनस्य अध्यस्यमानतलमलिनताद्युपधानेन चाक्षुषत्वमुपपद्यत इत्युच्येत, तर्हि इहापि 'रूपवतः प्रतिबिम्बः' इति न नियमः किं तु 'रूपोपधानेन प्रतिबिम्बविभ्रमः' इति अतः अध्यस्यमानतलमलिनताद्युपधानेन गगनप्रतिबिम्बविभ्रम उपपादयितुं शक्यः, तथैव देहे चेतनप्रतिबिम्बविभ्रमोऽप्युपपादयितुं शक्यः चेतनेऽपि देहगतरूपेणैव रूपोपधानसंभवात् मलिनदर्पणादिषु उपाधिगतश्यामिकोपधानेनापि तथैव प्रतिबिम्बविभ्रमदर्शनात्– इति चेत्; उच्यते— जले गगनप्रति-

भामती।

च्छायां गृह्णीयात्, चिदात्मा तु नीरूपो विषयी न विषयच्छायामुद्ग्राहयितुमर्हति। यथाहुः— 'शब्दगन्धरसादीनां कीदृशी प्रतिबिम्बता' इति। तदिह पारिशेष्याद्विषयविषयिणोरन्योन्यात्मसंभेदेनैव तद्धर्माणामपि परस्परसंभेदेन विनिमयात्मना भवितव्यम्, तौ चेद्धर्मिणौ अत्यन्तविवेकेन गृह्यमाणावसंभिन्नौ, असंभिन्नाः

कल्पतरुः।

रूपवत एव प्रतिबिम्बभाव इति व्याप्तेर्न व्यभिचारः। आत्मनस्तु नास्ति प्रतिबिम्बितत्वभ्रमकरं किंचिदित्यर्थः। धर्माध्यासो हि धर्मिणोरैक्यारोपेण प्रतिबिम्बभावेन वा दृष्टः; इह प्रतिबिम्बभावे निरस्ते आरोपः शिष्यत इत्याह— तदिह पारिशेष्यादिति। अध्यासानुपपत्तिमुक्त्वा तदभावोपसंहारार्थम् अतोऽस्मत्प्रत्ययेत्यादिभाष्यम्।

परिमलः।

बिम्बमभ्युपगच्छताप्यालोकप्रतिबिम्बोऽवश्यमभ्युपगन्तव्यः, अन्यथा कूपाधिकपरिमाणरूपस्य प्रतिबिम्बगतविशालत्वस्य अचाक्षुषत्वप्रसङ्गात्, यत्र रूपं भासते तत्रैव परिमाणस्य चाक्षुषत्वात्; एवं च गगनालोकयोरुभयोरपि प्रतिबिम्बावङ्गीकृत्य आलोकप्रतिबिम्बे भासमानस्य विशालत्वस्य गगनप्रतिबिम्बगतत्वेन विभ्रम इति कल्पनात् वरमालोकप्रतिबिम्ब एवाधःप्रदेशे तलमलिनताद्यध्यासः अन्यत्र तदीयरूपविशालताभ्यां सह स्फुरणं तत्रैव गगनप्रतिबिम्बत्वविभ्रम इति कल्पनम्। बहिस्तु 'नीलं नभः' 'विशालं नभः' इत्यादिप्रत्ययस्य आलोकविषयत्वं न कल्पनीयम्, जलमध्ये नभःप्रतिबिम्बस्येव बहिर्नभसोऽसंप्रतिपत्त्यभावेन यथाव्यवहारं नभसि नीलिमाध्यासस्य तस्मिन्नेव तत्प्रसृतालोकगतरूपाध्यासेन तदीयविशालतानुभवस्य चाङ्गीकारे बाधकाभावात्, अतः 'रूपवत एव प्रतिबिम्बः' इति नियमे व्यभिचाराभावात् नात्मनः प्रतिबिम्बो घटत इति भावः। गगनप्रतिबिम्बत्वविभ्रमविषयालोकप्रतिबिम्बवत् आत्मप्रतिबिम्बत्वभ्रमविषयो देहादौ रूपवतः कस्यचित् प्रतिबिम्बोऽस्ति चेत्, तस्माच्च प्रतिबिम्बोपाधेर्देहस्य जपाकुसुमप्रतिबिम्बात्स्फटिकस्येव विवेकाग्रहोऽप्यस्ति चेत्, अध्यस्तगगनधर्मस्य नीलिम्नो जलमध्ये भासमानस्य आलोकप्रतिबिम्बधर्मत्वेनेव अध्यस्तात्मधर्मस्य चैतन्यादेर्देहमध्ये भासमानस्य आत्मप्रतिबिम्बत्वभ्रमविषयान्यप्रतिबिम्बधर्मत्वेन प्रतिभासः संभवेत्, एवं प्रतिभासतस्तद्धर्मस्य चैतन्यादेः प्रतिबिम्बग्राहिणि देहादावध्यासश्चोपपद्यते जपाकुसुमप्रतिबिम्बारुणिम्न इव स्फटिके। न त्वात्मप्रतिबिम्बत्वभ्रमाविषयः कस्यचित्प्रतिबिम्बोऽस्ति देहादावित्याह— आत्मनस्त्विति॥

भावानुपपत्तिः— इत्यतः अस्मत्प्रत्ययगोचरे विषयिणि चिदात्मके युष्मत्प्रत्ययगोचरस्य विषयस्य तद्धर्माणां चाध्यासः तद्विपर्ययेण विषयि-

भामती ।

सुतरां तयोर्धर्माः स्वाश्रयाभ्यां व्यवधानेन दूरापेतत्वात् । तदिदमुक्तम्— सुतरामिति । तद्विपर्ययेणेति । विषयविपर्ययेणेत्यर्थः । मिथ्याशब्दः अपह्नववचनः । एतदुक्तं भवति— अध्यासो भेदाग्रहेण व्याप्तः, तद्विरुद्धश्चेहास्ति भेदग्रहः, स भेदाग्रहं निवर्तयंस्तद्व्याप्तमध्यासमपि निवर्तयतीति । मिथ्येति भवितुं युक्तं यद्यपि तथापीति योजना ॥

इदमत्राकूतम्—भवेदेतदेवं यदि 'अहम्' इत्यनुभवे आत्मतत्त्वं प्रकाशेत । न त्वेतदस्ति । यथा हि समस्तोपाध्यनवच्छिन्नानन्तानन्दचैतन्यैकरसमुदासीनमेकमद्वितीयमात्मतत्त्वं श्रुतिस्मृतीतिहासपुराणेषु गीयते । न चैतान्युपक्रमपरामर्शोपसंहारैः क्रियासमभिहारेणेदृगात्मतत्त्वमभिदधति तत्पराणि सन्ति शक्यानि शक्रेणाप्युपचरितार्थानि कर्तुम् । अभ्यासे हि भूयस्त्वमर्थस्य भवति यथा 'अहो दर्शनीया अहो दर्शनीया' इति, नाल्पत्वमपि, प्रागेवोपचरितत्व-

कल्पतरुः ।

विषयविपर्ययेणेति । विषयोऽचेतनः, तस्य विपर्ययश्चैतन्यम् । इत्थंभावे तृतीया । चिदात्मन ऐक्यारोपे हि विषयस्य चेतनत्वमिव भवतीति । तथापीति भाष्यसूचितामध्यासाभावहेतोर्विवेकग्रहस्यासिद्धिमाह— इदमत्राकूतमित्यादिना । यथा श्रुत्यादिष्वात्मतत्त्वं गीयते तथा 'अहम्' इत्यनुभवे यदि प्रकाशेत, न त्वेतदस्तीति योजना । परामर्शो मध्ये निर्देशः क्रियासमभिहारः पौनःपुन्यम् । दर्शनीया सुन्दरी ।

परिमलः ।

ननु इतरेतरभावानुपपत्तिः इतरेतरभावप्रतीत्यनुपपत्तिरिति व्याख्यातम्, अतः सैवाध्यासाभाव इति तेनैव तत्साधने साध्यावैशिष्ट्यमित्याशङ्क्य हेतुसाध्ययोर्भेदं दर्शयति— अध्यासानुपपत्तिमुक्त्वेति । अनुपपत्तिः अन्योन्यानात्मतास्फुरणेन प्रतिबन्धादुत्पत्त्यनर्हत्वम्; स हेतुः, अध्यासाभावः ततो भिन्नः साध्य इति भावः । "अथ वा 'अहं मनुष्यः' इत्यादिप्रतीतावतस्मिंस्तत्प्रतीतित्वस्याध्यासलक्षणस्याभाव उक्तः; लक्ष्याध्यासरूपत्वस्याभावप्रदर्शनार्थम् 'अतोऽस्मत्प्रत्यय—' इत्यादिभाष्यम्" इति व्याख्यान्तरं केषुचित्कोशेषु दृष्टम् । अस्यां व्याख्यायाम् 'अतोऽस्मत्प्रत्यय—' इत्यतः प्राचीनग्रन्थः 'अहं मनुष्यः'

भामती।

मिति। अहमनुभवस्तु प्रादेशिकमनेकविधशोकदुःखादिप्रपञ्चोपप्लुतमात्मानमादर्शयन्कथमात्मतत्त्वगोचरः कथं वानुपप्लवः? न च ज्येष्ठप्रमाणप्रत्यक्षविरोधादाम्नायस्यैव तदपेक्षस्याप्रामाण्यमुपचरितार्थत्वं वेति युक्तम्, तस्यापौरुषेयतया निरस्तसमस्तदोषाशङ्कस्य, बोधकतया च स्वतःसिद्धप्रमाणभावस्य स्वकार्ये प्रमितावनपेक्षत्वात्। प्रमितावनपेक्षत्वेऽप्युत्पत्तौ प्रत्यक्षापेक्षत्वात्तद्विरोधादनुत्पत्तिलक्षणमस्याप्रामाण्यमिति चेत्, न, उत्पादकाप्रतिद्वन्द्वित्वात्। न ह्यागमज्ञानं सांव्यवहारिकं प्रत्यक्षस्य प्रामाण्यमुपहन्ति येन कारणाभावान्न भवेत्; अपि तु तात्त्विकम्। न च तात्त्विकमस्योत्पादकम्, अतात्त्विकप्रमाणभावेभ्योऽपि सांव्यवहारिकप्रमाणेभ्यस्तत्त्वज्ञानोत्पत्तिदर्शनात्। तथा च वर्णे ह्रस्वत्वदीर्घत्वादयोऽन्यधर्मा अपि समारोपिताः तत्त्वप्रतिपत्तिहेतवः। न हि लौकिकाः 'नागः' इति वा 'नगः' इति वा पदात्कुञ्जरं वा तरुं वा प्रतिपद्यमाना भवन्ति भ्रान्ताः। न चानन्यपरं वाक्यं स्वार्थे उपचरितार्थं युक्तम्। उक्तं हि— 'न विधौ परः

कल्पतरुः।

न त्वेतदस्तीति यदुक्तं तत्प्रपञ्चयति— अहमनुभवस्त्विति। उपप्लवो विपर्यासः सोऽस्य नास्तीति अनुपप्लवः। अहमनुभवः कथं विपर्यासशून्य इत्यर्थः। कथमात्मतत्त्वगोचर इति अज्ञातत्वं सूचितम्। उपक्रमादिना तात्पर्यसिद्धावपि उपजीव्यविरोधादप्रामाण्यमाशङ्क्याह— न चेत्यादिना। ज्येष्ठस्यापि पौर्वापर्यन्यायेन बाधमाशङ्क्याह— तदपेक्षस्येति। आगमस्य किं स्वजन्यज्ञानगतप्रमितत्वे प्रत्यक्षापेक्षा, उत तदुत्पत्तौ? आद्येऽपि किं विपर्यासशङ्कानिरासाय, संवादाय वा? आद्यद्वयं निरस्य द्वितीयं शङ्कते— प्रमितावितिः। आगमस्य किं प्रत्यक्षगतव्यावहारिकप्रामाण्येन विरोधः, उत तत्त्ववेदकत्वेन? नाद्यः इत्याह— न हीति। द्वितीयं प्रत्याह— न च तात्त्विकमिति। एवमप्रामाण्यं निराकृत्य उपचरितार्थत्वं निरस्यति— न चानन्यपरमिति। पूर्वं

परिमलः।

इत्यादिप्रतीतौ अध्यासलक्षणाभावसमर्थने फलतः पर्यवसितो द्रष्टव्यः। ज्येष्ठस्यापीति। अपच्छेदन्यायेन पूर्वस्य परेण बाधमाशङ्क्य तदपेक्षस्येति विशेषितम्, तेनोत्तरस्य पूर्वापेक्षायामुपक्रमाधिकरणन्याय एव प्रवर्तत इति सूचितमित्यर्थः। आद्यद्वयं निरस्येति। अपौरुषेयतयेत्यादिषष्ठ्यन्तविशेषणद्वयेनेति शेषः। एवमप्रामाण्यं निराकृत्येति। ननूत्पादकाप्रतिद्वन्द्वित्वादित्यप्रामाण्यनिराकरणहेतुनैवोपचरितार्थत्वमपि निराकृतम्, किमर्थं पुनस्तन्निराकरणाय प्रागुपपादितमनन्यपरत्वं स्मार्यत इत्याशङ्क्याह— पूर्वमिति॥

परिमलः ।

नन्विह का पुनरप्युपजीव्यविरोधशङ्का, यन्निरासाय अनन्यपरत्वहेत्वन्वेषणम् ? उत्पादकाप्रतिद्वन्द्वित्वहेतुविवरणग्रन्थ एव हि यदुपजीव्यं न तेन विरोधः येन विरोधः न तदुपजीव्यम् इत्युपजीव्यविरोधशङ्का निरस्ता । उच्यते— उपजीव्योपजीवकविरोधोऽत्र द्वेधा समाधातुं शक्यते—उपजीव्यं प्रत्यक्षमौत्सर्गिकात्तत्त्वावेदकप्रमाणभावात्प्रच्याव्य तस्य सांव्यवहारिकविषयसमर्पणेन वा, उपजीवकं वाक्यजातमौत्सर्गिकान्मुख्यार्थात्प्रच्याव्य तस्यौपचारिकविषयसमर्पणेन वा। तत्र 'उपजीव्योपमर्दादुपजीवकोपमर्दो वरम्' इति न्यायमवलम्ब्य शङ्कायां तत्समाधानार्थमनन्यपरत्वस्य पुनरनुकीर्तनम् । इत्थं च तत्समाधानप्रकारो विवक्षितः— अस्त्युपजीव्यस्यापि बलवता उपजीवकेनोपमर्दः पूर्वतन्त्रे निर्णीतः । यथा—'विप्रतिषेधे करणं समवायविशेषादितरमन्यस्तेषां यतो विशेषः स्यात्' इत्यधिकरणे चिन्तितम् । कुण्डपायिनामयने श्रूयते– 'यो होता सोऽध्वर्युः' इति । तत्र होत्रध्वर्युशब्दयोर्भिन्नपुरुषवाचिनोर्मुख्यसामानाधिकरण्यायोगादन्यतरस्य लक्षकत्वे कल्पनीये प्रथमश्रुतस्य होतृशब्दस्य मुख्यप्रवृत्ततया चरमश्रुतस्य अध्वर्युशब्दस्य अध्वर्युकर्मलक्षकत्वमिति तल्लक्षितेऽध्वर्युकर्मणि कर्तृत्वेन होतुर्विधिः । तेन प्रकृतितः प्राप्तयोरध्वर्युहोत्रोरध्वर्योर्निवृत्तिः । होत्रैवाध्वर्यवमपि कर्तव्यमिति व्यवस्था । तत्र यूपपरिव्याणकाले 'परिवीरसि' 'युवा सुवासाः' इत्यनयोः परिव्याणे क्रियमाणानुवादिकरणमन्त्रयोः अध्वर्युणा होत्रा च प्रयोज्ययोः परिव्याणसंकल्पप्रभृति तत्समाप्तिपर्यन्तमनुवर्तमानः क्रियमाणानुवादी तन्मध्यपाती परिव्याणारम्भसंनिपाती करणमन्त्र इति कालैक्यमापन्नयोः तथैव कुण्डपायिनामयनेऽपि प्राप्तौ एकेन होत्रा युगपदुभयोः प्रयोक्तुमशक्यतया अवश्यमन्यतरबाधे वक्तव्ये प्रत्यक्षश्रुतिविधीयमानाध्वर्युकर्मबाधायोगादानुमानिकप्रकृतिवच्छब्दप्राप्तहोतृकर्मबाध इति । तत्र होतुः प्रकृतिवच्छब्देन प्राप्तिः प्रत्यक्षवचनस्योपजीव्या, विकृतौ पदार्थप्राप्तिरुपकारमुखेणेति होतृकर्मप्राप्तिरपि होतृप्राप्त्यर्थत्वेनोपजीव्या । सा चोपजीव्यहोतृकर्मप्राप्तिः अविशेषप्रवृत्ता 'युवा सुवासाः' इति मन्त्रप्रयोगमपि स्पृशति । अध्वर्युशब्दश्च अध्वर्युकर्माणि लक्षयन् 'परिवीरसि' इति मन्त्रप्रयोगमपि स्पृशति । उभयोरप्युदाहृतमन्त्रद्वयप्रयोगातिरिक्तविषयत्वेन सावकाशताप्यस्ति । एवं सत्यपि उपजीवकस्य प्रत्यक्षवचनत्वेन प्राबल्यादुपजीव्यस्यैवोपमर्दः समाश्रितः ॥

तथा 'हिरण्यगर्भे पूर्वस्य मन्त्रलिङ्गात्' इत्यधिकरणे चिन्तितम्—वायव्यपशौ श्रूयते—'हिरण्यगर्भः समवर्त्तताग्र इत्याधारमाधारयति' इति । तत्र किममन्त्रके प्रजापतिदेवताके प्रथमाधारे मन्त्रो विधीयते, उत मन्त्रवतीन्द्रदैवत्ये द्वितीयाधारे प्राकृतमन्त्रापवादकं मन्त्रान्तरं विधीयत इति संशये, हिरण्यगर्भशब्दस्य प्रजापतिनामत्वप्रसिद्धेः

कल्पतरुः।

भेदाग्रहसिद्ध्यर्थमिदमुक्तम्; इदानीमुपजीव्यविरोधाभावाय। 'विधौ विधायके शब्दे परो लक्ष्यः शब्दार्थो न भवति' इति शबरस्वामिनोक्तम्; तत्तुल्यं वेदान्तेष्वपि

परिमलः।

'प्रजापतिर्वै हिरण्यगर्भः' इति वाक्यशेषाच्च विनियोज्यमन्त्रस्वारस्यानुरोधेन प्रथमाधारे इति पूर्वः पक्षः। द्वितीयाधारे मन्त्रकार्यनियमादृष्टस्य क्लृप्तत्वादक्लृप्तत्वाच्च प्रथमाधारे तदकल्पनालाघवानुसारेण द्वितीयाधारे मन्त्रविधिरिति सिद्धान्त इति। अत्र आधारमन्त्रविधौ मन्त्र उपजीव्यः, प्रसिद्धं मन्त्रमादाय तद्विनियोगस्य कार्यत्वात्। आधारे तद्विधिरुपजीवकः। तत्र मन्त्रः कथंचिदिन्द्रे योगकल्पनया सावकाशः। तदुपजीवकविधिगताधारशब्दस्तु द्वितीयाधार इव प्रथमाधारेऽपि प्रसिद्धवृत्त्यैव सावकाशः। एवं सत्यपि लाघवानुगृहीतस्योपजीवकस्य प्राबल्येनोपजीव्यस्य क्लिष्टवृत्तिराश्रिता। एवमिहाप्यद्वैतवाक्यजातस्योपक्रमादितात्पर्यलिङ्गयुक्तत्वेन प्राबल्यात् तदुपजीव्यस्य प्रत्यक्षस्यैव व्यावहारिकविषयसमर्पणेनोपमर्दः कल्पयितुं युक्त इति। एतेन उपजीव्यविरोधे तात्पर्यवत्त्वमेव न सिध्यतीत्यपि शङ्का निरस्ता, तदुपजीव्यविरोधेऽपि तात्पर्यवता वाक्येनोपजीव्योपमर्दस्य दर्शितत्वात्॥

विधायके इति। नन्वेतदयुक्तम्, 'सोमेन यजेत' इति विधिवाक्ये सोमवता यागेनेति मत्वर्थलक्षणाङ्गीकारात्; तत्तुल्यमित्येतदप्ययुक्तम्, तत्त्वमसिवाक्ये भागत्यागलक्षणाङ्गीकारादिति चेत्; उच्यते— विधिवाक्यं तत्तुल्यं वा तात्पर्यवद्वाक्यं यत्किंचिदनुग्रहार्थम् अन्यमर्थं नेतुमयुक्तमिति तदभिप्रायः। एवं च विशिष्टविधिपरे सोमवाक्ये सोमद्रव्यतादात्म्यविशिष्टयागविध्यभ्युपगमे तस्य विशिष्टस्य विधेयस्य दध्यादिवत् लोकसिद्धत्वाभावेन विधिवाक्यादेव देवताधिकरणोदाहरिष्यमाणरेवत्याधारवारवन्तीयविशेषणस्येव विना तात्पर्यं सिद्धिरेष्टव्या। न च तात्पर्यरहितादागमाद्यागसोमलताभेदग्राहिप्रत्यक्षविरुद्धार्थः सिध्यतीति तत्र तदविरोधाय मत्वर्थलक्षणाश्रयणम्। अद्वैतश्रुतेस्तु तात्पर्यविषयादन्यत्र नयनमेव नास्तीति न कश्चिद्दोषः। ननु प्रत्यक्षज्ञानप्रामाण्यं ज्ञानसमानवित्तिवेद्यतया ज्ञाने प्रकाशमाने विशिष्य नियमेन प्रतीतं नाद्वैतश्रुत्या बाधनमर्हतीत्याशङ्क्य विशिष्य नियमेन प्रतीतस्यापि पूर्वस्य परेण बाधे टीकायामपच्छेदन्यायोदाहरणं कृतम्। तत्र पूर्वस्य परोपजीव्यत्वं नास्तीति वैषम्याशङ्कानिराकरणपूर्वकं तदवतारयति— **एवं तावदिति।** किमद्वैतश्रुतेः प्रत्यक्षं प्रमाणं सदुपजीव्यमिति प्रामाण्यस्य प्राबल्यमुच्यते, उतानुपजीव्यत्वेऽपि प्रथमप्रतीतत्वमात्रेण? आद्यपक्षो न शङ्काई इत्याह—

भामती ।

शब्दार्थः ' इति । ज्येष्ठत्वं च अनपेक्षितस्य बाध्यत्वे हेतुः न तु बाधकत्वे, रजतज्ञानस्य ज्यायसः शुक्तिज्ञानेन कनीयसा बाधदर्शनात् । तदनपबाधने तदपबाधात्मनः तस्योत्पत्तेरनुपपत्तेः । दर्शितं च तात्त्विकप्रमाणभावस्यानपेक्षितत्वम् । तथा च पारमर्षं सूत्रम्— ' पौर्वापर्ये पूर्वदौर्बल्यं प्रकृतिवत् ' इति । तथा च ' पूर्वात्परबलीयस्त्वं तत्र नाम प्रतीयताम् । अन्योन्यनिरपेक्षाणां यत्र जन्म

कल्पतरुः ।

अनवगतार्थबोधित्वेन तत्परत्वसाम्यादिति । एवं तावदुपजीव्यत्वं प्रत्यक्षस्य निराकृत्य मुख्यत्वमात्रस्य प्राबल्यहेतुत्वं निराकरोति— **ज्येष्ठत्वं चेति** ॥

' पौर्वापर्ये—' इति षष्ठे स्थितम् । ज्योतिष्टोमे अन्योन्यं संबध्य यज्ञशालातो निर्यातानामृत्विजां विच्छेदनिमित्तं प्रायश्चित्तं श्रूयते ' यद्युद्गातापच्छिद्येतादक्षिणेन

परिमलः ।

उपजीव्यत्वमिति । प्रत्यक्षस्य प्रमाणस्य सत इति शेषः । द्वितीयपक्षनिराकरणार्थमुत्तरग्रन्थ इत्याह— **मुख्यत्वमात्रस्येति** ॥

ज्योतिष्टोमे बर्हिष्पवमानार्थं हविर्धानात् निर्गच्छतां ऋत्विग्यजमानानामन्वारम्भणं विहितम्— ' अध्वर्युं प्रस्तोतान्वारभते प्रस्तोतारमुद्गातोद्गातारं प्रतिहर्ता ' इत्यादिना । तद्विच्छेदे प्रायश्चित्तमाम्नायते— ' यद्युद्गातापच्छिद्येतादक्षिणं तं यज्ञमिष्ट्वा तेन पुनर्यजेत, तत्र तद्दद्याद्यत्पूर्वस्मिन्दास्यन्स्यात्, यदि प्रतिहर्तापच्छिद्येत सर्ववेदसं दद्यात् ' इति । तत्र पूर्वनिमित्तकर्तव्यताबुद्धिः परानिमित्तकर्तव्यताबुद्धया यथा बाध्यते तथा श्रुतिजन्याद्वैतबुद्धया परया पूर्वप्रत्यक्षजन्या कर्तृत्वादिबुद्धिर्बाध्यते । बाधितापि सा तदुचितविषयसमर्पणेन शुक्तिरूप्यादिबुद्धिवदनुग्राह्येति यावद्ब्रह्मज्ञानाबाध्यव्यावहारिकविषयाङ्गीकारात् तद्विषयं प्रत्यक्षादि व्यावहारिकप्रमाणमिति व्यपदिश्यते । व्यावहारिकमेव च प्रत्यक्षादिसिद्धं तत्तत्कारणस्वरूपं प्रमित्युत्पत्तावपेक्षितमिति तदबाधात् तद्वततात्त्विकांशबाधेऽपि शरशास्त्रस्य वेद्यास्तरणप्राप्त्यर्थं प्रकृतिवच्छब्दापेक्षस्य तत्प्राप्तकुशांशबाधे इव अपरामृष्टप्रकृतिवच्छब्दजन्यबुद्धौ कुशांशप्रामाण्यबाधे इव च नोपजीव्यविरोध इत्याशयः ॥

यत्तु एकस्मिन्नपि प्रयोगे क्रमिकाभ्यां निमित्ताभ्यां तत्तन्नैमित्तिककर्तव्यतयोर्बदरफले श्यामरक्तरूपयोरिव क्रमेणोत्पादाद्रूपज्ञानद्वयवत् कर्तव्यताज्ञानद्वयमपि प्रमाणमेवेति न परेण पूर्वज्ञानबाधेऽपच्छेदन्याय उदाहरणमिति, तन्न । अज्ञस्य सतः कर्तव्यत्वम्, न

कल्पतरुः।

यजेत, यदि प्रतिहर्ता सर्वस्वदक्षिणेन' इति। तत्रोद्गातृप्रतिहर्त्रोः क्रमेण विच्छेदे विरुद्धप्रायश्चित्तयोः समुच्चयासंभवात् किं पूर्वं कार्यम् उत परम् इति विशये अनुपजातविरोधित्वात्पूर्वमिति पूर्वपक्षे; राद्धान्तः—पौर्वापर्ये सति निमित्तयोः पूर्वस्य नैमित्तिकस्य दौर्बल्यम्, उत्तरस्य निरपेक्षस्य तद्बाधकतयोदितत्वात् पूर्वोदयकाले उत्तरस्याप्राप्तत्वेन पूर्वेण बाध्यत्वायोगात्। उक्तं हि— 'पूर्वं परमजातत्वादबाधित्वैव जायते। परस्यानन्यथोत्पादादाद्यबाधेन संभवः' इति। प्रकृतिवत्, यथा हि प्रकृतौ क्लप्तोपकाराः कुशाः प्रथममतिदेशेन विकृतावुपकाराकाङ्क्षिण्यां प्राप्ताः

परिमलः।

च पश्चाद्धाविप्रतिहर्त्रपच्छेदवति पूर्वप्रवृत्तोद्गात्रपच्छेदप्रायश्चित्तस्याङ्गत्वमस्ति, आहवनीयशास्त्रस्य पदहोमातिरिक्तहोमविषयत्ववत् तदङ्गत्वबोधकशास्त्रस्य पश्चाद्धाविप्रतिहर्त्रपच्छेदरहितक्रतुविषयतायाः सिद्धान्तितत्वात्। उक्तं हि न्यायरत्नमालायाम्— 'तत्रैवं सति शास्त्रार्थो भवति—पश्चाद्धाव्युद्गात्रपच्छेदविधुरप्रतिहर्त्रपच्छेदवतः क्रतोः सर्ववेदसदानमङ्गम्, एवमुद्गात्रपच्छेदेऽपि द्रष्टव्यम्' इति। न च मीमांसकमर्यादामतिक्रम्य परकर्तव्यतानिवर्त्य पूर्वकर्तव्यत्वं निर्वक्तुमपि शक्यम्। न हि कृतिसाध्यत्वयोग्यत्वं तत्, तस्य पश्चादपि सत्त्वात्। नापि फलमुखकृतिसाध्यत्वम्, तस्य पूर्वमप्यजननात्। नाप्यङ्गत्वम्, तस्य संनिपत्योपकारकत्वफलोपकारकत्वान्यतररूपकारणताविशेषत्वेन तत्र योग्यत्वफलमुखत्वविकल्पे पूर्वोक्तदोषानतिवृत्तेः। न च कर्तव्यत्वं नाम धर्मान्तरमागमापायि कल्पनीयम्, मानाभावात्॥

सत्यपि प्रत्यक्षे संनिहिते शराम्नाने कल्प्यातिदेशवाक्यप्रापणीयानां दूरस्थितानां कुशानां ततः प्रागेव ग्रहणे हेतुगर्भं विशेषणम्—**उपकाराकाङ्क्षिण्यामिति**। अस्यार्थः—फलजनकत्वेन कर्माणि बोधयतां प्रधानविधीनां कथमनेन फलं जननीयमित्यनिर्ज्ञातप्रकारतया प्रधानगतफलजननसामर्थ्योद्बोधके अङ्गजन्यदृष्टादृष्टकार्यसमुदायरूपे उपकारे एव प्रथममाकाङ्क्षा भवति; तन्मुखेनोपकारजनकपदार्थरूपेष्वङ्गेष्वाकाङ्क्षा। एवं च प्राकृतप्रधानविधिः प्रथमाकाङ्क्षितमप्युपकारं क्वचिदपि क्लृप्तमपश्यन् अगत्या प्रकरणाम्नातान् पदार्थान् गृहीत्वा तत्तत्पदार्थशक्त्यनुसारेण दृष्टादृष्टकार्यविशेषकल्पनया तत्समुदायरूपमुपकारं लब्ध्वा निर्वृतो भवति। वैकृतविधयस्तु स्वसंनिधौ क्लृप्तमुपकारमपश्यन्तोऽपि प्रकृतौ क्लृप्तं तं पश्यन्तः स्वाकाङ्क्षया दूरस्थितमपि तमेव गृह्णन्तः तन्मुखेन तज्जननशक्तत्वेनावधृतं प्राकृतपदार्थजातमेव प्रथमं गृह्णन्ति। यदाहुः— 'क्लृप्तोपकारसाका-

भामती ।

धियां भवेत्' इति । अपि च येऽप्यहंकारास्पदमात्मानमास्थिषत तैरप्यस्य न तात्त्विकत्वमभ्युपेतव्यम्, 'अहमिहैवास्मि सदने जानानः' इति सर्वव्यापिनः प्रादेशिकत्वेन ग्रहणात् उच्चतरगिरिशिखरवर्तिषु महातरुषु भूमिष्ठस्य दूर्वाप्रवालनिर्भासप्रत्ययवत् । न चेदं देहस्य प्रादेशिकत्वमनुभूयते न त्वात्मन इति सांप्रतम् । न हि तदैवं भवति 'अहम्' इति, गौणत्वे वा न 'जानानः' इति । अपि च परशब्दः परत्र लक्ष्यमा-

कल्पतरुः ।

कल्प्योपकारतया चरमभाविभिरपि शरैर्निरपेक्षैर्बाध्यन्ते तद्वदिति। एवं तावच्छ्रुत्यादिगम्यात्मतत्त्वस्य अहंप्रत्ययेऽनवभासात् अविविक्तविषयत्वमुक्तम्; संप्रति वादिनिरूपितस्यात्मनोऽनवभासादपि तदाह— अपि चेति । सर्वगतात्मवादिनं प्रत्याह— अहमिहेति । न हि तदैवमिति । तव मते अहंप्रत्ययस्य विविक्तात्मविषयत्वादित्यर्थः । ननु तत्रात्मवचनोऽहंशब्दः देहे उपचर्यते, अत आह— गौणत्वे वेति । भवतीत्यनुषङ्गः । उपचरितात्मभावस्य देहस्य ज्ञातृत्वानुपपत्तेः 'जानानः' इति प्रती-

परिमलः ।

ङ्क्षाः प्रथमं प्राकृतैः सह । संबध्यन्ते समीपस्थं विकाराः प्रोज्झ्य चोदितम्' इति । ततश्च वैकृतविधिसंनिध्याम्नातस्य शरादेर्वैशेषिकाङ्गजातस्य पश्चादन्वय इति ॥

निरपेक्षैरिति । प्रत्यक्षश्रुतत्वेन पुरुषबुद्धिमूलप्रापकप्रमाणकल्पनानपेक्षैरित्यर्थः । यद्वा कुशप्रातिनिरपेक्षैरित्यर्थः । ननु पूर्वनिमित्तवति प्रयोगे तन्निमित्तककर्तव्यताबुद्धेः परनिमित्तककर्तव्यताबुद्ध्या भ्रमत्वापादनेऽपि पूर्वनैमित्तिकशास्त्रस्य नात्यन्तबाधः, पूर्वनिमित्तमात्रवति प्रयोगे चारितार्थ्यात् । अहंप्रत्ययस्य कर्तृत्वभोक्तृत्वादिविषयस्यात्मनि अद्वैतवाक्यजातेन बाधे तु तन्मूलस्य प्रमाणस्य न क्वचिदपि चारितार्थ्यम् । न च व्यावहारिकविषयालम्बनतया तत्रैव चारितार्थ्यं स्यादिति वाच्यम् । व्यावहारिकविषयस्य शुक्तिरूप्यादिवत् कदाचिद्बाध्यत्वाभ्युपगमात् 'बाध्यविषये च व्यावहारिकं प्रमाणम्' इति व्यवहारस्याद्वैतिपरिभाषामात्रसिद्धत्वादित्याशङ्क्य निर्दोषत्वेन क्लृप्तशास्त्रस्यैव विषयान्तरप्रदर्शनेन चारितार्थ्यमुपपादनीयम्, न तु दोषमूलस्याहंप्रत्ययस्य, तस्य पश्चाद्व्याद्युद्रात्रपच्छेदवत्प्रयोगविषयतदपरामर्शदोषमूलसर्वस्वदानकर्तव्यताबुद्ध्यादिवत्सर्वथैव भ्रान्तित्वोपपत्तेः इति विवेचनाय तस्य दोषमूलत्वं प्रदर्शयितुं प्रवृत्तमुत्तरग्रन्थमवतारयति— **एवं तावदिति** ॥

भामती ।

णगुणयोगेन वर्तत इति यत्र प्रयोक्तृप्रतिपत्त्रोः संप्रतिपत्तिः स गौणः । स च भेदप्रत्ययपुरःसरः । तद्यथा नैयमिकाग्निहोत्रवचनोऽग्निहोत्रशब्दः प्रकरणान्तरावधृतभेदे कुण्डपायिनामयनगते कर्मणि 'मासमग्निहोत्रं जुहोति'

कल्पतरुः ।

तिः न हि भवतीत्यर्थः । न च ज्ञातृत्वमपि देहे उपचर्यते इति वाच्यम्, वक्तुः स्वज्ञानप्रकाशनपरे वाक्ये तद्विरोधात् । अथ अहमालम्बने आत्मनि देहगतप्रादेशिकत्वमेवोपचर्यते, तर्हि देहादात्मनो भेदो ग्रहीतव्यः, न च गृह्यत इत्याह— **अपि च** इत्यादिना । अत्र गौणत्ववादी प्रष्टव्यः— किं सिंहशब्दस्येव माणवके सांप्रतिकं देहादावहंशब्दस्य गौणत्वम्, उत सार्षपरसादौ तैलशब्दस्येव निरूढम्? नाद्य इत्याह— **परेति** । **नैयमिकेति** । प्रमाणलक्षणे स्थितम्—'तत्प्रख्यं चान्यशास्त्रम्' । 'अग्निहोत्रं जुहोति' इति श्रूयते । तत्र संशयः—किम् अग्निहोत्रशब्दः अग्निदेवतागुणविधिः, उत कर्मनाम इति । तत्राग्नये होत्रं हविरस्मिन्निति समासान्तर्वर्तिन्या चतुर्थ्या अग्नेर्होमे देवतात्वप्रतीतेर्गुणविधिरिति प्राप्ते; राद्धान्तः—'यदग्नये च प्रजापतये च सायं जुहोति' इति शास्त्रादग्नेर्देवतात्वप्रख्यापनात् प्राप्ते च विधिवैयर्थ्यान्नामधेयम्; न चात्र चतुर्थीसमाससंभवः तादर्थ्यप्रकृतिविकारयोरभावात् इति । एवं नित्याग्निहोत्रवाचिनः अग्निहोत्रशब्दस्य गुणयोगादन्यत्र वृत्तिं वक्तुं मुख्यार्थाद्गृहीतभेदं कर्मोदाहरति— **प्रकरणान्तरेति** । भेदलक्षणे स्थितम्— 'प्रकरणान्तरे प्रयो-

परिमलः ।

तादर्थ्यप्रकृतिविकारयोरिति । तादर्थ्यप्रकृतिविकारभावयोरित्यर्थः । पूर्वमीमांसकमते हविषो देवतार्थत्वं हविर्देवतयोर्हिरण्यकुण्डलवत्प्रकृतिविकारभावश्च इत्युभयमपि नास्ति । सिद्धान्ते हविषो देवताभोज्यस्य तादर्थ्यसद्भावेऽपि हविर्देवतयोः प्रकृतिविकारभावो नास्तीत्यर्थः । नन्वत्र पूर्वपक्षिणा अग्नये होत्रमस्मिन्निति बहुव्रीहिसमासः शङ्कितः । न च बहुव्रीहौ तादर्थ्यप्रकृतिविकारापेक्षा अस्ति, तत्पुरुषाधिकारे एव 'चतुर्थी तदर्थार्थ–' इत्यादिसूत्रेण तदर्थसमासस्य विहितत्वात् । तस्यैव च तदर्थसमासस्य तस्मिन्सूत्रे बलिराक्षितग्रहणेन ज्ञापकेन प्रकृतेस्तादर्थ्यस्य स्फुटत्वेन वार्त्तिककृद्वचनेन च प्रकृतिविकृतिविषयत्वनियमसिद्धेः । 'समानाधिकरणानां बहुव्रीहिः' इति शाब्दिकनियमादलाक्षणिकश्चतुर्थीगर्भ्यधिकरणबहुव्रीहिरिति चेत्, तर्हि स एव शङ्कितसमासासंभवे हेतुर्वक्तव्यः, न तादर्थ्यप्रकृतिविकारभावाभाव इति चेत्, सत्यम् । यदि पूर्वपक्षी चतुर्थीगर्भ्यधि-

कल्पतरुः ।

जनान्यत्वम्' । कुण्डपायिनामयने 'मासमग्निहोत्रं जुहोति' इति श्रूयते । अत्र किं नित्याग्निहोत्रे मासगुणो विधीयते, उत कर्मान्तरमिति । तत्र सत्यपि प्रदेशभेदे नाम्ना नित्याग्निहोत्रस्य बुद्धौ संनिधापनात् तत्समभिव्याहृतस्य 'जुहोति' इत्याख्यातस्य तत्संनिधापितार्थपरत्वात् नित्याग्निहोत्रानुवादेन मासो विधीयते इति प्राप्ते;

परिमलः ।

करणबहुव्रीहिमलाक्षणिकं मन्यमानः त्रप्रत्ययस्य भावार्थतामवलम्ब्य अग्नये होत्रं हवनम् इति चतुर्थीतत्पुरुषमाश्रयेत् तदा तदसंभवे हेतुराचार्यैरुपन्यस्त इति न विरोधः । ननु सिद्धान्ते प्राप्तदेवतासंबन्धप्रवृत्तिनिमित्तकं यौगिकमग्निहोत्रनामेष्यते, बहुव्रीहिसमासश्च प्रदर्श्यते, स कथमुपपद्यत इति चेत्, उच्यते— नात्यन्तं व्यधिकरणबहुव्रीहेरसंभवः 'सप्तमीविशेषणे बहुव्रीहौ' इति सप्तमीग्रहणेन ज्ञापकेन 'कण्ठेकालः' इत्यादौ तस्याभ्युपगमात् । तदेव व्याप्तिन्यायेन विभक्त्यन्तरगर्भव्यधिकरणबहुव्रीहेरपि ज्ञापकमाश्रित्य वामनेन 'अवर्ज्यो बहुव्रीहिर्व्यधिकरणो जन्माद्युत्तरपदः' इति 'सच्छास्त्रजन्मा हि विवेकलाभः' इत्यादिप्रामाणिकप्रयोगदृष्टस्य पञ्चम्यादिगर्भव्यधिकरणबहुव्रीहेः साधुत्वप्रतिपादनाच्च । किं तु एवं ज्ञापकसिद्धो व्यधिकरणबहुव्रीहिः प्रामाणिकप्रयोगदर्शने सति समर्थनीयः, न सर्वत्र । अन्यथा 'शेषो बहुव्रीहिः' इति सूत्रे शेषग्रहणेनाहत्य वार्त्तिकवचनेन च सिद्धस्य 'समानाधिकरणानां बहुव्रीहिः' इत्यौत्सर्गिकनियमस्य निर्हेतुकभङ्गापत्तेः। ततश्च सिद्धान्ते 'यदग्नये च' इत्यादिवाक्यान्तरप्राप्ताग्निदेवतासंबन्धानुवादकं यौगिकमग्निहोत्रनामेति प्रतीतेः तदुपपादनार्थः प्रमाणमूलो युज्यते व्यधिकरणबहुव्रीहिः । गुणविधिरिति पूर्वपक्षे तु 'यदग्नये च' इत्यादिशास्त्रमग्निप्रजापतिरूपानेकगुणविशिष्टहोमान्तरविधायकम्, 'अग्निर्ज्योतिः' इति मन्त्रस्तु अस्यैव होमान्तरस्याङ्गमिति तयोर्विषयान्तरप्रदर्शनेन विधित्सितगुणप्रापकत्वाभावस्य समर्थनीयत्वादग्निदेवताया अप्रेरकस्मादभ्युपगम्यमानो व्यधिकरणबहुव्रीहिर्न प्रमाणमूल इति स न युज्यते । तत्प्रख्यसूत्रे 'यस्मिन्गुणोपदेशः—' इति पूर्वसूत्रात् 'यस्मिन्' इत्यस्य 'अपि वा नामधेयम्—' इति तत्पूर्वसूत्रात् 'नामधेयम्' इत्यस्य चानुषङ्गः । तथा च तस्य विधित्सितगुणस्य प्रख्यं प्रख्यापकमन्यत् शास्त्रं यस्मिन् तदग्निहोत्रशब्दादिकं नामधेयमित्यर्थः ॥

कुण्डेति । कुण्डपायिनामयनाख्ये सत्रे श्रुतं यत् 'मासमग्निहोत्रं जुहोति' इति वाक्यं तत्रेत्यर्थः । अस्मिन् वाक्ये श्रुतगुणस्य विधेयत्वसंभवे विशिष्टविधिगौरवपरिहारार्थं विधिशक्तेर्गुणसंक्रान्त्या धात्वर्थविधानात्तद्विधानापेक्षः कर्मभेदो न सिध्येत्; अतो

भामती।

इत्यत्र साध्यसादृश्येन गौणः, माणवके चानुभवसिद्धभेदे सिंहात्सिंहशब्दः। न

कल्पतरुः।

राद्धान्तः— न तावदज्ञाख्यातेन होमानुवादेन मासः शक्यते विधातुम्, कालस्य पुरुषानिष्पाद्यत्वेनानुपादेयत्वात्। नापि मासोद्देशेन नित्याग्निहोत्रविधिः, तस्यासंनिधेः। न च नाम तत्संनिधापयति, अन्यत्र 'जुहोति' इत्याख्यातेन पूर्वापरीभूततयोक्तस्य सिद्धार्थबोधिना नाम्ना अनुपस्थापनात्। तस्मात्प्रयोजनान्यत्वं विधेयभावनान्यत्वमिति। नन्वग्निहोत्रशब्दस्य कौण्डपायिनामयने कर्मणि प्रयोगे किं प्रयोजनम्? न तावन्नित्याग्निहोत्रेण सह क्रियात्वादिसादृश्यबोधः, तस्य वैयर्थ्यात्; अत आह— साध्येति॥

परिमलः

धात्वर्थविधानसिद्धयर्थं मासगुणस्य विध्यनर्हत्वमाह— **न तावदिति**। ननु कालस्याविधेयत्वेऽपि विहितमेव नित्याग्निहोत्रं कालसंबन्धसिद्धयर्थं तदुद्देशेन पुनर्विधीयताम् 'सायं प्रातश्च जुहोति' इति वाक्य इव इत्याशङ्क्य तद्वैषम्यमाह— **नापीति**। **सिद्धार्थबोधिना नाम्नेति**। 'यदा त्वाद्यपरिस्पन्दत्प्रभृत्या फललाभतः। क्रिया पूर्वापरीभूता लक्ष्यते वर्तते तदा' इत्युक्तरीत्या पूर्वापरीभूतेन क्रियारूपेण स्वार्थं धातुरुपस्थापयति; न तेन रूपेण नाम तदर्थमुपस्थापयितुं शक्नोतीति न नाम्ना धात्वर्थप्रत्यभिज्ञा संभवतीत्यर्थः। उक्तं च वार्त्तिके— 'यादृशी भावनाख्याते धात्वर्थश्चापि यादृशः। नासौ तेनैव रूपेण कथ्यतेऽन्यैः पदैः क्वचित्' इति॥

भावनान्यत्वमिति। नित्याग्निहोत्रस्य मासाग्निहोत्रस्य च जुहोतिधात्वर्थस्य भेदो भेदलक्षणद्वितीयाध्यायार्थभावनाभेदोपपादकतया प्रसाधित इति तत्प्रयोजनभूतो भावनाभेदः 'प्रयोजनान्यत्वम्' इति सौत्रपदेन विवक्षित इत्यभिप्रेत्य एवं व्याख्यातम्। यद्वा नाम्ना यथाकथंचित् नित्याग्निहोत्रप्रत्यभिज्ञया धात्वर्थाभेदोपपादनेऽप्यग्निहोत्रहोमस्य नित्यत्वेन प्राधान्ये कुण्डपायिनामयनाङ्गत्वे च भाव्यभेदेन भावनाप्रत्यभिज्ञापकाभावेन च भावनान्यत्वमनिवार्यमित्यभिप्रेत्य एवं व्याख्यातम्। उक्तं च शास्त्रदीपिकायाम्— 'ननु नामधेयेन भवति पूर्वकर्मोपस्थापनम्। भवतु। धात्वर्थस्य भावना तु तेनानुपस्थानात् भिद्यत एव। धात्वर्थोऽपि यादृशो धातुना आख्यातवर्तिना पूर्वापरीभूतो विधेरुपनीयते न तादृशो नाम्नोपस्थाप्यत इति तस्यापि युक्तो भेदः। तदभेदेऽपि भावना

भामती ।

त्वहंकारस्य मुख्योऽर्थो निर्लुठितगर्भतया देहादिभ्यो भिन्नोऽनुभूयते, येन परशब्दः शरीरादौ गौणो भवेत् । न चात्यन्तनिरूढतया गौणेऽपि न गौणत्वाभिमानः सार्षपादिषु तैलशब्दवदिति वेदितव्यम् । तत्रापि स्नेहात्तिलभवाद्भेदे सिद्ध एव सार्षपादीनां तैलशब्दवाच्यत्वाभिमानः, न त्वर्थयोस्तैलसार्षपयोरभे-

कल्पतरुः ।

सप्तमे स्थितम्— 'उक्तं क्रियाभिधानं तच्छ्रुतावन्यत्र विधिप्रदेशः स्यात्' । 'मासमग्निहोत्रं जुहोति' इत्यत्र अन्या चिन्ता— किमग्निहोत्रशब्दो नित्याग्निहोत्रधर्मानिहातिदिशेत् न वेति । तत्र यद्ययं गौणः स्यात् तदा 'नित्यग्निहोत्रवज्जुहोति' इत्यतिदिशेत्तद्धर्मान्, न त्वयं गौणः, जुहोतिसामानाधिकरण्यस्यात्रापि तुल्यत्वेन नामधेयत्वात्, अग्निदेवताविधानार्थत्वाद्वा ; अतो नातिदिशेदिति प्राप्ते ; सिद्धान्तः— न तावदत्राग्निदेवता विधातुं शक्या, चतुर्थीसमासासंभवस्योक्तत्वात् । तत्सिद्धे कर्मभेदे अनेकार्थत्वस्यान्याय्यत्वादेकत्राग्निहोत्रशब्दो मुख्यः अपरत्र गौणः । नित्याग्निहोत्रे च नामप्रवृत्तिनिमित्तस्याग्निदेवतासंबन्धस्य भावात् तत्रैव मुख्यता । अतः परशब्दः परत्र मुख्यसादृश्यमुपादाय प्रवर्तते ; तच्च सादृश्यं कर्तव्यार्थबोधकाख्यातसमभिव्याहृतनाम्ना अग्निहोत्रवज्जुहोतीति साध्यत्वेन विधेयमिति तत्सिद्ध्यर्थं नित्यधर्मानतिदिशेदिति अतश्च नित्याग्निहोत्रधर्माणां द्रव्यदेवतादीनामतिदेशो गौणप्रयोगफलमित्यर्थः । क्रियाया नित्याग्निहोत्रस्याभिधानं नामधेयमग्निहोत्रपदमुक्तं तत्प्रख्याधिकरणे ; तस्यान्यत्र श्रवणे विधिप्रदेशः विधेयधर्मातिदेशः स्यादिति सूत्रार्थः ॥

लोकसिद्धसादृश्यां गौणीं वृत्तिमाह— माणवक इति । प्रकृते भेदग्रहाभावमाह— न त्विति । निष्कृष्य लुठितः प्रतिभासितो गर्भः असाधारणाकारो यस्य स तथा, तत्तया नानुभूयते । अनुभवे वा वादिविवादो न स्यादित्यर्थः । एवं सांप्रतिकीं गौणतां निरस्यन् निरूढां निराचष्टे— न चात्यन्तेति । निरूढत्वं नाम प्रयोगप्राचुर्यान्मुख्यवद्ज्ञानम् । निरूढेऽपि गौणप्रयोगे नार्थयोस्तादात्म्यं प्रतीयते,

परिमलः ।

तावद्भिन्नेति सिद्धम्' इति । धात्वर्थस्य नाम्ना प्रत्यभिज्ञानमाचार्यैरपि वेधाद्यधिकरणे स्वीकृत्य व्यवहृतम् । तत्रैव तदुपपादनं करिष्यामः ॥

तत्सिद्धे कर्मभेदे इति । यदि प्रकरणभेदेन भावनामात्रभेदः, तदा सप्तमिका-

भामती ।

दाध्यवसायः । तत्सिद्धं गौणत्वमुभयदर्शिनो गौणमुख्यविवेकविज्ञानेन व्याप्तम्, तदिह व्यापकं विवेकविज्ञानं निवर्तमानं गौणतामपि निवर्तयतीति । न च बाल-स्थविरशरीरभेदेऽपि 'सोऽहम्' इत्येकस्यात्मनः प्रतिसंधानाद्देहादिभ्यो भेदेना-

कल्पतरुः ।

प्रतीयते तु प्रकृत इति वैषम्यमित्यर्थः । तत् तस्माद्गौणत्वव्यापकं विवेकविज्ञानमिह व्यावर्तमानं गौणतामपि व्यावर्तयतीत्येतत्सिद्धमित्यन्वयः । अभिज्ञारूपाहंप्रत्यया-द्विवेकासिद्धावपि प्रत्यभिज्ञारूपात्तत्सिद्धिमाशङ्क्याह— न च बालस्थविरेति । आत्मैक्यं प्रत्यभिज्ञार्थः । भिन्नाभ्यामेकस्य भेदस्त्वनुमानात्; तच्च शास्त्रादृते न ज्ञेय-

परिमलः ।

धिकरणे अग्निहोत्रशब्दस्य मासाग्निहोत्रे गौणत्वाभिधानमेव गौणमित्येतदपि वेधाद्यधिकरणे एवोपपादयिष्यामः । अभिज्ञारूपेति । 'मम देहः' इति देहत्वाकारेण विवेकग्रहः परि-च्छिन्नत्वाकारेण देहाभेदाध्यासे न विरोधी चैत्रमैत्रयोः संनिहितयोः 'अयमस्माद्भिन्नः' इति स्वरूपेण भेदग्रह इव मैत्रचैत्रत्वाकारेण तदभेदाध्यासे । अर्थः विषयः ॥

भिन्नाभ्यामिति । बालस्थविरशरीरयोः परस्परभिन्नत्वम्, ताभ्याम् एकस्यात्मनो भेदश्च, इत्युभयमप्यनुमानादित्यर्थः । परिमाणभेदे तस्यावयवापचयोपचयसाध्यत्वादव-यवापचये समवायिकारणनाशात् पूर्वावयविनाशतः स्थितावयवैः सूक्ष्मावयवन्यन्तरोत्पत्तिः अवयवोपचये पश्चादापततामवयवानां पूर्वसिद्धे अवयविनि कारणत्वायोगतः पूर्वसिद्धा-वयविसहितैरवयवान्तरैर्महावयव्यन्तरोत्पत्तिश्चावश्यंभाविनीति बालस्थविरशरीरयोर्भिन्नत्वं तावदानुमानिकं न प्रत्यक्षम्। प्रत्यक्षेण तु 'योऽयं मम देहो बाल्ये तथा पुष्ट आसीत् स एवेदानीं वार्द्धके कृशः' इत्यभेद एव तयोः प्रतीयते। ततश्च बाल्यस्थाविरदशयोर्भिन्ना-भ्यां देहाभ्यां दशाद्वयाभिन्न आत्मा भिन्न इति विरुद्धधर्मलिङ्गकभेदज्ञानमपि आनुमा-निकमिति भावः । ननु देहयोः परस्परभेदस्यानुमानिकत्वेऽपि ताभ्यामात्मनो भेदकस्यै-क्यस्य प्रत्यक्षत्वादात्मनि देहभेदः प्रत्यक्ष एव स्यात्, भेदकसाक्षात्कारस्य भेद-साक्षात्कारनियतत्वात्; अतो न तत्र परीक्षककृत्या अनुमानापेक्षेति चेत्, मैवम्। तथापि प्रथमानुमानापेक्षत्वेन परीक्षककृत्यत्वानपायात्। वस्तुतस्त्वत्र प्रत्यभिज्ञामात्रेण निर्विचिकित्समैक्यं न सिध्यतीति न भेदकसाक्षात्कारशङ्कापीत्याह— तच्च शास्त्रादृते इति । तत्प्रत्यभिज्ञाविषयभूतमप्यात्मैक्यं शास्त्रं विना न सिध्यति, परिमाणभेदेन देहभेदे सत्यपि तदभेदप्रत्यभिज्ञादर्शनेन 'योऽहं बाल्ये पुष्टः पितरावन्वभूवं स एव स्थाविरे कृशः

भामती ।

स्त्यात्मानुभव इति वाच्यम् । परीक्षकाणां खल्वियं कथा, न लौकिकानाम् । परीक्षका अपि हि व्यवहारसमये न लोकसामान्यमतिवर्तन्ते । वक्ष्यत्यनन्तरमेव हि भगवान्भाष्यकारः—'पश्वादिभिश्चाविशेषात्' इति । बाह्या अप्याहुः—'शास्त्रचिन्तकाः खल्वेवं विवेचयन्ति न प्रतिपत्तारः' इति । तत्पारिशेष्याच्चिदात्मगोचरमहंकारम् 'अहमिहास्मि सदने' इति प्रयुञ्जानो लौकिकः शरीराद्यभेदग्रहादात्मनः प्रादेशिकत्वमभिमन्यते नभस इव घटमणिकमल्लिकाद्युपाध्यवच्छेदादिति युक्तमुत्पश्यामः । न चाहंकारप्रामाण्याय देहादिवदात्मापि प्रादेशिक इति युक्तम् । तदा खल्वयमणुपरिमाणो वा स्याद्देहपरिमाणो वा ? अणुपरिमाणत्वे 'स्थूलोऽहम्, दीर्घः' इति च न स्यात् । देहपरिमाणत्वे तु सावयवतया देहवदनित्यत्वप्रसङ्गः । किं च अस्मिन्पक्षे अवयवसमुदायो वा चेतयेत्, प्रत्येकं वावयवाः ? प्रत्येकं चेतनत्वपक्षे बहूनां चेतनानां स्वतन्त्राणामेकवाक्यताभावादपर्यायं विरुद्धदिक्क्रियतया शरीरमुन्मथ्येत, अक्रियं वा प्रसज्जेत । समुदायस्य तु चैतन्ययोगे

कल्पतरुः ।

मित्यर्थः । तर्हि परीक्षकाणां देहादावहंशब्दो गौणः, नेत्याह— **परीक्षका अपीति** । अपरोक्षभ्रमो न यौक्तिकबाधादुच्छिद्यत इत्यर्थः । देहपरिमाणात्मपक्षे किमवयवारब्ध आत्मा, उतावयवसमुदायः ? नाद्य इत्याह— **अनित्यत्वेति** । द्वितीये आत्मावयवानां चैतन्यं प्रत्येकम्, समुदायस्य वा ? नाद्य इत्याह— **प्रत्येकमिति** । द्वितीयेऽपि समुदायापत्तिः शरीरौपाधिकी वा, स्वत एव वा, काकतालीया वा ? आद्यं निरस्य द्वितीयं

परिमलः ।

प्रणश्यननुभवामि' इति परिमाणभेदभिन्नधर्मिगततयैव पितृप्रणप्त्रनुभवितृविषयाभेदप्रत्यभिज्ञादर्शनेन च तथाभूतप्रत्यभिज्ञामात्रादैक्यासिद्धेरिति भावः । ननु तथापि 'योऽहं स्वप्ने व्याघ्रदेहः स एवेदानीं मनुष्यदेहः' इति प्रत्यभिज्ञया स्फुटतरभेदाभ्यां देहाभ्यां तदुभयानुवृत्तस्यात्मनो भेदः प्रत्यक्ष एव स्यात्, तत्र निर्विचिकित्सभेदकसाक्षात्कारसत्त्वादिति चेत्, न, भेदकसाक्षात्कारस्य भेदसाक्षात्कारनियतत्वाभावात्; अपीतत्वव्याप्यशङ्कत्वदर्शनेऽपि तत्साक्षात्कारानुदयात् स्वप्नदृष्टेषु लौकिकानां मिथ्यात्वसंप्रतिपत्त्या 'योऽयं स्थाणुः पुमानेषः' इतिवत् तत्र बाधायां सामानाधिकरण्यं न त्वभेद इति भेदकसाक्षात्कारासिद्धेश्च ॥

काकतालीयेति । यद्यपि 'समासाच्च तद्विषयात्' इत्रेण इवार्थविषयात्समा-

परिमलः।

सात् इवार्थेन च्छप्रत्ययेन निष्पादितः काकतालीयशब्दः उपमाद्वयगर्भः, तथा च काकतालयोरिव यादृच्छिको दस्युदेवदत्तयोः समागम इत्येका समासार्थोपमा, तदानीमेव पतता तालेन काकस्येव दस्युना देवदत्तस्य वधः कृत इत्यन्या तद्धितार्थोपमा चेति यत्रोपमाद्वयं तत्रैवास्य शब्दस्य संपूर्णार्थता, तथापि यादृच्छिकसमागममात्रेऽप्यस्य प्रचुरः प्रयोगो दृश्यत इत्ययमपि प्रयोगो यादृच्छिकसमागममात्रविषयः॥

ननु 'कृशोऽहम्' 'अन्धोऽहम्' इत्यादीनामध्यासत्वोक्तिः न युक्ता, परस्परभिन्नत्वेन निश्चितानां देहेन्द्रियाणां रङ्गरजतादीनां शुक्तिशकले इव एकस्मिन्नात्मन्यध्यासासंभवात्; अतस्तेषां गौणत्वमेव युक्तमित्याशङ्कां निवर्तयति— **विवेकासिद्धाविति**। गौणत्वे हि 'न देवदत्तः सिंहः' इतिवत् कदाचिदपि 'नाहं कृशः' 'नाहमन्धः' इत्यादिरूपेण विवेको लौकिकसाधारणो दृश्येत, अतोऽध्यास इत्येवाभ्युपेयम्। भेदकसाक्षात्कारेऽपि दोषबलादभेदाध्यासः पीतशङ्खादिस्थले संप्रतिपन्नः। किं च येन रूपेण देहत्वचक्षुष्ट्वादिना देहेन्द्रियभेदनिश्चयः तेन रूपेणात्मनि तदुभयाध्यासासंभवेऽपि कृशत्वान्धत्वादिरूपान्तरेण तदुभयाभेदाध्यासे न काचिदनुपपत्तिः। न हि 'कृशादन्धोऽन्यः' इत्यादिरूपोऽस्ति भेदप्रत्ययः। दृश्यते च देवदत्तसमीपगतयोरधीयानानधीयानयोः पुरुषत्वसामान्येन गृह्यमाणयोश्चैत्रमैत्रयोः परस्परभेदग्रहे ताभ्यां देवदत्ते दृश्यमानेन रूपेण भेदग्रहे च सत्यपि 'अधीयानोऽयं मैत्रस्तिष्ठति' इति अधीयानत्वमैत्रत्वाकारद्वयेन देवदत्ते तदुभयाध्यासः। ननु तथापि 'अन्धः, बधिरः, काणः, मूकः' इत्यादीनामात्मनि तत्तदिन्द्रियाध्यासरूपत्वं न सिध्यति, अर्शआदिगणसंगृहीताद्विकलाङ्गवाचिनः अन्धादिशब्दात् 'अर्शआदिभ्योऽच्' इति सूत्रेण मत्वर्थीयस्याचः प्रत्ययस्य विधानात्, अहंशब्दसमानाधिकरणान्धादिव्यवहारस्य मत्वर्थीयप्रत्ययान्तान्धादिपदयुक्तत्वेन विकलचक्षुरादिवैशिष्ट्यपरत्वोपपत्तेः, 'कृशोऽहम्' इत्यादीनामपि अर्शआदेराकृतिगणत्वेन मत्वर्थीयप्रत्ययान्ततया कृशादिरूपदेहवैशिष्ट्यविषयत्वोपपत्तेः, नाध्यासरूपत्वं कल्पनीयम् इति शङ्कानिवर्तनार्थं टीकायामुपन्यस्तम् 'गच्छामि' इत्येवमादिकमुदाहरणान्तरम् "कृशोऽहम्' इत्यादीनाम्' इत्यादिशब्देन संगृहीतम्। 'गच्छामि, कृष्यामि' इत्याद्याख्यातप्रयोगे गन्तृकृशादिरूपदेहाभेद एवार्थो वाच्यः, तथा 'कुणिरहम्' इत्यादिव्यवहारे विकलेन्द्रियाभेद एवार्थो वाच्यः, तादृक्षु प्रयोगेषु मत्वर्थीयप्रत्ययाभावात्; तत्सामान्यात् 'अन्धोऽहम्' इत्यादिप्रयोगाणामपि अध्यासमूलत्वमेव युक्तमित्यर्थः। अर्शआद्यच्विधानम् 'चितः' इत्यन्तोदात्तस्वरार्थम्, न त्वात्मनि प्रयोगनिर्वाहार्थम् इति योज्यम्। दृश्यते च स्वरविशेषसिद्ध्यौपयिकतयैव तद्विधानार्थं गुणविशेषवाचिनां शुक्लादि-

भामती ।

वृक्ष एकस्मिन्नवयवे चिदात्मनोऽप्यवयवो वृक्ष इति न चेतयेत् । न च बहूनामवयवानां परस्पराविनाभावनियमो दृष्टः । य एवावयवो यदा विशीर्णस्तदा तदभावे न चेतयेत् । विज्ञानालम्बनत्वेऽपि अहंप्रत्ययस्य भ्रान्तत्वं तदवस्थमेव, तस्य स्थिरवस्तुनिर्भासत्वादस्थिरत्वाच्च विज्ञानानाम् । एतेन 'स्थूलोऽहम्' 'अन्धोऽहम्' 'गच्छामि' इत्यादयोऽपि अध्यासतया व्याख्याताः । तदेवमुक्तेन क्रमेण

कल्पतरुः ।

निरस्यति— न च बहूनामिति । न तृतीय इत्याह— य एवेति । यादृच्छिकसंश्लेष इव यादृच्छिकविश्लेषोऽपि स्यादिति स्वस्थानमेवाकस्मादचैतन्यापत्तिरित्यर्थः । यद्गौणत्ववादिना विवेकग्रहमुपपाद्य 'कृशोऽहम्' इत्यादीनां प्रत्ययानां गौणत्वमुक्तं तदपि विवेकासिद्धौ निरस्तमित्याह— एतेनेति । अहंप्रत्ययस्य अविविक्तविषयत्वेन शास्त्रीयविषयसिद्धिमभिधाय प्रयोजनसिद्धिमप्याह— तदेवमुक्तेनेति । पूति दुर्गन्धि

परिमलः ।

शब्दानामपि अर्शआदिगणे संग्रहः । न हि शुक्लादिगुणवैशिष्ट्यप्रतीतिनिर्वाहार्थं तत्, गुणान्तरवाचिसाधारण्येन गुणवचनेभ्यो मतुपो लुग्विधानेनैव तन्निर्वाहात् । न च शुक्लादिगुणशालिभिः प्रासादैर्विशिष्टे नगरे 'शुक्लं नगरम्' इत्यादिप्रयोगनिर्वाहार्थं शुक्लादिशब्देभ्यो मतुल्लोपानन्तरमज्विधानमिति वाच्यम्, संख्यासंनिवेशविशेषविशिष्टानां गृहाणामेव नगरशब्दवाच्यत्वे साक्षादेव नगरे शुक्लादिगुणवैशिष्ट्यसत्त्वेन तथाभूतगृहाधिकरणस्थलस्य नगरत्वे तदभेदोपचारसंभवेन च तदर्थमज्विधानानपेक्षणात् । अन्यथा हि 'अश्वेतत् नगरम्' 'अपुष्प्यद्वनम्' इत्याद्याख्यातप्रयोगे का गतिः ? एवमहंप्रत्ययस्य केषुचिदंशेषु दृष्टविसंवादतया दृष्टकोटिसाक्ष्यपुरुषवचनवदप्रामाण्यशङ्काकलुषितस्य परिमाणतत्त्वग्रहणप्रतिबन्धकदूरत्वदोषसद्भावसमुदिताप्रामाण्यशङ्काकलङ्कितचन्द्रप्रादेशिकत्वज्ञानवत् आगमबाधनाक्षमत्वे सति आगमेनैव तद्बाध्यते । आगमबाधितस्य च तस्य पूर्वापच्छेदशास्त्रस्येव प्रामाण्यसंरक्षणाय न विषयान्तरं गवेषणीयम्, चन्द्रप्रादेशिकत्वज्ञानवत् दोषजन्यत्वेन सर्वथैवाप्रामाण्योपपत्तेः— इत्येतावदस्मिन्नधिकरणे शास्त्रारम्भोपयोगिविषयप्रयोजनसमर्थनार्थं सूत्रसूचितं व्युत्पाद्यम् । इत्थं तत्त्वावेदकप्रमाणभावात् प्रच्यावितस्य कर्तृत्वभोक्तृत्वादिप्रत्यक्षस्य प्रवृत्तिनिवृत्त्यादिव्यवहारोपयोगि सांव्यवहारिकं प्रामाण्यं सर्वप्रपञ्चसाधारण्येनारम्भणाधिकरणे व्युत्पादनीयं श्रोतृबुद्धिसौकर्यार्थं प्रागनूदितमित्यनुसंधेयम् ।

णस्तद्धर्माणां च विषयेऽध्यासो मिथ्येति भवितुं युक्तम्। तथाप्यन्यो-

भामती।

अहंप्रत्यये पूतिकूष्माण्डीकृते भगवती श्रुतिः अप्रत्यूहं कर्तृत्वभोक्तृत्वसुखदुःखशोकाद्यात्मत्वमहमनुभवप्रसञ्जितमात्मनो निषेद्धुमर्हतीति। तदेवं सर्वप्रवादश्रुतिस्मृतीतिहासपुराणप्रथितमिथ्याभावस्याहंप्रत्ययस्य स्वरूपनिमित्तफलैरुपव्याख्यानम्— अन्योन्यस्मिन्नित्यादि। अन्योन्यस्मिन्धर्मिण्यात्मशरीरादौ अन्योन्यात्मकतामध्यस्य— अहमिदं शरीरादीति। 'इदम्' इति च वस्तुतः, न प्रतीतितः। लोकव्यवहारः लोकानां व्यवहारः। स च 'अयमहम्' इति व्यपदेशः। इतिशब्दसूचितश्च शरीराद्यनुकूलं प्रतिकूलं च प्रमेयजातं प्रमाणेन प्रमाय तदुपादानपरिवर्जनादिः। अन्योन्यधर्माश्चाध्यस्य अन्योन्यस्मिन्धर्मिणि देहादिधर्मान् जन्ममरणजराव्याध्यादीनात्मनि धर्मिणि अध्यस्तदेहादिभावे समारोप्य, तथा चैतन्यादीनात्मधर्मान् देहादावध्यस्तात्मभावे समारोप्य 'ममेदं जरामरणपुत्रपशुस्वाम्यादि' इति व्यवहारो व्यपदेशः। इतिशब्दसूचितश्च तदनुरूपः प्रवृत्त्यादिः। अत्र च अध्यासव्यवहारक्रियाभ्यां यः कर्ता उन्नीतः स समान

कल्पतरुः।

कूष्माण्डफलमिव कृतः स तथोक्तः। तात्पर्यमुपवर्ण्य भाष्यं योजयति— तदेवं सर्वप्रवादेत्यादिना। स्वरूपमन्योन्यात्मकतान्योन्यधर्माध्यासौ। निमित्तमितरेतराविवेकः। फलं व्यवहारः। 'अहमिदं शरीरम्' इति प्रतीत्यभावाद्भाष्यायोगमाशङ्क्याह— वस्तुत इति। 'अहम्' इति प्रतीतेऽपि वास्तवमनात्मत्वमस्तीति इदंशब्दप्रयोग इत्यर्थः। धर्म्यध्यासाभावादुक्तं धर्माध्यासाभावं परिहरति— अध्यस्तदेहादिभाव इति। धर्मिणोस्तादात्म्याध्यासकार्यम् 'अहमिदम्' इति व्यवहारं प्रदर्श्य धर्माध्यासकार्यं प्रदर्शयति— ममेदमिति। ननु 'अध्यस्य व्यवहारः' इत्यनुपपन्नम् 'भुक्त्वा व्रजति' इतिवत् एकस्य क्रियाद्वये कर्तृत्वानभिधानादत आह— अत्र चेति। व्यवहारक्रियाक्षिप्तस्य कर्तुरध्यासेऽपि कर्तृत्वात् क्त्वाप्रत्ययः स्यादित्यर्थः॥

ननूपसंहारभाष्ये 'नैसर्गिकोऽध्यासः' इत्यभिधानाद्व्यवहारोऽपि नैसर्गिकत्वविशिष्टोऽध्यास एव, तत्कथं क्रियाभेदः? उच्यते— इह कार्यभूतव्यवहारनैसर्गिकत्वेन सामर्थ्यसिद्धाध्यासनैसर्गिकत्वोपसंहारादविरोधः। अध्यासाभिधान-

परिमलः।

अध्यासाभिधानक्रिययोरिति। अध्यासक्रियैव तावन्न संभवति दूरे अध्यासा-

ऽन्यस्मिन्नन्योन्यात्मकतामन्योन्यधर्मांश्च अध्यस्य इतरेतराविवेकेन, अत्यन्ताविविक्तयोर्धर्मधर्मिणोर्मिथ्याज्ञाननिमित्तः सत्यानृते मिथुनीकृत्य,

---

भामती ।

इति समानकर्तृकत्वेन 'अध्यस्य व्यवहारः' इत्युपपन्नम् । पूर्वकालत्वसूचितमध्यासस्य व्यवहारकारणत्वं स्फुटयति— मिथ्याज्ञाननिमित्त इति । व्यवहारः, मिथ्याज्ञानमध्यासः, तन्निमित्तः, तद्भावाभावानुविधानाद्व्यवहारभावाभावयोरित्यर्थः । तदेवमध्यासस्वरूपं फलं च व्यवहारमुक्त्वा तस्य निमित्तमाह— इतरेतराविवेकेनेति । विवेकाग्रहणेनेत्यर्थः । अथ अविवेक एव कस्मान्न भवति, तथा च नाध्यास इत्यत आह— अत्यन्ताविविक्तयोर्धर्मधर्मिणोः । परमार्थतो धर्मि-

कल्पतरुः ।

क्रिययोः पूर्वापरीभावो न युक्तः; चितो बुद्ध्यादितादात्म्यं विना क्रियान्वययोगात् 'अध्यस्य व्यवहारः' इत्यनेनाध्यासस्य व्यवहारहेतुतोक्तौ, मिथ्याज्ञाननिमित्त इत्यनेन पौनरुक्त्यं चेति केचित् । तन्न, पूर्वपूर्वभ्रमसंस्कृताविद्यया चितः संप्रतितनाध्यासक्रियाश्रयत्वात् । पुनरुक्तिं परिहरति— पूर्वकालत्वेति । 'सुप्त्वोत्तिष्ठति' इतिवदहेतुत्वभ्रमं व्यावर्त्य स्फुटयतीत्यर्थः । जातिव्यक्त्योरिवार्थगतं तादात्म्यमविवेक इति भ्रमं व्यावर्तयति— विवेकाग्रहणेनेति । भाष्ये मिथुनीकरणस्य व्यवहारहेतुत्वमानन्त-

परिमलः ।

भिधानक्रिययोः पौर्वापर्यम्, क्रियाया आश्रयाधीनात्मलाभत्वात् शुद्धाया निर्विकाराया-श्चितः क्रियाश्रयत्वायोगात् अध्यसनीयबुद्धितादात्म्यापन्नायाश्च चितः अध्यासाधीनसिद्धिकत्वादिति प्रथमाशङ्कार्थः । इमामाशङ्कां स्वयं परिहरति— पूर्वपूर्वेति ॥

ननु मिथ्याज्ञाननिमित्तविशेषणविवरणटीकायां द्वितीयशङ्काया इव नैसर्गिकविशेषणविवरणटीकायामस्याः प्रथमशङ्कायाः परिहारो लभ्यते; यद्यप्यध्यासो वस्तुसतोर्भेदाग्रहाधीनः, न च देहेन्द्रियादिकं त्वया वस्तुसदिष्यत इत्यध्यासासंभवशङ्कायां प्रातीतिकेनापि सत्त्वेनारोप्याधिष्ठानयुगलसंपादनमुपपद्यते इत्येवम् 'सत्यानृते मिथुनीकृत्य' इत्यनेन परिहृतायाम्, प्रातीतिकसत्त्वमप्यध्यासाधीनमिति पुनरन्योन्याश्रयशङ्का नैसर्गिकविशेषणेन परिहृतेति योजयता टीकाग्रन्थेन देहेन्द्रियबुद्ध्यादेः स्वरूपमात्रस्य पूर्वपूर्वाध्यासतः सिद्धिरुक्ता, न तु चितो बुद्धितादात्म्यापत्तेरपि; तथापि तत एव साप्यर्थात्सिध्यति प्रवाहानादित्वेनोच्यमानस्याध्यासस्य परत्र परतादात्म्यावभासरूपत्वादिति चेत्, उच्यते—

भामती।

णोरतादात्म्यं विवेकः धर्माणां चासंकीर्णता विवेकः। स्यादेतत्। विविक्तयोर्वस्तुसतोर्भेदाग्रहनिबन्धनस्तादात्म्यविभ्रमो युज्यते शुक्तेरिव रजताद्भेदाग्रहे रजततादात्म्यविभ्रमः। इह तु परमार्थसतश्चिदात्मनोऽन्यन्न देहाद्यस्ति वस्तुसत्, तत्कृतश्चिदात्मनो भेदाग्रहः कुतश्च तादात्म्यविभ्रमः इत्यत आह— **सत्यानृते मिथुनीकृत्येति**। विवेकाग्रहादध्यस्येति योजना। सत्यं चिदात्मा, अनृतं बुद्धीन्द्रियदेहादि; ते द्वे धर्मिणी मिथुनीकृत्य युगलीकृत्येत्यर्थः। न च संवृतिपरमार्थसतोः पारमार्थिकं मिथुनमस्तीत्यभूततद्भावार्थस्य च्वेः प्रयोगः। एतदुक्तं भवति— अप्रतीतस्यारोपायोगादारोप्यस्य प्रतीतिरुपयुज्यते न वस्तुसत्तेति। स्यादेतत्।

कल्पतरुः।

र्यात् भाति, न तु मिथ्याभूतप्रतियोगिसंपादनेन विवेकाग्रहहेतुता इति शङ्कां व्युदस्यन् योजयति— सत्यानृते इति। मिथुनीकरणाद्विवेकाग्रहः ततोऽध्यास इत्यर्थः। युगलीकरणं नाम अधिष्ठानारोप्ययोः स्वरूपेण बुद्धौ भानम्। ननु मिथुनं कृत्वेति किमिति नोक्तम्? अत आह— न च संवृतीति। 'अभूततद्भावे कृभ्वस्तियोगे संपद्यकर्तरि च्विः'। यस्य यो भावो न भूतः तस्य तद्भावश्चेत्संपद्यते तस्मिन्न-

परिमलः।

नैसर्गिकत्वोक्त्या नोक्तशङ्कायाः परिहारो लभ्यते, सर्गादौ प्रथमाध्यासात् पूर्वमाध्यासिकस्य बुद्धितादात्म्यस्यासिद्धेः। न च तदभावेऽपि पूर्वाध्याससंस्कारसत्त्वात् तदुपधानेन चितः प्रथमाध्यासक्रियाश्रयत्वं स्यादिति वाच्यम्, प्रथमाध्यासे अध्याससंस्कारोपधानं प्रयोजकं द्वितीयाद्यध्यासेष्वध्यासपरिनिष्पन्नं बुद्धितादात्म्यं प्रयोजकमित्यननुगमापत्तेः। संस्कारस्य च निराश्रयस्य प्रलये स्थित्यसंभवात् शुद्धचितस्तदाश्रयत्वायोगात् बुद्धीन्द्रियादीनां सर्गादावुत्पत्तिश्रवणेन प्रलये अध्याससंतानविच्छेदेन च तदानीमाध्यासिकबुद्धितादात्म्यापन्नचितोऽपि तदाश्रयतया वक्तुमशक्यत्वात् इत्येतावत्पर्यन्तं प्रथमशङ्का घावेदित्यालोच्याचार्यैः स्वयं परिहारोऽभिहितः। तत्रायमाशयः— प्रलये संस्काराश्रयस्य तावन्नासंभवः, अविद्यायाः सत्त्वात्। सर्वोऽपि हि प्रपञ्चस्तदानीमविद्याचित्रभित्तौ संस्कारमात्रशेषं स्थित्वा पुनरुद्भवतीत्यङ्गीक्रियते। अत एव बीजाङ्कुरप्रवाहानादिताया अपि प्रलये तत्संस्कारसत्त्वेनैव निर्वाहः। नाप्यननुगमः, सर्वेष्वप्यध्यासेषु पूर्वपूर्वभ्रमसंस्कारसचिवाविद्योपधानमेव प्रयोजकं न तु बुद्धितादात्म्यापत्तिरपि इत्यभ्युपगमे दोषाभावादिति॥

'अहमिदम्' 'ममेदम्' इति नैसर्गिकोऽयं लोकव्यवहारः । आह—

भामती ।

आरोप्यस्य प्रतीतौ सत्यां पूर्वदृष्टस्य समारोपः समारोपनिबन्धना च प्रतीतिरिति दुर्वारं परस्पराश्रयत्वमित्यत आह— नैसर्गिक इति । स्वाभाविकः अनादिरयं व्यवहारः । व्यवहारानादितया तत्कारणस्याध्यासस्य अनादितोक्ता, ततश्च पूर्वपूर्वमिथ्याज्ञानोपदर्शितस्य बुद्धीन्द्रियशरीरादेः उत्तरोत्तराध्यासोपयोग इत्यनादित्वात् बीजाङ्कुरवन्न परस्पराश्रयत्वमित्यर्थः । स्यादेतत् । अद्धा पूर्वप्रतीतिमात्रमुपयुज्यते आरोपे, न तु प्रतीयमानस्य परमार्थसत्ता । प्रतीतिरेव तु अत्य-

कल्पतरुः ।

भूततद्भावे वर्तमानात्प्रातिपदिकात्कृभ्वस्तीनां योगे च्विप्रत्ययो भवति । 'अस्य च्वौ' इतीकारः । ततश्च मिथुनभावोऽप्यवास्तव इत्यर्थः । समारोपप्रतीत्योरितरेतराश्रयत्वे शङ्किते व्यवहारानादित्वमसंगतमित्याशङ्क्याह— व्यवहारानादितयेति । अनादितयेत्यत्र एके पर्यनुयुञ्जते— न मिथ्याज्ञानतत्संस्कारव्यक्त्योरनादित्वम्, तज्जात्योस्तु न निमित्तनैमित्तिकभावः, न च प्रवाहो वस्त्विति । तत्र ब्रूमः— 'तदाकृत्युपरक्तानां व्यक्तीनामेकया विना । अनादिकाला वृत्तिर्या सा कार्यानादिता मता' । मिथ्याज्ञानत्वतत्संस्कारत्वजात्यालिङ्गितव्यक्तीनां मध्ये अन्यतमव्यक्त्या विना यदनादिकालस्यावर्तनम्, अन्यतमयोगनियम इति यावत्, तत्तासामनादित्वमिति । अत्र च निमित्तनैमित्तिकयोरनादित्वमुक्तम् । भ्रमोपादानानादित्वं तु वक्ष्यते देवताधिकरणे ॥

सत्यानृते मिथुनीकृत्येत्यत्र वस्तुसत्तावर्जमारोप्यस्य प्रतीतिमात्रमुपयोगीत्युक्तम्; इदानीं प्रतीतिरेवानृतस्यायुक्तेत्याक्षेपाभिप्रायमुत्तरभाष्यस्याह— स्यादेतदित्यादिना । युष्मदस्मदित्यादिस्तु विवेकग्रहादाक्षेप इति भेदः । प्रतीतिरेव त्विति ।

परिमलः ।

प्रतीयमानतैव परमार्थसत्तेति मन्यमानस्य शङ्कावादिनः प्रतीतिमात्रमारोपोपयोगि न परमार्थसत्तेत्यभ्युपगमो विरुद्ध इत्याशङ्क्य परमार्थसत्तेत्येतदन्तः सिद्धान्युक्तानुवादः तत्र अद्धा इत्येनेन सूचितः; प्रतीतिमात्रमारोपे उपयुज्यते इति युक्तं प्रतीयमानस्य सत्ता नोपयुज्यत इति तु न युक्तमित्येवंरूपोऽर्थाङ्गीकारः प्रतीतिरेव तु इत्यादिना स्फुटीकृत इति विभज्य तात्पर्यं प्रदर्शयन्नवतारयति— सत्यानृते मिथुनीकृत्येत्यत्रेति । उक्तमिति । तदिहानूदितमिति शेषः । विवेकग्रहादिति । अनृतस्य

कोऽयमध्यासो नामेति। उच्यते-- स्मृतिरूपः परत्र पूर्वदृष्टावभासः।

भामती।

न्तासतो गगनकमलिनीकल्पस्य देहेन्द्रियादेः नोपपद्यते। प्रकाशमानत्वमेव हि चिदात्मनोऽपि सत्त्वं न तु तदतिरिक्तं सत्तासामान्यसमवायोऽर्थक्रियाकारिता वा, द्वैतापत्तेः। सत्तायाश्चार्थक्रियाकारितायाश्च सत्तान्तरार्थक्रियाकारितान्तरकल्पने अनवस्थापातात् प्रकाशमानतैव सत्ता अभ्युपेतव्या। तथा च देहादयः प्रकाशमानत्वान्नासन्तः चिदात्मवत्, असत्त्वे वा न प्रकाशमानाः; तत्कथं सत्यानृतयोर्मिथुनीभावः? तदभावे वा कस्य कुतो भेदाग्रहः? तदसंभवे कुतोऽध्यासः? इत्याशयवान् आह आक्षेप्ता— **कोऽयमध्यासो नामेति**। क इत्याक्षेपे। समाधाता लोकसिद्धमध्यासलक्षण-

कल्पतरुः।

अपरोक्षेत्यर्थः। प्रतीतिमात्रनिषेधे तु असत्पदस्याबोधकत्वापत्तेरनुवादायोगः स्यादिति। ननु नात्यन्तासन् देहादिः किं त्वनिर्वाच्यः, ततः प्रतीतिः किं न स्यात्? अत आह— **प्रकाशमानत्वमिति**। अतिरिक्तसत्तामभ्युपगच्छन्तं प्रत्याह— **द्वैतेति**। द्वैताभ्युपगमेऽप्याह— **सत्तायाश्चेति**। आत्मन्यध्यासे आक्षिप्ते अध्याससामान्यलक्षणकथा वृथेत्याशङ्क्याह— **लोकसिद्धमिति**। पूर्वदृष्टग्रहणेन आक्षेपप्रतिक्षेपो

परिमलः।

प्रतीतिमङ्गीकृत्य भेदग्रहादध्यासाक्षेपः पूर्वं कृतः, इदानीं प्रतीतिविषयस्यानृतत्वमेव न युक्तमित्याक्षेप इति भेद इत्यर्थः। **प्रकाशमानत्वमितीति**। प्रतीतिविषयत्वमित्यर्थः। असतः प्रतीतिविषयत्वं पूर्वपक्षी न मन्यते॥

अध्याससामान्यलक्षणकथेति। ननु सामान्यलक्षणत्वे गोत्वादिप्रत्यभिज्ञापि द्वैतवस्त्ववभासत्वेन व्यावहारिकाध्यासरूपा तेन संग्राह्येति कथमग्रे तत्राव्याप्तिशङ्का? न च सामान्यलक्षणत्वोक्तिरियं संक्षिप्तलक्षणविषया, विस्तृतलक्षणं तु प्रातिभासिकाध्यासमात्रविषयमिति तदतिव्याप्तिकथने युज्यत इति वाच्यम्, तस्योपव्याख्यानमिति टीकाग्रन्थेन तद्व्याख्यानेन च संक्षिप्तविस्तृतलक्षणयोरेकविषयत्वावगमात् 'सन् घटः' इत्याद्यवभासे सत्यानृततादात्म्यावभासत्वे पर्यवसितस्य विस्तृतलक्षणस्य सत्त्वेनातिव्याप्त्यापत्तेश्चेति चेत्, सत्यम्। स्मृतिप्रत्यभिज्ञातिव्याप्तिकथनं तयोरधिष्ठानसद्रूपब्रह्मतादात्म्यापन्नानृतवस्तुविषयतयैवाध्यासरूपत्वम्, न तु समानसत्ताकजातिव्यक्तितादात्म्यविषयतयेति

भामती ।

माचक्षाण एवाक्षेपं प्रतिक्षिपति—उच्यते— **स्मृतिरूपः परत्र पूर्वदृष्टावभास इति** । अवसन्नः अवमतो वा भासः अवभासः । प्रत्ययान्तरबाधश्चास्य अवसादोऽवमानो वा । एतावता मिथ्याज्ञानमित्युक्तं भवति । तस्येदमुपव्याख्यानम् 'पूर्वदृष्ट—' इत्यादि । पूर्वदृष्टस्यावभासः पूर्वदृष्टावभासः । मिथ्याप्रत्ययश्च आरोपविषयारोपणीयमिथुनमन्तरेण न भवतीति पूर्वदृष्टग्रहणेनानृतमारोपणीयमुपस्थापयति । तस्य च दृष्टत्वमात्रमुपयुज्यते न वस्तुसत्तेति दृष्टग्रहणम् । तथापि वर्तमानं दृष्टं दर्शनं नारोपोपयोगीति पूर्वेत्युक्तम् । तच्च पूर्वदृष्टं स्वरूपेण सदप्यारोपणीयतया अनिर्वाच्यमित्यनृतम् । आरोपविषयं सत्य-

कल्पतरुः ।

भविष्यतीति भावः । अवभासपदस्यावयवार्थमादाय संक्षिप्तमध्यासलक्षणमाह— **अवसन्न इति** । अवसादः उच्छेदः । अवमानः यौक्तिकतिरस्कारः । अवभासपदस्य रूढमर्थमादाय विस्तृतं लक्षणं भाष्यवाक्यार्थत्वेनाह— **तस्येति** । परत्रेत्यादिपदैरसत्ख्यातिनिरासेन प्रपञ्चनमित्यर्थः । **स्वरूपेण सदपीति** । अपि-

परिमलः ।

तेन रूपेण तयोरलक्ष्यत्वाभिप्रायम् । यदि जातिव्यक्तितादात्म्यविषयत्वांशे सत्यानृतमिथुनीकरणाभावेऽपि बाध्यत्वरूपसंक्षिप्तलक्षणानुगतिसद्भावात् तत्र विस्तृतलक्षणेनापि भाव्यम्, तदा पूर्वदृष्टस्य परत्रावभास इत्येतल्लक्षणं परमते गोत्वादिप्रत्यभिज्ञाया इव शुक्तिरजतादिज्ञानस्य प्रमात्वेनाप्युपपद्यत इति तेन स्वाभिमताध्यासरूपत्वसिद्धयभावाभिप्रायं योज्यम् । एवमपि हि लक्षणदूषणमाकरग्रन्थेषु दृश्यते । यथा— स्वश्चासौ प्रकाशश्चेति स्वप्रकाशनिर्वचनं ज्ञानस्य वेद्यत्वेऽप्युपपद्यते, स्वशब्दार्थस्य ज्ञानस्य परवेद्यत्वेऽपि प्रकाशत्वाक्षतेः । ब्रह्माभिन्नत्वं मिथ्यात्वमिति लक्षणं सत्यत्वेऽप्युपपद्यते, वियदादेः सत्यत्वपक्षेऽपि ब्रह्माभिन्नत्वाक्षतेरित्यादि । अस्मिन् दूषणे अतिव्याप्तित्वव्यवहारश्च तत्र तत्र दृश्यते । उच्छेदो बाधकज्ञानोदयानन्तरं भ्रमवृत्त्यन्तरोत्पत्तिप्रतिबन्धः । स पीतशङ्खविभ्रमादिष्वव्याप्त इति तत्साधारणं पक्षान्तरमुक्तं टीकायाम्— अवमतो वेति । तत्रावमानशब्दार्थमाह— **यौक्तिकेति** । तिरस्कारः इच्छाप्रवृत्त्यादिकार्याक्षमत्वापादनम् ॥

ननु संक्षिप्तलक्षणेनैवेतरव्यावृत्तलक्ष्यव्यवहारसिद्धेः किं विस्तृतलक्षणेनेत्याशङ्क्य तत्प्रयोजनमाह— **परत्रेत्यादिपदैरिति** । परत्रासंनिहितस्यावभास इति लक्षणवाक्यघटकपदैरित्यर्थः । **लक्षणवाक्यार्थेऽतिव्याप्तिमाहेति** । एवं लक्षणवाक्यार्थे वर्ण्यमाने

भामती।

माह— परत्रेति। परत्र शुक्तिकादौ परमार्थसति। तदनेन सत्यानृतामिथुनमुक्तम्। स्यादेतत्। परत्र पूर्वदृष्टावभास इत्यलक्षणम्, अतिव्यापकत्वात्। अस्ति हि स्वस्तिमत्यां गवि पूर्वदृष्टस्य गोत्वस्य परत्र कालाक्ष्यामवभासः। अस्ति च पाटलिपुत्रे पूर्वदृष्टस्य देवदत्तस्य परत्र माहिष्मत्यामवभासः समीचीनः। अवभासपदं च समीचीनेऽपि प्रत्यये प्रसिद्धम्, यथा नीलस्यावभासः पीतस्यावभास इति, अत आह—**स्मृतिरूप इति**। स्मृतेः रूपमिव

कल्पतरुः।

शब्देन स्वरूपेणासत्त्वमपि मरुमरीचिकोदकग्रन्थे वक्ष्याम इति सूचितम्। स्मृतिरूपविशेषणव्यावर्त्यमाह— **स्यादेतदित्यादिना**। पूर्वदृष्टस्य परत्र तादात्म्यावभास इति धर्म्यध्यासमभिप्रेत्य लक्षणवाक्यार्थे अतिव्याप्तिमाह— **स्वस्तिमत्यामिति**। परत्र आश्रये परधर्मावभास इति धर्माध्यासं विवक्षित्वा आह— **पाटलिपुत्रे इति**। अवभासपदस्य रूढार्थग्रहणादतिव्याप्तिरुपपन्नेत्याह— **अवभासपदं चेति**। 'सकृच्छ्रुतपदस्यार्थद्वयकल्पनिर्न दुष्यति। संक्षिप्तविस्तृताध्यासलक्षणद्वयलाभतः'। एवं च मिथ्याज्ञानमध्यास इत्यवभासपदेन व्युत्पाद्य प्रत्यभिज्ञायामतिव्याप्त्यभिधानं शोभतेतरामित्युपहासानवसरः। ननु पूर्वदृष्टमारोपणीयमनृतमित्युक्तम्; कथं तत्प-

परिमलः।

प्रत्यभिज्ञायामतिव्याप्तिमाहेत्यर्थः। 'तादात्म्यावभास इति धर्म्यध्यासलक्षणवाक्यार्थमभिप्रेत्यातिव्याप्तिमाह' इति पाठो दृष्टश्चेदृजुः स पाठः। **असंनिधानसिद्धवत्कारेणेति**। असंनिधानमधिष्ठाने परमार्थतोऽसत्त्वमिति वक्ष्यते, तेनानृतत्वलाभः। एतेन टीकायां परत्रेत्यस्य सत्ये इत्यर्थस्योक्तत्वात् स्मृतिरूपविशेषणरहितस्य सत्ये पूर्वदृष्टस्यावभास इति लक्षणस्य पूर्वं यस्यां गवि गोत्वं दृष्टं तस्यामेव गोत्वज्ञाने अतिव्याप्तौ शङ्कितुं शक्यायामतिव्याप्त्यर्थं गोव्यक्त्यन्तरे गोत्वज्ञानस्यान्वेषणं व्यर्थमित्यपि शङ्का निरस्ता। आरोप्यानृतत्वसमर्पकस्मृतिरूपपदसमभिव्याहारे हि परशब्दस्य तत्प्रतिद्वन्द्विसत्यार्थकत्वं लभ्यते, तदभावे तु पूर्वदृष्टपदसमभिव्याहारात् परशब्दः पूर्वदृष्टदेशादन्यदेशं बोधयेदित्यतिव्याप्त्यर्थं गोव्यक्त्यन्तरविषयगोत्वप्रत्यभिज्ञान्वेषणं युक्तमेवेति॥

ननु स्मृतावतिव्याप्तिवारणार्थं परत्रेति विशेषणमित्ययुक्तम्, प्रत्यभिज्ञायामिव स्मृतावप्यतिव्याप्तेरतिव्याप्तिशब्दलक्षितायाः प्रमात्वेनान्यथासिद्धेर्वा स्मृतिरूपविशेषणेनैव वारणात् तदर्थस्याधिष्ठाने परमार्थतोऽसत्त्वमिति निरुक्तस्याधिष्ठानसमसत्ताकत्वाभाव-

भामती ।

रूपमस्येति स्मृतिरूपः । असंनिहितविषयत्वं च स्मृतिरूपत्वम् । संनिहितवि-

कल्पतरुः ।

दाङ्कितलक्षणस्य प्रत्यभिज्ञायामतिव्याप्तिः ? उच्यते— स्मृतिरूपपदाभिधास्यमानासंनिधानसिद्धवत्कारेण तदभिधानम्, न तु पूर्वदृष्टपदसामर्थ्येनेत्यदोषः । प्रत्यभिज्ञाया अपि संस्कारजत्वेनाव्यावृत्तिमाशङ्क्याह—असंनिहितेति । स्मृतिरूपपदेन च असंनिहितविषयत्वे विवक्षिते तावति चोक्ते स्मृतावतिव्याप्तिः, तन्निवृत्तये परत्रेत्युक्तमित्यपि द्रष्टव्यम् । अनेन 'असंनिहितस्य परत्र प्रतीतिरध्यासः' इति लक्षणमुक्तम् । असंनिधानं च आरोप्यस्याधिष्ठाने परमार्थतोऽसत्त्वं न देशान्तर-

परिमलः ।

रूपस्य प्रत्यभिज्ञाविषयगोत्व इव तत्तायामप्यभावात् उभयोरपि गोव्यक्त्यन्तरस्मर्यमाणधर्मिरूपाधिष्ठानसमसत्ताकत्वात्, अधिष्ठानसत्यत्वार्थकेन परत्रेत्यनेन स्मृतिव्यावर्तनासंभवाच्च, तत्ताधिष्ठानस्य स्मर्यमाणस्याप्यप्रातिभासिकतया शुक्तिकादेरिव सत्यशब्दार्थत्वादित्याशङ्क्याह— स्मृतिरूपपदेन चेति । यदि यथाश्रुतटीकानुसारात् स्मृतिरूपपदेनासंनिहितविषयत्वमात्रं विवक्षितं न त्वाचार्यैर्निर्वक्तव्यमधिष्ठानसमसत्ताकत्वरहितविषयत्वम्, तदेयं स्मृतावतिव्याप्तिशङ्का, तदा परत्रेत्यनेन तन्निरासोऽपि भवति । अनृतोपस्थापकपदसमभिव्याहाराभावेन परशब्दस्य पूर्वदृष्टदेशान्यदेशपरत्वस्यासंनिहितसमभिव्याहारात् संनिहितपरत्वस्य वा प्राप्तेरिति भावः । एवं चापसिद्धान्तपरिहारार्थमसंनिहितत्वमधिष्ठाने परमार्थतोऽसत्त्वमित्यवश्यं विवक्षणीयत्वात् तत एव प्रत्यभिज्ञाया इव स्मृतेरपि व्यावृत्तिसिद्धेः परत्रेति विशेषणानपेक्षणेन लक्षणे तदनिवेशनसूचनात् शङ्कान्तरमपि व्यावर्तितं भवति । तन्निवेशने हीत्थं शङ्का स्यात्, यदि परशब्दः पूर्वदृष्टपदसमभिव्याहारात् पूर्वदृष्टदेशान्यदेशपरः तदा अहंकाराध्यासाव्याप्तिः, तदधिष्ठानस्य साक्षिणः पूर्वदृष्टदेशत्वात् । रजताद्यध्यासाव्याप्तिश्च, तत्राध्यसनीयस्य पूर्वदृष्टत्वाभावात् । पूर्वदृष्टसजातीयत्वविवक्षायां यथाकथंचित्साजात्यस्य सर्वत्र सत्त्वेन पूर्वदृष्टविशेषणस्याव्यावर्तकत्वापत्तेः । यद्धर्मावच्छेदेनावभासविषयत्वं तेन धर्मेण साजात्यविवक्षायां गोव्यक्त्यन्तरे गोत्वस्य किंचिद्धर्मावच्छेदेनानवभासमानतया तत्प्रत्यभिज्ञायामतिव्याप्त्युक्तेरसामञ्जस्यापत्तेः । यदि त्वनृतोपस्थापकपदसमभिव्याहारात् परशब्दः सत्यार्थकः तदा वियदादिविषयानुमितिशाब्दज्ञानरूपव्यावहारिकाध्यासेष्वव्याप्तिः, तेषु प्रत्यक्षेष्विव सद्रूपाधिष्ठानब्रह्मस्फुरणाभावात् । देहादावनात्मन्यात्माध्यासे चाव्याप्तिः,

कल्पतरुः ।

सत्त्वमिति नापराद्धान्तः । अथ वासंनिधानेन सत्ख्यातिरिह वारिता । अवभासाद-सत्ख्यातिर्नृशृङ्गे तददर्शनात् । असंनिहितस्य परत्र प्रतीयमानस्य पूर्वदृष्टत्वेऽर्थ-

परिमलः ।

तत्र स्वरूपतोऽप्यध्यस्तो देहादिः सत्यः शबलितरूपमात्रेणाध्यस्त आत्मा त्वसत्य इत्येवं सत्ये अनृतावभास इति लक्षणानुगमस्य कर्तुमयुक्तत्वात्, अध्याससंक्षिप्तलक्षण-क्रोडीकृतेषु तेषु विस्तृतलक्षणानुगत्यवश्यंभावाच्च इति । तस्मादधिष्ठानासमसत्ताकस्यावभासोऽध्यास इत्येवानुगतं लक्षणम् । यद्वतमवभास्यं तदधिष्ठानम् । तथा च गोत्वादिषु गोव्यक्त्यादिरूपाधिष्ठानसमसत्ताकत्वसद्भावेऽपि ब्रह्मरूपाधिष्ठानसमसत्ताकत्वाभावोऽप्यस्तीति लक्षणस्य न क्वाप्यध्यासे अननुगतिः ॥

एवं परत्रेति विशेषणरहितमसंनिहितस्यावभास इत्येतावदेव लक्षणमित्याचार्यैरसंनिहितपदस्याधिष्ठाने परमार्थतः असत्त्वमित्यर्थविवक्षायां परत्रेति विशेषणस्य फलं नास्तीति सूचनेन 'अथ वासंनिधानेन' इति श्लोके असंनिधानावभासाभ्यामेव परत्रेति विशेषणनिरसनीयत्वेन टीकोक्तायां असत्ख्यातेरनभिमतसकलख्यात्यन्तराणां च निरसनेन च सूचितं टीकाकाराभिमतं परत्रेति विशेषणसहितं लक्षणं प्राक् प्रदर्शितम् । इदानीं तद्रहितं लक्षणं स्वाभिमतमभिप्रेत्य तदनुप्रविष्टाभ्यामसंनिधानावभासपदाभ्यामेव अनभिमतसकलख्यात्यन्तरनिरसनं क्रियत इति टीकाकारमतात् स्वमतस्य भेदं सूचयितुम् अथ वेत्युक्तिः । अथ वा असंनिहितस्यावभास इत्येतावदेव लक्षणम् । तत्र असंनिधानेन असत्ख्यातिव्यतिरिक्ताख्यात्यादिसकलख्यातिवारणम् अवभासेन असत्ख्यातिवारणमिति श्लोकार्थः । भ्रमविषयरजतादिकं तादात्म्येन वा तादर्म्येण वा यद्वतं तदधिष्ठानं तथा च अख्यात्यन्यथाख्यातिमतयोर्देशान्तरमधिष्ठानम् । आत्मख्यातिमते ज्ञानम् । सत्ख्यातिमते पुरोवर्ति शुक्त्यादिकम् । अस्मिन्मतचतुष्टयेऽपि सदेव रजतादिकं तत्तदधिष्ठानसमसत्ताकमित्यसंनिधानविशेषणेन चतुर्विधाप्येषा सत्ख्यातिर्वार्यत इत्यर्थः । अवभासात् इत्यस्यापरोक्षावभासादित्यर्थः । अत एवाह—**नृशृङ्गे तददर्शनादिति** । नृशृङ्गेऽपि हि परोक्षावभासः प्रागाचार्यैरङ्गीकृतः । यद्यप्यपरोक्ष्यं न लक्षणानुप्रविष्टं तथापि रजताध्यासे लक्षणानुगतौ क्रियमाणायां तत्र लक्षणस्थमवभासपदं वस्तुतः अपरोक्षावभासे पर्यवस्यदापरोक्ष्यस्फुरणनियतमिति तल्लाभः । इदं त्ववधेयम्—'शुक्तौ असद्रजतं भासते' इति सदुपरक्तासत्ख्यातेरपरोक्षावभासेन निरासः । शून्यवाद्यभिमतनिरधिष्ठानासत्ख्यातेस्त्वसंनिधानेनापि निरासः ।

भामती ।

षयं च प्रत्यभिज्ञानं समीचीनमिति नातिव्याप्तिः । नाप्यव्याप्तिः, स्वप्नज्ञानस्यापि स्मृतिविभ्रमरूपस्यैवंरूपत्वात् । तत्रापि हि स्मर्यमाणे पित्रादौ निद्रोपप्लववशादसंनिधानपरामर्शे, तत्र तत्र पूर्वदृष्टस्यैव संनिहितदेशकालत्वस्य

कल्पतरुः ।

सिद्धेऽपि पुनर्ग्रहणं पूर्वप्रमितत्वव्यावर्तनफलमित्युक्तमेव । स्वप्नज्ञाने प्रमाणयोग्यशुक्त्याद्यधिष्ठानाभावात् परत्रेति विशेषणाव्याप्तिमाशङ्क्याह— नापीति । स्मृतौ विभ्रमः स्मृतिविभ्रमः । स्मर्यमाणे रूपान्तरारोप इति यावत् । अनुभूयमाने पि-

परिमलः ।

तदर्थस्य स्वाधिष्ठानेन समसत्ताकत्वाभावस्य असति स्वाधिष्ठानाप्रसिद्धया निरूपयितुमशक्यत्वात् । एवं च सिद्धान्त्यभिमता शशशृङ्गादिशब्दजन्या असत्प्रतीतिः न शुक्तिरजतादिज्ञानवदध्यासः, नापि घटादिज्ञानवत् प्रमा, किं तु उभयविलक्षणं ज्ञानमात्रमिति ॥

पूर्वदृष्टग्रहणं तु न ख्यात्यन्तरनिरासार्थं पूर्वदृष्टिसद्भावप्रतिपादनार्थं वा, रजतविभ्रमादिषु पूर्वदृष्टयपेक्षायाः सर्वसंप्रतिपन्नत्वात्, किं तु टीकोक्तप्रयोजनमात्रार्थमित्याह— असंनिहितस्येति । पूर्वप्रमितत्वशब्देन पूर्वप्रमितत्वसहचरिता सत्ता लक्ष्यते आक्षेपभाष्यटीकानुसारात् । स्वप्नज्ञाने इति । स्वप्नः प्रातिभासिकविभ्रम इति न तत्र आत्माधिष्ठानं पारमार्थिकाधिष्ठानत्वे वियदादिविभ्रमवत् व्यावहारिकाध्यासत्वापत्तेः न च रजतविभ्रमादिषु शुक्तिकादिवत् तत्र व्यावहारिकमधिष्ठानमस्तीत्यव्याप्तिशङ्का ॥

अनुभूयमाने इति । प्रागनुभूयमाने पित्रादौ यत्संनिहितत्वमनुभूतं तत्स्वप्ने तात्कालिकत्वेनानुभूयते, अतः पाकरक्ते घटे 'इदानीं श्यामः' इति प्रत्ययवत् स्वप्नस्य विभ्रमत्वमिति भावः । नैयायिकमतेन अयमव्याप्तिपरिहारः । स्वमते तु स्वप्नदृष्टः पित्रादिः स्वरूपत एव प्रातिभासिकः तस्यात्माधिष्ठानम् । न च तावता व्यावहारिकत्वापत्तिः, अप्रयोजकत्वात्, साक्षिण्यध्यस्तानामपि अन्तःकरणतद्धर्मादीनां यावत्सत्त्वं प्रतिभासमानानां प्रातिभासिकत्वाभ्युपगमाच्च । 'तदेतत् आत्मनि चैवं विचित्राश्च हि' इति सूत्रव्याख्यानेन स्फुटं भविष्यतीत्यत्र नोद्घाटितं टीकायाम् । पीतशङ्खविभ्रमादिस्थले संनिकृष्टपित्तपीतिमादिविशिष्टशङ्खादिविषयम् अध्यासरूपमेव ज्ञानं जायते न तत्रारोप्यस्य पीतिमादेः पूर्वदर्शनमस्ति । न च तत्र कनकादिषु पीतिमानुभवरूपं पूर्व-

भामती ।

समारोपः । एवम् 'पीतः शङ्खः' 'तिक्तो गुडः' इत्यत्राप्येतल्लक्षणं योजनीयम् । तथा हि— बहिर्विनिर्गच्छदत्यच्छनयनरश्मिसंपृक्तपित्तद्रव्यवर्तिनीं पीततां पित्तरहितामनुभवन्, शङ्खं च दोषाच्छादितशुक्तिमानमनुभवन्, पीतितायाश्च शङ्खासंबन्धमनुभवन्, असंबन्धाग्रहणसारूप्येण 'पीतं तपनीयपिण्डम्' 'पीतं बिल्वफलम्' इत्यादौ पूर्वदृष्टं सामानाधिकरण्यं पीतत्वशङ्खत्वयोरारोप्याह 'पीतः

कल्पतरुः ।

त्रादौ यत्संनिहितत्वं पूर्वदृष्टं तदिहारोप्यम् । अन्यार्थं लक्षणे विशेषणतयोक्तस्य पूर्वदृष्टत्वस्य गृह्यमाणविषयत्वेन प्रसिद्धभ्रमेष्वव्याप्तिमाशङ्क्याह— **एवमिति** । पीति-

परिमलः ।

दर्शनमस्तीति वाच्यम्, अननुभूतपीतवर्णस्य पित्तोपहतनयनस्य पुंसः प्रथमं पीतशङ्खविभ्रमात्मके एव जायमाने पीतिमानुभवे तदसंभवात् इत्याशङ्क्य तत्रापि पूर्वदर्शनसद्भावः समर्थ्यते ॥

इदं किमर्थं तस्य लक्षणाननुप्रविष्टत्वेन तदभावेऽपि लक्षणाव्याप्त्यप्रसक्तेरित्याशङ्क्यावतारयति— **अन्यार्थमिति** । अध्यासेषु पूर्वदृष्टिमात्रमपेक्ष्यते न तु सत्ता इत्यध्यसनीयसत्तानिराकरणार्थं तेषु पूर्वदृष्टिः सार्वत्रिकी व्यवहृता; तत्सार्वत्रिकत्वाभ्युपगमो न युक्त इत्याशङ्क्य परिहरतीत्यर्थः । टीकायां पीतशङ्खविभ्रमस्थले तदानींतनं नयनरश्मिगतपित्तपीतिमानुभवरूपं प्राचीनं तपनीयपिण्डादिगतपीतिमानुभवरूपं च पूर्वदर्शनमस्तीति समर्थितम् । तत्राद्यपक्षो न युक्तः, नयनरश्मिभिर्निर्गत्य शङ्खमावृण्वतः पित्तद्रव्यस्य पीतिमानुभूयत इत्यङ्गीकारे कनकलिप्तशङ्ख इव अन्येषामपि पीतशङ्खविभ्रमप्रसङ्गात् । शङ्खनयनान्तरालवर्तिरश्मिगतपित्तपीतिमा अनुभूयत इत्यङ्गीकारे अन्तरालदेशे अन्येषामपि तद्ग्रहणप्रसङ्गात् । अतः अतीन्द्रियनयनरश्मिगतपित्तपीतिम्नो नानुभवः संभवतीत्यस्वारस्यात् प्राचीनानुभवपक्ष उपन्यस्त इत्येतत्सूचयति— **गृह्यमाणविषयत्वेन प्रसिद्धभ्रमेष्विति** । गृह्यमाणविषयतया तार्किकप्रसिद्धिमात्रं वस्तुतः पीतशङ्खविभ्रमो न तथेति भावः । न च तस्य गृह्यमाणारोपत्वाभावे स्मर्यमाणारोपत्वं वक्तव्यं न तु तद्युज्यते स्मरणस्यानियततया कदाचित्पित्तोपहतनयनस्य पीतिमस्मृत्यनुदये 'श्वेतः शङ्खः' इत्यनुभवप्रसङ्गादिति वाच्यम् । अतिधवलसिकतातलप्रवहदच्छनदीजलनैल्याध्यासे नीलिम्न इव अत्रापि पीतिम्नः स्मृतिनियमकल्पनोपपत्तेः । पूर्वानुभवजन्यसंस्कारमात्रेण नैल्याध्याससमर्थने तु इहापि तथास्तु । अननुभूतपीतवर्णस्य

भामती ।

शङ्खः' इति । एतेन 'तिक्तो गुडः' इति प्रत्ययो व्याख्यातः । एवं विज्ञातृपु-

कल्पतरुः ।

मतपनीययोः संसर्गग्रहेऽप्यसंसर्गो न गृह्यते तथा पीतत्वशङ्खयोरपीति सारूप्यम् । आदर्शादिष्वारोप्यस्य मुखस्य स्वचक्षुषा पूर्वदृष्टत्वाभावादव्याप्तिमाशङ्क्याह— एव-

परिमलः

पीतशङ्खविभ्रमे तु जन्मान्तरानुभूतपीतिमस्मरणमुपासनीयम् । एतादृशेषु जन्मान्तरानुभूतस्मरणं गतिरिति व्युत्पादयितुमेव पञ्चपादिकायां शिशोः स्तन्ये तिक्ताध्यासो जन्मान्तरानुभूततिक्तरसस्मरणकृत इत्युक्तम् । इत्थं पीतशङ्खविभ्रमो नानुभूयमानारोप इति मतानुसारेण व्याख्यातम् ॥

ये तु नयनरश्मिगतपित्तपीतिम्नोऽनुभवमङ्गीकृत्य अनुभूयमानारोपः स इति मन्यन्ते, तन्मते तु पित्तपीतिम्नोऽनुभवोपन्यास आरोपार्थः । तपनीयपिण्डादिगतपीतिमप्राचीनानुभवोपन्यासस्तु पूर्वदृष्टपदयथाश्रुतार्थस्वारस्यलाभार्थ इति योज्यम् । टीकायां सामानाधिकरण्यं पीतिमतादात्म्यमेव, न तु पीतिमसामानाधिकरण्यम् । तदेतत् टीकायां नयनरश्मिगतपित्तपीतिममात्रानुभवस्य शङ्खे पीतिमासंसर्गग्रहस्य 'पीतः शङ्खः' इति विभ्रमाकारस्य च उपन्यासेन स्पष्टमित्यभिप्रेत्य तथा न व्याख्यातम् । एवं च सति टीकायाम् 'पूर्वदृष्टं सामानाधिकरण्यं पीतत्वशङ्खयोरारोप्याह' इति युक्ततरः पाठः । न तु 'पीतत्वशङ्खत्वयोरारोप्याह' इति पाठः । यद्वा पीतिमशङ्खत्वयोस्तादात्म्यसंबन्धेन शङ्खवर्तित्वे शङ्खगतैकत्वे च भासमाने तयोः सामानाधिकरण्यमपि संसर्गमर्यादया भासत इत्यभिप्रायः स पाठः । अत एव पक्षतावच्छेदकसामानाधिकरण्येन साध्यसिद्धिरनुमानफलमिति तार्किका अपि वदन्ति ॥

पीतत्वशङ्खयोरिति । अत्र सारूप्यमित्यनेन पीतिमतादात्म्यप्रतीतावन्यत्र संप्रतिपन्नकारणसाम्यमुक्तम्, न तु तच्चाकचक्यादिवत् भ्रमहेतुदोषरूपं सादृश्यम् । अयं च असंसर्गाग्रहरूपकारणसद्भावः प्रायिकतयोक्तः । अयं शङ्खः पीतो न भवति शङ्खत्वादितरशङ्खवत् इत्यानुमानिकपीतिमासंसर्गग्रहे सत्यपि पित्तोपहतिदोषप्राबल्यात् पीतशङ्खविभ्रमः अवश्यं भवत्येव । **अव्याप्तिमाशङ्क्याहेति** । अव्याप्तिरित्याशङ्क्याहेत्यर्थः । आदर्शादिकमधिष्ठानमिति हि पूर्वपक्षिशङ्कामात्रम्; सिद्धान्ते तु मुखमेवाधिष्ठानमिति वक्ष्यते । अत इत्थं व्याख्या— 'पूर्वदृष्टाभिमुखादर्शोदकदेशताम्' इति टीकायां पूर्वदृष्टत्वम् आदर्शोदकदेशताया न विशेषणम् । आदर्शे मुखमिति प्रतीतौ संसर्गवि-

भामती।

रुषाभिमुखेष्वादर्शोदकादिषु स्वच्छेषु चाक्षुषं तेजो लग्नमपि बलीयसा सौरेण तेजसा प्रतिस्रोतः प्रवर्तितं मुखसंयुक्तं मुखं ग्राहयत्, दोषवशात्तद्देशतामनभिमुखतां च मुखस्याग्राहयत्, पूर्वदृष्टाभिमुखादर्शोदकदेशतामाभिमुख्यं च मुख-

कल्पतरुः।

मिति। पूर्वदृष्टयोरभिमुखयोरादर्शोदकयोर्देश एव देशो यस्य तस्य भावः तत्ता। तयोरेवाभिमुख्यं चेत्यर्थः। शीघ्रभ्रमितालातज्वालासु पूर्वदृष्टचक्राकारताया आरोपः। अभ्रेषु गृहादेः। मण्डूकवसाक्ताक्षग्राह्यवंशेषु वंशवर्णेषु च पूर्वदृष्टोरगतद्वर्णा-

परिमलः।

धया प्रतीयमानायास्तस्याः शुक्तिरजततादात्म्यस्येव पूर्वदृष्टयनपेक्षणात्। 'पीतं बिल्वफलम्' इत्यादौ पूर्वदृष्टं सामानाधिकरण्यम् 'पीतत्वशङ्खयोरारोप्याह' इति टीकायां पीतिमतादात्म्यस्यापि पूर्वदर्शनं संभवमात्रेणोपन्यस्तम्। अत एव पित्तपीतिमानुभवरूपपूर्वदर्शनसमर्थने तन्नोक्तम्। तस्मादधिकरणत्वेन मुखविशेषणतया आरोप्ययोरादर्शोदकयोरेव तद्विशेषणमित्यभिप्रेत्य विगृह्णाति— **पूर्वदृष्टयोरिति**॥

ननु यत्र पूर्वमदृष्टयोरादर्शोदकयोः प्रतिबिम्बविभ्रमः तत्र कथं पूर्वदृष्टविशेषणम्; तत्रापि प्रथमं संनिकृष्टादर्शोदकदर्शने जाते पश्चात् परावर्तितेन चाक्षुषेण तेजसा मुखसंनिकृष्टेन मुखग्रहणे सति तस्मिन् प्रतिबिम्बविभ्रमो जायत इति तदुपपत्तिः। ननु यदीन्द्रियसंनिकृष्टम् अनुभूयमानादर्शादिकमधिकरणत्वेन मुखे समारोप्यत इतीष्यते तदा अन्यथाख्यात्यापत्तिः, रजतवदनिर्वचनीयस्यादर्शान्तरस्य मुखान्तरस्य वा उत्पत्त्यनङ्गीकारात् इति चेत्; न, तत्रादर्शमुखयोराधाराधेयभावस्यानिर्वचनीयस्योत्पत्त्या अन्यथाख्यातिवैषम्यात्। अन्यथा अन्येष्वनुभूयमानारोपेषु का गतिः? यद्यपि 'रक्तः पटः' इत्याद्यनुभवो महारजनादिसंबन्धात् पटे वर्णान्तरोत्पत्त्यापि समर्थयितुं शक्यः। दृष्टा हि हरिद्रासंबन्धात् चूर्णे रक्तिम्नः सलिलसंबन्धात् भूतले नीलिम्नश्चोत्पत्तिः। तत्र हरिद्रासलिलवर्णवैलक्षण्यात् वर्णान्तरोत्पत्तिरिष्यते चेत्, इहापि तुल्यो न्यायः, रञ्जकद्रव्यसंबन्धे सति तद्वर्णविलक्षणस्यैव रञ्जकद्रव्यबहुल्पभावेन उत्कर्षापकर्षापन्नस्य वर्णस्य पटे दर्शनात्। तथापि चूर्णलिप्तशुक्लघटादिषु वर्णान्तरोत्पत्त्यभावात् तेषु 'शुक्लो घटः' इत्यादिरनुभूयमानचूर्णशुक्लिमाद्यारोपरूप एव वाच्यः। टीकायां देहगततामनभिमुखतां च मुखस्याग्राहयदिति क्वचित्संभवमात्रेणोक्तम्। वस्तुतः प्रतिबिम्बविभ्रमे विरोध्यग्रहणं नापेक्षितम्। तटस्थत्वोर्ध्वाग्रत्वादिना दृश्यमानेऽपि तरौ तटाकजलस्थत्वाधोग्रत्वाद्यारो-

भामती ।

स्यारोपयतीति प्रतिबिम्बविभ्रमोऽपि लक्षितो भवति । एतेन द्विचन्द्रदिङ्मोहालातचक्रगन्धर्वनगरवंशोरगादिविभ्रमेष्वपि यथासंभवं लक्षणं योजनीयम् । एतदुक्तं भवति— न प्रकाशमानतामात्रं सत्त्वम्, येन देहेन्द्रियादेः प्रकाशमानतया सद्भावो भवेत् । न हि सर्पादिभावेन रज्ज्वादयो वा स्फटिकादयो वा रक्तादिगुणयोगिनो न प्रतिभासन्ते, प्रतिभासमाना वा भवन्ति तदात्मानस्तद्धर्माणो वा । तथा सति मरुषु मरीचिकानिचयम् 'उच्चावचमुच्चलत्तुङ्गतरङ्गभङ्गमालेयमभ्यर्णमवतीर्णा मन्दाकिनी' इत्यभिसंधाय प्रवृत्तः तत्तोयमापीय पिपासामुपशमयेत् । तस्मादकामेनापि प्रकाशमानस्याप्यारोपितस्य न वस्तुसत्त्वमभ्युपगमनीयम् । न च मरीचिरूपेण सलिलमवस्तुसत् स्वरूपेण तु परमार्थसदेव देहेन्द्रियादयस्तु स्वरूपेणाप्यसन्त इत्यनुभवागोचरत्वात्कथमारोप्यन्त इति सांप्रतम्, यतो यद्यसन्तो नानुभवगोचराः कथं तर्हि मरीच्यादीनामसतां तोयाद्यात्मतयानुभवगोचरत्वम्? न च स्वरूपसत्त्वेन तोयाद्यात्मनापि सन्तो भवन्ति ॥

यद्युच्येत— नाभावो नाम भावादन्यः कश्चिदस्ति, अपि तु भाव एव भा-

कल्पतरुः ।

रोप इत्यर्थः । **तथा सतीति** । रज्ज्वादीनां सर्पात्मत्वादेः सत्त्वे सतीत्यर्थः । उच्चलन्ती तुङ्गतरङ्गभङ्गानां तरङ्गविच्छेदानां माला यस्याः सा मन्दाकिनी तथा । अभ्यर्णं निकटम् । मरीचीनां तोयात्मत्वं न सदित्युक्ते यन्मरीचीनां तोयरूपेणासत्त्वं तन्मरीचय एवातो नासत्ख्यातिरिति शङ्कते— **यद्युच्येतेति** । निरस्तसमस्त-

परिमलः ।

पदर्शनात् । 'वंशेषु वंशवर्णेषु च' इति पाठः । 'वसावर्णेषु' इति पाठस्तु चक्षुस्तेजसा सह पित्तद्रव्यवद्वसावयवस्य निर्गमेन कथंचिदुपपादनीयः । 'पूर्वदृष्टोरगतद्वर्णारोपः' इति पाठः । 'तद्वर्णसामानाधिकरण्यारोपः' इति पाठे तु सामानाधिकरण्यं तादात्म्यम् ॥

नासत्ख्यातिरिति शङ्कते इति । ननु न प्रकाशमानता सत्ता, मरीचिषु तोयात्मत्वस्यासतः प्रकाशात् इत्युक्ते कथं तेषु तोयानात्मत्वस्य सद्रूपत्वप्रतिपादनेन असत्ख्यात्यभावशङ्का? सत्यम् । इदमेव दूषणम् 'अत्र ब्रूमः—' इत्यादिटीकया प्रतिपादयिष्यते । ननु स्फुटे वैयधिकरण्यदूषणे कथमनालम्बना शङ्का? व्यधिकरणोत्तरेणैव सत्ख्याति-

भामती।

वान्तरात्मना अभावः स्वेन रूपेण तु भावः। यथाहुः— 'भावान्तरमभावो हि कयाचित्तु व्यपेक्षया' इति। ततश्च भावात्मनोपाख्येयतया अस्य युज्येत अनुभवगोचरता। प्रपञ्चस्य पुनरत्यन्तासतो निरस्तसमस्तसामर्थ्यस्य निस्तत्त्वस्य कुतोऽनुभवविषयभावः, कुतो वा चिदात्मन्यारोपः? न च विषयस्य समस्तसामर्थ्यविरहेऽपि विज्ञानमेव तत्तादृशं स्वप्रत्ययसामर्थ्यादृष्टान्तासिद्धस्वभावभेदमुपजातमसतः प्रकाशनम्, तस्मादसत्प्रकाशनशक्तिरेवास्याविद्येति सांप्रतम्। यतो येयमसत्प्रकाशनशक्तिर्विज्ञानस्य किं पुनरस्याः शक्यम्? असदिति चेत्, किमेतत्कार्यम्, आहोस्विदस्या ज्ञाप्यम्? न तावत्कार्यम्, असतस्तत्त्वानुपपत्तेः। नापि ज्ञाप्यम्, ज्ञानान्तरानुपलब्धेः, अनवस्थापाताच्च। विज्ञान-

कल्पतरुः।

सामर्थ्यस्येत्यर्थक्रियाकारित्वसत्त्वायोग उक्तः। निस्तत्त्वस्येति स्वरूपसत्ताभावः। तद्वयमत्यन्तासत्त्वे हेतुः। अनिर्वचनीयमतं निरस्य शून्यमतं निरस्यति सद्वादी— **न च विषयस्येति**। स्वप्रत्ययः स्वसमानाकारः पूर्वप्रत्ययः। अदृष्टान्तासिद्धोऽसाधारणः। ज्ञानस्यापि पूर्वज्ञानाधीनत्वं सत्त्वमतो न क्वापि स्वरूपसत्त्वमित्यर्थः॥

नन्वविद्यया असत्प्रकाशनमिति बौद्धाः। तत्कथं विज्ञानमसत्प्रकाशनम्? अत आह— **तस्मादिति। ज्ञानान्तरानुपलब्धेरिति**। शक्त्याश्रयत्वेनाभिमतात् ज्ञानात् ज्ञानान्तरानुपलब्धेः उपलब्धौ वा तस्यापि ज्ञापकत्वेन ज्ञानान्तरापेक्षायामनवस्थापाताच्च इत्यर्थः। सति हि कस्मिंश्चित्कस्यचिदुपकारो भवति प्रत्ययस्य निरूपणं त्वसत्प्यायतते। न च स्वोपकारिण्यसति प्रत्युपकारं कश्चित्करोति इत्यतो

परिमलः।

वादनिर्वाह इत्युपहासार्थं तदीयशङ्कोद्भाविता। **पूर्वज्ञानाधीनत्वं सत्त्वमिति**। शून्यवादिमते ज्ञानस्याप्यसत्त्वात् तस्य पूर्वज्ञानाधीनत्वं यदस्ति तत् परं सत्त्वमिति व्यपदिश्यते। अतः अग्रिमटीकाग्रन्थे तन्मते ज्ञानविषययोः सदसत्त्वव्यवहारो न विरुद्ध इति भावः। **सति हि कस्मिंश्चिदिति**। तेनेति शेषः। **असत्प्यायतते**। असदधीनमपि भवति। असतीति विषयसप्तमी। क्वचिदायतत इत्येतदनन्तरमायातीति पदान्तरं दृष्टं तत्प्रामादिकम्, आयतत इत्यस्य आगमनार्थत्वाभावात्। असतः सकाशादायातीत्येतदर्थकं फलितार्थकथनपरं वा तत् द्रष्टव्यम्। न च प्रत्यय इति वाक्यस्यार्थमाह— **न च स्वोपकारिणीति। अतोऽतिसुखीति**। स्वयं कस्यचिदनुपकुर्वन्नेव

भामती ।

स्वरूपमेव असतः प्रकाश इति चेत्, कः पुनरेष सदसतोः संबन्धः? असदधीननिरूपणत्वं सतो ज्ञानस्य असता संबन्ध इति चेत्, अहो बतायमतिनिर्वृतः प्रत्ययतपस्वी यदस्य असत्यपि निरूपणमायतते, न च प्रत्ययस्तत्राधत्ते किंचित्, असत आधारत्वायोगात्। असदन्तरेण प्रत्ययो न प्रथत इति प्रत्ययस्यैवैष स्वभावः न त्वसदधीनमस्य किंचिदिति चेत्, अहो बतास्य असत्पक्षपातः यदयमतदुत्पत्तिः अतदात्मा च तदविनाभावनियतः प्रत्यय इति। तस्मादत्यन्तासन्तः शरीरेन्द्रियादयो निस्तत्त्वा नानुभवविषया भवितुमर्हन्तीति ॥

अत्र ब्रूमः— निस्तत्त्वं चेन्नानुभवगोचरः, तत्किमिदानीं मरीचयोऽपि तोयात्मना सतत्त्वाः यदनुभवगोचराः स्युः। न सतत्त्वाः, तदात्मना मरीचीनामसत्त्वात्। द्विविधं च वस्तूनां तत्त्वम्—सत्त्वमसत्त्वं च। तत्र पूर्वं स्वतः परं तु परतः। यथाहुः 'स्वरूपपररूपाभ्यां नित्यं सदसदात्मके। वस्तुनि ज्ञायते किंचिद्रूपं कैश्चित्कदाचन' इति। तत्किं मरीचिषु तोयनिर्भासप्रत्ययस्तत्त्वगोचरः, तथा च समीचीन इति न भ्रान्तो नापि बाध्येत। अद्धा! न बाध्येत

कल्पतरुः ।

अतिसुखी प्रत्यय इत्युपहासः। अनाधाने हेतुमाह— असत इति। असतः प्रत्ययप्रथनस्य चाविनाभावं संबन्धमाशङ्क्य निराचष्टे— असदन्तरेणेति। अहो बतेति। कार्यकारणभावः स्वभावश्चेति बौद्धाभिमतमविनाभावमूलमिह नास्तीत्यर्थः ॥

एवं सदेव भातीति पूर्ववादिनोक्ते, सिद्धान्त्याह— अत्र ब्रूम इति। पूर्वपक्ष्याह— न सतत्त्वा इति। तोयात्मनेत्यनुषङ्गः। अत्र हेतुमाह— तदात्मनेति। तदात्मना असत्त्वस्य ममापीष्टत्वादित्यर्थः। तर्हि असत्ख्यातिः स्वीकृता, नेत्याह— द्विविधं चेति। तोयमपेक्ष्य ज्ञातं मरीचिरूपमेव तोयरूपेण असत्त्वम्, तच्च भावरूपमिति नासत्ख्यातिरित्यर्थः। तोयरूपेण असत्त्वं मरीचिरूपमेव, तच्चाबाध्यम्, तच्चेद्भ्रमगोचरः तर्हि न भ्रमबाधप्रसिद्धिः स्यात् इत्युक्ते पूर्ववाद्याह— अद्धेति।

परिमलः ।

तेनोपक्रियत इत्ययत्नलभ्योपकारोऽयमित्यतिसुखी इत्युपहासः। तदात्मना न सतत्त्वा इति साध्ये हेतोः साध्याविशेषमाशङ्क्य हेतुं विशिनष्टि— तदात्मनासत्त्वस्येति।

भामती।

यदि मरीचीनयमतोयात्मतत्त्वानतोयात्मना गृह्णीयात्। तोयात्मना तु गृह्णन् कथमभ्रान्तः, कथं वा अबाध्यः? हन्त! तोयाभावात्मनां मरीचीनां तोयभावात्मत्वं तावन्न सत्, तेषां तोयाभावादभेदेन तोयभावात्मतानुपपत्तेः। नाप्यसत्। वस्त्वन्तरमेव हि वस्त्वन्तरस्यासत्त्वमास्थीयते 'भावान्तरमभावोऽन्यो न कश्चिदनिरूपणात्' इति वदद्भिः। न चारोपितं रूपं वस्त्वन्तरम्, तद्धि मरीचयो वा भवेत्, गङ्गादिगतं तोयं वा। पूर्वस्मिन्कल्पे 'मरीचयः' इति प्रत्ययः स्यात् न 'तोयम्' इति। उत्तरस्मिंस्तु 'गङ्गायां तोयम्' इति स्यात्, न पुनः 'इह' इति। देशभेदास्मरणे 'तोयम्' इति स्यात् न पुनः 'इह' इति। न चेदमत्यन्त-

कल्पतरुः।

बाढम्। मरीचीनामतोयात्मत्वं स्वरूपम्, तत्तथा भ्रमो न गृह्णाति, किं तु भावान्तरतोयात्मना मरीचीस्तोयाभावरूपान् गृह्णातीति भ्रमत्वमित्यर्थः। तोयाभावात्मकमरीचिरूपे यदारोपितं तोयत्वं तत्तत्र सदसद्वेति विकल्प्य आद्यं निरस्यति—**हन्तेति**। द्वितीये तु किं तुच्छमसत्सदन्तरं वा? नाद्यः, अपराद्धान्तात्। न द्वितीय इत्याह—**वस्त्वन्तरमेव हीति**। अस्मिन् हि भ्रमे मरीचयस्तोयं चेति द्वे वस्तुनी भासेते। तत्र मरीचीनां तोयतादात्म्यं यदि वस्तु तर्हि तोयाद्वस्तुनो वस्त्वन्तरभूता मरीचयो वा स्युः मरीचिभ्यो वस्त्वन्तरं तोयं वा स्यात्, न अन्यत्, अन्यस्यास्मिन् भ्रमेऽनवभासनात्; उभयत्र दूषणमाह—**पूर्वस्मिन्नित्यादिना**। एवं सत्ख्यातिं निरस्य असत्ख्यातिनिरासमप्युक्तं स्मारयति—**न चेदमिति**। फलितमाह— **तस्मादिति**। एवं मरीचितोयतादात्म्यमनिर्वाच्यं

परिमलः।

ममापीष्टत्वादिति सर्वसंप्रतिपत्त्यर्हः शुद्धः पाठः। **किं तुच्छमसत् सदन्तरं वेति**। असच्छब्दस्यालीकमर्थमभिप्रेत्य आद्यो विकल्पः। अभावमर्थमभिप्रेत्य द्वितीयो विकल्पः। एवं हि टीकायां द्वितीयविकल्पविवरणे 'भावान्तरमभावः' इति तन्मतप्रदर्शनं संगच्छते। **असत्ख्यातिनिरासमिति**। ननु सत्ख्यातिवाद्युपन्यस्तासत्ख्यातिवादनिरासो न सिद्धान्त्यनुमोदनार्हः, 'अत्यन्तासत्यपि ज्ञानमर्थे शब्दः करोति हि' इति सिद्धान्ते शाब्दादसत्प्रतीत्यङ्गीकारात्। अनिर्वाच्यत्वनिर्वचनप्रविष्टासद्वैलक्षण्य इव असज्ज्ञानेऽपि असन्निरूपितत्वोपपत्तेश्च इति चेत्; सत्यम्। शब्दस्यासत्प्रतिपादनक्षमत्वेऽपि इन्द्रियस्यासंनिकृष्टग्राहकत्वाभावात् असंनिहितस्येव असतोऽपि नापरोक्षत्वमुपपद्यत इति तात्पर्यम्॥

भामती ।

मसत् निरस्तसमस्तस्वरूपमलीकमेवास्तु इति सांप्रतम्, तस्यानुभवगोचरत्वानुपपत्तेः इत्युक्तमधस्तात्। तस्मान्न सन्नासत्, नापि सदसत् परस्परविरोधात्, इत्यनिर्वाच्यमेवारोपणीयं मरीचिषु तोयमास्थेयम्; तदनेन क्रमेणाध्यस्तं तोयं

कल्पतरुः ।

प्रसाध्य 'सदेव भाति' इति नियममभाङ्क्षीत्। तथा च स्वरूपेणानिर्वाच्यमपि तोयं भ्रमे अवभासितुमर्हतीति मुधा अमुष्य देशान्तरादौ सत्त्वकल्पनेत्याह— तदने-

परिमलः ।

मुधामुष्येति । ननु देशान्तरस्थरजतस्य भ्रमविषयत्वोपपत्तौ मुधाभिनवरजतकल्पनमिति विपरीतमेव वक्तुं युक्तम्। न चासंनिहितापरोक्ष्ये संनिकर्षकारणाभावो दोषः, ज्ञानस्य संनिकर्षत्वे वह्न्यनुमितिस्थले प्रत्यक्षोदयप्रसङ्गात्, समाने विषये प्रत्यक्षसामग्र्या बलवत्त्वात्, अलौकिकप्रत्यक्षसामग्र्यपेक्षया अनुमितिसामग्र्या बलवत्त्वे संशयोत्तरभ्रमरूपपुरुषप्रत्यक्षस्थले अनुमितिप्रसङ्गात्, तस्य संनिकर्षत्वाभ्युपगमेऽपि यत्र यत्पूर्वमवगतं तस्मिन्नेव पुनर्दृश्यमने तज्ज्ञानस्य यदवच्छेदेन यत्पूर्वमवगतं तद्वत्त्वेन दृश्यमाने तज्ज्ञानस्य वा तदुपनायकत्वेन पूर्वं रजतत्ववत्त्वेन रजतत्वावच्छेदकवत्त्वेन वा अनवगते शुक्तिशकले रजतज्ञानस्य संनिकर्षत्वायोगाच्च इति वाच्यम्, रजतान्तरोत्पत्तावपि संप्रतिपन्नरजतकारणाभावस्य तुल्यत्वात्। तदभावेऽपि दोषवशात् प्रसिद्धव्यावहारिकरजतविलक्षणं प्रातिभासिकं रजतमुत्पद्यत इति कल्प्यते चेत्, संनिकर्षाभावेऽपि दोषवशादसंनिहितरजतविषयं प्रसिद्धप्रमारूपज्ञानविलक्षणं भ्रमरूपज्ञानमुत्पद्यत इत्येव कल्प्यतां लाघवात् इति चेत्; उच्यते— 'अस्ति तावत्प्रतारकवाक्यात् शशस्य शृङ्गमस्ति तदेवंलक्षणमरण्ये पतितमन्विष्य लब्धुं शक्यम्, तेन चेदं प्रयोजनं भवति' इत्येवंरूपादवाप्तमोहस्य तथैवारण्यं गत्वा तदन्वेषमाणस्य उक्तलक्षणकाष्ठशृङ्गान्तरादिदर्शने 'शशशृङ्गमिदम्' इत्यनुभवः। अस्ति च स्वप्ने मनुष्यपशुपक्षिवृक्षाद्यनेकरूपस्य एकस्यावयविनोऽनुभवः। न च तत्र असंनिहितविषयत्वं कल्पयितुं शक्यम् इत्यगत्या दोषवशात् प्रातिभासिकस्यैव तस्योत्पत्तिरङ्गीकरणीया। एवमन्यत्र भ्रमस्थले दोषस्य विषयोत्पत्तिकारणत्वकल्पौ तथैव रजतभ्रमेऽपि संभवति ज्ञानप्रत्यासत्त्याद्यजन्यरजतचाक्षुषप्रत्यक्षमात्रे क्लृप्तस्य रजतचक्षुःसंयोगस्य रजतालोकसंयोगस्य च कारणत्वं परित्यज्य तस्य असंनिहितरजतविषयत्वं न कल्पनीयम्। ननु चैत्रादिव्यक्तिविशेषभ्रमस्य असं-

कल्पतरुः।

नेति। नन्वभिनवतोयावभासाभ्युपगमे पूर्वदृष्टत्वं भाष्योक्तं विरुध्येत, तत्राह— अत एवेति। अभिनवत्वेऽप्यारोप्यस्य पूर्वदृष्टग्रहणमुपयुज्यते, आरोपणीयसमानमिथ्यावस्त्वन्तरोपदर्शकस्य पूर्वदर्शनस्य संस्कारद्वारेणोपयोगात् इति। 'स्वरूपेण मरीच्यम्भो मृषा वाचस्पतेर्मतम्। अन्यथाख्यातिरिष्टास्येत्यन्यथा जगृहुर्जनाः'। एवं

परिमलः।

निहितप्रसिद्धचैत्रादिविषयत्वम् अवश्यं कल्पनीयं रजतसामान्यार्थिप्रवृत्तेः प्रातिभासिकरजतज्ञानादिव प्रसिद्धचैत्रोद्देश्यकप्रवृत्तेः प्रातिभासिकचैत्रज्ञानादुत्पत्त्यसंभवादिति चेत्, न, प्रातिभासिकरजतज्ञाने रजतत्वप्रकारकत्वस्येव प्रातिभासिकचैत्रज्ञाने चैत्रत्वप्रकारकत्वस्य सत्त्वेनेष्टावच्छेदकप्रकारकात् ततस्तदुद्देश्यकप्रवृत्त्युपपत्तेः। ननु 'तदेवेदं रजतम्' इति व्यक्तिविशेषविषयप्रत्यभिज्ञारूपभ्रमस्य व्यवहितपूर्वदृष्टरजतविषयत्वम् अवश्यं कल्पनीयम् 'तद्रजतमिह केनानीतम्' इत्यपि व्यवहारदर्शनात् इति चेत्, न, तस्य व्यावहारिकरजतान्तर इव प्रातिभासिकरजतेऽपि दुष्टकरणसहकारिसंस्कारोपनीततत्ताविषयत्वोपपत्तेः। न च अभिनवरजतोत्पत्त्यङ्गीकारे जलबुद्बुदादेरिव तस्योत्पत्तिनाशानुभवप्रसङ्गः, भ्रमकाले तस्य प्राक्सिद्धपुरोवर्तितादात्म्येनानुभूयमानतयोत्पत्त्यप्रतीत्युपपत्तेः, बाधावतारे त्रैकालिकनिषेधस्यानुभूयमानतया नाशाप्रतीत्युपपत्तेश्च। न च क्वचिदुत्पद्य कंचित्कालं स्थितस्य तत्र त्रैकालिकनिषेधानुपपत्तिः, फलबलात् समानसत्ताकयोरेव प्रतियोगितदत्यन्ताभावयोर्विरोधः न तु प्रातिभासिकव्यावहारिकयोरिति कल्पनोपपत्तेः। एतेन यस्य प्रथमं शुक्तिशकले रजतभ्रमानन्तरं बाधो नोत्पन्नः तत्र शुक्तिसाधारणचाकचक्यावच्छेदेन रजतत्वानुभवस्यानपोदितत्वात् पुनः शुक्तिशकलान्तरे रजतभ्रमोदये अन्यथाख्यातिः संभवति तत्र यदवच्छेदेन यदनुभूतमित्याद्युक्तरूपोपनयभानसामग्रीसत्त्वात्; पाकेन रक्ते घटे 'श्यामोऽयम्' इति भ्रमोदये च अन्यथाख्यातिः संभवति यत्र यदनुभूतमित्याद्युक्तरूपोपनयसामग्रीसत्त्वादित्यपि शङ्का निरस्ता। क्वचिद्भ्रमे दोषघटितसामग्रीबलादाविद्यिकविषयोत्पत्तिक्लृप्तावन्यत्रापि तदुत्पत्तेरनिवारणात्। पाकरक्ते स्मृत्युपनीतश्यामवर्णप्रत्यक्षस्य पूर्वानुभूतसौरभे पश्चात् निखननादिना गतसौरभे चन्दनखण्डे 'सुरभीदं चन्दनखण्डम्' इति स्मृत्युपनीतसौरभविषयचाक्षुषप्रत्यक्षस्येव प्रमात्वात् 'इदानीं श्यामः' इति प्रत्यक्षभ्रमस्य विरोधिनि रक्तरूपे स्फुरति असंभवात् श्याममृल्लिप्ते रक्तघटे 'इदानीं श्यामः' इति प्रत्यक्षभ्रमस्यानुभूयमानमृद्वर्णारोपत्वसंभवेन स्मृत्युपनीतविषयत्वस्याकल्पनीयत्वात्॥

भामती ।

परमार्थतोयमिव, अत एव पूर्वदृष्टमिव, तत्त्वतस्तु न तोयम्, न च पूर्वदृष्टम्, किं तु अनृतम् अनिर्वाच्यम् । एवं च देहेन्द्रियादिप्रपञ्चोऽपि अनिर्वाच्यः, अपूर्वोऽपि पूर्वमिथ्याप्रत्ययोपदर्शित इव परत्र चिदात्मन्यध्यस्यत इति उपपन्नम्, अध्यासलक्षणयोगात् । देहेन्द्रियादिप्रपञ्चबाधनं च उपपादयिष्यते । चिदात्मा तु श्रुतिस्मृतीतिहासपुराणगोचरः, तन्मूलतदविरुद्धन्यायनिर्णीतशुद्धबुद्धमुक्तस्वभावः स

कल्पतरुः ।

तावद्देहादि सत् भासमानत्वादात्मवत् इत्यनुमानस्य मरीचिकोदकादावनेकान्तत्वोपपादनेन देहादेरनिर्वाच्यत्वमुक्तम्; संप्रत्यबाधितत्वेन सोपाधिकतामाह— देहेन्द्रियादीति । अबाध्यत्वमात्मनः सत्त्वं उपाधिः न प्रतिभासमानत्वम् । न च साधनव्याप्तिः देहादिबाधस्य तत्र तत्र वक्ष्यमाणत्वादित्यर्थः । विपक्षस्य मरीचितोयादेः सत्त्वात् न पक्षेतरता ॥

ननु प्रत्यक्षादिप्रमाणार्पितदेहादिः यदि मिथ्या तर्हि आत्मनि को विस्रम्भः? तत्राह— चिदात्मा त्विति । तत्त्वावेदकप्रमाणप्रतीतत्वादात्मनः सत्त्वं न सांव्यवहारिकप्रमाणसिद्धदेहादेरिति वक्ष्याम इति भावः ॥

परिमलः ।

देहादि सदिति । टीकायां शङ्काग्रन्थलिखिते अनुमाने नासन्त इति साध्यं निर्दिष्टम् । तत्रासत्त्वमलीकत्वं चेत् तद्व्यतिरेकसाधनमनिर्वचनीयत्ववादिनः सिद्धसाधनम् । असतः प्रतीत्यविषयत्वस्य सत्ख्यातिवाद्यभिमतत्वात् साध्याप्रसिद्धिश्च । अनिर्वचनीयत्वं चेत् अत्रापि साध्याप्रसिद्धिः । तस्य तन्मते शशशृङ्गायमाणत्वादित्यभिप्रेत्य सदिति साध्यं निर्दिष्टम् । ननु—किमिह सत्त्वं साध्यम्? प्राक् सद्वाद्युक्तं प्रकाशमानत्वं चेत्, हेतोः साध्याविशेषः; स्वरूपसत्त्वं सत्ता जातिः अर्थक्रियाकारित्वम् इत्येतानि सिद्धसाधनग्रस्तानि । अबाध्यत्वं त्वात्मनि सत्त्वे प्रयोजकमित्युपाधित्वेन वक्ष्यते । प्रकाशमानत्वं च भासमानत्वं चेत् असति प्रतिवादिमतेन व्यभिचारः । अपरोक्षतया भासमानत्वं चेत्, आदिशब्दग्राह्येष्विन्द्रियेषु भागासिद्धिरिति चेत्, उच्यते— प्रमाविषयत्वं ज्ञानानिवर्त्यत्वं वा सत्त्वमिह साध्यं भासमानत्वसामान्यं हेतुः, सद्वादिना तस्यासति प्रत्याख्यातत्वात् प्रसाध्याङ्गको हेतुरिति नात्र व्यभिचारशङ्का । यद्यपि सिद्धान्तिना कृतं मरीचिकोदकस्यानिर्वचनीयत्वोपपादनं प्रकाशमानतैव न सत्ता मरीचिकोदकस्य प्रकाशमानत्वेऽपि सत्त्वाभावादिति तयोर्व्यतिरेकप्रदर्शनेनाभेदनिरासार्थम्, देहेन्द्रियादिबाध्यत्ववर्णनम्

भामती।

त्वेनैव निर्वाच्यः। अबाधिता स्वयंप्रकाशतैव अस्य सत्ता, सा च स्वरूपमेव चिदात्मनः, न तु तदतिरिक्तं सत्तासामान्यं समवायः अर्थक्रियाकारिता वा इति सर्वमवदातम्॥

कल्पतरुः।

यदुक्तमाक्षेपवादिना प्रकाशमानत्वमेव चिदात्मनोऽपि सत्त्वमिति, तदपि विशेषाभ्युपगमेन परिहरति— **अबाधितेति**। स्वयंप्रकाशत्वादबाधितमात्मनः सत्त्वं न दृश्यस्य देहादेः, दृग्दृश्यसंबन्धानिरूपणादित्यर्थः। न च सत्तातद्भेदादद्वैतहानिरित्याह— **सा चेति**। यत्तु सत्तासमवायादेः सत्तालक्षणत्वमखण्डि तदनुमोदते— **न त्विति**॥

यत्तु कश्चित्प्रललाप- संसारस्यानृतत्ववर्णनं न तावद्ब्रह्मज्ञाननिबर्हणीयत्वाय, शास्त्रप्रामाण्यात् सत्यस्यापि ज्ञानान्निवृत्तेः; न च संसारिणः असंसारिब्रह्मैक्यार्थम्, औपाधिकस्य संसारस्य सत्यस्याप्युपाधिनिवृत्त्या निवृत्तौ जीवस्य ब्रह्मैक्यसंभवादिति। तन्न, सत्यस्यात्मवदनिवृत्तेः। यत्तु सामान्यतो दृष्टमनुमानं ज्योतिष्टोमो न स्वर्गफलः क्रियात्वान्मर्दनवदिति, तन्न, तत्र स्वर्गोद्देशेन यागविधानविरोधेन कालात्ययापदिष्टत्वात्। अत्र तु 'सत्यः प्रपञ्चो ज्ञाननिवर्त्यः' इत्यागमाभावेन तदभावात्, प्रत्युत मिथ्यात्वस्य बन्धस्य ज्ञाननिवर्त्यत्वश्रुत्यर्थापत्तिसिद्धेः। यदपि तार्क्ष्यध्यानादिना सत्यं विषादि नश्यतीति, तदपि न, विषादेः सत्यत्वासिद्धेः, ध्यानस्य च

परिमलः।

प्रकाशमानत्वं सत्त्वं न भवति चेत् किं तर्हि सत्त्वमित्याकाङ्क्षायाम् अबाध्यत्वं सत्त्वम् इत्यभिप्रेत्य देहेन्द्रियादिषु तद्व्यतिरेकप्रदर्शनार्थम्, देहेन्द्रियाद्यध्यासेष्वध्यासविस्तृतलक्षणानुगतिप्रदर्शनानन्तरं तत्संक्षिप्तलक्षणानुगतिप्रदर्शनार्थं चेति व्याख्यातुं शक्यम्, तथापि तद्व्याख्यानं स्पष्टमिति मत्वा पूर्वपक्ष्याशयस्थमनुमानमुद्धाट्य तत्र व्यभिचारोपाधिप्रदर्शनार्थत्वेन सैद्धान्तिकमिदं ग्रन्थद्वयं व्याख्यातम्॥

स्वयंप्रकाशत्वादिति। स्वयंप्रकाशम् आत्मनः स्वरूपं केनापि बाधितुं न शक्यम्, अन्ततो बाधसाक्षिणं एव स्वयंप्रकाशमानस्यात्मत्वपर्यवसानात् इति भावः। **दृग्दृश्येति**। दृश्यध्यस्तत्वं विना दृशा दृश्यस्य संबन्धान्तरानिरूपणादित्यर्थः। **सत्यस्यात्मवदिति। विषादेरिति**। ननु सर्वः प्रपञ्चो मिथ्येति त्वन्मते विषस्य सत्यत्वासिद्धिरस्तु नाम; तथापि विषस्य मिथ्यात्वं न तार्क्ष्यध्याननिवर्त्यत्वप्रयुक्तं त्वयेष्यते,

भामती ।

स चायमेवंलक्षणकोऽध्यासः अनिर्वचनीयः सर्वेषामेव संमतः परीक्ष-

कल्पतरुः ।

अप्रमात्वेनादृष्टान्तत्वात् । सेतुदर्शनं च चोदितक्रियात्मनैव एनोनिबर्हकं न प्रमित्यात्मना, पश्यतामपि सेतुं म्लेच्छानां श्रद्धाविरहिणां च अघानुपघातात् । आत्मप्रमा तु दृष्टद्वारेण बन्धनिवर्तनी न विधिद्वारा, तद्विधेः समन्वयसूत्रे पराकरिष्यमाणत्वात् ॥

यत्तु उपाधिध्वंसात्संसारध्वंस इति, तन्न, सत्योपाधेरारम्भणाधिकरणवक्ष्यमाणनयेन असंभवात्, मिथ्योपाधिस्वीकारे च अविवादादिति ॥

नन्वध्यासलक्षणे मतान्तरोपन्यासो मतिसंवादाय दूषणाय वा । नाद्यः विप्रतिपत्तेः, न द्वितीयः दूषणानभिधानात्; अत आह— **स चायमिति** । 'परत्र

परिमलः ।

किं तु प्रपञ्चमिथ्यात्वसाधकप्रमाणान्तरप्रयुक्तमिष्यते । तथा च तार्क्ष्यध्याननिवर्त्यत्वं विषस्येव ब्रह्मज्ञाननिवर्त्यत्वं संसारस्य मिथ्यात्वे प्रयोजकं न स्यादित्याशङ्क्याह— **ध्यानस्य चेति** । ब्रह्मज्ञानं हि परीक्षितप्रमाणमूलकं प्रमारूपमेव संसारनिवर्तकम्, 'वेदान्तविज्ञानसुनिश्चितार्थाः' इत्यादिश्रुतेः, ब्रह्मविद्योपक्रमाम्नातगुरुशिष्यनिबन्धवदुपाख्यानगतयावत्संशयनिवृत्तिप्रश्नोपदेशतत्तदुपपत्त्युपन्यासलिङ्गाच्च, तत्प्रमात्वस्थिरीकरणापेक्षितासंभावनादिनिवृत्त्यर्थप्राप्तश्रवणमननध्यानानुवादलिङ्गाच्च । तार्क्ष्यध्यानस्य तु कल्पिताकल्पितसाधारणयथोपदिष्टार्थविषयस्य विषनिवर्तकत्वे प्रमात्वं नापेक्षितमित्यर्थः ॥

ननु सेतुदर्शनं प्रमारूपमेवाघनिवर्तकम्, अन्यत्र सेतुभ्रमेण तदनिवृत्तेः । अतः प्रमात्वापेक्षमपि निवर्त्यत्वं न मिथ्यात्वप्रयोजकम् इत्याशङ्क्याह— **सेतुदर्शनं चेति** । 'यद्विषयप्रमात्वमात्रं यन्निवर्तकताप्रयोजकं तत् तत्राध्यस्तम्' इति नियमस्य न व्यभिचार इत्यर्थः । यद्यपि शुक्तौ रजताध्यासस्य रङ्गाध्यासेनापि निवृत्तिरस्ति तथापि समूलसकलाध्यासनिवृत्तिरधिष्ठानप्रमापेक्षा तदन्यानपेक्षा च दृष्टा, तन्न्याय इहापि ग्राह्य इति भावः । ननु सेतुदर्शनवत् विध्यायत्तं ब्रह्मज्ञानस्य निवर्तकत्वं न तु शुक्तिज्ञानवदधिष्ठानप्रमात्वायत्तम् इत्याशङ्क्याह— **आत्मप्रमा त्विति** । विरोधिविषयतया दृष्टद्वारेणाज्ञाननिवृत्तिर्ज्ञानोदयानन्तरमेव भवन्ती निवर्तकज्ञानसमानकाला भवतीति शुक्तिज्ञानजन्यरजतनिवृत्तौ दृष्टम्, तद्वदिहापि 'ब्रह्म वेद ब्रह्मैव भवति' इत्यादिश्रुतिभिः ब्रह्मवेदननिवृत्तसंसारब्रह्मभावापत्त्योर्लङाख्याताभ्यां समानकालता प्रतिपाद्यते । न च 'प्रतितिष्ठन्ति

तं केचिदन्यत्रान्यधर्माध्यास इति वदन्ति। केचित्तु यत्र यदध्यासस्त-

भामती।

काणाम्, तद्भेदे परं विप्रतिपत्तिरित्यनिर्वचनीयतां द्रढयितुमाह— **तं केचिदिति**। अन्यधर्मस्य, ज्ञानधर्मस्य रजतस्य; ज्ञानाकारस्येति यावत्। अध्यासोऽन्यत्र बाह्ये। सौत्रान्तिकनये तावद्बाह्यमस्ति वस्तुसत्, तत्र ज्ञानाकारस्यारोपः। विज्ञानवादिनामपि यद्यपि न बाह्यं वस्तुसत् तथाप्यनाद्यविद्यावासनारोपितमलीकं बाह्यम्, तत्र ज्ञानाकारस्यारोपः। उपपत्तिश्च यद्यादृशमनुभवसिद्धं रूपं तत्तादृशमेव अभ्युपेतव्यमित्युत्सर्गः, अन्यथात्वं पुनरस्य बलवद्बाधकप्रत्ययवशात्, 'नेदं रजतम्' इति बाधकस्य इदंतामात्रबाधेनाप्युपपत्तौ न रजतगोचरतोचिता। रजतस्य धर्मिणो बाधे हि रजतं च तस्य धर्म इदंता च बाधिते भवेताम्, तद्वरमिदंतैवास्य धर्मो बाध्यतां न पुना रजतमपि धर्मि, तथा च रजतं बहिर्बाधितमर्थादान्तरे ज्ञाने व्यवतिष्ठत इति ज्ञानाकारस्य बहिरध्यासः सिध्यति। **केचित्तु**— ज्ञानाकारख्यातावपरितुष्यन्तो वदन्ति— **यत्र यद-**

कल्पतरुः।

परावभासः' इत्युक्तलक्षणे मतिसंवाद एव क्रियते। एवंलक्षणकत्वं च अध्यासस्यानिर्वाच्यतयैवेति मरीचिकोदकनिरूपणे दर्शितम्। विप्रतिपत्तिस्तु अधिष्ठानारोप्यविशेषविषयेत्यर्थः। अन्यत्रान्यधर्माध्यास इति भाष्यं धर्मग्रहणेन बुद्ध्याकारत्वसूचनादात्मख्यात्यनुवादार्थम्। तत्र बौद्धानां मतभेदेन भ्रमाधिष्ठानविशेषमाह— **सौत्रान्तिकनये इति**। यद्यपि सौत्रान्तिकस्य वैभाषिकवदर्थो न प्रत्यक्षः, तथापि ज्ञानगतार्थसारूप्येणानुमीयमानत्वात् अस्त्यधिष्ठानम्। आरोप्यं तु ज्ञानाकार एव,

परिमलः।

ह वा एते य एता रात्रीरुपयन्ति' इत्यत्र सत्रानुष्ठानप्रतिष्ठाफलयौगपद्यप्रत्यायकलडाख्यातयोरिवान्यथानयने कारणं किंचिद्बाधकमस्ति। तस्मात् ब्रह्मज्ञानं दृष्टद्वारेणैव संसारं निवर्तयति शुक्तिज्ञानमिव रजताध्यासमित्यवसीयत इति भावः। **मतभेदेनेति**। बाह्यास्तित्ववादिनोर्वैभाषिकसौत्रान्तिकयोः सत् शुक्तिशकलादिकमधिष्ठानम्। तन्नास्तित्ववादिनो योगाचारस्य त्वविद्याकल्पितं तदधिष्ठानमित्येवं मतभेदेनाधिष्ठानभेदमाहेत्यर्थः। ननु प्रातिभासिकाध्यासेष्वधिष्ठानग्रहणं नियतम्, तत् बाह्यप्रत्यक्षत्ववादिनो वैभाषिकस्य सुघटं न तु तदतीन्द्रियत्ववादिनः सौत्रान्तिकस्येत्याशङ्क्य तस्यानुमानिकं तदस्तीत्याह— **वैभाषिकवदिति**। **अस्त्यधिष्ठानमिति**। स्फुरदधिष्ठानमस्तीत्यर्थः। **भ्रान्तिज्ञाना-**

भामती ।

ध्यासः तद्विवेकाग्रहनिबन्धनो भ्रम इति । अपरितोषकारणं चाहुः— विज्ञानाकारता रजतादेरनुभवाद्वा व्यवस्थाप्येत, अनुमानाद्वा । तत्रानुमानमुपरिष्टान्निराकरिष्यते । अनुभवोऽपि रजतप्रत्ययो वा स्यात्, बाधकप्रत्ययो वा । न तावद्रजतानुभवः । स हि इदंकारास्पदं रजतमावेदयति न त्वान्तरम् । 'अहम्' इति हि तदा स्यात्, प्रतिपत्तुः प्रत्ययादव्यतिरेकात् । भ्रान्तं विज्ञानं स्वाकारमेव बाह्यतयाध्यवस्यति, तथा च नाहंकारास्पदमस्य गोचरः, ज्ञानाकारता पुनरस्य बाधकप्रत्ययप्रवेदनीयेति चेत्, हन्त बाधकप्रत्ययमालोचयत्वायुष्मान् । स किं पुरोवर्ति द्रव्यं रजताद्विवेचयति आहो ज्ञानाकारतामप्यस्य दर्शयति ? तत्र ज्ञानाकारतोपदर्शनव्यापारं बाधकप्रत्ययस्य ब्रुवाणः श्लाघनीयप्रज्ञो देवानांप्रियः । पुरोवर्तित्वप्रतिषेधादर्थादस्य ज्ञानाकारतेति चेत्, न ।

कल्पतरुः ।

भ्रान्तिज्ञानाकारसदृशस्य बाह्यार्थस्याभावादित्यर्थः । सहोपलम्भनियमादित्याद्यनुमानमुपरिष्टाद्बौद्धाधिकरणे निराकरिष्यत इत्यर्थः । **प्रतिपत्तुः प्रत्ययादिति** समानाधिकरणे पञ्चम्यौ । ज्ञानात्मकात्प्रतिपत्तुरित्यर्थः ॥

वस्तुतस्त्वहमुल्लेखयोग्यस्य रजतस्य भ्रमादिदंतया प्रतीतिरिति शङ्कते— भ्रान्तमिति । भ्रान्तिरूपविकल्पस्य हि स्वरूपमविकल्पकं ग्राह्यं तदेव बाह्यत्वेन सविकल्पकत्वेनाध्यवसेयमित्यर्थः । सिद्धे ज्ञानाकारत्वे एवं कल्प्येत, तदेव कुतस्तत्राह— **ज्ञानाकारतेति** । प्रागुक्तन्यायात् प्रवेदनीयेत्यर्थः । बाधकप्रत्ययः किं साक्षात् ज्ञानाकारतां दर्शयति अर्थाद्वेति विकल्प्य, आद्यमनुभवविरोधेन निरस्य द्वितीयं शङ्कते—**पुरोवर्तित्वेति** । इदंताप्रतिषेधः अनिदंतां गमयेत्, सा च देशान्तरादिसत्त्वे-

परिमलः ।

कारसदृशस्येति । भ्रान्तिज्ञाने सविकल्पके य आकारो रजतादिः तस्य वस्तुतो बाह्यस्य शुक्तिगतस्याभावादित्यर्थः । **समानाधिकरणे पञ्चम्याविति** । षष्ठीपञ्चम्यन्तत्वेन व्यधिकरणे चेत् रजतस्य विज्ञानाकारत्वे 'अहं रजतम्' इति स्यादित्यापादनस्यायुक्तत्वशङ्का विज्ञानाहमर्थभेदप्रयुक्तैव वारिता स्यात्, तथापि विज्ञानाकारतया रजतस्य विज्ञानधर्मत्वात् 'अहं रजतवान्' इत्यनुभवः स्यादित्यापादनीयमित्येतत्प्रयुक्ता तत उपरि संभवन्ती न वारिता स्यात्, समानाधिकरणे चेत् शङ्काद्वयमपि वारितं भवतीत्यभिप्रेत्य एवं व्याख्यातम् । **भ्रान्तिरूपविकल्पस्य हीति** । विकल्पः सविकल्पकम्, तस्य द्वौ विषयौ

भामती ।

असंनिधानाग्रहनिषेधादसंनिहितो भवति प्रतिपत्तुरत्यन्तसंनिधानं त्वस्य प्रतिपन्नात्मकं कुतस्त्यम्? न चैष रजतस्य निषेधः, न च इदंतायाः, किं तु विवेकाग्रहप्रसञ्जितस्य रजतव्यवहारस्य । न च रजतमेव शुक्तिकायां प्रसञ्जितं रजतज्ञानेन । न हि रजतनिर्भासस्य शुक्तिकालम्बनं युक्तम्, अनुभवविरोधात् । न खलु सत्तामात्रेणालम्बनम्, अतिप्रसङ्गात् । सर्वेषामर्थानां सत्त्वाविशेषादालम्बनत्वप्रसङ्गात् । नापि कारणत्वेन, इन्द्रियादीनामपि कारणत्वात् । तथा च भासमानतैवालम्बनार्थः । न च रजतज्ञाने शुक्तिका भासते इति कथमालम्बनम्? भासमानताभ्युपगमे वा कथं नानुभवविरोधः? अपि चेन्द्रियादीनां समीचीनज्ञानोपजनने सामर्थ्यमुपलब्धमिति कथमेभ्यो मिथ्याज्ञान-

कल्पतरुः ।

ऽपि स्यादित्यन्यथोपपत्तिमाह— असंनिधानेति । अख्यातिमते हि रजतस्यासंनिधानाग्रहः संनिहितत्वेन व्यवहारहेतुत्वात् भ्रमः । अतः तन्निषेधः असंनिधानग्रहरूपो बाधः, प्रागभावनिवृत्तिरूपत्वाद्बाधस्य । तस्मादारोप्योऽर्थः प्रतिपत्तुरसंनिहितो भवतीत्यर्थः । यदुक्तं कल्पनागौरवमिति तत्राह— न चैष इति । सर्वसंमतस्य व्यवहारमात्रबाधस्य स्वीकारात् कस्यचिदप्यर्थस्याबाधात् अतिलाघवमित्यर्थः । ननु न व्यवहार एव निषेध्यः किं तु शुक्तौ प्रतीतं रजतमित्यन्यथाख्यातिमतमाशङ्क्याह— न च रजतमेवेत्यादिना । ननु मा भातु रजतज्ञाने शुक्तिः, पुरोदेशसत्तामात्रेण त्वालम्बनं किं न स्यात्? अत आह— न खल्विति । सर्वेषां पुरोवर्तिनां लोष्टादीनामित्यर्थः । अथ रजतसदृशशुक्ते रजतज्ञानहेतुसंस्कारोद्बोधकत्वेन द्वारेणालम्बनत्वं तत्राह— नापीति । एवमर्थमारोपितं प्रतिषिध्य मिथ्याज्ञानमपि निह्नुते— अपि चेति ।

परिमलः ।

ग्राह्याध्यवसेयभेदात् । तस्याकारेभ्यो निष्कृष्टं यदविकल्पं स्वरूपमस्ति तत् ग्राह्यम्, स्वविषयत्वलक्षणस्वप्रकाशत्वाङ्गीकारात् । तस्य रजताकारस्योपर्यवसेयो बाह्यत्वशब्दोक्त इदंत्वाकारो विकल्परूपोऽध्यवसेय इति साकारवादिनां प्रक्रिया । तथा च पुरोवर्तिन्यधिष्ठाने ज्ञानाकाररूपं रजतमिदंत्वेनारोप्यत इति नाहंत्वोल्लेखप्रसक्तिरिति भावः । ननु रजतज्ञाने शुक्तेः कारणत्वेन विषयत्वं नाख्यातिमते शङ्कार्हम् । अन्यथाख्यातिमते एव तस्य विशेष्यत्वेन कारणत्वादित्याशङ्क्याख्यातिमतेऽपि रजतज्ञाने शुक्तेः कारणत्वमुपपादयन्नवतारयति— अथ रजतसदृशेति । मिथ्याज्ञानमपीति । ननु मि-

भामती ।

संभवः? दोषसहितानां तेषां मिथ्याप्रत्ययेऽपि सामर्थ्यमिति चेत्, न, दोषाणां कार्योपजननसामर्थ्यविघातमात्रे हेतुत्वात्, अन्यथा प्लुष्टादपि कुटजबीजाद्वटाङ्कुरोत्पत्तिप्रसङ्गात्। अपि च स्वगोचरव्यभिचारे विज्ञानानां सर्वत्रानाश्वासप्रसङ्गः। तस्मात्सर्वं ज्ञानं समीचीनमास्थेयम्। तथा च 'रजतम्', 'इदम्' इति च द्वे विज्ञाने स्मृत्यनुभवरूपे, तत्र 'इदम्' इति पुरोवर्तिद्रव्यमात्रग्रहणम्, दोषवशात्तद्गतशुक्तित्वसामान्यविशेषस्याग्रहात्, तन्मात्रं च गृहीतं सदृशतया संस्कारोद्बोधक्रमेण रजते स्मृतिं जनयति। सा च गृहीतग्रहणस्वभावापि दोषवशाद्गृहीतत्वांशप्रमोषाद्गृहणमात्रमवतिष्ठते। तथा च रजतस्मृतेः पुरोवर्तिद्रव्यमात्रग्रहणस्य च मिथः स्वरूपतो विषयतश्च भेदाग्रहात्, संनिहितरजतगोचरज्ञानसारूप्येण इदम्, रजतम् इति द्वे एते अपि ग्रहणस्मरणे अभेदव्यवहारं सामानाधिकरण्यव्यपदेशं च प्रवर्तयतः। क्वचित्पुनर्ग्रहणे एव मिथः अगृहीतभेदे, यथा 'पीतः शङ्खः' इति। अत्र हि विनिर्गच्छन्नयनरश्मिवर्तिनः पित्तद्रव्यस्य काचस्येव स्वच्छस्य पीतत्वं गृह्यते पित्तं तु न गृह्यते। शङ्खोऽपि दोषवशाच्छुक्लगुणरहितः स्वरूपमात्रेण गृह्य-

कल्पतरुः ।

ननु मिथ्याव्यवहारसिद्ध्यर्थं विपर्ययो वाच्यः, तत्राह— **तथा चेत्यादिना**। शुक्तित्वरूपस्य इदमात्मकसामान्यं प्रति विशेषस्याग्रहादिदमिति द्रव्यमात्रग्रहणं भवतीत्यर्थः। **गृहीतग्रहणस्वभावेति**। गृहीतमिदमिति प्रकाशनस्वभावेत्यर्थः। **संनिहितरजतेति**। संनिहितरजतगोचरं हि ज्ञानमिदमिति रजतमिति चाकारयोरसंसर्गं न गृह्णाति, तयोः संसृष्टत्वेनासंसर्गाभावात्। न च स्वगतं विवेकम्, एकज्ञानत्वात्—एवमेते अपि ग्रहणस्मरणे परस्परं भिन्ने अपि स्वगतभेदं न गृह्णीतः। नाप्यसंसृष्टौ स्वगोचरौ तथैव निवेदयतः इति सारूप्यम्। काचो हरितद्रव्यविशेषः। निषेध्यभ्रमा-

परिमलः ।

थ्याज्ञाननिह्नवो न च रजतमेव शुक्तिकायां प्रसञ्जितमित्यादिपूर्वग्रन्थेनापि कृतः, स ग्रन्थस्तथैवावतारितश्च। सत्यम्। स ग्रन्थः अर्थाध्यासनिह्नवस्यापि साधारणः यतः शुक्तेर्देशान्तरस्थरजतात्मनेव तद्देशोत्पन्नरजतात्मना भानाङ्गीकारेऽप्यन्यात्मना भानमन्यालम्बनमित्येतदनुभवविरुद्धमित्यर्थाध्यासनिह्नवोऽपि तेन लभ्यते; इन्द्रियसामर्थ्यरूपकारणाभावोपपादनं तु मिथ्याज्ञाननिह्नव एवासाधारणयुक्तिरिति तात्पर्येणैवमवतारितम्। **गृहीतमिदमिति**। पूर्वानुभवविषयत्वं तत्तेति भावः॥

द्विवेकाग्रहनिबन्धनो भ्रम इति। अन्ये तु यत्र यदध्यासस्तस्यैव विपरी-

भामती।

ते। तदनयोर्गुणगुणिनोरसंसर्गाग्रहसारूप्यात् पीततपनीयपिण्डप्रत्ययाविशेषेणाभेदव्यवहारः सामानाधिकरण्यव्यपदेशश्च। भेदाग्रहप्रसञ्जिताभेदव्यवहारबाधनाच्च 'नेदम्' इति विवेकप्रत्ययस्य बाधकत्वमप्युपपद्यते; तदुपपत्तौ च प्राक्तनस्य प्रत्ययस्य भ्रान्तत्वमपि लोकसिद्धं सिद्धं भवति। तस्माद्यथार्थाः सर्वे विप्रतिपन्नाः संदेहविभ्रमाः प्रत्ययत्वात् घटादिप्रत्ययवत्। तदिदमुक्तम्—**यत्र यदध्यास इति**। यस्मिञ्शुक्तिकादौ यस्य रजतादेरध्यास इति लोकप्रसिद्धिः नासावन्यथाख्यातिनिबन्धना, किं तु गृहीतस्य रजतादेस्तत्स्मरणस्य च गृहीततांशप्रमोषेण गृहीतमात्रस्य यः 'इदम्' इति पुरोऽवस्थितद्रव्यमात्रात्तत्प्रज्ञानाच्च विवेकः, तदग्रहणनिबन्धनो भ्रमः। भ्रान्तत्वं च ग्रहणस्मरणयोरितरेतरसामानाधिकरण्यव्यपदेशो रजतादिव्यवहारश्चेति। **अन्ये तु**—अत्राप्यपरितुष्यन्तः—**यत्र यदध्यासस्तस्यैव विपरीतधर्मकल्पनामाचक्षते॥**

अत्रेदमाकूतम्—अस्ति तावद्रजतार्थिनः 'रजतमिदम्' इति प्रत्ययात्पुरोवर्तिनि द्रव्ये प्रवृत्तिः सामानाधिकरण्यव्यपदेशश्चेति सर्वजनीनम्। तदेतन्न

कल्पतरुः।

भावे निषेधानुपपत्तिमाशङ्क्याह— **भेदाग्रहेति**। इतरेतराभावबोधादितरेतराभावाग्रहनिवृत्तौ तद्धेतुकव्यवहारानिवृत्तिर्बाधफलमित्यर्थः। **तस्माद्यथार्था इति**। सर्वे विप्रतिपन्ना इत्येको धर्मिनिर्देशः; संदेहविभ्रमा इत्यपरः। अयथार्थव्यवहारहेतुत्वेन मतद्वयसंमताः प्रत्यया धर्मिण इति नाश्रयासिद्धिः। **अस्ति तावदिति**। पुरोवर्तिनि 'रजतमिदम्' इति सामानाधिकरण्यव्यपदेशस्तथाविधप्रवृत्तिश्चास्तीति तावत् सर्वजनीनम्। तत् सामानाधिकरण्यप्रत्ययात् 'रजतमिदम्' इत्येवंरूपाद्भवति नान्यथेत्यर्थः। अन्यथासिद्धिमाशङ्क्याह— **तदेतदिति**। किमगृहीतविवेकं स्मरण-

परिमलः।

नाश्रयासिद्धिरिति। एतदुपलक्षणम्। साध्यमपि सर्वविषयावच्छिन्नयाथार्थ्यं वा विसंवादीच्छाप्रवृत्तिरूपव्यवहारप्रसिद्धायाथार्थ्यराहित्यं वेति कृत्वा धर्म्यंशयाथार्थ्यमादाय न सिद्धसाधनमित्यपि द्रष्टव्यम्। **पुरोवर्तिनि साधने इति**। ननु फलज्ञानवदुपायज्ञानमपि न नियमेन प्रवर्तकं फलस्य नानोपायसाध्यत्वादेवेति हेतोरसिद्धिः। व्यक्तिनियमेन

भामती ।

तावद्ग्रहणस्मरणयोस्तद्गोचरयोश्च मिथो भेदाग्रहमात्राद्भवितुमर्हति । ग्रहणनिबन्धनौ हि चेतनस्य व्यवहारव्यपदेशौ कथमग्रहणमात्राद्भवेताम् ? ननूक्तं नाग्रहणमात्रात्, किं तु ग्रहणस्मरणे एव मिथः स्वरूपतो विषयतश्चागृहीतभेदे, समीचीनपुरःस्थितरजतविज्ञानसादृश्येनाभेदव्यवहारं सामानाधिकरण्यव्यपदेशं च प्रवर्तयतः । अथ समीचीनज्ञानसारूप्यमनयोर्गृह्यमाणं वा व्यवहारप्रवृत्तिहेतुः, अगृह्यमाणं वा + सत्तामात्रेण गृह्यमाणेऽपि 'समीचीनज्ञानसारूप्यमनयोरिदमिति रजतमिति च ज्ञानयोः' इति ग्रहणम्, अथ वा 'तयोरेव स्वरूपतो विषयतश्च मिथो भेदाग्रहः' इति ग्रहणम् । तत्र न तावत्समीचीनज्ञानसदृशी इति ज्ञानं समीचीनज्ञानवद्व्यवहारप्रवर्तकम् । न हि 'गोसदृशो गवयः' इति ज्ञानं गवार्थिनं गवये प्रवर्तयति । 'अनयोरेव भेदाग्रहः' इति तु ज्ञानं पराहतम्; न हि भेदाग्रहे अनयोरिति भवति, अनयोरिति ग्रहे भेदाग्रहणमिति च भवति । तस्मात्सत्तामात्रेण भेदाग्रहः अगृहीत एव व्यवहारहेतुरिति वक्तव्यम् । तत्र किमयमारोपोत्पादक्रमेण व्यवहारहेतुः आहो अनुत्पादितारोप एव स्वत इति? वयं तु पश्यामः— चेतनव्यवहारस्य अज्ञानपूर्वकत्वानुपपत्तेः आरोपज्ञानोत्पादक्रमेणैवेति । ननु सत्यं चेतनव्यवहारो नाज्ञानपूर्वकः किं तु अविदितविवेकग्रहणस्मरणपूर्वक इति । मैवम् । न हि रजतप्रातिपदिकार्थमात्रस्मरणं प्रवृत्तावुपयुज्यते । इदंकारास्पदाभिमुखी खलु रजतार्थिनां प्रवृत्तिरित्यविवादम् । कथं चायमिदंकारास्पदे प्रवर्तेत यदि तु न तदिच्छेत्? अन्यदिच्छत्यन्यत्करोतीति व्याहतम् । न चेदिदंकारास्पदं रजतमिति जा-

कल्पतरुः ।

ग्रहणद्वयमयथाव्यवहारहेतुः एकैकं वा? नाद्यः, ज्ञानयोरयौगपद्यात् । न द्वितीय इत्याह— न हि रजतप्रातिपदिकार्थेति । ग्रहणेऽपि तुल्यमिदम्; यदि तादिच्छेत्तर्ह्येव प्रवर्तेतेत्यर्थः । ज्ञातसंबन्धस्य पुंसो लिङ्गविशिष्टधर्म्येकदेशदर्शनात् लिङ्गविशिष्टे धर्म्येकदेशे बुद्धिरनुमानमिति शबरस्वामिन आहुः । समारोपे तु प्रमित्यभावेऽप्येकदेशदर्शनमस्तीत्यर्थः । पुरोवर्तिनि साधने प्रवर्तकफलज्ञाने अनैकान्तिकतानिवृत्त्यर्थमाह—

परिमलः ।

हेतुसमर्थने व्यभिचारतादवस्थ्यम्, यत्पक्षीकृतं रजतज्ञानं पुरोवर्तिनि नियमेन प्रवर्तकमिष्यते तत्रत्यफलज्ञानस्यापि तस्मिन्नियमेन प्रवर्तकत्वात् । एवं च तत्रेति विशेषणेन

परिमलः।

न स्मृतेरपि व्यावृत्तिः, आरोपप्राचीनस्यारोप्यस्मरणस्यापि फलसाधनताज्ञानप्राचीनफलज्ञानतुल्यन्यायतया नियमेन पुरोवर्तिनि प्रवर्तकत्वात्। एवं तावन्नियमेनेति तत्रेति च विशेषणमयुक्तम्। वाय्वादिव्यावृत्त्यर्थं रजतार्थिन इति विशेषणमित्यप्ययुक्तम्, तृणपर्णजलादिकमिव स्ववेगबलात् पुरुषं नयता वाय्वादिना पुरुषे यत्नाख्यप्रवृत्तेरजननात्। प्रवृत्तिपदस्य शरीरक्रियासाधारणव्यापारमात्रपरत्वेऽपि शरीरात्मकालादृष्टादिव्यभिचारवारणाय प्रवर्तकज्ञानत्वादिति हेतोर्विवक्षणीयत्वेन टीकायामुदाहरणवाक्ये ज्ञानपदनिवेशनया तद्विवक्षायाः सूचितत्वेन च तत एव तन्निरासलाभाच्च। नियमविशेषणेनैव कालादृष्टादिव्यावृत्तौ तत एव वायोरपि व्यावृत्तिसिद्धेश्चेति चेत्, उच्यते— टीकायां फलसाधनतानुमितिहेतुपरामर्शरूपं यद्रजतत्वहेतुविषयं ज्ञानमावश्यकमिति प्रतिपादितं तदत्र पक्षः। तस्य पुरोवर्तिविषयत्वं साध्यम्। स च परामर्शः पुरोवर्तिविषयामेव फलसाधनतानुमितिं तद्द्वारा प्रवृत्तिं च जनयति, फलस्य वस्तुतो नानोपायसाध्यत्वेऽपि तदन्यत्र तदुपायत्वानुसंधानाभावात्। फलज्ञानं तु तटस्थं न नियमेन पुरोवर्तिनि प्रवर्तकम्, तस्योपायान्तरगतफलसाधनतानुमितिद्वारा अन्यत्रापि प्रवर्तकत्वसंभवात्। तथैवारोपप्राचीनरजतस्मरणमपि, सत्यपि तस्मिन्नन्यत्र फलसाधनतानुमित्या प्रवृत्तिसंभवात्। तत्रेति विशेषणं तु स्वयं गेहादिनिहितरजतार्थिप्रवृत्तिनियततद्रजतगतफलसाधनत्वादिस्मृतौ व्यभिचारनिरासार्थम्। प्रवर्तकत्वं शरीरव्यापारप्रयोजकत्वमेव विवक्षितमिति रजतार्थिन इति विशेषणं सफलम्। हेतौ ज्ञानत्वं न निवेश्यम्, नियमविशेषणेन तत्प्रयोजनलाभात्। उदाहरणे ज्ञानमिति नियमविशेषणलब्धार्थानुवादः। साध्ये पुरोवर्तीतिपदं विसंवादिप्रवृत्तिविषयशुक्त्यादिव्यक्तिविशेषपरम्। अत एव रजतज्ञाने दृष्टान्ते साध्यवैकल्यं मा भूदिति यत्तत्पदाभ्यां सामान्यव्याप्तिरुपन्यस्ता। यदि आर्थिन इत्येतावतैव वाय्वादिव्यावर्तनाद्रजतविशेषणं न निवेश्यते तदा रजतभ्रमजन्यप्रवृत्तिविषये पुरोवर्तिनि शुक्त्यर्थिप्रवर्तकशुक्तित्वप्रकारकज्ञानं दृष्टान्तीकृत्य विशेषव्याप्तिरप्युपपादयितुं शक्या न तु प्रयत्नप्रयोजकत्वम्, अख्यातिवादिना तत्रेच्छाप्रयत्नावपि न पुरोवर्तिविषयौ किं तु तन्मूलरजतज्ञानवत् देशान्तरस्थविषयावित्यप्यपलपितुं शक्यत्वेन हेत्वसिद्धिप्रसङ्गात्, अन्यथा तत्र नियमेन रजतेच्छाकारणत्वस्यैव हेतुत्वसंभवेन रजतार्थिप्रवर्तकत्वपर्यन्तहेत्वनपेक्षणात्, तदपेक्षणेऽपि तत्रत्यरजतेच्छायां विशेषव्याप्त्युदाहरणसंभवेन समीचीनरजतज्ञाने सामान्यव्याप्त्युदाहरणायोगाच्च। एवं च वायुकालादृष्टप्रागभावादिव्यावर्तनाय रजतार्थीति विशेषणम्। यद्यपि वाय्वादीनां पुरोवर्तिविषयप्रवृत्तिं प्रत्यसाधारणकारणत्वाभावात् नियमविशेषणेनापि भवति व्यावृत्तिः तथापि प्रागभावस्य न भवति, तस्य प्रतियोगिनि

परिमलः ।

तत्तत्प्रागभावत्वेन कारणत्वाङ्गीकारात् । तद्व्यावृत्तिस्तु पुरोवर्तिविषयरजतार्थिप्रवृत्तित्वावच्छिन्नकार्यप्रयोजकत्वस्य हेतुत्वविवक्षयेति न किंचिदवद्यम् । टीकायामुदाहरणवाक्ये ज्ञानपदम्– रजतप्रमैव सामान्यव्याप्तौ दृष्टान्तः न तु विसंवादिप्रवृत्तिस्थलेच्छा शङ्कितान्यविषयभावा विशेषव्याप्तौ दृष्टान्तः– इति सूचनाय । यत्र यद्यदर्थिनमित्यत्र यद्रजतार्थिनमित्यर्थो ग्राह्यः । इत्थमिष्टसाधनतानुमितिहेतुपरामर्शरूपस्य रजतत्वप्रकारकज्ञानस्य पक्षत्वम् इष्टसाधनत्वानुमितिहेतोरपक्षधर्मत्वप्रसङ्गमत्र विपक्षबाधकमुपन्यस्यता टीकाग्रन्थेन सूचितम् ॥

ननु– अत्र हेतोरपक्षधर्मत्वं न दोषः । न ह्यख्यातिवादिभिर्भ्रमस्थले प्रवृत्तिविषयविषयकेष्टसाधनतानुमितिरभ्युपगम्यते, अन्यथाख्यात्यापत्तेः ; किं त्विष्टसाधनत्वव्याप्तरजतत्वाश्रयभेदाग्रहादुपस्थितेष्टसाधनभेदाग्रहमात्रम्, रजतभेदाग्रहवदावश्यकात् तत एव प्रवृत्तिरिति कल्पने लाघवात्– इति चेत् ; यद्येवमनुमितावपि पक्षे लिङ्गवद्भेदाग्रह एव कारणं स्यात् न्यायतौल्यात्, न तु लिङ्गविशिष्टपक्षज्ञानम् । तथा च विसंवादिप्रवृत्तिस्थले पक्षे इष्टसाधनत्वव्याप्तरजतत्वाश्रयभेदाग्रहादिष्टसाधनत्वानुमितिर्भवन्ती केन वार्यते ? तस्मात् ' भक्षितेऽपि लशुने न व्याधिशान्तिः ' इति न्यायेन अन्यथाख्यातिपरिजिहीर्षया भ्रमस्थले विशिष्टज्ञानमपलप्य प्रवृत्तौ भेदाग्रहं कारणमाश्रयतोऽनुमितावपि स एव कारणं स्यादित्यन्यथाख्यातिरूपानुमितेरशक्यप्रतिक्षेपत्वादभावरूपं भेदाग्रहं परित्यज्य भावतया लघु लिङ्गविशिष्टपक्षज्ञानमेवानुमितौ कारणमभ्युपेयमिति युक्तोऽत्र हेतोरपक्षधर्मत्वप्रसङ्गो विपक्षबाधकस्तर्कः ॥

एवमिष्टसाधनत्वानुमितिहेतुपरामर्शरूपरजतज्ञानपक्षकवत् केवलरजतज्ञानपक्षकमपि निरुक्तहेतुसाध्यकमनुमानं युक्तमेव, तत्रापि विशिष्टज्ञानस्य प्रवृत्तिकारणत्वे संभवत्यभावरूपभेदाग्रहस्य तत्कारणत्वकल्पने गौरवमिति विपक्षबाधकसद्भावात् । ननु– अत्र विपरीतं गौरवम्, इष्टपुरोवर्तिज्ञानमात्रस्यावश्यकभेदाग्रहविशिष्टस्य प्रवर्तकत्वोपपत्तौ मिथ्याज्ञानतद्विषयकल्पनायोगात् । ततश्च प्रतिकूलतर्कपराहतमनुमानम् । न च मिथ्याज्ञानापलापे भ्रमस्थले भेदाग्रहसाहित्येन प्रवृत्तिवदभेदाग्रहसाहित्येन निवृत्तेरपि प्रसङ्गः, रजतस्मरणस्य रजताभेदविषयत्वेन अभेदाग्रहासिद्धेः– इति चेत्, मैवम्, मिथ्याज्ञानापलापे सत्यस्थले इष्टपुरोवर्तिभेदग्रहाप्रसिद्धितः तदभावाप्रसिद्ध्या सत्यरजतज्ञानादप्रवृत्तिप्रसङ्गात् । भेदाग्रहशब्देन पुरोवर्तिनीष्टभिन्नत्वप्रकारकज्ञानविषयत्वाभावो विवक्षित इति चेत्, तर्हि तव भ्रमस्थले पुरोवर्तिनीष्टाभिन्नत्वप्रकारकज्ञानविषयत्वस्याप्यभावोऽस्तीति

परिमलः ।

ततो निवृत्तिरपि स्यात् । टीकायामिदमेव दूषणम् 'अथ तथात्वेनाग्रहणात् कस्मान्नोपेक्षेत' इति ग्रन्थेन दर्शितम् । किं चैवं सति रजते 'नेदं रजतम्' इति भ्राम्यतोऽपि रजतार्थिनस्तत्र प्रवृत्तिप्रसङ्गः, रजते रजतभेदग्रहे मिथ्याज्ञानप्रसङ्गेन तत्रापि 'इदम्' इति 'न रजतम्' इति च ज्ञानद्वयस्य कल्पनीयत्वात् । स्वातन्त्र्यमिष्टे विशेषणम्, तच्च भेदप्रतियोगितोपस्थित्यविषयत्वमिति चेत्, तथा विशेषणे कृते स दोषो नितरां दृढीकृतः स्यात्; 'नेदं रजतम्' इति भ्रमस्थले पुरोवर्तिगतस्य विशिष्टाभावस्येष्टभिन्नत्वप्रकारकज्ञानविषयत्वरूपविशेष्याभावमात्रादपि सिध्यतः स्वातन्त्र्यरूपविशेषणस्याप्यभावे सुतरां सिद्धेः । 'नेदं रजतम्' इति प्रमास्थलेऽपि रजतार्थिप्रवृत्तिः स्यादिति दोषश्चात्राधिकः, तत्र विशेषणाभावात् विशिष्टाभावसिद्धेः ॥

वस्तुतस्तु स्वातन्त्र्यम् उक्तविशिष्टाभावप्रतियोगिकोटाविष्टविशेषणं न युक्तम्, इष्टभिन्नत्वज्ञानदशायामिष्टस्य भेदप्रतियोगितोपस्थितिविषयत्वनियमेन तदभावविशिष्टेष्टविशेषितस्य प्रतियोगिनः अप्रसिद्ध्या तदभावाप्रसिद्ध्यापत्तेः । ननु तर्हि स्वातन्त्र्यमपि प्रवृत्तौ पृथक्कारणान्तरमस्तु अतस्तदभावात्, 'नेदं रजतम्' इति प्रमाभ्रमस्थलयोर्न प्रवृत्तिप्रसङ्गः । प्रतियोगिविशेषणत्वेनानिवेशनाच्च न विशिष्टाप्रसिद्ध्या तदभावाप्रसिद्ध्यापत्तिरिति चेत्, न, तथा सति 'इदं रजतं घटनिष्ठभेदप्रतियोगि' इति ज्ञानादप्रवृत्त्यापत्तेः । यद्येतद्दोषपरिहाराय पुरोवर्तिनिष्ठभेदप्रतियोगित्वेनानुपस्थितत्वं स्वातन्त्र्यम् इति निरुच्येत तदा 'नेदं रजतम्' इति भ्रमस्थले रजतार्थिप्रवृत्तिः स्यादिति दोषः पुनरुन्मज्जेत् । ननु– पुरोवर्त्यगृहीतासंसर्गकभेदप्रतियोगित्वेनानुपस्थितत्वं स्वातन्त्र्यम्, अतस्तदभावात् 'नेदं रजतम्' इति भ्रमेण न प्रवृत्तिप्रसङ्गः, तत्र पुरोवर्तिनि रजतभेदासंसर्गाग्रहसत्त्वेन तद्विशेषितभेदप्रतियोगितोपस्थितेर्विद्यमानतया तदभावाभावात् । नापि 'इदं रजतं घटनिष्ठभेदप्रतियोगि' इति ज्ञानेनाप्रवृत्तिप्रसङ्गः, तत्र पुरोवर्तिनि रजतभेदासंसर्गरूपरजताभेदग्रहसत्त्वेन तदभावविशेषितभेदप्रतियोगितोपस्थित्यभावसत्त्वात्– इति चेत्, न; एवमपि यत्र 'इदं न' इति भेदविशिष्टपुरोवर्तिज्ञानं रजतस्मरणं चेति ज्ञानद्वयरूपः 'नेदं रजतम्' इति भ्रमः तत्र रजतार्थिप्रवृत्तिप्रसङ्गात्, 'न रजतम्' इत्यधिकरणविशेषानुल्लेखिन इव 'इदं न' इति प्रतियोगिविशेषानुल्लेखिनोऽपि भेदज्ञानस्य संभवात् ॥

स्यादेतत् । पुरोवर्त्यगृहीतासंसर्गकभेदप्रतियोगित्वासंसर्गाग्रहाभाववत्त्वं स्वातन्त्र्यम्। एवं च न कोऽपि दोषः । तथा हि— 'इदम्' इति 'न रजतम्' इति च ज्ञानद्वयात्मकस्य 'नेदं रजतम्' इति भ्रमस्योदये पुरोवर्तिनि रजतभेदस्यासंसर्गाग्रहोऽस्ति 'इदं

भामती ।

नीयात् कथं रजतार्थी तादिच्छेत्? यदि अतथात्वेनाग्रहणात् इति ब्रूयात् स च प्रतिवक्तव्यः अथ तथात्वेनाग्रहणात् कस्मान्नोपेक्षेतेति । सोऽयमुपादानोपेक्षाभ्यामुभयत आकृष्यमाणश्चेतनः अव्यवस्थितः इदंकारास्पदे रजतसमारोपेणोपादान एव व्यवस्थाप्यत इति भेदाग्रहः समारोपोत्पादक्रमेण चेतनप्रवृत्तिहेतुः । तथा हि— भेदाग्रहादिदंकारास्पदे रजतत्वं समारोप्य, तज्जातीयस्योपकारहेतुभावमनुचिन्त्य, तज्जातीयतयेदंकारास्पदे रजते तमनुमाय, तदर्थी प्रवर्तते इत्यानुपूर्व्यं सिद्धम् । न च तटस्थरजतस्मृतिः इदंकारास्पदस्योपकारहेतु-

परिमलः ।

रजतम्' इति भ्रमोदये रजतस्येव । तथा च तत्र पुरोवर्त्यगृहीतासंसर्गभेदप्रतियोगित्वेन रजतस्य ग्रहणात्तत्प्रतियोगित्वासंसर्गाग्रहोऽस्तीति तदभावाभावात् न तत्र रजतार्थिप्रवृत्तिप्रसङ्गः । नापि 'इदं न' इति 'रजतम्' इति च ज्ञानद्वयात्मकस्य 'नेदं रजतम्' इति भ्रमस्योदये तत्प्रसङ्गः, तत्र पुरोवर्तिनि गृहीतसंसर्गत्वेनागृहीतासंसर्गो यो भेदः तत्प्रतियोगित्वस्यासंसर्गः इष्टे यद्यपि विद्यते तथापि तस्य 'नेदं रजतम्' इति भ्रमदशायामग्रहस्य सत्त्वेन तदभावाभावात् । 'इदं रजतं घटनिष्ठभेदप्रतियोगि' इति ज्ञानोदये च नाप्रवृत्तिप्रसङ्गः, तत्र रजते भेदप्रतियोगित्वसंसर्गग्रहणेन तदसंसर्गाग्रहरूपविशेष्यसद्भावेऽपि पुरोवर्तिनि भेदासंसर्गरूपाभेदग्रहणेन विशेषणाभावात्तद्विशिष्टस्य भेदप्रतियोगित्वासंसर्गाग्रहस्याभावसद्भावदिति चेत्, मैवम् । एवमपि यत्र 'इदं रजतम्' इति भ्रमकाले 'रजतं घटनिष्ठभेदप्रतियोगि' इत्यपि स्मरणं तत्राप्रवृत्तिप्रसङ्गः, तत्र पुरोवर्तिनि रजतभेदासंसर्गग्रहे मिथ्याज्ञानप्रसङ्गेन तदसंसर्गाग्रहोऽस्तीति पुरोवर्त्यगृहीतासंसर्गभेदप्रतियोगित्वसंसर्गग्रहसत्त्वेन तदसंसर्गाग्रहस्य प्रतियोगिनो विद्यमानतया तदभावाभावात् । अरजतरजतयोः 'इमे रजतारजते' इति भ्रमादरजते रजतार्थिप्रवृत्त्यभावप्रसङ्गश्च, तत्र पुरोवर्तिन्यरजते रजतभेदासंसर्गग्रहे मिथ्याज्ञानप्रसङ्गेन अरजतरूपपुरोवर्त्यगृहीतासंसर्गभेदप्रतियोगित्वेन रजतस्य गृह्यमाणतया तदसंसर्गाग्रहस्य प्रतियोगिनः सत्त्वेन तदभावाभावात् । किं बहुना, 'इदं रजतम्' इत्येतावन्मात्ररूपात् प्रसिद्धरजतभ्रमादपि प्रवृत्त्यभावप्रसङ्गः; तत्र हि रजतभेदः पुरोवर्त्यगृहीतासंसर्गो भवति, तत्र तदसंसर्गग्रहे मिथ्याज्ञानापत्तेः । रजते तथाभूतभेदप्रतियोगित्वासंसर्गाग्रहोऽप्यस्ति, तत्र रजते भेदप्रतियोगित्वं नास्तीति भेदप्रतियोगित्वासंसर्गग्रहोदयाभावात् । अतो विशिष्टस्य प्रतियोगिनः सत्त्वेन तदभावरूपस्वातन्त्र्याभावात् न प्रवृत्तिर्घटते । तस्मात् मिथ्याज्ञानापलापेन भेदाग्रहात् प्रवृत्त्युपपादनमयुक्तमेव ॥

भामती।

भावमनुमापयितुमर्हति, रजतत्वस्य हेतोरपक्षधर्मत्वात्। एकदेशदर्शनं खल्वनुमापकं न त्वनेकदेशदर्शनम्। यदाहुः— ज्ञातसंबन्धस्यैकदेशदर्शनादिति। समारोपे त्वेकदेशदर्शनमस्ति। तत्सिद्धमेतद्विवादाध्यासितं रजतादिज्ञानं पुरोवर्तिवस्तुविषयम्, रजताद्यर्थिनस्तत्र नियमेन प्रवर्तकत्वात्, यद्यदर्थिनं यत्र नियमेन प्रवर्तयति तज्ज्ञानं तद्विषयं यथोभयसिद्धसमीचीनरजतज्ञानम्, तथा चेदम्, तस्मात्तथेति। यच्चोक्तम् अनवभासमानतया न शुक्तिरालम्बनमिति, तत्र भवान् पृष्टो व्याचष्टाम्— किं शुक्तिकात्वस्य 'इदं रजतम्' इति ज्ञानं प्रत्यनालम्बनत्वम् आहोस्वित् द्रव्यमात्रस्य पुरःस्थितस्य सितभास्वरस्य? यदि शुक्तिकात्वस्य अनालम्बनत्वम्, अद्धा! उत्तरस्यानालम्बनत्वं ब्रुवाणस्य तवैवानुभवविरोधः। तथा हि— 'रजतमिदम्' इत्यनुभवन्ननुभविता पुरोवर्ति वस्तु अङ्गुल्यादिना निर्दिशति। दृष्टं च दुष्टानां कारणानामौत्सर्गिककार्यप्रतिबन्धेन कार्यान्तरोपजननसामर्थ्यम्, यथा दावाग्निदग्धानां वेत्रबीजानां कदलीकाण्डजनकत्वम्, भस्मकदुष्टस्य चौदर्यस्य तेजसो बह्वन्नपचनमिति। प्रत्यक्षबाधापहृतविषयं च विभ्रमाणां यथार्थत्वानुमानमाभासः, हुतवहानुष्णत्वानुमानवत्। यच्चोक्तं मिथ्याप्रत्ययस्य व्यभिचारे सर्वप्रमाणेष्वनाश्वास इति, तत् बोधकत्वेन स्वतःप्रामाण्यं नाव्यभिचारेणेति व्युत्पादयद्भिरस्माभिः परिहृतं न्यायकणिकायामिति नेह प्रतन्यते। दिङ्मात्रं चास्य

कल्पतरुः।

नियमेनेति। फलस्य हि नानोपायसाध्यत्वान्न तज्ज्ञानमुपाये नियमेन प्रवर्तकम्। स्मरणे व्यभिचारनिवृत्त्यर्थमाह—तत्रेति। वाग्वादौ व्यभिचारमाशङ्क्याह—अर्थिन इति। वाग्वादिर्हि प्रसह्य प्रवर्तयति न त्वर्थितामनुरुन्द्धे। यच्चोक्तं समीचीनज्ञानहेतुभ्यो न मिथ्याज्ञानजन्मेति तत्राह— दृष्टं चेति॥

परिहृतं न्यायकणिकायामिति। एवं हि तत्र व्युत्पादितम्। किमव्यभिचारितैव प्रामाण्यम् उत तद्धेतुः अथ तद्व्यापिका, येन क्वचिद्व्यभिचारदर्शनात् ज्ञाना-

परिमलः।

नन्वनाश्वासदोषे परेणोद्भाविते निराकर्तव्ये सति अव्यभिचारस्य प्रामाण्यरूपत्वादिविकल्पः कोपयुज्यते इत्याशङ्क्याह— येन क्वचिदिति। अयमाशयः— प्रामाण्यनि-

भामती ।

स्मृतिप्रमोषभङ्गस्योक्तम् । विस्तरस्तु ब्रह्मतत्त्वसमीक्षायामवगन्तव्य इति; तदिदमुक्तम्— 'अन्ये तु यत्र यदध्यासस्तस्यैव विपरीतधर्मकल्पनामाचक्षते' इति । यत्र शुक्तिकादौ यस्य रजतादेरध्यासस्तस्यैव शुक्तिकादेर्विपरीतधर्मकल्पनां रजतत्वधर्मकल्पनामिति योजना ॥

कल्पतरुः ।

नामप्रामाण्यमापतेत्? सर्वथाप्यसंभवः, व्यभिचारिणामपि सितनीलादिषु चक्षुरादीनां बोधकत्वेन प्रामाण्यात् अव्यभिचारिणामपि दहनादौ धूमादीनां कुतश्चिन्निमित्तादनुपजनितदहनादिज्ञानानामप्रामाण्यात्। भवतु ज्ञानकारणं व्यभिचारेऽपि बोधकम्, ज्ञानेन त्वव्यभिचारोऽपेक्ष्यः स्वकार्ये इति चेत्; किं ज्ञेयावभासेऽपेक्ष्यः उत प्रवृत्त्यादिकार्ये? न प्रथमः, जन्मनैव ज्ञानस्य ज्ञेयावभासात्मकत्वात् । न चरमः, अव्यभिचारग्राहिणोऽर्थक्रियासंवादादिज्ञानस्य ज्ञानान्तरादव्यभिचारनिश्चयेऽनवस्थापा-

परिमलः ।

श्रयादेव प्रवृत्यादिकार्योपपत्तेरव्यभिचारनिश्चयस्य नास्त्युपयोग इति परोद्भावितानाश्वासदोषनिराकरणे कृते परेणैवं वाच्यम्— अव्यभिचारानिश्चयः प्रामाण्यानिश्चयपर्यवसायी । तत्पर्यवसानं च त्रेधा संभवति प्रामाण्यस्याव्यभिचारितारूपत्वेन तद्धेतुकत्वेन तद्व्याप्यत्वेन वा । तद्व्याप्यत्वेऽपि हि व्यापकनिवृत्तौ व्याप्यं निवर्तेत । एवं प्रकृतोपयोगितामन्वीक्ष्य त्रेधा विकल्पः कृतः इति । **अव्यभिचारिणामपीति** । इदं व्यतिरेकव्यभिचारदूषणमिव न विकल्पत्रयसाधारणं सहकारिविरहेण प्रतिबन्धेन वा हेतोरपि कार्याजनिसंभवेन द्वितीयविकल्पे अन्वयव्यभिचारस्य तृतीयविकल्पे व्यापकव्यभिचारस्य च अदोषत्वात् । अतः प्रथमविकल्पमात्रे द्वितीयदूषणमिदमिति द्रष्टव्यम् । ननु 'अहो बत महानेष प्रमादो धीमतामपि । ज्ञानस्य व्यभिचारित्वे विश्वासः केनिबन्धनः' इति परेण ज्ञानस्यैव व्यभिचारो दोषत्वेनोक्तः, स च करणव्यभिचारस्यादोषत्वोपपादनेन परिहृतो न भवतीत्याशङ्कते— **भवत्विति** । **अव्यभिचारोऽपेक्ष्य इति** । अव्यभिचारश्च ज्ञानानां प्रामाण्यमेवेति भावः । यदि प्रामाण्यस्य परतस्त्वमिष्यते तत्राह— **अव्यभिचारग्राहिण इति** । **अर्थक्रियासंवादादिज्ञानस्येति** । अर्थक्रियासंवादो दूरे वह्निज्ञाने जाते समीपोपसर्पणानन्तरं दाहसामर्थ्यानुभवः । आदिशब्देन तद्वह्निज्ञानं प्रमा दाहसमर्थे तद्वह्नित्वप्रकारकत्वादित्यनुमाने यत् प्रवृत्तिसंवादरूपज्ञानघटनीयं लिङ्गज्ञानं यच्च तजन्यानुमितिरूपं प्रामाण्यज्ञानं तदुभयमपि गृह्यते । नन्वनवधृतप्रामाण्यमेव

कल्पतरुः।

तात्, अनिश्चये वा अनवधृतप्रामाण्यादस्मात्प्रथमज्ञानप्रामाण्यासिद्धेः। स्वतःप्रा-

परिमलः।

संवादादिज्ञानं स्वविषयनिश्चयात्मकं भवत्वित्यत्राह— **अनिश्चये वेति। प्रामाण्यासिद्धेरिति**। अनवधृतप्रामाण्यादपि ज्ञानाद्विषयसिद्धौ दूरत्वादिदोषेण शङ्कितात्प्रामाण्यात् चन्द्रप्रादेशिकत्वादिज्ञानादपि तत्सिद्धिः स्यात्। यदि प्रामाण्याग्रहणेऽपि अप्रामाण्यशङ्काविरहमात्रेण संवादादिज्ञानं स्वविषयनिश्चयात्मकं भवेत् तदा तथैव प्रथमज्ञानमपि स्वविषयनिश्चयात्मकं सत् प्रवृत्त्यादिकार्योपयोगि भवेदिति भावः॥

नन्वप्रामाण्यशङ्काविरहापेक्षया प्रामाण्यनिश्चयो लघीयान्, अतो निश्चितप्रामाण्यमेव संवादादिज्ञानं स्वविषयनिश्चयरूपमिति संवादादिज्ञानस्य तथात्वसिद्ध्यर्थं स्वतःप्रामाण्यमिष्यते इति चेत्, तत्राह— **स्वतःप्रामाण्ये चेति**। संवादादिज्ञाने सविषये स्फुरति तद्विषयविशेष्यप्रकारतदुभयवैशिष्ट्यघटितं योग्यधर्मरूपं तत्प्रामाण्यं ज्ञानत्ववदुत्सर्गतः स्फुरति। यत्र तु क्वचिदनभ्यासदशादिदोषात् विशेष्यप्रकारवैशिष्ट्यांशे ज्ञानस्य न सत्तानिश्चयरूपत्वं तत्र तद्घटितस्य प्रामाण्यस्य स्थाणुत्वादेरिव स्फुरणं नास्ति; तत्र परं प्रामाण्यसंदेहः इति खलु संवादादिज्ञाने प्रामाण्यस्य स्वतस्त्वं समर्थनीयम्, तन्न्यायः प्रथमज्ञानेऽपि तुल्य इति भावः॥

नन्वयं प्रामाण्यस्य स्वतस्त्वाभ्युपगमो न युक्तः। तथा हि— सिद्धान्ते ज्ञानं स्वप्रकाशम्। अतः 'इदं जलम्' इति 'इदं जलत्वेन जानामि' इति च व्यवहारहेतौ प्रथमज्ञाने एव तत्प्रामाण्यस्य स्फुरणं वाच्यम्, तत्र प्रामाण्यघटकसर्वोपाधिस्फुरणाभ्युपगमात्। ततश्च तत्र प्रामाण्यवद्विशेष्यकप्रामाण्यप्रकारकत्वरूपं प्रामाण्यान्तरमपि संपद्यत इति तदपि तत्र स्फुरेत्, न्यायतौल्यात्। न चेष्टापत्तिः; तथा सति द्वितीयप्रामाण्यघटितप्रामाण्यान्तरस्य तत्तत्प्रामाण्यघटितप्रामाण्यान्तराणां च स्वप्रकाशज्ञाने स्फुरणापत्त्या तस्यानुभवविरुद्धापर्यवसितानन्तविषयाभ्युपगमापत्तेः—इति चेत्, उच्यते— स्वप्रकाशज्ञाने प्रामाण्यस्फुरणे सति प्रामाण्यवद्विशेष्यकप्रामाण्यप्रकारकत्वरूपं प्रामाण्यान्तरं संपद्यते चेत्, संपद्यतां नाम; न तस्यापि तत्र स्फुरणमिष्यते, प्रामाण्यतदाश्रययोः तदुभयवैशिष्ट्यस्य च तत्र स्फुरणेऽपि तत्प्रकारकत्वतद्विशेष्यकत्वयोस्तत्रास्फुरणात्। न हि जलज्ञानानन्तरम् 'इदं जलम्' इति 'इदं जलत्वेन जानामि' इति च व्यवहारवत् इदं ज्ञानं प्रमाणत्वेन जानामीत्यपि व्यवहारो दृश्यते, येन तयोरपि तत्र स्फुरणमिष्येत। न च स्वप्रकाशज्ञानगतत्वेन तत्स्फुरणावश्यंभावः, तद्गतगुणत्वद्रव्यत्वादिवदस्फुरणसंभवात्। तथापि प्रामाण्यस्य

कल्पतरुः ।

माण्ये वा प्रथमेऽपि तथात्वापातादिति । ननु किं प्रामाण्यस्य स्वतस्त्वम्? ज्ञानसामग्रीमात्रजन्यत्वं चेत्, न, प्रामाण्यस्य जातित्वे स्मृतित्वानधिकरणज्ञानगतबाधात्यन्ताभावरूपोपाधित्वे वा द्वयोरपि नित्यत्वेन जन्माभावात् इति । तदुच्यते— इयं रूपप्रमा अर्थसंप्रयोगत्वानधिकरणैतच्चक्षुर्गतगुणजन्या न भवति, प्रमात्वात् श्रो-

परिमलः ।

स्वाश्रयसहभाननियमरूपस्वतस्त्वाभ्युपगमात् तत्स्फुरणावश्यंभाव इति चेत्, न, 'यत्र प्रामाण्यघटकसर्वोपाधिस्फुरणमस्ति तत्र प्रामाण्यस्य स्फुरणम्' इत्युत्सर्गरूपस्य नियमस्य यत्र तद्घटकस्य कस्यचिदस्फुरणं तत्रापवादाभ्युपगमात् । तस्मात् स्वप्रकाशज्ञाने प्रामाण्यस्फुरणौत्सर्गिकत्वाभ्युपगतौ न काचिदनुपपत्तिः ॥

प्रसङ्गादुत्पत्तावपि स्वतस्त्वं निरूपयितुं पृच्छति— **ननु किमिति** । यद्वा ज्ञानमुत्पद्यमानमुत्सर्गतः प्रमारूपमेवोत्पद्यते चेत्, एवं प्रमाप्रायिकत्वाधीनसमुत्कटतद्वासनावशादप्रामाण्यशङ्कानुदयः प्रामाण्यस्फुरणं च इत्युभयमौत्सर्गिकं भवति । अतः स्वतः प्रामाण्ये वेति पूर्ववाक्येनोपक्षिप्तमौत्सर्गिकत्वरूपं ज्ञप्तिस्वतस्त्वमुपपादयितुमुत्पत्तावपि स्वतस्त्वं निरूपयितुं पृच्छति— ननु किमिति ॥

इयं रूपप्रमेति । ननु स्वतस्त्वनिर्वचनप्रश्ने तदप्रदर्श्य किमिति प्रमाणमुपन्यस्यते? अथ ज्ञानसामग्रीमात्रजन्यत्वमेव स्वतस्त्वम्, तत्तु प्रामाण्यस्य नेष्यते किं तु तदधिकरणज्ञानव्यक्तेः, अतो नोक्तदोषः इति प्रमापक्षीकरणेन सूचितमिति चेत्, न, उपन्यस्तनिर्वचनस्य परतस्त्वसाधारण्यात् । न हि परतस्त्वपक्षे प्रमा न ज्ञानं येन सा ज्ञानसामग्रीमात्रजन्या न स्यात् । अथ ज्ञानसामान्यसामग्रीमात्रजन्यत्वं विवक्षितमिति चेत्, न, ज्ञानसामान्यसामग्र्यनुप्रविष्टात्ममनःसंयोगाद्यतिरिक्तेन्द्रियलिङ्गपरामर्शादिजन्यासु प्रत्यक्षानुमित्यादिप्रमास्वसंभवापत्तेरिति चेत्, मैवम्, ज्ञानसामग्रीशब्देन प्रमाभ्रमसाधारणज्ञानकारणकलापस्य विवक्षितत्वात्, इन्द्रियादीनां च प्रमास्विव भ्रमेष्वपि कारणत्वात्, 'चक्षुषा रजतं पश्यामि' इति प्रातिभासिकस्यापि चाक्षुषत्वानुभवात् ॥

प्रमायाः प्रमाभ्रमसाधारणकारणातिरिक्तकारणजन्यत्वाभावरूपं स्वतस्त्वं यथा सिध्यति तथा साध्यं दर्शयति— **अर्थेति** । अत्र साध्ये संयुक्तसमवायान्तर्गतसंयोगरूपचक्षुर्गुणजन्यत्वेन विषयभूतरूपगुणजन्यत्वेन च बाधवारणाय अर्थसंप्रयोगत्वानधिकरणेति चक्षुर्गतेति च गुणविशेषणम् । सामान्याभावाविवक्षया चक्षुरन्तरगतगुणजन्यत्वाभावेनार्थान्तरवारणायैतादिति चक्षुर्विशेषणं तद्विवक्षायां तु नोपादेयम् । न चैवमपि

परिमलः

व्यञ्जकतेजोरूपत्वादालोकरूपवच्चक्षूरूपमपि रूपप्रमाहेतुरिति बाधः, तेजोगतमुद्भूतरूपमेव रूपादिज्ञानहेतुः न तु ऊष्मरूपवदनुद्भूतं चक्षूरूपमिति मतानुसरणात्। मतान्तरे तु रूपभिन्नेत्यपि विशेषणं देयम्। ननु उक्तरूपं स्वतस्त्वं कथमनेन साध्यनिर्देशेन सिध्यति। न हि प्रमाभ्रमसाधारणज्ञानसामान्यकारणकलापानुप्रविष्टं प्रमायां विशेषकारणं संप्रयोगातिरिक्तचक्षुर्गुणरूपं परतस्त्ववादिभिरिष्यते येन तज्जन्यत्वाभावसाधनं स्वतस्त्वसाधनं भवेत्। परतस्त्ववादिभिर्हि स्थूलावयविप्रत्यक्षप्रमायां भूयोवयवेन्द्रियसंनिकर्षो जन्यप्रत्यक्षप्रमायां यावद्विषयसंनिकर्षो जन्यप्रमामात्रे ग्राह्ययथार्थज्ञानं च विशेषकारणमिष्यते। न च तद्व्यावर्तनमुदाहृतसाध्यनिर्देशेन लभ्यते। तत्रादिमस्य विशेषकारणद्वयस्य व्यावर्तनं चक्षुर्गतविशेषणलभ्यं संप्रयोगातिरिक्तविशेषणेन निरुद्धम्। संप्रयोगातिरिक्तविशेषणलभ्यं तृतीयस्य व्यावर्तनं चक्षुर्गतविशेषणेन निरुद्धम्। तस्मात् नानेनानुमानेन स्वतस्त्वसिद्धिः इति चेत्, उच्यते— चक्षुर्गतपित्तदोषाभावे शङ्खे श्वैत्यप्रमा तदभावे न, चक्षुर्गतमण्डूकवसाञ्जनाभावे वंशवर्णप्रमा तदभावे न—इत्यन्वयव्यतिरेकाभ्यां रूपचाक्षुषप्रमायां विशेषकारणत्वेन शङ्काईः तथैव परतस्त्ववादिभिरिष्यमाणश्चक्षुर्दोषाभावरूपो यस्तद्धर्मस्तज्जन्यत्वाभाव इह साध्यः। अन्यत्तु प्रमायां विशेषकारणत्वेन शङ्काईमेव न भवति। न हि भूयोवयवेन्द्रियसंनिकर्षं विना स्थूलावयविप्रत्यक्षप्रमा नोत्पद्यते, तदभावेऽपि संनिकृष्टकिंचित्प्रदेशावच्छेदेन तदुत्पत्तिदर्शनात्। अतस्तत्तत्प्रदेशप्रत्यक्षमात्रार्थं तत्तत्प्रदेशसंनिकर्षापेक्षेति न भूयोवयवेन्द्रियसंनिकर्षस्य स्थूलावयविप्रत्यक्षप्रमायां विशेषकारणत्वे मानमस्ति॥

एतेन स्थूलावयवावच्छेदेन संनिकर्षस्तस्यां विशेषकारणमित्यपि निरस्तम्, स्थूलावयविनि परमाणुद्व्यणुकरूपसूक्ष्मावयवावच्छेदेन संनिकर्षे भ्रमस्याप्यनुदयात्। यावद्विषयसंनिकर्षोऽपि न प्रमायां विशेषकारणम्, असंनिकृष्टभाने अतिप्रसङ्गेन शुक्तिरजतादिष्वपि संस्कारस्य स्मृतेर्वा संनिकर्षस्याभ्युपेयत्वात्; असंनिकृष्टमपि रजतादिकं दोषाद्भासत इति समर्थने तथैवासंनिकृष्टमपि निध्यादिकमञ्जनादिगुणात् भासत इति समर्थयितुं शक्यत्वेन प्रमायामपि तस्यानुगतविशेषकारणत्वाभावप्रसङ्गात्। विशेष्यवृत्तिविशेषणसंनिकर्षोऽपि न जन्यप्रत्यक्षप्रमानुगतो गुणः, परम्परासंबन्धेन स्फटिकवृत्तेर्लौहित्यस्य तत्र साक्षात्संबन्धावगाहिनि भ्रमेऽपि तस्य साधारण्यात् तत्तत्संबन्धविशेषेण वृत्तिविवक्षायामननुगमात्॥

एतेन विशेषणवद्विशेष्यसंनिकर्षस्तस्यां गुण इत्यपि निरस्तम्। ग्राह्ययथार्थज्ञानस्य

परिमलः ।

तु जन्यप्रमामात्रे नान्वयव्यतिरेकाभ्यां विशेषकारणत्वम्, व्यभिचारेण तदसिद्धेः । ननु लोके शाब्दप्रमायां वक्तृवाक्यार्थयथार्थज्ञानस्य कारणत्वदर्शनात् यद्विशेषयोः कार्यकारणभावः बाधकं विना तत्सामान्ययोरपि इति व्याप्त्या तत्र तस्य कारणत्वसिद्धिः । न च व्यभिचारः, यत्रास्मदादिगतग्राह्ययथार्थज्ञानं नास्ति तत्र सर्वत्रोक्तव्याप्तिबलेन परमेश्वरज्ञानस्य तथात्वेनापि कारणत्वकल्पनोपपत्तेः इति चेत्, न, अप्रयोजकत्वात् । न च जन्यप्रमात्वावच्छिन्नकार्यस्याकस्मिकत्वप्रसङ्गो विपक्षबाधकस्तर्कः, जन्यज्ञानत्वावच्छिन्ने ज्ञानसामान्यकारणकलापस्य सत्त्वात्, तत्र तद्वद्विशेष्यकतत्प्रकारकत्वस्याव्यवस्थितघटत्वपटत्वादिप्रवेशेनाननुगतस्यावच्छेदककोटिप्रवेशायोगात् । अन्यथा वक्तृवाक्यार्थायथार्थज्ञानस्य शाब्दभ्रमे कारणत्वात् 'यद्विशेषयोः—' इत्युक्तव्याप्त्यैव भ्रममात्रे ग्राह्यभ्रमो हेतुः कल्पनीय इति परमेश्वरे नित्यप्रमावत् नित्यभ्रान्तिरप्यङ्गीकरणीया स्यात् । यत्तु तदभाववति तत्प्रकारकं ज्ञानमपेक्ष्य लघु तदभाववज्ज्ञानमेव भ्रमेषु दोषोऽस्तु; तत्तु भ्रमे धर्मिज्ञानरूपं सर्वत्र सुलभमिति नेश्वरे भ्रान्तिकल्पना प्रसज्जते । न चैवं प्रमायामपि लघु तद्वज्ज्ञानमेव गुणः स्यादिति वाच्यम्, इष्टापत्तेः, तावतापि परतस्त्वसिद्धेस्तत्फलेश्वरसिद्धेश्चाप्रत्यूहत्वादिति— तन्न, तदभाववत्त्वेन ज्ञानस्य भ्रमविरोधिनस्तत्कारणत्वायोगात्, वस्तुतो यत् तदभाववत् तज्ज्ञानस्य विशेषणज्ञानादिरूपस्य प्रमासाधारण्येन भ्रमासाधारणकारणत्वरूपदोषत्वायोगात् । तदभाववद्विशेष्यकं ज्ञानं दोष इति चेत्, न, तदभाववद्विशेषणविशेष्यकाणामपि ज्ञानानां प्रमाकारणानां बहुलमुपलम्भात् । तदभाववद्भ्रमविशेष्यविशेष्यकं ज्ञानं दोष इति चेत्, न, तदभाववत्त्वविशेषणवैयर्थ्यात्, भ्रमविशेष्यस्यारोप्याभाववत्त्वनियमात् । अस्तु तर्हि भ्रमविशेष्यविशेष्यकमेव ज्ञानं दोष इति चेत्, न, एतदपेक्षया भ्रम एव भ्रमे दोष इति कल्पनाया लघीयस्त्वात् । तस्मात् भूयोवयवेन्द्रियसंनिकर्षादीनां शङ्कानर्हत्वात् प्रमान्वयव्यतिरेकशालितया तदर्हस्येन्द्रियदोषाभावस्यैवाधिककारणत्वनिराकरणमनेनानुमानेन कृतम् ॥

चक्षुर्दोषाभावस्य तन्निराकरणमिदम् इन्द्रियान्तरदोषाभावानामधिककारणत्वनिराकरणार्थानामप्येतच्छायापन्नानामनुमानान्तराणामुपलक्षणम् । का तर्हि दोषाभावान्वयव्यतिरेकयोर्गतिः ? दोषस्य प्रमाप्रतिबन्धकत्वमेव । सत्यां सामग्र्यां कार्यविरोधि हि प्रतिबन्धकं लोके प्रसिद्धम्, न तु नैयायिककल्पितं कारणीभूताभावप्रतियोगि तैरपि, 'साक्षादविरोधिनो ज्ञानस्य जनकज्ञानविघटकस्यैव प्रतिबन्धकत्वम्' इत्यादि वदद्भिः कारणीभूताभावप्रतियोगित्वेनानभ्युपगतमपि कार्यानुत्पत्तिव्याप्यमात्रं प्रतिबन्धकमिष्यते एवेत्यलं विस्तरेण ॥

कल्पतरुः।

त्रजप्रमावत्। तथा एषा प्रमा उक्तविधगुणज्ञानाधीनज्ञाना न भवति, तथाविधगुणज्ञानाधीनप्रवृत्तिकरी च न भवति, तत एव, तद्वदेव च– इति ज्ञप्तिव्यवहारयोरपि स्वतस्त्वसिद्धिरिति॥

परिमलः।

ज्ञप्तिस्वतस्त्वमपि अनुमानारूढं करोति— **तथेति। उक्तविधेति।** चक्षुर्गतगुणज्ञानाधीनप्रथमप्रामाण्यज्ञाना न भवतीत्यर्थः। स्वतस्त्ववादे प्रथमं प्रामाण्यस्य करणगुणज्ञानानपेक्षज्ञानत्वेऽपि पश्चात् करणगुणेनापि तदनुमानं संभवतीति बाधवारणाय प्रथमविशेषणम्। परतस्त्ववादे प्रथममपि प्रमारूपं धर्मिज्ञानं करणगुणज्ञानानधीनं संभवतीति सिद्धसाधनवारणाय प्रामाण्यपदम्। गुणपदं पूर्ववत् निर्दोषत्वधर्मपरम्। ननु परतस्त्ववादिभिः करणदोषाभावलिङ्गादिव समर्थप्रवृत्तिलिङ्गसंवादाभ्यामपि प्रथमं प्रामाण्यस्य ज्ञेयत्वमिष्यते तदुभयज्ञेयत्वनिरासोऽनेनानुमानेन न सिध्यतीति चेत्, सत्यम्। समर्थप्रवृत्तिसंवादौ तदयोग्यवैदिकार्थादिज्ञानप्रामाण्यावधारणे न संभवतः, करणदोषाभावज्ञानं तु सर्वत्र संभवतीति तदधीनप्रथमज्ञानत्वमनेनानुमानेन निरस्तम्। तथा च यस्यां प्रमायां करणदोषाभावलिङ्गकमेव परतस्त्ववाद्यभिमतं प्रामाण्यग्राहकं प्रवर्तते सैवात्र पक्षः, न तु समर्थप्रवृत्तिसंवादावसितप्रामाण्येति न सिद्धसाधनम्। तदवसितप्रामाण्यायां तु प्रमायां स्वतस्त्वे 'एतद्घटप्रमा' 'एतद्घटविषयसमर्थप्रवृत्तिसंवादाधीनप्रथमप्रामाण्यनिश्चया न भवति, प्रमात्वात् पटप्रमावत्' इत्यनयैव रीत्या तत्राप्यनुमानमुन्नेतुं शक्यमिति न प्रदर्शितम्। एवं च परतस्त्वनिषेधे प्रामाण्यस्य स्वाश्रयसहभाननियमरूपस्वतस्त्वसिद्धिः। नन्वेवं सति यस्यां रूपप्रमायां करणदोषशङ्क्या प्रामाण्यसंशये सति तन्निर्दोषत्वनिश्चयेन प्रामाण्यनिश्चयः तत्र साध्यस्य बाधः स्यादिति चेत्, न, अतथाभूताया इह पक्षीकरणात् तत्प्रतिपत्त्यर्थत्वादेषेति पक्षविशेषणस्य॥

तथाविधेति। नन्विह साक्षात्प्रवृत्तेः करणगुणज्ञानाधीनत्वं न निषेध्यम्, परतस्त्ववादिभिरपि तस्याः साक्षात्समानविषयरजतादिज्ञानजन्यत्वस्यैवाभ्युपगतत्वात्। नापि प्रामाण्यनिश्चयद्वारा, प्रामाण्यनिश्चयो न प्रवृत्त्यर्थमपेक्षितः, अनवस्थाप्रसङ्गात्; किं त्वप्रामाण्यशङ्काशून्यं समानविषयज्ञानमेवेति तैरभ्युपगतत्वात्। न च वाच्यं करणदोषसंशयेन प्रवर्तकज्ञानस्याप्रामाण्यशङ्क्या प्रवृत्तिप्रतिबन्धे प्रसक्ते निर्दोषत्वरूपकरणगुणज्ञानजन्येन प्रामाण्यनिश्चयेन तच्छङ्कानिरासपूर्विका यत्र प्रवृत्तिः तत्र तस्याः करणगुणज्ञानाधीनत्वं परतस्त्ववाद्यभिमतं निषेध्यमिति, स्वतस्त्ववादिभिरपि तस्याङ्गीकर्तव्यत्वेन

तधर्मकल्पनामाचक्षत इति । सर्वथापि त्वन्यस्यान्यधर्मावभासतां न

भामती ।

ननु सन्तु नाम परीक्षकाणां विप्रतिपत्तयः, प्रकृते तु किमायातमित्यत आह— सर्वथापीति । अन्यस्यान्यधर्मकल्पना अनृतता, सा च अनिर्वचनीयतेत्यधस्तादुपपादितम् । तेन सर्वेषामेव परीक्षकाणां मते अन्यस्यान्यधर्मकल्पनानिर्वचनीयावश्यंभाविनीत्यनिर्वचनीयता सर्वतन्त्रसिद्धान्त इत्यर्थः । अख्यातिवादिभिरकामैरपि सामानाधिकरण्यव्यपदेशप्रवृत्तिनियमस्नेहादिदमभ्युपे-

कल्पतरुः ।

भाष्ये अन्यथाख्यातिः स्वीकृतेति भ्रमं व्यावर्तयन् व्याचष्टे— **अन्यस्यान्यधर्मकल्पनेति** । अवभासपदव्याख्यानं कल्पनेति । सर्वतन्त्रसिद्धोऽर्थः सर्वतन्त्रसिद्धान्तः यथा प्रमाणं प्रमेयमिति । रजतवदिति न सादृश्यविवक्षा, अपि तु भासते परं रजतवत्, न तु वस्तुतो रजतमिति मिथ्यात्वं

परिमलः ।

तन्निषेधे बाधापत्तेः इति चेत्, सत्यम् । प्रामाण्यनिश्चयवत् प्रवृत्तिरपि करणगुणज्ञानाधीनेति परतस्त्ववादिषु केषांचिन्मतमालक्ष्य तन्निषेधार्थमिदमनुमानम् ॥

सर्वतन्त्रसिद्धान्त इति । यद्यप्यख्यातिमते अन्यस्यान्यात्मतया भानमेव न सिद्धम् अन्यथाख्यातिमते तत्सिद्धावप्यन्यस्यान्यात्मतानिर्वचनीयेत्येतदसिद्धम्, तथापि प्रागुक्तयुक्त्या तथावश्याभ्युपगन्तव्यतामापाद्य सर्वतन्त्रसिद्धान्तत्वोक्तिः ॥

रजतवदिति न सादृश्यविवक्षेति । ननु— 'तेन तुल्यं क्रिया चेद्वतिः' इति सूत्रेण क्रियया सदृशे वतिरनुशिष्टः न तु मिथ्याभूते । अथ सदृशवाचिनो मिथ्याभूते लक्षणेत्युच्येत । नैतद्युक्तम्, यथा रजतं रजतात्मना भासते तथा शुक्तिकापि रजतात्मना भासत इति वतिना रजतताद्रात्म्यभानविषयत्वरूपे रजतसादृश्ये शुक्तिकायाः प्रतिपादिते सति असंनिहितस्य रजतस्य तत्तादात्म्यस्य चात्र प्रत्यक्षायोगेनार्थान्मिथ्याभूतरजततत्तादात्म्यसिद्धिसंभवात् इति चेत्, सत्यम् । अर्थतः सिध्यति रजततत्तादात्म्यमिथ्यात्वे 'रजतवदवभासते' इति व्यवहर्तुर्लोकस्य तात्पर्यम्, न तु द्वारभूते शुक्तिकागतरजतसादृश्ये इत्याशयेन 'सादृश्ये न विवक्षा किं तु मिथ्यात्वे' इत्युक्तम् । यद्वा यथा सादृश्यवाचिन इवशब्दस्य वतेश्च 'दूरादागच्छन् देवदत्त इव भाति, देवदत्तवद्भाति' इत्यादिप्रयोगादुत्कटकोटिकसंशयरूपा तादात्म्यसंभावनाप्यर्थः, एवम्

व्यभिचरति । तथा च लोकेऽनुभवः— शुक्तिका हि रजतवदवभासते एकश्चन्द्रः सद्वितीयवदिति ॥

कथं पुनः प्रत्यगात्मन्यविषयेऽध्यासो विषयतद्धर्माणाम्, सर्वो

भामती ।

यमिति भावः । न केवलमियमनृतता परीक्षकाणां सिद्धा, अपि तु लौकिकानामपीत्याह— तथा च लोके अनुभवः शुक्तिका हि रजतवदवभासत इति । न पुना रजतमिदमिति शेषः । स्यादेतत् । अन्यस्यान्यात्मताविभ्रमो लोकसिद्धः, एकस्य त्वभिन्नस्य भेदभ्रमो न दृष्ट इति कुतः चिदात्मनो अभिन्नानां जीवानां भेदविभ्रम इत्यत आह— एकश्चन्द्रः सद्वितीयवदिति ॥

पुनरपि चिदात्मन्यध्यासमाक्षिपति— कथं पुनरिति । अयमर्थः— चिदात्मा प्रकाशते न वा? न चेत् प्रकाशते, कथमस्मिन्नध्यासो विषयतद्धर्माणाम्? न खल्वप्रतिभासमाने पुरोवर्तिनि द्रव्ये रजतस्य वा तद्धर्माणां वा समारोपः संभवति । प्रतिभासमाने वा न तावदयमात्मा जडो घटादिवत्पराधीनप्रकाश इति युक्तम् । न खलु स एव कर्ता च कर्म च भवति, विरोधात् । परसमवेतक्रियाफलशालि हि कर्म, न च ज्ञानक्रिया परसमवायिनीति कथमस्याः कर्म? न च तदेव स्वं च परं च, विरोधात् । आत्मान्तरसमवायाभ्युपगमे तु ज्ञेयस्यात्मनः अनात्मत्वप्रसङ्गः । एवं तस्य तस्येत्यनवस्थाप्रसङ्गः । स्यादेतत् । आत्मा जडोऽपि सर्वार्थज्ञानेषु भासमानोऽपि कर्तैव न कर्म, परस-

कल्पतरुः ।

विवक्षितमित्याह— न पुनरिति । एवमारोप्यसिद्ध्यसंभवप्रयुक्ते आक्षेपे परिहृते पुनरात्मनोऽधिष्ठानत्वानुपपत्त्या अध्यास आक्षिप्यत इत्याह— पुनरपीति । आत्मनो ग्राह्यत्वे स्वग्राह्यत्वं परग्राह्यत्वं वा? नाद्य इत्याह— न खल्विति । न द्वितीय इत्याह —आत्मान्तरेति । संविदाश्रयत्वेन सिद्धिमाशङ्कते— स्यादेतादिति । स्वप्रकाशफ-

परिमलः ।

'शुक्तिका रजतात्मनावभासते' इत्यर्थविवक्षावताम् 'रजतवदवभासते' इत्यादिव्यवहारदर्शनान्मिथ्यात्वमपि तदर्थ इत्याशयेन तथोक्तमिति सर्वमनवद्यम् ॥

स्वप्रकाशफलस्येति । ननु 'तथा हि' इत्यादिग्रन्थेन प्रथमं संविदः स्वप्रकाशत्वमेवोपपाद्यते; तत्कथं प्रतिपाद्यत्वेन नावतार्यते? कथं च स्वप्रकाशत्वप्रतिपादनानन्तरं

भामती ।

मवेतक्रियाफलशालित्वाभावात् चैत्रवत् । यथा हि चैत्रसमवेतक्रियया चैत्रनगरप्राप्तावुभयसमवेतायामपि क्रियमाणायां नगरस्यैव कर्मता, परसमवेतक्रियाफलशालित्वात्, न तु चैत्रस्य क्रियाफलशालिनोऽपि, चैत्रसमवायाद्गमनक्रियाया इति, तन्न, श्रुतिविरोधात् । श्रूयते हि 'सत्यं ज्ञानमनन्तं ब्रह्म' इति । उपपद्यते च । तथा हि— योऽयमर्थप्रकाशः फलं यस्मिन्नर्थश्च आत्मा च प्रथेते स किं जडः स्वयंप्रकाशो वा? जडश्चेत् विषयात्मानावपि जडाविति कस्मिन्किं प्रकाशेत अविशेषात्, इति प्राप्तमान्ध्यमशेषस्य जगतः । तथा चाभाणकः— 'अन्धस्येवान्धलग्नस्य विनिपातः पदे पदे' इति । न च निलीनमेव विज्ञानमर्थात्मानौ ज्ञापयति, चक्षुरादिवदिति वाच्यम् । ज्ञापनं हि ज्ञानजननम्, जनितं च ज्ञानं जडं सन्नोक्तदूषणमतिवर्तेतेति । एवमुत्तरोत्तराण्यपि

कल्पतरुः ।

लस्य जन्मादिनिषेधेनात्मत्वमुपपादयति— तथा हीत्यादिना ॥

परिमलः ।

शुक्तिका मिथ्यारजतात्मप्रतिपाद्यमानः परपक्षे संविदोऽर्थप्रकाशत्वासंभवः स्वपक्षे एवार्थजातस्य संविद्विवर्ततया संविदभेदेन संविदः स्वाभिन्नार्थप्रकाशत्वसंभवश्च प्रतिपाद्यत्वेन नावतार्यते? तदनन्तरं संविदो जन्मादिनिषेधेन प्रतिपाद्यमानम् आत्मत्वमेव केवलं प्रतिपाद्यत्वेनावतार्यते? उच्यते— संविदाश्रयत्वेनात्मसिद्धिं वदतां संविदः स्वप्रकाशत्वमभिमतमेवेति तदुपपादनमनुवादमात्रमित्याशयेन तत् स्वप्रकाशफलस्येत्यनुवाद्यकोटौ निवेशितम्, संविदः परपक्षे अर्थप्रकाशत्वासंभवप्रदर्शनपूर्वकम् अर्थजातस्यानिर्वचनीयत्वपक्ष एव तत्संभवोपपादनम्, अर्थजातस्यानिर्वचनीयत्वव्यवस्थापनपर्यवसितं सत्स्वरूपतोऽननुभूयमानभेदायाः संविदो नार्थोपाधिकोऽपि भेदः तस्य मिथ्यात्वादिति संविदो नित्यात्मस्वरूपत्वोपपादकतयैव प्रकृतोपयोगि; नान्यथा; कथम्? 'सत्यं ज्ञानम्' इति श्रुतेर्ज्ञानात्माभेदे तात्पर्यं न द्रागेव निश्चेतुं शक्यम्; इह हि ज्ञानपदमन्तोदात्तमधीयते । अन्तोदात्तस्वरश्च केवलल्युडन्ततायां नोपपद्यते । तथा हि— ल्युडादेशस्य अन इत्यस्य 'आद्युदात्तश्च' इति प्रत्ययस्वरेण प्रथमाकारे उदात्ते 'लिति' इति लित्स्वरेण प्रकृत्याकारे चोदात्ते 'अनुदात्तं पदेमकवर्जम्' इति शेषनिघातस्वरेण प्रत्ययस्थयोरकारयोरनुदात्तयोः 'एकादेश उदात्तेनोदात्तः' इत्येकादेशस्वरेण प्रकृत्याकारप्रत्ययाद्यकारयोरेकादेशे चोदात्ते सति प्रत्ययान्त्याकारस्यानुदात्तस्य विभक्त्यकारस्य च 'अनुदात्तौ

भामती ।

ज्ञानानि जडानीत्यनवस्था । तस्मादपराधीनप्रकाशा संविदुपेतव्या । तथापि

कल्पतरुः ।

नन्वभ्युपेयते संविदपराधीनप्रकाशेति, आत्मा तु जडः किं न स्यात् इति

परिमलः ।

सुप्तिौ' इति सुप्स्वरेणानुदात्तस्य 'अमि पूर्वः' इत्येकादेशो भवन् 'स्थानेऽन्तरतमः' इति परिभाषया अनुदात्तः स्यात् । तस्य चानुदात्तस्य 'उदात्तादनुदात्तस्य स्वरितः' इति स्वरितादेशो भवेत् । अत एतत् 'ज्ञानम्' इति पदं केवलल्युडन्तत्वे स्वरितान्तं स्यात्, यथा काठके 'संज्ञानं विज्ञानं प्रज्ञानम्' इति । तस्मादन्तोदात्तनिर्वाहार्थमिदं ज्ञानपदं ल्युडनन्तरं मत्वर्थीयाच्प्रत्ययान्तं वाच्यम्, अर्शआदेराकृतिगणत्वात् । तथा सति अन्तोदात्तस्वर उपपद्यते । अर्शआद्यच्प्रत्यये 'यस्येति च' इति प्रकृतावन्त्यस्याकारस्य लोपे 'चितः' इति चित्स्वरेण मत्वर्थीयप्रत्ययस्योदात्तत्वे च सति तस्य विभक्त्यकारस्य चैकादेशस्यापि 'एकादेश उदात्तेनोदात्तः' इत्युदात्तस्यैव भावात् । एवमिह ज्ञानपदप्रक्रियाश्रयणे ज्ञानवत्त्वमेवात्मनः सिध्येत् न ज्ञानरूपत्वम् । किं त्वौणादिकनप्रत्ययान्तत्वेन तत् सिध्येत्, ज्ञाधातोराहत्य नप्रत्ययविधानाभावेऽपि 'उणादयो बहुलम्' इति बहुलग्रहणेन यतो विहितास्ततोऽन्यत्रापि ते भवन्तीति तत्सिद्धेः । औणादिकप्रत्ययान्तत्वे भावार्थत्वमप्युपपद्यते, अर्त्यादिसूत्रविहितमन्प्रत्ययान्तस्य होमशब्दस्येव । अन्तोदात्तस्वरश्च युज्यते, नप्रत्ययाकारस्य प्रत्ययस्वरेणोदात्तत्वे सति तस्य तद्विभक्त्यकारेण भवत एकादेशस्याप्युदात्तस्यैव भावात् । एवमुभयथेह ज्ञानपदप्रक्रियाश्रयणसंभवे कथमस्याः श्रुतेः संविदात्माभेदे तात्पर्यं निर्णीयते इत्याकाङ्क्षायां तत्र तत्तात्पर्यनिर्णयार्थामुपपत्तिमुपपद्यते चेति प्रतिज्ञाय तामेवोपपत्तिं प्रदर्शयितुं टीकायां तथा हीत्यादिग्रन्थः प्रवर्तितः । अतोऽत्र स्वप्रकाशत्वादिव्यवस्थापनस्य न साक्षादन्वयसंघटनेतीत्थमवतारिका ॥

नन्वभ्युपेयते इति । ननु चाभ्युपगमे को हेतुः ? स्वयमभासमानमपि ज्ञानमर्थप्रकाशरूपमस्तु; न च तथात्वे तस्य चक्षुरादिवदर्थप्रकाशकत्वमेव स्यात् न तु तत्प्रकाशरूपत्वमित्यनवस्थेति वाच्यम् ; अप्रयोजकत्वेनोक्तनियमासिद्धेरिति चेत्, न, तथा सति घटज्ञानादिषु सत्सु कदाचित्संदेहविपर्यासापत्तेः प्रकाशाव्यभिचारिण्येव सुखादौ संशयविपर्यासानुदयदर्शनात्, 'एतावन्तं कालं मनसा रुद्रानुवाकानावर्तयन्नासम्' इति परामर्शानुपपत्तेश्च । न हि तत्तद्वर्णस्मृतीनां स्वस्वकाले भानाभावे तासामग्रिमपरामर्शो भवितुमर्हति । न चेच्छाघटितसामग्रीजन्यनिरन्तरक्रमिकवर्णविषयस्मरणसंतानोदयकाले मध्ये

भामती ।

किमायातं विषयात्मनोः स्वभावजडयोः ? एतदायातं यत्तयोः संविदजडेति । तत्किं पुत्रः पण्डित इति पितापि पण्डितोऽस्तु ? स्वभाव एष संविदः स्वयंप्रकाशाया यदर्थात्मसंबन्धितेति चेत्, हन्त पुत्रस्यापि पण्डितस्य स्वभाव एष यत्पितृसंबन्धितेति समानम् । सहार्थात्मप्रकाशेन संवित्प्रकाशो न त्वर्थात्मप्रकाशं विनेति तस्याः स्वभाव इति चेत्, तत्किं संविदो भिन्नौ संविदर्थात्मप्रकाशौ । तथा च न स्वयंप्रकाशा संवित्, न च संवित् अर्थात्मप्रकाश इति । अथ संविदर्थात्मप्रकाशौ न संविदो भिद्येते, संविदेव तौ । एवं चेत् यावदुक्तं भवति संविदात्मार्थौ सहेति तावदुक्तं भवति संविदर्थात्मप्रकाशौ सहेति, तथा च न विवक्षितार्थसिद्धिः । न चातीतानागतार्थगोचरायाः संविदोऽर्थसहभा-

कल्पतरुः ।

मन्वानं संविदाश्रयत्ववादिनं प्रति आत्मस्वप्रकाशत्ववाद्याह— **तथापीति** । अर्थात्मसंबधिन्यां संविद्यजडायामपि नार्थात्मनोः प्रकाशमानतासिद्धिः पण्डितेऽपि पुत्रे पितुरपाण्डित्यवदित्युक्ते वैषम्यं शङ्कते— **स्वभाव एष इति** । आश्रयविषयपारतन्त्र्यनियमात्स्वभावसंबद्धा संवित् न पुत्रः, पित्रभावेऽपि भावादित्यर्थः । पुत्रगतजन्यत्वमपि नित्यं पितृगतजनकत्वसापेक्षमिति साम्यमाह— **हन्तेति** । अर्थात्मनोः प्रकाशेन सह संवित्प्रकाशः इत्युक्ते यः संविदः प्रकाशो यश्चार्थात्मनोः तौ संविदः सकाशाद्भिन्नावभिन्नौ वा ? नाद्य इत्याह— **तत्किमिति** । संविदः प्रकाशव्यतिरेके संवित् अप्रकाशरूपा सती घटवदस्वप्रकाशा स्यात् । आत्मार्थप्रकाशयोः संविद्व्यतिरेके संवित् अर्थात्मप्रकाशरूपा न भवेत्, किं तु ज्ञापिका स्यात्, तथा चानवस्थेत्याशयः । अभेदमाशङ्कते— **अथेति** । संविदश्चार्थात्मनोश्च प्रकाशात्वित्यर्थः । कथंभूतौ तावित्यपेक्षायां स एवाह— **संविदेवेति** । दूषयति— **एवमिति** । संविदतिरिक्तप्रकाशानङ्गीकारे संविदर्थात्मनां साहित्यमुक्तं स्यात्, तथा च पुत्रपाण्डित्यतुल्यतेत्यर्थः । अर्थसंविदोः सहभावमङ्गीकृत्यानुपयोग उक्तः; स एव क्वचिदसिद्ध इत्याह— **न चेति** । अतीतादिबुद्धिः तत्सहिता तद्विषयहानादिबुद्धिजनकत्वात् वर्त-

परिमलः ।

मध्ये प्रतिस्मरणमनुव्यवसायोत्पत्तिः संभवति ॥

आत्मस्वप्रकाशत्ववाद्याहेति । अभ्युपेतव्या इत्येतदन्तमुक्तवानात्मस्वप्रकाशवाद्येव । आत्मनः प्रकाशमानत्वं स्वप्रकाशफलाभेदेनैव उपपादनीयं नान्यथा तस्य प्रकाशमानत्वं भवतीत्येवमुपपादयितुमाहेत्यर्थः । **अनुपयोग उक्त इति** । सहभावस्य प्रका-

भामती।

वोऽपि। तद्विषयहानोपादानोपेक्षाबुद्धिजननादर्थसहभाव इति चेत्, न, अर्थसंविद इव हानादिबुद्धीनामपि तद्विषयत्वानुपपत्तेः। हानादिजननाद्धानादिबुद्धीनामर्थविषयत्वम्, अर्थविषयहानादिबुद्धिजननाच्च अर्थसंविदस्तद्विषयत्वमिति चेत्, तत्किं देहस्य प्रयत्नवदात्मसंयोगो देहप्रवृत्तिनिवृत्तिहेतुरर्थ इत्यर्थ-

कल्पतरुः।

मानबुद्धिवदिति शङ्कते— **तद्विषयेति**। तद्विषयाश्च ताः हानादिबुद्धयश्च इति विग्रहः। तद्विषयहानादिबुद्धिजनकत्वादिति हेतौ तद्विषयत्वविशेषणस्यासिद्धिमाह— **नेति**। तां परिहरति— **हानादिजननादिति**। सिद्धे च हेतावतीतादिसंविदामर्थसहभावसिद्धेस्तद्विषयत्वसिद्धिरित्याह— **अर्थविषयेति**। अर्थविषयहानादिप्रवृत्तिजननाद्धानादिबुद्धेरर्थविषयप्रकाशत्वेऽतिप्रसङ्गं दर्शयन्विशेषणासिद्धिं द्रढयति— **तत्किमिति**। अर्थ इति सप्तमी। प्रयत्नवदात्मदेहसंयोगोऽर्थविषयप्रवृत्तिहेतुरपि जडत्वान्नार्थविषयप्रकाशश्चेत्संवित्प्रकाशोऽपि स्वप्रकाशत्वात् स्वमात्रे साक्षी

परिमलः।

शमानतायामनुपयोग उक्तः। उपयोगमङ्गीकृत्य तस्याव्यापकत्वमाहेत्यर्थः। **विशेषणस्यासिद्धिमाहेति**। बाधदोषः स्फुट इति मत्वा दोषान्तरमाहेत्यर्थः। **तां परिहरतीति**। असिद्धिं परिहरन् पूर्ववादी शङ्कत इत्यर्थः। **जडत्वान्नार्थविषयप्रकाशश्चेदिति**। अर्थविषयहानादिजनकत्वमात्रं न ज्ञानस्यार्थविषयतानियामकम्, किं तु तज्जनकप्रकाशत्वम्; तथा च जडे देहात्मसंयोगे नातिप्रसङ्ग इति शङ्कार्थः॥

स्वप्रकाशत्वात् स्वमात्रे साक्षीति। संविदः स्वात्मानं प्रति प्रकाशत्वं ह्यभेदसंबन्धेनैव कल्प्तमिति दृश्यवर्गस्य संविद्भिन्नताभ्युपगमे तं प्रति सा जडरूपा देहात्मसंयोगतुल्या न प्रकाशरूपेति नोक्तनियामकेन तस्या दृश्यवर्गविषयत्वसिद्धिरित्यर्थः। ननु यद्विषयत्वनियामकमन्विष्यते तं प्रति प्रकाशत्वं प्रकाशशब्देन न विवक्षितम्; तथा सति ह्यात्माश्रयः स्यात्। किं तु ज्ञानत्वसामान्यं विवक्षितम्। अतो नोक्तदोषः इति चेत्, न, एवमपि गगनादीनामतीतानागतयोश्च हानाद्यविषयत्वेन तद्विषयज्ञानाव्यापनात्, ताम्रादिज्ञाने तदुपष्टम्भककालिकादेरप्युपादानजनके कालिकादिविषयत्वस्याप्यापत्तेश्च। एतेन परोक्षापरोक्षवृत्तीनामिच्छाद्वेषवृत्तीनां हानादिव्यापाराणां च तत्तद्भिन्नेऽपि तत्तद्विषये विषयत्वनियमार्थं कस्यचिन्नियामकस्यावश्यान्वेष्यत्वेन तथाभूतं नियामकं संविद्भिन्नेऽपि संविदस्तत्तद्विषयत्वनियामकं भविष्यतीत्यपि शङ्का निरस्ता, संविदः स्वात्मप्रका-

भामती ।

प्रकाशोऽस्तु ? जाड्याद्देहात्मसंयोगो नार्थप्रकाश इति चेत्, नन्वयं स्वयंप्रकाशोऽपि स्वात्मन्येव खद्योतवत्प्रकाशः, अर्थे तु जड इत्युपपादितम् । न च प्रकाशस्यात्मानो विषयाः, ते हि विच्छिन्नदीर्घस्थूलतयानुभूयन्ते, प्रकाशश्चायम् आन्तरोऽस्थूलोऽनणुरह्रस्वोऽदीर्घश्चेति प्रकाशते, तस्माच्चन्द्रेऽनुभूयमाने इव द्वितीयश्चन्द्रमाः स्वप्रकाशादन्योऽर्थोऽनिर्वचनीय एवेति युक्तमुत्पश्यामः । न च अस्य प्रकाशस्याजानतः स्वलक्षणभेदोऽनुभूयते । न च अनिर्वाच्यार्थभेदः प्रकाशं निर्वाच्यं भेत्तुमर्हति, अतिप्रसङ्गात् । न च अर्थानामपि परस्परं भेदः

कल्पतरुः ।

अर्थे त्वप्रकाशनात् जड एव । अर्थस्यापि स्वप्रकाशरूपान्तर्भावेन सिद्धिश्चेत् अर्थसंवित्प्रभेदो न स्यादित्यभिप्रेत्याह— नन्वयमिति ।

मा भूद्भेद इति वदन्तं बौद्धगन्धिनमेकदेशिनं निराकरोत्याक्षेप्ता— न च प्रकाशस्येति । आत्मशब्दः स्वरूपपरः । सिद्धान्त्यभिमतां संविद्विवर्ततया तदभेदेनार्थसिद्धिमध्यासासंभवं वक्ष्यामीति मन्वानोऽनुवदति— तस्मादिति । एवं संविदः स्वप्रकाशतां विषयस्य च तदध्यस्ततामुक्त्वा तस्या आत्मत्वसिद्धयर्थमद्वितीयतामाह—

परिमलः ।

शतायामभेदस्य नियामकस्य क्लृप्तत्वेन दृश्यवर्गप्रकाशतायां नियामकान्तरस्याननुगमावहस्य कल्पयितुमयुक्तत्वात् ॥

ननु संविदः स्वभिन्ने नास्ति प्रकाशरूपतेति ब्रूषे, संवित्प्रपञ्चयोरभेदं च तात्त्विकमपाकुरुषे, अध्यासप्रतिक्षेपार्थं प्रवृत्तश्च नाध्यासिकं तमङ्गीकुरुषे, जगदान्ध्यमेव वक्तुं किमध्यवसितोऽसीत्याशङ्क्याह— सिद्धान्त्यभिमतामिति । सर्वोऽयं सिद्धान्त्यभिमत एवार्थः आत्मनोऽधिष्ठानत्वासंभवोपपादनार्थमनूद्यते । सिद्धान्ती खलु संवित् स्वप्रकाशेति तस्याः स्वाभिन्न एव प्रकाशरूपत्वस्य क्लृप्तत्वात् स्वभिन्ने दृश्यवर्गे तस्याः प्रकाशरूपता न संभवति, तात्त्विकश्च दृग्दृश्ययोरभेदो न युज्यते; अतो दृश्यवर्गस्य संविद्विवर्ततया अनिर्वचनीयेन तदभेदेन प्रकाशमानता; एवं च 'अनुभवामि' इत्येकरूपप्रत्ययदर्शनेन संविदां स्वतो भेदाप्रतीतेः अर्थानामनिर्वाच्यतया तद्भेदेन रज्जुरजतादिभ्रमविषयभेदेन भ्रमाधिष्ठानशुक्तिशकलस्येव भास्करमतरीत्या औपाधिकवस्तुकृतभेदासंभवाच्च नित्या संविदिति नित्यसंविदतिरेकेणात्मकल्पनायां प्रमाणाभावात् संवित्प्रकाश एव स्वयंप्रकाशः

भामती।

समीचीनज्ञानपद्धतिमध्यास्ते इत्युपरिष्टादुपपादयिष्यते। तदयं प्रकाश एवं स्वयंप्रकाश एकः कूटस्थो नित्यो निरंशः प्रत्यगात्मा अशक्यनिर्वचनीयेभ्यो देहे-

कल्पतरुः।

न चास्येति। आजानतः स्वभावतः। इत्थं तर्किते आत्मस्वप्रकाशत्वे प्रयुज्यते— देवदत्तसुषुप्तिकालः 'देवदत्तात्मा अस्ति' इति व्यवहारहेतुसाक्षात्कारवान् कालत्वादितरकालवदिति। न च सुषुप्तावहंवृत्तिरस्ति, न च पुरुषान्तरं साक्षात्कर्तुमर्हति। ईश्वरमते योगिमते वा अनैश्वरेत्ययोगजेति च विशेषणीयमिति स्वप्रकाशत्वासिद्धिरिति। तदेवं पक्षान्तरनिरासेन स्वप्रकाश आत्मेति स्थापितम्। अस्मिन् पक्षे अध्यासाक्षेपकतया भाष्यं योजयति— तदयमिति। प्रत्यक्शब्दार्थमाह— अश-

परिमलः।

एकः कूटस्थो निरंशः प्रत्यगात्मा— इति मन्यते। तस्य मते प्रत्यगात्मरूपस्य प्रकाशस्य करणदोषाजन्यतया निरंशतया च सामान्यग्रहणविशेषाग्रहणासंभवात् कथमध्यासाधिष्ठानतेत्येवं सिद्धान्तिमतानुसारेणैवायमध्यासाक्षेपः क्रियत इत्याशयः॥

आजानतः स्वभावत इति। तथा च स्वाभाविकभेदो नानुभूयते किं तु अनुभवामि' इत्येकरूपप्रत्ययेन अभेद एवावसीयते। न च अनुगतप्रत्ययो जात्यैक्यविषयः, व्यक्तिभेदाप्रतीतौ लाघवेन तस्य व्यक्त्यैक्यविषयत्वकल्पनौचित्यात्। न च इच्छाया अपि 'इच्छामि' इत्यनुगतप्रत्ययात् स्वतो भेदाप्रतीतेश्च नित्यत्वप्रसङ्गः, 'ममैतदिच्छा नष्टा एतदिच्छा उत्पन्ना' इति नाशोत्पत्त्यनुभवविरोधेन अनुगतप्रत्ययस्य जातिविषयत्वकल्पनात्। न च ज्ञान इव इच्छायामपि नाशोत्पत्त्याद्यनुभवस्यावच्छेदकवृत्तिविषयत्वं कल्पयितुं शक्यम्, इच्छायामवच्छेदकवृत्तिकल्पने प्रमाणाभावात्। ज्ञाने तत्कल्पने त्वस्ति प्रमाणम्— सर्वस्य हि प्रपञ्चस्य नित्यैकद्रगध्यस्तत्वेन प्रकाशमानतोपयोग्यभेद उपपादनीयः, न तु तत्तद्विषयस्य तत्तद्रगध्यस्तत्वेन, लब्धात्मन्यधिष्ठाने भासमाने पश्चादध्यासस्य वक्तव्यत्वेन विषयाध्यासात्पूर्वं चाक्षुषादिज्ञानानां विषयं विनापि भानप्रसङ्गात्। न च सर्वस्य प्रपञ्चस्यैकद्रगध्यस्तत्वे तत्तज्ज्ञानानां विषयनियमासंभवः, अवच्छेदकवृत्तिकृतविषयनियमोपपत्तेरिति भावः॥

ननु अहंवृत्तिरूपसाक्षात्कारेणार्थान्तरदुष्टमनुमानम्, 'सुखमहमस्वाप्सम्' इति परामर्शानुपपत्त्या सुषुप्तावहंवृत्तेरवश्याभ्युपगन्तव्यत्वात्, तथाभूतपरामर्शदर्शनस्यैवानुमानानुग्राहकतर्कतया तदाप्युपजीव्यत्वादित्याशङ्क्याह— **न च सुषुप्ताविति**। सुषुप्ता-

हि पुरोऽवस्थिते विषये विषयान्तरमध्यस्यति, युष्मत्प्रत्ययापेतस्य च

भामती ।

न्द्रियादिभ्य आत्मानं प्रतीपं निर्वचनीयमञ्चति जानातीति प्रत्यङ्, स चात्मेति प्रत्यगात्मा, स चापराधीनप्रकाशत्वात् अनंशत्वाच्च अविषयः, तस्मिन्नध्यासो विषयधर्माणाम्, देहेन्द्रियादिधर्माणां कथम्, किमाक्षेपे । अयुक्तोऽयमध्यास इत्याक्षेपः । कस्मादयमयुक्त इत्यत आह— **सर्वो हि पुरोऽवस्थिते विषये विषयान्तरमध्यस्यति** । एतदुक्तं भवति— यत्पराधीनप्रकाशमंशवच्च तत्सामान्यांशग्रहे करणदोषवशाच्च विशेषाग्रहे अन्यथा प्रकाशते । प्रत्यगात्मा तु अपराधीनप्रकाशतया न स्वज्ञाने कारणान्यपेक्षते, येन तदाश्रयैर्दोषैर्दुष्येत् । न चांशवान्, येन कश्चिदस्यांशो गृह्येत, कश्चिन्न गृह्येत । न हि तदेव तदानीमेव तेनैव गृहीतमगृहीतं च संभवतीति न स्वयंप्रकाशतापक्षे अध्यासः । सदातनेऽप्यप्रकाशे पुरोऽवस्थितत्वस्य अपरोक्षत्वस्याभावान्नाध्यासः । न हि शुक्तौ अपुरःस्थितायां रजतमध्यस्यति 'इदं रजतम्' इति । तस्मादत्यन्तग्रहे अत्यन्ताग्रहे च नाध्यास इति सिद्धम् । स्यादेतत् । अविषयत्वे हि चिदात्मनो नाध्यासः, विषय एव तु चिदात्मा अस्मत्प्रत्ययस्य, तत्कथं नाध्यास इत्यत आह— **युष्मत्प्रत्ययापेतस्येति** । विषयत्वे हि चिदात्मनोऽन्यो विषयी भवेत् । तथा च यो विषयी स एव चिदात्मा । विषयस्तु ततोऽन्यो युष्मत्प्रत्ययगोचरोऽभ्युपेयः । तस्मादनात्मत्वप्रसङ्गादनवस्थापरिहाराय युष्मत्प्रत्ययापेतत्वम्; अत एव अविषयत्वमात्मनो वक्तव्यम्; तथा च नाध्यास इत्यर्थः ।

कल्पतरुः ।

क्येति । प्रतीपं प्रातिलोम्येन । तदेव दर्शयति— **निर्वचनीयमिति** । कथमिति थमुप्रत्ययान्तस्य किंशब्दस्य रूपम्; तत्र किंशब्द आक्षेपार्थ इत्यर्थः । अप्रथमानत्वपक्षे दूषणं सर्वो हि इति भाष्योक्तमाह— **सदातनेऽपीति** ।

भाष्यकारेणात्मनोऽस्मत्प्रत्ययविषयत्वोपवर्णनेनाविषयत्वस्यासिद्धिरुक्ता सा न युक्ता, स्वप्रकाशस्य विषयत्वायोगात् इत्याशङ्क्य औपाधिकरूपेण विषयतामाह—

परिमलः ।

वन्तःकरणलयस्य श्रुतिसिद्धत्वेन तदानीमहंवृत्त्यसंभवात् स्वरूपतः सुषुप्तौ साक्षात्कृते प्रत्यगात्मनि सुप्तोत्थितपरामर्शस्तात्कालिकाहमर्थानुरागविषयो वक्तव्य इत्याशयः ।

प्रत्यगात्मनोऽविषयत्वं ब्रवीषि। उच्यते— न तावदयमेकान्तेनाविषयः, अस्मत्प्रत्ययविषयत्वात्, अपरोक्षत्वाच्च प्रत्यगात्मप्रसिद्धेः। न चाय-

---

भामती।

परिहरति— **उच्यते— न तावदयमेकान्तेनाविषयः**। कुतः? **अस्मत्प्रत्ययविषयत्वात्**। अयमर्थः— सत्यं प्रत्यगात्मा स्वयंप्रकाशत्वादविषयोऽनंशश्च; तथापि अनिर्वचनीयानाद्यविद्यापरिकल्पितबुद्धिमनःसूक्ष्मस्थूलशरीरेन्द्रियावच्छेदकभेदेनानवच्छिन्नोऽपि वस्तुतोऽवच्छिन्न इव अभिन्नोऽपि भिन्न इव अकर्तापि कर्तेव अभोक्तापि भोक्तेव अविषयोऽप्यस्मत्प्रत्ययविषय इव जीवभावमापन्नः अवभासते, नभ इव घटमणिकमल्लिकाद्युपाध्यवच्छेदभेदेन भिन्नमिवानेकविधधर्मकमिवेति। न हि चिदेकरसस्यात्मनः चिदंशे गृहीते अगृहीतं किंचिदस्ति। न खलु आनन्दनित्यत्वविभुत्वादयः अस्य चिद्रूपाद्वस्तुतो भिद्यन्ते, येन तद्रूपे न गृह्येरन्। गृहीता एव तु कल्पितेन भेदेन न विवेचिता इत्यगृहीता इवाभान्ति।

कल्पतरुः।

सत्यमित्यादिना। बुद्धिमनःप्राणेन्द्रियाणां परलोकगतौ आश्रयभूतानि भूतसूक्ष्माणि सूक्ष्मं शरीरम् इन्द्रियाणि बाह्यानि। ननु स्वतः अविषयत्वमौपाधिकरूपेण विषयत्वमिति किमिति व्यवस्थाप्यते स्वत एव शुक्तिवत् ग्रहणाग्रहणे किं न स्यातामित्याशङ्क्य निरंशत्वान्नेत्याह— **न हि चिदेकरसस्येति**। ननु चिद्रूपे भात्यप्यानन्दादि न भातीति दृष्टम्; नेत्याह— **न खल्विति**। तर्हि साक्षिप्रतिभासे आनन्दाद्युल्लेखोऽपि स्यादित्याशङ्क्याह— **गृहीता एवेति**। यथा खल्वभिज्ञायां भासमानमपि देवदत्तैक्यं तत्तेदंतोपाधिद्वारकसामानाधिकरण्यापरामर्शाद्विविक्तं नोल्लिख्यते, एवं चिद्रूपभानेऽपि दुःखप्रत्यनीकत्वादिरूपेणापरामृष्टा आनन्दादयोऽप्यगृहीता इव

परिमलः।

यथा खल्वभिज्ञायामिति। ननु 'देवदत्तोऽयम्' इत्यभिज्ञायामिदमर्थे यत् देवदत्तैक्यं भासते तद्विविक्तमुल्लिख्यत एव। यत्तु तत्र तत्ताविशिष्टैक्यं विविक्तं नोल्लिख्यते तन्न भासत एव। अतो भासमानस्य विविक्तोल्लेखाभावे नेदमुदाहरणमिति चेत्, न, एकस्मिन्निदमर्थे ऐक्यद्वयाभावेन भासमान एव देवदत्तैक्ये तत्तोपाधिपरामर्शाभावेन तत्तेदंताविशिष्टाभेदरूपतयोल्लेखाभावरूपस्य विविक्तानुल्लेखस्य विवक्षितस्य सत्त्वात्॥

दुःखप्रत्यनीकत्वादिरूपेणेति। ननु दुःखप्रत्यनीकत्वं दुःखविरोधित्वं दुः-

भामती ।

न च आत्मनो बुद्ध्यादिभ्यो भेदस्तात्त्विकः येन चिदात्मनि गृह्यमाणे सोऽपि गृहीत एव भवेत्, बुद्ध्यादीनामनिर्वाच्यत्वेन तद्भेदस्याप्यनिर्वचनीयत्वात्। तस्माच्चिदात्मनः स्वयंप्रकाशस्यैव अनवच्छिन्नस्य अवच्छिन्नेभ्यो बुद्ध्यादिभ्यो भेदाग्रहात् तदध्यासेन जीवभाव इति। तस्य च अनिदमिदमात्मनः अस्मत्प्रत्ययविषयत्वमुपपद्यते। तथा हि— कर्ता भोक्ता चिदात्मा अहंप्रत्यये प्रत्यवभासते। न च उदासीनस्य तस्य क्रियाशक्तिर्भोगशक्तिर्वा संभवति। यस्य च बुद्ध्यादेः

कल्पतरुः ।

भान्तीत्यर्थः। ननु चित्प्रतिभासे तदात्मत्वादानन्दादयो भान्ति चेत् तर्हि बुद्ध्यादिभ्यश्चैतन्यस्य भेदोऽपि प्रकाशेत, तत्र विद्यमानत्वात्; तथा च बुद्ध्याद्यध्यासायोग इत्याशङ्क्याह— न चात्मन इति। आनन्दादीनां वास्तवत्वाच्चैतन्यैकरसता न भेदस्यापीत्यभानमित्यर्थः। यदुक्तं विषयत्वे युष्मत्प्रत्ययविषयत्वापत्तिः ततश्चानात्मत्वमिति, तत्राह— तस्य चेति। इदमात्मकत्वेन विषयत्वमनिदमात्मकत्वेनास्मदुल्लेखश्चोपपद्यते इत्यर्थः। इदमनिदमात्मकत्वं जीवस्य तद्धर्मान्वयप्रदर्शनेनोपपादयति— तथा हीति। विच्छुरणात् मिश्रणात्। ननूपाधिपरिच्छेदमन्तरेणान्य एव परमा-

परिमलः ।

खव्यावर्तकसुखत्वं वा? नाद्यः, स्रक्चन्दनादिविषयभोगदशायां दुःखस्मरणरहितानां तज्जन्यानन्दे दुःखविरोधित्वपरामर्शासंभवात् तदनुभवस्यासत्कल्पत्वेनापुरुषार्थत्वप्रसङ्गात्, मुक्तौ कथमपि दुःखस्मरणप्रसक्त्यभावेन मुक्त्यानन्दानुभवस्य अपुरुषार्थत्वप्रसङ्गाच्च; अत एव न द्वितीयोऽपि, मुक्तौ सुखत्वादिप्रकारकानुभवाभावात्— इति चेत्, उच्यते— निरतिशये स्वरूपानन्दे संसारदशायामविद्यान्तःकरणोपधानदोषादस्त्यध्यस्तोऽपकर्षः तं विनानुभवाभावादिति विवक्षितम्। तथा च अध्यस्तापकर्षयुक्ततया गृहीतोऽप्यानन्दो मेघावरणकृतापकर्षसौरालोकवदगृहीत इव भातीति तात्पर्यम्। यद्वा सकलसांसारिकदुःखविरोधि यत् स्वरूपानन्दे निरतिशयानन्दत्वं तदनुभवाभावादिति विवक्षितम्। तच्च स्वरूपाभिन्नमेव मुक्त्यानन्दानुभवे प्रकारो महावाक्यजन्यब्रह्माभिन्नस्वस्वरूपसाक्षात्कार इवाभेदप्रतियोगिब्रह्मस्वरूपमिति न कश्चिद्दोषः॥

आनन्दादय इति। आदिशब्देन नित्यत्वादयो गृह्यन्ते। आनन्दादीनामिति। ननु—आनन्दादीनामिव बुद्ध्यादिभेदस्यापि वास्तवत्वेनाद्वितीयचैतन्यैकरसता अवश्याभ्युपगन्तव्या, आत्मनि बुद्ध्याद्यभेदाध्यासवादिनः तत्र तद्भेदोऽप्यध्यस्त इत्युक्तयोगात्,

भामती ।

कार्यकरणसंघातस्य क्रियाभोगशक्ती न तस्य चैतन्यम् । तस्माच्चिदात्मैव कार्यकरणसंघातेन ग्रथितो लब्धक्रियाभोगशक्तिः स्वयंप्रकाशोऽपि बुद्ध्यादिविषयविच्छुरणात् कथंचिदस्मत्प्रत्ययविषयः अहंकारास्पदं जीव इति च जन्तुरिति च क्षेत्रज्ञ इति च आख्यायते । न खलु जीवश्चिदात्मनो भिद्यते । तथा हि श्रुतिः— 'अनेन जीवेनात्मना–' इति । तस्माच्चिदात्मनोऽव्यतिरेकात् जीवः स्वयंप्रकाशोऽपि अहंप्रत्ययेन कर्तृभोक्तृतया व्यवहारयोग्यः क्रियत इत्यहंप्रत्ययालम्बनमुच्यते । न च अध्यासे सति विषयत्वं विषयत्वे च अध्यासः इत्यन्योन्याश्रयत्वमिति सांप्रतम्, बीजाङ्कुरवदनादित्वात्, पूर्वपूर्वाध्यासतद्वासनाविषयीकृतस्योत्तरोत्तराध्यासविषयत्वाविरोधादित्युक्तम्— 'नैसर्गिकोऽयं लोकव्यवहारः' इति भाष्यग्रन्थेन । तस्मात् सुष्ठूक्तम्— **न तावदयमेकान्तेनाविषय इति** । जीवो हि चिदात्मतया स्वयंप्रकाशतया अविषयोऽपि औपा-

कल्पतरुः ।

त्मनो जीवः अहंप्रत्ययविषयोऽस्तु, तत्राह— **न खल्विति** । अस्मत्प्रत्ययविषयत्वमपि जीवस्याहंप्रत्ययविशिष्टे अन्तःकरणे व्यवहारयोग्यत्वापत्तिः न कर्मत्वम्, अतो न कर्मकर्तृत्वविरोध इत्युपसंहारव्याजेनाह— **तस्मादिति** । स्वप्रकाशे यावत्सत्त्वं

परिमलः ।

अभेदाभावे तदात्मकभेदप्रतिक्षेपासंभवात् । न च बुद्ध्यादेः स्वरूपतोऽध्यस्तत्वादात्मनि वस्तुतो न तद्भेदो नापि तदभेद इति वाच्यम्, अध्यस्तादपि रजतात् शुक्तौ तज्ज्ञानाबाध्यबाधगोचरभेददर्शनात्— इति चेत्, न, शुक्त्यादिगतरजतादिभेदस्यापि सर्वप्रपञ्चनिवर्तकब्रह्मज्ञानबाध्यत्वाभ्युपगमेन तद्वत् संसारदशायामबाध्यस्यापि बुद्ध्यादिभेदस्य तद्बाध्यत्वोपपत्तेः । यदि च स वास्तव एवाद्वितीयचैतन्यैकरस इष्यते तथापि न दोषः, बुद्ध्यादिप्रतियोगिकत्वापरामर्शात्सोऽप्यगृहीत इव भातीति वक्तुं शक्यत्वात् । अयमपि टीकाकाराणामाचार्याणां च संमतः पक्षः । अत एव सौत्राथशब्दविचारप्रस्तावे अन्तःकरणाद्यभावस्य ब्रह्मस्वरूपानतिरिक्ततया वास्तवत्वेनैव शुद्धत्वाद्यवगाहिब्रह्मसाक्षात्कारविषयत्वं समर्थयिष्यते ॥

अस्मत्प्रत्ययविषयत्वमपीति । ननु चैतन्यस्याखण्डानन्दात्मकशुद्धस्वरूपेणाहंवृत्त्यविषयत्वेऽप्यौपाधिकरूपेण तद्विषयत्वं प्रागनुपदमेवोक्तं वक्ष्यते च शाब्दापरोक्षनि-

मस्ति नियमः पुरोऽवस्थित एव विषये विषयान्तरमध्यसितव्यमिति । अप्रत्यक्षेऽपि ह्याकाशे बालास्तलमलिनताद्यध्यस्यन्ति । एवमविरुद्धः

भामती ।

धिकेन रूपेण विषय इति भावः । स्यादेतत् । न वयमपराधीनप्रकाशतया अविषयत्वेनाध्यासमपाकुर्मः, किं तु प्रत्यगात्मा न स्वतो नापि परतः प्रथत इत्यविषय इति ब्रूमः । तथा च सर्वथाप्रथमाने प्रत्यगात्मनि कुतोऽध्यास इत्यत आह— **अपरोक्षत्वाच्च प्रत्यगात्मप्रसिद्धेः** इति । प्रतीच आत्मनः प्रसिद्धिः प्रथा, तस्या अपरोक्षत्वात् । यद्यपि प्रत्यगात्मनि नान्या प्रथास्ति तथापि भेदोपचारः, यथा 'पुरुषस्य चैतन्यम्' इति । एतदुक्तं भवति— अवश्यं चिदात्मा अपरोक्षोऽभ्युपेतव्यः तदप्रथायां सर्वस्याप्रथनेन जगदान्ध्यप्रसङ्गादित्युक्तम् । श्रुतिश्चात्र भवति— 'तमेव भान्तमनु भाति सर्वं तस्य भासा सर्वमिदं विभाति' इति । तदेवं परमार्थपरिहारमुक्त्वा अभ्युपेत्यापि चिदात्मनः परोक्षतां प्रौढवादितया परिहारान्तरमाह— **न चायमस्तीति** । पुरोऽवस्थित एव अपरोक्ष एव । कस्मादयं न नियम इत्यत आह— **अप्रत्यक्षेऽपीति** । हिर्यस्मादर्थे ।

कल्पतरुः ।

प्रकाशनान्नारोप इति पक्षः पूर्वपूर्वाध्यासवशादप्रकाशसमर्थनेन निरस्तः । इदानीमप्रथमाने नास्त्यारोप इति पक्षमुपन्यस्य निरस्यति— **स्यादेतदित्यादिना** । अपरोक्ष-

परिमलः ।

राकरणे; औपाधिकरूपापन्नश्च जीवः; तस्य कथमिह तद्विषयत्वमौपचारिकमित्युच्यते ? तस्य तद्विषयत्वाभावे च तस्यास्मदुल्लेखो न स्यात् अन्तःकरणमात्रविषयत्वादिदमुल्लेख एव स्यात् । सत्यम् । अहमर्थानुप्रविष्टानिदमंशरूपस्य सुखादिसाक्षिणः स्वप्रकाशस्याज्ञानोपाधिकस्य जीवस्याहंवृत्तिविषयत्वं प्रागुक्तं वक्ष्यते च । इह तु तस्येदमंशस्येव अहंवृत्त्यवच्छिन्नचैतन्यविषयत्वं मुख्यं नास्तीति तदौपचारिकमित्युच्यते । एवं च न कर्मकर्तृत्वविरोध इति चैतन्यकर्मत्वप्रयुक्तस्य विरोधस्य परिहारः । वृत्तिकर्मत्वप्रयुक्तस्य तु पञ्चाग्निविद्यायामुपासनाकर्मत्वप्रयुक्तस्येव कथंचिद्रूपभेदेन परिहार आस्थेयः— 'अहं सुखी' इत्याद्यनुभवात् सुखादिविशिष्टरूपेण कर्मत्वम् अन्तःकरणविशिष्टरूपेण कर्तृत्वमिति ॥

अप्रकाशसमर्थनेनेति । निरतिशयानन्दात्मकस्य शुद्धस्वरूपस्येति शेषः । **अभि-**

प्रत्यगात्मन्यप्यनात्मनामध्यासः। तमेतमेवंलक्षणमध्यासं पण्डिता अविद्येति मन्यन्ते, तद्विवेकेन च वस्तुस्वरूपावधारणं विद्यामाहुः। तत्रैवं

भामती।

नभो हि द्रव्यं सत् रूपस्पर्शविरहान्न बाह्येन्द्रियप्रत्यक्षम्। नापि मानसम्, मनसोऽसहायस्य बाह्ये अप्रवृत्तेः; तस्मादप्रत्यक्षम्। अथ च तत्र बाला अविवेकिनः परदर्शितदर्शिनः कदाचित्पार्थिवच्छायां श्यामतामारोप्य, कदाचित्तैजसं शुक्लत्वमारोप्य नीलोत्पलपलाशश्यामामिति वा राजहंसमालाधवलमिति वा निर्वर्णयन्ति। तत्रापि पूर्वदृष्टस्य तैजसस्य वा तामसस्य वा रूपस्य परत्र नभसि स्मृतिरूपोऽवभास इति। एवं तदेव तलमध्यस्यन्ति अवाङ्मुखीभूतमहेन्द्रनीलमणिमयमहाकटाहकल्पमित्यर्थः। उपसंहरति— **एवम्** उक्तेन प्रकारेण सर्वाक्षेपपरिहारात्, **अविरुद्धः प्रत्यगात्मन्यप्यनात्मनाम्**— बुद्ध्यादीनाम्— **अध्यासः**। ननु सन्ति च सहस्रमध्यासाः, तत्किमर्थमयमेवाध्यास आक्षेपसमाधानाभ्यां व्युत्पादितः नाध्यासमात्रमित्यत आह— **तमेतमेवंलक्षणमध्यासं पण्डिता अविद्येति मन्यन्ते**। अविद्या हि सर्वानर्थबीजमिति श्रुतिस्मृतीतिहासपुराणादिषु सुप्रसिद्धम्, तदुच्छेदाय च वेदान्ताः प्रवृत्ता इति वक्ष्यति। प्रत्यगात्मन्यनात्माध्यास एव सर्वानर्थहेतुः न पुना रजतादिविभ्रमा इति स एवाविद्या, तत्स्वरूपं चाविज्ञातं न शक्यमुच्छेत्तुमिति तदेव व्युत्पाद्यं नाध्यासमात्रम्। अत्र च 'एवंलक्षणम्' इति एवंरूपतया अनर्थहेतुतोक्ता। यस्मात्प्रत्यगात्मन्यशनायादिरहिते अशनायाद्युपेतान्तःकरणाद्यहितारोपेण प्रत्यगात्मानमदुःखं दुःखाकरोति, तस्मादनर्थहेतुः। न चैवं पृथग्जना अपि मन्यन्ते अध्यासम्, येन न व्युत्पाद्येतेत्यत उक्तम्— पण्डिता मन्यन्ते इति। ननु इयमनादिरतिनिरूढनिबिडवासनानुबद्धा अविद्या न शक्या निरोद्धुम्, उपायाभावात्— इति यो मन्यते तं प्रति तन्निरोधोपायमाह— **तद्विवेकेन च वस्तुस्वरूपावधारणम्**, निर्विचिकित्सं ज्ञानम्, **विद्यामाहुः** पण्डि-

कल्पतरुः।

त्वाभावाच्च अप्रथमानता। अपरोक्षभ्रमाधिष्ठानत्वे ह्यपरोक्षेणात्मना भवितव्यम्। स चेत् नापरोक्षः तस्मिन्नध्यासोपयोगिप्रथनाभावान्नाध्यास इत्यर्थः। रूपरहितद्रव्यत्वात् स्पर्शरहितद्रव्यत्वादिति द्वौ हेतू वक्ति— **नभो हीति**। वायुः स्पार्शन

सति यत्र यदध्यासः तत्कृतेन दोषेण गुणेन वा अणुमात्रेणापि स न संबध्यते ॥

भामती ।

ताः । प्रत्यगात्मनि खलु अत्यन्तविविक्ते बुद्ध्यादिभ्यः बुद्ध्यादिभेदाग्रहनिमित्तो बुद्ध्याद्यात्मत्वतद्धर्माध्यासः । तत्र श्रवणमननादिभिर्यद्विवेकविज्ञानं तेन विवेकाग्रहे निवर्तिते, अध्यासापबाधात्मकं वस्तुस्वरूपावधारणं विद्या चिदात्मरूपं स्वरूपे व्यवतिष्ठत इत्यर्थः । स्यादेतत् । अतिनिरूढनिबिडवासनानुविद्धा अविद्या विद्यया अपबाधितापि स्ववासनावशात्पुनरुद्भविष्यति प्रवर्तयिष्यति च वासनादिकार्यं स्वोचितमित्यत आह— **तत्रैवं सति** एवंभूतवस्तुतत्त्वावधारणे सति **यत्र यदध्यासः तत्कृतेन दोषेण गुणेन वा अणुमात्रेणापि स न संबध्यते** अन्तःकरणादिदोषेणाशनायादिना चिदात्मा, चिदात्मनो गुणेन चैतन्यानन्दादिना अन्तःकरणादि न संबध्यते । एतदुक्तं भवति— तत्त्वावधारणाभ्यासस्य हि स्वभाव एव स तादृशः, यदनादिमपि निरूढनिबिडवासनमपि मिथ्याप्रत्ययमपनयति । तत्त्वपक्षपातो हि स्वभावो धियाम्, यथाहुर्बाह्या अपि— 'निरुपद्रवभूतार्थस्वभावस्य विपर्ययैः । न बाधोऽयत्नवत्त्वेऽपि बुद्धेस्तत्पक्षपाततः' इति । विशेषतस्तु चिदात्मस्वभावस्य तत्त्वज्ञानस्य अत्यन्तान्तर-

कल्पतरुः ।

प्रत्यक्ष इति पक्षे द्वितीयहेतुः । दुःखाकरोति वस्तुवृत्तेनादुःखिनं दुःखिनं करोतीत्यर्थः । वस्तुस्वरूपं च तदवधारणं चेति कर्मधारयमभिप्रेत्याभिव्यक्तं स्वरूपज्ञानमाह— **चिदात्मरूपमिति ॥**

निरुपद्रवभूतार्थेति । भावनाप्रकर्षाद्विशदाभं सर्वविषयं ज्ञानमुत्पद्यते; तेन विषयीकृतस्य निरुपद्रवपरमार्थस्वभावस्य संस्कारबलादनुवर्तमानविपर्ययेण बाधः । कुतः? बुद्धेः परमार्थभावनाजन्याया वस्तुपक्षपातित्वेन प्राबल्यात् । ननु लङ्घनाभ्यासवन्नैरात्म्यादिभावनापि सातिशयमेव कार्यं जनयति कथं सर्वविषयज्ञानलाभ-इति शङ्कामपाकर्तुमयत्नवत्त्वेऽपीत्युक्तम् । लङ्घनाभ्यासे हि यो युगमात्रदेशलङ्घने

परिमलः ।

व्यक्तं स्वरूपज्ञानमिति । चरमसाक्षात्काररूपायां वृत्तावभिव्यक्तं स्वरूपज्ञानमेव अविद्यानिवर्तकं यथा सूर्यकान्तारूढं सौरं तेज एव तृणदाहकं तद्वत्, न तु वृत्तिरवि-

तमेतमविद्याख्यमात्मानात्मनोरितरेतराध्यासं पुरस्कृत्य सर्वे प्रमाणप्रमेयव्यवहारा लौकिका वैदिकाश्च प्रवृत्ताः, सर्वाणि च शास्त्राणि विधिप्रतिषेधमोक्षपराणि । कथं पुनरविद्यावद्विषयाणि प्रत्यक्षादीनि प्रमाणानि शास्त्राणि चेति ? उच्यते— देहेन्द्रियादिष्वहंममाभिमानहीनस्य

भामती ।

ङ्गस्य कुतोऽनिर्वाच्यया अविद्यया बाध इति । यदुक्तम् "सत्यानृते मिथुनीकृत्य विवेकाग्रहाद्ध्यस्य 'अहमिदम्' 'ममेदम्' इति लोकव्यवहारः" इति तत्र व्यपदेशलक्षणो व्यवहारः कण्ठोक्तः । इतिशब्दसूचितं लोकव्यवहारमादर्शयति— **तमेतमविद्याख्यमिति** । निगदव्याख्यातम् । आक्षिपति— **कथं पुनरविद्यावद्विषयाणि प्रत्यक्षादीनि प्रमाणानि** । तत्त्वपरिच्छेदो हि प्रमा विद्या, तत्साधनानि प्रमाणानि कथमविद्यावद्विषयाणि ? नाविद्यावन्तं प्रमाणान्याश्रयन्ति, तत्कार्यस्य विद्याया अविद्याविरोधित्वात् इति भावः । सन्तु वा प्रत्यक्षादीनि संवृत्यापि यथा तथा; शास्त्राणि तु पुरुषहितानुशासनपराणि अविद्याप्रतिपक्षतया नाविद्यावद्विषयाणि भवितुमर्हन्तीत्याह— **शास्त्राणि चेति । समाधत्ते— उच्यते इति । देहेन्द्रियादिषु अहंममाभिमानहीनस्य तादात्म्यतद्धर्माध्यासहीनस्य प्रमातृत्वानुपपत्तौ सत्यां प्रमाणप्रवृत्त्यनुपपत्तेः । अयमर्थः—**

कल्पतरुः ।

प्रयत्नस्ततोऽधिको द्वियुगदेशलङ्घनेऽपेक्ष्यते । नैरात्म्यादितत्त्वविषयप्रत्ययाभ्यासे तु यादृशः प्रथमप्रत्ययोत्पादे प्रयत्नः तादृश एव द्वितीयादावपि वैशद्याधिक्यं च दृश्यते । तच्च निरतिशयं भवितुमर्हति । यत्र हि योऽभ्यासः कार्योत्कर्षकरः प्राचः प्रयत्नादधिकप्रयत्नानपेक्षश्च स तत्र निरतिशयकार्योत्कर्षं करोति पुटपाकाभ्यास इव सुवर्णस्य रक्तसारतामिति । अयत्नवत्त्वेऽप्यधिकप्रयत्नानपेक्षत्वेऽपि बुद्धेस्तत्पक्षपातित्वेनोदयान्निरतिशयोत्कर्षसिद्धिश्चेत्यर्थः ॥

'तमेतम्' इत्यादिभाष्यस्य 'अध्यस्य लोकव्यवहारः' इति भाष्येण पौनरुक्त्यमाशङ्क्याह—**यदुक्तमिति** । प्रमाकरणानि प्रमाणानि नाविद्यावन्तं प्रेरकत्वेनाश्रयन्त्यनुपयोगादित्याक्षेपाभिप्रायमाह—**तत्त्वपरिच्छेदो हीति** । विरोधाभिप्रायमाह—**नाविद्यावन्तमिति** । अहमभिमानहीनस्येति भाष्यपदं व्याचष्टे— **तादात्म्येति** । तादात्म्याध्यासो देहादिधर्म्यैक्याध्यासः । ममाभिमानहीनस्येत्येतद्व्याकरोति— **तद्धर्मेति** । अध्या-

प्रमातृत्वानुपपत्तौ प्रमाणप्रवृत्त्यनुपपत्तेः । न हीन्द्रियाण्यनुपादाय प्रत्यक्षादिव्यवहारः संभवति । न चाधिष्ठानमन्तरेण इन्द्रियाणां व्यापारः

भामती ।

प्रमातृत्वं हि प्रमां प्रति कर्तृत्वम् । तच्च स्वातन्त्र्यम् । स्वातन्त्र्यं च प्रमातुरितरकारकाप्रयोज्यस्य समस्तकारकप्रयोक्तृत्वम् । तदनेन प्रमाकरणं प्रमाणं प्रयोजनीयम् । न च स्वव्यापारमन्तरेण करणं प्रयोक्तुमर्हति । न च कूटस्थनित्यश्चिदात्मा अपरिणामी स्वतो व्यापारवान् । तस्मात् व्यापारवद्बुद्ध्यादितादात्म्याध्यासात् व्यापारवत्तया प्रमाणमधिष्ठातुमर्हतीति भवत्यविद्यावत्पुरुषविषयत्वमविद्यावत्पुरुषाश्रयत्वं प्रमाणानामिति । अथ मा प्रवर्तिषत प्रमाणानि, किं नश्छिन्नामित्यत आह— **न हीन्द्रियाण्यनुपादाय प्रत्यक्षादिव्यवहारः संभवति** । व्यवह्रियते अनेनेति व्यवहारः फलम्, प्रत्यक्षादीनां प्रमाणानां फलमित्यर्थः । 'इन्द्रियाणि' इति इन्द्रियलिङ्गादीनीति द्रष्टव्यम्, 'दण्डिनो गच्छन्ति' इतिवत् । एवं हि 'प्रत्यक्षादि' इत्युपपद्यते । व्यवहारक्रियया च व्यवहार्याक्षेपात्समानकर्तृकता । अनुपादाय यो व्यवहार इति योजना । किमिति पुनः प्रमाता उपादत्ते प्रमाणानि, अथ स्वयमेव कस्मान्न प्रवर्तते इत्यत आह— **न चाधिष्ठानमन्तरेणेन्द्रियाणां व्यापारः**, प्रमाणानां व्यापारः, **संभवति** । न जातु करणान्यनधिष्ठितानि कर्त्रा स्वकार्ये व्याप्रियन्ते, मा भूत्कुविन्दरहितेभ्यो वेमादिभ्यः पटोत्पत्तिरिति ।

कल्पतरुः ।

सहीनस्य प्रमातृत्वानुपपत्तिमुपपादयति— **प्रमातृत्वं हीति** । निर्व्यापारे चिदात्मनि प्रमाणप्रेरणं व्यापारः परोपाधिरध्यस्त इति प्रमाणानामविद्यावत् प्रेर्यत्वमित्यर्थः । **दण्डिन इति** । यथा दण्ड्यदण्डिसमुदायलक्षणाद्वारेण समूहिपरो दण्डिशब्दः एवमिन्द्रियशब्दोऽपि इन्द्रियानिन्द्रियप्रमाणपर इति । व्यवहार इति क्रियामात्रोपादानात्समानकर्तृकक्रियाद्वयापेक्षक्त्वाप्रत्ययायोगमाशङ्क्यार्थाक्षिप्तकर्तुरुपादानेन परिहरति— **व्यवहारक्रियया इति । व्यवहार्याक्षेपादिति** । व्यवहारिण आक्षेपादित्यर्थः । अनुपादाय व्यवहारो न संभवतीत्युक्तमनुपपन्नम्, अनुपादानस्य प्रमातृकर्तृकत्वेनासंभवनस्य च व्यवहारकर्तृकत्वेन कर्तृभेदादित्याशङ्क्याह— **अनुपादायेति** । नैवामिह संबन्धोऽनुपादाय न संभवतीति; किं तर्हि ? अनुपादाय यो व्यवहारः स न संभवतीति । **किमिति**

संभवति । न च अनध्यस्तात्मभावेन देहेन कश्चिद्व्यापियते । न चैतस्मिन्सर्वस्मिन्नसति आत्मनोऽसङ्गस्य प्रमातृत्वमुपपद्यते । न च प्रमातृत्व-

---

भामती ।

अथ देह एवाधिष्ठाता कस्मान्न भवति, कृतमत्रात्माध्यासेनेत्यत आह— **न चानध्यस्तात्मभावेन देहेन कश्चिद्व्यापियते** । सुषुप्तेऽपि व्यापारप्रसङ्गादिति भावः । स्यादेतत् । यथानध्यस्तात्मभावं वेमादिकं कुविन्दो व्यापारयन्पटस्य कर्ता, एवमनध्यस्तात्मभावं देहेन्द्रियादि व्यापारयन् भविष्यति तदभिज्ञः प्रमाता इत्यत आह— **न चैतस्मिन्सर्वस्मिन्** इतरेतरात्माध्यासे इतरेतरधर्माध्यासे **च असति, आत्मनोऽसङ्गस्य** सर्वथा सर्वदा सर्वधर्मधर्मिवियुक्तस्य **प्रमातृत्वमुपपद्यते** । व्यापारवन्तो हि कुविन्दादयो वेमादीनधिष्ठाय व्यापारयन्ति, अनध्यस्तात्मभावस्य तु देहादिष्वात्मनो न व्यापारयोगोऽसङ्गत्वादित्यर्थः । आतश्चाध्यासाश्रयाणि प्रमाणानीत्याह— **न च प्रमातृत्व-**

कल्पतरुः ।

पुनरिति सांख्यस्य शङ्का । **अथ स्वयमेवेति** स्वभाववादिनः । **अथ देह एवेति** लोकायतिकस्य । एवं प्रमाणप्रेरकत्वेनाध्यासं समर्थ्य प्रमाश्रयत्वेनापि समर्थ्यते— **आतश्चेति** । अवश्यं चेत्यर्थः । मा भूत्प्रमातृत्वमन्तरेण प्रमाणप्रवृत्तिः एतावता कथं प्रमाणानामध्यासाश्रितत्वमित्याशङ्क्य चिदचिद्रूपसंवलितप्रमाया आश्रयः प्रमातापि तत्स्वभावो भवितुमर्हति । न च चिदचित्संवलनमध्यासमन्तरेणेति भवन्ति

परिमलः ।

द्यानिवर्तिका जडत्वात् इत्याशयेन कर्मधारयोक्तिः । **स्वयमेवेति स्वभाववादिन इति** । वत्सविवृद्ध्यर्थं क्षीरमिव पुरुषभोगापवर्गार्थं प्रधानं स्वयमेव प्रवर्तत इति वदतः सांख्यस्य शङ्काया विवरणार्थत्वेन योजयितुं शक्यत्वेऽपि सांख्यमते पुरुषसंनिधानमात्रस्यापेक्षितत्वात्तस्याप्यपेक्षामवदतः स्वभाववादिनो मते स्वयमेवेत्येवकारस्य स्वारस्यमस्तीति स्वभाववादिमतपरतया योजितम् । **प्रमाश्रयत्वेनापि समर्थ्यत इति** । 'न च प्रमातृत्वमन्तरेण—' इति भाष्यं पूर्वभाष्यशेषत्वेन प्रतीयमानमपि 'प्रमातृत्वानुपपत्तौ प्रमाणप्रवृत्त्यनुपपत्तेः इति पूर्वभाष्यगतवाक्येन पौनरुक्त्यपरिहाराय युक्त्यन्तरपरत्वेन व्याख्यायत इति भावः ॥

मन्तरेण प्रमाणप्रवृत्तिरस्ति । तस्मादविद्यावद्विषयाण्येव प्रत्यक्षादीनि

भामती ।

मन्तरेण प्रमाणप्रवृत्तिरस्ति । प्रमायां खलु फले स्वतन्त्रः प्रमाता भवति। अन्तःकरणपरिणामभेदश्च प्रमेयप्रवणः कर्तृस्थश्चित्स्वभावः प्रमा । कथं च जडस्यान्तःकरणस्य परिणामश्चिद्रूपो भवेत्, यदि चिदात्मा तत्र नाध्यस्येत ? कथं चैष चिदात्मकर्तृको भवेत्, यद्यन्तःकरणं व्यापारवत् चिदात्मनि नाध्यस्येत्? तस्मादितरेतराध्यासाच्चिदात्मकर्तृस्थं प्रमाफलं सिध्यति, तत्सिद्धौ च प्रमातृत्वम् । तामेव च प्रमामुररीकृत्य प्रमाणस्य प्रवृत्तिः । प्रमातृत्वेन च प्रमा उपलक्ष्यते । प्रमायाः फलस्याभावे प्रमाणं न प्रवर्तेत । तथा च प्रमाणमप्रमाणं स्यादित्यर्थः । उपसंहरति— **तस्मादविद्यावद्विषयाण्येव प्रत्यक्षादीनि प्रमाणा-**

कल्पतरुः ।

प्रमाणान्यध्यासाश्रयाणीत्याह– **प्रमायां खल्विति** । परिणामविशेष उद्भूतसत्त्वः प्रमेयप्रवण इति सुखादेर्व्यवच्छिनत्ति । परिणामतया च जाड्यमुक्तम् । यदि चिदात्मा तत्रान्तःकरणेऽध्यस्येत तर्ह्येव तत्परिणामश्चिद्रूपो भवेदित्यर्थः । **तत्सिद्धौ चेति** । प्रमाश्रयत्वं हि प्रमातृत्वमित्यर्थः। अनेन 'नाविद्यावन्तम्' इति ग्रन्थस्थ आक्षेपः परिहृतः । 'तत्त्वपरिच्छेदो हि' इति ग्रन्थस्थं परिहरति–**तामेव चेति**। **प्रमातृत्वेन चेति**।

परिमलः ।

प्रमाश्रयत्वं हीति । 'न हीन्द्रियाण्यनुपादाय' इत्यादिभाष्ये प्रमातृत्वं प्रमाकरणादिप्रयोक्तृत्वरूपं प्रमाकर्तृत्वमिति प्रमाणप्रेरकत्वेनाध्याससमर्थनार्थमुक्तम् । इह तु चिद्रूपतया परिणामत्वेनाचिद्रूपतया च चिदचित्संवलनरूपा या प्रमा तदाश्रयत्वं केवलचितः केवलाचितश्च न संभवतीति प्रमाश्रयत्वेनाध्याससमर्थनार्थं प्रमातृत्वं प्रमाश्रयत्वमिति व्याख्यायते । यद्यप्युभयथाप्यध्याससमर्थनं प्रत्यगात्मनः कौटस्थ्यं सिद्धं कृत्वा प्रवृत्तं तत्कौटस्थ्ये विप्रतिपद्यमानं प्रति नोपन्यासार्हम्, तथापि श्रुतिसिद्धं तत्कौटस्थ्यं प्रामाणिकानां न विप्रतिपत्त्यर्हमिति तात्पर्यम् । **अनेनेति** । 'नाविद्यावन्तम्—' इति शङ्काग्रन्थो हि विरोधाभिप्रायः; स तु विद्याया एवाचित्संवलितरूपत्वेनाविद्यागर्भत्वान्नास्ति विरोध इति परिहृत इत्यर्थः । अनुपयोगपरिहारार्थः 'तामेव–' इति ग्रन्थः, अध्यासमपेक्ष्य प्रमाणप्रवृत्तेस्तेन प्रमोपयोगकथनादित्यवतारयति— **तत्त्वेति** । इह यदि प्रमातृत्वं प्रमाकरणादिप्रेरकत्वरूपं प्रमायां स्वातन्त्र्यं तदा प्रमाणप्रेरकत्वेनाध्याससमर्थनमेवास्यापि भाष्यस्यार्थः स्यादिति पूर्वभाष्येण पौनरुक्त्यं भवेत्, यदि तु तत्प्रेरणानुकूला शक्तिरिह

प्रमाणानि शास्त्राणि चेति । पश्वादिभिश्चाविशेषात् । यथा हि पश्वादयः शब्दादिभिः श्रोत्रादीनां संबन्धे सति शब्दादिविज्ञाने प्रतिकूले जाते ततो निवर्तन्ते, अनुकूले च प्रवर्तन्ते ; यथा दण्डोद्यतकरं पुरुषमभिमुखमुपलभ्य 'मां हन्तुमयमिच्छति' इति पलायितुमारभन्ते, हरितृणपूर्णपाणिमुपलभ्य तं प्रति अभिमुखीभवन्ति ; एवं पुरुषा अपि व्यु-

---

भामती ।

नि । स्यादेतत् । भवतु पृथग्जनानामेवम् ; आगमोपपत्तिप्रतिपन्नप्रत्यगात्मतत्त्वानां व्युत्पन्नानामपि पुंसां प्रमाणप्रमेयव्यवहारा दृश्यन्त इति कथमविद्यावद्विषयाण्येव प्रमाणानीत्यत आह— **पश्वादिभिश्चाविशेषादिति** । विदन्तु नाम आगमोपपत्तिभ्यां देहेन्द्रियादिभ्यो भिन्नं प्रत्यगात्मानम् ; प्रमाणप्रमेयव्यवहारे तु प्राणभृन्मात्रधर्मत्वं नातिवर्तन्ते । यादृशो हि पशुशकुन्तादीनामविप्रतिपन्नमुग्धभावानां व्यवहारस्तादृशो व्युत्पन्नानामपि पुंसां दृश्यते । तेन तत्सामान्यात्तेषामपि व्यवहारसमये अविद्यावत्त्वमनुमेयम् । **चशब्दः समुच्चये** । उक्तशङ्कानिवर्तनसहिता पूर्वोक्तोपपत्तिः अविद्यावत्पुरुषविषयत्वं प्रमाणानां साधयतीत्यर्थः । एतदेव विभजते— **यथा हि पश्वादय इति** । अत्र च शब्दादिभिः श्रोत्रादीनां संबन्धे सति इति प्रत्यक्षं प्रमाणं दर्शितम् । शब्दादिविज्ञाने इति तत्फलमुक्तम् । प्रतिकूले इति च अनुमानफलम् । तथा हि शब्दादिस्वरूपमुपलभ्य तज्जातीयस्य प्रतिकूलतामनुस्मृत्य तज्जातीयतयोपलभ्यमानस्य प्रतिकूलतामनुमिमत इति । उदाहरति— **यथा दण्डेति** । शेषमतिरोहितार्थम् । स्यादेतत् । भवन्तु प्रत्यक्षादीन्यविद्यावद्विषयाणि । शास्त्रं तु 'ज्योतिष्टोमेन स्वर्गकामो यजेत'

कल्पतरुः ।

अनुपलक्षणे हि प्रमायाः प्रमातृत्वशक्तिः स्वयमेवोपकल्प्या नाध्यासोपपादिका, प्रमा तु चिदचिद्रूपगर्भिणी कल्पयत्यध्यासमिति ॥

परिमलः ।

प्रमातृत्वम् ; तत्राह— **प्रमातृत्वशक्तिरिति** । न च प्रेरणव्यापारेण कल्पितया शक्त्या अध्यास उपपाद्यतामिति वाच्यम्, प्रथमोपस्थितेन तस्याः कल्पकेनैव तदुपपादनसंभवात् तस्य च कृतत्वादिति भावः । **प्रमा त्विति** । तु-शब्दः प्रमाणप्रेरणव्यापारोपस्थि-

त्पन्नचित्ताः क्रूरदृष्टीनाक्रोशतः खड्गोद्यतकरान्बलवत उपलभ्य ततो निवर्तन्ते, तद्विपरीतान्प्रति प्रवर्तन्ते । अतः समानः पश्वादिभिः पुरुषाणां प्रमाणप्रमेयव्यवहारः । पश्वादीनां च प्रसिद्ध एव अविवेकपूर्वकः प्रत्यक्षादिव्यवहारः । तत्सामान्यदर्शनाद्व्युत्पत्तिमतामपि पुरुषाणां

भामती ।

इत्यादि न देहात्माध्यासेन प्रवर्तितुमर्हति । अत्र हि आमुष्मिकफलोपभोगयोग्यः अधिकारी प्रतीयते । तथा च पारमर्षं सूत्रम्— 'शास्त्रफलं प्रयोक्तरि तल्लक्षणत्वात्तस्मात्स्वयं प्रयोगे स्यात्' इति । न च देहादि भस्मीभूतं पारलौ-

कल्पतरुः ।

तथा च पारमर्षमिति । शेषलक्षणेऽभिहितम्—'शास्त्रफलं प्रयोक्तरि तल्लक्षणत्वात्तस्मात्स्वयं प्रयोगे स्यात्' । 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' इत्यत्र संशयः—किं साङ्गे प्रधाने यजमान एव कर्ता उतोद्देशत्यागात्मकप्रधाने एव यजमानस्य कर्तृत्वमङ्गेषु यथायथमृत्विजामिति । तत्रेदं पूर्वपक्षसूत्रम् । साङ्गप्रधानस्य प्रयोगे अनुष्ठाने स्वयं यजमानः कर्ता स्यात्, यतः शास्त्रगम्यं फलं प्रयोक्तरि प्रतीयते । कुतः? तल्लक्षणत्वाच्छब्दप्रमाणकत्वादस्यार्थस्य । 'स्वर्गकामो यजेत' इति स्वर्गोद्देशेन भावनां विदधदाख्यातं भावनाक्षिप्तकर्तृसंबद्धं फलमवगमयति । आत्मनेपदेन च फलस्य कर्तृगामिता प्रतीयते । साङ्गं च प्रधानं फलसाधनमिति सर्वत्र याजमानत्वे प्राप्ते, सिद्धान्तः—'अन्यो वा स्यात्परिक्रयान्नानाद्विप्रतिषेधात्प्रत्यगात्मनि' । यदि यजमान एव सर्वत्र कर्ता स्यात् तर्हि दक्षिणाभिः परिक्रयणमृत्विजामनर्थकं स्यात् । स्वस्मिंश्च

परिमलः ।

त्यनपेक्षोपस्थितिकत्वविशेषद्योतनार्थः । **उद्देशत्यागात्मकेति** । यजमानद्रव्यस्य स्वत्वत्यागोऽन्येन कर्तुमशक्य इति तस्मिन्प्रधाने यजमानस्यैव कर्तृत्वं तथैव ऋत्विगानमनार्थे दक्षिणादानेऽपि उपलक्षणमेतत् फलप्रतिग्रहयोग्यतापादकतपःप्रभृतेश्च । एवकारस्तदितराङ्गकलापव्यवच्छेदार्थः । **भावनाक्षिप्तेति** । ननु 'पचन्ति पाचकाः' इत्यत्र भावनाक्षिप्तपाचकरूपकर्तृगामित्वं पाकफलस्य नास्तीति इष्टमिति चेत्; न, तत्राकर्तृगामिक्रियाफलार्थकपरस्मैपदबलात् पाकफलस्यान्यगामित्वेऽप्यत्र बाधकाभावेनौत्सर्गिककर्तृगामित्वत्यागायोगादिति भावः । न केवलं कर्तृगामित्वे बाधकाभावमात्रम्, तत्र साधकान्तरमप्यस्तीत्याह— **आत्मनेपदेन चेति** । **अनर्थकं स्यादिति** । भृतिदानं हि स्वफलार्थं

प्रत्यक्षादिव्यवहारस्तत्कालः समान इति निश्चीयते। शास्त्रीये तु व्यवहारे यद्यपि बुद्धिपूर्वकारी नाविदित्वा आत्मनः परलोकसंबन्धमधिक्रियते, तथापि न वेदान्तवेद्यमशनायाद्यतीतमपेतब्रह्मक्षत्रादिभेदमसंसार्या-

---

भामती।

किकाय फलाय कल्पत इति देहाद्यतिरिक्तं कंचिदात्मानमधिकारिणमाक्षिपति शास्त्रम्, तदवगमश्च विद्येति कथमविद्यावद्विषयं शास्त्रमित्याशङ्क्याह– **शास्त्रीये त्विति**। तु-शब्दः प्रत्यक्षादिव्यवहाराद्विनत्ति शास्त्रीयम्। अधिकारशास्त्रं हि स्वर्गकामस्य पुंसः परलोकसंबन्धं विना न निर्वहतीति तावन्मात्रमाक्षिपेत्, न त्वस्यासंसारित्वमपि, तस्याधिकारेऽनुपयोगात्, प्रत्युत औपनिषदस्य पुरुषस्य अकर्तुरभोक्तुरधिकारविरोधात्। प्रयोक्ता हि कर्मणः कर्मजनितफलभोगभागी कर्मण्यधिकारी स्वामी भवति। तत्र कथमकर्ता प्रयोक्ता, कथं च अभोक्ता कर्मजनितफलभोगभागी? तस्मादनाद्यविद्यालब्धकर्तृत्वभोक्तृत्वब्राह्मणत्वाद्यभि-

कल्पतरुः।

परिक्रयो विप्रतिषिद्धः, तत आध्वर्यवादिकमृत्विग्भिरेव कार्यम् तस्मिंश्च परिक्रयद्वारा प्रयोजककर्तृत्वाद्यजमान एव साङ्गप्रधानफलभागिति। अत्र च पूर्वपक्षसिद्धान्तयोः कर्तृगामिनि फले न विगानमिति पूर्वपक्षसूत्रमपि तावत्यंशे प्रमाणमित्युदाहृतम्॥

अशनायाद्यतीतपदसूचिताकर्तृत्ववैपरीत्यमाह— **प्रयोक्ता हीति**। **असंसार्यात्मतत्त्वपदसूचिताभोक्तृत्ववैपरीत्यमाह— कर्मजानितेति**। अपेतब्रह्मेत्याद्युक्तानधिकाररूपवैपरीत्यमाह— **अधिकारीति**। अधिकारीत्यस्य व्याख्यानं **स्वामीति**। **अकर्ता** कर्तृत्वशक्तिरहितः। ननु ब्रह्मज्ञानेन कर्मविधयो यदि यदा कदापि

परिमलः।

कर्म परैः कारयितुमित्येवं लोके दृष्टार्थमवगतम्। अतो दृष्टार्थपरिक्रयविधिबलात् परिक्रीतैः कर्म कारणीयमिति नियमोऽवसीयत इति भावः। **आध्वर्यवादिकमिति**। आध्वर्यवादिसमाख्यायुक्तकाण्डाम्नातमङ्गजातं समाख्यावशादध्वर्य्वादिभिः कर्तव्यमित्यधिकरणान्तरव्युत्पादनीयार्थस्य बुद्धिसौकर्यार्थमिहोपन्यासः। **प्रयोजककर्तृत्वादिति**। स्वतन्त्रप्रयोजकसाधारणकर्तृत्वसामान्यपरं साङ्गप्रधानानुष्ठापकप्रयोगाविधिगतमाख्यातमिति भावः। अप्रयोक्तेत्यर्थे कथं प्रयोक्तेत्यनेन पौनरुक्त्यपरिहारायाह– **अकर्ता कर्तृत्वशक्तिर-**

त्मतत्त्वमधिकारेऽपेक्ष्यते, अनुपयोगात् अधिकारविरोधाच्च। प्राक् च तथाभूतात्मविज्ञानात् प्रवर्तमानं शास्त्रमविद्यावद्विषयत्वं नातिवर्तते। तथा हि—'ब्राह्मणो यजेत' इत्यादीनि शास्त्राण्यात्मनि वर्णाश्रमवयोवस्था-

---

भामती।

मानिनं नरमधिकृत्य विधिनिषेधशास्त्रं प्रवर्तते। एवं वेदान्ता अप्यविद्यावत्पुरुषविषया एव। न हि प्रमात्रादिविभागादृते तदर्थाधिगमः। ते त्वविद्यावन्तमनुशासतो निर्मृष्टनिखिलाविद्यमनुशिष्टं स्वरूपे व्यवस्थापयन्तीत्येतावानेषां विशेषः। तस्मादविद्यावत्पुरुषविषयाण्येव शास्त्राणीति सिद्धम्। स्यादेतत्। यद्यपि विरोधानुपयोगाभ्यामौपनिषदः पुरुषः अधिकारे नापेक्ष्यते तथाप्युपनिषद्भ्यो ऽवगम्यमानः शक्नोत्यधिकारं निरोद्धुम्। ततश्च परस्परपराहतार्थत्वेन कृत्स्न एव वेदः प्रामाण्यमपजह्यादित्यत आह— **प्राक् च तथाभूतात्मेति**। सत्यमौपनिषदपुरुषाधिगमः अधिकारविरोधी, तस्मात्तु पुरस्तात्कर्मविधयः स्वोचितं व्यवहारमभिनिर्वर्तयन्तो नानुपजातेन ब्रह्मज्ञानेन शक्या निरोद्धुम्। न च परस्परपराहतिः, विद्याविद्यावत्पुरुषभेदेन व्यवस्थोपपत्तेः। यथा 'न हिंस्यात्सर्वा भूतानि' इति साध्यांशनिषेधेऽपि 'श्येनेनाभिचरन्यजेत' इति शास्त्रं प्रवर्तमानम् 'न हिंस्यात्–' इत्येवन न विरुध्यते, तत्कस्य हेतोः? पुरुषभेदादिति। अवजितक्रोधारातयः पुरुषा निषेधे अधिक्रियन्ते, क्रोधारातिवशीकृतास्तु श्येनादिशास्त्रे इति। अविद्यावत्पुरुषविषयत्वं नातिवर्तत इति यदुक्तं तदेव स्फुटयति— **तथा हीति**। वर्णाध्यासः— 'राजा राजसूयेन यजेत' इत्यादिः। आश्रमाध्यासः— 'गृहस्थः सदृशीं भार्यां विन्देत' इत्यादिः। वयोध्यासः— कृष्णकेशोऽग्नीनादधीत' इत्यादिः। अवस्थाध्यासः— 'अप्रतिसमाधेयव्याधीनां जलादिप्रवेशेन प्राणत्यागः' इत्यादिः। आदिग्रहणं पातकोपपातकसंकरीकरणा-

कल्पतरुः।

बाधिष्यन्ते तर्ह्यप्रमाणं स्युः, तत्राह— **न च परस्परेति**। **पातकेति**। पातकं ब्रह्मवधादि। उपपातकं गोवधादि। संकरीकरणादीनि च मनुनोक्तानि— 'खराश्वोष्ट्रवराहाणामजाविकवधस्तथा। संकरीकरणं ज्ञेयं मीनाहिमहि-

परिमलः।

हित इति। पातकं ब्रह्मवधादीति। अत्र पातकशब्देन महापातकमतिपातकं समपातकं

दिविशेषाध्यासमाश्रित्य प्रवर्तन्ते। अध्यासो नाम अतस्मिंस्तद्बुद्धिरित्यवोचाम। तद्यथा— पुत्रभार्यादिषु विकलेषु सकलेषु वा 'अहमेव विकलः,

भामती।

पात्रीकरणमलिनीकरणाद्यध्यासोपसंग्रहार्थम्। तदेवमात्मानात्मनोः परस्पराध्यासमाक्षेपसमाधानाभ्यामुपपाद्य प्रमाणप्रमेयव्यवहारप्रवर्तनेन च दृढीकृत्य तस्यानर्थहेतुत्वमुदाहरणप्रपञ्चेन प्रतिपादयन् तत्स्वरूपमुक्तं स्मारयति— **अध्यासो नाम अतस्मिंस्तद्बुद्धिरित्यवोचाम**। 'स्मृतिरूपः परत्र पूर्वदृष्टावभासः' इत्यस्य संक्षेपाभिधानमेतत्। तत्र 'अहम्' इति धर्मितादात्म्याध्यासमात्रम् 'मम' इत्यनुत्पादितधर्माध्यासं नानर्थहेतुरिति धर्माध्यासमेव ममकारं साक्षादशेषानर्थसंसारकारणमुदाहरणप्रपञ्चेनाह— **तद्यथा पुत्रभार्यादिष्विति**। देहतादात्म्यमात्मन्यध्यस्य देहधर्मं पुत्रकलत्रादिस्वाम्यं च कृशत्वादिवदारोप्याह— 'अहमेव विकलः, सकलः' इति। स्वस्य खलु साकल्येन स्वाम्यसाकल्यात् स्वामीश्वरः सकलः संपूर्णो भवति। तथा स्वस्य वैकल्येन स्वाम्यवैकल्यात् स्वामीश्वरो विकलो-

कल्पतरुः।

षस्य च॥ निन्दितेभ्यो धनादानं वाणिज्यं शूद्रसेवनम्। अपात्रीकरणं ज्ञेयमसत्यस्याभिभाषणम्॥ कृमिकीटवयोहत्या मद्यानुगतभोजनम्। फलैधःकुसुमस्तेयमधैर्यं च मलावहम्' इति। आदिशब्दात्तदुक्तं जातिभ्रंशकरादि गृह्यते— 'ब्राह्मणस्य रुजः कृत्वा घ्रातिरघ्रेयमद्ययोः। जैह्म्यं पुंसि च मैथुन्यं जातिभ्रंशकरं हि तत्' इति। अभ्यर्हितत्वाद्धर्म्यध्यासः प्रथमं वक्तव्य इत्याशङ्क्याह— **तत्राहमिति**। गृहीतविवेकत्वात्पुत्रादीनामात्मनि तद्धर्माध्यासासंभवमाशङ्क्याह— **देहतादात्म्यमिति**। देहगतस्वामित्वस्यारोपे कथं साकल्यवैकल्यारोपसिद्धिः? तत्राह— **स्वस्य खल्विति**। देहगतस्वामित्वस्य ये सकलत्वविकलत्वे ते चेदात्मन्यध्यस्ते कथं बाह्य-

परिमलः।

चेति त्रिविधं पातकं गृह्यते। **जातिभ्रंशकरादि** इत्यादिशब्देन प्रकीर्णकं गृह्यते। अनुक्तान्ताष्टविधपापानन्तर्भूतं पापं प्रकीर्णकम्। एवमेकैकसंज्ञया केषांचित्केषांचित्पापानां क्रोडीकारस्तेषु तेष्वेकरूपनरकादिफलप्रायश्चित्तोपदेशार्थः। **देहगतस्वामित्वस्येति**। ननु पुत्रभार्यादिस्वामित्वं देहगतं न भवति, तस्य पुत्रभार्याद्युपचाराधीनभोगाभावात्। तदधीनभोगभाक्त्वव्यतिरेकेण तद्वैकल्यसाकल्यप्रयुक्तवैकल्यसाकल्यार्हस्य स्वामित्वस्याभा-

सकलो वा' इति बाह्यधर्मानात्मन्यध्यस्यति ; तथा देहधर्मान् 'स्थूलोऽहम्, कृशोऽहम्, गौरोऽहम्, तिष्ठामि गच्छामि लङ्घयामि च' इति ; तथेन्द्रियधर्मान् 'मूकः काणः क्लीबो बधिरोऽन्धोऽहम्' इति ; तथान्तःकरणधर्मान् कामसंकल्पविचिकित्साध्यवसायादीन्। एवमहंप्रत्ययिनमशेषस्वप्रचारसाक्षिणि प्रत्यगात्मन्यध्यस्य तं च प्रत्यगात्मानं सर्वसाक्षिणं तद्विपर्ययेणान्तःकरणादिष्वध्यस्यति। एवमयमनादिरनन्तो नैसर्गिको-

---

भामती।

ऽसंपूर्णो भवति। बाह्यधर्मा ये वैकल्यादयः स्वाम्यप्रणालिकया संचारिताः शरीरे तानात्मन्यध्यस्यतीत्यर्थः। यदा च परोपाध्यपेक्षे देहधर्मे स्वाम्ये इयं गतिः तदा कैव कथा अनौपाधिकेषु देहधर्मेषु कृशत्वादिषु इत्याशयवानाह— **तथा देहधर्मानिति**। देहादप्यन्तरङ्गाणामिन्द्रियाणामध्यस्तात्मभावानां धर्मान्मूकत्वादीन् ततोऽप्यन्तरङ्गस्यान्तःकरणस्य अध्यस्तात्मभावस्य धर्मान्कामसंकल्पादीन् आत्मन्यध्यस्यतीति योजना। तदनेन प्रपञ्चेन धर्माध्यासमुक्त्वा तस्य मूलं धर्म्यध्यासमाह— **एवमहंप्रत्ययिनम्**। अहंप्रत्ययो वृत्तिर्यस्मिन्नन्तःकरणादौ सोऽयमहंप्रत्ययी, तं **स्वप्रचारसाक्षिणि** अन्तःकरणप्रचारसाक्षिणि **चैतन्योदासीनताभ्यां प्रत्यगात्मन्यध्यस्य**। तदनेन कर्तृत्वभोक्तृत्वे उपपादिते। चैतन्यमुपपादयति— **तं च प्रत्यगात्मानं सर्वसाक्षिणं तद्विपर्ययेण** अन्तःकरणादिविपर्ययेण, अन्तःकरणाद्यचेतनं तस्य विपर्ययः चैतन्यं तेन। इत्थंभूतलक्षणे तृतीया। **अन्तःकरणादिष्वध्यस्यति**। तदनेन अन्तःकरणाद्यवच्छिन्नः प्रत्यगात्मा इदमनिदंरूपश्चेतनः कर्ता भोक्ता कार्यकारणाविद्याद्वयाधारोऽहंकारास्पदं संसारी सर्वानर्थसंभारभाजनं जीवात्मा इतरेतराध्यासोपादानः तदुपादानश्चाध्यास इत्यनादित्वात् बीजाङ्कुरवन्नेतरेतराश्रयत्वमित्युक्तं भवति। प्रमाणप्रमेयव्यवहारदृढीकृतमेव शिष्यहिताय स्वरूपाभिधानपूर्वकं सर्वलोक-

---

कल्पतरुः।

ग्रहणं भाष्ये? तत्राह— **बाह्येति**। साक्षिशब्दार्थमाह— **चैतन्योदासीनताभ्यामिति**। सक्रियोपाधेरात्मन्यारोपादात्मनि कर्तृत्वभोक्तृत्वे उपपादिते इत्यर्थः। **चैतन्यमिति**। अन्तःकरणादिगतमित्यर्थः। साक्षिणि इति निर्देशात् शुद्धेऽध्यास

ऽध्यासो मिथ्याप्रत्ययरूपः कर्तृत्वभोक्तृत्वप्रवर्तकः सर्वलोकप्रत्यक्षः । अस्यानर्थहेतोः प्रहाणाय आत्मैकत्वविद्याप्रतिपत्तये सर्वे वेदान्ता आरभ्यन्ते । यथा चायमर्थः सर्वेषां वेदान्तानाम्, तथा वयमस्यां शारी-

---

भामती ।

प्रत्यक्षतया अध्यासं सुदृढीकरोति— **एवमयमनादिरनन्तः** तत्त्वज्ञानमन्तरेणाशक्यसमुच्छेदः । अनाद्यनन्तत्वे हेतुरुक्तः— **नैसर्गिक इति । मिथ्याप्रत्ययरूपः** मिथ्याप्रत्ययानां रूपमनिर्वचनीयत्वं तद्यस्य स तथोक्तः । अनिर्वचनीय इत्यर्थः । प्रकृतमुपसंहरति— **अस्यानर्थहेतोः प्रहाणाय** । विरोधिप्रत्ययं विना कुतोऽस्य प्रहाणमित्यत उक्तम्— **आत्मैकत्वविद्याप्रतिपत्तये** । प्रतिपत्तिः प्राप्तिः तस्यै, न तु जपमात्राय नापि कर्मसु प्रवृत्तये, आत्मैकत्वं विगलितनिखिलप्रपञ्चत्वम् आनन्दरूपस्य सतः, तत्प्रतिपत्तिं निर्विचिकित्सां भावयन्तो वेदान्ताः समूलघातमध्यासमुपन्नन्ति । एतदुक्तं भवति— अस्मत्प्रत्ययस्यात्मविषयस्य समीचीनत्वे सति ब्रह्मणो ज्ञातत्वान्निष्प्रयोजनत्वाच्च न जिज्ञासा स्यात् । तदभावे च न ब्रह्मज्ञानाय वेदान्ताः पठ्येरन्, अपि तु अविवक्षितार्था जपमात्रे उपयुज्येरन् । न हि तदौपनिषदात्मप्रत्ययः प्रमाणतामश्नुते । न चासावप्रमाणमभ्यस्तोऽपि वास्तवं कर्तृत्वभोक्तृत्वाद्यात्मनोऽपनेतुमर्हति । आरोपितं हि रूपं तत्त्वज्ञानेनापोद्यते, न तु वास्तवमतत्त्वज्ञानेन । न हि रज्ज्वा रज्जुत्वं सहस्रमपि सर्पधाराप्रत्यया अपवदितुमुत्सहन्ते । मिथ्याज्ञानप्रसञ्जितं तु रूपं शक्यं तत्त्वज्ञानेनापवादितुम् । मिथ्याज्ञानसंस्कारश्च सुदृढोऽपि तत्त्वज्ञानसंस्कारेणादरनैरन्तर्यदीर्घकालासेवितत्त्वज्ञानाभ्यासजन्मनेति । स्यादेतत् । प्राणाद्युपासना अपि वेदान्तेषु बहुलमुपलभ्यन्ते, तत्कथं सर्वेषां वेदान्तानामात्मैकत्वप्रतिपादनमर्थ इत्यत आह— **यथा चायमर्थः इत्यादि** । शरीरमेव शरी-

---

कल्पतरुः ।

इति भ्रममपनयति— तदनेनेति । प्रकृतमिति । उपोद्घातरूपेणाध्यासं वर्णयतो भाष्यकारस्य प्रथमं बुद्धिस्थत्वेन प्रकृतं विषयप्रयोजनमित्यर्थः । एवमध्यासे समर्थिते सति प्रसिद्धत्वादजिज्ञास्यत्वमाक्षेपावसरोक्तं निरस्तमित्याह— **एतदुक्तमिति** । पठ्येरन्निति भाष्यगतारभ्यन्त इति पदस्य व्याख्या । अतत्परवेदान्तप्रत्ययो यद्यप्यप्रमा तथाप्यभ्यस्तो वास्तवकर्तृत्वादिनिवर्तक इत्याशङ्क्याह— **न चासाविति** ॥

रकमीमांसायां प्रदर्शयिष्यामः ॥

भामती ।

रकम्, तत्र निवासी शारीरको जीवात्मा, तस्य त्वंपदाभिधेयस्य तत्पदाभिधेय-परमात्मरूपतया या मीमांसा सा तथोक्ता ॥

एतावानत्रार्थसंक्षेपः— यद्यपि स्वाध्यायाध्ययनविधिना स्वाध्याय-पदवाच्यस्य वेदराशेः फलवदर्थावबोधपरतामापादयता कर्मविधिनिषेधानामिव वेदान्तानामपि स्वाध्यायशब्दवाच्यानां फलवदर्थावबोधपरत्वमापादितम्, यद्यपि च 'अविशिष्टस्तु वाक्यार्थः' इति न्यायात् मन्त्राणामिव वेदान्तानामर्थपरत्वमौत्सर्गिकम्, यद्यपि च वेदान्तेभ्यश्चैतन्यानन्दघनः कर्तृत्व-भोक्तृत्वरहितो निष्प्रपञ्च एकः प्रत्यगात्मा अवगम्यते, तथापि कर्तृत्वभोक्तृत्व-दुःखशोकमोहमयमात्मानमवगाहमानेनाहंप्रत्ययेन संदेहबाधविरहिणा विरुध्य-माना वेदान्ताः स्वार्थात्प्रच्युता उपचरितार्था वा जपमात्रोपयोगिनो वा इत्य-विवक्षितस्वार्थाः । तथा च तदर्थविचारात्मिका चतुर्लक्षणी शारीरकमीमांसा नारब्धव्या । न च सर्वजनीनाहमनुभवसिद्ध आत्मा संदिग्धो वा सप्रयोजनो

कल्पतरुः ।

अधिकरणमारचयति– एतावानिति । वेदान्तशास्त्रमनारभ्यमारभ्यं वेति विषयप्रयोजनासंभवसंभवाभ्यां संशयः । वेदान्तैरध्ययनविधिना सामान्यतः प्रयोजनवदर्थावबोधपरतां नीतैर्विशेषतश्च संदिह्यमानार्थतया विचाराकाङ्क्षैराक्षेपादस्याधिकरणस्य श्रुतिसंगतिः । समन्वयाद्यशेषविचारहेतुत्वाच्छास्त्रप्रथमाध्यायप्रथमपादसंगतयः । आशङ्कापनयनपूर्वकं पूर्वपक्षमाह—यद्यपीत्यादिना । अविवक्षितार्थत्वं वेदान्तानां शङ्कितुमशक्यम्, अध्ययनविधेर्दृष्टार्थत्वस्य तुल्यत्वात् । न च कार्यपरत्वात्सर्ववेदस्य सिद्धरूपे ब्रह्मणि वेदान्तानामप्रामाण्यशङ्का लोकवेदयोर्वाक्यार्थस्याविशेषेण सिद्धरूपेऽपि ब्रह्मणि वेदान्तानां मन्त्राणामिव देवतादौ प्रामाण्यसंभवात् । नाप्यनुत्पत्तिलक्षणमप्रामाण्यं शङ्क्यम्, ब्रह्मात्मैक्यबोधित्वाद्वेदान्तानाम् । अतो नानारभ्यं शास्त्रमित्यर्थः । परिहरति— तथापीति । प्रमाणस्वरूपपर्यालोचनेन मीमांसानारम्भमुक्त्वा प्रमेयस्वरूपालोचनयापि तमाह— न चेति ॥

परिमलः ।

वादिति चेत्; न, तदुपचाराधीनपोषादिभाक्त्वरूपस्य तथाभूतस्य स्वामित्वस्य देहेऽपि संभवात् । प्रमेयस्वरूपालोचनयापि तमाहेति । न चाहंप्रत्ययसिद्धेन कर्तृत्वभोक्तृ-

वेदान्तमीमांसाशास्त्रस्य व्याचिख्यासितस्येदमादिमं सूत्रम्—

अथातो ब्रह्मजिज्ञासा ॥ १ ॥

भामती।

वा, येन जिज्ञास्यः सन् विचारं प्रयुञ्जीतेति पूर्वः पक्षः। सिद्धान्तस्तु—भवेदेतदेवं यद्यहंप्रत्ययः प्रमाणम्। तस्य तु उक्तेन क्रमेण श्रुत्यादिबाधकत्वानुपपत्तेः, श्रुत्यादिभिश्च समस्ततीर्थकरैश्च प्रामाण्यानभ्युपगमादध्यासत्वम्। एवं च वेदान्ता नाविवक्षितार्थाः, नापि उपचरितार्थाः, किं तु उक्तलक्षणाः। प्रत्यगात्मैव तेषां मुख्योऽर्थः। तस्य च वक्ष्यमाणेन क्रमेण संदिग्धत्वात् प्रयोजनत्वाच्च युक्ता जिज्ञासा, इत्याशयवान् सूत्रकारः तज्जिज्ञासासूत्रयत्—**अथातो ब्रह्मजिज्ञासेति ॥**

जिज्ञासया च संदेहप्रयोजने सूचयति। तत्र साक्षादिच्छाव्याप्यत्वाद्ब्रह्मज्ञानं कण्ठोक्तं प्रयोजनम्। न च कर्मज्ञानात्पराचीनमनुष्ठानमिव ब्रह्मज्ञानात्पराचीनं किंचिदस्ति, येनैतदवान्तरप्रयोजनं भवेत्। किं तु ब्रह्ममीमांसाख्यतर्केति-कर्तव्यतानुज्ञातविषयैर्वेदान्तैराहितं निर्विचिकित्सं ब्रह्मज्ञानमेव समस्तदुःखोपशमरूपमानन्दैकरसं परमं प्रयोजनम्। तमर्थमधिकृत्य हि प्रेक्षावन्तः प्रव-

कल्पतरुः।

वक्ष्यमाणेनेति। तत्पुनर्ब्रह्मेत्यादावित्यर्थः ॥

वृत्तिव्यक्तस्वरूपज्ञानमभिप्रेत्याह— तत्र साक्षादिति। इष्यमाणत्वेन ज्ञानस्य

परिमलः।

त्वादिना निश्चितस्यापि भोक्तृरूपस्य नित्यत्वविभुत्वादिना संदिग्धतया विषयत्वं स्यादिति वाच्यम्, सिद्धान्ते तन्निर्णयस्य मोक्षफलत्वानङ्गीकारादिति भावः ॥

ननु— सूत्रे जिज्ञासापदप्रकृतिप्रतिपाद्यं किमखण्डानन्दरूपब्रह्मस्वरूपज्ञानम्, किं वा विचारसाध्यं ब्रह्मनिर्णयरूपं वृत्तिज्ञानम्? नाद्यः, संशयानाक्षेपेण विषयसूचनालाभप्रसङ्गात्; न हि बहुशो दृष्टेऽपि पुनःपुनरुदित्वरी विषयसौन्दर्यप्रयुक्ता जिज्ञासा संशयमूला। न द्वितीयः, प्रयोजनसूचनालाभप्रसङ्गात्— इत्याशङ्क्य उभयमपि विवक्षितं सौत्रपदानामनेकार्थत्वस्यालंकारत्वात् इत्याह— **वृत्तिव्यक्तेति**। वृत्तिश्च

तत्र अथशब्दः आनन्तर्यार्थः परिगृह्यते; नाधिकारार्थः, ब्रह्म-

भामती ।

र्तन्तेतराम् । तच्च प्राप्तमप्यनाद्यविद्यावशादप्राप्तमिवेति प्रेप्सितं भवति । यथा स्वग्रीवागतमपि ग्रैवेयकं कुतश्चिद्भ्रमान्नास्तीति मन्यमानः परेण प्रतिपादितमप्राप्तमिव प्राप्नोति । जिज्ञासा तु संशयस्य कार्यमिति स्वकारणं संशयं सूचयति । संशयश्च मीमांसारम्भं प्रयोजयति । तथा च शास्त्रे प्रेक्षावत्प्रवृत्तिहेतुसंशयप्रयोजनसूचनात् युक्तमस्य सूत्रस्य शास्त्रादित्वम् इत्याह भगवान्भाष्यकारः— **वेदान्तमीमांसाशास्त्रस्य व्याचिख्यासितस्य** अस्माभिः **इदमादिमं सूत्रम्** । पूजितविचारवचनो मीमांसाशब्दः । परमपुरुषार्थहेतुभूतसूक्ष्मतमार्थनिर्णयफलतया च विचारस्य पूजितता । तस्या मीमांसायाः शास्त्रम्, सा ह्यनेन शिष्यते शिष्येभ्यो यथावत्प्रतिपाद्यत इति । सूत्रं च बह्वर्थसूचनात् भवति । यथाहुः— 'लघूनि सूचितार्थानि स्वल्पाक्षरपदानि च । सर्वतः सारभूतानि सूत्राण्यहुर्मनीषिणः' इति । तदेवं सूत्रतात्पर्यं व्याख्याय तस्य प्रथमपदम् अथेति व्याचष्टे— **तत्राथशब्द आनन्तर्यार्थः परिगृह्यते** । तेषु सूत्रपदेषु मध्ये योऽयमथशब्दः स आनन्तर्यार्थ इति योजना । ननु अधिकारार्थो-

कल्पतरुः ।

प्रयोजनसूचनमुपपाद्य संशयसूचनमुपपादयति— **जिज्ञासा त्विति । सा हीति ।** सा न्यायात्मिका मीमांसा अनेन ग्रन्थेन शिष्यत इत्यर्थः । विषयप्रयोजनब्रह्मस्वरूपप्रमाणयुक्तिसाधनफलविचाराणां च प्रतिज्ञानाद्बह्वर्थसूचनता । लघूनि असंदिग्धार्थानि । संशायकं हि नानार्थस्फोरकत्वेन गुरु । सूचितार्थत्वे हि मुख्यार्थस्याप्यवश्यंभावित्वाद्बह्वर्थत्वसिद्धिः । बहूनामप्रकृतत्वात् तत्रेति निर्धारणायोगमाशङ्क्याह— **तेष्विति** । 'अथैष ज्योतिः' इत्यत्र अपूर्वसंज्ञायोगिविधास्यमानकर्मप्रारम्भार्थोऽथशब्दः । अधिकरणं तु गुणोपसंहारेऽनुक्रमिष्यते । प्रधानस्य जिज्ञासायाः शास्त्रेणाप्रतिपाद्यमानत्वात्तत्प्रतिपादनप्रारम्भार्थो मा भूत् ब्रह्मतज्ज्ञानप्रारम्भार्थो भवत्वित्या-

परिमलः ।

व्यक्तस्वरूपज्ञानं चेति द्वन्द्वैकवद्भावः । स्वरूपज्ञानविवक्षायां ब्रह्मणो यत् ज्ञानं तदिच्छेत्यर्थकथने 'राहोः शिरः' इतिवदुपचारो द्रष्टव्यः । **ब्रह्मतज्ज्ञानप्रारम्भार्थ इति** । ब्रह्म तावत् स्वरूपतो जन्मादिसूत्रेण प्रयोजनरूपतया फलाध्यायेन च प्रतिपाद्यते;

भामती ।

ऽप्यथशब्दो दृश्यते, यथा 'अथैष ज्योतिः' इति वेदे, यथा वा लोके 'अथ शब्दानुशासनम्' इति 'अथ योगानुशासनम्' इति च; तत्किमत्राधिकारार्थो न गृह्यत इत्यत आह— **नाधिकारार्थः** । कुतः ? **ब्रह्मजिज्ञासाया अनधिकार्यत्वात्** । जिज्ञासा तावदिह सूत्रे ब्रह्मणश्च तज्ज्ञानाच्च शब्दतः प्रधानं प्रतीयते । न च यथा 'दण्डी प्रैषानन्वाह' इत्यत्र अप्रधानमपि दण्डशब्दार्थो विवक्ष्यते एवमिहापि ब्रह्मतज्ज्ञाने इति युक्तम्, ब्रह्ममीमांसाशास्त्रप्रवृत्त्यङ्गसंशयप्रयोजनसूचनार्थत्वेन जिज्ञासाया एव विवक्षितत्वात् । तदविवक्षायां तदसूचनेन

कल्पतरुः ।

शङ्क्याह— **न चेति** । 'दण्डी प्रैषान्–' इत्यत्र हि 'मैत्रावरुणः प्रेष्यति चान्वाह' इति मैत्रावरुणस्य प्रैषानुवचने प्राप्तत्वादविवक्षा, इह तु जिज्ञासाया नाविवक्षाकारणम्; प्रत्युत तदविवक्षायां विषयप्रयोजनसूचनं न स्यादित्यर्थः । ननु किं

परिमलः ।

तद्विषये प्रमाणयुक्ती ब्रह्मतज्ज्ञानेत्यत्र करणव्युत्पत्तिमता ज्ञानपदेन संगृहीते समन्वयाविरोधलक्षणाभ्यां प्रतिपाद्येते ; मुक्तिसाधनब्रह्मज्ञानं भावव्युत्पत्तिमता तेनैव ज्ञानपदेन संगृहीतं सपरिकरं साधनाध्यायेन प्रतिपाद्यते । तस्मादिह अथशब्दस्य ब्रह्मतज्ज्ञानप्रतिपादनप्रारम्भार्थत्वं वक्तुं शक्यमिति शङ्कार्थः ॥

दण्डी प्रैषानिति । इष्टिषु प्रैषस्याध्वर्युः कर्ता अनुवचनस्य होता, तद्विकृतौ पशावुभयोरपि मैत्रावरुणः कर्ता विधीयते— 'मैत्रावरुणः प्रेष्यति चान्वाह च' इति ; तेन प्राप्तत्वात् दण्डिवाक्ये मैत्रावरुणकर्तृके प्रैषानुवचने विध्यन्वयित्वेन न विवक्षा, किं तु प्रैषानुवचनाङ्गे दण्डग्रहण इत्यर्थः । यद्यपि 'क्रीते सोमे मैत्रावरुणाय दण्डं प्रयच्छति' इति विहितस्य दण्डदानस्य मैत्रावरुणकार्यार्थत्वावगमात् तेन स्थित्वोच्चैः कर्तव्ये प्रैषानुवचने बलार्थमवष्टम्भतया दण्डग्रहणस्य सामर्थ्यादपि प्राप्तिर्भवेत्, तथापि सामर्थ्याद्भवन्ती प्राप्तिस्तेन कर्तव्ये रात्रिसंचारादावपि भवेत्, सा मा भूदिति कार्यान्तरपरिसंख्याफलकः प्रैषानुवचनरूपे कार्ये तस्य दण्डविधिरिति दण्ड एव विध्यन्वयित्वेन विवक्षित इति भावः ॥

प्रत्युत तदविवक्षायामिति । ननु– विध्यन्वयित्वेनाविवक्षितमपि प्रैषानुवचनमनुवाद्यतया यथा विधेयदण्डान्वयि एवमिच्छापि प्रारभ्यमाणब्रह्मज्ञानान्वयिनी सती ब्रह्मज्ञानस्य प्रयोजनत्वं ब्रह्मणः संदिग्धत्वं च गमयेत् ; इच्छेष्यमाणसमभिव्याहारे चेष्य-

भामती ।

काकदन्तपरीक्षायामिव न ब्रह्ममीमांसायां प्रेक्षावन्तः प्रवर्तेरन् । न हि तदानीं ब्रह्म तज्ज्ञानं च अभिधेयप्रयोजने भवितुमर्हतः, अनध्यस्ताहं-प्रत्ययविरोधेन वेदान्तानामेवंविधेऽर्थे प्रामाण्यानुपपत्तेः, कर्मप्रवृत्त्युपयोगितया उपचरितार्थानां वा जपोपयोगिनां वा 'हुम्' इत्येवमादीनामिवाविवक्षितार्थानामपि स्वाध्यायाध्ययनविध्यधीनग्रहणत्वस्य संभवात् । तस्मात्संदेहप्रयोजनसूचनी जिज्ञासा इह पदतो वाक्यतश्च प्रधानं विवक्षितव्या । न च तस्या अधिकार्यत्वम्, अप्रस्तूयमानत्वात्, येन तत्समभिव्याहृतोऽथशब्दोऽधिकारार्थः स्यात् । जिज्ञासाविशेषणं तु ब्रह्मज्ञानमधिकार्यं भवेत् । न च तदप्यथशब्देन संबध्यते, प्राधान्याभावात् । न च जिज्ञासा मीमांसा येन योगानुशासनवदधिक्रियेत, नान्तत्वं निपात्य 'माङ् माने' इत्यस्माद्वा 'मान पूजायाम्' इत्यस्माद्वा धातोः 'मान्बध—' इत्यादिना अनिच्छार्थे सनि

कल्पतरुः ।

संशयसूचनेन, निर्दिष्टे ब्रह्मतज्ज्ञाने एव विषयप्रयोजने सिध्यतः, तत्राह— न हीति । अप्रस्तूयमानत्वात् प्रत्यधिकरणमप्रतिपाद्यमानत्वात् । 'मान्बधदान्शान्भ्यो दीर्घश्चाभ्यासस्य' इति सूत्रे 'माङ् माने' इत्यस्य ङानुबन्धस्य धातोर्नान्तत्वं निपातितम् । तस्य च पूजितविचारार्थत्वं प्रसिद्धिबलात्, स्वतो नान्तस्य तु तदर्थत्वं स्मृतिसिद्धमिति । 'मान्' इत्यादिधातुभ्यः सन्भवत्यभ्यासस्य च दीर्घ इत्यर्थः । 'धातोः

परिमलः ।

माणप्राधान्यम् 'यजेत स्वर्गकामः' इत्यादौ क्लृप्तम् । अत इहापीच्छाप्राधान्यं विहाय इष्यमाणप्राधान्यमभ्युपगन्तुं युक्तम् । तस्मात्प्रारम्भार्थतायां न कश्चिद्दोषः– इति चेत्, उच्यते— एवं सति वृत्त्यभिव्यक्तनिरतिशयानन्दरूपस्वरूपज्ञानस्येच्छाविषयत्वेनाग्रहणात्परमपुरुषार्थः सूत्रेण साक्षात् दर्शितो न स्यात् 'विविदिषन्ति' इत्यत्रैव मुक्तिसाधनज्ञानस्य गौणपुरुषार्थताज्ञापनार्थेनेच्छासमभिव्याहारेण निर्णिनीषोक्त्यैव संदेहानाक्षेपात् विषयसूचनं च न सिध्येत्; अतः स्वरूपज्ञानप्रेप्साप्रतिपादनेन तस्य परमपुरुषार्थत्वं ब्रह्मविषयनिर्णयेच्छाप्रतिपादनेन ब्रह्मणः प्रागविज्ञाततया संदिग्धत्वेन विषयत्वं च सूचयितुं पूर्वोक्तरीत्या जिज्ञासापदस्य स्वरूपज्ञाननिर्णयज्ञानेच्छाद्वयप्राधान्यमेवाभ्युपेयमिति भावः ॥

स्वतो नान्तस्य त्विति । यद्यपि तस्य पूजितविचारवचनत्वं न व्याकरणस्मृतिसिद्धम् 'मान पूजायाम्' इति धातोः पूजामात्रवाचित्वात्, 'मान विचारे' इति

जिज्ञासाया अनधिकार्यत्वात्; मङ्गलस्य च वाक्यार्थे समन्वयाभावात्; अर्थान्तरप्रयुक्त एव ह्यथशब्दः श्रुत्या मङ्गलप्रयोजनो भवति; पूर्वप्रकृता-

---

भामती।

व्युत्पादितस्य मीमांसापदस्य पूजितविचारवचनत्वात्, ज्ञानेच्छावाचकत्वाज्जिज्ञासापदस्य। प्रवर्तिका हि मीमांसायां जिज्ञासा स्यात्। न च प्रवर्त्यप्रवर्तकयोरैक्यम्, एकत्वे तद्भावानुपपत्तेः। न च स्वार्थपरत्वस्योपपत्तौ सत्याम् अन्यार्थपरत्वकल्पना युक्ता, अतिप्रसङ्गात्। तस्मात्सुष्ठूक्तम् 'जिज्ञासाया अनधिकार्यत्वात्' इति। अथ मङ्गलार्थोऽथशब्दः कस्मान्न भवति? तथा च मङ्गलहेतुत्वात् प्रत्यहं ब्रह्मजिज्ञासा कर्तव्येति सूत्रार्थः संपद्यत इत्यत आह— **मङ्गलस्य च वाक्यार्थे समन्वयाभावात्**। पदार्थ एव हि वाक्यार्थे समन्वीयते, स च वाच्यो वा लक्ष्यो वा। न चेह मङ्गलमथशब्दस्य वाच्यं वा लक्ष्यं वा, किं तु मृदङ्गशङ्खध्वनिवदथशब्दश्रवणमात्रकार्यम्। न च कार्यज्ञाप्ययोर्वाक्यार्थे समन्वयः शब्दव्यवहारे दृष्ट इत्यर्थः। तत्किमिदानीं मङ्गलार्थोऽथशब्दः तेषु तेषु न प्रयोक्तव्यः? तथा च 'ओंकारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा। कण्ठं भित्त्वा विनिर्यातौ तस्मान्माङ्गलिकावुभौ' इति स्मृतिव्याकोप इत्यत आह— **अर्थान्तरप्रयुक्त एव ह्यथशब्दः श्रुत्या मङ्गलप्रयोजनो भवति**। अर्थान्तरेष्वानन्तर्यादिषु प्रयुक्तः अथशब्दः श्रुत्या श्रवणमात्रेण वेणुवीणाध्वनिवन्मङ्गलं कुर्वन् मङ्गलप्रयोजनो भवति अन्यार्थमानीयमानोदकुम्भदर्शनवत्। तेन न स्मृतिव्याकोपः। तेन च इह आनन्तर्यार्थस्य सतः श्रवणमात्रेण मङ्गलार्थतेत्यर्थः। स्यादेतत्। पूर्वप्रकृतापेक्षोऽथशब्दो

कल्पतरुः।

कर्मणः—' इत्युत्तरसूत्रे इच्छार्थे सन्विधानादयमनिच्छार्थ इति गम्यते। लक्षितविचारप्रारम्भार्थोऽथशब्दोऽस्तु, नेत्याह— **न च स्वार्थपरत्वस्येति**। वाच्याया जिज्ञासायाः संशयसूचनेन वाक्यार्थान्वयोपपत्तौ न लक्षणा। अधिगतविषयप्रयोजनस्तु स्वत एव विचारे प्रवर्त्स्यतीत्यर्थः। अथाधिकारार्थे इत्यत्राथशब्दस्यानन्तर्यार्थत्वं

परिमलः।

चुरादिपठितस्य धातोर्विचारमात्रवाचित्वात्, तथापि तयोरन्यतरस्य ग्रहणे धात्वर्थतया विशेषणविशेष्यान्यतरलाभोऽस्तीत्यभिप्रायेणैवमुक्तम्। प्रवर्त्स्यति प्रवर्तिष्यते।

भामती ।

भविष्यति विनैवानन्तर्यार्थत्वम् । तद्यथेममेवाथशब्दं प्रकृत्य विमृश्यते— किमयमथशब्द आनन्तर्ये अथाधिकारे इति । अत्र विमर्शकवाक्येऽथशब्दः पूर्वप्रकृतमथशब्दमपेक्ष्य प्रथमपक्षोपन्यासपूर्वकं पक्षान्तरोपन्यासे । न चास्यानन्तर्यमर्थः, पूर्वप्रकृतस्य प्रथमपक्षोपन्यासेन व्यवायात् । न च प्रकृतानपेक्षा, तदन-

कल्पतरुः ।

वदन्प्रष्टव्यः– किं पूर्वप्रकृतादथशब्दादानन्तर्यम् उत निरन्तरादानन्तर्यपक्षात्? नाद्य इत्याह— पूर्वप्रकृतस्येति । द्वितीये पूर्वप्रकृतमथशब्दमपेक्ष्य किं निरन्तरादानन्तर्यार्थत्वपक्षादानन्तर्यं ब्रूयाद्द्वितीयोऽथशब्दोऽधिकारार्थत्वपक्षस्य, उतानपेक्ष्यैव? नाद्यः, अवश्यापेक्षणीयत्वात्पूर्वप्रकृतापेक्षाया अथशब्दस्य तादर्थ्ये सति अर्थान्तरकल्पनानवकाशात् । न द्वितीय इत्याह— न च प्रकृतानपेक्षेति । एकधर्म्यपेक्षणे हि तन्निरूपकयोः पक्षयोस्तुल्यार्थत्वेन विकल्पः कल्पत इत्यर्थः । नानेन भाष्येण पूर्वप्रकृतापेक्षाया आनन्तर्यरूपत्वमुच्यते आनन्तर्यरूपत्वपक्षे विकल्पाप्रतिभानात्,

परिमलः ।

'बृद्भ्यः स्यसनोः' इति वैकल्पिकं परस्मैपदम् । परस्मैपदे 'न बृद्भ्यश्चतुर्भ्यः' इति प्रतिषेधात् इडागमाभावः । **किं पूर्वप्रकृतादिति** । 'किमयमथशब्द आनन्तर्यार्थे' इति प्रथमविकल्पोपन्यासपरे पूर्ववाक्ये विकल्पधर्मित्वेन प्रकृतादित्यर्थः । **द्वितीये इति** । अथशब्दविशिष्टात्पूर्वोक्तकल्पादानन्तर्यं शुद्धकल्पाद्वेत्यर्थः । पूर्वप्रकृतस्याथशब्दस्यावश्यमपेक्षणे तमेवापेक्ष्याथशब्दस्य तादर्थ्ये कल्पान्तरोपन्यासार्थकत्वे संभवत्यर्थान्तरस्य विशिष्टापेक्षया आनन्तर्यस्य कल्पनानवकाशात् । यद्वा पूर्वप्रकृतस्य प्रथमकल्पस्यापेक्षाया आवश्यिकत्वे द्वितीयाथशब्दस्य तादर्थ्ये तन्मात्रापेक्षया आनन्तर्यार्थकत्वे संभवति अर्थान्तरस्य विशिष्टानन्तर्यस्य कल्पनानवकाशादित्यर्थः ॥

आनन्तर्यरूपत्वपक्षे विकल्पाप्रतिभानादिति । यत्र विकल्पप्रतिभानं तत्रैव पूर्वविकल्पप्रकृततद्धर्म्यपेक्षार्थकः विकल्पान्तरमुखे अथशब्दः प्रसिद्धः नान्यत्रेत्याशयः । ननु 'अथैष ज्योतिः' एतेन सहस्रदक्षिणेन यजेत' इत्यत्र प्रकृतज्योतिष्टोमानुवादेन सहस्रदक्षिणालक्षणगुणविधानं न तु तद्विशिष्टकर्मान्तरविधानमिति पूर्वपक्षोपपादकत्वेन पूर्वप्रकृतापेक्षार्थत्वमथशब्दस्य वार्त्तिककृतोक्तम्, अतो विकल्पाभावेऽपि तादर्थ्यप्रसिद्धिरस्तीति चेत्; न, तत्रानन्तर्यार्थत्वमेव पूर्वपक्षे अभिमतम्; आनन्तर्यमपि हि पूर्वप्रकृतमपेक्ष्य वर्ण्यते; अत एव तृतीयाध्यायटीकायां संज्ञाधिकरणानुक्रमणे

पेक्षायाश्च फलत आनन्तर्याव्यतिरेकात्। सति च आनन्तर्यार्थत्वे, यथा

भामती।

पेक्षस्य तद्विषयत्वाभावेन असमानविषयतया विकल्पानुपपत्तेः। न हि जातु भवति— किं नित्य आत्मा, अथ अनित्या बुद्धिरिति। तस्मादानन्तर्यं विना पूर्वप्रकृतापेक्ष इहाथशब्दः कस्मान्न भवतीत्यत आह— **पूर्वप्रकृतापेक्षायाश्च फलत आनन्तर्याव्यतिरेकात्**। अस्यार्थः— न वयमानन्तर्यार्थतां व्यसनितया रोचयामहे' किं तु ब्रह्मजिज्ञासाहेतुभूतपूर्वप्रकृतसिद्धये। सा च पूर्वप्रकृतार्थापेक्षत्वेऽप्यथशब्दस्य सिध्यतीति व्यर्थ आनन्तर्यार्थत्वावधारणाग्रहोऽस्माकमिति। तदिदमुक्तम् 'फलतः' इति। परमार्थतस्तु कल्पान्तरोपन्यासे पूर्वप्रकृतापेक्षा; न चेह कल्पान्तरोपन्यास इति पारिशेष्यादानन्तर्यार्थ एवेति युक्तम्। भवत्वानन्तर्यार्थः, किमेवं सतीत्यत आह— **सति चानन्तर्यार्थत्व इति**। न तावद्यस्य कस्यचिदत्रानन्तर्यमिति वक्तव्यम्, तस्याभिधानमन्तरेणापि प्राप्तत्वात्। अवश्यं हि पुरुषः किंचित्कृत्वा किंचित्करोति। न चानन्तर्यमात्रस्य दृष्टमदृष्टं वा प्रयोजनं पश्यामः। तस्मात्तस्यात्रानन्तर्यं वक्तव्यं यद्विना ब्रह्मजिज्ञासा न भवति, यस्मिन्सति तु भवन्ती भवत्येव, तदिदमुक्तम्—

कल्पतरुः।

किं तूभयत्रापि ब्रह्मजिज्ञासाहेतुभूतपूर्वप्रकृतसिद्धिरस्ति प्रयोजनम्, अतः फलद्वारेणाव्यतिरेक उच्यत इत्याह— **अस्यार्थ इति**। ननु उभयथा फलाभेदे किमित्यानन्तर्याग्रहः? तत्राह— **परमार्थतस्त्विति**। अन्यदप्यदृष्टादिकमपेक्ष्य भवन्ती जिज्ञासा यस्मिन्सति भवत्येवेत्यर्थः। स्वाध्यायाध्ययनानन्तरं ब्रह्मजिज्ञासाया भवितुं यो-

परिमलः।

अथशब्दस्यानन्तर्यार्थस्यासंबन्धे अनुपपत्तेरित्यानन्तर्यार्थमादायैव पूर्वपक्षसमर्थनं कृतम्। आचार्यैश्च तद्व्याख्यानसमये वार्त्तिककारीयपूर्वप्रकृतापेक्षोक्तेरानन्तर्य एव पर्यवसानमुक्तिभङ्ग्या दर्शितम्— आनन्तर्यं हि पूर्वप्रकृतापेक्षम्, गुणविधिपरत्वे चाश्रयदानार्थमस्ति ज्योतिष्टोमापेक्षा न कर्मान्तरत्वे, न हि क्रतुः क्रत्वन्तरमपेक्षत इत्यर्थ इति॥

यस्मिन् सति भवन्ती भवत्येवेति ग्रन्थमध्याहारव्यवहितयोजनाभ्यां व्याचष्टे— **अन्यदपीति**। ब्रह्मजिज्ञासाया अपि योग्यत्वादिति ग्रन्थमपेक्षिताध्याहारेण व्याचष्टे— **स्वाध्यायाध्ययनानन्तरामिति**। इत्थं प्रतीकमनुपादाय व्याख्यानं व्याख्यानेनैव

धर्मजिज्ञासा पूर्ववृत्तं वेदाध्ययनं नियमेनापेक्षते, एवं ब्रह्मजिज्ञासापि यत्पूर्ववृत्तं नियमेनापेक्षते, तद्वक्तव्यम् । स्वाध्यायानन्तर्यं तु समानम् । नन्विह कर्मावबोधानन्तर्यं विशेषः; न, धर्मजिज्ञासायाः

भामती ।

यत्पूर्ववृत्तं नियमेनापेक्षत इति । स्यादेतत् । धर्मजिज्ञासाया इव ब्रह्मजिज्ञासाया अपि योग्यत्वात् स्वाध्यायाध्ययनानन्तर्यम्, धर्मवद्ब्रह्मणोऽप्याम्नायैकप्रमाणगम्यत्वात् । तस्य चागृहीतस्य स्वविषये विज्ञानाजननात्, ग्रहणस्य च 'स्वाध्यायोऽध्येतव्यः' इत्यध्ययनेनैव नियतत्वात् । तस्माद्वेदाध्ययनानन्तर्यमेव ब्रह्मजिज्ञासाया अप्यथशब्दार्थ इत्यत आह– **स्वाध्यायानन्तर्यं तु समानं** धर्मब्रह्मजिज्ञासयोः । अत्र च स्वाध्यायेन विषयेण तद्विषयमध्ययनं लक्षयति । तथा च 'अथातो धर्मजिज्ञासा' इत्यनेनैव गतामिति नेदं सूत्रमारब्धव्यम् । धर्मशब्दस्य वेदार्थमात्रोपलक्षणतया धर्मवद्ब्रह्मणोऽपि वेदार्थत्वाविशेषेण वेदाध्ययनानन्तर्योपदेशसाम्यादित्यर्थः । चोदयति— **नन्विह कर्मावबोधानन्तर्यं विशेषः** धर्मजिज्ञासातो ब्रह्मजिज्ञासायाः । अस्यार्थः– 'विविदिषन्ति यज्ञेन–' इति तृतीयाश्रुत्या यज्ञादीनामङ्गत्वेन ब्रह्मज्ञाने विनियोगात्, ज्ञानस्यैव कर्मतया इच्छां

कल्पतरुः ।

ग्यत्वात्तदानन्तर्यमथशब्देन वक्तुं युक्तमित्यर्थः । योग्यत्वे कारणमाह— **ब्रह्मणोऽपीति** । **अत्र चेति** । स्वाध्यायस्य नित्यत्वात्तदानन्तर्यमयुक्तमिति तद्विषयमध्ययनं लक्षयतीत्यर्थः । ननु धर्मजिज्ञासासूत्रे ब्रह्मानुपादानात्कथं तेन गतार्थता ? तत्राह— **धर्मशब्दस्येति** । नन्विच्छायां विनियोगो न ज्ञाने इति, तत्राह— **ज्ञानस्यैवेति** ।

परिमलः ।

व्याख्येयमूलांशो ज्ञातुं शक्य इति ग्रन्थलाघवार्थम् । एवमुत्तरत्रापि तत्र तत्र द्रष्टव्यं ॥

नन्विति । धर्मजिज्ञासासूत्रे ब्रह्म विचार्यत्वेन नोपात्तं किं तु धर्ममात्रम्, अतस्तत्रत्याथशब्दस्य धर्मपरवेदाध्ययनानन्तर्यमर्थः; इह तु ब्रह्मविचारे वेदान्ताध्ययनमपेक्षितमिति तत्साधारणाध्ययनानन्तर्यं ब्रह्मविचारस्य प्रतिपादयितुमिदं सूत्रारब्धव्यमिति शङ्कार्थः ॥

परिमलः।

ननु– धर्मशब्दस्य वेदार्थमात्रोपलक्षणत्वमङ्गीकृत्य तेन तत्रत्याथशब्दस्य सकलवेदाध्ययनानन्तर्यमर्थमुपपाद्य अस्याथशब्दस्य तेन गतार्थत्वपरिहारार्थमर्थान्तरं वर्णनीयमित्युपपादनमयुक्तम्; तथा सति हि सकलवेदार्थविचारप्रतिज्ञानं तत्रैव कृतमिति स्यात्; एवं च कृत्स्नमेवेदं शास्त्रं गतार्थत्वेनानारभ्यं भवेदिति कुतोऽस्याथशब्दस्यार्थान्तरवर्णनप्रत्याशा? न हि कृत्स्नवेदार्थविचारं प्रतिज्ञाय तदेकदेशविचारस्त्यक्तो बुद्धिपूर्वकमिति वक्तुं शक्यम्; न वा धर्मविचारार्थं द्वादशलक्षणीं कृत्वा तत्रासूत्रितान् कांश्चिन्न्यायानालक्ष्य तत्संग्रहार्थं द्वादशलक्षणीशेषं संकर्षकाण्डमपि कृतवतो महर्षिवरस्य भगवतो जैमिनेर्ब्रह्मपरवेदभागविचारे विस्मरणं विघ्नजातं वोत्प्रेक्षितुं शक्यम्–इति चेत्; उच्यते—धर्मजिज्ञासासूत्रस्य सकलवेदार्थविचारप्रतिज्ञापरत्वमात्रेण अस्य शास्त्रस्य गतार्थत्वं नापद्यते, इह व्युत्पादयिष्यमाणानां सिद्धब्रह्मपरवाक्यार्थनिर्णायकन्यायानां पूर्वतन्त्रव्युत्पादितेभ्यः कर्मपरवाक्यार्थनिर्णायकन्यायेभ्यो विलक्षणत्वात्। किं तु शास्त्रारम्भप्रतिज्ञैक्येन वक्तृभेदेऽप्येकप्रबन्धतामात्रं तदानीमापद्यते समयबन्धपूर्वकानेककविकर्तृकैककाव्यवत्; तदपि सिद्धान्ते प्रौढ्याभ्युपगम्य मतान्तरमिष्यत एव; तदाश्रित्य हि भाष्यटीकयोः 'एक आत्मनः शरीरे भावात्' इत्यधिकरणे देहातिरिक्तात्मास्तित्वस्य शास्त्रस्य प्रथमपादान्ते व्यवस्थापनादत्र तद्व्यवस्थापनं पुनरुक्तमिति शङ्कोद्घाटनं भाष्यकृता शबरस्वामिना तत्र तत्कृतं न तत्सूत्रारूढमिति समाधानं च करिष्यते॥

ननु–प्रौढ्यापि कथमैकशास्त्र्यमभ्युपगतम्, विरुद्धयोरेकप्रबन्धत्वायोगात्? अस्ति हि जैमिनिबादरायणमतयोर्विरोधः। बादरायणेन हि 'शेषत्वात् पुरुषार्थवादो यथान्येष्विति जैमिनिः' इति 'परामर्शं जैमिनिः—' इति च सूत्रे ब्रह्मसंन्यासापलपनं जैमिन्यभिमतमनूद्य दूषितम्। न च जैमिनेरन्वारुह्यवादमात्रमनूद्य दूषितं न तु तन्मतम् 'परं जैमिनिर्मुख्यत्वात्' 'तद्भूतस्य तु नातद्भावो जैमिनेरपि—' इत्यादिसूत्रैः जैमिनेर्ब्रह्मसंन्यासाभ्युपगमस्य बादरायणेनैव प्रतिपादितत्वादिति वाच्यम्, तस्य 'विप्रतिषेधाच्चासमञ्जसम्' इति सांख्याधिकरणोक्तन्यायेन जैमिनिमतस्य परस्परविरुद्धतया अनुपादेयत्वसूचनार्थत्वोपपत्तेः। किं च देवताधिकरणे जैमिन्यभिमतं बहुशो देवताप्रत्याख्यानमनूद्य दूषितम्; 'आम्नायस्य क्रियार्थत्वात्—' इत्यादिसूत्रेण वेदस्य क्रियार्थत्वेनैव प्रामाण्यं वक्तव्यमित्यविशेषेणाक्रियार्थानामप्रामाण्यमाशङ्क्य 'विधिना त्वेकवाक्यत्वात्' इति सूत्रेण केवलसिद्धार्थविषयत्वेन भासमानानां वाक्यानां विध्येकवाक्यतया क्रियार्थतामुपपाद्य जैमिनिना यत्प्रामाण्यसमर्थनं कृतं तदपि बादरायणेन समन्वयसूत्रे ब्रह्मविषयाणां वाक्यानामनपेक्ष्य विधिशेषतामक्रियार्थानामेव सतां प्रामाण्यसमर्थनेन प्रत्याख्यातम्।

परिमलः ।

एवं विरुद्धयोरेकप्रबन्धत्वं प्रौढ्यापि कथमभ्युपगतम्– इति चेत्; उच्यते— ब्रह्मसंन्यासदेवतापलापविषये विरोधस्तावत् नैकप्रबन्धत्वापवादकः, तस्य द्वादशलक्षण्यामसूत्रितत्वेन परस्परविरुद्धमताभिमान्यनेककविकृतरामायणादिवदेकप्रबन्धतोपपत्तेः । किं च जैमिनिना तिर्यगधिकरणे ' न देवता देवतान्तराभावात् ' इति सूत्रेण देवताः कर्मसु नाधिक्रियन्ते, इन्द्रादीनां हविस्त्यागोद्देश्यस्येन्द्रान्तरादेरभावात्, स्वात्मने संकल्प्यमानस्य द्रव्यस्य स्वत्वत्यागासंभवेन यागाद्यनिर्वृत्तेः इत्येवमुपपादयता जैमिनिना देवताभ्युपगम एव स्पष्टीकृतः । देवतानां युगपदनेकयागदेशसंनिधानमप्याधानपवमानेष्टिजन्यसंस्कारनिचयम् आहवनीयादिशब्दार्थमभ्युपगच्छतः तस्य संप्रतिपन्नमेव, आहवनीयाद्यभिमानिदेवतां विना निरुक्तसंस्काराधारस्य वक्तुमशक्यत्वात् । न हि प्रत्यक्षाग्निस्तदाधारः, आधानकाले निहितस्याहवनीयादेः पावमानेष्ट्यनन्तरं त्यागेन तद्गतस्य तत्संस्कारस्य तन्नाशतो नाशादाहवनीयाद्यननुवृत्तिप्रसङ्गात्, अजस्रपक्षेऽप्यनुगतस्य मथनादिना पुनरुत्पादने तदनुवृत्त्यभावप्रसङ्गात् । न च प्रणयनमथनादिजन्यसंस्कारोऽप्याहवनीयादिशब्दस्यार्थः, अनेकार्थत्वप्रसङ्गात्, पशावौत्तरवेदिकप्रणयनानन्तरमाहवनीयस्य गार्हपत्यताप्राप्त्या प्रणयनस्याहवनीयशब्दप्रवृत्तिनिमित्तत्वायोगाच्च । तस्मादाहवनीयाद्यभिमानिदेवता एव तत्तदायतनविशेषनिहितेषु संभारेषु मथिताग्निनिधानरूपेणाधानेन संस्क्रियन्ते, ताश्च संस्कृता देवता अजस्रपक्षे यजमानशरीरे अग्निदानपर्यन्तं मध्येऽग्निसंस्कारविच्छेदनिमित्तोपजनने तत्पर्यन्तं च तेष्वग्निषु संनिदधते । अग्नीनामजस्रधारणाभावे तत्तत्कर्मावसानेष्वाहवनीयादिदेवता गार्हपत्यमनुप्रविशन्ति। पशावौत्तरवेदिकप्रणयने क्रियमाणे तम् आहवनीयोऽनुप्रविशति तेन प्रागधिष्ठितमग्निं गार्हपत्य इत्येवमादिकमभ्युपगन्तुं युक्तम् । एवं सत्येव 'नान्तराग्निं संचरति यदि पूर्वोऽनुगतः संचर्ये पश्चाद्धि स तर्हि गतः' इति 'गार्हपत्याज्ज्वलन्तमाहवनीयमुद्धरति' इति च कल्पसूत्रकारवचनं सामञ्जस्यमश्नुते । न हि संस्कारमात्रस्य पश्चाद्गमनं संभवति; नाप्याहवनीयस्य गार्हपत्यानुप्रवेशाभावे गार्हपत्यात् तत्रासत आहवनीयस्योद्धरणं संभवति । न च तथा सति अग्निद्वयसंसर्गनिमित्तकप्रायश्चित्तप्रसङ्गः, तस्य प्रत्यक्षाग्निसंसर्गनिमित्तकत्वात् । न च देवतानामाहवनीयादिशब्दार्थतायाम् ' आहवनीये जुहोति' 'गार्हपत्ये हवींषि श्रपयति' इत्यादिवाक्यश्रुतं हविःप्रक्षेपश्रपणाद्याधारत्वमपि तासां भवेदित्ययं दोषः, इष्टापत्तेः, ' अभून्नो दूतो हविषो जातवेदा अवाड्ढव्याति सुरभीणि कृत्वा ' इति मन्त्रवर्णतः पाकेन हविषां सुरभीकरणस्योद्देश्यदेवतार्थं नयनस्य चैककर्तृकत्वावगतेश्च । तत्राभिमान्यभिमानविषयाणामभेदाध्यवसायेन समानकर्तृकत्वव्यपदेश इति चेत्, इहापि तर्ह्यभेदाध्यवसाय एव गतिरस्तु । एवमग्निसंस्कारधारदेवतानामिव

परिमलः।

हविरुद्देश्यदेवतानामपि बहुषु यागदेशेषु संनिधानम् आवाहनादिमन्त्रार्थवादावगतं जैमिनिनाप्युक्तप्रायमेव, मानान्तरप्राप्तिबाधाभावे मन्त्रार्थवादादिप्रतिपन्नस्य देवतादेस्तेनाप्यभ्युपगतत्वात्। न च तथापि देवतानां कर्मसु गुणत्वप्राधान्याभ्यां विरोधः, बादरायणमतेऽपि फलकरणत्वेन प्रधानतया शब्दबोधितं यागादिकं प्रति उद्देश्यतया तच्छरीरनिर्वर्तकत्वेन देवतानां संनिपत्याङ्गत्वरूपतद्गुणत्वसत्त्वात्। सिद्धार्थविषयवाक्यानां विधिशेषत्वं तु जैमिनिनोक्तं विधिसमभिव्याहृतवायुक्षेपिष्ठादिवाक्यमात्रविषयम्। तथा हि— धर्मजिज्ञासासूत्रे ब्रह्ममीमांसासाधारणी वेदार्थविचारप्रतिज्ञा धर्ममीमांसामात्रासाधारणी धर्मविचारप्रतिज्ञा चेति द्विविधा प्रतिज्ञा विवक्षिता, सूत्राणामावृत्त्या अनेकार्थप्रतिपादकत्वस्यालंकारत्वात्। अत एव 'अथातः शेषलक्षणम्' इति तृतीयाध्यायाद्यसूत्रं वार्त्तिककृता 'द्विलक्षण्याः परं शिष्टं यावत्किंचन लक्षणम्। तत्सर्वं वक्तुमारब्धमथातः शेषलक्षणम्' इत्यवशिष्टदशाध्यायार्थविचारप्रतिज्ञापरं व्याख्यायानन्तरं तृतीयाध्यायार्थशेषशेषिभावविचारप्रतिज्ञापरत्वेनापि व्याख्यातम्। एवं च यथा 'शेषः परार्थत्वात्' इति तद्द्वितीयसूत्रमारभ्य तृतीयाध्यायसूत्राणि शेषशेषिभावमात्रविषयाणि एवं चोदनासूत्रमारभ्य द्वादशलक्षणीसूत्राणि धर्ममात्रविषयाणि। अत एव चोदनासूत्रे धर्मस्यैव विधिगम्यत्वं लक्षणमुक्तम्। न हि ब्रह्मणो विधिगम्यत्वमस्ति। अतः 'तस्य निमित्तपरीष्टिः' इति सूत्रे धर्मप्रमाणमेव परीक्ष्यत्वेन प्रतिज्ञातमिति तदनुसारेण 'आम्नायस्य क्रियार्थत्वात्-' इति सूत्रं धर्मप्रमाणत्वेनाभिमतस्याम्नायस्य क्रियार्थत्वेनैव तत्र प्रामाण्यं वक्तव्यमित्येतत्परम्। 'विधिना त्वेकवाक्यत्वात्—' इति सूत्रमपि धर्मप्रमाणत्वाभिमतक्रियाविधिसमभिव्याहृतवायुक्षेपिष्ठादिवाक्यमात्रविषयमिति न कश्चिद्विरोधः। न चैवं कर्मब्रह्मविचारशास्त्रयोरैकशास्त्र्याभ्युपगमे ब्रह्मजिज्ञासासूत्रगताथशब्दस्य कर्मविचारानन्तर्यमर्थः स्यादिति वच्यम्, भाष्योक्तरीत्या ब्रह्मविचारे कर्मानुष्ठानस्यापेक्षानियमाभावेन तदप्रसक्तेः। न हि ज्वरादिवाजीकरणान्तचिकित्साप्रतिपादकानां वैद्यकसंहिताग्रन्थानामेकग्रन्थत्वमात्रेण वातचिकित्साप्रकरणं विचिचारयिषता ज्वरचिकित्सामारभ्य विचारणीयम्। तत्तद्विचाराधिकारिवैलक्षण्यमिहापि तुल्यम्। तस्मादनपेक्षितं हि वेदार्थविचारत्वोपाधिकल्प्यमैकशास्त्र्यं नातिविरुद्धमिति प्रौढ्या तदभ्युपगमे न कश्चिद्दोषः। यद्वा धर्मशब्दस्येत्यादिटीकाग्रन्थेन जिज्ञास्यसमर्पणार्थस्य धर्मशब्दस्य वेदार्थमात्रोपलक्षणत्वं नोक्तम्, किं त्वतःशब्दोक्ते वेदस्य विवक्षितार्थत्वरूपे धर्मविचारप्रतिज्ञाहेतौ धर्मरूपस्यैवार्थस्य विवक्षितत्वं न विशेषणं किं तर्हि कृत्स्नस्य वेदार्थस्य, अतो धर्मविचारप्रतिज्ञायां यागादिकार्यसमर्पकोऽपि धर्मशब्दो हेतुशरीरगतमतःशब्दं समभिव्याहार-

भामती ।

प्रति प्राधान्यात्, प्रधानसंबन्धाच्चाप्रधानानां पदार्थान्तराणाम् । तत्रापि च न वाक्यार्थज्ञानोत्पत्तावङ्गभावो यज्ञादीनाम्, वाक्यार्थज्ञानस्य वाक्यादेवोत्पत्तेः । न च वाक्यं सहकारितया कर्माण्यपेक्षत इति युक्तम्, अकृतकर्मणामपि विदितपदपदार्थसंबन्धानां समधिगतशाब्दन्यायतत्त्वानां गुणप्रधानभूतपूर्वापरपदार्थाकाङ्क्षासंनिधियोग्यतानुसंधानवतामप्रत्यूहं वाक्यार्थप्रत्ययोत्पत्तेः । अनुत्पत्तौ वा विधिनिषेधवाक्यार्थप्रत्ययाभावेन तदर्थानुष्ठानपरिवर्जनाभावप्रसङ्गः । तद्बोधतस्तु तदर्थानुष्ठानपरिवर्जने परस्पराश्रयः, तस्मिन्सति तदर्थानुष्ठानपरिवर्जनं ततश्च तद्बोध इति । न च वेदान्तवाक्यानामेव स्वार्थप्रत्यायने कर्मापेक्षा न वाक्यान्तराणामिति सांप्रतम्, विशेषहेतोरभावात् । ननु 'तत्त्वमसि' इति वाक्यात् त्वंपदार्थस्य कर्तृभोक्तृरूपस्य जीवात्मनो

कल्पतरुः ।

अर्थतः प्राधान्याज्ज्ञानस्य तत्रैव विनियोग इत्यर्थः । साक्षात्कारोपयोगं यज्ञादीनामाह— तत्रापीत्यादिना । विशेषहेत्वभावोऽसिद्ध इत्याह— तत्त्वमसीति । यो-

परिमलः ।

वशात्तावन्मात्रपरं न कुर्यात् अपि तु वेदार्थसामान्यपरमेव कुर्यादित्येतावदुक्तम् । तदेतत्प्रथमसूत्रार्थव्याख्यानावसाने टीकावाक्यैराचार्यवाक्यैस्तद्व्याख्यानेन च स्पष्टीभविष्यति । ननु च विवक्षितार्थत्वहेतौ वेदार्थसामान्यस्य प्रवेशोपदर्शनेन कृत्स्नवेदाध्ययनानन्तर्यमथशब्दार्थ इति प्रकृते सिषाधयिषितोऽर्थः कथं सिध्येदिति चेत्; इत्थम्— धर्मशब्दसमभिव्याहारे विद्यमानेऽपि यथा हेतावतःशब्दो वेदार्थमात्रपरोऽङ्गीकृतः विशिष्य धर्मपरवेदभागस्यार्थविवक्षोपन्यासे वेदान्तभागस्यार्थविवक्षा नाङ्गीकृतेति तद्वद्धर्मपरभागोऽप्यविवक्षितार्थोऽस्त्विति शङ्कानिरासोपयोगात् । एवमध्ययनानन्तर्यमपि कृत्स्नवेदाध्ययनानन्तर्यरूपमङ्गीकर्तव्यम् । अध्ययनविधेरेकदेशाध्ययनानुष्ठापनेन पर्यवसानाभावादिति दृष्टान्तमुखेन सिध्येदित्यलं विस्तरेण ॥

अर्थतः प्राधान्यादिति । 'प्रत्ययार्थः प्रधानम्' इति सामान्यन्यायात् 'इच्छेष्यमाणसमभिव्याहृताविष्यमाणं प्रधानम्' इति स्वर्गकामपदादिषु क्लृप्तो विशेषन्यायो बलवानिति भावः । **साक्षात्कारोपयोगमिति ।** ब्रह्मोपासनाकालेऽपि तदङ्गतया कर्माण्यनुष्ठेयानीति समुच्चयवादी तदनुष्ठानापेक्षितकर्मावबोधानन्तर्यमथशब्दार्थमिच्छति; अतस्तस्य तादर्थ्यसिद्ध्यर्थं कर्मणामुपासनाङ्गत्वमुपपादयितुं तेषामुपासनाजन्यसाक्षात्कारोपयोगमाहेत्यर्थः ।

भामती।

नित्यशुद्धबुद्धोदासीनस्वभावेन तत्पदार्थेन परमात्मनैक्यमशक्यं द्रागित्येव प्रतिपत्तुम् आपाततोऽशुद्धसत्त्वैः, योग्यताविरहविनिश्चयात्। यज्ञदानतपोऽनाशकतनूकृतान्तर्मलास्तु विशुद्धसत्त्वाः श्रद्दधाना योग्यतावगमपुरःसरं तादात्म्यमवगमिष्यन्तीति चेत्, तत्किमिदानीं प्रमाणकारणं योग्यतावधारणमप्रमाणात्कर्मणो वक्तुमध्यवसितोऽसि, प्रत्यक्षाद्यतिरिक्तं वा कर्मापि प्रमाणम्। वेदान्ताविरुद्धतन्मूलन्यायबलेन तु योग्यतावधारणे कृतं कर्मभिः। तस्मात् 'तत्त्वमसि' इत्यादेः श्रुतमयेन ज्ञानेन जीवात्मनः परमात्मभावं गृहीत्वा तन्मूलया चोपपत्त्या व्यवस्थाप्य, तदुपासनायां भावनापराभिधानायां दीर्घकालनैरन्तर्यवत्यां ब्रह्मसाक्षात्कारफलायां यज्ञादीनामुपयोगः। यथाहुः— 'स तु दीर्घकालनैरन्तर्यसत्कारासेवितो दृढभूमिः' इति। ब्रह्मचर्यतपःश्रद्धायज्ञादयश्च सत्काराः। अत एव श्रुतिः— 'तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः' इति। विज्ञाय तर्कोपकरणेन शब्देन प्रज्ञां भावनां कुर्वीतेत्यर्थः। अत्र च यज्ञादीनां श्रेयःपरिपन्थिकल्मषनिबर्हणद्वारेणोपयोग इति केचित्। पुरुषसंस्कारद्वारेणेत्यन्ये। यज्ञादिसंस्कृतो हि पुरुषः आदरनैरन्तर्यदीर्घकालैरासेवमानो ब्रह्मभावनामनाद्यविद्यावासनां समूलकाषं कषति, ततोऽस्य प्रत्यगात्मा सुप्रसन्नः केवलो विशदीभवति। अत एव स्मृतिः— 'महायज्ञैश्च यज्ञैश्च ब्राह्मीयं क्रियते तनुः' इति 'यस्यैते ऽष्टाचत्वारिंशत्संस्काराः' इति च। अपरे तु ऋणत्रयापाकरणेन ब्रह्मज्ञानोपयोगं

कल्पतरुः।

ग्यतावधारणे कर्म किमप्रमाणतयोपयुज्यते, उत प्रमाणतया? नाद्यः, अप्रमाणात्प्रमाणकार्योत्पादव्याघातात् इत्याह— तत्किमिति। प्रमाणं कारणं यस्य तत्तथा। न द्वितीयः, कर्मणः प्रमाणत्वप्रसिद्ध्यभावात् इत्याह— प्रत्यक्षादीति। पातञ्जलसूत्रे स इति चित्तवृत्तिनिरोध उक्तः। दृढभूमिः, तत्त्वप्रतिपत्तौ दृढ उपाय

परिमलः।

असिद्ध इत्याहेति। शङ्कावादीति शेषः। प्रमाणत्वप्रसिद्ध्यभावादिति। यद्यपि प्रमाणत्वाभावेऽप्यसंभावनादिमूलकल्मषनिर्हरणद्वारा योग्यतावधारणे तज्जन्यमहावाक्यार्थज्ञाने वा प्रमाणसहकारित्वेन कारणत्वमुपपद्यते, अन्यथा वक्ष्यमाणस्य कर्मणां साक्षात्कारोपयोगस्यापि निर्वोढुमशक्यत्वात्, तथापि 'विविदिषन्ति' इत्यत्र फलरूपवेदनमानन्दसाक्षात्कारतया मुख्यपुरुषार्थरूपमेव ग्राह्यं मुख्यसंभवे गौणग्रहणस्यान्याय्यत्वादिति

भामती ।

कर्मणामाहुः । अस्ति हि स्मृतिः— 'ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेत्' इति। अन्ये तु 'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन—' इत्यादिश्रुतिभ्यः तत्तत्फलाय चोदितानामपि कर्मणां संयोगपृथक्त्वेन ब्रह्मभावनां प्रत्यङ्गभावमाचक्षते, क्रत्वर्थस्येव खादिरत्वस्य वीर्यार्थताम्, 'एकस्य तूभयार्थत्वे संयोगपृथक्त्वम्' इति न्यायात्। अत एव पारमर्षं सूत्रम्— 'सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत्' इति। यज्ञतपोदानादि सर्वं तदपेक्षा ब्रह्मभावनेत्यर्थः।

कल्पतरुः ।

इत्यर्थः। नित्यानामेव संस्कारद्वारा भावनाङ्गत्वमुक्त्वा सर्वकर्मणामुत्पत्तिविधिविहितरूपमुपादाय भावनाङ्गतां विनियोगवचनवशेनाह— अन्ये त्विति। संयोगः शेषत्वबोधनम्। चतुर्थे चिन्तितम्— 'एकस्य तूभयत्वे संयोगपृथक्त्वम्'। 'खादिरे पशुं बध्नाति' इति 'खादिरं वीर्यकामस्य यूपं कुर्वीत' इति च श्रूयते। तत्र संशयः— किं काम्यैव खादिरता नित्येऽपि स्यात् उत नेति। तत्र फलार्थत्वेनानित्याया नित्यप्रयोगाङ्गता न युक्ता। यत्तु नित्येऽपि खादिरत्वश्रवणं तत्काम्यस्यैव पशुबन्धनयुक्तयूपरूपा-

परिमलः ।

तात्पर्यम्। संस्कारद्वारेति। यद्यपि कल्मषनिर्हरणमृणत्रयापाकरणमिति संस्कारपक्षाद्भिन्नमपि पक्षद्वयमुक्तं तथापि तदपि पक्षद्वयं सामान्यतः संस्कारपक्ष एवानुप्रविशति प्रथमाधानवत्कल्मषनिर्हरणादेरपि संस्कारत्वाविशेषादिति तात्पर्यम्। किं काम्यैव खादिरता नित्येऽपि खादिति सिद्धान्तकोटिः पूर्वपक्षाद्विशेषसिद्धये। काम्यैवेत्यवधारणम्। अन्यथा यदा क्वचित्प्रयोगे वीर्यकामनया काम्या खादिरतोपादीयते तदा तया पशुनियोजनरूपस्य नित्योपकारस्यापि प्रसङ्गात्सिद्धेः काम्या क्वचिन्नित्येऽपि भवतीत्यस्मिन्नर्थे पूर्वपक्षिणोऽपि संप्रतिपत्त्या ततः सिद्धान्तकोटेर्विशेषो न सिध्येत्। किं केवलं काम्यैव खादिरतेत्यङ्गीकृत्य सा सर्वत्र नित्येऽपि स्यादित्युच्यते अथ वा यया खादिरता वीर्यकामवाक्येन फलार्थतया काम्या एवम् 'खादिरे पशुम्—' इति वाक्येन क्रत्वर्थतया नित्यापीत्यभ्युपेत्य इति विकल्प्य आद्यं नित्यानित्यसंयोगविरोधेन निराकृत्य द्वितीयमाशङ्कते— यत्त्विति। सिद्धरूपः खदिरतरुरननुष्ठीयमानो वीर्यफलाय न प्रभवेदिति तस्य पशुबन्धनयुक्तयूपरूपाश्रयानुरागेण साध्यतोपपादनीया। यद्यपि यूपप्रातिपदिकार्थोऽपि सिद्धरूपः तथापि पशुबन्धनक्रियायुक्तत्वाकारेण भवति खदिरतरोरपि तदनुरागे सति साध्यता। एवं च खदिरस्य फलसंबन्धं बोधयत् वीर्यकामवाक्यं तस्या-

भामती।

तस्मात् यदि श्रुत्यादयः प्रमाणं यदि वा पारमर्षं सूत्रं सर्वथा यज्ञादिकर्मसमुच्चिता ब्रह्मोपासना विशेषणत्रयवती अनाद्यविद्यातद्वासनासमुच्छेदक्रमेण ब्रह्मसाक्षात्काराय मोक्षापरनाम्ने कल्पत इति तदर्थं कर्माण्यनुष्ठेयानि। न चैतानि

कल्पतरुः।

श्रयदानार्थम्; ततो न नित्या खादिरतेति प्राप्ते, राद्धान्तः– एकस्य खादिरत्वस्य उभयत्वे क्रत्वर्थपुरुषार्थरूपोभयात्मकत्वे वचनद्वयेन क्रतुशेषत्वफलशेषत्वलक्षणसंयोगभेदावगमान्न नित्यानित्यसंयोगविरोधः। न चाश्रयदानाय नित्यवाक्यम्, संनिधानादेवाश्रयलाभात्। तत उभयार्था खादिरतेति॥

विशेषणत्रयवतीति। आदरनैरन्तर्यदीर्घकालत्ववतीत्यर्थः। कर्मापेक्षत्वेन ब्रह्मभावनायास्तदवबोधापेक्षामुपपादयन् कर्मावबोधानन्तर्यमिति भाष्यं घटयति— **न चेति**। दृष्ट उपकारस्तुषविमोकादिः, अदृष्टः प्रोक्षणादिजः प्रयाजादिजश्च,

परिमलः।

श्रयसंबन्धमपि बोधयितुं न शक्नोति वाक्यभेदप्रसङ्गात् इत्याश्रयसंबन्धस्यान्यतः प्राप्त्यपेक्षायामपेक्षितसमर्पणेन फलवाक्यान्वयि 'खादिरे पशुम्' इति वाक्यं न खदिरस्य क्रत्वर्थतामपि बोधयितुं शक्नोतीति न ततः क्रत्वर्थत्वासिद्धिरित्यर्थः। न च यथा 'अपः प्रणयति' इत्यस्य संनिधाने 'गोदोहनेन पशुकामस्य' इति फलार्थं विधीयमानस्य सिद्धरूपस्य गोदोहनस्य अपां प्रणयनं संनिधानादाश्रयो भवति एवमिहापि संनिधानादेव यूप आश्रयो लभ्यत इति वाच्यम्। अपां हि गार्हपत्यदेशे ग्राह्याणामाहवनीयदेशं प्रति नयनरूपं यत् प्रकृष्टनयनं प्रणयनशब्दवाच्यं तस्य गोदोहपात्रस्य च आधाराधेयभावो लोकसिद्ध इति युक्तः तत्र योग्यतया संनिहितस्याश्रयत्वलाभः। इह त्वतीन्द्रियातिशयविशेषविशिष्टस्य यूपस्याहवनीयवदलौकिकत्वात् न तं प्रति लोकसिद्धः खदिरस्य प्रकृतिभाव इति 'खादिरे पशुम्—' इति वाक्येनैव तस्याश्रयसंबन्धो बोधनीय इति भावः। अत्र 'खादिरे पशुम्—' इत्यस्य नित्यवाक्यत्वं सिद्धान्त्यभिमतमनूदितम्। पूर्वपक्षे फलवाक्यैकवाक्यतापन्नस्य तस्य नित्यवाक्यत्वाभावात्॥

एकस्य खादिरत्वस्येत्यादिना एकस्योभयात्मकत्वे नित्यानित्यसंयोगविरोधो नास्ति विनियोजकप्रमाणभेदात् इति सिद्धान्तयुक्तिः 'एकस्य तूभयत्वे—' इति सूत्रारूढा दर्शिता। **संनिधानादेवेति**। यूपशब्दार्थस्यालौकिकत्वेऽपि यस्मिन्नद्याश्रित्वाद्याकृति-

प्रागपि अधीतवेदान्तस्य ब्रह्मजिज्ञासोपपत्तेः । यथा च हृदयाद्यवदाना-

---

भामती ।

दृष्टादृष्टसामवायिकारादुपकारहेतुभूतौपदेशिकातिदेशिकक्रमपर्यन्ताङ्गग्रामसहित-परस्परविभिन्नकर्मस्वरूपतदधिकारिभेदपरिज्ञानं विना शक्यान्यनुष्ठातुम् । न च धर्ममीमांसापरिशीलनं विना तत्परिज्ञानम् । तस्मात्साधूक्तम् 'कर्मावबोधानन्तर्यं विशेषः' इति । कर्मावबोधेन हि कर्मानुष्ठानसाहित्यं भवति ब्रह्मोपासनाया इत्यर्थः । तदेतन्निराकरोति— **नेति** । कुतः ? कर्मावबोधात् **प्रागप्यधीतवेदान्तस्य ब्रह्मजिज्ञासोपपत्तेः ॥**

कल्पतरुः ।

स चासौ यथायोगं सामवायिकः क्रतुस्वरूपसमवायी, आरात् दूरे फलापूर्वसिद्धावुपकारश्च, तस्य हेतुभूतानि औपदेशिकानि प्रत्यक्षविहितानि आतिदेशिकानि प्रकृतेर्विकृतावतिदेशप्राप्तानि क्रमपर्यन्तानि क्रमेणाप्यवच्छिन्नान्यङ्गानि, तेषां ग्रामः सुमूहः, तत्सहितं परस्परविभिन्नं कर्मस्वरूपं तदपेक्षिताधिकारिविशेषश्च, तयोः परिज्ञानं विना कर्माणि न शक्यान्यनुष्ठातुमित्यन्वयः । औपदेशिकातिदेशिकेति शेषलक्षणादारभ्योपरितनतन्त्रस्यापेक्षोक्ता । क्रमपर्यन्तेति पञ्चमनयस्य । अङ्गग्रामेति तार्तीयस्य । सहितेति चातुर्थिकस्य प्रयोज्यप्रयोजकविचारस्य । परस्परविभिन्नेति द्वितीयलक्षणार्थस्य । तदधिकारीति षष्ठाध्यायार्थस्य । दृष्टादृष्टेति संस्कारकर्मत्वगुणकर्मत्वप्रधानकर्मत्वादिचिन्तायाश्च द्वितीयाध्यायगताया अपेक्षेत्युक्तम् ॥

परिमलः ।

विशिष्टे काष्ठविशेषे यूपशब्दो वर्तते तस्य खदिरतरोश्च प्रकृतिविकृतिभावो लोकसिद्ध इति तावतैव संनिधानात् पशुबन्धनार्थो यूप आश्रयत्वेनान्वेतुं योग्य इति भावः । **शेषलक्षणादिति** । शेषलक्षणं तृतीयाध्यायः । तत आरभ्य चतुर्भिरध्यायैः शेषत्वप्रयुक्तिक्रमाधिकारनिरूपणार्थैरुपदेशविचारः । सप्तमाद्यैश्चतुर्भिः सामान्यातिदेशविशेषातिदेशोहबाधनिरूपणार्थैरतिदेशविचारः । एकादशद्वादशाभ्यामुपदेशातिदेशसाधारणतन्त्रप्रसङ्गविचारः । **चातुर्थिकेति** । यत् येन प्रयुज्यते अनुष्ठाप्यते तत्तेन सहितमुपकार्योपकारकभावरूपसंबन्धवद्भवति । अनुपकार्येणानुपकारकस्यानुष्ठापनादिति साहित्योक्त्या चातुर्थिकप्रयुक्तिसंग्रहः । **संस्कारकर्मत्वेति** । संस्कारकर्मणः तानि द्वैधाधिकरणनिरूपितगुणकर्मविशेषत्वेऽपि दृष्टप्रयोजनाभावेन त्रिविधगुणकर्मवैषम्यात् 'धर्ममात्रे तु कर्म स्यात्—' इत्यधिकरणान्तरविषयत्वाच्च पृथग्ग्रहणम् ॥

भामती।

इदमत्राकूतम्— ब्रह्मोपासनया भावनापराभिधानया कर्माण्यपेक्ष्यन्त इत्युक्तम्, तत्र ब्रूमः— क्व पुनरस्याः कर्मापेक्षा? किं कार्ये यथाग्नेयादीनां परमापूर्वे चिरभाविफलानुकूले जनयितव्ये समिदाद्यपेक्षा, स्वरूपे वा यथा तेषामेव द्विरवत्तपुरोडाशादिद्रव्याग्निदेवताद्यपेक्षा? न तावत्कार्ये, तस्य विकल्पासहत्वात्। तथा हि— ब्रह्मोपासनाया ब्रह्मस्वरूपसाक्षात्कारः कार्यमभ्युपेयः। स चोत्पाद्यो वा स्यात् यथा संयवनस्य पिण्डः, विकार्यो वा यथावघातस्य व्रीहयः, संस्कार्यो वा यथा प्रोक्षणस्योलूखलादयः, प्राप्यो वा यथा दोहनस्य पयः। न तावदुत्पाद्यः। न खलु घटादिसाक्षात्कार इव जडस्वभावेभ्यो घटादिभ्यो भिन्न इन्द्रियाद्याधेयो ब्रह्मसाक्षात्कारो भावनाधेयः संभवति, ब्रह्मणोऽपराधीनप्रकाशतया तत्साक्षात्कारस्य तत्स्वाभाव्येन नित्यतयोत्पाद्यत्वानुपपत्तेः, ततो भिन्नस्य वा भावनाधेयस्य साक्षात्कारस्य प्रतिभाप्रत्ययवत्

कल्पतरुः।

द्विरवत्तेति। आग्नेययागः स्वोत्पत्तये 'द्वयवदानं जुहोति' इति वचनात् 'द्विर्हविषोऽवद्यति' इति विहितं द्विरवत्तपुरोडाशमपेक्षत इति भावः। भावनासाध्ये साक्षात्कारे यदि कर्मापेक्षा तर्हि स ब्रह्मस्वरूपमन्यो वा? ब्रह्मस्वरूपत्वे न कर्मापेक्षेत्याह— स चेत्यादिना। 'पिष्टं संयौति' इति विहितमिश्रणस्य पिण्ड उत्पाद्यः। 'गां दोग्धि' इति विहितदोहनस्य प्राप्यं पयः। साक्षात्कारस्य ब्रह्मस्वरूपाद्भेदे ब्रह्म जडं स्यात्तथेन्द्रियाद्यगोचरः शब्दश्च परोक्षप्रमाहेतुरिति केवलभावनाभूः साक्षात्कारोऽप्रमा स्यादित्याह— ततो भिन्नस्य वेति। मन्थरः स्तिमितः। स्फुरन्त्यो ज्वाला जटाकारा

परिमलः।

द्विरवत्तेति। इदं भाष्यकारमतम्— यत्साक्षात् द्वयवदानसाधनको यागः, पुरोडाशः तत्प्रकृतितया यागसाधनमिति। आचार्यमते तु कृत्स्नः पुरोडाशो यागसाधनम्; द्विरवत्तस्याग्नौ प्रक्षेपरूपो होमस्तु हविष एकदेशद्वारा संस्कारकर्म; तथा च होमकाले कृत्स्नः पुरोडाशो देवतोद्देशेन मनसा त्यक्तव्यः; वचनबलादन्योद्देशेन त्यक्तैकदेशस्य स्विष्टकृति पुनर्देवतान्तरोद्देशेन त्याग इत्येवं विशेषः। जडं स्यादिति। दृग्भिन्नस्य प्रकाशमानत्वं दृश्यध्यस्ततया तदभेदेनोपपादनीयमिति प्राक् प्रसाधितत्वादध्यस्तस्य च जडत्वनियमादिति भावः। ननु टीकोक्तप्रामाण्यायोगयुक्तिरयुक्ता, इन्द्रियशब्दादिप्रमाकरणजन्यत्वेन प्रामाण्योपपत्तेः इत्याशङ्क्य तामुपपादयति— तथेन्द्रियाद्यगोचर इति।

भामती ।

संशयाक्रान्ततया प्रामाण्यायोगात्, तद्विधस्य तत्सामग्रीकस्यैव बहुलं व्यभिचारोपलब्धेः । न खलु अनुमानावगतं सिद्धं वह्निं भावयतः शीतार्तस्य शिशिरभरमन्थरतरकायकाण्डस्य स्फुरज्ज्वालाजटिलानलसाक्षात्कारः प्रमाणान्तरेण संवाद्यते, विसंवादस्य बहुलमुपलम्भात्; तस्मात् प्रामाणिकसाक्षात्कारलक्षणकार्याभावान्नोपासनाया उत्पाद्ये कर्मापेक्षा । न च कूटस्थनित्यस्य सर्वव्यापिनो ब्रह्मण उपासनातो विकारसंस्कारप्राप्तयः संभवन्ति । स्यादेतत् । मा भूद्ब्रह्मसाक्षात्कार उत्पाद्यादिरूप उपासनायाः, संस्कार्यस्तु अनिर्वचनीयाविद्याद्वयापिधानापनयनेन भविष्यति, प्रतिसीरापिहिता नर्तकीव प्रतिसीरापनयद्वारा रङ्गव्यापृतेन । तत्र च कर्मणामुपयोगः । एतावांस्तु विशेषः— प्रतिसीरापनये पारिषदानां नर्तकीविषयः साक्षात्कारो भवति । इह तु अविद्यापिधानापनयमात्रमेव नापरमुत्पाद्यमस्ति, ब्रह्मसाक्षात्कारस्य ब्रह्मस्वभावस्य नित्यत्वेन अनुत्पाद्यत्वात् । अत्रोच्यते— का पुनरियं ब्रह्मोपासना? किं शाब्दज्ञानमात्रसंततिः, आहो निर्विचिकित्सशाब्दज्ञानसंततिः? यदि शाब्दज्ञानमात्रसंततिः, न तर्हीयमभ्यस्यमानाप्यविद्यां समुच्छेत्तुमर्हति । तत्त्वविनिश्चयस्तदभ्यासो वा सवासनं विपर्यासमुन्मूलयेत्, न संशयाभ्यासः, सामान्यमात्रदर्शनाभ्यासो वा । न हि स्थाणुर्वा पुरुषो वेति वा आरोहपरिणाहवत् द्रव्यमिति वा शतशोऽपि ज्ञानमभ्यस्यमानं पुरुष एवेति निश्चयाय पर्याप्तम् ऋते विशेषदर्शनात् । ननूक्तं श्रुतमयेन ज्ञानेन जीवात्मनः परमात्मभावं गृहीत्वा युक्तिमयेन च व्यवस्थाप्यत इति । तस्मान्निर्विचिकित्सशाब्दज्ञानसंततिरूपोपासना कर्मसहकारिण्यविद्याद्वयोच्छेदहेतुः । न चासावनुत्पादितब्रह्मानुभवा तदुच्छेदाय पर्याप्ता ।

कल्पतरुः ।

अस्य सन्तीति जटिलः । **न च कूटस्थेति** । कूटस्थनित्यतया पूर्वरूपापायलक्षणो विकारोऽभिनवगुणोदयरूपसंस्कारश्च न स्तः । सर्वव्यापितया न प्राप्तिः । कूटस्थनित्यत्वाविरुद्धं दोषविघातसंस्कारमाह— **अनिर्वचनीयेति** । प्रतिसीरा तिरस्करिणी । रङ्गव्यापृतो नटः । आरोह उच्छ्रयः । विस्तारपरिमाणं परिणाहः । उपासना किमापातज्ञानाभ्यासो निश्चयाभ्यासो वा? आद्यं भङ्क्त्वा द्वितीयं शङ्कते— **नन्विति** । ननूपासनैवाविद्यां निवर्तयतु किं साक्षात्कारेण यत्र कर्मोपयोगस्तत्राह— **न चेति** । ननु रज्जुसर्पादिभ्रमा अपरोक्षा अप्याप्तवचनादिज-

भामती।

साक्षात्काररूपो हि विपर्यासः साक्षात्काररूपेणैव तत्त्वज्ञानेनोच्छिद्यते न तु परोक्षावभासेन, दिङ्मोहालातचक्रचलद्वृक्षमरुमरीचिसलिलादिविभ्रमेष्वपरोक्षावभासिषु अपरोक्षावभासिभिरेव दिगादितत्त्वप्रत्ययैर्निवृत्तिदर्शनात्। नो खल्वाप्तवचनलिङ्गादिनिश्चितदिगादितत्त्वानां दिङ्मोहादयो निवर्तन्ते। तस्मात् त्वंपदार्थस्य तत्पदार्थत्वेन साक्षात्कार एषितव्यः। एतावता हि त्वंपदार्थस्य दुःखिशोकित्वादिसाक्षात्कारनिवृत्तिः नान्यथा। न चैष साक्षात्कारो मीमांसासहितस्यापि शब्दप्रमाणस्य फलम् अपि तु प्रत्यक्षस्य, तस्यैव तत्फलत्व-

कल्पतरुः।

नितपरोक्षज्ञानैर्निवर्तन्ते; सत्यम्, ते निरुपाधिकाः, कर्तृत्वादिस्तु सोपाधिक इत्यभिप्रेत्य तथाविधमुदाहरति— **दिङ्मोहेति**। नौस्थस्य तटगततरुषु चलद्वृक्षभ्रमः। अपरोक्षे ब्रह्मणि शब्द एवापरोक्षज्ञानहेतुः अन्यथा तत्र परोक्षज्ञानस्य भ्रमत्वापातादिति तत्राह— **न चैष इति**॥

परिमलः।

'न चक्षुषा गृह्यते' 'यन्मनसा न मनुते' इत्यादिश्रुतेरिति भावः। **तथाविधमिति**। दिङ्मोहेऽपि पुरुषविशेषस्यापरिशीलितप्रदेशविशेषप्राप्तिरुपाधिः। शाब्दापरोक्षशङ्कामुपस्कुर्वन्नवतारयति— **अपरोक्षे ब्रह्मणीति**। अयमर्थः— अभिव्यक्तचैतन्याभिन्नत्वमर्थस्यापरोक्ष्यम्; तत्तु नित्याभिव्यक्तजीवचैतन्याभिन्ने ब्रह्मणि स्वाभाविकम्; अत एव 'यत्साक्षादपरोक्षाद्ब्रह्म' इति श्रुतिः; घटादीनाम् अपरोक्षचैतन्याभेदाध्यासोपाधिकम्; तदेव 'प्रत्यक्षोऽयं घटः' 'प्रत्यक्षं घटं पश्यामि' इत्यादिव्यवहारालम्बनम्। ज्ञानस्यापरोक्ष्यम् अपरोक्षार्थव्यवहारानुकूलज्ञानत्वम्; तत् स्वस्य सुखादेश्च प्रकाशरूपे नित्याभिव्यक्तसाक्षिचैतन्ये चाक्षुषादिवृत्त्यभिव्यक्तचैतन्ये च अनुगतं स्वाभाविकम्; चाक्षुषादिवृत्तिषु तत्तदभिव्यक्तचैतन्याभेदाध्यासोपाधिकम्। न तु जातिरूपम् इन्द्रियजन्यत्वाद्युपाधिरूपं वा ज्ञानानामापरोक्ष्यम्; न चापरोक्षज्ञानविषयत्वमर्थापरोक्ष्यमिति युक्तम्, तत्तांशविषयप्रत्यभिज्ञायां तत्तांशे चातिप्रसक्तेः साक्ष्यव्यापनाच्च। एवं च तत्त्वमस्यादिशब्दजन्यम् अपरोक्षजीवाभिन्नब्रह्मज्ञानमपरोक्षमेव भवति। न चैवं सति अनुमितेरप्यपरोक्षपर्वतादावापरोक्ष्यं स्यादिति वाच्यम्, इष्टापत्तेः इति॥

शब्द एव इत्येवकारेण प्रथमं श्रवणजन्ये ब्रह्मज्ञाने क्लृप्तकरणभावस्य शब्दस्यैवाविद्यानिवर्तके चरमसाक्षात्कारेऽपि करणत्वोपपत्तेः न तत्र करणान्तरं कल्पनीय-

कल्पतरुः ।

अयमभिसंधिः— स्वतोऽपरोक्षस्यापि ब्रह्मणः पारोक्ष्यं भ्रमगृहीतम् । तत्रापरोक्षप्रमाकरणादेव तत्साक्षात्कारः । अन्तःकरणं च सोपाधिके आत्मनि जनयति अपरोक्षाहंवृत्तिमिति सिद्धमस्यात्मन्यपरोक्षधीहेतुत्वम् । तत्तु शब्दजनितब्रह्मात्मैक्यधीसंततिवासितं तत्पदलक्ष्यब्रह्मात्मतां जीवस्य साक्षात्कारयति अक्षमिव पूर्वानुभवसंस्कारवासितं तत्तेदंतोपलक्षितैक्यविषयप्रत्यभिज्ञाहेतुः । शब्दस्तु नापरोक्षप्रमाहेतुः क्लृप्तः । प्रमेयापरोक्ष्ययोग्यत्वेन प्रमायाः साक्षात्कारत्वे देहात्मभेदविषयानु-

परिमलः ।

मिति सूचितम् । नन्वपरोक्षजीवाभेदतः श्रुतेश्च अपरोक्षेऽपि ब्रह्मणि परोक्षत्वावगाहि ज्ञानं लोकसिद्धमनुभूयते ; अत एव 'निरतिशयानन्दरूपं ब्रह्म ममापरोक्षं न प्रकाशते' इति व्यवहारः ; एवं श्रुतितोऽपि ब्रह्मणि परोक्षत्वावगाहितया परोक्षमेव ज्ञानं भवेदित्याशङ्क्याह— **अन्यथेति** । लोकत इव श्रुतितः नापरोक्षे ब्रह्मणि परोक्षत्वावगाहि भ्रमरूपं ज्ञानं युक्तमिति भावः । **स्वतोऽपरोक्षस्यापीति** । यदि ब्रह्म स्वतोऽपरोक्षमिति तद्विषयशब्दजन्यमपि ज्ञानमपरोक्षं भवेत् तदा श्रवणजन्यज्ञानमप्यपरोक्षमिति श्रुतवेदान्तस्य पुंसः तस्मिन् पारोक्ष्यभ्रमानुवृत्तिर्न स्यात् । अनुवर्तते च तदनन्तरमपि **भ्रमगृहीतं** ब्रह्मणि पारोक्ष्यमिति न शब्दादपरोक्षज्ञानम् । तस्मादपरोक्षज्ञानजननसमर्थादन्यत एव तदेष्टव्यम् । क्लृप्तं चान्तःकरणस्य तत्सामर्थ्यं ब्राह्मलौकिकभोगानुभवे, 'मनसैतान्कामान्पश्यन्रमते य एते ब्रह्मलोके मनोऽस्य दैवं चक्षुः' इति श्रुतेः । विशिष्य च अहंवृत्तिरूपे स्वात्मज्ञानेऽपि तस्य करणत्वं क्लृप्तम् । चरमसाक्षात्कारस्य शब्दजन्यत्वाभ्युपगमेऽपि तस्य व्यापारोऽवश्यमपेक्षणीयः । तस्मादावश्यिकेनान्तःकरणेनैव तदुत्पत्त्युपपत्तौ तदर्थं तत्त्वमस्यादिवाक्यस्य तत्कालेऽपि पुनरनुसंधानकल्पन एव गौरवमिति भावः । ननु तर्हि तत्त्वमस्यादिवाक्यश्रवणनिरपेक्षमेवान्तःकरणं ब्रह्मात्मैक्यमपरोक्षयेत् इत्यत्राह— **तत्तु शब्दजनितेति** । उक्तं च गीताविवरणे भाष्यकारैः— 'शास्त्राचार्योपदेशशमदमादिसंस्कृतं मन आत्मदर्शने करणम्' इति ।

ननु अपरोक्षब्रह्मविषयस्य शब्दस्यापरोक्षप्रमाहेतुत्वं न शक्यं प्रत्याख्यातुम् ; श्रवणजन्यापरोक्षज्ञाने सत्यपि पारोक्ष्यभ्रमानुवृत्तिस्त्वसंभावनादिदोषप्रतिबद्धस्य तस्य भ्रमनिवर्तनकार्याक्षमतया भवेदित्याशङ्क्याह— **शब्दस्त्विति** । अभिव्यक्तचैतन्याभिन्नत्वमर्थापरोक्ष्यमिति तावन्न युक्तम्, स्वरूपसदभेदमात्रविवक्षायां चाक्षुषवृत्त्यभिव्यक्तपर्वतावच्छिन्नचैतन्येन व्यवहितवह्न्यवच्छिन्नचैतन्यस्य तेन व्यवहितवह्नेश्च स्वाभाविकाध्यासिकाभेदसत्त्वेन व्यवहितवह्नेरप्यपरोक्षत्वापत्तेः ; निरस्तभेदोपाधिकाभेदविवक्षायां चरम-

परिमलः।

साक्षात्कारनिवर्त्याविद्योपाधेः चरमसाक्षात्कारोत्पत्तिदशायामपि सत्त्वेन ब्रह्मणस्तदानीमापरोक्ष्याभावापत्तेः; स्फुरदभेदविवक्षायां तादृग्धर्म्याध्यासविषये दुःखशोकादौ तदानीं सद्रूपब्रह्माभेदास्फुरणादापरोक्ष्याभावापत्तेः; स्वव्यवहारानुकूलं यदभिव्यक्तचैतन्यं तदभेदविवक्षायाम् अनुमेयवह्न्यादिव्यवहारानुकूलेन जीवचैतन्येन प्रागुक्तरीत्यैवाभिन्नस्य वह्न्यादेरापरोक्ष्यापातात्; स्वव्यवहारानुकूलो योऽभिव्यक्तचैतन्याभेदस्तद्वत्त्वविवक्षायां तत्तदाकारधीवृत्तिसमुल्लासमात्रादपि भवति व्यवहारे चैतन्याभेदस्यानपेक्षितत्वेनासंभवापत्तेः; स्वावरणनिवृत्त्यनुकूले चैतन्याभेदवत्त्वविवक्षायाम् आवरणनिवर्तकत्वग्रहणाधीनमापरोक्ष्यग्रहणम् आपरोक्ष्यग्रहणाधीनमावरणनिवर्तकत्वग्रहणमिति परस्पराश्रयापत्तेः। एवमुक्तरूपार्थापरोक्ष्यनिर्वचनायोगात् तदपेक्षमपरोक्षार्थव्यवहारानुकूलज्ञानत्वं ज्ञानापरोक्ष्यमिति निर्वचनमप्ययुक्तम्। तस्मात् स्वाविषयविषयकज्ञानाजन्यज्ञानत्वं ज्ञानापरोक्ष्यमिति निर्वक्तव्यम्। तत् चाक्षुषादिवृत्त्यभिव्यक्तचैतन्येषु नित्याभिव्यक्तसाक्षिचैतन्येषु चानुगतम् अनुमितिशाब्दज्ञानादिभ्यश्च तत्तदविषयलिङ्गशब्दादिज्ञानजन्येभ्यो व्यावृत्तम्। न च विशिष्टज्ञानं विशेषणज्ञानजन्यमित्यभ्युपगमे दण्डकुण्डलोभयस्मृतिजन्यदण्डिप्रत्यक्षाव्याप्तिः, वस्तुगत्या यः स्वाविषयः तद्विषयत्वं यस्य ज्ञानस्य जनकतायामवच्छेदककोटिप्रविष्टं तदजन्यत्वस्य विवक्षितत्वात्, उक्तस्मृतेर्दण्डिप्रत्यक्षे तदविषयकुण्डलविषयत्वेनाजनकतया तत्रापि लक्षणसत्त्वात्। यदि ईश्वरज्ञानमुपादानगोचरज्ञानतया 'बहु स्यां प्रजायेय' इतिवत् 'इदं ज्ञानमस्य स्यात्' इति संकल्परूपतया वा कारणमिष्यते, तदा तज्जन्येषूक्तज्ञानेष्वव्याप्तिवारणाय समानाधिकरणत्वं ज्ञाने विशेषणं देयम्। न च कोलाहले बुभुत्सितशब्दग्रहो बुभुत्साजन्यस्तन्मूलबोधेष्टसाधनताज्ञानेनापि जन्य इति तत्राव्याप्तिः। बुभुत्सया अन्यथासिद्धस्य तस्य शब्दग्रहे कारणत्वाभावात् बुभुत्सया तारशब्दान्तरग्रहप्रतिबन्धे सति क्लृप्तकारणादेव बुभुत्सितशब्दग्रह इति तत्र बुभुत्साया अप्यकारणत्वाच्च। न च व्याप्तिज्ञानत्वावच्छिन्नं सर्वमनुमितिजनकं व्याप्तिज्ञानत्वादित्यनुमितावतिव्याप्तिः, तत्रानुमितेः सामान्यतः सर्वव्याप्तिविषयायाः स्वकारणज्ञानविषयव्याप्तिविषयत्वसत्त्वेऽपि स्वकरणव्याप्तिज्ञानवत् प्रकृतहेतुसाध्यविशेषोपरक्ततया तद्विषयत्वाभावेन तस्याः स्वाविषयविषयकज्ञानजन्यत्वात्। न चैवमपि हेतुतावच्छेदकसाध्यतावच्छेदकविशेषावच्छिन्नहेतुसाध्योपरक्तव्याप्तिज्ञानत्वावच्छिन्नसर्वपक्षीकरणे सति उक्तानुमितावतिव्याप्तिः, सामान्यधर्ममात्रानवच्छिन्नतया यः स्वविषयो न भवति तद्विषयत्वस्य विवक्षितत्वात्, तस्यामनुमितौ हेतुतावच्छेदकसाध्यतावच्छेदकयोः सामान्यधर्ममात्रावच्छिन्नत्वेन विषयतया सामान्यधर्ममात्रानवच्छिन्नतया तदविषयत्वस्य सत्त्वात्। न चानुपलब्धिप्रमाणजन्याभावज्ञाने अतिव्याप्तिः,

कल्पतरुः ।

मितेरपि तदापत्तिः । 'दशमस्त्वमसि' इत्यत्रापि तत्सचिवादक्षादेव साक्षात्कारः । अन्धादेस्तु परोक्षधीरेव । अपि च, 'वेदान्तवाक्यजज्ञानभावनाजापरोक्षधीः । मूलप्रमाणदार्ढ्येन न भ्रमत्वं प्रपद्यते' । न च प्रामाण्यपरतस्त्वापातः । 'अपवादनिरासाय मूलशुद्धयनुरोधनात्', 'दृश्यते त्वग्रयया बुद्ध्या' इत्यादेर्नयबृंहितवचनादित्थमुररीकारः । यत्साक्षादपरोक्षमित्येवमाकारैव धीः शब्दादुदेति न तु परोक्षं ब्रह्मेति । सा तु करणस्वभावात्परोक्षा अवतिष्ठते न भ्रम इति सर्वमवदातम् ॥

परिमलः ।

योग्यानुपलब्धेः प्रमाणत्वात् योग्यतायाश्च यद्यत्राधिकरणे प्रतियोग्यभविष्यत् तदा भूतलमिवाद्रक्ष्यतेति तर्करूपत्वेन अनुपलब्धिज्ञानस्य स्वाविषयविषयकतर्करूपज्ञानजन्यत्वात् । स्मृतौ स्वसमानविषयपूर्वानुभवसंस्कारजन्यायामतिव्याप्तिवारणार्थमग्रिमज्ञानपदमनुभवपरं बोध्यम् । एवं च प्रत्यभिज्ञायास्तत्तांशेऽपि नातिव्याप्तिः, तस्यास्तदंशे स्मृतित्वाङ्गीकारात् । एवमपरोक्षज्ञानलक्षणव्यवस्थितौ तज्जन्यव्यवहारयोग्यत्वमर्थापरोक्ष्यमिति तन्निर्वचनं द्रष्टव्यम् । एवं च शब्दप्रमाणं स्वाविषयविषयकज्ञानजन्यां परोक्षप्रमामेव जनयतीति नापरोक्षप्रमाहेतुरिति भावः ॥

ननु 'दशमस्त्वमसि' इत्यादौ शब्दस्याप्यपरोक्षज्ञानजनकत्वं सिद्धमस्तीत्याशङ्क्याह— **दशम इति** । एवमनुमितेरपि पर्वताद्यंशे नापरोक्ष्यम्; तत्रापरोक्ष्यभ्रमस्तु तदानींतनापरोक्षज्ञानभेदाग्रहादिति द्रष्टव्यम् । **अन्धादेस्त्विति** । अभ्युपेत्यायं परिहारः । 'दशमोऽहमस्मि' इत्यपरोक्षज्ञानम् अन्तःकरणे न संभवति, शरीरविषयं चेत् स्पर्शनेन्द्रियेण वा ज्ञानान्तरोपनयसहितान्तःकरणेन वा संभवति । ननु भावनाजन्यसाक्षात्कारः कामिनीसाक्षात्कारवत् भ्रमः स्यात्, न चान्तःकरणसाहित्येन विशेषः तत्रापि तत्सत्त्वादित्यत आह— **अपि चेति** । ननु ब्रह्मसाक्षात्कारस्य मनःकरणकत्वाभ्युपगमो 'यन्मनसा न मनुते' इति श्रुतिविरुद्ध इत्यत्राह— **दृश्यत इति** । प्रागुपन्यस्तन्यायोपबृंहितायां 'दृश्यते–' इति श्रुतौ अग्र्यया सूक्ष्मया इति विशेषणात् 'यन्मनसा' इति श्रुतिरनवहितमनोविषया यथा 'तं त्वौपनिषदम्' इति श्रुतौ औपनिषदम् इति विशेषणात् 'यद्वाचानभ्युदितम्' इति श्रुतिर्विशिष्टशक्तिकशब्दविषयेति भावः । **साक्षादपरोक्षमिति** । यथा प्रत्यक्षस्पर्शाश्रयत्वादिलिङ्गजन्या वायोः प्रत्यक्षत्वानुमितिः स्वयं प्रत्यक्षत्वरहितेत्येतावदेव, न तु वायौ प्रत्यक्षत्वाभावमवगाहत इति न भ्रमत्वं प्रतिपद्यते, एवमिहापि योजनीयम् ॥

भामती।

नियमात्, अन्यथा कुटजबीजादपि वटाङ्कुरोत्पत्तिप्रसङ्गात्। तस्मान्निर्विचिकित्सवाक्यार्थभावनापरिपाकसहितमन्तःकरणं त्वंपदार्थस्यापरोक्षस्य तत्तदुपाध्याकारनिषेधेन तत्पदार्थतामाविर्भावयतीति युक्तम्। न चायमनुभवो ब्रह्मस्वभावो येन न जन्येत, अपि तु अन्तःकरणस्यैव वृत्तिभेदो ब्रह्मविषयः। न चैतावता ब्रह्मणोऽपि पराधीनप्रकाशता। न हि शाब्दज्ञानप्रकाश्यं ब्रह्म स्वयं प्रकाशं न भवति। सर्वोपाधिविहीनं हि स्वयंज्योतिरिति गीयते, न तूपहितमपि। यथाह स्म भगवान्भाष्यकारः— 'न तावदयमेकान्तेनाविषयः' इति। न चान्तःकरणवृत्तावप्यस्य साक्षात्कारे सर्वोपाधिविनिर्मोकः, तस्यैव तदुपा-

कल्पतरुः।

स्वरूपप्रकाशस्याभिव्यक्तिसंस्कारमुपपाद्य व्यञ्जकान्तःकरणवृत्तेरुत्पाद्यतामाह कर्मोपयोगाय– न चेति। वृत्तिविषयत्वे ब्रह्मणोऽस्वप्रकाशत्वमाशङ्क्य असमुच्चयमतेऽपि साम्यमाह— न चैतावतेति। स्वप्रकाशस्यैव शाब्दज्ञानविषयत्वं त्वयापीष्टमित्यर्थः। परिहारसाम्यमाह— सर्वेति। ननु निरुपाधिकं ब्रह्म साक्षात्कारगोचरः, कथं तस्योपहिततेति तत्राह– न चान्तःकरणेति। निरुपाधिकं ब्रह्मेति विषयीकुर्वाण।

परिमलः।

स्वरूपप्रकाशस्येति। आविर्भावयतीत्यन्तेन ग्रन्थेन जीवस्वरूपप्रकाशस्य ब्रह्माभेदसाक्षात्कारेण तदभेदतिरोधायकाविद्यानिवृत्तिरूपाभिव्यक्तिसंस्कारमुपपाद्य अभिव्यञ्जकस्य तस्य साक्षात्कारस्य न चासावनुत्पादितब्रह्मानुभवेति टीकायां प्रागुपक्षिप्तामुत्पाद्यतामन्तःकरणवृत्तिरूपत्वप्रदर्शनेनोपपादयतीत्यर्थः। असमुच्चयमते कर्मोपासनयोः कालैक्येन समुच्चयो नास्तीति सिद्धान्ते, **परिहारसाम्यमाहेति**। वृत्तिविषयत्वं स्वप्रकाशत्वं च विरुद्धमित्याशङ्कायाम् उपहितानुपहितरूपभेदेन समाधानं मतद्वयेऽपि समानं दर्शयतीत्यर्थः। नन्वेवं सति अविद्योपहितो जीवः कथं स्वप्रकाशः स्यादिति चेत्, उच्यते— उपहितमुपधानकाले स्वरूपेणापि न स्वप्रकाशमिति नार्थः, किं तूपहितरूपेण न स्वप्रकाशमिति; अतो न दोषः। ननु निरुपाधिकं ब्रह्मेति उपहितं वृत्तिविषय इति न युक्तम्, 'ब्रह्म शुद्धं निरुपाधिकम्' इति हि वृत्तिरूपसाक्षात्कारस्याकार इष्यते; न चोपाधौ विद्यमाने तदाकारः संभवितुमर्हतीति शङ्कार्थः॥

मिथ्याभूतेषूपाधिषु विद्यमानेष्वपि न वास्तवनिरुपाधिकत्वाकारसाक्षात्कारोदयो विरुध्यत इति समाधानाभिप्रायमाह– निरुपाधिकमिति। ननु मिथ्याभूतानां तेषामुपा-

भामती ।

धेर्विनश्यदवस्थस्य स्वपरोपाधिविरोधिनो विद्यमानत्वात् । अन्यथा चैतन्यच्छायापत्तिं विनान्तःकरणवृत्तेः स्वयमचेतनायाः स्वप्रकाशत्वानुपपत्तौ साक्षात्का-

कल्पतरुः ।

वृत्तिः स्वस्येतरोपाधिनिवृत्तिहेतुरुदयते, स्वस्या अप्युपाधित्वाविशेषात् । ततः स्वसत्तायां विनाशहेतुसांनिध्याद्विनश्यदवस्थत्वम् । एवं च नानुपहितस्य विषयता न चोपाधेर्निवर्तकान्तरापेक्षेति भावः । ननु वृत्तिविशिष्टस्य शबलतया न तत्त्वसाक्षात्कारगोचरता । वृत्त्यवच्छिन्नात्मविषयत्वे च वृत्तेः स्वविषयत्वापातः विशेषणाग्रहे विशिष्टाग्रहात्, उपलक्षितस्य तु न वृत्त्युपाधिकतेति । उच्यते— वृत्त्युपरागोऽत्र सत्तयोपयुज्यते न प्रतिभास्यतया; अतो वृत्तिसंसर्गे सति आत्मा विषयो भवति न तु स्वत इति न दोषः ॥

ननूपाधिसंबन्धाद्विषयत्वं विषयत्वे चोपाधिसंबन्धो विषयविषयित्वलक्षण इतीतरेतराश्रयः, अत आह— अन्यथेति । न ब्रह्मसाक्षात्कारस्य ब्रह्मविषयत्वप्रयुक्तं

परिमलः ।

धीनां केन निवृत्तिः ? साक्षात्कारेणेति चेत्, तस्य केन निवृत्तिरित्याकाङ्क्षायामाह— स्वस्येतरेति । अनेन चरमवृत्त्युदयकाले उपाध्यन्तराण्यपि सन्त्येव, टीकायां वृत्तेरेवोपाधित्ववर्णनम् अन्ततो वृत्तिमात्रमस्तीत्यभ्युपेत्यवाद इति सूचितम् । ननु उपाधीनां निवृत्तावनुपहितमेव साक्षात्कारविषय इति स्यात् इत्याशङ्क्य साक्षात्कारदशायां विनश्यदवस्थतामात्रं न तु विनाशोदय इत्याह— ततः स्वसत्तायामिति । वृत्त्युपहितं वृत्त्या विशिष्टं तदुपलक्षितं वा ? आद्यं दूषयित्वा द्वितीयं दूषयति— उपलक्षितस्य त्विति । अविद्यमानेनाप्युपलक्षितत्वं भवति यथोड्डीय गतेनापि काकेन गृहस्य; वृत्त्या तु विद्यमानयैवोपहितता विषयताघटनार्थमिष्यते, अतः प्रसिद्धोपलक्षणवैलक्षण्यात् न वृत्तिरुपलक्षणमिति विद्यमानव्यावर्तकत्वनियमात् विशेषणमेव वाच्या, अतः पूर्वोक्तदोषद्वयं प्रादुःष्यादिति भावः । वृत्त्युपरागोऽत्रेति । नन्वत्र विशेषणोपलक्षणपक्षयोः कं पक्षं परिगृह्य परिहारो वर्ण्यते ? उच्यते— सत्तयोपयुज्यते इत्यविद्यमानव्यावर्तकत्वनिषेधान्नोपलक्षणम्, न प्रतिभास्यतयेति कार्यान्वयनिषेधान्न विशेषणम्, किं तु कार्यानन्वयी सत्त्वनियत उपाधिर्विशेषणोपलक्षणाभ्यामन्यस्तृतीयः प्रकार इति वाक्यान्वयाधिकरणे वक्ष्यमाणं तृतीयं प्रकारं परिगृह्य परिहारः । विषयविषयित्वलक्षणः विषयविषयित्वोपाधिकस्तत्प्रयोज्य इति यावत् । एवं हि इतरेतराश्रय इति संघटते ।

भामती।

रत्वायोगात्। न चानुमितभावितवह्निसाक्षात्कारवत् प्रतिभात्वेनास्याप्रामाण्यम्, तत्र वह्निस्वलक्षणस्य परोक्षत्वात्। इह तु ब्रह्मस्वरूपस्योपाधिकलुषितस्य जीवस्य प्रागप्यपरोक्षत्वात्। न हि शुद्धबुद्धत्वादयो वस्तुतस्ततोऽतिरिच्यन्ते। जीव एव तु तत्तदुपाधिरहितः शुद्धबुद्धत्वादिस्वभावो ब्रह्मेति गीयते। न च तत्तदुपाधिविरहोऽपि ततोऽतिरिच्यते। तस्मात् यथा गान्धर्वशास्त्रार्थज्ञानाभ्यासाहितसंस्कारसचिवः श्रोत्रेन्द्रियेण षड्जादिस्वरग्राममूर्छनाभेदमध्यक्षमनुभवति, एवं

कल्पतरुः।

चैतन्यप्रतिबिम्बितत्वं किं तु स्वतः, घटादिवृत्तिष्वपि साम्यात्। चैतन्यं च ब्रह्मेति स्वाभाविको वृत्तेस्तत्संबन्ध इत्यर्थः। यच्च स्वरूपव्यतिरिक्तसाक्षात्कारस्य भ्रमत्वमिति तत्राह—**न चेति**। विषयविसंवादाभावात् प्रमात्वमित्यर्थः। जीवचैतन्यमात्रापरोक्ष्येऽपि शुद्धानन्दात्मत्वादेः पारोक्ष्यान्न तदाकारसाक्षात्कारो यथार्थ इत्याशङ्क्याह—**न हीति**। शुद्ध्यादीनां स्वभावत्वेऽप्युपाधितिरोधानादाविर्भावनम्। वेदान्तजज्ञानेन तत्तदुपाध्यपाये यथावदभिव्यक्तो जीवो ब्रह्मेति गीयते; स चेदुपाध्यभावस्तर्हि तदतिरिक्तः परोक्षः कथं साक्षात्कारे भायात्? अत आह— **न चेति**। यथा परैरन्योन्याभावो न भवति घट इति व्यपदिश्यमानोऽपि घटतदन्योन्याभावव्यतिरिक्तो नाभाव उपेयते, न च घटतदन्योन्याभावयोरेकता; एवमस्माकं निरुपाधिकं ब्रह्म, न चोपाध्यभावस्ततोऽन्य इत्यर्थः। ननु चैतन्याभिन्नाश्चेदानन्दादयस्तद्वदविद्यादशायां विभाव्येरन्, उपाधिरुद्धाश्चेच्चैतन्येऽपि निरोधस्तुल्यस्तदभेदादिति शङ्कामुपसंहारव्याजेन परिहरति— **तस्मादिति**। यथा षड्जादयो गान्धर्वशास्त्राभ्यासात् प्रा-

परिमलः।

लक्षणशब्दस्य स्वरूपवाचित्वे तु विषयविषयिभाव एव तत्प्रयोजक उक्त इत्यात्माश्रय एव भवेत्। **चैतन्यप्रतिबिम्बितत्वमिति**। प्रतिबिम्बितचैतन्यकत्वमित्यर्थः। आहिताग्न्यादेराकृतिगणत्वान्निष्ठान्तस्य पूर्वनिपातानियमः। संजातचैतन्यप्रतिबिम्बत्वमिति वा अर्थः। तारकादेराकृतिगणत्वात् 'तारकितं नभः' इतिवदितच्प्रत्ययः। तथा च चैतन्यवृत्त्योः प्रतिबिम्बतदुपाधित्वलक्षणसंबन्धो न विषयविषयिभावप्रयोज्यः स्वयमेव तु तत्प्रयोजक इति नान्योन्याश्रय इत्यर्थः। **भ्रमत्वमिति**। संसारदशायामप्रकाशमानं ब्रह्म परोक्षमिति तत्रापरोक्ष्यावगाहितया भ्रमत्वमभिप्रेतम्। **वेदान्तजज्ञानेन** वेदान्तजन्यज्ञानमूलभावनापरिपाकसहितान्तःकरणजन्यज्ञानेनेत्यर्थः। **तत्तद्रूपेण** षड्जत्वादि-

भामती ।

वेदान्तार्थज्ञानाभ्यासाहितसंस्कारो जीवः स्वस्य ब्रह्मभावमन्तःकरणेनेति । अन्तः-करणवृत्तौ ब्रह्मसाक्षात्कारे जनयितव्ये अस्ति तदुपासनायाः कर्मापेक्षेति चेत्, न, तस्याः कर्मानुष्ठानसहभावाभावेन तत्सहकारित्वानुपपत्तेः ॥

कल्पतरुः ।

गपि स्फुरन्तस्तत्तद्रूपेणानुल्लिखिता न श्रोत्रेण व्यज्यन्ते, व्यज्यन्ते तु शास्त्रवासितेन तेन; एवं वेदान्तवाक्यजन्यब्रह्मात्मैकताकारज्ञानवासितान्तःकरणेन तद्भावाभिव्य-क्तिर्न प्रागिति । निषादर्षभगांधारषड्जमध्यमधैवतपञ्चमाः स्वराः । एषां समुदायो ग्रामः । मूर्छना तु तेषामारोहावरोहौ । समुच्चयपक्षमिदानीं निराकरोति— नेति । तत्र किमिह वा जन्मान्तरे वा अनुष्ठितं कर्म संस्कारद्वारा ज्ञानोत्पत्तावुपयुज्यते उते-हैवावगते ब्रह्मणि कृतानां कर्मणां भावनया समुच्चय इति । द्वितीयेऽपि किं भावना-फले साक्षात्कारे कर्मोपयोग उत भावनास्वरूपे इति। न तावत्कार्य इत्याह—तस्या

परिमलः ।

रूपेण । यद्यपि गान्धर्वशास्त्राभ्यासरहितैरपि सूक्ष्ममतिभिः श्रूयमाणाः स्वराः किंचित् परस्परवैलक्षण्येनानुभूयन्ते तदेव षड्जत्वादिकमिति तैस्तदवगम्यत एव षड्जादि-शब्दविशेषवाच्यत्वं परं न ज्ञायते, तथापि ये स्थूलमतयः स्वरानाकर्णयन्तोऽपि समवर्ण-परिमाणान् केशादीनिव परस्परविविक्ततयावगन्तुं न प्रभवन्ति तेषामपि गान्धर्वशास्त्र-परिचये सति क्रमेण विविक्तोल्लेखो दृश्यते स इहोदाहरणम् ॥

निषादेति । वीणादिषु प्रथमश्रूयमाणश्रुत्याख्यशब्दावयवकानुरणनात्मका घण्टा-नादानुरणनसदृशाः स्वराः सप्त । तेषां स्वराणां समुदायाः षड्जमध्यमगांधारस्वरप्रभवा नन्द्यावर्तजीमूतसुभद्राख्यास्त्रिविधा ग्रामाः । तेषु ग्रामेषु क्रमेण स्वराणामारोहावरोहाभ्यां निवेशाः प्रतिग्रामं सप्तधा भिन्ना एकविंशतिमूर्छनाः । तदुक्तम्— " प्रथमश्रवणाच्छब्दः श्रूयते ह्रस्वमात्रकः । सा श्रुतिः संपरिज्ञेया स्वरावयवलक्षणा ॥ श्रुत्यनन्तरभावी यः शब्दोऽनुरणनात्मकः । स्वतो रञ्जयति श्रोतृचित्तं स स्वर उच्यते ॥ श्रुतिभ्यः स्युः स्वराः षड्जर्षभगांधारमध्यमाः । पञ्चमो धैवतश्चाथ निषाद इति सप्तमः ॥ यथा कुटुम्बिनः सर्वेऽप्येकीभूता भवन्ति हि । तथा स्वराणां संदोहो ग्राम इत्यभिधीयते ॥ षड्जग्रामो भवेदादौ मध्यमग्राम एव च । गांधारग्राम इत्येताग्रामत्रयमुदाहृतम् ॥ नन्द्यावर्तोऽथ जीमूतः सुभद्रो ग्रामकास्त्रयः । षड्जमध्यमगांधारास्त्रयाणां जन्महेतवः ॥

भामती।

न खलु 'तत्त्वमसि' इत्यादेर्वाक्यान्निर्विचिकित्सं शुद्धबुद्धोदासीनस्वभावम् अकर्तृत्वाद्युपेतम् अपेतब्राह्मणत्वादिजातिं देहाद्यतिरिक्तम् एकमात्मानं प्रतिपद्यमानः कर्मस्वधिकारमवबोद्धुमर्हति। अनर्हश्च कथं कर्ता वाधिकृतो वा। यद्युच्येत निश्चितेऽपि तत्त्वे विपर्यासनिबन्धनो व्यवहारोऽनुवर्तमानो दृश्यते, यथा गुडस्य माधुर्यविनिश्चयेऽपि पित्तोपहतेन्द्रियाणां तिक्तावभासानुवृत्तिः, आस्वाद्य थूत्कृत्य त्यागात्। तस्मादविद्यासंस्कारानुवृत्त्या कर्मानुष्ठानम्, तेन च विद्यासहकारिणा तत्समुच्छेद उपपत्स्यते। न च कर्माविद्यात्मकं कथमविद्यामुच्छिनत्ति कर्मणो वा तदुच्छेदकस्य कुत उच्छेद इति वाच्यम्, सजातीयस्वपरविरोधिनां भावानां बहुलमुपलब्धेः। यथा पयः पयोन्तरं जरयति स्वयं च जीर्यति, यथा विषं विषान्तरं शमयति स्वयं च शाम्यति, यथा वा कतकरजो रजोन्तरा विले पाथसि प्रक्षिप्तं रजोन्तराणि भिन्दत् स्वयमपि भिद्यमानमनाविलं पाथः करोति, एवं कर्माविद्यात्मकमपि अविद्यान्तराण्यपगमयत् स्वयमप्यपगच्छतीति। अत्रोच्यते— सत्यम्, 'सदेव सोम्येदमग्र आसीत्' इत्युपक्रमात् 'तत्त्वमसि' इत्यन्ताच्छब्दाद्ब्रह्ममीमांसोपकरणादसकृदभ्यस्तान्निर्विचिकित्सेऽनाद्यविद्योपादानदेहाद्यतिरिक्तप्रत्यगात्मतत्त्वावबोधे जातेऽपि अविद्यासंस्कारानुवृत्त्यानुवर्तन्ते सांसारिकाः प्रत्ययास्तद्व्यवहाराश्च, तथापि तानप्ययं व्यवहारप्रत्ययान्मिथ्येति मन्यमानो विद्वान् न श्रद्धत्ते पित्तोपहतेन्द्रिय इव गुडं थूत्कृत्य त्यजन्नपि तस्य तिक्तताम्। तथा चायं क्रियाकर्तृकरणेतिकर्तव्यताफलप्रपञ्चमतात्त्विकं विनिश्चिन्वन् कथमधिकृतो नाम? विदुषो ह्यधिकारः? अन्यथा पशुशूद्रादीनामपि अधिकारो दुर्वारः स्यात्। क्रियाकर्त्रादिस्वरूपविभागं च विद्वस्यमान इह विद्वानभि-

कल्पतरुः।

इत्यादिना। तदुच्छेदकस्य कर्मण इति समानाधिकरणे षष्ठ्यौ। **सजातीयेति**। सजातीयाश्च ते स्वे च परे च तेषां विरोधिनस्तथोक्ताः। अवगते तत्त्वे विपर्यासदर्शनेन कर्मानुष्ठानसंभवात् तत्समुच्चय इति प्रत्यवस्थानं दूषयति—**अत्रोच्यत इति**। **विदुष इति**। क्रियाकर्त्रादिर्वास्तव इति निश्चयवत इत्यर्थः। ननु विदुषश्चेदधिकारः तर्हि

परिमलः।

क्रमात्स्वराणां सप्तानामारोहश्चावरोहणम्। मूर्छनेत्युच्यते ग्रामस्था एताः सप्त सप्त च" इति॥

भामती ।

मतः कर्मकाण्डे । अत एव भगवानविद्वद्विषयत्वं शास्त्रस्य वर्णयांबभूव भाष्यकारः । तस्माद्यथा राजजातीयाभिमानिकर्तृके राजसूये न विप्रवैश्यजातीयाभिमानिनोरधिकारः, एवं द्विजातिकर्तृक्रियाकरणादिविभागाभिमानिकर्तृके कर्मणि न

कल्पतरुः ।

क्रियाकर्त्रादेर्वास्तवत्वमित्याशङ्क्याह— क्रियाकर्त्रादीति । विद्वस्यमानः अविद्वानेव विद्वान् भवन्विद्वदाभास इत्यर्थः । 'लोहितादिडाज्भ्यः क्यष्' इति क्यषन्तस्य रूपम् । अत एवाविद्वान्कर्मकाण्डेऽधिकार्यभिमत इति । अविद्वद्विषयत्वं वर्णयांबभूवेति । प्राक् चेत्यादिभाष्येणेत्यर्थः । यदि प्रतीयमानाधिकारनिमित्तस्य

परिमलः ।

क्यषन्तस्य रूपमिति । लोहितादेराकृतिगणत्वादिति भावः । ननु क्यषन्तत्वे विद्वदाभास इत्यर्थो न लभ्यते, यथा पूर्वमलोहितः पश्चाल्लोहितो भवन् लोहितायमानः एवं पूर्वमविद्वान् पश्चाद्विद्वान् भवन् विद्वस्यमान इत्येव तदर्थो लभ्यते, अभूततद्भावे क्यषो विधानात् । विद्वदाभास इत्यर्थस्तु क्यङन्तत्वे लभ्यते, 'कर्तुः क्यङ् सलोपश्च' इति सूत्रेण हि उपमानात् कर्तुस्तद्वदाचरतीत्यर्थे क्यङ्प्रत्ययो विहितः 'श्येनायते काकः' इत्यादि च तदुदाहरणं लिखितम्, तथेह क्यङन्तत्वे विद्वानिवाचरन्नविद्वान् विद्वस्यमान इत्यस्य सोऽर्थो लभ्यते । न च 'ओजसोऽप्सरसो नित्यं पयसस्तु विभाषया' इति वृत्तावुक्तत्वात् ओजोप्सरःपयोव्यतिरिक्तेभ्यः सकारान्तेभ्यः क्यङ् न भवतीति शङ्कनीयम् ; तेभ्यः सलोपो न भवतीत्येव ततः सिद्धया क्यङभावाप्रसक्तेः, वार्त्तिककृता 'सलोपो वा' इति सामान्यतः सलोपस्य विकल्पितत्वमुक्त्वा 'ओजसोऽप्सरसो नित्यम्' इति सकारान्तविशेषयोस्तन्नित्यत्वस्योक्ततया तदनुसारेण तत्र पयोग्रहणस्य ओजोप्सरोव्यतिरिक्तसकलसकारान्तोपलक्षणतायां वक्तव्यत्वाच्चेति चेत्, उच्यते—'क्रियाकर्त्रादिस्वरूपविभागं च विद्वस्यमान इह विद्वानभिमतः' इति टीकावाक्येऽस्मिन् विद्वस्यमान इत्यस्य क्यङ्प्रत्ययान्तता न संभवति, विद्वानिवाचरन्नित्युपमेयगतसादृश्योपसर्जनस्य प्रकृत्यर्थस्य विदुषः 'क्रियाकर्त्रादिस्वरूपविभागम्' इति निर्दिष्टकर्मसापेक्षत्वेनासामर्थ्यात् 'सविशेषणानां वृत्तिर्न' इति महाभाष्यवचनात्। अत एव महान्तं पुत्रमिच्छतीति वाक्यस्यार्थे महान्तं पुत्रीयतीति न वृत्तिः । ननु क्यषन्तत्वेऽपि विद्वदाभास इत्यर्थालाभ उक्तः । नैष दोषः, शास्त्रसिद्धेन मिथ्यात्वेन क्रियाकर्त्रादिविभागमविद्वानेव सन् यः कर्मानुष्ठानोपयोगिनं तं सत्यत्वेन वेत्ति स विद्वस्यमान इत्युक्त्या विद्वदाभास इत्यर्थलाभात् । एवमेव ह्युक्तमाचार्यैरविद्वानेव

भामती।

तदनभिमानिनोऽधिकारः। न चानधिकृतेन समर्थेनापि कृतं वैदिकं कर्म फलाय कल्पते वैश्यस्तोम इव ब्राह्मणराजन्याभ्याम्। तेन दृष्टार्थेषु कर्मसु शक्तः प्रवर्तमानः प्राप्नोतु फलम्, दृष्टत्वात्। अदृष्टार्थेषु तु शास्त्रैकसमधिगम्यं फलमनधिकारिणि न युज्यत इति नोपासनाकार्ये कर्मापेक्षा। स्यादेतत्। मनुष्याभिमानवदधिकारिके कर्मणि विहिते यथा तदभिमानरहितस्यानधिकारः, एवं निषेधविधयोऽपि मनुष्याधिकारा इति तदभिमानरहितस्तेष्वपि नाधिक्रियेत पश्वादिवत्; तथा चायं निषिद्धमनुतिष्ठन् न प्रत्यवेयात् तिर्यगादिवदिति भिन्नकर्मतापातः। मैवम्। न खल्वयं सर्वथा मनुष्याभिमानरहितः, किं

कल्पतरुः।

ब्राह्मण्यादेः शास्त्रनिमित्तमिथ्यात्वप्रत्ययादश्रद्दधानो विध्यनधिकारी तर्ह्यतिप्रसङ्ग इति शङ्कते— स्यादेतदिति। भिन्नमुल्लङ्घितं शास्त्रनिषिद्धं कर्म येन स तथा तस्य भावस्तत्ता अतिक्रान्तनिषेधतेत्यर्थः। अवगतमिथ्याभावस्याप्यधिकारनिमित्तस्य प्रतीयमानत्वान्निषेधाधिकारहेतुता; न च श्रद्दधानता इहाधिकारहेतुः, अतत्त्वविदोऽपि नास्तिकत्वेनाश्रद्दधतो निषेधाधिकारात्; इतरथा निषेधलङ्घिनस्तस्य प्रत्यवायाभावापाताद्विधिषु तु श्रद्धाप्यधिकारहेतुरिति, ब्रह्मविदो नाधिकार इत्याह— मैवमित्यादिना। यद्यपि 'यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं

परिमलः।

विद्वान् भवन्नित्यनेन। न ह्येकेनैव रूपेण क्वचिदर्थे कस्यचित्समानकाले विद्याविद्ये संभवतः। अतोऽस्य वाक्यस्य रूपभेदाभिप्रायत्वसिद्धौ सत्यत्वमिथ्यात्वे एव विद्याविद्याविषयरूपे पर्यवस्यतः। विद्वदाभास इत्यर्थ इति वाक्यशेषात् क्रियाकर्त्रादिविभागे सत्यत्वबुद्धेरेव कर्मानुष्ठानोपयोगित्वाच्च तस्याश्राभूततद्भावः कादाचित्कत्वेन प्रागभूततयोपपादनीयः। न चालोहितो लोहितो भवतीत्यत्रेव अभूततद्भावे सर्वत्र उपात्तपूर्वावस्थोपमर्दनियमः, 'मृदं घटीकरोति' 'तपनो लोहितायति' इत्याद्युदाहरणे घटाद्यवस्थासु मृत्त्वाद्युपमर्दाभावात्। तस्मादविद्वानेव विद्वान् भवन्निति क्यषन्तस्य रूपमिति च युक्तमेव। यदि तु लोहितादिसूत्रे भाष्यकारैर्नायं हलन्ताद्विधीयत इति हलन्तात् क्यषोऽनङ्गीकृतत्वात् इह न भवति क्यषित्यपरितोषः, तदा विदेः कर्मणि नित्यापेक्षासत्त्वात् नित्यसापेक्षेषु चासामर्थ्येऽपि तत्र तत्र भूयसा समासादिवृत्तिदर्शनात् 'सुङनपुंसकस्य' इति सौत्रासमर्थसमासरूपज्ञापकाच्च विद्वस्यमानशब्द आचारक्यङन्त इत्येव समर्थनीयम्।

भामती ।

त्वविद्यासंस्कारानुवृत्त्यास्य मात्रया तदभिमानोऽनुवर्तते । अनुवर्तमानं च मिथ्येति मन्यमानो न श्रद्धत्त इत्युक्तम् । किमतो यद्येवम् ? एतदतो भवति– विधिषु श्राद्धोऽधिकारी नाश्राद्धः । ततश्च मनुष्याद्यभिमाने नश्रद्धधानो न विधिशास्त्रेष्वधिक्रियते । तथा च स्मृतिः—'अश्रद्धया हुतं दत्तम्' इत्यादिका ।

कल्पतरुः ।

भवति' इति श्रद्धारहितमपि कर्म वीर्यवदिति स्थास्यते, तथापि सा श्रद्धा भक्तिरूपा, इयं तु प्रमाणद्वारा विश्वासात्मिकैव, तदभावेऽनधिकार एवेति । **नश्रद्दधान इति** । नकारोऽयं प्रतिषेधवाची । यत एवावगतब्रह्मभावो विधिषु नाधिकारी अत एव ज्ञानानन्तरं कर्मानुष्ठानासंभवान्नोपासनोत्पत्तौ कर्मापेक्षेति द्वितीयकल्पानवकाश इत्याह–

परिमलः ।

नकारोऽयं प्रतिषेधवाचीति । पर्युदासवाचित्वे समासनियमस्य वार्त्तिककारेणोक्तत्वादिह च नञः समासाभावात् प्रतिषेधवाच्येवायम् । ततश्च प्रतिषेध्यक्रियाया यत्तदोश्चाध्याहारेण यः श्रद्दधानो न भवति स नाधिक्रियत इति वाक्यं पूरणीयमित्याशयः । पर्युदासवाचित्वमपि शक्यमुपपादयितुम्, सूत्रकारपक्षे महाविभाषाधिकारेण तद्वाचित्वेऽपि नञः समासनियमाभावात्, मीमांसकैः 'यजतिषु येयजामहं करोति नानूयाजेषु' इत्यस्यानूयाजव्यतिरिक्तेषु यज्ञेषु येयजामहं करोतीत्यर्थनिर्णयेन 'दीक्षितो न जुहोति' इत्यस्यादीक्षितो जुहोतीत्यर्थनिर्णयेन च नञः समासाभावेऽपि पर्युदासवृत्तित्वस्याङ्गीकृतत्वात्, 'वृत्तानुपूर्वं च न चातिदीर्घं' इत्यादिमहाकविप्रयोगदर्शनाच्च, समासनियमेऽपि 'गमिकर्मीकृतनैकनीवृता' इतिवत् नसमास इति कल्पनोपपत्तेश्च । **अत एव ज्ञानानन्तरमिति** । ननु– सगुणज्ञानानन्तरं तदुपासनानिष्ठस्य कर्मानुष्ठानं संभवति फलभूयस्त्वार्थं सहकारित्वेन तदपेक्षितं च भवति । तथैव च आचार्यैः 'अग्निहोत्रादि तु तत्कार्यायैव तद्दर्शनात्' इत्यधिकरणे वक्ष्यते । सगुणतदुपासनातत्फलविचारश्चात्रैव शास्त्रे महता प्रबन्धेन करिष्यते । तद्विचारसाध्यं च तदनुष्ठानम् । अतः सगुणोपासनासहकारिकर्मानुष्ठानायापेक्षितः कर्मावबोध इति तदानन्तर्यमथशब्दार्थः कुतो न भवेत् ? सगुणविचारस्यानुषङ्गिकत्वात् प्रधाननिर्गुणविचारापेक्षितमानन्तर्यमेव वक्तव्यमिति चेत्, तर्हि सगुणविद्यानुष्ठानं कस्यापि न सिध्येत् । एतच्छास्त्रविचारमन्तरेण हि तदनुष्ठानं न संभवति । एतच्छास्त्रविचारे च ब्रह्मलोकप्राप्त्यन्तसकलफलविरक्तस्य त्यक्तसमस्तकर्मणो निर्विशेषप्रेप्सया तज्जिज्ञासोरेवाधिकार इष्यते । तस्माद्विरुद्धमिदमापतितम्– इति

भामती।

निषेधशास्त्रं तु न श्रद्धामपेक्षते। अपि तु निषिध्यमानक्रियोन्मुखो नर इत्येव प्रवर्तते। तथा च सांसारिक इव श्रद्धावगतब्रह्मतत्त्वोऽपि निषेधमतिक्रम्य प्रवर्तमानः प्रत्यवैतीति न भिन्नकर्मदर्शनाभ्युपगमः। तस्मान्नोपासनायाः कार्ये कर्मापेक्षा। अत एव नोपासनोत्पत्तावपि; निर्विचिकित्सशाब्दज्ञानोत्पत्त्युत्तरकालमनधिकारः कर्मणीत्युक्तम्। तथा च श्रुतिः—'न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुः' इति। तत्किमिदानीमनुपयोग एव सर्वथेह कर्मणाम्? तथा च 'विविदिषन्ति यज्ञेन' इत्याद्याः श्रुतयो विरुध्येरन्। न, आरादुपकारकत्वात्कर्मणां यज्ञादीनाम्। तथा हि— तमेतमात्मानं वेदानुवचनेन—

कल्पतरुः।

अत एवेति। एतद्विभजते— निर्विचिकित्सेति। पितृमनुष्यदेवलोकाप्तिहेतुभिः कर्मप्रजाधनशब्दवाच्यापरविद्याभिर्नामृतत्वमाप्तवन्तः, किं तु त्यागसाध्यज्ञानेनेत्यर्थः। तथा हि श्रुत्यन्तरम्— 'पुत्रेणैवायं लोको जय्यो विद्यया देवलोकः कर्मणा पितृलोकः' इति। इह भवान्तरे वा अनुष्ठितं कर्म सत्त्वशुद्धिद्वारेण ज्ञानोत्पत्तिहेतुरिति पक्षमङ्गीकर्तुं शङ्कते— तत्किमिति। आरात् दूरे। इमं पक्षमुपपादयति—तथा हीति। प्रधानेन प्रत्ययार्थेनेच्छया अख्यातोपात्तभावनायाः कार्यस्य संप्रत्ययात्समन्वयादिति। अनेन कर्मणा इदं ममाङ्गमन्तःकरणं संस्क्रियते क्षीणपापं क्रियते पुण्येन चोपधीयते उपचीयते इति यो विदित्वाचरति कर्म स आत्मशुद्ध्यर्थं यजन्नात्मयाजी स

परिमलः।

चेत्, उच्यते— सगुणविद्यापेक्षिणाम् अङ्गावबद्धोपासनापेक्षिणां केवलकर्मठानां च तदनुष्ठानप्रकाराद्यवगतिर्विचारितैतच्छास्त्रेभ्यो गुरुभ्योऽन्वेषणीया, गत्यन्तराभावात्। अभ्युपगम्यते हि कर्मविचारप्राचीनसंध्यावन्दनाध्ययननियमाद्यनुष्ठानार्थं निषादरथकारकर्तृकस्थपतीष्ट्याधानानुष्ठानार्थं च तत्तदवगतिः स्वयमविचारिततत्तद्वाक्यानामेव हितैषिवचनमात्रादिति॥

ननु श्रुतौ धनशब्दस्य देवलोकावाप्तिहेत्वपरविद्या वाच्येति कुतोऽवगतमित्याकाङ्क्षायामाह—तथा हि श्रुत्यन्तरमिति। प्रधानेन प्रत्ययार्थेनेति। 'विविदिषन्ति' इत्यत्र पञ्चमलकारकल्पनया विध्यवरुद्धायां यज्ञदानादिकरणान्वितायां भावनायां धात्वर्थस्य भाव्याकाङ्क्षापूरकत्वेनान्वये वक्तव्ये प्राधान्यादिच्छाया एव तथान्वयो न वेदनस्येति भावः। ननु 'यजेत' 'दद्यात्' 'जुहुयात्' इत्यादौ सर्वत्र धात्वर्थस्य भावनायां करणत्वे-

परिमलः ।

नान्वयस्य दृष्टत्वादिहापि वेदनेच्छायास्तथैवान्वयो युक्तः । यज्ञादिषु तृतीयाश्रवणं तु 'सोमेन यजेत' इत्यादिष्विव धात्वर्थविशेषणतया भविष्यति । न च सोमपयोदध्यादीनां यागहोमनिर्वर्तकतया क्रियाकारकभावो लोकसिद्ध इति युक्तस्तत्र विशेष्यविशेषणभावः इह वेदनेच्छाया यज्ञादीनां च स न लोकसिद्ध इति न युक्तो विशेषणविशेष्यभाव इति वाच्यम् , देवताधिकरणे वक्ष्यमाणेन न्यायेन 'एतस्यैव रेवतीषु वारवन्तीयम्' इति वाक्ये रेवतीनां वारवन्तीयस्य चाधाराधेयभावस्येव यज्ञादीनां विविदिषायाश्च क्रियाकारकभावस्यापि समभिव्याहारादेव सिद्ध्युपपत्तेः । एवं च भाव्याकाङ्क्षायामिच्छाविषयभूतं वेदनमेव भाव्यत्वेनान्वेति । न च वेदनतदिच्छयोः कार्यकारणभावस्य लोके सिद्धत्वात् विधिवैयर्थ्यं शङ्कनीयम् , प्रतिबन्धकपापापनोदनद्वारा यज्ञादिभिः संपन्नया स्थिरविविदिषया वेदनं भावयेदित्येतदर्थकतया विधिसार्थक्यात् इति चेत् ; उच्यते— भावनायाः प्रथमं भाव्याकाङ्क्षायां समानपदोपात्ता प्रधानभूता वेदनसाधनत्वेन निर्ज्ञातगौणपुरुषार्थभावा विविदिषा भाव्यत्वेनान्वेतीति युक्तम् ; यागादिस्तु समानपदोपात्तत्वेऽपि स्वयं क्लेशात्मकत्वात् फलसाधनत्वेनान्यतोऽनवगतत्वाच्च भाव्यत्वेनान्वेतुमयोग्य इति तमतिक्रम्य स्वर्गादेर्भाव्यत्वेन ग्रहणे सति तं केन भावयेदित्याकाङ्क्षायां फलशिरस्कभावनाकरणत्वेनान्वितो भवति । इह यदि भावनायां करणान्तरं श्रुतं न लभ्येत तदा विविदिषामेव करणं गृहीत्वा तत्साध्यं वेदनं फलं कल्पयेत् ; न त्वेतदस्ति, यज्ञादीनां तृतीयया करणत्वेन समर्पणात् । तेषां भावनाकरणत्वेनान्वये मत्वर्थलक्षणा च परिहृता भवति । अन्यथा तेषां करणविशेषणत्वे सोमवता यागेनेतिवत् यज्ञवत्या विविदिषयेत्यादिरूपेण यज्ञेनेत्यादिषु सर्वेषु तृतीयान्तेषु मत्वर्थलक्षणा प्रसज्जेत । एवं क्लिष्टयोजनायामपि विविदिषा भाव्येति पक्षात् फलतो न विशेषः । 'दध्ना जुहोति' इति दधिविशिष्टहोमविधेः प्राप्ताप्राप्तविवेचनेन होमसाधनतया दधिविधान इव स्थिरविविदिषासाधनतया यज्ञादिविधान एवास्य पर्यवसानात् । तस्माद्यज्ञादिभिर्विविदिषां भावयेदिति वेदनेच्छायाः फलत्वेनान्वय इत्येव युक्तम् ॥

नन्विच्छायाः प्रधानत्वेऽपि फलत्वेन नान्वयः किं त्विष्यमाणस्यैवेति स्वर्गकामादिवाक्येषु संप्रतिपन्नम् , तत्कस्य हेतोः ? लिङादिभिर्विधिशब्दैः कर्मणामिष्टसाधनत्वे प्रतीते किं तत्कर्मसाध्यमिष्टमितीष्टविशेषाकाङ्क्षायां यदिच्छाविषयत्वेन निबद्धं विशिष्योपात्तं च तदेव फलत्वेनान्वेतुं योग्यमिति योग्यतावधारणात् योग्यतानुसारेणेच्छामुल्लङ्घ्य तद्विषये करणान्वयस्य अश्वेन जिगमिषतीत्यादौ क्लृप्तत्वाच्च । अयं हेतुरिहापि तुल्य इति

कल्पतरुः।

च देवयाजिनः काम्यकर्तुः श्रेयानिति शातपथश्रुत्यर्थः। स देवयाजीत्यत्र प्रकृतं यज्ञादि। श्रुत्यन्तरमाह— नित्येति।

परिमलः।

चेत्; उच्यते— यज्ञादीनां ज्ञाने विनियोगेऽपि जिज्ञासा यज्ञादिद्वारवर्गमध्ये अवश्यं निवेशनीया, निवेशिता च टीकायाम्। तथा च जिज्ञासाया यज्ञादिफलत्वेनावश्याभ्युपगन्तव्यत्वात् कामोपबन्धेषु यागादिवाक्येषु स्वर्गादेर्भाव्यत्वेनानन्वये अन्यतः स्वर्गादिसाधनानवगत्या कामनाया निर्ज्ञातस्वविषयसाधनप्रवर्तकत्वेन गौणपुरुषार्थत्वाप्रतीत्या तस्या भाव्यत्वेनान्वययोग्यत्वात् नामोपात्तस्वर्गकामनावैलक्षण्येन इहाख्यातोपात्ताया इच्छायाः फलत्वान्वययोग्यताहेतुसाध्यत्वप्रतीतिसद्भावाच्च प्रधानभूतां तामुल्लङ्घ्य ज्ञानस्य फलत्वाभ्युपगमो न युक्तः, तदभ्युपगमे शास्त्रान्तरसिद्धपापक्षयरूपद्वारातिरिक्तस्यापूर्वरूपस्य कर्मणां द्वारान्तरस्यापि कल्पनापत्तेर्वक्ष्यमाणत्वात्॥

ननु जिज्ञासायाः फलत्वान्वययोग्यत्वमसिद्धम्; स्वतः फलत्वरहितायास्तस्याः फलत्वं हि ज्ञानरूपफलजनकत्वोपाधिकं वाच्यम्; तथा च जिज्ञासाफले ज्ञाने प्रागेवेच्छासत्त्वे सैव जिज्ञासेति तस्याः सिद्धत्वात्, प्राक् तदसत्त्वे तस्याः फलजनकत्वोपाधिकपुरुषार्थत्वाप्रतीतेश्च न तस्याः फलत्वान्वययोग्यतेति चेत्; उच्यते— द्विविधा ब्रह्मज्ञानेच्छारूपा जिज्ञासा; एका साङ्गाध्ययनादिप्रयुक्तब्रह्मज्ञानपुरुषार्थत्वावगतिमात्रमूला; सा अनित्यदुःखमये संसारे नित्यसुखमयत्वभ्रममुत्पाद्य चित्तसत्त्वं मलिनयता पाप्मना प्रतिबद्धा सती ज्ञानोद्देशेन तदुपायेषु प्रवृत्तिं जनयितुं न प्रभवति। यदा प्रवृत्तिपर्यन्तजिज्ञासादिप्रतिबन्धकपाप्मसद्भावं शास्त्रतः पुरुषोऽवगच्छति, तदा तथाभूतजिज्ञासोपायमन्विच्छन्विविदिषावाक्येन तदुपायं यज्ञादिकमुपलभ्य तथाभूतजिज्ञासोद्देशेन यज्ञादीननुष्ठाय ततः संसारसुखमयत्वप्रदर्शकपाप्मनिवृत्त्या तस्य वस्तुसदुःखैकरूपत्वं निश्चित्य तदसहमानस्तज्जिहासामूलामपि ब्रह्मजिज्ञासां लभते सा द्वितीया। तया ब्रह्मज्ञानोपायेषु प्रवृत्तिः। यथा भोजने सत्येव देहस्य बलपुष्ट्यादिकं भवेदिति तादर्थ्यावगतिमात्रमूला धातुवैषम्यकृतरोगविशेषप्रतिबद्धा भोजनेच्छा भोजनार्थप्रवृत्तिं जनयितुं न प्रभवति, तत्प्रवृत्तिपर्यन्तबुभुक्षाप्रतिबन्धकरोगसद्भावं यदा वैद्यकादवगच्छति पुरुषः तदा रोगनिवृत्तिपूर्वकबुभुक्षोत्पत्त्युपायमन्विच्छन् वैद्यकशास्त्रेणैव तथाभूतमौषधमुपलभ्य तत्सेवनेन रोगनिवृत्त्या क्षुधमुपलभ्य तामसहमानः तन्निवृत्त्यर्थामपि बुभुक्षां लभते, तया च भोजने प्रवर्तते। अतो नात्र काचिदनुपपत्तिः॥

भामती ।

नित्यस्वाध्यायेन ब्राह्मणा विविदिषन्ति— वेदितुमिच्छन्ति, न तु विदन्ति । वस्तुतः प्रधानस्यापि वेदनस्य प्रकृत्यर्थतया शब्दतो गुणत्वात्, इच्छायाश्च प्रत्ययार्थतया प्राधान्यात्, प्रधानेन च कार्यसंप्रत्ययात् । न हि 'राजपुरुषमानय' इत्युक्ते वस्तुतः प्रधानोऽपि राजा पुरुषविशेषणतया शब्दत उपसर्जन आनीयते, अपि तु पुरुष एव, शब्दतस्तस्य प्राधान्यात् । एवं वेदानुवचनस्येव यज्ञस्यापीच्छासाधनतया विधानम् । एवं तपसोऽनाशकस्य । कामानशनमेव तपः, हितमितमेध्याशिनो हि ब्रह्मणि विविदिषा भवति, न तु सर्वथा अनश्नतो मरणात् । नापि चान्द्रायणादितपः तच्छीलस्य, धातुवैषम्यापत्तेः । एतानि च नित्यानि उपात्तदुरितनिबर्हणेन पुरुषं संस्कुर्वन्ति । तथा च श्रुतिः— 'स ह वा आत्मयाजी यो वेद इदं मेऽनेनाङ्गं संस्क्रियत इदं मेऽनेनाङ्गमुपधीयते' इति । अनेनेति प्रकृतं यज्ञादि परामृशति । स्मृतिश्च— 'यस्यैतेऽष्टाचत्वारिंशत्संस्काराः' इति । नित्यनैमित्तिकानुष्ठानप्रक्षीणकल्मषस्य च विशुद्धसत्त्वस्याविदुष एव उत्पन्नाविविदिषस्य ज्ञानोत्पत्तिं दर्शयत्याथर्वणी श्रुतिः— 'विशुद्धसत्त्वस्ततस्तु तं पश्यति निष्कलं ध्यायमानः' इति । स्मृतिश्च— 'ज्ञानमुत्पद्यते पुंसां क्षयात्पापस्य कर्मणः' इत्यादिका । क्लृप्तेनैव च

कल्पतरुः ।

नित्यानां संस्कारद्वारा ज्ञानोत्पादकतोक्ता; इदानीं यदुक्तं समुच्चयवादिना सर्वेषां कर्मणां ज्ञानकार्ये मोक्षे समुच्चय इति, तत्राह— **क्लृप्तेनैवेति** । नित्यानां फलं पापक्षयं ज्ञानमपेक्षते न स्वर्गादि; तत्र यथा प्रकृतौ क्लृप्तोपकाराणाम् अङ्गानामतिदेशे न प्राकृतोपकारातिरिक्तोपकारकल्पनम्, एवं ज्ञानविनियुक्तयज्ञादीनां क्लृप्तनित्यफलपापक्षयातिरेकेण न नित्यकाम्यकर्मसाधारणो मोक्षोपयोग्युपकारः क-

परिमलः ।

पापक्षयं ज्ञानमपेक्षत इति। विविदिषाद्वारेति शेषः । **ज्ञानविनियुक्तेति** । ज्ञानार्थविविदिषाविनियुक्तेत्यर्थः । ननु क्लृप्तपापक्षयातिरेकेणोपकारान्तरस्याकल्प्यत्वेऽपि यानि पवित्रेष्टयग्निष्टुदश्वमेधादीनि कृष्णाजिनदानादीनि कृच्छ्रचान्द्रायणादीनि च सामान्यतः पापक्षयार्थत्वेन चोदितानि काम्यकर्माणि, तत्साधारण्यमिह यज्ञादिशब्दानामवर्जनीयम्— इत्याशङ्क्य नित्यफलपापक्षयातिरेकेणेति पापक्षयो नित्यफलत्वेन विशेषितः । अवश्यकर्तव्यनित्यानुष्ठानजो हि पापक्षयः स्वतः प्राप्तः । अतः प्रयुक्तिलाघवात् तमेव विविदिषार्थयज्ञादिविधिद्वारं गृहीत्वा निर्वृणोति, न त्ववश्याननुष्ठेयपवित्रेष्टयादिफलभूत-

कल्पतरुः।

ल्यः। पापक्षयस्य च ज्ञानोत्पत्तिद्वारत्वम् 'ततस्तु तम्–' इत्यादिशास्त्रसिद्धम्। न च वाच्यं नित्येभ्यः पापक्षयस्य तस्माच्च ज्ञानोत्पत्तेरन्यतः सिद्धौ किं 'यज्ञेन–' इत्यादिनेति, नित्यानां ज्ञानोत्पत्तिप्रतिबन्धकदुरितनिबर्हकत्वस्य विशेषतः शास्त्रान्तरादसिद्धेः।

परिमलः।

मपि पापक्षयं द्वारं गृहीत्वा तत्संपादनं प्रयोजयति। अतो नित्यफलस्यैव पापक्षयस्येह द्वारता। यथा ऋत्विगपेक्षः ऋतुविधिर्धनार्जने याजनं स्वकीयोपाय इति तादर्थ्येन स्वतः प्राप्तान् ब्राह्मणानेव गृहीत्वा निर्वृणोति न तु क्षत्रियवैश्यानपि ऋत्विजो गृहीत्वा तानार्त्विज्ये प्रयोजयतीति ब्राह्मणानामेव क्रतावार्त्विज्यं तद्वत्। एवं च यस्य यदा यन्नित्यमनुष्ठेयं प्राप्तं तेन तदा तदेव विविदिषार्थतयानुष्ठितं फलार्थं भवति, काम्यानुष्ठानतः प्रसङ्गान्नित्यसिद्धेर्नित्यप्रयुक्तं पापक्षयं द्वारमपि लभत इति प्रयुक्तिलाघवात् नित्यानामेव विनियोग इति भावः॥

ननु प्राकृतोपकारदृष्टान्तेन पापक्षयस्येह द्वारत्वकल्पनं न युज्यते, वैषम्यात्; प्राकृतपदार्थानाम् उपकारमुखेनैव विकृतिष्वतिदेशः न तु पदार्थानामतिदेशानन्तरमुपकारकल्पनेति न तत्र प्राकृतोपकारातिरिक्तोपकारकल्पनाप्रसक्तिः; इह तु प्रत्यक्षश्रुत्या प्रथममेव विनियुक्तानां यज्ञादीनामुपदिष्टाङ्गानामिव पश्चात्कल्पनीय उपकारः प्रथमावगतविनियोगनिर्वाहायाक्लृप्तोऽपि सामान्यशब्दोपात्तसकलनित्यकाम्यसाधारणः कथं न कल्प्येतेत्याशङ्क्याह— **पापक्षयस्य चेति**। स्यादेतदेवं यद्यत्र पदार्थशक्तिमालोच्योपकारः कल्प्यः स्यात्, न त्वेवम्, इह पापक्षय एवोपकार इत्यपि प्रत्यक्षशास्त्रेणैव सिद्धत्वादित्यर्थः। ननु 'ततस्तु तम्–' इति शास्त्रेण पापक्षयस्य ज्ञानोत्पत्तौ द्वारत्वं सिद्धं न तु विविदिषोत्पत्तौ। उच्यते— विविदिषावाक्यानुरोधेन विशुद्धसत्त्वस्ततो विविदिषाद्वारेण पश्यतीति तस्य शास्त्रस्यार्थ इति तात्पर्यम्। एवम् 'ततस्तु तम्–' इत्यादिश्रुतौ विविदिषान्तर्भावस्तदवतारणार्थे टीकाग्रन्थे विशुद्धसत्त्वस्येत्येतदनन्तरमुत्पन्नविविदिषस्येति विशेषणेन स्फुट इत्याचार्यैरिह न विशेषितम्॥

अत्र केचित् संस्कारपक्षमेव सिद्धान्तमभिमन्यमाना विविदिषन्तिवाक्ये विधिर्न कल्प्यो नित्यकर्मभिः पापक्षयस्य तद्विधिभिः पापक्षयात् ज्ञानोत्पत्तेः 'ततस्तु तम्—' 'ज्ञानमुत्पद्यते—' इति श्रुतिस्मृतिभ्यां च सिद्धेः, अतो विविदिषन्तिवाक्यं तत्सिद्धानुवादकमित्याहुः; तन्मतमनूद्य निराकरोति— **न च वाच्यमित्यादिना**॥

विशेषतः शास्त्रान्तरादसिद्धेरिति। पापान्तरनिवर्तनेनापि चरितार्थात् नित्या-

भामती ।

नित्यानां कर्मणां नित्येहितेनोपात्तदुरितनिबर्हणेन पुरुषसंस्कारेण ज्ञानोत्पत्तावङ्ग-भावोपपत्तौ न संयोगपृथक्त्वेन साक्षादङ्गभावो युक्तः, कल्पनागौरवापत्तेः ।

कल्पतरुः ।

अस्मिंश्च विनियोगे सति ज्ञानोद्देशेन नित्यान्यनुतिष्ठतोऽवश्यं ज्ञानं भवति, इतरथा शुद्धिमात्रम्, अनियता च ज्ञानोत्पत्तिरिति विनियोगोपयोगः । 'ज्ञानमुत्पद्यते पुंसां क्षयात्पापस्य कर्मणः' इत्यादिस्मृतेरियं श्रुतिर्मूलम् । श्रुतिस्त्वेतादृशी तुल्यत्वात् नैतामनुवादयति । **न संयोगपृथक्त्वेन साक्षादङ्गभाव** इत्यनेन साक्षादङ्गभावो निषिध्यते न संयोगपृथक्त्वम्, सर्वापेक्षाधिकरणे संयोगभेदस्याश्रयिष्यमाणत्वात् । तस्मादयमर्थः । संयोगपृथक्त्वमस्तीत्येतावता न साक्षादङ्गभावसिद्धिः, आरादङ्गभावे-

परिमलः ।

नुष्ठानात् न ज्ञानोत्पत्तिप्रतिबन्धकपापव्यक्तिविशेषनिबर्हणनियमः सिध्यति, अतस्तत्सिद्धये विनियोगान्तरमित्यर्थः । अत्र संस्कारपक्षावलम्बनैर्विविदिषावाक्यस्य विद्यार्थविनियोगानुपपत्त्या अनुवादकत्वं शङ्कितमिति तद्दृष्ट्या ज्ञानोत्पत्तिप्रतिबन्धकेत्युक्तम्, शङ्कासमाधानयोर्विविदिषार्थपक्षेऽपि तुल्यत्वात् ; स्वमते ज्ञानग्रहणं विविदिषोपलक्षणम् । तस्यामेव यज्ञादिविनियोगस्य प्राग्व्यवस्थापितत्वात् सर्वापेक्षाधिकरणे चोपपादयिष्यमाणत्वात् ; भाष्यकृद्भिरपि 'विद्यासंयोगात् प्रत्यासन्नानि विद्यासाधनानि शमादीनि, विविदिषासंयोगात्तु बाह्यतराणि यज्ञादीनि' इति यज्ञादीनां विविदिषार्थत्वस्य वक्ष्यमाणत्वाच्च ; तेषां ज्ञाने विनियोगे ज्ञानोत्पत्त्यपेक्षितसद्गुरुलाभश्रवणादिप्रवृत्तिग्रहणधारणपाटवादीनामपि ज्ञानार्थं यज्ञादिसंपाद्यत्वापत्त्या तदर्थमपूर्वस्यापि द्वारान्तरस्य कल्प्यतापत्तेश्च ; 'ज्ञानमुत्पद्यते–' इति स्मृतेर्विविदिषन्तिवाक्यमूलकत्वोक्तिस्तु पापक्षयात् विविदिषोदये सति क्रमात् ज्ञानमप्युत्पद्यते इत्येवंपरा स्मृतिरित्याशयेन । **श्रुतिस्त्वेतादृशीति ।** एषैव दृश्यत इत्येतादृशी । आपाततो विविदिषावाक्यवत् 'ततस्तु तम्–' इति श्रुतिर्दृश्यते । वस्तुतस्तु उभयोरप्यान्तरालिकफलभेदोऽस्ति पापक्षयरूपद्वारावगमः 'ततस्तु तम्–' इति श्रुत्यपेक्षः, पापक्षयात् ज्ञानोत्पत्तौ विविदिषान्तर्भावो विविदिषन्तिवाक्यापेक्ष इति । अतः कथमपि नानुवादकत्वशङ्केति भावः । अथ वा एतादृशी एतत्समाना कल्प्यविधिकत्वाविशेषात्, तत्र यदि विधिः श्रूयेत तदा विधिश्रवणरहितं विविदिषावाक्यं तदनुवादकं कल्प्येतापि न त्वेतदस्तीति भावः । सर्वापेक्षाधिकरणे इत्युपलक्षणम् । 'सर्वथापि त एवोभयलिङ्गात्' इत्यधिकरणे चेति द्रष्टव्यम् ॥

भामती।

तथाहि— नित्यकर्मणामनुष्ठानाद्धर्मोत्पादः; ततः पाप्मा निवर्तते; स हि अनित्याशुचिदुःखरूपे संसारे नित्यशुचिसुखख्यातिलक्षणेन विपर्यासेन चित्तसत्त्वं मलिनयति; अतः पापनिवृत्तौ प्रत्यक्षोपपत्तिद्वारापावरणे सति प्रत्यक्षोपपत्तिभ्यां संसारस्य अनित्याशुचिदुःखरूपत्वमप्रत्यूहमवबुध्यते; ततोऽस्य अस्मिन्ननभिरतिसंज्ञं वैराग्यमुपजायते; ततस्तज्जिहासोपावर्तते; ततो हानोपायं पर्येषते; पर्येषमाणश्चात्मतत्त्वज्ञानमस्योपाय इत्युपश्रुत्य तज्जिज्ञासते; ततः श्रवणादिक्रमेण तज्ज्ञानातीत्यारादुपकारकत्वं तत्त्वज्ञानोत्पादं प्रति चित्तसत्त्वशुद्धया कर्मणां युक्तम्। इममेवार्थमनुवदति भगवद्गीता—'आरुरुक्षोर्मुनेर्योगं कर्म कारणमुच्यते। योगारूढस्य तस्यैव शमः कारणमुच्यते' इति। एवं च अननुष्ठितकर्मापि प्राग्भवीयकर्मवशात् यो विशुद्धसत्त्वः संसारासारतादर्शनेन निष्पन्नवैराग्यः, कृतं तस्य कर्मानुष्ठानेन वैराग्योत्पादोपयोगिना, प्राग्भावीयकर्मानुष्ठानादेव तत्सिद्धेः। इममेव च पुरुषधौरेयभेदमधिकृत्य प्रवृत्ते श्रुतिः— 'यदि वेतरथा ब्रह्मचर्यादेव प्रव्रजेत्' इति। तदिदमुक्तम्— कर्मावबोधात्— **प्रागप्यधीतवेदान्तस्य ब्रह्मजिज्ञासोपपत्तेरिति**। अत एव न ब्रह्मचारिण ऋणानि सन्ति येन तदपाकरणार्थं कर्मानुतिष्ठेत्। एतदनुरोधाच्च 'जायमानो वै ब्राह्मणस्त्रिभिर्ऋणवा जायते' इति गृहस्थः संपद्यमान इति व्याख्येयम्। अन्यथा 'यदि वेतरथा ब्रह्मचर्यादेव' इति श्रुतिर्विरुध्येत। गृहस्थस्यापि च ऋणापाकरणं सत्त्वशुद्धचर्थमेव। जरामर्यवादो भस्मान्ततावादोऽन्त्येष्टयश्च कर्मजडानविदुषः प्रति, न त्वात्मतत्त्वविदः पण्डितान्। तस्मात्तस्यानन्तर्यमथशब्दार्थः यद्विना ब्रह्मजिज्ञासा न भवति यस्मिंस्तु सति भवन्ती भवत्येव। न चेत्थं कर्मावबोधः। तस्मान्न कर्मावबोधानन्तर्यमत्राथशब्दार्थ इति सर्वमवदातम्। स्यादेतत्। मा भूदग्निहोत्रयवागूपाकवदार्थः

कल्पतरुः।

ऽपि तदुपपत्तेरिति। नित्यानां दुरितक्षयफलत्वे नित्यकाम्यवैषम्यायोगमाशङ्क्य नित्येहितेनेत्युक्तम्। चित्तसत्त्वं चित्तगतः सत्त्वगुणः। प्रत्यक्षोपपत्तीति। संसारस्यासारत्वं दृष्टविषये प्रत्यक्षग्राह्यम् अदृष्टे तूपपत्त्या। प्रत्यक्षोपपत्त्योश्च प्रवृत्तिद्वारं चित्तगतसत्त्वं तस्य पापकवाटनिवृत्त्या अपावरणे उद्घाटने सतीत्यर्थः। धर्मब्रह्मावबोधयोर्हेतुहेतुमद्भावाभावेऽपि क्त्वाश्रुत्या पौर्वापर्यमाशङ्कते— **स्यादेतदिति**॥

अग्निहोत्रयवागूपाकवदिति। पञ्चमे स्थितम्— 'अर्थाच्च'। 'अग्निहोत्रं

भामती ।

क्रमः, श्रौतस्तु भविष्यति, 'गृही भूत्वा वनी भवेत् वनी भूत्वा प्रव्रजेत्' इति जाबालश्रुतिर्गार्हस्थ्येन हि यज्ञाद्यनुष्ठानं सूचयति । स्मरन्ति च— 'अधीत्य विधिवद्वेदान्पुत्रांश्चोत्पाद्य धर्मतः । इष्ट्वा च शक्तितो यज्ञैर्मनो मोक्षे निवेशयेत्'

कल्पतरुः ।

जुहोति' 'यवागूं पचति' इत्यत्र किं होमपाकयोर्यथापाठं क्रमः उत पाक एव प्रथम इति संशये नियामकश्रुत्यभावाद्धोमनिर्वृत्तेश्च द्रव्यान्तरेण संभवाद्यवागूपाकस्य

परिमलः ।

हेतुहेतुमद्भावाभावेऽपीति । ननु—अनुष्ठानद्वारा हेतुहेतुमद्भावाभावेऽपि प्रामाण्यप्रतिपादनादिद्वारा सोऽस्ति; पूर्वतन्त्रे प्रथमाध्यायप्रतिपादितं वेदप्रामाण्यमिहाप्यपेक्षितम्; द्वितीयाध्यायनिरूपितं शब्दान्तरादिषट्कं विद्याभेदाभेदचिन्तायाम्, तृतीयाध्यायनिरूपितं श्रुतिलिङ्गादिकं सर्वत्रापि तत्तदधिकरणविषयवाक्यार्थनिर्णये, पञ्चमाध्यायनिरूपितं श्रुत्यर्थादिकं वियदादिसृष्ट्यर्चिरादिपर्वक्रमचिन्तायाम्, सप्तमाष्टमनिरूपितमतिदेशप्रमाणम् 'तस्यैतस्य तदेव रूपं यदमुष्य रूपम्' इत्याद्यर्थनिर्णये चापेक्षितम्। 'कुशाच्छन्दःस्तुत्युपगानवत्तदुक्तम्' 'प्रदानवदेव तदुक्तम्' इत्यादिषु च पूर्वतन्त्रसंमतिप्रदर्शनेन तत्तदधिकरणार्थज्ञानमपेक्षितम्; आचार्यैश्च प्रथमसूत्रव्याख्यानावसाने 'वेदान्तमीमांसा तदविरोधितर्कोपकरणा' इति भाष्यव्याख्यानावसरे 'तस्या अविरोधिनः श्रुतिलिङ्गादयस्तार्तीयाः पाञ्चमिकाश्च श्रुत्यादयो वेदप्रामाण्यपरिशोधकाश्च कर्ममीमांसायां विचारिताः' इति पूर्वतन्त्रापेक्षा स्फुटीकृता । अतो हेतुहेतुमद्भावाभावोक्तिरयुक्ता इति चेत्; उच्यते— पूर्वतन्त्र इवात्रापि शास्त्रे वेदप्रामाण्यादीनि सूत्रितान्येव । 'अत एव च नित्यत्वम्' इति हि वेदप्रामाण्यं सूत्रितम्; 'नानाशब्दादिभेदात्' इति शब्दान्तरादिकम् 'शब्दादेव प्रमितः' 'आकाशस्तल्लिङ्गात्' 'तथा चैकवाक्यतोपबन्धात्' 'प्रकरणात्' इत्यादिभिः श्रुतिलिङ्गादिकम्, 'श्रुत्यादिबलीयस्त्वाच्च न बाधः' इत्यादौ श्रुतिलिङ्गादिबलाबलम्, 'विपर्ययेण तु क्रमः' इत्यादिभिरपेक्षितं क्रमप्रमाणजातम्, 'अतिदेशाच्च' इत्यतिदेशप्रमाणमित्येतत्सर्वं सूत्रितमेव । भाष्यकारादिभिः स्फुटीकर्तव्यता तु पूर्वतन्त्रसूत्रेष्वपि समाना । 'तदुक्तम्' इत्येतदत्रैव व्याख्यानेनावगन्तुं शक्यं न कर्मविचारमपेक्षते, अन्यथा 'तद्धैक आहुरसदेवेदमग्र आसीत्' इति वाक्यार्थावगत्यर्थमसद्वादिशास्त्रविचारानन्तर्यमप्यथशब्दार्थः स्यात् । आचार्यैस्तु श्रुतिलिङ्गादयः पूर्वतन्त्रे निरूपिता इत्येतावदुक्तं न त्विह तदपेक्षास्तीति; तत्र हि तदनन्तरं न्यायशास्त्रस्यापेक्षा कण्ठत उक्ता इति न्यायशास्त्रस्यो-

नामानन्तर्यनियमः, क्रमस्य विवक्षितत्वान्न तथेह क्रमो विवक्षितः शेष-

भामती।

इति। निन्दन्ति च—'अनधीत्य द्विजो वेदाननुत्पाद्य तथात्मजान्। अनिष्ट्वा चैव यज्ञैश्च मोक्षमिच्छन्व्रजत्यधः' इति; आह— **यथा च हृदयाद्यवदानानामानन्तर्यनियमः**। कुतः? 'हृदयस्याग्रेऽवद्यति अथ जिह्वाया अथ वक्षसः' इत्यथाग्रशब्दाभ्यां क्रमस्य विवक्षितत्वात्। न तथेह क्रमो विवक्षितः, श्रुत्या तयैवानन्तरमनियमस्य दर्शितत्वात्, 'यदि वेतरथा ब्रह्मचर्यादेव प्रव्रजेद्गृहाद्वा वनाद्वा' इति। एतावता हि वैराग्यमुपलक्षयति। अत एव 'यदहरेव विरजेत्तदहरेव प्रव्रजेत्' इति श्रुतिः। निन्दावचनं च अविशुद्धसत्त्वपुरुषाभिप्रायम्। अविशुद्धसत्त्वो हि मोक्षमिच्छन्नालस्यात्तदुपायेऽप्रवर्तमानो गृहस्थधर्ममपि नित्यनैमित्तिकमनाचरन्प्रतिक्षणमुपचीयमानपाप्मा अधोगतिं गच्छतीत्यर्थः। स्यादेतत्। मा भूच्छ्रौत आर्थो वा क्रमः, पाठस्थानमुख्यप्रवृत्तिप्रमाणकस्तु कस्मान्न

कल्पतरुः।

चारादुपकारकत्वाद्धोमप्राथम्ये प्राप्ते, राद्धान्तः— पदार्थप्रयोजनापेक्षोऽनुष्ठापकविधिरेव प्रयोजनोपयोगिनं क्रमविशेषं नियच्छतीति पक्त्वैव होतव्यम्। न च द्रव्यान्तरानयनम्, श्रुतद्रव्यवैयर्थ्यप्रसङ्गात्। न च दृष्टार्थत्वे सति आरादुपकारकत्वं पाकस्येति॥

पाठस्थानेति। 'क्रमेण वा नियम्येत ऋत्वेकत्वे तद्गुणत्वात्'। 'समिधो यजति' इत्यादिषु क्रमपठितप्रयाजेषु चिन्ता— किं यथापाठमनुष्ठानक्रमः उत न। तत्र वाक्यानां स्वार्थमात्रावसितत्वान्न क्रमपरेत्यनियमप्राप्तौ, राद्धान्तः— यथैतानि वाक्यानि स्वार्थविधायीनि तथा अनुष्ठानापेक्षस्मृत्युपयोगीन्यपि; तानि च क्रमवन्ति स्वाध्यायविध्यध्यापितानि क्रमवन्त्येव स्मरणानि जनयन्ति, स्मृतस्य चानु-

परिमलः।

पयोग इति। अथापि तदानन्तर्यमथशब्दार्थो नेष्यते तथापेक्षोक्तिरहितकर्मविचारानन्तर्यस्य कथशब्दार्थत्वप्रसक्तिः? **आरादुपकारकत्वादिति**। तथात्वसंभवादित्यर्थः॥

अनुष्ठानापेक्षेति। नन्वनुष्ठानापेक्षस्मृत्युपयोगिनो मन्त्रा एव न विधिवाक्यानीति न तत्पाठक्रमेणानुष्ठानकाले क्रमिकपदार्थस्मृतयो भवन्तीति चेत्, सत्यम्। मन्त्रपाठक्रमाभावे विधिपाठक्रमोऽप्यनुष्ठानकालपदार्थस्मृतिक्रमनियामकत्वेनाद्रियते तस्य

कल्पतरुः ।

ष्ठानम्–' इति स्मरणक्रमेणानुष्ठानं नियम्येत; एवं क्रमपाठोऽपि दृष्टार्थो भविष्यति; तस्मात् पाठक्रमेण नियम इति । सूत्रार्थस्तु एकस्मिन् क्रतौ श्रूयमाणानां प्रयाजानां पाठक्रमेण प्रयोगक्रमो नियम्येत, तस्य पाठक्रमस्य अनुष्ठाने लोके गुणत्वावगमात् तद्यथा 'स्रायादनुलिम्पेद्भुञ्जीत' इति । 'स्थानाच्चोत्पत्तिसंयोगात्'। ज्योतिष्टोमविकारे साद्यस्क्रसंज्ञेऽतिदेशप्राप्तेष्वग्नीषोमीयादिपशुषु सहत्वगुणविधानार्थं वचनं श्रूयते 'सह पशूनालभते' इति; तद्विधानाच्च प्राकृतः प्रथममग्नीषोमीयः ततः सवनीयः ततोऽनूबन्ध्य इत्येवंरूपः क्रमो निवर्तते । सहत्वं चेदं सवनीयस्थाने। तथा सति हीतरयोस्तुल्यवत् स्थानचलनं भवति । सवनीयश्चाश्विनग्रहग्रहणानन्तरकालः प्रकृतावाम्नायते—'आश्विनं ग्रहं गृहीत्वा त्रिवृता यूपं परिवीयाग्नेयं सवनीयं पशुमुपाकरोति' इति । तत्रैककालत्वलक्षणसहत्वासंभवादवश्यंभाविनि क्रमे कः प्रथमं प्रयुज्यतामित्यपेक्षायां किमनियमेनैषां प्राथम्यमुत सवनीयस्येति संशयः । तत्र नियामकश्रुत्याद्यभावादनियमे प्राप्ते, राद्धान्तः— स्थानात्सवनीयप्राथम्यं नियम्येत। कुतः ? उत्पत्तिसंयोगात्। प्रकृतौ हि सवनीयस्याश्विनग्रहणानन्तर्यमुत्पत्तावगतम्, विकृतौ च तेनैव कालेन स उपस्थापितः, अग्नीषोमीयस्तु सहत्ववचनेन स्वस्थानाच्चालितः; ततः प्रथमं सवनीयस्यैवोपाकरणादिप्रयोगः, इतरयोस्तु तत्साहित्यवचनात् तदानन्तर्यम्; मिथस्त्वनियमः । अथ वा प्रकृतिदृष्टपौर्वापर्यस्यासति बाधके त्यागायोगात् प्रथममग्नीषोमीयमुपाकृत्यानूबन्ध्य उपाकर्तव्य इति, मुख्यक्रमेण चाङ्गानां तदर्थत्वात्। 'सारस्वतौ भवत एतद्वै दैव्यं मिथुनं यत्सरस्वती सरस्वांश्च' इति सरस्वतीदैवतं सरस्वद्दैवतं च युगपत्कर्मद्वयं श्रूयते । तत्र च सरस्वतीदैवतस्य याज्यानुवाक्यायुगलं प्रथममाम्नायते तदनन्तरं पुंदैवतस्य । तत्र मन्त्राणां प्रयोगशेषत्वात् याज्यानुवाक्यापाठक्रमेण प्रधानक्रमोऽवगतः । अङ्गविशेषे तु निर्वापादौ संशयः– किमनियतोऽस्य क्रमः उत प्रधानक्रमेण नियत इति ।

परिमलः ।

दृष्टार्थत्वायेत्याह— **एवं क्रमपाठोऽपीति । तद्यथेति ।** लोके 'स्रायादनुलिम्पेत्' इत्यादौ पाठक्रमोऽनुष्ठानक्रमार्थ एव; अत एव 'अनुलिम्पेत् स्रायात्' इति वदन्नभिज्ञेन 'मैवं वादीः स्रायादनुलिम्पेदिति वद तथैवानुष्ठानक्रमात्' इति व्युत्पाद्यते; तस्य तादर्थ्याभावे तथा व्युत्पादनं न क्रियेतेति भावः । **तद्विधानाच्चेति ।** सहत्वविधानादौपवसथ्ये अहन्यग्नीषोमीयः, ततः सौम्येऽहनि सवनत्रयव्यापिसवनीयपश्वनुष्ठाने सति

कल्पतरुः।

तत्र याज्यानुवाक्यापाठक्रमस्य प्रधानमात्रगोचरत्वादङ्गानामनुष्ठानक्रमे श्रुत्याद्यभावान्मुख्यक्रमस्य च प्रमेयत्वेन प्रमाणत्वानुपपत्तेरनियमे प्राप्ते, राद्धान्तः— मुख्यक्रमेणाङ्गानां क्रमो नियम्येत, तदर्थत्वात् प्रधानार्थत्वादङ्गानाम्। यद्यपि मुख्यक्रमस्य याज्यानुवाक्यापाठक्रमापेक्षया प्रमेयत्वं तथापि प्रमितस्यास्य धूमादेरिवान्यत्र प्रमाणत्वमविरुद्धम्। प्रधानस्य हि प्रयोगविधिना साङ्गस्यैव प्रयोगश्चोदितः; स चावर्जनीयाद्व्यवधानादधिकं व्यवधिमङ्गानां न सहते। यदि तु प्रधानान्तरसंनि-

परिमलः।

अवभृथानन्तरमनूबन्ध्य इत्येवंरूपः प्राकृतक्रमो निवर्तत इत्यर्थः। **अधिकं व्यवधिमिति**। साङ्गप्रयोगविधिबलादङ्गानां प्रधानसाहित्यमवगतम्; तच्चैकक्षणानुष्ठेयत्वरूपं न संभवतीति संनिकर्षरूपं पर्यवस्यति। स च संनिकर्षः प्रधानाव्यवहितपूर्वापराङ्गद्वयव्यवहिताङ्गानामात्यन्तिको न संभवतीति यस्याङ्गस्य यावद्भिः स्वप्रधानाङ्गैः प्रधानान्तराङ्गैर्वा व्यवधानमवर्जनीयं तत्तावद्भिर्व्यवधानं सहते नान्यैः। ततश्च पश्चादनुष्ठेयस्य प्रधानस्याङ्गं निर्वापादि प्रथमानुष्ठेयप्रधानाङ्गान्निर्वापादितः पूर्वं यद्यनुष्ठीयेत, तदा तदङ्गमनुज्ञाताधिकेनापि पश्चादनुष्ठीयमानप्रथमप्रधानाङ्गेन स्वप्रधानात् व्यवहितं स्यात्; तन्न सहते अङ्गप्रधानसाहित्यबोधकः प्रयोगविधिरित्यर्थः। मुख्यक्रमानादरे पाश्चात्यप्रधानाङ्गस्य पूर्वप्रधानाङ्गेन प्रयोगविध्यननुज्ञातं व्यवधानं भवेदित्यमुमेवार्थं विवृण्वन्नाह— **यदि त्विति**। अस्मिन्नर्थेऽस्य वाक्यस्येत्थं योजना— यदि प्रधानान्तरस्य प्रथमप्रधानस्य संनिधौ तत्संनिकृष्टतया तदङ्गानुष्ठानम्, द्वितीयप्रधानाङ्गानुष्ठानानन्तरं प्रथमप्रधानाङ्गानुष्ठानमिति यावत्; तथानुष्ठाने हि प्रथमप्रधानाङ्गानि द्वितीयप्रधानाङ्गव्यवधानाभावात् स्वप्रधानसंनिकृष्टानि भवन्ति; तदा तथा मुख्यक्रमानादरेणानुष्ठाने अङ्गानि प्रथमानुष्ठीयमानद्वितीयप्रधानाङ्गनिर्वापादीनि तेनैव पश्चादनुष्ठीयमानप्रथमप्रधानाङ्गनिर्वापादिना स्वप्रधानाद्विप्रकृष्येरन्— इति। यदि तु प्रधानान्तरसंनिधावन्यप्रधानाङ्गानुष्ठानम्, तदा तेनैव प्रधानान्तरेणान्यप्रधानाङ्गानि स्वप्रधानाद्विप्रकृष्येरन्नित्यापाततः प्रतीयमानोऽर्थस्तु न ग्राह्यः। मुख्यक्रमानादरे पाश्चात्यस्य पुंदैवतयागस्य किमङ्गं पूर्वेण स्त्रीदैवतयागेन व्यवहितं स्यादित्यापाद्यते? अवदानात्प्राचीनानां हि तदङ्गानां पूर्वप्रधानेन व्यवधानमातिदेशिकपाठक्रमादिप्राप्तं सह्यमेव; अवदानादिमध्ये तु न कस्यापि तेन व्यवधानप्रसक्तिरस्ति, अवदानादिप्रदानान्तस्य पूर्वप्रधानानन्तरमेवानुष्ठानात्। अतः प्रधानान्तरव्यवधानापादनायोगात् पूर्वोक्त एवार्थो ग्राह्यः॥

कल्पतरुः ।

धावन्याङ्गानुष्ठानं तदा तेनैव स्वप्रधानादङ्गानि विप्रकृष्येरन्। अतो मुख्यक्रमादङ्गक्रमनियम इति । 'प्रवृत्त्या तुल्यकालानां गुणानां तदुपक्रमात्' । वाजपेये 'सप्तदश प्राजापत्यान् पशूनालभते' इति सप्तदश यागा अङ्गत्वेन श्रूयन्ते ; तेषां च 'वैश्वदेवीं कृत्वा सह प्रचरन्ति' इति प्रयोगसाहित्यश्रवणादेकोपक्रमोपसंहार एक एवावान्तरप्रयोगः । तेषां चातिदेशप्राप्ताः प्रोक्षणादिधर्मा न एकैकत्र समापनीयाः ; किं तर्हि ? सर्वेषु पशुष्वेक एव पदार्थः परिसमापनीयस्ततोऽन्यस्ततोऽन्यः । इतरथा ह्येकस्मिन्पशौ सर्वाङ्गानुष्ठाने प्रधानस्याङ्गैर्विप्रकर्षः स्यात् । तत्र प्रथममेकपदार्थानुष्ठाने विशेषतो वेदाभ्यनुज्ञाभावादिच्छैव नियामिका ॥

तदेवं स्थिते द्वितीयादिपदार्थप्रयोगे संशयः— किं प्रथम इव द्वितीयादावपीच्छैव कारणमुत प्रथमप्रवृत्त्यैव नियम इति । तत्र पूर्वपक्षः— न तावत् श्रुत्या-

परिमलः ।

अतो मुख्यक्रमादिति । यद्यपि वक्ष्यमाणप्रवृत्तिक्रमोऽप्यत्र संभवति याज्यानुवाक्याप्रवृत्तिक्रमेण निर्वापादयः कार्याः अन्यथा पुंदैवत्ययागाङ्गयोर्निर्वापानुवचनयोरननुज्ञातव्यवधानप्रसङ्गादिति, तथापि प्रवृत्तिक्रमवत् मुख्यक्रमस्यापि पदार्थक्रमनियमनसामर्थ्यमस्ति, अङ्गानामिव अङ्गप्रधानयोरपि परस्परं वर्जनीयव्यवधानस्य परिहरणीयत्वात् ; अतस्तदपि प्रमाणमिह संभवतीत्युदाहृतम् । मन्त्रक्रमं पिधाय 'सारस्वतौ भवतः एतद्वै दैव्यं मिथुनं यत् सरस्वती च सरस्वांश्च' इति विधिवाक्यशेषगतपाठक्रममात्रेण मुख्यक्रमं निश्चित्य चेत्थमुदाहृतम् । मुख्यक्रमस्यासंकीर्णोदाहरणं त्विदं द्रष्टव्यम्—दर्शपूर्णमासयोः दधिधर्माः पूर्वं पठिताः ; तत आग्नेयस्य निर्वापादयः ; याज्यानुवाक्ययोस्तु विपरीतः पाठः । तत्र प्रवृत्तिद्वयं परस्परविरुद्धम्, 'प्रयाजशेषेण हवींष्यभिघारयति' इति विहितप्रयाजशेषाभिघारणक्रमे न नियामकम्, किं तु मुख्यक्रमादाग्नेयस्य प्रथममभिघारणमिति । **प्रधानस्याङ्गैर्विप्रकर्षः स्यादिति** । यत्र पशौ सर्वाण्यङ्गानि प्रथममनुष्ठितानि तत्पशुयागात् प्रकृतौ तत्संनिहितान्यप्यङ्गान्यत्र विकृतावत्यन्तं विप्रकृष्येरन् ; तच्चायुक्तम्, प्रकृताविव विकृतावपि तेषां प्रधानसंनिकर्षस्य वक्तव्यत्वात् । अतः पदार्थानुसमय एव कार्यो न काण्डानुसमय इत्यर्थः । 'संनिपाते प्रधानानामेकैकस्य गुणानां सर्वधर्मः स्यात्' इत्यधिकरणार्थोऽयं प्रकृताधिकरणापेक्षितो वर्णितः । प्रकृताधिकरणार्थमाह— **द्वितीयादिपदार्थप्रयोग इति** । प्रवृत्तिक्रमानादरे तत्तत्पशुगतानामुपाकरणप्रोक्षणादिपदार्थानां परस्परप्रत्यासत्तिरेकरूपा न स्यात् ;

भामती।

भवतीत्यत आह— **शेषशेषित्वे प्रमाणाभावात्**। शेषाणां समिदादीनां शेषिणां चाग्नेयादीनाम् एकफलवदुपकारोपनिबद्धानाम् एकफलावच्छिन्नानाम् एकप्रयोगवचनोपगृहीतानाम् एकाधिकारिकर्तृकाणाम् एकपौर्णमास्यमावास्याकालसंबद्धानां युगपदनुष्ठानाशक्तेः, सामर्थ्यात्क्रमप्राप्तौ तद्विशेषापेक्षायां पाठा-

कल्पतरुः।

दीहास्ति नियामकम्। प्रथमाङ्गप्रवृत्तिश्च पौरुषेयी वेदेन नाभ्यनुज्ञायत इति न तद्वशादुत्तरनियमः। तेन प्रथमतराश्रितपुरुषेच्छैव चरमतराङ्गनियामिका। प्रयोगसौकर्यं चैवं लभ्यते। इतरथा हि प्रथमप्रयोगानुसंधानव्यग्रमनस उपरितनं च प्रयोगं तद्वशेन तन्वानस्य मतिक्लेशः स्यात्। तस्मादनियम इति प्राप्ते, राद्धान्तः— एकप्रयोगतया तुल्यकालानां प्रोक्षणाद्यङ्गानां प्रवृत्त्या क्रमनियमः। कुतः? तदुपक्रमात्, तेन प्रधानेनाङ्गानामुपक्रमात् तदेकप्रयोगत्वादित्यर्थः। सप्तदश यागाङ्गानि सह प्रयोज्यानि; प्रथमाङ्गानुष्ठाने सति द्वितीयादौ षोडशभिर्व्यवधानमभ्यनुजानन्ति न ततोऽधिकम्। प्रावृत्तिकक्रमाश्रयणे च सप्तदशसु प्रथमाङ्गानुष्ठाने द्वितीयो धर्मः प्रथमादिषशुषु क्रियमाणः षोडशभिरेव व्यवधीयते। क्रमान्तराश्रयणे अधिकैरपि व्यवधानं स्यात्। अतः प्रयोगवचनकोपपरिहाराय प्रवृत्त्या नियम इति॥

शेषाणां शेषिणां च क्रमापेक्षायां हेतुमाह— **युगपदिति**। युगपदनुष्ठानप्राप्तौ **क्रमः स्यात्**; तदेव कुतः? तत्राह— **एकपौर्णमासीति**। षण्णां मध्ये त्रयः पौर्णमास्या संबद्धास्त्रयोऽमावास्यया। कालैक्येऽपि यदि कर्तृभेदः स्यात् तदा न क्रमोऽपेक्ष्येत; तन्मा भूदित्याह— **एकाधिकारीति**। स्वामित्वेनाधिकारित्वं तस्यैवानुष्ठातृत्वेन कर्तृत्वम्। एकाधिकारिकर्तृकत्वे हेतुमाह— **एकप्रयोगवचनेति**। 'यजेत' इत्यास्यते कर्त्रैक्यस्य विवक्षितत्वात्प्रयोगवचने कर्त्रैक्यं सिद्धम्। एकप्रयोगवचनपरिग्रहे हेतुमाह— **एकफलवदिति**। एकश्चासौ फलवतः प्रधानस्य उपकारश्च

परिमलः।

अतस्तद्वैषम्यपरिहाराय पङ्क्तिपरिवेषणन्यायेन प्रवृत्तिक्रम एष्टव्य इत्यर्थः। **त्रयः पौर्णमास्येति**। यदाग्नेयवाक्यस्यार्थभेदेन द्वेधा विभागे सति 'यदाग्नेयोऽष्टाकपालोऽमावास्यायां चाच्युतो भवति' इति वाक्येन अमावास्यायामेक आग्नेयो विधीयते, 'यदाग्नेयोऽष्टाकपालः पौर्णमास्यां चाच्युतो भवति' इति वाक्येन पौर्णमास्यामपरः; ततश्च पौर्णमास्यामाग्नेयाग्नीषोमीयोपांशुयाजास्त्रयः अमावास्यायामाग्नेयश्चतदधियागास्त्रय इत्य-

भामती ।

दयस्तद्भेदनियमाय प्रभवन्ति । यत्र तु न शेषशेषिभावः नाप्येकाधिकारावच्छेदः यथा सौर्यार्यम्णप्राजापत्यादीनाम्, तत्र क्रमभेदापेक्षाभावान्न पाठादिः क्रमविशेषनियमे प्रमाणम्, अवर्जनीयतया तस्य तत्रावगतत्वात् । न चेह धर्मब्रह्मजिज्ञासयोः शेषशेषिभावे श्रुत्यादीनामन्यतमं प्रमाणमस्तीति । ननु शेषशेषिभावाभावेऽपि क्रमनियमो दृष्टः यथा गोदोहनस्य पुरुषार्थस्य दार्शपौर्णमा-

कल्पतरुः ।

तस्मिन् समुच्चित्य साधनत्वेन उपनिबद्धाः शेषाः, एकेन फलेनावच्छिन्नाः शेषिणः, अत एकप्रयोगवचनोपगृहीता इति । सौर्यार्यम्णेति । एकादशे स्थितम्—'अङ्गवत् क्रतूनामानुपूर्व्यम्' । 'सौर्यं चरुं निर्वपेद्ब्रह्मवर्चसकामः' 'अर्यम्णे चरुं निर्वपेत्स्वर्गकामः' 'प्राजापत्यं चरुं निर्वपेच्छतकृष्णलमायुष्कामः' इत्यादिषु क्रमपठितक्रतुषु चिन्ता— किं पाठक्रमेण प्रयोज्या उत अनियमेनेति । तत्र यथाङ्गानां समिदादीनामेकेन युगपत्करणाशक्तेः क्रमाकाङ्क्षायां पाठात् क्रमनियमः, एवं क्रतूनामपीति प्राप्ते, राद्धान्तः— 'न वा असंबन्धात्' । अङ्गेष्वेकप्रयोगवचनपरिग्र-

परिमलः ।

र्थः । **एकश्चासाविति** । सर्वैरङ्गैः समुच्चितैः स्वस्वासाधारणदृष्टादृष्टोपकारद्वारकैरेकः प्रधानगतफलजननसामर्थ्योद्बोधनरूपाखण्डोपकारो जायत इत्येकादशे स्थिता मीमांसकमर्यादा ॥

नन्वध्ययनवदर्थावबोधार्थो विचारोऽपि वेदपाठक्रमेण स्यादिति कर्मब्रह्मकाण्डयोर्विचारे पाठक्रमो नियामकः स्यात्, मुख्यक्रमो वा नियामकः स्यात्, 'स्वाध्यायाध्ययनेन अर्थज्ञानं भावयेत्' इत्यध्ययनविधिवाक्यविपरिणामे मुख्ययोः कर्मब्रह्मकाण्डाध्ययनयोः पौर्वापर्यस्य क्लृप्तत्वात् प्रवृत्तिक्रमो वा स्यात्, 'अध्ययनगृहीतेन स्वाध्यायेनार्थज्ञानं भावयेत्' इति तद्विधिविपरिणामपक्षे अध्ययनमीमांसारूपयोरङ्गयोर्मध्ये अध्ययने क्रमस्य प्रवृत्तत्वादित्याशङ्क्य एकप्रयोगावच्छिन्नतया एकपुरुषानुष्ठेयत्वेन क्रमाकाङ्क्षायां पाठक्रमादिर्नियामको भवति; न चात्र तदस्ति, कर्मब्रह्मविचारयोर्विलक्षणाधिकारिकत्वात्; एकाधिकारिकत्वेन क्रमाकाङ्क्षाकल्पने च वेदभाष्यवद्विचारस्याप्यादित आरभ्य प्रवृत्तिप्रसङ्गाच्चेति दर्शयितुं यत्र क्रमाकाङ्क्षा नास्ति तत्र पाठक्रमस्यानियामकतायामधिकरणमुदाहरति— **एकादशे स्थितमिति** । 'एकादशे' इति प्रामादिकः पाठः । 'अङ्गवत्क्रतूनाम्' इत्यधिकरणं हि पाञ्चमिकम् । अथ वा पञ्चमतृतीयपादगतमे-

शेषित्वे अधिकृताधिकारे वा प्रमाणाभावात् धर्मब्रह्मजिज्ञासयोः। फल-

भामती।

सिकैरङ्गैः सह, यथा वा 'दर्शपूर्णमासाभ्यामिष्ट्वा सोमेन यजेत' इति दर्शपूर्णमास-सोमयोरशेषशेषिणोरित्यत आह—**अधिकृताधिकारे वा प्रमाणाभावात्**—इति योजना। स्वर्गकामस्य हि दर्शपूर्णमासाधिकृतस्य पशुकामस्य सतो दर्शपूर्ण-

कल्पतरुः।

हादस्ति क्रमाकाङ्क्षा; क्रतुषु तु नानाफलेषु नैकः प्रयोगवचनोऽस्ति; न च सर्वे मिलित्वा प्रयोजयन्ति; तेनैषामेकप्रयोगवचनसंबन्धाभावान्नास्ति क्रमाकाङ्क्षा; किं तु पुरुषस्य। न च तदाकाङ्क्षितं विधिप्रतिपाद्यमिति तदिच्छयैव क्रमः; पाठक्रम-स्त्वध्ययनार्थ इति। युगपत्पाठासंभवेनावर्जनीयतया पाठक्रमस्यावगतत्वात्तन्नियमस्य चाध्ययनार्थत्वादित्यर्थः॥

गोदोहनस्य पुरुषार्थत्वं चतुर्थे चिन्तितम्—'यस्मिन्प्रीतिः पुरुषस्य तल्लिप्सार्थलक्षणाविभक्तत्वात्'। दर्शपूर्णमासयोः 'गोदोहनेन पशुकामस्य प्रणयेत्' इति श्रूयते। तत्र गोदोहने क्रत्वर्थत्वपुरुषार्थत्वसंदेहे 'पशुकामस्य' इति समभिव्याहा-

परिमलः।

कादशमिदमधिकरणमित्यभिप्रायमेकादश इत्येतद्योज्यम्; 'अन्ते तूत्तरयोर्दर्ध्यात्' इति सूत्रं तत्पूर्वाधिकरणप्रत्युदाहरणतया तच्छेषभूतम्; तस्याधिकरणान्तरत्वे त्वेकादश इत्यस्यातीते इति शेषोऽध्याहार्यः। **किं तु पुरुषस्येति**। वस्तुतः पुरुषस्यापि नास्ति काम्यनैमित्तिकेषु क्रतुषु क्रमाकाङ्क्षा, कामनानां निमित्तानां च क्रमनियमाभावात् तदधीनत्वाच्च काम्यनैमित्तिकानुष्ठानस्य। **क्रत्वर्थत्वेति**। केवलं पुरुषशेषत्वम् उत क्रतु-शेषत्वमपीति संदेहे इत्यर्थः। **पशुकामस्येति**। **समभिव्याहारात्मना वाक्येनेति**। ननु 'गोदोहनेन' इति तृतीया 'पशुकामस्य' इति षष्ठी च शेषशेषिभावे श्रुतिरेवास्ति, कथमिह पुरुषशेषत्वे वाक्यं प्रमाणमुपन्यस्तम्? उच्यते—'गोदोह-नेन' इति तृतीयया फलभावनाकरणत्वं नोच्यते, किं तु संनिधिप्राप्तप्रणयनक्रियाकर-णत्वम्, सिद्धरूपस्य दध्नो यागादिवत् स्वरूपेण फलभावनाकरणत्वासंभवेन यत्किंचिद्धा-त्वर्थकारकतारूपक्रियानुरागेण साध्यत्वं संपाद्य तस्य फलभावनाकरणत्वस्योपपादनीय-त्वात्; अतस्तृतीयार्थकारकविशिष्टं दधि दधिविशिष्टं वा कारकं फलाय विधेयमिति, तृतीयया तावत् गोदोहनस्य न फलभावनाशेषत्वप्रतीतिः; नापि षष्ठीश्रुत्या पशुफलस्य

भामती ।

मासक्रत्वर्थाप्प्रणयनाश्रिते गोदोहने अधिकारः । नो खलु गोदोहनद्रव्यमव्याप्रियमाणं साक्षात्पशून्भावयितुमर्हति । न च व्यापारान्तराविष्टं श्रूयते यतस्तदङ्गक्रममतिपतेत् ; अप्प्रणयनाश्रितं तु प्रतीयते 'चमसेनापः प्रणयेद्गोदोहनेन पशुकामस्य' इति समभिव्याहारात्, योग्यत्वाच्चास्यापां प्रणयनं प्रति । तस्मा-

कल्पतरुः ।

रात्मना वाक्येन क्रतूपकारकत्वेन चोभयार्थमिति प्राप्ते, सिद्धान्तः— नोपकारकत्वं शेषत्वं किं तु तादर्थ्यम् । तथा च गोदोहनस्य पशुशेषत्वान्न क्रत्वङ्गत्वम् । अङ्गापेक्षा च क्रतोः उपकाराय । अन्यार्थस्यापि क्रतूपकारकत्वमविरुद्धम् । तेन वाक्यात्पुरुषार्थमेवेति । यस्मिन्निर्वृत्ते पुंसः प्रीतिः फलं भवति, तस्य लिप्सा फलप्रयुक्ता न विधितः । कुतः ? तस्य फलसाधनस्य प्रीत्या विभागाभावात्– इति सूत्रार्थः ॥

अस्य चाप्प्रणयनाश्रितत्वात्तत्क्रम एव क्रम इति गोदोहनस्य अप्प्रणयनाश्रितत्वमुपपादयति— नो खल्विति । कल्प्यतां तर्हि व्यापारान्तरावेशः ; तत्राह— अप्प्रणयनाश्रितमिति । प्रणयनान्तरविशिष्टविधिमाशङ्क्य प्रतीयते इत्युक्तम् । संनिहितलाभे न विशिष्टविधिरित्यर्थः । सामर्थ्यरूपात् लिङ्गाच्च अप्प्रणयनाश्रितत्वमाह– योग्यत्वाच्चेति । यथा वा दर्शपूर्णमासाभ्यामिति । चतुर्थे चिन्तितम्—' उत्पत्ति-

परिमलः ।

शेषित्वप्रतीतिः, तस्याः संबन्धसामान्यवाचित्वेन शेषित्वविशेषपर्यवसानार्थं समभिव्याहृतपदार्थान्तरशेषित्वान्वययोग्यतावधारणसापेक्षत्वात् । अतः प्रथमोपस्थितं गोदोहनपशुफलसमभिव्याहारात्मकं वाक्यमेव ' स्वर्गकामो यजेत ' इति वाक्यमिव फलशेषत्वे प्रमाणम्– इति । क्वचित्कोशे पशुकामस्येत्येतदनन्तरम् ' श्रुत्या ' इत्यपि पदान्तरं दृष्टम् ; तत्प्रक्षिप्तमिव भाति, वाक्यात् पुरुषार्थमेवेत्युपसंहारे तददर्शनात् ; समभिव्याहारापेक्षपर्यवसानलभ्यश्रुतित्वाभिप्रायं वा तद्योज्यम् । नोपकारकत्वमिति । तथात्वे प्रधानस्याप्यङ्गानुष्ठापनेन तदुपकारकस्य तच्छेषत्वप्रसङ्गादिति भावः । तादर्थ्ये तदुद्देश्यककृतिसाध्यत्वम् । ननु गोदोहनस्य चमसस्थानापन्नस्य क्रत्वनङ्गत्वे तत्प्रयोगे चमसनिवृत्त्या अङ्गविकलः क्रतुर्न फलदः स्यादित्याशङ्क्याह— अङ्गापेक्षेति । अङ्गं ह्युपकारायापेक्ष्यते, अङ्गसाध्योपकारस्यानङ्गेनापि सिद्धौ किमङ्गवैकल्येन हीयत इत्यर्थः । फलार्थस्य कथं क्रतावुपकारकत्वमित्याशङ्क्य प्रासादप्रकाशार्थस्य दीपस्य रथ्यासंचार इवेत्याह— अन्यार्थस्यापीति । यथा वा दर्शपूर्णमासाभ्यामितीति । प्राचीनोऽप्ययं

भामती।

त्क्रत्वर्थाप्प्रणयनाश्रितत्वाद्गोदोहनस्य तत्क्रमेण पुरुषार्थमपि गोदोहनं क्रमवदिति सिद्धम्। श्रुतिनिराकरणेनैव इष्टिसोमक्रमवदपि क्रमोऽपास्तो वेदितव्यः।

कल्पतरुः।

कालविशये कालः स्याद्वाक्यस्य तत्प्रधानत्वात्'। 'दर्शपूर्णमासाभ्यामिष्ट्वा सोमेन यजेत' इति श्रूयते। तत्र संदेहः– किमिदमङ्गस्य विधायकम् उत कालस्येति। तत्र क्त्वाश्रुतेरङ्गस्य; तच्चाङ्गत्वम् 'यजेत' इति विधिप्रत्यासत्तेः सोमस्यैव। ननु द्रव्यद्वारेणान्यत्रविहितसोमयागस्य प्रत्यभिज्ञानात्कथं तद्विधिः? उच्यते– तत्कार्यस्येहाप्रत्यभिज्ञानात् 'वाजपेयेनेष्ट्वा बृहस्पतिसवेन यजेत' इतिवत्। न ह्यत्र ब्रह्मवर्चसं बृहस्पतिसवकार्यं प्रतीतम्; अतोऽङ्गं बृहस्पतिसवो वाजपेयस्य। एवं च सोमयागोऽपि दर्शपूर्णमासेष्टिं प्रत्यङ्गत्वेन विधीयत इति प्राप्ते, उच्यते— अस्मिन्कालाङ्गविधिसंशये कालो

परिमलः।

प्रतीको गोदोहनविषयाधिकरणानुबन्धिटीकाग्रन्थव्याख्यानानन्तरमेव तदनुबन्ध्यधिकरणानुक्रमणार्थमिह गृहीतः॥

ननु द्रव्यद्वारेणेति। 'दर्शपूर्णमासाभ्यामिष्ट्वा सोमेन यजेत' इत्यत्र सोमपदमुत्पत्तिवाक्ये इव द्रव्यपरं तदुत्पत्तिवाक्ये विहितस्य सोमयागस्य प्रत्यभिज्ञानार्थमिति तस्येह न पुनर्विधिः, विहितस्य विधानायोगात्; अतः कालविधिर्युक्त इत्यर्थः। यथा 'वाजपेयेनेष्ट्वा' इति वाक्ये प्रसिद्धबृहस्पतिसवनामग्रहणे सत्यपि तत्कार्यब्रह्मवर्चसप्रत्यभिज्ञानाभावान्न तस्य कालविधिः किं तु बृहस्पतिसवनामककर्मान्तरविधिः, एवमिहापि सोमद्रव्यग्रहणे सत्यपि प्रसिद्धसोमयागफलस्वर्गप्रत्यभिज्ञानाभावान्न तस्य कालविधिः किं तु सोमद्रव्यकर्मान्तराविधिरित्याह— **उच्यते तत्कार्यस्येत्यादिना**। **दर्शपूर्णमासं प्रति** इत्यत्र 'दर्शपूर्णमाससोमयोः' इति टीकायामिव द्वन्द्वैकवद्भावः। कर्मान्तरविधिश्चेत् तस्य देवतया भाव्यं न चेह देवता निर्दिष्टा। यदि यागं प्रति संबन्धितया देवतोपादानराहित्यरूपम् अव्यक्तदेवताकत्वं प्रसिद्धसोमयागसादृश्यमिह वर्तत इति तेनोद्भिदादियागेष्विवेहापि प्रसिद्धसोमयागादतिदेशतो देवताप्राप्तिरिष्यते, तदा तत एव सोमद्रव्यप्राप्तिरपि स्यात्। 'दर्शपूर्णमासाभ्यामिष्ट्वा यजेत' इत्येतावतैव दर्शपूर्णमासाङ्गप्रसिद्धसोमयागप्रकृतिककर्मान्तरविधिः सिध्येत् इत्यतिरिच्यमानं सोमद्रव्यग्रहणम् प्रसिद्धसोमयागप्रत्यभिज्ञापनेनैव सफलं वाच्यमिति तस्यात्र कालविधिरित्येव युक्तम्, विहितस्य पुनः स्वरूपतो विधानायोगादिति सिद्धान्तयति— **उच्यत इति**। बृहस्पतिसवनामग्रहणं

जिज्ञास्यभेदाच्च । अभ्युदयफलं धर्मज्ञानम्, तच्चानुष्ठानापेक्षम्; निःश्रे-

भामती ।

शेषशेषित्वाधिकृताधिकाराभावेऽपि क्रमो विवक्ष्येत यद्येकफलावच्छेदो भवेत्, यथाग्नेयादीनां षण्णामेकस्वर्गफलावच्छिन्नानाम्; यदि वा जिज्ञास्यब्रह्मणोंशो धर्मः स्यात्, यथा चतुर्लक्षणीव्युत्पाद्यं ब्रह्म केनचित्केनचिदंशेनैकेन लक्षणेन व्युत्पाद्यते, तत्र चतुर्णां लक्षणानां जिज्ञास्याभेदेन परस्परसंबन्धे सति क्रमो विवक्षितः, तथेहाप्येकजिज्ञास्यतया धर्मब्रह्मजिज्ञासयोः क्रमो विवक्ष्येत; न चैतदुभयमप्यस्तीत्याह— **फलजिज्ञास्यभेदाच्च** । फलभेदं विभजते— **अभ्युदय-**

कल्पतरुः ।

विधेयः स्यात् । कुतः? अस्य वाक्यस्य कालप्रधानत्वात् । यदि कर्मविधिरेषः स्यात्, तर्हि तद्रूपेण द्रव्यदैवतेन भाव्यम् । न चेह देवतारूपमस्ति । अथाव्यक्तत्वेनोद्भिदादिष्विव सौमिकी देवता अतिदेशेन प्राप्येत, तर्हि सोमोऽपि प्राप्येतेति 'सोमेन' इति व्यर्थं स्यात्; अतः सोमयागप्रत्यभिज्ञानार्थमेव तत् । प्रत्यभिज्ञाने च न विधिसंभवः । बृहस्पतिसवस्तु वाजपेयप्रकरणे श्रुतः । तत्र प्रकरणान्तरन्यायात् कर्मान्तरमेव विधीयते । नामधेयमपि यजिपरतन्त्रतया न प्रत्यभिज्ञापकम्, किं तु तत्रैव धर्मलक्षणया वर्तते । अतो नान्नैव प्रसिद्धबृहस्पतिसवधर्माणां प्रापितत्वाद्युक्तं कर्मविधानमिति ॥

यथाग्नेयादीनामिति । एकादशे चिन्तितम्— 'प्रयोजनाभिसंबन्धात्पृथक्त्वं ततः स्यादैककर्म्यमेकशब्दाभिसंयोगात्' । आग्नेयादिषु संशयः– किं तन्त्रमेषां फलम् उत भेदेनेति । तत्र परस्परनिरपेक्षैरुत्पत्तिविधिभिर्विहितानां प्रधानानां पृथक्फलाकाङ्क्षत्वात्तत्संनिधौ श्रूयमाणं फलं भेदेनैभिः संबध्यते । ततः प्रति-

परिमलः ।

तु नातिरिच्यते येन तदपि प्रसिद्धबृहस्पतिसवप्रत्यभिज्ञापनार्थं कथंचित्कल्प्येत; तत्तु कर्मान्तरे तद्धर्मातिदेशार्थत्वेन सफलम्; अतस्तस्य प्रकरणान्तरन्यायप्राप्तकर्मान्तरविधिस्वारस्यवद्यजिपारतन्त्र्यं न हातव्यमिति तद्वैषम्यमाह— **बृहस्पतिसवस्त्विति । उत भेदेनेति** । अस्मिन्पक्षे षडपि यागाः पृथक्पृथक् पूर्वोत्तराङ्गसहिताः प्रयोगभेदेन कर्तव्याः । फलं तन्त्रमिति सिद्धान्ते त्वामावास्याः पौर्णमास्याश्च त्रयस्त्रयो यागाः स्वस्वकालयोरेकप्रयोगाः कर्तव्या इति फलभेदः । **भेदेनैभिः संबध्यत इति** । एकशब्दोपात्तानामप्याग्नेयादीनां साहित्यमिह न विवक्षितम्, उत्पत्तिवाक्यावाहितानां तेषामिह

भामती।

फलं धर्मज्ञानमिति। जिज्ञासाया वस्तुतो ज्ञानतन्त्रत्वात् ज्ञानफलं जिज्ञासाफलमिति भावः। न केवलं स्वरूपतः फलभेदः, तदुत्पादनप्रकारभेदादपि तद्भेद इत्याह— **तच्चानुष्ठानापेक्षम्**। ब्रह्मज्ञानं च नानुष्ठानान्तरापेक्षम्। शाब्दज्ञानाभ्यासान्नानुष्ठानान्तरमपेक्षते, नित्यनैमित्तिककर्मानुष्ठानसहभावस्य अ-

कल्पतरुः।

प्रधानं फलभेद इति प्राप्ते, राद्धान्तः— यद्यप्येषां पृथक्त्वं पृथगुत्पत्तिविधिविहितता, तथाप्यैककर्म्यम्। क्रियत इति व्युत्पत्त्या फलं कर्म। ऐककर्म्यमेकफलत्वमित्यर्थः। कुतः? प्रयोजनेन समुचितानां संबन्धाद्धेतोः। स एव कुतः? एकशब्दाभिसंयोगात्। दर्शपूर्णमासशब्देन हि समुदायवाचिना निर्दिश्य फले विधीयन्ते आग्नेयादयः। यथा ग्रामेणोदपानः खेय इति समुदायशब्दनिर्देशात् समुदितैः पुंभिरुदपानः खन्यते न प्रतिपुरुषं कूपभेदः, एवमिहापि। ननु 'गणायानुलेपनम्' इत्यादौ समुदायशब्दनिर्दिष्टमप्यनुलेपनादि प्रतिपुरुषमावर्तते तद्वत्किं न स्यात्? नेति वदामः। युक्तमनुलेपनादेः संस्कारत्वात् दृष्टार्थत्वाच्च प्रतिसंस्कार्यमावृत्तिः, इह तु फलमुद्दिश्य विधीयमानानामुपादीयमानानामेवाग्नेयादीनां विवक्षितं साहित्यमिति फलतन्त्रतेति। संग्रहे जिज्ञासयोः फलादिभेदं निर्दिश्य विभजने ज्ञानयोस्तत्कथनमयुक्तमित्याशङ्क्याह— **जिज्ञासाया इति**। इच्छाया ज्ञानपराधीनतया ज्ञानफलमेव तत्फलमित्यर्थः। फलभेदे वक्तव्ये कारणभेदकथनं भाष्ये अनुपयोगीत्याशङ्क्याह— **न केवलमिति**। विधेयाविधेयक्रियाज्ञानफलयोरुत्पाद्यता व्यङ्ग्यता च भेद इत्यर्थः। अनुष्ठानान्तरेत्यत्रान्तरशब्दार्थमाह— **शाब्दज्ञानेति**। क्वचित् 'ब्रह्मविदाप्नोति

परिमलः।

फलसंबन्धविधानार्थमुद्देश्यत्वात् उद्देश्येषु च साहित्यरूपस्य विशेषणस्य विवक्षणायोगादिति भावः। आग्नेयादीनां पृथक्त्वमैककर्म्यं च सूत्रोक्तं परस्परविरुद्धमित्याशङ्क्य तदर्थं कथयन्नेव सिद्धान्तमाह— **यद्यप्येषामिति। फले विधीयन्त इति**। फलस्य प्राधान्यात्तु फलकाममुद्दिश्याग्नेयादय एव विधेयाः, स्वरूपेण विहितानामपि फलसंबन्धित्वेन पुनर्विधानसंभवात्; अतस्तेषां साहित्यविशेषणाविवक्षाकारणं नास्तीति भावः। **उपादीयमानानाम्**, कामिनमुद्दिश्यानुष्ठेयत्वेन बोध्यमानानाम्। टीकायामात्यन्तिकविशेषणेन विवक्षितं फलभेदात् जिज्ञास्यभेदस्य स्फुटत्वमुपपादयितुं फलभेदस्य स्फुटत्वमाह— **क्वचिद्ब्रह्मविदिति**। कृतकत्वे मोक्षफलस्यानित्यत्वप्रसङ्गो न्यायः।

यसफलं तु ब्रह्मज्ञानम्, न चानुष्ठानान्तरापेक्षम्; भव्यश्च धर्मो जिज्ञास्यो न ज्ञानकालेऽस्ति, पुरुषव्यापारतन्त्रत्वात्; इह तु भूतं ब्रह्म जिज्ञास्यं नित्यवृत्तत्वान्न पुरुषव्यापारतन्त्रम्। चोदनाप्रवृत्तिभेदाच्च।

भामती।

पारतन्त्र्यात् इति भावः। जिज्ञास्यभेदमात्यन्तिकमाह— **भव्यश्च धर्म इति।** भविता भव्यः, कर्तरि कृत्यः। भविता च भावकव्यापारनिर्वर्त्यतया तत्तन्त्र इति ततः प्राग्ज्ञानकाले नास्तीत्यर्थः। भूतं सत्यम्। सदेकान्ततः, न कदाचिदसदित्यर्थः। न केवलं स्वरूपतो जिज्ञास्ययोर्भेदः, ज्ञापकप्रमाणप्रवृत्तिभेदादपि भेद इत्याह— **चोदनाप्रवृत्तिभेदाच्च।** चोदनेति वैदिकं शब्दमाह, विशेषेण

कल्पतरुः।

परम्' इत्यादौ ज्ञानफलं साध्यत्वेन प्रतीतमपि न्यायबलाद्वचनान्तरवशाच्चाभिव्यक्तिपरत्वेन व्याख्याय फलभेद उक्तः, जिज्ञास्यभेदस्तु प्रतीतिसमय एव स्फुट इत्याह— **जिज्ञास्यभेदमिति।** ननु भवतेरकर्मकत्वाद्भावार्थत्वे च नपुंसकत्वप्रसङ्गाद्भव्यशब्देन कथं जिज्ञास्यविषयभेदसिद्धिः? अत आह— **भवितेति॥**

ननु 'तयोरेव कृत्यक्तखलर्थाः' इति कृत्यानां भावकर्मणोः स्मरणात् 'अचो यत्' इति सूत्रविहितयत्प्रत्ययान्तस्य भव्यशब्दस्य कर्तृवाचित्वमयुक्तमित्याशङ्क्याह— **कर्तरि कृत्य इति।** 'भव्यगेय–' इत्यादिना हि सूत्रेण भावकर्मवाचितानियममपोह्य कृत्यप्रत्ययान्ता एव भव्यादिशब्दा विकल्पेन कर्तरि निपात्यन्ते। अतो भवतीति व्युत्पत्त्या भव्यशब्दः कर्तृवाची। पक्षे च भावकर्मणोः। अस्य च भवतेरनुपसर्गत्वात्प्राप्तिवाचित्वाभावाच्च कर्मप्राप्तिः। भावे तु भव्यमनेनेति स्यात्; नेह सः, पुंलिङ्गनिर्देशादुत्पाद्यधर्मापेक्षणाच्च। अतः कर्तरि कृत्य इति। ननु भवितुः कथं

परिमलः।

'ब्रह्मैव सन्ब्रह्माप्येति' इत्यादि वचनान्तरम्। **ननु भवतेरिति।** अनपुंसकलिङ्गोऽयम् अकर्मकधातुनिष्पन्नकृत्यप्रत्ययान्तो भव्यशब्दो न भावकर्मार्थो नापि तस्यार्थान्तरमस्तीति निरर्थकः। निरर्थकशब्देन कथं जिज्ञास्यविशेषलाभ इत्यर्थः। **अस्य च भवतेरिति।** 'सुखमनुभवति' इत्यादौ सोपसर्गत्वेन भवतिः सकर्मकः, 'प्रमाणभूत आचार्यः' इत्यादौ प्रामाण्यं प्राप्त इति प्राप्त्यर्थत्वेन; तदुभयमिह नास्तीत्यर्थः। **उत्पाद्यधर्मापे-**

या हि चोदना धर्मस्य लक्षणम्, सा स्वविषये नियुञ्जानैव पुरुषमवबोधयति; ब्रह्मचोदना तु पुरुषमवबोधयत्येव केवलम्; अवबोधस्य चोद-

भामती।

सामान्यस्य लक्षणात्। प्रवृत्तिभेदं विभजते— **या हि चोदना धर्मस्येति।** आज्ञादीनां पुरुषाभिप्रायभेदानामसंभवात् अपौरुषेये वेदे चोदनोपदेशः। अत

कल्पतरुः।

ज्ञानकाले सत्त्वाभाव इत्याशङ्क्य ज्ञानोत्तरभाविप्रयोजकव्यापारापेक्षणादित्याह— **भविता चेति।** भवतिर्ह्यसिद्धकर्तृकक्रियावाची, न पच्यादिवत्सिद्धकर्तृकक्रियः; ततो भविता स्वतोऽसिद्धः सन् भावकव्यापारापेक्षनिष्पत्तिरर्थात् साध्यो भवतीति। अत एवाहुः— 'करोत्यर्थस्य यः कर्ता भवितुः स प्रयोजकः। भविता तमपेक्ष्याथ प्रयोज्यत्वं प्रपद्यते' इति। भाष्ये भूतशब्दस्यातीतवाचित्वभ्रमं निरस्यति— **भूतमिति।** नन्वाज्ञाभ्यर्थनानुज्ञानां लोके चोदनात्वात् कथं वेदे चोदना? अत आह— **आज्ञादीनामिति।** उत्कृष्टपुंसः स्वाभिलषितोपायकार्यत्वाभिधानमाज्ञा यथा— 'गामानय' इति। एतदेव हीनस्याभ्यर्थना यथा— 'माणवकमध्यापय' इति। प्रवृत्तस्य प्रयोज्यस्य तद्धितोपायोक्तिरनुज्ञा यथा— 'कुरु यथा विहितम्' इति। नैतासां संभवो वेदे इत्युपदेशश्चोदना। उपदेशो ह्यप्रवृत्तनियोज्यस्य प्रयोजनोपायबोधको लोकेऽव-

परिमलः।

क्षणादिति। उत्पत्तिमद्धर्मसामानाधिकरण्यादित्यर्थः। भावपरत्वे हि भव्यमनेनेति वैयधिकरण्यं भवेत्। ननु भावार्थभव्यशब्दार्थस्य भवनस्योत्पत्तिरूपत्वात् धर्मशब्दसामानाधिकरण्यं घटत इत्याशङ्क्योत्पाद्येति विशेषितम्। उत्पत्तिमान् हि यागादिर्धर्म इह निर्दिष्टः न धर्ममात्रम्। अतस्तस्य नोत्पत्तिवाचिशब्दसामानाधिकरण्यं घटत इति भावः। यद्वा 'नेह सः' इत्यस्य नेह भावार्थ इत्यर्थमाश्रित्य तत्र पुंलिङ्गनिर्देशादिति हेतुयोजनानन्तरं तस्यावृत्त्या नेह प्राप्त्यर्थ इत्यर्थान्तरमाश्रित्य तत्र हेतुत्वेनोत्पाद्यधर्मसापेक्षत्वादित्येतद्योजनीयम्। वेदार्थविचारानन्तरमनुष्ठानेनोत्पादनीयं धर्ममपेक्ष्य हि तद्विशेषणतया भव्य इति निर्दिष्टं न तु ग्रामपश्वादिवत् तटस्थतया प्रागेव सिद्धं किंचित्प्राप्यमपेक्ष्य; अतोऽत्र न प्राप्त्यर्थो घटत इति भावः। **भावकव्यापारः** भावयितृव्यापारः। तत्र वाक्यपदीयसंमतिमाह— **करोत्यर्थस्येति।** घटं करोतीत्यस्यायमर्थः— घटं भवन्तं भावयतीति; स भावयिता भवितुर्घटस्य प्रयोजकः; भविता घटस्तमपेक्ष्य प्रयो-

भामती ।

एवोक्तम्— 'तस्य ज्ञानमुपदेशः' इति । सा च स्वसाध्ये पुरुषव्यापारे भावनायां तद्विषये च यागादौ स हि भावनाविषयः, तदधीननिरूपणत्वात् प्रयत्नस्य भावनायाः 'षिच् बन्धने' इत्यस्मात् धातोर्विषयपदव्युत्पत्तेः । भावनायास्तद्वारेण च यागादेरपेक्षितोपायतामवगमयन्ती तत्रेच्छोपहारमुखेण पुरुषं नियुञ्जानैव यागादिधर्ममवबोधयति नान्यथा । ब्रह्मचोदना तु पुरुषमवबोधयत्येव केवलं न तु प्रवर्तयन्त्यवबोधयति । कुतः? अवबोधस्य प्रवृत्तिरहितस्य चोदनाजन्यत्वात् । ननु 'आत्मा ज्ञातव्यः' इत्येतद्विधिपरैर्वेदान्तैः तदेकवाक्यतयावबोधे

कल्पतरुः ।

गतः, यथा गोपालवचसि सुपथकथनपरे 'अनेन पथा याहि' इति। न हीहाज्ञा, प्रयोक्तुर्निकर्षात्; नाभ्यर्थना, स्वप्रयोजनाभावात्; नाप्यनुज्ञा, प्रयोज्यस्याप्रवृत्तत्वात्; तदिह नियोज्यस्याप्रवृत्तस्य हितोपायकर्तव्यतोक्तिरपौरुषेयेऽपि वेदे भवत्येवेति। तस्य धर्मस्य ज्ञायतेऽनेनेति ज्ञानं प्रमाणमुपदेशो विधिरिति जैमिनीयसूत्रावयवार्थः । स्वविषये इति भाष्ये स्वशब्देन चोदना अभिधीयत इति मत्वा आह— **स्वसाध्ये इति** । स्वस्याः प्रतिपाद्ये विषये भावनायामित्यर्थः । धर्मस्येत्युक्त्या भावनोपसर्जनभूतापि शब्दतोऽर्थतः प्राधान्यात् स्वशब्दार्थ इति गृहीत्वा आह— **तद्विषये इति** । ननु भावनाधात्वर्थयोर्विधिशब्देन पुरुषप्रवर्तनमशक्यं प्रमाणस्य वाय्वादिवत्प्रेरकत्वायोगादित्याशङ्क्याह— **भावनाया इति** । साक्षाद्भावनायास्तदवच्छेदकत्वद्वारेण चार्थाद्धात्वर्थस्येष्टोपायतां बोधयति विधिर्बोधयित्वा च तत्रेच्छामुपहरति इच्छंश्च पुरुषः प्रवर्तते । तदनेन क्रमेण नियुञ्जाना चोदना धर्ममवबोधयतीत्यर्थः । **ब्रह्मचोदना** ब्रह्मवाक्यम् । यथा धर्मचोदना प्रवृत्तिहेतुं बोधं जनयति, नैवं ब्रह्मचोदनेत्याह— **अवबोधस्येति** । ब्रह्मचोदनया सिद्धवस्तुविषयस्य प्रवृत्त्यहेत्वर्थमात्रावबोधस्य जन्यत्वादिति भाष्यार्थः । ननु मा नाम जनि धर्मबोधवत् ब्रह्मबोधाद्विषये प्रवृत्तिः, स एव तु विधितः किं न स्यादिति शङ्कते— **नन्विति** । विध्येकवाक्यत्वेन वस्तुबोधनाद्वेदान्तानां न सिद्धबोधमात्रपर्यवसानमित्यर्थः ॥

परिमलः ।

ज्य इत्यर्थः । 'स्वस्याः' इति प्रामादिकः पाठः, स्वशब्दस्यात्मवाचित्वे नपुंसकलिङ्गत्वादिति । **धर्मस्येत्युक्त्येति** । धर्मस्य चोदना– इति भाष्ये चोदनोपसर्जनमपि भावना तत्प्रतिपाद्यत्वेनार्थतः प्राधान्यात् सापि स्वविषय इति भाष्ये स्वशब्देन गृह्यत इत्यर्थः ।

नाजन्यत्वान्न पुरुषोऽवबोधे नियुज्यते— यथा अक्षार्थसंनिकर्षेणार्थावबोधे, तद्वत्। तस्मात्किमपि वक्तव्यम्, यदनन्तरं ब्रह्मजिज्ञासोपदिश्यत इति। उच्यते— नित्यानित्यवस्तुविवेकः, इहामुत्रार्थभोगविरागः,

---

भामती।

प्रवर्तयद्भिरेव पुरुषो ब्रह्मावबोध्यत इति समानत्वं धर्मचोदनाभिर्ब्रह्मचोदनानामित्यत आह— **न पुरुषोऽवबोधे नियुज्यते** ॥

अयमभिसंधिः— न तावद्ब्रह्मसाक्षात्कारे पुरुषो नियोक्तव्यः, तस्य ब्रह्मस्वाभाव्येन नित्यत्वात्, अकार्यत्वात्। नाप्युपासनायाम्, तस्या अपि ज्ञानप्रकर्षे हेतुभावस्यान्वयव्यतिरेकसिद्धतया प्राप्तत्वेनाविधेयत्वात्। नापि शाब्दबोधे, तस्याप्यधीतवेदस्य पुरुषस्य विदितपदतदर्थस्य समधिगतशाब्दन्यायतत्त्वस्याप्रत्यूहमुत्पत्तेः। अत्रैव दृष्टान्तमाह— **यथाक्षार्थेति**। दार्ष्टान्तिके योजयति— **तद्वदिति**। अपि चात्मज्ञानविधिपरेषु वेदान्तेषु नात्मतत्त्वविनिश्चयः शाब्दः स्यात्। न हि तदा आत्मतत्त्वपरास्ते, किं तु तज्ज्ञानविधिपराः, यत्पराश्च ते त एव तेषामर्थाः। न च बोधस्य बोध्यनिष्ठत्वादपेक्षितत्वात्, अन्यपरेभ्योऽपि बोध्यतत्त्वविनिश्चयः, समारोपेणापि तदुपपत्तेः। तस्मान्न बोधविधिपरा वेदान्ता इति सिद्धम्। प्रकृतमुपसंहरति— **तस्मात्किमपि वक्तव्यमिति**। यस्मिन्नसति ब्रह्मजिज्ञासा न भवति सति तु भवन्ती भवत्येवेत्यर्थः। तदाह— **उच्यते— नित्यानित्यवस्तुविवेक इत्यादि**। नित्यः

कल्पतरुः।

भाष्येऽवबोधनिर्देश एव विध्यविषयत्वे हेतुगर्भ इति व्याचष्टे— **अयमभिसंधिरिति**। यथा विशिष्टविधौ विशेषणविधिरर्थान्न विशेषणे तात्पर्यं वाक्यभेदात्, एवं विषयविशिष्टप्रतिपत्तिविधिसामर्थ्यात् ब्रह्मनिश्चय इत्याशङ्क्याह— **न च बोधस्येति**। विशिष्टक्रियाविधानाद्युक्ता विशेषणस्य प्रमा बोध्यवैशिष्ट्यस्य वास्तवत्वात्।

परिमलः।

स एव त्विति। ब्रह्मबोध एव विधितः प्रवृत्तिविषयः किं न स्यादित्यर्थः। **यथा विशिष्टविधाविति**। यथा खलु 'एतस्यैव रेवतीषु वारवन्तीयमग्निष्टोमसाम कृत्वा पशुकामो ह्येतेन यजेत' इति रेवत्याधारवारवन्तीयसामसाध्याग्निष्टोमस्तोत्रविशिष्टक्रतुविधौ

भामती ।

प्रत्यगात्मा, अनित्याः देहेन्द्रियविषयादयः । तद्विषयश्चेद्विवेको निश्चयः; कृतमस्य ब्रह्मजिज्ञासया, ज्ञातत्वाद्ब्रह्मणः । अथ विवेको ज्ञानमात्रं न निश्चयः; तथा सति एष विपर्यासादन्यः संशयः स्यात्; तथा च न वैराग्यं भावयेत्; अभावयन्कथं ब्रह्मजिज्ञासाहेतुः? तस्मादेवं व्याख्येयम् । नित्यानित्ययोर्वस्तीति नित्यानित्यवस्तु तद्धर्मः, नित्यानित्ययोर्धर्मिणोस्तद्धर्माणां च विवेको नित्यानित्यवस्तुविवेकः । एतदुक्तं भवति— मा भूदिदम् ऋतं नित्यम्, इदं तदनृतमनित्यमिति धर्मिविशेषयोर्विवेकः, धर्मिमात्रयोर्नित्यानित्ययोस्तद्धर्मयोश्च विवेकं निश्चिनोत्येव । नित्यत्वं सत्यत्वं तद्यस्यास्ति तन्नित्यं सत्यम्, तथा चास्थागोचरः । अनित्यत्वमसत्यत्वं तद्यस्यास्ति तदनित्यमनृतम्, तथा चानास्थागोचरः । तदेतेष्वनुभूयमानेषु युष्मदस्मत्प्रत्ययगोचरेषु विषयविषयिषु यदृतं नित्यं सुखं व्यवस्थास्यते तदास्थागोचरो भविष्यति, यत्त्वनित्यमनृतं भविष्यति तापत्र-

कल्पतरुः ।

प्रतिपत्तिविधिस्तु न विशेषणसत्तामाक्षिपति । 'वाचं धेनुमुपासीत' इत्यादावारोप्यस्यापि विधेयधीविषयत्वादित्यर्थः । एवं क्रमप्रमाणाभावसिद्धौ, ब्रह्मधीर्न नियोगेन धर्मबुद्धेरनन्तरा । तत्क्रमे मानहीनत्वात्स्नानभुज्यादिधीरिव । नित्यानित्यवस्तुविवेक इति भाष्यमाक्षिपति— तद्विषयश्चेदिति । अनित्यात् ब्रह्मणो विवेकः किं निश्चय उत ज्ञानमात्रम्? आद्यं दूषयति— कृतमिति । द्वितीये विपर्ययः, संशयो वा? नाद्यः, ततः शास्त्रश्रवणे प्रवृत्त्ययोगात् । न द्वितीयः, प्रपञ्चानित्यत्वानिश्चये तद्वैराग्यायोगात् इत्याह— तथा चेति । समाधत्ते— तस्मादिति । निश्चय एव विवेकः । न च शास्त्रानारम्भः, इदं नित्यमिदमनित्यमित्यनिश्चयात् आत्मानात्मसमुदाये नित्यत्वमनित्यत्वं च स्तो धर्मौ; तयोश्च धर्मिभ्यां भवितव्यमित्येतावन्मात्रं निश्चितम् । यद्यपि घटादेरनित्यता अवधारिता तथापि सकलानात्मसु नावधारितेति । नित्यत्वस्य व्याख्या— ऋतमिति । उक्तविवेकस्य प्रयोजनमाह— तथा चेति । सत्यासत्ययोरुपादेयानुपादेयत्वे हेतुमाह— तदेतेष्विति । सुखत्वान्नित्यमुपादेयं

परिमलः ।

रेवत्याधारवारवन्तीयसामरूपविशेषणस्य दधिसोमादिविशेषणवदन्यतः प्रसिद्धिरहितस्य तत एव सिद्धिः, एवमिहापीत्यर्थः । श्लोकेऽपेक्षितपूरणार्थम् एवमित्यादि । स्नानेत्यादि व्यतिरेके दृष्टान्तः । यद्यपि घटादेरिति । वल्मीकादिषु भ्रमविषयस्य घटादेरित्यर्थः ।

भामती ।

यपरीतं तत्त्यक्ष्यत इति सोऽयं नित्यानित्यवस्तुविवेकः प्राग्भवीयादैहिकाद्वा कर्मणो विशुद्धसत्त्वस्य भवत्यनुभवोपपत्तिभ्याम् । न खलु सत्यं नाम न किंचिदस्तीति वाच्यम् । तदभावे तदधिष्ठानस्यानृतस्याप्यनुपपत्तेः शून्यवादिनामपि

कल्पतरुः ।

दुःखत्वादनित्यं त्याज्यमित्यर्थः । दृष्टेऽनुभवः, उपपत्तिस्त्वदृष्टे– विगीतं सदधिष्ठानम् असत्यत्वात् गन्धर्वपुरीवत् इत्यादिः । व्याप्त्यसिद्धिमाशङ्क्याह– **न खल्विति** । न चेयतो विवेकस्य स्वरसत उदये शास्त्रविफलता, सगुणनिर्गुणविवेकाखण्डसमन्वयादेर-

परिमलः ।

अतो नित्यत्वं सत्यत्वमनित्यत्वमसत्यत्वमिति व्याख्यानेन न विरोधः । **सुखत्वान्नित्यमिति** । सत्यं हि 'यो वै भूमा तत् सुखम्' इति सुखरूपमुक्तम् । 'अथ यदल्पं तन्मर्त्यं नाल्पे सुखमस्ति' इति सत्यरूपस्य भूम्नः प्रतिद्वन्द्वल्पम् असत्यं दुःखरूपमुक्तम्; अतः साङ्गाध्ययनवतः शुद्धान्तःकरणस्य सत्यासत्ययोः सुखदुःखत्वनिश्चयो भवतीत्यर्थः । स्वप्नप्रपञ्चवत्सर्वमसत्यं चेत् सत्यत्वासत्यत्वयोर्धर्मिभ्यां भाव्यमित्युक्तरूपो नित्यानित्यविवेको न सिध्येदित्याशङ्क्य सत्यसिद्ध्यर्थमनुभवोपपत्ती टीकायामुपन्यस्ते; ते विभजते—**दृष्टे इति** । शुक्तिरजतादौ सदधिष्ठानत्वानुभवः, तथात्वेनास्फुटे स्वप्नादावुपपत्तिः । तामेवोपपत्तिमाह— **विगीतामिति** । **गन्धर्वपुरीवादिति** । तत्र सौरालोकादिकं सदधिष्ठानमिति भावः । व्याप्त्यसिद्धिशङ्का शून्यवादे । वस्तुतः शून्यतैवेति मतेऽपि सैव सत्यास्तीति परिहारार्थः । **इयतो विवेकस्येति** । स्वप्नवत् सर्वस्य प्रपञ्चस्यासत्यत्वं यदि स्यात् तदानीमप्यधिष्ठानपरिशेषोऽवश्यंभावी; तच्च सत्यं सुखरूपमित्येतावतो निर्धारणस्येत्यर्थः । **सगुणनिर्गुणेति** । परिशिष्यमाणं सत् सगुणं भवेन्निर्गुणं वा, निर्गुणत्वे कथमखण्डे तत्र समन्वय इत्यादिविचारार्थत्वेन शास्त्रारम्भः सफल इत्यर्थः । नन्वेवं सति नित्यानित्यविवेकः प्रसिद्धनित्यानित्यविषय एवास्तु, किमर्थं सत्यानृतविषयत्वेन क्लिष्टव्याख्यानम्, शास्त्रानारम्भशङ्कापरिहारस्योक्तस्य तत्रापि तुल्यत्वात् । न च ब्रह्मानन्द एक एव नित्यः कर्मफलादिकमन्यत्सर्वमनित्यमिति शास्त्रारम्भात्प्रागेव निश्चये सति 'असंभवस्तु सतोऽनुपपत्तेः' इति ब्रह्मनित्यत्वव्यवस्थापनस्य वैराग्यपादादिषु कर्मफलाद्यनित्यत्वव्यवस्थापनस्य च वैफल्यप्रसङ्गः; प्रागेव संसारबन्धानृतत्वनिश्चये सति तत्समर्थनार्थस्य 'तद्गुणसारत्वात्तु तद्व्यपदेशः' 'यथा च तक्षोभयथा' इत्यादिसूत्रजातस्य वैफल्यप्रसङ्ग इति दूषणस्य तत्रापि तुल्यत्वात्; प्राङ्निश्चिते एव बन्धमिथ्यात्वे श्रुति-

भामती ।

शून्यतावा एव सत्यत्वात् । अथास्य पुरुषधौरेयस्यानुभवोपपत्तिभ्यामेवं सुनिपुणं

कल्पतरुः ।

सिद्धेरिति । न नित्यादिविवेकमात्रं वैराग्यहेतुः, किं तु तदभ्यास इत्याह— **अथास्येति** । अस्य पुरुषश्रेष्ठस्य संसारसमूहे अनित्यत्वादिविषयं प्रसंख्यानं धीसंततिरु-

परिमलः ।

विरोधादिशङ्कान्तरनिरासाय तद्गुणसारत्वादिसूत्रजातमिति परिहाररीतिस्तु पक्षान्तरेऽपि तुल्या; किं च नित्यानित्यवस्तुविवेकस्वरूपासिद्धिशङ्कापरिहारार्थातःशब्दव्याख्यानावसरे कर्मफलनित्यत्वप्रतिपादकवाक्येभ्यः तदनित्यत्वप्रतिपादकवाक्यानां प्राबल्यमेवोपपत्तितया दर्शितम् न तु बन्धसत्यत्वप्रतिपादकवाक्येभ्यस्तन्मिथ्यात्वप्रतिपादकवाक्यानाम् ; अतोऽपि हेतोः प्रसिद्धनित्यानित्यविवेक एवात्र विवक्षित इति ज्ञायते ; तस्मात्सामान्यतः सत्यानृतसद्भावनिर्धारणं प्रसंख्यानलभ्यबन्धमिथ्यात्वनिर्धारणपर्यन्तं नित्यानित्यवस्तुविवेक इत्युक्तमयुक्तमिति चेत्, उच्यते— भाष्ये नित्यानित्यवस्तुविवेकानन्तरं नित्यफलप्रेप्सामनपेक्ष्य तद्विवेकमात्रेण सकलकर्मफलविराग उक्तः । नित्यवस्तुप्रेप्सया तत्प्राप्त्युपायान्वेषणं पश्चादुक्तम् । अयं क्रमः अनित्यत्वमसत्यत्वमिति व्याख्याने युज्यते न त्वस्थायित्वमिति व्याख्याने । अस्थायिनं भोगं भुञ्जानस्तत्परित्यागे स्थायिभोगलाभमालक्ष्य हि ततो विरज्यते नान्यथा । अनृतासक्तस्तु तदनृतत्वनिश्चये सति तत्परित्यागे तथाभूतसत्यवस्तुलाभप्रतिसंधानाभावेऽपि ततो विरज्यते । न हि रजतार्थी कचन रजतभ्रमेण प्रवृत्तस्तन्मिथ्यात्वनिश्चये सति तत्परित्यागेन सत्यरजतस्य स्वलभ्यत्वप्रतिसंधानाभावे ततो न निवर्तते, किं तु ततो निवृत्तः सत्यरजतप्राप्त्युपायं किंचित् पश्यति चेत् तत्र प्रवर्तते । तस्मान्नित्यानित्यवस्तुविवेकादिक्रमेण साधनचतुष्टयं ब्रह्मजिज्ञासाहेतुं वर्णयतो भगवतो भाष्यकारस्य सत्यमिदं सुखरूपमिति विशेषनिर्धारणमनपेक्ष्य कर्मफलानृतत्वनिर्धारणमेव वैराग्यादिक्रमेण साधनान्तराणां प्रवर्तकमित्याशयमालोच्य टीकाकारैराचार्यैश्च सामान्यतः सत्यमस्तीति विशिष्य बन्धमात्रमनृतमिति च विवेकः प्रथमसाधनत्वेन परिगृहीतः । तदनन्तरमक्षय्यादिवाक्यात् कर्मफलनित्यत्वसिद्धेस्तदनृतत्वमसिद्धम्, अनृतस्य तत्त्वज्ञाननिवर्त्यत्वनियमादिति शङ्कायां तदनृतत्वसिद्ध्यर्थमेव न्यायतस्तदनित्यत्वमतःशब्देन सूचितमिति न किंचिदवद्यम् ॥

तदभ्यास इति । जननमरणपरिवृत्त्यादिरूपसंसारबन्धासत्यत्वदृढनिश्चयपर्यन्त-

भामती।

निरूपयतः आ च सत्यलोकात् आ चावीचेः 'जायस्व म्रियस्व' इति विपरिवर्तमानं क्षणमुहूर्तयामाहोरात्रार्धमासमासर्त्वयनवत्सरयुगचतुर्युगमन्वन्तरप्रलयमहाप्रलयमहासर्गावान्तरसर्गसंसारसागरोर्मिभिरनिशमुह्यमानं तापत्रयपरीतमात्मानं जीवलोकं चावलोक्य अस्मिन्संसारमण्डले अनित्याशुचिदुःखात्मकं प्रसंख्यानमुपावर्तते; ततोऽस्येदृशान्नित्यानित्यवस्तुविवेकलक्षणात्प्रसंख्यानात् **इहामुत्रार्थभोगविरागः** भवति। अर्थ्यते प्रार्थ्यत इत्यर्थः। फलमिति यावत्। तस्मि-

कल्पतरुः।

पावर्तते इत्यन्वयः। **अवीचिः** नरकविशेषः। **जायस्व म्रियस्वेति।** पुनः पुनर्जायते म्रियते चेत्यर्थः। 'क्रियासमभिहारे लोट्–' इति पौनःपुन्ये सर्वलकारापवादेन लोटः स्वादेशस्य च विधानात्। आरभ्य ब्रह्मलोकम् अवीचिपर्यन्तं जननमरणाभ्यामावर्तमानं क्षणाद्यवान्तरसर्गपर्यन्तैः कालैः संसारसागरस्योर्मिभूतैरनिशमुह्यमानमितस्ततो नीयमानमात्मानमन्यं च जीवसमूहमवलोक्येति योजना॥

उक्तपरिभावनाया इहामुत्रार्थभोगविरागहेतुतामाह— **ततोऽस्येति।** अनित्यसंसारस्य किंचिदधिष्ठानमस्तीति इयान् विवेकः, न तु ब्रह्मेति। तदुक्तम्— **ईदृशादिति।** आभोगो मनस्कारः, आदर इति यावत्, अतदात्मिका। वैराग्यस्य

परिमलः।

इति शेषः। **क्रियासमभिहारे इति।** 'क्रियासमभिहारे लोट् लोटो हिस्वौ–' इति पाणिनिसूत्रेण क्रियापौनःपुन्यविवक्षायां सर्वलकारापवादेन लोट् विहितः; तस्य परस्मैपदात्मनेपदयोर्यथाक्रमं हिस्वावादेशौ च विहितौ। ननु क्रियासमभिहारे 'लुनीहि लुनीहीत्येवायं लुनाति' इत्याद्युदाहरणान्तरेष्विव 'जायस्व जायस्वेत्येवेमानि जायन्ते, म्रियस्व म्रियस्वेत्येव म्रियन्ते' इति द्विर्भावस्तस्य तस्य धातोरनुप्रयोगश्च प्राप्नोतीति तत्सूत्रवार्त्तिके द्विर्भावानुशासनात्; 'यथाविध्यनुप्रयोगः पूर्वस्मिन्' इति सूत्रेण क्रियासमभिहारे तस्यैव धातोरनुप्रयोगनियमनाच्च; नैष दोषः, क्रियासमभिहारवत् जननमरणरूपक्रियाद्वयसमुच्चयस्याप्यत्र विवक्षितत्वात्, 'समुच्चयेऽन्यतरस्याम्' इति सूत्रेण समुच्चयेऽपि लोण्मध्यमपुरुषैकवचनविधानात्। तत्र हि न द्विर्भाववार्त्तिकमस्ति; नापि यथाविध्यनुप्रयोगविधानमस्ति; किं तु 'समुच्चये सामान्यवचनस्य' इति सूत्रेण तावत्क्रियाविशेषानुगतसामान्यवचनस्यानुप्रयोगो विहितः। 'ओदनं भुङ्क्ष्व क्षीरं पिब धानाः खाद इत्येवायमभ्यवहरति' इत्यादि तदुदाहरणम्। इहापि जननमरणानुगतसामान्यरूपविपरिवृत्तिवाचिनोऽनु-

शमदमादिसाधनसंपत्, मुमुक्षुत्वं च । तेषु हि सत्सु, प्रागपि धर्मजिज्ञासाया ऊर्ध्वं च शक्यते ब्रह्म जिज्ञासितुं ज्ञातुं च; न विपर्यये । तस्मात् अथशब्देन यथोक्तसाधनसंपत्त्यानन्तर्यमुपदिश्यते ॥

भामती ।

न्विरागो नामानाभोगात्मिकोपेक्षाबुद्धिः । ततः **शमदमादिसाधनसंपत्** । रागादिकषायमदिरामत्तं हि मनः तेषु तेषु विषयेषूच्चावचमिन्द्रियाणि प्रवर्तयत् विविधाश्च प्रवृत्तीः पुण्यापुण्यफला भावयत् पुरुषमतिघोरे विविधदुःखज्वालाजटाले संसारहुतभुजि जुहोति । प्रसंख्यानाभ्यासलब्धवैराग्यपरिपाकभग्नरागादिकषायमदिरामदं तु मनः पुरुषेणावजीयते वशीक्रियते, सोऽयमस्य वैराग्यहेतुको मनोविजयः शम इति वशीकारसंज्ञ इति चाख्यायते । विजितं च मनस्तत्त्वविषयविनियोगयोग्यतां नीयते, सेयमस्य योग्यता दमः । यथा- दान्तोऽयं वृषभयुवा हलशकटादिवहनयोग्यः कृत इति गम्यते । आदिग्रहणेन च विषयतितिक्षातदुपरमतत्त्वश्रद्धाः संगृह्यन्ते । अत एव श्रुतिः— 'तस्माच्छान्तो दान्त उपरतस्तितिक्षुः श्रद्धावित्तो भूत्वात्मन्येवात्मानं पश्येत्, सर्वमात्मनि पश्यति' इति । तदेतस्य शमदमादिरूपस्य साधनस्य संपत् प्रकर्षः शमदमादिसाधनसंपत् । ततोऽस्य संसारबन्धनान्मुमुक्षा भवतीत्याह— **मुमुक्षुत्वं चेति** । तस्य च नित्यशुद्धबुद्धमुक्तस्वभावब्रह्मज्ञानं मोक्षस्य कारणमित्युपश्रुत्य तज्जिज्ञासा भवति धर्मजिज्ञासायाः प्रागूर्ध्वं च; तस्मात्तेषामेवानन्तर्यं न धर्मजिज्ञासाया इत्याह— **तेषु हीति** । न केवलं जिज्ञासामात्रम् अपि तु ज्ञानमपीत्याह— **ज्ञातुं च** । उपसंहरति— **तस्मादिति** । क्रमप्राप्तमतःशब्दं व्याचष्टे— **अतःशब्दो**

कल्पतरुः ।

शमादिहेतुतामाह— तत इति । ज्वाला जटाकारा अस्य सन्तीति तथोक्तः । श्रद्धैव तत्त्वविषया वित्तमस्य न गवादीति तथाभिहितः । मोक्षेच्छा भवतु; कुतस्तावता ब्रह्मजिज्ञासा? अत आह— तस्य चेति । नित्यानित्यविवेकादिहेतुत्वस्याथशब्दादवगतेः किमतःशब्देनेत्याशङ्क्य नानेन जिज्ञासां प्रति साधनकलापस्य हेतुतोच्यते,

परिमलः ।

प्रयोगोऽस्ति—'असकृदावर्तीनि भूतानि भवन्ति' इति । क्रियासमभिहारसमुच्चयोभयविवक्षायां च समुच्चयविवक्षाप्रयुक्तमेव कार्यं भवति, 'विप्रतिषेधे परं कार्यम्' इति स्मरणात् ॥

अतःशब्दो हेत्वर्थः। यस्माद्वेद एव अग्निहोत्रादीनां श्रेयःसाधनानामनित्यफलतां दर्शयति— 'तद्यथेह कर्मचितो लोकः क्षीयते

भामती।

हेत्वर्थः। तमेवातःशब्दस्य हेतुरूपमर्थमाह— **यस्माद्वेद एवेति।** अत्रैवं परिचोद्यते— सत्यं यथोक्तसाधनसंपत्त्यनन्तरं ब्रह्मजिज्ञासा भवति। सैव त्वनुपपन्ना, इहामुत्रफलभोगविरागस्यानुपपत्तेः। अनुकूलवेदनीयं हि फलम्, इष्टलक्षणत्वात्फलस्य। न चानुरागहेतावस्य वैराग्यं भवितुमर्हति। दुःखानुषङ्गदर्शनात्सुखेऽपि वैराग्यमिति चेत्, हन्त भोः सुखानुषङ्गादुःखेऽप्यनुरागो न कस्माद्भवति? तस्मात्सुखे उपादीयमाने दुःखपरिहारे प्रयतितव्यम्; अवर्जनीयतया दुःखमागतमपि परिहृत्य सुखमात्रं भोक्ष्यते। तद्यथा मत्स्यार्थी सशल्कान्सकण्टकान्मत्स्यानुपादत्ते, स यावदादेयं तावदादाय निवर्तते; यथा वा धान्यार्थी सपलालानि धान्यान्याहरति, स यावदादेयं तावदादाय निवर्तते। तस्मादुःखभयान्नानुकूलवेदनीयमैहिकं वामुष्मिकं वा सुखं परित्यक्तुमुचितम्। न हि मृगाः सन्तीति शालयो नोप्यन्ते, भिक्षुकाः सन्तीति स्थाल्यो नाधिश्रीयन्ते। अपि च दृष्टं सुखं चन्दनवनितादिसङ्गजन्म क्षयितालक्षणेन दुःखेनाघ्रातत्वादतिभीरुणा त्यज्येतापि, न त्वामुष्मिकं स्वर्गादि, तस्याविनाशित्वात्। श्रूयते हि— 'अपाम सोममभूता अभूम' इति। तथा च 'अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवति' इति। न च कृतकत्वहेतुकं विनाशित्वानुमानमत्र संभवति, नरशिरःकपालशौचानुमानवदागमबाधितविषयत्वात्। तस्माद्यथोक्तसाधनसंपत्त्यभावान्न ब्रह्मजिज्ञासेति प्राप्तम्। एवं प्राप्ते, आह भगवान्सूत्रकारः 'अतः' इति। तस्यार्थं व्याचष्टे भाष्यकारः— **यस्माद्वेद एवेति।**

अयमभिसंधिः— सत्यं मृगभिक्षुकादयः शक्याः परिहर्तुं पाचककृषीवलादिभिः, दुःखं त्वनेकविधानेककारणसंपातजमशक्यपरिहारम्, अन्ततः साधनपारतन्त्र्यक्षयितालक्षणयोर्दुःखयोः समस्तकृतकसुखाविनाभावनियमात्।

कल्पतरुः।

किं तु तत्स्वरूपासिद्धिपरिहारहेतुरभिधीयते इत्याह— अत्रैवमित्यादिना। शल्कं शकलम्। शुचि नरशिरःकपालम्, प्राण्यङ्गत्वाच्छङ्खवत्— इत्यस्य 'नारं स्पृष्ट्वास्थि सस्नेहं

एवमेवामुत्र पुण्यचितो लोकः क्षीयते' इत्यादिः; तथा ब्रह्मविज्ञानादपि परं पुरुषार्थं दर्शयति— 'ब्रह्मविदाप्नोति परम्' इत्यादिः; तस्मात् यथोक्तसाधनसंपत्त्यनन्तरं ब्रह्मजिज्ञासा कर्तव्या । ब्रह्मणो जिज्ञासा

भामती ।

न हि मधुविषसंपृक्तमन्नं विषं परित्यज्य मधुमिश्रं शक्यं शिल्पिवरेणापि भोक्तुम् । क्षयितानुमानोपोद्बलितं च 'तद्यथेह कर्मचितः–' इत्यादि वचनं क्षयिताप्रतिपादकम् 'अपाम सोमम्–' इत्यादिकं वचनं मुख्यासंभवे जघन्यवृत्तितामापादयति । यथाहुः पौराणिकाः— 'आभूतसंप्लवं स्थानममृतत्वं हि भाष्यते' इति । अत्र च ब्रह्मपदेन तत्प्रमाणं वेद उपस्थापितः । स च योग्यत्वात् 'तद्यथेह कर्मचितः' इत्यादिः 'अतः' इति सर्वनाम्ना परामृश्य हेतुपञ्चम्या निर्दिश्यते । स्यादेतत् । यथा स्वर्गादेः कृतकस्य सुखस्य दुःखानुषङ्गः तथा ब्रह्मणोऽपीत्यत आह— तथा ब्रह्मविज्ञानादपीति । तेनायमर्थः— अतः स्वर्गादीनां क्षयिताप्रतिपादकात् ब्रह्मज्ञानस्य च परमपुरुषार्थताप्रतिपादकात् आगमात् यथोक्तसाधनसंपत्, ततश्च जिज्ञासेति सिद्धम् । ब्रह्मजिज्ञासापदव्याख्यानमाह— ब्रह्मण इति । षष्ठीसमासप्रदर्शनेन प्राचां वृत्तिकृतां ब्रह्मणे जिज्ञासा ब्रह्मजिज्ञासेति चतुर्थीसमासः परास्तो वेदितव्यः । 'तादर्थ्यसमासे प्रकृतिविकृतिग्रहणं कर्तव्यम्' इति कात्यायनीयवचनेन यूप-

कल्पतरुः ।

सवासा जलमाविशेत्' इत्यागमविरोधः । कृतकत्वानुमानानुगृहीतात् 'तद्यथा–' इति वाक्यात् न्यायहीनम् 'अपाम–' इत्यादिवाक्यमापेक्षिकामृतत्वादिपरं व्याख्येयमित्याह– **क्षयितेति** । यत्तु भास्करेण विलपितम्– नित्यानित्यविवेकादेरप्रकृतत्वान्न तदानन्तर्यमथशब्दार्थः; अत एव कर्मणां क्षयिष्णुफलत्वं ब्रह्मज्ञानस्य च मोक्षहेतुत्वमतःशब्देन न पराम्रष्टुं युक्तम्– इति, तं भाष्यभावव्याख्यया अनुकम्पते— **अत्र चेति** । तर्हि सकला वेदान्ताः परामृश्येरन्, नेत्याह– **योग्यत्वादिति** । अथशब्दोक्तहेतुत्वसमर्थनयोग्यत्वादित्यर्थः । हेतुमद्ब्रह्मजिज्ञासया हेतूनां नित्यानित्यविवेकादीनां सूत्रकारस्य बुद्धिस्थत्वात्तदानन्तर्यार्थत्वमथशब्दस्य युक्तमेव । चतुर्थीसमासाभावे हेतुमाह— **तादर्थ्येति** । पाणिनिः किल 'चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः' इति तादर्थ्यसमासं सस्मार। चतुर्थ्यन्तः शब्दः तदर्थवचनादिभिः शब्दैः समस्यते । चतुर्थ्य-

भामती।

दार्वादिष्वेव प्रकृतिविकारभूतेषु चतुर्थीसमासनियमात् अप्रकृतिविकारभूते इत्येवमादौ तन्निषेधात्, 'अश्वघासादयः षष्ठीसमासा भविष्यन्ति' इत्यश्व-

कल्पतरुः।

न्तशब्दार्थस्तच्छब्देन परामृश्यते। तस्मै इदं तदर्थम्। यथा 'कुण्डलाय हिरण्यम्' इत्यत्र कुण्डलं चतुर्थ्यन्तशब्दार्थः, तच्छेषो हिरण्यम्, तत्र कुण्डलशब्दश्चतुर्थ्यन्तः कुण्डलशेषवाचिना हिरण्यशब्देन समस्यते 'कुण्डलहिरण्यम्' इति, तथा अर्थशब्दादिनापि 'ब्राह्मणार्थं पयः' इत्यादि द्रष्टव्यम्। कात्यायनेन त्वयं समासः प्रकृतिविकृत्योर्नियमितः 'चतुर्थी तदर्थमात्रेणेति चेत् तर्हि सर्वप्रसङ्गोऽविशेषात्' 'विकृतिः प्रकृत्येति चेदश्वघासादीनामुपसंख्यानम्' इति। एवं चार्थात्प्रस्तुते तन्निषेधसिद्धिरित्याह— **अप्रकृतीति**। **इत्येवमादौ ब्रह्मजिज्ञासेत्येवमादाविति्यर्थः**। ननु 'अश्वार्थो घासः अश्वघासः' इत्यादावप्रकृतिविकारेऽपि तादर्थ्यसमासो दृष्ट इत्याशङ्क्य कात्यायनेनैव तत्र समासान्तरमुपसंख्यातमित्याह— **अश्वघासादय इति**॥

परिमलः।

कात्यायनेन त्विति। 'चतुर्थी तदर्थमात्रेणेति चेत् सर्वप्रसङ्गोऽविशेषात्' इति यथाश्रुतसूत्रार्थे अनुपपत्तिप्रदर्शकमेकं वार्त्तिकम्; सर्वप्रसङ्गः सर्वस्य चतुर्थ्यन्तस्य तदर्थमात्रेण समासप्रसङ्गः, 'रन्धनाय स्थाली' 'अवहननायोलूखलम्' इत्यादावपि समासः प्रसज्जेतित्यर्थः। 'विकृतिः प्रकृत्येति चेदश्वघासादीनामुपसंख्यानम्' इति वार्त्तिकान्तरम्; यदि विकृतिवाची चतुर्थ्यन्तशब्दः प्रकृतिवाचिना समस्यत इति विशेष्यते तदा सर्वप्रसङ्गः परिहृतो भवति; किं तु 'अश्वाय घासोऽश्वघासः' इति समासो न प्राप्नोति, प्रकृतिविकारभावाभावात्; अतस्तत्संग्रहार्थमुपसंख्यानं यत्नान्तरं कर्तव्यमित्यर्थः। एवमश्वघासादिषु चतुर्थीसमास इति वार्त्तिककारमतम्। एतदवलम्बनेनैव 'धर्माय जिज्ञासा धर्मजिज्ञासा' इति शबरस्वामिभिश्चतुर्थीसमासः समाश्रितः॥

कात्यायनेनैवेति। कात्यायनग्रहणमनादरेण शब्दाभियुक्तमात्रोपलक्षणं भाष्यकाराभिप्रायम्। भाष्यकारैः खलु तत्र वार्त्तिकमुल्लङ्घ्य यथाश्रुतसूत्रं समर्थयमानैः षष्ठीसमासः समाश्रितः। अत्रेदं भाष्यकारीयं वार्त्तिकप्रत्याख्यानम्— प्रकृतिविकृतिग्रहणाय यत्नस्तावन्न कर्तव्यः, सूत्रे बलिरक्षितग्रहणेन ज्ञापकेन तदर्थसिद्धेः। यदि हि तदर्थसमासस्तदर्थ-

भामती ।

घासादिषु षष्ठीसमासप्रतिविधानात् । षष्ठीसमासेऽपि च ब्रह्मणो वास्तवप्राधान्योपपत्तेरिति । स्यादेतत् । ब्रह्मणो जिज्ञासेत्युक्ते तत्रानेकार्थत्वाद्ब्रह्मशब्दस्य संशयः— कस्य ब्रह्मणो जिज्ञासेति । अस्ति ब्रह्मशब्दो विप्रत्वजातौ यथा— ब्रह्महत्येति ; अस्ति च वेदे यथा— ब्रह्मोज्झमिति; अस्ति च परमात्मनि यथा—

कल्पतरुः ।

ननु षष्ठीसमासाभ्युपगमे ब्रह्मणो जिज्ञासाव्यावर्तकत्वेन गुणत्वात्प्रधानपरिग्रह इति भाष्यस्थप्राधान्यभङ्गस्तत्राह— षष्ठीसमासेऽपीति । ब्रह्मोज्झं वेदत्यागः । प्रतिपत्तौ विशेषणत्वेनानुबध्यत इत्यनुबन्धः । स्वरूपेण निरूपितायां जिज्ञासायां

परिमलः ।

मात्रविषयः स्यात्, तदा कुबेराय बलिः कुबेरार्थो भवति अश्वाय रक्षितम् अश्वार्थं भवतीति 'कुबेरबलिः' 'अश्वरक्षितम्' इति समासयोस्तदर्थसमासविधिनैव सिद्धेः पृथग्बलिरक्षितग्रहणं न कर्तव्यं स्यात्; तत्कृतं ज्ञापयति तदर्थसमासः प्रकृतिविकृतिमात्रविषय इति । तथा अश्वघासाद्युपसंख्यानयत्नोऽपि न कर्तव्यः, तेषु षष्ठीचतुर्थीसमासयोः स्वरवैषम्याभावेन षष्ठीसमासोपपत्तेः इति । एवं सूत्रानुसारिभाष्यकारमतप्राबल्यात् वार्त्तिककारमतमनादृत्य चतुर्थीसमासासंभव उक्तः । इदमेव भाष्यकारमतमनुसृत्य भट्टपादैः 'धर्माय जिज्ञासा' इति शबरस्वामिवचनं षष्ठीसमासलब्धार्थिकार्थप्रदर्शनपरं न तु विग्रहप्रदर्शनपरम् 'तस्य ज्ञातुमिच्छा' इति निगमनवाक्येन षष्ठीसमासविभावनादिति व्याख्यातम् । आत्मनेपदपरस्मैपदशब्दयोः प्रकृतिविकारभावाभावेऽपि तादर्थ्यसमासस्तु 'वैयाकरणाख्यायां चतुर्थ्याः' इत्यलुग्विधानसामर्थ्यात्। न च तस्मादेव ज्ञापकात् सर्वत्रापि तादर्थ्यसमासः शङ्कनीयः; तथा सति बलिरक्षितग्रहणवैयर्थ्यापत्तेरुक्तत्वात् । **समासान्तरमुपसंख्यातमिति** । 'षष्ठी—' इति सूत्रविहितं समासान्तरं भाष्यकारैरङ्गीकृतमित्यर्थः । ननु— अज्ञातं ब्रह्म विषयो ज्ञातं ब्रह्म प्रयोजनमिति ब्रह्म विषयप्रयोजनोभयरूपमिष्यते ; तत्र प्रयोजनत्वप्रतिपत्त्युपयोगी चतुर्थीसमास इहासाधुरिति त्यक्तः ; एवमेवात्र विषयत्वप्रतिपत्त्युपयोगी षष्ठीसमासोऽप्यसाधुरेव ; तथा हि— केन सूत्रेणेह षष्ठी ? 'षष्ठी शेषे' इति सूत्रेण वा 'कर्तृकर्मणोः कृति' इति सूत्रेण वा ? नाद्यः, कर्मत्वं वाच्यं परिग्राह्यमिति शेषषष्ठ्यास्त्वया त्यक्तत्वात्; न द्वितीयः, 'प्रतिपदविधाना च षष्ठी न समस्यते' इति वार्त्तिकेन वैशेषिकसूत्रविहितषष्ठ्याः समासप्रतिषेधात्; अत एव 'सर्पिषो ज्ञानम्' इत्यत्र सर्पिषा करणेन प्रवृत्तिरित्यर्थके 'शोऽविदर्थस्य करणे' इति सूत्रेण वित्तिव्यतिरिक्तप्रवृ-

ब्रह्मजिज्ञासा। ब्रह्म च वक्ष्यमाणलक्षणम् 'जन्माद्यस्य यतः' इति। अत एव न ब्रह्मशब्दस्य जात्याद्यर्थान्तरमाशङ्कितव्यम्। ब्रह्मण इति कर्मणि षष्ठी, न शेषे; जिज्ञास्यापेक्षत्वाज्जिज्ञासायाः, जिज्ञास्यान्तरा-

---

भामती।

'ब्रह्म वेद ब्रह्मैव भवति' इति; तमिमं संशयमपाकरोति—**ब्रह्म च वक्ष्यमाणलक्षणमिति**। यतो ब्रह्मजिज्ञासां प्रतिज्ञाय तज्ज्ञापनाय परमात्मलक्षणं प्रणयति ततोऽवगच्छामः परमात्मजिज्ञासैवेयं न विप्रत्वजात्यादिजिज्ञासेत्यर्थः। षष्ठीसमासपरिग्रहेऽपि नेयं कर्मषष्ठी, किं तु शेषलक्षणा; संबन्धमात्रं च शेष इति ब्रह्मणो जिज्ञासेत्युक्ते ब्रह्मसंबन्धिनी जिज्ञासेत्युक्तं भवति। तथा च ब्रह्मस्वरूपप्रमाणयुक्तिसाधनप्रयोजनजिज्ञासाः सर्वा ब्रह्मजिज्ञासार्था ब्रह्मजिज्ञासयावरुद्धा भवन्ति, साक्षात्पारम्पर्येण वा ब्रह्मसंबन्धात्। कर्मणि षष्ठ्यां तु ब्रह्मशब्दार्थः कर्म, स च स्वरूपमेवेति तत्प्रमाणादयो नावरुध्येरन्, तथा चाप्रतिज्ञातार्थचिन्ता प्रमाणादिषु भवेदिति ये मन्यन्ते तान्प्रत्याह—**ब्रह्मण इति कर्मणीति**। अत्र हेतुमाह— **जिज्ञास्येति**। इच्छायाः प्रतिपत्त्यनुबन्धो ज्ञानम्, ज्ञानस्य च ज्ञेयं ब्रह्म। नो खलु ज्ञानं ज्ञेयं विना निरूप्यते, न च जिज्ञासा ज्ञानं विनेति प्रतिपत्त्यनुबन्धत्वात् प्रथमं जिज्ञासा कर्मैवापेक्षते, न तु संबन्धिमात्रम्, तदन्तरेणापि सति कर्मणि तन्निरूपणात्। न हि चन्द्रमसमादित्यं वोपलभ्य कस्यायमिति संबन्ध्यन्वेषणा भवति। भवति तु ज्ञानमित्युक्ते विषयान्वेषणा किंविषयमिति। तस्मात्प्रथममपेक्षितत्वात् कर्मतयैव ब्रह्म संबध्यते, न तु संबन्धितामात्रेण, तस्य जघन्यत्वात्। तथा च कर्मणि षष्ठीत्यर्थः। ननु सत्यं न जिज्ञास्यमन्तरेण जिज्ञासा निरूप्यते, जिज्ञास्यान्तरं त्वस्या भविष्यति, ब्रह्म तु शेषतया संभन्त्स्यत इत्यत आह— **जिज्ञास्यान्त-**

कल्पतरुः।

पश्चात्संबन्धिन्यपेक्षा; ब्रह्म च ज्ञानद्वारा जिज्ञासास्वरूपनिरूपकमिति प्रथमोदिताकाङ्क्षावशेन ब्रह्मजिज्ञासायां कर्मत्वेन संबध्यते न तु संबन्धिमात्रतयेत्यर्थः। जिज्ञासाज्ञानयोर्विषयाधीननिरूपणत्वं वैधर्म्यदृष्टान्तेन प्रपञ्चयति— **न हीति**॥

ननु प्रमाणयुक्त्यादि जिज्ञासायाः कर्म भविष्यति ब्रह्म तु संबन्धित्वेन निर्दिश्यताम्; न, निर्दिष्टकर्मलाभे कल्पनानुपपत्तेः इत्याह— **नन्वित्यादिना**।

निर्देशाच्च । ननु शेषषष्ठीपरिग्रहेऽपि ब्रह्मणो जिज्ञासाकर्मत्वं न विरुध्यते संबन्धसामान्यस्य विशेषनिष्ठत्वात्; एवमपि प्रत्यक्षं ब्रह्मणः कर्मत्व-

भामती ।

रेति । निगूढाभिप्रायश्चोद्यति— **ननु शेषषष्ठीपरिग्रहेऽपीति** । सामान्यसंबन्धस्य विशेषसंबन्धाविरोधेन कर्मताया अविघातेन जिज्ञासानिरूपणोपपत्तेरित्यर्थः । निगूढाभिप्राय एव दूषयति— **एवमपि प्रत्यक्षं ब्रह्मण इति** । वाच्यस्य कर्मत्वस्य जिज्ञासया प्रथममपेक्षितस्य प्रथमसंबन्धार्हस्य चान्वय-

कल्पतरुः ।

संभन्त्स्यते संबद्धं भविष्यति । ननु श्रुतकर्मत्यागायोगे स्थिते कथं शेषषष्ठी शङ्क्यत इत्यत आह— **निगूढाभिप्राय इति** । प्रमाणादिबहुश्रौतत्वसिद्धिरित्यभिप्रायस्य निगूढता । ननु ब्रह्मसंबन्धिनी जिज्ञासेत्युक्ते कर्मानिर्देशादनिरूपितरूपा जिज्ञासा स्यात् नेत्याह— **सामान्येति** । बहुप्रतिज्ञानां श्रौतत्वलाभात्कथं प्रयासवैयर्थ्येन परिहारः? तत्राह— **निगूढेति** । एकस्यापि प्रधानस्य श्रौतत्वं वरं न तु गुणानां बहूनामपीति निगूढता । **वाच्यस्येति** । शब्दोपात्तत्वेन साक्षात्संनिधिः; प्रथमापेक्षितस्येत्याकाङ्क्षा; प्रथमसंबन्धार्हस्येति योग्यता; एतैर्युक्तस्य कर्मत्वस्य संबन्धः प्रथमः सन्नपि जघन्यः; एतैररहितस्य संबन्धिमात्रस्य संबन्धो जघन्यः सन् प्रथम इति कल्पनं व्याहतमित्यर्थः । 'कर्तृकर्मणोः कृति' इति कृद्योगे कर्मणि षष्ठीस्मरणाद्वाच्यं कर्मत्वम्; जिज्ञासापदस्य चाकारप्रत्ययान्तत्वात् कृद्योगः । यस्तु 'कर्मणि च' इति कर्मणि षष्ठ्या समासप्रतिषेधः, स च 'उभयप्राप्तौ कर्मणि' इति या कर्तृ-

परिमलः ।

त्तिरूपार्थान्तरयुक्तजानातिकरणत्वनिमित्ता प्रतिपदविहिता षष्ठीति न समासः इत्याशङ्क्याह— **कर्तृकर्मणोः कृतीति** । कर्मत्वस्य वाच्यत्वसिद्ध्यर्थं द्वितीयपक्ष एवात्र परिगृह्यते । अस्ति ह्यत्र कृद्योगः जिज्ञासापदस्य, 'अ-प्रत्ययात्' इति प्रत्ययान्तधातोरुपरि विहिताकारप्रत्ययान्तत्वात् अकारप्रत्ययस्य च 'कृदतिङ्' इति सूत्रेण कृत्संज्ञकत्वात् । न च समासासंभवः; 'कृद्योगलक्षणा च षष्ठी समस्यते' इति प्रतिपदविधानत्वेऽपि कृद्योगनिमित्तषष्ठ्याः समासाभ्यनुज्ञानादिति भावः । ननु कृद्योगलक्षणषष्ठीष्वपि कर्मणि या षष्ठी तस्याः समासः 'कर्मणि च' इति सूत्रेण प्रतिषिद्ध इत्याशङ्क्याह— **यस्तु कर्मणीति** । 'कर्मणि च' इति सूत्रेण कर्मषष्ठीमात्रस्य समासप्रतिषेधो न भवति;

कल्पतरुः ।

कर्मणोरुभयोरपि सामर्थ्यादुपादानप्राप्तौ कर्मण्येवेति नियमिता षष्ठी, तद्विषयः । यथा 'आश्चर्यो गवां दोहोऽशिक्षितेनागोपालकेन' इति । एवं ह्यत्राश्चर्यं व्यज्येत यदि दुर्दोहानां गवां दोहे कर्मत्वमकुशलस्य चागोपालस्य कर्तृत्वम् । प्रस्तुते तु ब्रह्मकर्मत्वमेवोपादीयते न कर्तृगतोऽतिशय इत्युभयप्राप्त्यभावात् 'कर्तृकर्मणोः कृति' इत्येव षष्ठी । तेन 'ब्रह्मजिज्ञासा' इत्युपपन्नः समास इति ॥

परिमलः ।

तथा सति 'तृजकाभ्यां कर्तरि' इति सूत्रवैयर्थ्यप्रसङ्गात् । तेन हि सूत्रेण कर्तरि यौ तृजकौ ताभ्यां सह कर्मणि षष्ठ्याः समासो निषिध्यते 'अपां स्रष्टा' 'ओदनस्य भोजकः' इत्यादौ । न च कर्मषष्ठीमात्रस्यात्र समासनिषेधे तत्सफलं भवेत्; अतः 'कर्मणि च' इति सूत्रे चकार इतिकरणार्थः । कर्मणीति शब्दमुच्चार्य या षष्ठी नियमिता सा न समस्यत इति तदर्थः । ततश्च 'उभयप्राप्तौ कर्मणि' इति सूत्रेण कर्मणीति शब्दमुच्चार्य नियमिता षष्ठी तस्य समासप्रतिषेधस्य विषयः, न तु 'कर्तृकर्मणोः कृति' इति सूत्रविहिता कर्मणि षष्ठीत्यर्थः ॥

ननु– इहाप्युभयप्राप्तिसूत्रनियमितैव कर्मणि षष्ठी; तस्य हि सूत्रस्यैवमर्थः– कर्तृकर्मणोरुभयोः षष्ठीप्राप्तिर्यस्मिन्नेकस्मिन् कृति भवति तस्मिन् कृति सति कर्मण्येव षष्ठी न कर्तरीति; तथा चात्र साधनचतुष्टयसंपन्नः कर्ता यदि श्रूयेत तदा तस्मिन्नपि कर्मणीव 'कर्तृकर्मणोः कृति' इति सूत्रेण षष्ठ्याः प्राप्तौ निमित्तं भवति जिज्ञासेति कृत्प्रत्ययः; अतोऽत्र 'कर्मणि च' इति समासप्रतिषेधः स्यादेव– इत्याशङ्क्याह— **सामर्थ्यादुपादानप्राप्ताविति** । 'कृत्वोर्थप्रयोगे कालेऽधिकरणे' इति व्यवहितपूर्वसूत्रात् प्रयोग इत्यनुवर्तते । तच्च कर्तृगतकिंचिदतिशयविवक्षासामर्थ्यात् कर्तृकर्मोभयप्रयोगावश्यंभावपरम्। एवं च 'आश्चर्यो गवां दोहः' इत्यादिरेवोभयप्राप्तिसूत्रविषयः । तत्र ह्याश्चर्यशब्दसूचितकर्तृगतातिशयोपपादनोपयोगितया दुर्दोहत्वरूपाजादिवैलक्षण्यसूचनाय गोत्वेन दोहकर्मणां तद्दोहासामर्थ्यसंभावनासूचनायाशिक्षितत्वादिना दोहकर्तुश्चोपादानमपेक्षितं कृतम्; नेह तथा किंचिदतिशयविवक्षया कर्तुरुपादानं कृतमस्तीति नात्रोभयप्राप्तिसूत्रेण कर्मणि षष्ठीनियमनमित्यर्थः । ननु– यत्र कर्तृकर्मोभयप्रयोगो नास्ति तत्र गम्यमानेऽपि कर्मण्युभयप्राप्तिसूत्रेण कर्तरि षष्ठ्याः प्रतिषेधमभिप्रेत्य तृतीयाप्रयोगः सूत्रकारेणैव कृतो दृश्यते । 'अन्तर्धौ येनादर्शनमिच्छति' इति अन्तर्धिनिमित्तं यत्कर्तृकदर्थनं तावत् स्वात्मनः कर्मणोऽन्तरङ्गप्रत्यासत्त्या गम्यमानस्येच्छति तस्यापादानसंज्ञा

मुत्सृज्य सामान्यद्वारेण परोक्षं कर्मत्वं कल्पयतो व्यर्थः प्रयासः स्यात्। (ननु)न व्यर्थः, ब्रह्माश्रिताशेषविचारप्रतिज्ञानार्थत्वादिति चेत्; न, प्रधानपरिग्रहे तदपेक्षितानामप्यर्थाक्षिप्तत्वात्। ब्रह्म हि ज्ञानेनाप्तुमिष्टतमत्वात्प्रधानम्। तस्मिन्प्रधाने जिज्ञासाकर्मणि परिगृहीते, यैर्जिज्ञासितैर्विना ब्रह्म जिज्ञासितं न भवति, तान्यर्थाक्षिप्तान्येवेति न पृथक्सूत्रयितव्यानि।

भामती।

परित्यागेन पश्चात्कथंचिदपेक्षितस्य संबन्धिमात्रस्य संबन्धो जघन्यः प्रथमः प्रथमश्च जघन्य इति सुव्याहृतं न्यायतत्त्वम्। प्रत्यक्षपरोक्षताभिधानं च प्राथम्याप्राथम्यस्फुटत्वास्फुटत्वाभिप्रायम्। चोदकः स्वाभिप्रायमुद्घाटयति— **न व्यर्थः ब्रह्माश्रिताशेषेति**। व्याख्यातमेतदधस्तात्। समाधाता स्वाभिसंधिमुद्घाटयति— **न प्रधानपरिग्रह इति**। वास्तवं प्राधान्यं ब्रह्मणः। शेषं सनिदर्शनमतिरोहि-

कल्पतरुः।

भाष्ये प्रत्यक्षनिर्देशो न युक्तः शाब्दत्वात्कर्मत्वस्य; तत्राह— **प्रत्यक्षेति**। अविरुद्धमपि परोक्षत्वं व्याख्येयप्रत्यक्षत्वस्य प्रतियोगित्वाद्व्याख्यातम्। परमते कर्मत्वस्य लाक्षणिकत्वं चरमान्वयप्रसञ्जनार्थम्। नन्वयुक्तमपि ज्ञानस्येच्छाविषयत्वं

परिमलः।

अनेन सूत्रेण विधीयते; तथा च 'उपाध्यायादन्तर्धत्ते' इत्यत्र पञ्चमी भवति; न च कर्मणि गम्यमाने एवोभयप्राप्तिसूत्रप्रवृत्तिः न कर्तरि गम्यमान इति विशेषः शङ्कनीयः; कर्तृकर्मोभयोपादाननियमभङ्गे सति अस्य विशेषस्याप्रयोजकत्वात् इति इहापरितोषश्चेत्; एवं परिहारो द्रष्टव्यः— 'अकाकारयोः प्रतिषेधो नेति वक्तव्यम्, शेषे विभाषा' इति भाष्यकारैः 'उभयप्राप्तौ कर्मणि' इति कर्तरि षष्ठीप्रतिषेधस्य अके अकारे च कृति नित्यमप्रवृत्तिः स्त्रीप्रत्ययरूपे कृति तद्व्यतिरिक्तकृन्मात्रे वा विकल्पेन प्रवृत्तिश्चोक्ता; उदाहृतं च 'भेदिका देवदत्तस्य काष्ठानाम्' 'चिकीर्षा विष्णुमित्रस्य कटस्य' इति, 'शोभना खलु पाणिनेः सूत्रस्य कृतिः' 'शोभना खलु पाणिनिना सूत्रस्य कृतिः' इति च। तस्मादिह जिज्ञासेत्यकारप्रत्ययप्रयोगात् नोभयप्राप्तिसूत्रविषयत्वशङ्कावकाश इति। अयमपि परिहारो जिज्ञासापदस्याकारप्रत्ययान्तत्वं दर्शयद्भिराचार्यैः सूचितः।

व्याख्यातमिति। चरमत्वास्फुटत्वपरतयेति शेषः। परमास्तस्य सूत्र[illegible]स्योप-

यथा 'राजासौ गच्छति' इत्युक्ते सपरिवारस्य राज्ञो गमनमुक्तं भवति, तद्वत्। श्रुत्यनुगमाच्च। 'यतो वा इमानि भूतानि जायन्ते' इत्याद्याः श्रुतयः 'तद्विजिज्ञासस्व तद्ब्रह्म' इति प्रत्यक्षमेव ब्रह्मणो जिज्ञासाकर्मत्वं दर्शयन्ति। तच्च कर्मणिषष्ठीपरिग्रहे सूत्रेणानुगतं भवति। तस्माद्ब्रह्मण इति कर्मणि षष्ठी॥

ज्ञातुमिच्छा जिज्ञासा। अवगतिपर्यन्तं ज्ञानं सन्वाच्यायाः इच्छायाः कर्म, फलविषयत्वादिच्छायाः। ज्ञानेन हि प्रमाणेनावगन्तुमिष्टं

भामती।

तार्थम्, श्रुत्यनुगमश्चातिरोहितः। तदेवमभिमतं समासं व्यवस्थाप्य जिज्ञासापदार्थमाह— ज्ञातुमिति। स्यादेतत्। न ज्ञानमिच्छाविषयः। सुखदुःखावाप्तिपरिहारौ वा तदुपायो वा तद्द्वारेणेच्छागोचरः। न चैवं ब्रह्मज्ञानम्। न खल्वेतदनुकूलमिति वा प्रतिकूलनिवृत्तिरिति वानुभूयते। नापि तयोरुपायः, तस्मिन्सत्यपि सुखभेदस्यादर्शनात्। अनुवर्तमानस्य च दुःखस्यानिवृत्तेः। तस्मान्न सूत्रकारवचनमात्रादिषिकर्मता ज्ञानस्येत्यत आह— अवगतिपर्यन्तमिति। न केवलं ज्ञानमिष्यते किं त्ववगतिं साक्षात्कारं कुर्वदवगतिपर्यन्तं सन्वाच्यायाः इच्छायाः कर्म। कस्मात्? फलविषयत्वादिच्छायाः, तदुपायं फलपर्यन्तं गोचरयतीच्छेति शेषः। ननु भवत्ववगतिपर्यन्तं ज्ञानम्, किमेतावतापीष्टं भवति? न ह्यनपेक्षणीयविषयमवगतिपर्यन्तमपि ज्ञानमिष्यत इत्यत आह— ज्ञानेन हि प्रमाणेनावगन्तुमिष्टं ब्रह्म। भवतु ब्रह्मविषयावगतिः

कल्पतरुः।

सौत्रजिज्ञासापदात्प्रतीयताम्; न, न्यायसूत्र उपदेशमात्रेणाविश्वासात् इत्याह— नेति। साक्षात्कारसाधनं ज्ञानमिच्छाविषय इति प्रतिज्ञाय फलविषयत्वादिच्छाया इति हेतुरयुक्तो व्यधिकरणत्वात्, तत्राह— तदुपायमिति। फलेच्छाया एवोपाय-

परिमलः।

देशमात्रेणापि विश्वासः स्यादित्याशङ्क्य न्यायसूत्र इति विशेषितम्। फलेच्छाया एवेति। फलेच्छैव हि स्वसाधनत्वोपाधिना उपायेच्छामादधाति। अत उपायेच्छा

ब्रह्म । ब्रह्मावगतिर्हि पुरुषार्थः, निःशेषसंसारबीजाविद्याद्यनर्थनिबर्हणात् । तस्माद्ब्रह्म जिज्ञासितव्यम् ॥

भामती ।

एवमपि कथमिष्टेत्यत आह— **ब्रह्मावगतिर्हि पुरुषार्थः** । किमभ्युदयः, न, किं तु निःश्रेयसं विगलितनिखिलदुःखानुषङ्गपरमानन्दघनब्रह्मावगतिर्ब्रह्मणः स्वभाव इति सैव निःश्रेयसं पुरुषार्थ इति । स्यादेतत् । न ब्रह्मावगतिः पुरुषार्थः । पुरुषव्यापारव्याप्यो हि पुरुषार्थः । न चास्या ब्रह्मस्वभावभूताया उत्पत्तिविकारसंस्कारप्राप्तयः संभवन्ति । तथा सत्यनित्यत्वेन तत्स्वाभाव्यानुपपत्तेः । न चोत्पत्त्याद्यभावे व्यापारव्याप्यता । तस्मान्न ब्रह्मावगतिः पुरुषार्थ इत्यत आह— **निःशेषसंसारबीजाविद्याद्यनर्थनिबर्हणात्** । सत्यम्, ब्रह्मावगतौ ब्रह्मस्वभावे नोत्पत्त्यादयः संभवन्ति, तथाप्यनिर्वचनीयानाद्यविद्यावशाद्ब्रह्मस्वभावोऽपराधीनप्रकाशोऽपि प्रतिभानपि न प्रतिभातीव पराधीनप्रकाश इव देहेन्द्रियादिभ्यो भिन्नोऽप्यभिन्न इव भासत इति संसारबीजाविद्याद्यनर्थनिबर्हणात्प्रागप्राप्त इव तस्मिन्सति प्राप्त इव भवतीति पुरुषेणार्थ्यमानत्वात्पुरुषार्थ इति युक्तम् । अविद्यादीत्यादिग्रहणेन तत्संस्कारोऽवरुध्यते । अविद्यादिनिवृत्तिस्तूपासनाकार्यादन्तःकरणवृत्तिभेदात् साक्षात्कारादिति द्रष्टव्यम् । उपसंहरति— **तस्माद्ब्रह्म जिज्ञासितव्यम्** उक्तलक्षणेन मुमुक्षुणा । न खलु तज्ज्ञानं विना सवासनविविधदुःखनिदानमविद्योच्छिद्यते । न च तदुच्छेदमन्तरेण विगलितनिखिलदुःखानुषङ्गानन्दघनब्रह्मात्मतासाक्षात्कारविर्भावो जी-

कल्पतरुः ।

पर्यन्तं प्रसरादविरोध इत्यर्थः । **भवतु ब्रह्मविषयावगतिरिति** । स्वरूपावगतिः स्वविषयव्यवहारहेतुत्वेन तद्विषयोक्ता । ब्रह्मणोऽपि धर्मवदसुखत्वान्न तदवगतिः पुमर्थ इत्याह— **एवमपीति** । श्रुतिस्वानुभवावगतनिर्दुःखानन्दमभिप्रेत्य परिहारः— **ब्रह्मावगतिर्हीति** । प्रतिभान् प्रतिभासमानः । **अर्थ्यमानत्वात्** प्रार्थ्यमानत्वात् । अविद्यानिवृत्तिर्न स्वरूपावगत्या नित्यनिवृत्त्यापातात् अपि तु वृत्तित इत्याह— **अविद्यादीति** ॥

पदार्थान्व्याख्याय सूत्रवाक्यार्थमाह— **तस्मादित्यादिना** । **विगलितदुःखेति** वृत्तिव्यक्तस्वरूपाभिप्रायम् । सूत्रस्यानुवादत्वव्यावृत्तये तव्यप्रत्ययमध्याहरति—

भामती।

वस्य। तस्मादानन्दघनब्रह्मात्मतामिच्छता तदुपायो ज्ञानमेषितव्यम्। तच्च न केवलेभ्यो वेदान्तेभ्यः अपि तु ब्रह्ममीमांसोपकरणेभ्य इति इच्छामुखेन ब्रह्ममीमांसायां प्रवर्त्यते, न तु वेदान्तेषु तदर्थविवक्षायां वा; तत्र फलवदर्थावबोधपरतां स्वाध्यायाध्ययनविधेः सूत्रयता 'अथातो धर्मजिज्ञासा' इत्यनेनैव प्रवर्तितत्वात्, धर्मग्रहणस्य च वेदार्थोपलक्षणत्वेनाधर्मवद्ब्रह्मणोऽप्युपलक्षणत्वात्। यद्यपि च धर्ममीमांसावत् वेदार्थमीमांसया ब्रह्ममीमांसाप्याक्षेप्तुं शक्यते, तथापि प्राच्या मीमांसया न तद्व्युत्पाद्यते, नापि ब्रह्ममीमांसाया अध्ययनमात्रानन्तर्य-

कल्पतरुः।

एषितव्यमिति। किमिति ज्ञानमेषितव्यं वेदान्तेभ्य एव तत्सिद्धेरिति; न, संदेहादिना प्रतिबन्धादित्याह— तच्चेति। नन्विच्छाया विषयसौन्दर्यलभ्यत्वात्किं तत्कर्तव्यतोपदेशेन? तत्राह— इच्छामुखेनेति। ज्ञातुमिच्छा हि संदिग्धे विषये निर्णयाय भवति निर्णयश्च विचारसाध्य इति तत्कर्तव्यता अर्थाद्गम्यत इत्यर्थः। आर्थिके चास्मिन्नर्थे कर्तव्यपदाध्याहारः। श्रौतस्तु मुमुक्षानन्तरं ब्रह्मज्ञानेच्छा भवितुं युक्ता इत्येष एव। तथा चाधिकारार्थत्वमथशब्दस्य निषेद्धुं ज्ञानेच्छा जिज्ञासाशब्दार्थ इत्युपपादनेन न विरोध इति। ननु धर्मग्रहणाद्विधीनामर्थविवक्षा तत्र कृता, न वेदान्तानाम्; नेत्याह— धर्मग्रहणस्येति॥

उपलक्षणतया वेदान्तानामर्थविवक्षाप्रतिज्ञावद्विचारप्रतिज्ञापि तत्रैवास्त्विति शङ्क्योपरि प्रतिपादनादर्शनान्नेत्याह— यद्यपीति। ब्रह्मविचारप्रतिज्ञायास्तत्र संभवमङ्गीकृत्य परिहार उक्तः; इदानीं संभव एव नास्तीत्याह— नापीति। अवि-

परिमलः।

फलविषयापि भवतीत्येतत् युज्यत इति भावः। आर्थिके चास्मिन्निति। टीकायामेषितव्यमित्युक्त्या सूत्रे जिज्ञासा कर्तव्येति कर्तव्यपदाध्याहारः सूचितः। स तु जिज्ञासापदस्य कृतियोग्यविचारार्थकत्वाभिप्रायो न भवति, 'ब्रह्मजिज्ञासाया अनधिकार्यत्वात्' इति भाष्ये जिज्ञासाशब्दस्यानधिकार्यज्ञानेच्छापरत्वस्याङ्गीकृतत्वात्; किं त्वार्थिकविचारकर्तव्यत्वाभिप्राय इत्यर्थः॥

अर्थविवक्षाप्रतिज्ञावदिति। नन्वर्थविवक्षाप्रतिज्ञा विचारप्रतिज्ञेति नास्ति प्रतिज्ञाद्वयं धर्मजिज्ञासासूत्रे येनाद्यप्रतिज्ञायां धर्मग्रहणं वेदार्थमात्रोपलक्षणं न द्वितीयप्रतिज्ञायामिति विभज्येत, किं त्वेकैव तत्र विचारप्रतिज्ञा; वेदस्य विवक्षितार्थत्वं तु अतःश-

तत्पुनर्ब्रह्म प्रसिद्धमप्रसिद्धं वा स्यात्; यदि प्रसिद्धं न जिज्ञासि-

भामती ।

मिति ब्रह्ममीमांसारम्भाय नित्यानित्यविवेकाद्यानन्तर्यप्रदर्शनाय चेदं सूत्रमारम्भणीयमित्यपौनरुक्त्यम् । स्यादेतत् । एतेन सूत्रेण ब्रह्मज्ञानं प्रत्युपायता मीमांसायाः प्रतिपाद्यत इत्युक्तम्; तदयुक्तम्, विकल्पासहत्वात् इति चोदयति— **तत्पुनर्ब्रह्मेति** । वेदान्तेभ्योऽपौरुषेयतया स्वतःसिद्धप्रामाण्येभ्यः प्रसिद्धमप्रसिद्धं वा स्यात् । यदि प्रसिद्धम्, वेदान्तवाक्यसमुत्थेन निश्चयज्ञानेन विषयीकृतम्, ततो न जिज्ञासितव्यम्, निष्पादितक्रिये कर्मणि अविशेषा-

कल्पतरुः ।

रक्तस्य ब्रह्मविचारे प्रवृत्त्ययोगादित्यर्थः । ब्रह्ममीमांसारम्भायेति प्राचा तन्त्रेणागततोक्ता । **नित्यानित्यविवेकाद्यानन्तर्यप्रदर्शनायेति** । तत्रत्यप्रथमसूत्रेणेहत्यप्रथमसूत्रस्य । युष्मदस्मदित्यादिना ह्यहंप्रत्यये जीवस्य प्रसिद्धेरसंसारिब्रह्मात्मत्वस्य चाभावात् विषयमाचिक्षिपे । अत्र तूपेत्य ब्रह्मात्मभावं वेदान्तेभ्यस्तत्सिद्धयसिद्धिभ्यामाक्षेप इति विभागमाह— **वेदान्तेभ्य इति** । संमुग्धप्रसिद्धस्य जिज्ञास्यत्वसंभवादाक्षेपायोगमाशङ्क्याह— **निश्चयज्ञानेनेति** । अनिश्चायकत्वं तु वेदान्तानामयुक्तं निर्दोषत्वादित्याह— **अपौरुषेयतयेति** । निष्पादिता प्रमितिलक्षणा क्रिया यस्य कर्मणो विष-

परिमलः ।

न्देन तत्र हेतुतयोच्यते; तद्धेतुकरणसामर्थ्याच्च वेदस्याध्ययनविनियोगशेषत्वेन विषनिर्हरणादिमन्त्रवदविवक्षितार्थत्वशङ्का निरस्यत इति चेत्; सत्यम्; धर्ममात्रस्य तत्र विचार्यत्वप्रतिज्ञायामपि विशिष्य धर्मपरवेदभागमात्रस्य विवक्षितार्थत्वं न हेतुः, तथा सति वेदान्तभागस्य अविवक्षितार्थत्वशङ्कायां न्यायतौल्येन पूर्वभागस्यापि तद्वदविवक्षितार्थत्वमस्त्विति शङ्कायाः स्थिरीकरणापत्तेः; किं तु कृत्स्नवेदाध्ययनानन्तर्यस्याथशब्दार्थत्वात् अधीतस्य कृत्स्नस्य वेदस्य विवक्षितार्थत्वं हेतुतयोच्यते इत्यत्र तात्पर्यम् । एवं च धर्मग्रहणस्य वेदार्थमात्रोपलक्षणत्वादिति टीकायां धर्मस्य यद्ग्रहणम् अतःशब्दोक्तविवक्षितार्थत्वे हेतावर्थशब्देनोपादानं तस्य वेदार्थमात्रोपलक्षणत्वादित्यर्थो दर्शितो भवति । टीकायामपि स एवार्थः प्रकृतोपयोगी । तत्र हि ब्रह्मजिज्ञासासूत्रं ब्रह्मज्ञानेच्छोपदर्शनमुखेन तदर्थायां ब्रह्ममीमांसायां प्रवर्तनार्थम्, न तु वेदान्ताध्ययने प्रवर्तनार्थं वेदान्तानां विवक्षितार्थत्वोपपादनार्थं वा, इत्युक्त्वा वेदान्ताध्ययने प्रवृत्तेरध्ययनविधिना सिद्धत्वादिति हेतुं स्पष्टत्वादप्रदर्श्य, वेदान्तानां विवक्षितार्थत्वस्य फलवदर्थावबोधपरताम-

तव्यम् । अथाप्रसिद्धं नैव शक्यं जिज्ञासितुमिति । उच्यते— अस्ति तावद्ब्रह्म नित्यशुद्धबुद्धमुक्तस्वभावं सर्वज्ञं सर्वशक्तिसमन्वितम् । ब्रह्मश-

भामती ।

धायिनः साधनस्य साधनन्यायातिपातात् । अथाप्रसिद्धं वेदान्तेभ्यः तर्हि न तद्वेदान्ताः प्रतिपादयन्तीति सर्वथाप्रसिद्धं नैव शक्यं जिज्ञासितुम् । अनुभूते हि प्रिये भवतीच्छा न तु सर्वथाननुभूतपूर्वे । न चेष्यमाणमपि शक्यं ज्ञातुम्, प्रमाणाभावात् । शब्दो हि तस्य प्रमाणं वक्तव्यम् । यथा वक्ष्यति— 'शास्त्रयोनित्वात्' इति । स चेत्तन्नावबोधयति, कुतस्तस्य तत्र प्रामाण्यम् ? न च प्रमाणान्तरं ब्रह्मणि प्रक्रमते । तस्मात्प्रसिद्धस्य ज्ञातुं शक्यस्याप्यजिज्ञासनात् अप्रसिद्धस्येच्छाया अविषयत्वात् अशक्यज्ञानत्वाच्च न ब्रह्म जिज्ञास्यमित्याक्षेपः । परिहरति— उच्यते— अस्ति तावद्ब्रह्म नित्यशुद्धबुद्धमुक्तस्वभावम् ।

कल्पतरुः ।

यस्य स इह तथोक्तः । यद्यपि निर्दोषो वेदस्तथापि सामान्यतोदृष्टनिबन्धनवचनव्यक्त्याभासप्रतिबद्धः संदिग्धार्थः स्यात्; अतो विचारात्प्रागापातप्रसिद्धिं दर्श-

परिमलः ।

ध्ययनविधेः सूत्रयता धर्मजिज्ञासासूत्रेणैव सिद्धत्वात् इति हेतुः प्रागुक्तः । तदुपादानार्थं विवक्षितार्थत्वादिति हेतावर्थग्रहणस्य वेदान्तार्थसाधारण्यमेव वक्तव्यं न तु धर्मजिज्ञासेत्यत्र धर्मग्रहणस्य । अत इह टीकाकारैर्धर्मशब्दस्य वेदार्थमात्रोपलक्षणत्वं वदद्भिः धर्मजिज्ञासासूत्रं वेदार्थविचारप्रतिज्ञापरं विंशतिलक्षणीसाधारणमङ्गीकृतमिति न मन्तव्यम् ॥

सामान्यतोदृष्टनिबन्धनवचनव्यक्त्याभासप्रतिबद्धः संदिग्धार्थः स्यादिति । यद्यपि 'तत्त्वमसि' इत्यादिर्वेदान्तः स्वारस्येन ब्रह्मात्मैक्यं बोधयति, तथापि अन्यत्र क्वचिद्दृष्टमित्येतावन्मात्रमवलम्ब्य प्रवृत्तान्वचनव्यक्त्याभासान् वाक्ययोजनाभासान् वादिभिरुत्प्रेक्षितान् पश्यतस्तैः प्रतिबद्धः सन् वेदान्तः संदिग्धार्थः स्यात् । तथा हि— 'अनृक्षरा ऋजवः सन्तु पन्थाः' इत्यत्र पन्थान इति बहुवचनस्य 'सुपां सुलुक्' इत्यादिसूत्रेण स्वादेशो दृष्टः, 'उत यत्सुन्वन्ति सामिधेनीस्तदन्वाह' इत्यत्र यत्तद्भ्यां सप्तम्यास्तेनैव सूत्रेण लुक् दृष्टः, 'गायत्री छन्दसां माता' इत्यत्र द्वितीया प्रथमार्थ इति विभक्तिव्यत्ययो दृष्टः । एवम् 'तत्त्वमसि' इत्यत्र तदित्यस्मात् चतुर्थ्याः स्वादेशो लुक्

भामती ।

अयमर्थः— प्रागपि ब्रह्ममीमांसाया अधीतवेदस्य निगमनिरुक्तव्याकरणादिपरिशीलनविदितपदतदर्थसंबन्धस्य 'सदेव सोम्येदमग्र आसीत्' इत्युपक्रमात् 'तत्त्वमसि' इत्यन्तात्संदर्भात् नित्यत्वाद्युपेतब्रह्मस्वरूपावगमस्तावदापाततो विचाराद्विनाप्यस्ति । अत्र च ब्रह्मेत्यादिनावगम्येन तद्विषयमवगमं लक्षयति, तदस्तित्वस्य सति विमर्शे विचारात्प्रागनिर्णयात् । नित्येति क्षयितालक्षणं

कल्पतरुः ।

यन्नप्रसिद्धपक्षोक्तं दोषमुद्धरति— प्रागपि ब्रह्ममीमांसाया इति । भाष्ये ब्रह्मास्तित्वप्रतिज्ञा भाति । कथं प्रतीतिपरत्वव्याख्येत्याशङ्क्य प्रत्याय्येन प्रत्ययलक्षणमाह— अत्र चेति । मुख्यार्थपरिग्रहे बाधमाह— तदस्तित्वस्येति । विमर्शे

परिमलः ।

विभक्तिव्यत्ययो वेति, तस्मै जगत्कारणाय ब्रह्मणे त्वं त्वदात्मा समर्पणीय इत्यर्थः, 'ब्रह्मणे त्वा महस ओम् इत्यात्मानं युञ्जीत' इति श्रुत्यन्तरात् । अथ वा पञ्चम्याः स्वादेशादिभिस्तस्मात्त्वं तस्माज्जातस्त्वमित्यर्थः, 'यतो वा इमानि भूतानि जायन्ते' इति श्रुत्यन्तरात् । अथ वा षष्ठ्याः स्वादेशादिभिस्तस्य त्वं तत्स्वामिकस्त्वमित्यर्थः, 'स कारणं करणाधिपाधिपः' इति श्रुत्यन्तरात् । अथ वा सप्तम्याः स्वादेशादिभिस्तस्मिंस्त्वं तदाश्रितस्त्वमित्यर्थः, 'प्राणबन्धनं हि सोम्य मनः' इति तत्रैव श्रवणात् । अथ वा 'ब्राह्मणस्त्वम्' 'मनुष्यस्त्वम्' इत्यादिवत् शरीरशरीरिभावनिबन्धनम् 'तत्त्वम्' इति सामानाधिकरण्यम्, 'यस्यात्मा शरीरम्' इति श्रुत्यन्तरात् । अथ वा 'अघोरापापकाशिनी' इत्यत्रेवाकारप्रश्लेषात् 'अतत्त्वमसि' इति च्छेदः, 'द्वा सुपर्णा' इत्यादिभेदश्रुत्यनुरोधादिति । एवम् 'मीमांसका हि वाक्यार्थविचारे प्रस्तुते सति । लोकदृष्टीः प्रतिघ्नन्ति वचनव्यक्तिपांसुभिः' इति ग्रहाधिकरणवार्त्तिकोक्तरीत्या तत्तदुत्प्रेक्षितवचनव्यक्त्याभासापादितसंदेहाक्रान्ता तत्त्वमस्यादिवाक्यजन्या ब्रह्मात्मैक्यधीरापाततः प्रसिद्धिरित्यर्थः । '—वचनयुक्त्याभास—' इति पाठे 'द्वा सुपर्णा' इत्यादयो भेदप्रतिपादनच्छायापत्त्या वचनाभासाः, तदुपोद्बलकयुक्तयो युक्त्याभासाः । 'सामान्यतोदृष्टवचनव्यक्त्या आपाततः प्रसिद्धेः संदिग्धार्थः स्यात्' इति पाठः प्रागुक्त एवार्थे योजनीयः— सामान्यतो दृष्टेन या वचनव्यक्तिस्तया अर्थान्तराणामप्यापाततः प्रतीतेः संदिग्धार्थः स्यादिति । ब्रह्मात्मस्वरूपनिर्णायकवाक्येष्वर्थसंदेहेऽपि नित्यानित्यवस्तुविवेकान्तर्गतबन्धमिथ्यात्वसद्रूपतदधिष्ठानावश्यंभावनिश्चयो मोक्षार्थप्रवृत्त्युपयोग्यन्तःकरणशुद्ध्यापादककर्मानुष्ठानमहिम्नेति प्रागेवोक्तम् ॥

ब्दस्य हि व्युत्पाद्यमानस्य नित्यशुद्धत्वादयोऽर्थाः प्रतीयन्ते, बृहतेर्धातो-

भामती।

दुःखमुपक्षिपति। शुद्धेति देहाद्युपाधिकमपि दुःखमपाकरोति। बुद्धेत्यपराधीन-प्रकाशमानन्दात्मानं दर्शयति, आनन्दप्रकाशयोरभेदात्। स्यादेतत्। मुक्तौ सत्यामस्यैते शुद्धत्वादयः प्रथन्ते, ततस्तु प्राक् देहाद्यभेदेन तद्धर्मजन्मजरा-मरणादिदुःखयोगादित्यत उक्तम्— मुक्तेति। सदैव मुक्तः सदैव केवलोऽनाद्य-विद्यावशात्तु भ्रान्त्या तथावभासत इत्यर्थः। तदेवमनौपाधिकं ब्रह्मणो रूपं दर्शयित्वा अविद्योपाधिकं रूपमाह— सर्वज्ञं सर्वशक्तिसमन्वितम्। तदनेन जगत्कारणत्वमस्य दर्शितम्, शक्तिज्ञानभावाभावानुविधानात्कारणत्वभावाभाव-योः। कुतः पुनरेवंभूतब्रह्मस्वरूपावगतिः इत्यत आह— ब्रह्मशब्दस्य हीति। न केवलम् 'सदेव सोम्येदम्' इत्यादीनां वाक्यानां पौर्वापर्यपर्यालोचनया इत्थं-भूतब्रह्मावगतिः। अपि तु ब्रह्मपदमपि निर्वचनसामर्थ्यादिममेवार्थं स्वहस्त-यति। निर्वचनमाह— बृहतेर्धातोरर्थानुगमात्। वृद्धिकर्मा हि बृहतिरति-शायने वर्तते। तच्चेदमतिशायनमनवच्छिन्नं पदान्तरावगमितं नित्यशुद्धबुद्धत्वा-

कल्पतरुः।

संशये। देहाद्यभेदेनेति भेदाभेदमतेन शङ्का। तत्त्वमसिवाक्यनिविष्टतत्पदलक्ष्य-प्रसिद्धिमुक्त्वा वाच्यप्रसिद्धिमाह— अविद्योपाधिकमिति। अविद्याविषयीकृत-मित्यर्थः। शक्तीति। शक्तिज्ञानाभ्यां कारणं लक्ष्यते। यो हि जानाति शक्नोति च स करोति नेतर इत्यनुविधानादित्यर्थः॥

'सदेव-' इत्यादिवाक्यात्प्रसिद्धिमुक्त्वा पदादपि सोच्यत इति वक्तुं पृच्छति— कुतः पुनरिति। वाक्यात्प्रसिद्धस्यैव पुनरपि कुतो हेत्वन्तरात्प्रसिद्धिरित्यर्थः। ननु बृहतिधातुरतिशायने वर्तताम्, आपेक्षिकं तु तत् 'बृहत्कुम्भः' इतिवत्, नेत्याह— अनवच्छिन्नमिति। प्रकरणादिसंकोचकाभावादित्यर्थः। पदान्तरं साक्षान्नित्यत्वा-दिबोधकं नित्यादिपदम्। उक्तविशेषणानामन्यतमेनापि रहितस्य न महत्त्वसिद्धिः,

परिमलः।

ततस्तु प्राक् देहाद्यभेदेन इति टीकाग्रन्थो न चार्वाकमताभिप्रायः, तन्मते मुक्तौ देहात्मनोर्भेद इत्यस्याभावात्। नापि भ्रान्तिकृताभेदाभिप्रायः, तस्य सिद्धान्त्यभि-मतत्वेनानिराकार्यत्वादित्याशङ्क्य तत्तात्पर्यमाह— भेदाभेदमतेन शङ्केति। षष्ठ्योः

र्थानुगमात्। सर्वस्यात्मत्वाच्च ब्रह्मास्तित्वप्रसिद्धिः। सर्वो ह्यात्मास्तित्वं प्रत्येति न न 'अहमस्मि' इति। यदि हि नात्मास्तित्वप्रसिद्धिः स्यात्,

---

भामती।

यस्याभ्यनुजानातीत्यर्थः। तदेवं तत्पदार्थस्य शुद्धत्वादेः प्रसिद्धिमभिधाय त्वंपदार्थस्याप्याह— **सर्वस्यात्मत्वाच्च ब्रह्मास्तित्वप्रसिद्धिः**। सर्वस्य पांसुलपादकस्य हालिकस्यापि ब्रह्मास्तित्वप्रसिद्धिः; कुतः? आत्मत्वात्। एतदेव स्फुटयति— **सर्वो हीति**। प्रतीतिमेव अप्रतीतिनिराकरणेन द्रढयति— **न नेति**। न न प्रत्येति 'अहमस्मि' इति, किं तु प्रत्येत्येवेति योजना। ननु 'अहमस्मि' इति

कल्पतरुः।

अतो ब्रह्मपदादुक्तवस्तुसिद्धिरिति। **तत्पदार्थस्य शुद्धत्वादेरिति** समानाधिकरणे षष्ठ्यौ। जीवस्य हि शुद्धत्वाद्येव तत्पदेन समर्प्यते न पदार्थान्तरमिति। प्रसिद्धिर्हि ज्ञानं ज्ञातारमाकाङ्क्षति, तेन व्यवहितमपि सर्वस्येत्येतदस्तित्वप्रसिद्धिरित्यनेन संबन्धनीयम्; तथा सति प्रतिज्ञाविशेषणं सत्कैमुतिकन्यायं द्योतयिष्यति; न तु सर्वस्यात्मत्वादिति हेतुविशेषणम्, वैयर्थ्यात्—इत्यभिप्रेत्याह—**सर्वस्येति**। पांसुमन्तौ पादौ यस्य स तथा। हलं वहतीति हालिकः। सर्वस्य ब्रह्मास्तित्वप्रसिद्धिः, सर्वो हि तत्प्रत्येति, इति साध्यहेत्वोरविशेषमाशङ्क्याह— **एतदेवेति। प्रतीतिमेवेति**। 'अहं नास्मि' इति न प्रत्येतीति योजनायाम् अस्तित्वं न सिध्येत्, असत्त्वनिषेधेऽप्यनिर्वाच्यत्वस्यानिवारणात्; अतः 'अहमस्मि' इति न न प्रत्येतीति योजनैव साध्वीति। 'अहम्' इति प्रतीतेरहंकारमात्रविषयत्वान्नात्मप्रसिद्धिः सिध्येदिति शङ्कते— **नन्वहमिति**। ऋजुयोजनायां ह्यव्याप्यादव्यापकप्रसञ्जनं स्यात्; न हि प्रसिद्ध्यभावो नास्तित्वप्रतीत्या व्याप्तः, सुषुप्तौ विश्वाभावप्रतीतिप्रसङ्गात्। तन्मा भूदिति व्यव-

परिमलः।

सामानाधिकरण्ये हेतुमाह— **जीवस्य हीति**। तत्पदार्थस्य धर्मिणो जीवात् पदार्थान्तरत्वे हि धर्म्यपि तत्पदेनापूर्वतया बोधनीयः। न तु स जीवात् पदार्थान्तरमिति तद्गतं शुद्धत्वाद्येव संसारदशायामविद्यातिरोहितत्वेनाप्रसिद्धं तेन ज्ञापनीयम्, अतस्तत्पदार्थस्य शुद्धत्वादेश्चेति न वैयधिकरण्यमित्यर्थः। यद्यपि तत्पदार्थस्य यत् शुद्धत्वादि इत्येवं वैयधिकरण्यं वक्तुं शक्यम्, तथापि त्वंपदार्थ एव तत्पदार्थ इत्यभेदद्दढीकरणाय तदपि परित्यक्तमित्यर्थः। 'सर्वस्य ब्रह्मास्तित्वप्रसिद्धिः' इति साध्यम् 'सर्वो हि तत्प्रत्येति' इति हेतु-

सर्वो लोकः 'नाहमस्मि' इति प्रतीयात् । आत्मा च ब्रह्म । यदि तर्हि

भामती ।

च ज्ञास्यति मा च ज्ञासीदात्मानमित्यत आह— यदीति । अहमस्मीति न प्रतीयात् । अहंकारास्पदं हि जीवात्मानं चेन्न प्रतीयात्, 'अहम्' इति न प्रतीयादित्यर्थः । ननु प्रत्येतु सर्वो जन आत्मानमहंकारास्पदम्, ब्रह्मणि तु किमायातम् इत्यत आह— आत्मा च ब्रह्म । तदः त्वमा सामानाधिकरण्यात् । तस्मात्तत्पदार्थस्य शुद्धबुद्धत्वादेः शब्दतः त्वंपदार्थस्य च जीवात्मनः प्रत्यक्षतः प्रसिद्धेः, पदार्थज्ञानपूर्वकत्वाच्च वाक्यार्थज्ञानस्य, त्वंपदार्थस्य ब्रह्मभावावगमः 'तत्त्वमसि' इति वाक्यादुपपद्यत इति भावः । आक्षेप्ता प्रथमकल्पाश्रयं

कल्पतरुः ।

हितेन संबन्धयति— अहमस्मीति न प्रतीयादिति । शङ्कितुराशयमपाकरोति— अहंकारास्पदमिति । 'अहम्' इति प्रतिभासस्य चिदचित्संवलितविषयत्वमध्यासभाष्ये समर्थितम्; तथा च 'अहम्' इति प्रतीतिरात्मविषयापि; अत आत्मप्रसिद्ध्यभावे 'अहम्' इति प्रतीतिर्न स्यादित्यर्थः । तदस्त्वमेति । तत्त्वमसिवाक्ये तत्पदस्य प्रकृततच्छब्दवाच्यब्रह्मपरामर्शिनस्त्वंपदेन सामानाधिकरण्यादित्यर्थः । ननु ब्रह्मात्मैकत्वस्य वाक्यार्थस्याप्रसिद्धत्वेन प्रतिपाद्यत्वाक्षेपे पदार्थप्रसिद्धिप्रदर्शनमनुपयोगीत्याशङ्क्याह— तस्मादिति । पदार्थयोरवधृतयोस्ताभ्यां गृहीतसंबन्धपदद्वयसमभिव्याहारादपूर्वो वाक्यार्थः सुज्ञान इत्यर्थः ॥

एवं तावदापाततो वाक्यात्पदतश्च प्रसिद्धेर्ब्रह्मणः शास्त्रेण शक्यप्रतिपादनत्वसंबन्धं समर्थ्य असाधारण्यरूपविषयत्वं समर्थयितुमाक्षिपतीत्याह— आक्षेप्तेति । ब्रह्मण आत्मत्वेन लोकप्रसिद्ध्यभावाद्वाक्यीयप्रसिद्धिरनूद्यत इत्याह— तत्त्वमसीति । ननु तृतीयाया इत्थंभावार्थत्वं विहाय आत्मत्वेन हेतुना ब्रह्म यदि लोके प्रसिद्धम् आत्मा च ब्रह्मेति त्वयैवोक्तत्वात् इति व्याख्यायताम्, तदा हि लोकशब्दो रूढार्थः स्यात्। उच्यते— तत्पदार्थमात्रस्य प्रसिद्धिस्तदा अनूदिता स्यात्; तस्याश्चाजिज्ञास्यत्वं प्रति न हेतुत्वम्; ज्ञातेऽपि पदार्थे वाक्यार्थस्य जिज्ञासोपपत्तेरिति । स्यादेतत् यदि ब्रह्मात्मत्वेन प्रसिद्धम् इति भाष्यमनुपपन्नम्; न हि महावाक्येन ब्रह्मानुवादेनात्मत्वं वि-

परिमलः ।

रिति तयोरविशेषशङ्का । तत्पदार्थमात्रस्य प्रसिद्धिरिति । तत्पदबोध्यस्य धर्मिण

लोके ब्रह्म आत्मत्वेन प्रसिद्धमस्ति, ततो ज्ञातमेवेत्यजिज्ञास्यत्वं पुनरापन्नम्; न, तद्विशेषं प्रति विप्रतिपत्तेः। देहमात्रं चैतन्यविशिष्टमात्मेति प्रा-

भामती।

दोषमाह— **यदि तर्हि लोक इति**। अध्यापकाध्येतृपरम्परा लोकः। तत्र 'तत्त्वमसि' इति वाक्याद्यदि ब्रह्म आत्मत्वेन प्रसिद्धमस्ति। 'आत्मा ब्रह्मत्वेन' इति वक्तव्ये 'ब्रह्म आत्मत्वेन' इति अभेदविवक्षया गमयितव्यम्। परिहरति—**न**; कुतः? **तद्विशेषं प्रति विप्रतिपत्तेः**। तदनेन विप्रतिपत्तिः साधकबाधकप्रमाणाभावे सति संशयबीजमुक्तम्। ततश्च संशयाज्जिज्ञासोपपद्यत इति भावः। विवादाधिकरणं धर्मी सर्वतन्त्रसिद्धान्तसिद्धोऽभ्युपेयः। अन्यथा अनाश्रया भिन्नाश्रया वा विप्रतिपत्तयो न स्युः। विरुद्धा हि प्रतिपत्तयो विप्रतिपत्तयः। न चानाश्रयाः प्रति-

कल्पतरुः।

धीयते, किं तु लोकसिद्धजीवानुवादेनागममात्रसिद्धं ब्रह्मत्वम्; अत आह— **अभेदविवक्षयेति**। अन्यत्र हि वाक्यार्थबोधोत्तरकालं पदार्थानामुद्देश्योपादेयभावो न व्यावर्तते; अत्र त्वखण्डवाक्यार्थसाक्षात्कारे स बाध्यत इति द्योतयितुमात्मपदे प्रयोज्ये ब्रह्मपदं ब्रह्मपदे चात्मपदं प्रयुक्तमित्यर्थः॥

ननु विरुद्धा प्रतिपत्तिर्विप्रतिपत्तिः, सा च वस्त्वभावसाधिकेति कथं विषयलाभः? तत्राह— **तदनेनेति**। न विरुद्धप्रतीतिमात्रेणाभावावगमः; किं तु प्रमाणमूलतया; अतः साधकबाधकप्रमाणाभावे विप्रतिपत्तिः संशयबीजमित्यर्थः। ननु साधारणाकारदृष्टौ संशयः; न त्विह क्षणिकविज्ञानस्थिरभोक्त्रादावस्ति साधारणो धर्म इत्याशङ्क्य, विप्रतिपत्त्यन्यथानुपपत्त्या तं साधयति— **विवादाधिकरणमिति**। देह आत्मा इत्यादिविवादाश्रयो धर्मी पराग्व्यावृत्तोऽहमास्पदं सर्वतन्त्रेष्वभ्युपगत इति मन्तव्यम्। तत्र हेतुमाह— **अन्यथेति**। आश्रयशब्दो विषयवाची। भिन्नविषया विप्रतिपत्तयो न स्युरतो विवदमानानामप्येकमालम्बनमविगीतम्। अत्रोपपत्तिमाह— **विरुद्धा हीति**। विप्रतिपत्तिशब्दावयवप्रतिपत्तिशब्दार्थस्य

परिमलः।

इत्यर्थः; न तु प्राचीनटीकाग्रन्थ इव तद्बोध्यस्य शुद्धत्वादेरित्यर्थः, तस्य प्रसिद्ध्यभावेनानुवादायोगात्। **वस्त्वभावसाधिकेति**। रजताभावप्रतिपत्तिर्हि रजतबाधिका दृष्टा, तथेहापि स्यादित्यर्थः। **साधारणाकारदृष्टाविति**। साधारणधर्मिदृष्टाविति्यर्थः; वि-

कृता जना लौकायतिकाश्च प्रतिपन्नाः। इन्द्रियाण्येव चेतनान्यात्मेत्यपरे। मन इत्यन्ये। विज्ञानमात्रं क्षणिकमित्येके। शून्यमित्यपरे। अस्ति देहादिव्यतिरिक्तः संसारी कर्ता भोक्तेत्यपरे। भोक्तैव केवलं न कर्तेत्येके।

भामती।

पत्तयो भवन्ति, अनालम्बनत्वापत्तेः। न च भिन्नाश्रया विरुद्धाः। न हि 'अनित्या बुद्धिः' 'नित्य आत्मा इति प्रतिपत्तिविप्रतिपत्ती। तस्मात्तत्पदार्थस्य शुद्धत्वादेर्वेदान्तेभ्यः प्रतीतिः, त्वंपदार्थस्य च जीवात्मनो लोकतः सिद्धिः सर्वतन्त्रसिद्धान्तः। तदाभासत्वानाभासत्वतत्तद्विशेषेषु परमत्र विप्रतिपत्तयः। तस्मात्सामान्यतः प्रसिद्धे धर्मिणि विशेषतो विप्रतिपत्तौ युक्तस्तद्विशेषेषु संशयः। तत्र त्वंपदार्थे तावद्विप्रतिपत्तीर्दर्शयति— **देहमात्रमित्यादिना भोक्तैव केवलं**

कल्पतरुः।

ज्ञानस्य सालम्बनत्वात् यत्किंचिदालम्बनं सिद्धम्। वीत्युपसर्गप्रतीतविरोधवशाच्च तदेकमिति सिध्यति। एकार्थोपनिपाते हि धियां विरोधः। अत्र वैधर्म्योदाहरणमाह— **न हीति** ॥

साधारणधर्मिस्फुरणेऽपि न शास्त्रार्थस्य बुद्धिसमारोहः, न हि साधारणः शास्त्रार्थः; तत्राह— **तस्मादिति**। यस्माद्विप्रतिपत्तिरेकालम्बना यतश्चैकस्मिन्नालम्बने पूर्वधीविषयनिषेधेन विरुद्धधीरुदेति, तस्मात्प्रतियोगितया विप्रतिपत्त्येकस्कन्धत्वेन तत्त्वंपदार्थतदेकत्वप्रतीतिर्लोकशास्त्राभ्यां सर्वैरेष्टव्येति। क्व तर्हि विगानम्? अत आह— **तदाभासत्वेति**। लौकायतिकादीनां सा प्रतीतिराभासः। आस्तिकानां तत्पदार्थप्रतीतेस्तत्त्वमर्थैकत्वप्रतीतेश्च गौणतायां तथा त्वंपदार्थधियोऽसङ्गसाक्ष्यालम्बनत्वे च विगानमिति। त्वंपदार्थविप्रतिपत्तिप्रदर्शनस्य वाक्यार्थविप्रति-

परिमलः।

प्रतिपत्तिजन्यसंशये समानधर्मदर्शनस्यानपेक्षितत्वात्, अग्रे विरुद्धप्रतिपत्त्योः साधारणालम्बनस्य धर्मिण एवात्र सद्भावोपपादनदर्शनाच्च। एवं च 'न त्विह इत्याद्यग्रिमवाक्येऽपि 'साधारणो धर्मी' इत्येव पाठो युक्तः। अत एव साधारणधर्मिस्फुरणेऽपि इत्यग्रिमग्रन्थे सकलकोशेषु धर्मिशब्दस्यैव पाठः। **न हि साधारणः शास्त्रार्थ इति।** संदेहविषयकोटिद्वयसाधारणो धर्मी न शास्त्रप्रतिपाद्यः संप्रतिपन्नत्वादित्यर्थः। **तत्पदार्थप्रतीतेरिति**। आस्तिकभेदवादिषु निरीश्वरवादिनां तत्पदार्थप्रतीतेर्गौणतायां सेश्वरवादिनां

अस्ति तद्व्यतिरिक्त ईश्वरः सर्वज्ञः सर्वशक्तिरिति केचित् । आत्मा स

भामती ।

न कर्तेत्यन्तेन । अत्र देहेन्द्रियमनःक्षणिकविज्ञानचैतन्यपक्षे न तत्पदार्थनित्यत्वादयः त्वंपदार्थेन संबध्यन्ते योग्यताविरहात् । शून्यपक्षेऽपि सर्वोपाख्यारहितमपदार्थः कथं तत्त्वमोर्गोचरः? कर्तृभोक्तृस्वभावस्यापि परिणामितया तत्पदार्थनित्यत्वाद्यसंगतिरेव । अकर्तृत्वेऽपि भोक्तृत्वपक्षे परिणामितया नित्यत्वाद्यसंगतिः । अभोक्तृत्वेऽपि नानात्मत्वपक्षे नानात्वेनावच्छिन्नत्वादनित्यत्वादिप्रसक्तावद्वैतहानाच्च तत्पदार्थासंगतिस्तदवस्थैव । त्वंपदार्थविप्रतिपत्त्या च तत्पदार्थेऽपि विप्रतिपत्तिर्दर्शिता । वेदाप्रामाण्यवादिनो हि लौकायतिकादयस्तत्पदार्थप्रत्ययं मिथ्येति मन्यन्ते, वेदप्रामाण्यवादिनोऽप्यौपचारिकं तत्पदार्थमविवक्षितं वा मन्यन्त इति । तदेवं त्वंपदार्थविप्रतिपत्तिद्वारा तत्पदार्थे विप्रतिपत्तिं सूचयित्वा साक्षत्तत्पदार्थेऽपि विप्रतिपत्तिमाह— **अस्ति तद्व्यतिरिक्त ईश्वरः सर्वज्ञः सर्वशक्तिरिति केचित्** । तदिति जीवात्मनः परामृशति । न केवलं शरीरादिभ्यः जीवात्मभ्योऽपि व्यतिरिक्तः । स च सर्वस्यैव जगत ईष्टे ।

कल्पतरुः ।

पत्तौ पर्यवसानमाह— **अत्रेति** । देहादिक्षणिकविज्ञानपर्यन्तानां **चैतन्यं** चेतनत्वमात्मत्वमित्यर्थः । भोक्तैवात्मेति पक्षे भोक्तृत्वं किं विक्रिया उत चिदात्मत्वम्? नाद्यः, कर्तृत्वपक्षादविशेषात् इत्याह— **अकर्तृत्वेऽपीति** । द्वितीयं प्रत्याह— **अभोक्तृत्वेऽपीति** । सक्रियत्वरूपभोक्तृत्वाभावेऽपीत्यर्थः । सांख्या हि जननमरणादिनियमात् निर्विशेषा अपि चेतनाः प्रतिदेहं भिन्ना इति मेनिरे । भिन्नानां च कुम्भवद्विनाशजाड्यापत्तिरतो न नित्यतत्पदार्थैकतेति । अथ वा मैवानुमायि भेदादनित्यता, आत्मभेदाभ्युपगम एव ब्रह्मात्मैकत्वविरोधीत्याह— **अद्वैतेति** । लौकायतिकादिनिरीश्वरमतानुभाषणेनैव तत्पदार्थे ईश्वरेऽपि विप्रतिपत्तिः सूचिता; अतस्तादृशब्रह्मात्मैक्यवाक्यार्थेऽपि विप्रतिपत्तिरर्थाद्युक्तेत्याह— **त्वंपदार्थेति** । **वेदप्रामाण्यवादिनो** मीमांसकादयः । **शरीरादिभ्य इति** शरीरादिशून्यपर्यन्ते-

परिमलः ।

तत्त्वमर्थैकत्वप्रतीतेः गौणतायामिति ' विगानम् ' इत्यग्रेतनेनान्वितम् । सांख्या निरीश्वरा अपि चेतनाः प्रतिदेहं भिन्ना इति मेनिरे इति संबन्धः । तत्र हेतुमाह— **जननेति** ।

भोक्तुरित्यपरे । एवं बहवो विप्रतिपन्ना युक्तिवाक्यतदाभाससमाश्रयाः सन्तः । तत्राविचार्य यत्किंचित्प्रतिपद्यमानो निःश्रेयसात्प्रतिहन्येत, अनर्थं चेयात् । तस्माद्ब्रह्मजिज्ञासोपन्यासमुखेन वेदान्तवाक्यमीमांसा तदविरोधितर्कोपकरणा निःश्रेयसप्रयोजना प्रस्तूयते ॥

भामती ।

ऐश्वर्यसिद्ध्यर्थं स्वाभाविकमस्य रूपद्वयमुक्तम् 'सर्वज्ञः सर्वशक्तिः' इति । तस्यापि जीवात्मभ्योऽपि व्यतिरेकात्, न त्वंपदार्थेन सामानाधिकरण्यमिति स्वमतमाह— **आत्मा स भोक्तुरित्यपरे** । भोक्तुर्जीवात्मनोऽविद्योपाधिकस्य स ईश्वरः तत्पदार्थ आत्मा, तत ईश्वरादभिन्नो जीवात्मा, परमाकाशादिव घटाकाशादय इत्यर्थः । विप्रतिपत्तीरुपसंहरन् विप्रतिपत्तिबीजमाह— **एवं बहव इति** । युक्तियुक्त्याभासवाक्यवाक्याभाससमाश्रयाः सन्त इति योजना । ननु सन्तु विप्रतिपत्तयः तन्निमित्तश्च संशयः, तथापि किमर्थं ब्रह्ममीमांसा आरभ्यते इत्यत आह— **तत्राविचार्येति** । तत्त्वज्ञानाच्च निःश्रेयसाधिगमो नातत्त्वज्ञानाद्भावितुमर्हति । अपि च अतत्त्वज्ञानान्नास्तिक्ये सति अनर्थप्राप्तिरपीत्याह— **अनर्थं चेति** । सूत्रतात्पर्यमुपसंहरति— **तस्मादिति** । वेदान्तमीमांसा तावत्तर्क एव, तदविरोधिनश्च येऽन्येऽपि तर्का अध्वरमीमांसायां न्याये च वेदप्रत्यक्षादिप्रामाण्यपरिशोधनादिषूक्ताः ते उपकरणं यस्याः सा तथोक्ता । तस्मात्परमनिःश्रेयससाधनब्रह्मज्ञानप्रयोजना ब्रह्ममीमांसा आरब्धव्येति सिद्धम् ॥

कल्पतरुः ।

भ्य इति । जीवात्मभ्य इति कर्तृभोक्तृभ्यः केवलभोक्तृभ्य इति । स्वाभाविकमस्येति । नैयायिकादिमतेनेत्यर्थः । युक्तिवाक्येति भाष्यस्थतच्छब्दस्य प्रत्येकं युक्तिवाक्याभ्यां संबन्धं करोति— **युक्तीति** । आत्मा स भोक्तुरिति पक्षे मूलं युक्तिवाक्ये अन्यत्र तदाभासाविति । अनर्थं चेयादिति भाष्यार्थमाह— **अपि चेति** । भाष्ये तर्कस्य पृथगुक्तेः, वेदान्तमीमांसा किं न तर्कः ? नेत्याह— **वेदान्तमीमांसेति** । अर्थापत्तिरनुमानं चात्र तर्कोऽभिमतः ; तद्रूपा वेदान्तमीमांसा ; तस्या अविरोधिनः श्रुतिलिङ्गादयस्तार्तीयाः पाञ्चमिकाश्च श्रुत्यर्थादयो वेदप्रामाण्यपरिशोधकाः कर्ममीमांसायां विचारिताः । वेदस्य प्रत्यक्षादीनां तदर्थानां च लक्षणादीनि न्याय-

ब्रह्म जिज्ञासितव्यमित्युक्तम् । किंलक्षणं पुनस्तद्ब्रह्म इत्यत आह भगवान्सूत्रकारः—

जन्माद्यस्य यतः ॥ २ ॥

भामती ।

तदेवं प्रथमसूत्रेण मीमांसारम्भमुपपाद्य ब्रह्ममीमांसामारभते— **जन्माद्यस्य यतः** । एतस्य सूत्रस्य पातनिकामाह भाष्यकारः— **ब्रह्म जिज्ञासितव्यमित्युक्तम् ; किंलक्षणं पुनस्तद्ब्रह्म** । अत्र यद्यपि ब्रह्मस्वरूपज्ञानस्य प्रधानस्य प्रतिज्ञया तदङ्गान्यपि प्रमाणादीनि प्रतिज्ञातानि, तथापि स्वरूपस्य प्राधान्यात्तदेवाक्षिप्य

कल्पतरुः ।

शास्त्रे विचारितानि । स्मृत्यादिभिश्च वेदानुमानेऽनुमानचिन्तोपयोगः । तेन वेदविहितजातिव्यक्तिपदार्थविवेके वेदस्वरूपग्रहणे च न्यायशास्त्रस्योपयोगः । सर्वे चैते प्रमाणानुग्राहकत्वेन तर्का उच्यन्त इति ॥

अनन्तराधिकरणेन प्रारिप्सितसमस्तविचारस्य संबन्धमाह— **तदेवमिति** । सकलशास्त्रं प्रतीकेन संगृहीतम् । विषयादिसङ्गावात् समर्थिते विचारारम्भे तमुपजीव्योत्तरविचारप्रवृत्तेर्हेतुहेतुमल्लक्षणः संबन्ध इत्यर्थः । प्रथमसूत्रेण द्वितीयसूत्रस्याक्षेपलक्षणां संगतिमाह— **एतस्येति** । मुमुक्षुणा ब्रह्मज्ञानाय वेदान्तवाक्यविचारः कर्तव्य इति प्रतिज्ञायां ब्रह्मस्वरूपविचारवत्प्रमाणयुक्तिसाधनफलविचाराणामर्थात् प्रतिज्ञाने कथं प्रथमं ब्रह्मैव विचार्यते ? अत आह— **अत्रेति** । अत्र 'यतो

परिमलः ।

स्मृत्यादिभिश्चेति । 'स्मरन्ति च' 'अपि च सप्त' 'बहिस्तूभयथापि स्मृतेराचाराच्च' 'आचारदर्शनात्' इत्यादिसूत्रैर्नरकयातनासद्भावारूढपतितबहिष्करणादौ प्रमाणत्वेनोपनिबद्धानां स्मृत्याचाराणां प्रामाण्यं वेदमूलत्वेनेति तैर्वेदानुमाने अनुमानस्वरूपनिर्णयस्योपयोग इत्यर्थः । **तेन वेदविहितेति** । यस्मान्न्यायशास्त्रे लक्षणमुखेन प्रमाणप्रमेयादिविवेचनं कृतं तेन हेतुना 'समाननामरूपत्वात्' इत्यादिसूत्रनिबद्धे वैदिकानां यागदेवतासमर्पकेन्द्रादिशब्दानां जातिरर्थ इति विवेके जानश्रुतौ शूद्रशब्दस्य न शूद्रत्वजातिरर्थः किं तु यौगिकत्वेन व्यक्तिरिति विवेके च जातिव्यक्तिपदार्थविवेचनद्वारा आनुमानिकवेदस्वरूपग्रहणे अनुमाननिर्णयद्वारा च न्यायशास्त्रस्योपयोग इत्यर्थः ॥

भामती।

प्रथमं समर्थ्यते। तत्र यद्यावदनुभूयते तत्सर्वं परिमितमविशुद्धमबुद्धं विध्वंसि च, न तेनोपलब्धेन तद्विरुद्धस्य नित्यशुद्धबुद्धस्वभावस्य ब्रह्मणः स्वरूपं शक्यं लक्ष-

कल्पतरुः।

वा' इत्यादिवाक्यं ब्रह्म लक्षयति उत नेति लक्षणस्य लोकप्रसिद्धयप्रसिद्धिभ्यां विशये, पूर्वपक्षमाह— **तत्र यद्यावदिति**। पूर्वाधिकरणाक्षेपपरिहारत्वादस्य तत्र-त्यब्रह्मलक्षणानिरूपकत्वाच्च तदीयमेव मुमुक्षवभिलषितमोक्षलाभः प्रयोजनमिति न पृथग्वक्तव्यम्। यदाहाचार्यः शबरस्वामी— 'आक्षेपे चापवादे च प्राप्त्यां लक्ष-

परिमलः।

यतो वा इति। ननु 'यतो वा—' इत्यादिवाक्यस्य ब्रह्मलक्षकत्वालक्षकत्वसंशयो न तदुक्तलक्षणस्य जगज्जन्मादेः प्रसिद्धयप्रसिद्धिभ्याम्, किं तु विरोधाविरोधाभ्याम्; 'आन-न्दाद्धयेव—' इति वाक्यस्यैव स संशयस्तदुक्तस्वरूपलक्षणस्य प्रसिद्धयप्रसिद्धिभ्याम्; अतः कथमेवमुक्तमिति चेत्; उच्यते— स्वरूपलक्षणमपि 'यतो वा—' इत्यादिवाक्यमूलम्। तदुक्तं जगत्कारणमनूद्य हि तस्यानन्दत्वविधायकमानन्दवाक्यम्; अत इत्थमुक्तौ नानुप-पत्तिः। ननु— 'जन्माद्यस्य यतः' इति सूत्रोपात्तस्य पूर्वपक्षसिद्धान्ताभ्यां प्रथमं समर्थ्य-मानस्य तटस्थलक्षणस्य विरोधाविरोधाभ्याम् 'यतो वा—' इत्यादिवाक्यस्य ब्रह्मलक्षकत्वाल-क्षकत्वसंशय एवाधिकरणाङ्गत्वेन दर्शयितुं युक्तः न त्वतथाभूतस्य स्वरूपलक्षणस्य प्रसि-द्धयप्रसिद्धिभ्याम् 'यतो वा—' इत्यादिवाक्यस्यानन्दवाक्यद्वारा ब्रह्मलक्षकत्वालक्षकत्वसंशय इति चेत्, उच्यते— सकलेतरव्यावृत्तलक्ष्यबोधनसमर्थमिह लक्षणं निर्धारणीयम्; जग-ज्जन्मादिकं तु न तथा; किं तु 'शाखाग्रे चन्द्रः' इति तटस्थलक्षणं यथा दिगन्तरस्थि-ततारकादिभ्य एव व्यावर्तकं न तु शाखोर्ध्वदेशगतचन्द्रसमीपवर्तितारकादिभ्यः, एवं जगज्जन्मादिकमसंभावितकारणभावेभ्य एव व्यावर्तकं न तु संभावितकारणभावेभ्यः प्रधानपुरुषादिभ्यः। अतः प्रकृष्टप्रकाशवत् सकलेतरव्यावृत्तलक्ष्यबोधनसमर्थं स्वरूपल-क्षणमेवेह तटस्थलक्षणद्वारा सूत्रकृता निर्दिधारयिषितं न तु तटस्थलक्षणमेव। अत एवाचार्यैः 'तस्य च निर्णयवाक्यम्' इत्यादिभाष्यस्य तात्पर्यं वक्ष्यते 'स्वरूपलक्षणपरत्वं सूत्रस्य दर्शयितुं तस्य चेति भाष्यम्' इति। तस्मात्प्रसिद्धयप्रसिद्धिमूलकसंशयस्याधि-करणाङ्गत्वेन प्रदर्शनं युक्तमेव॥

आक्षेप इति। आक्षेपाधिकरणमाक्षेप्याधिकरणसिद्धान्तफलेनैव फलवत्, यथा **'औत्पत्तिकस्तु शब्दस्यार्थेन संबन्धः' इत्यधिकरणे शब्दार्थसंबन्धस्य नित्यत्वेन वेदस्य**

भामती ।

यितुम् । न हि जातु कश्चित्कृतकत्वेन नित्यं लक्षयति । न च तद्धर्मेण नित्यत्वादिना तल्लक्ष्यते, तस्यानुपलब्धचरत्वात् । प्रसिद्धं हि लक्षणं भवति, नात्यन्ताप्रसिद्धम् । एवं च न शब्दोऽप्यत्र प्रक्रमते, अत्यन्ताप्रसिद्धतया ब्रह्मणोऽपदार्थस्यावाक्यार्थत्वात् । तस्माल्लक्षणाभावात् न ब्रह्म जिज्ञासितव्यमित्याक्षेपाभिप्रायः । तमिममाक्षेपं भगवान् सूत्रकारः परिहरति 'जन्माद्यस्य यतः' इति । मा भूदनुभूयमानं जगत्तद्धर्मतया तादात्म्येन वा ब्रह्मणो लक्षणम्, तदुत्पत्त्या

कल्पतरुः ।

णकर्मणि । प्रयोजनं न वक्तव्यं यच्च कृत्वा प्रवर्तते' इति । यत्र पूर्वाधिकरणसिद्धान्ताक्षेपेण पूर्वः पक्षः तत्राक्षेपिकी । यत्र तु पूर्वाधिकरणसिद्धान्तेन पूर्वपक्षः तत्रापवादिकी संगतिः । प्राप्तिस्तदर्थचिन्ता; कृत्वा प्रवर्तनं कृत्वाचिन्ता, सा चाभ्युपगमवाद इति । सजातीयविजातीयव्यावृत्तिप्रयोजनो धर्मो लक्षणं नाम । तदिह परिदृश्यमानं जगदेव लक्षणं ब्रह्मणः, उत नित्यशुद्धत्वादिस्वरूपम्— इति विकल्प्य नाद्य इत्युक्ते द्वितीयमाशङ्क्याह— **न चेति** । ननु लोकाप्रसिद्धमपि वेदेन ज्ञाप्यतामत आह— **एवं चेति** । न जगत् ब्रह्मलक्षणं किं तु तत्प्रति कारणत्वम्, तच्च जीवाविद्याविषयीकृतस्य धर्म इत्युपलक्षणमुपपादयति— **मा भूदिति** । तादात्म्येनेति ऐक्येन । ततो भेदेन **तद्धर्मतयेति** । **तदुत्पत्त्या त्विति** ।

परिमलः ।

निरपेक्षबोधकत्वरूपप्रामाण्ये समर्थिते शब्दार्थसंबन्धस्य नित्यत्वमयुक्तं शब्दानामेवानित्यत्वादिति तदाक्षेपसमाधानार्थं प्रवृत्तं शब्दाधिकरणम् । अपवादाधिकरणमपवाद्याधिकरणपूर्वपक्षफलेन फलवत्, यथा स्मृत्यधिकरणे स्मृतीनां वेदमूलत्वेन प्रामाण्ये समर्थिते प्रत्यक्षश्रुतिविरुद्धस्मृतिषु वेदमूलत्वापवदनार्थं प्रवृत्तं विरोधाधिकरणम् । तदर्थचिन्ता यदर्था सा तत्फलेन फलवती, यथा दर्शपूर्णमासादिप्रकरणाम्नातान्यङ्गानि प्राकरणिकेष्वेव व्यवतिष्ठन्ते न तु सौर्यादिष्वप्युपदेशविधया पारिप्लवानि भवन्तीति सप्तमाद्यचिन्ता सौर्यादिषु प्रयाजादीनामतिदेशेन प्राप्तिरित्यग्रिमचिन्ताफलेन फलवती । लक्षणनिरूपणं लक्ष्यपरिच्छेदेन फलवत्— इत्येतेषु नियतैकरूपफलविशेषावगतेः फलं न वक्तव्यम् । कृत्वाचिन्तायामन्यत्रैव फलमिति तत्र फलव्यतिरेकनिश्चयात् फलं न वक्तव्यमित्यर्थः । **कारणत्वं त्विति** । यद्यपि जन्यजनकभावसंबन्धेन जगत् ब्रह्म लक्षयतीति जगत एव ब्रह्मलक्षणत्वमनुपदमुक्तम्, तथापि व्यावृत्तिव्यवहारानुमानयोर्हेतूभवतो

भामती।

तु भविष्यति देशान्तरप्राप्तिरिव सवितुर्व्रज्याया इति तात्पर्यार्थः। सूत्रावयवा-

कल्पतरुः।

तदुत्पन्नत्वेन जगत्स्वकारणं लक्षयति ज्ञापयति, कारणत्वं तु ब्रह्मलक्षणमित्यर्थः। **व्रज्याया** गतेः। जन्म आदिर्ययोः स्थितिभङ्गयोस्तौ जन्मादी इत्यन्यपदार्थो यदि विशेषरूपेण विवक्ष्यते तर्हि जन्मादी अस्येति निर्देशे गौरवं स्यात् तन्मा भूदिति

परिमलः।

लक्षणस्य पक्षनिष्ठत्वेन भाव्यमिति ये मन्यन्ते तानुरुध्यैवमुक्तम्। **जन्म आदिर्ययो-रिति**। ननु– भाष्यानभिमतमतद्गुणसंविज्ञानमाश्रित्य विशेषविवक्षायां तस्मिन्नेव पक्षे यत्सूत्रगौरवमुच्यते तदनुपपन्नम्। तथा हि– अत्र विवक्षाविषयो न भवतीति प्रत्याख्येयो विशेषः कः, किं च तद्विषयो भवतीत्युपादेयं सामान्यम्? जन्मादित्रयमध्ये अतद्गुणसंवि-ज्ञानबहुव्रीहिलभ्यं स्थितिभङ्गद्वयं विशेषः तद्गुणसंविज्ञानबहुव्रीहिलभ्यं जन्मादित्रयं सा-मान्यमिति चेत्, कथमाद्यपक्षे गौरवं द्वितीयपक्षे तत्परिहारश्च? जन्मादिपदविग्रहवाक्य-गतयत्पदविवरणार्थं जन्मस्थितिभङ्गानामितीतरेतरयोगद्वन्द्वाश्रयणे हि 'जन्म आदिर्येषाम्' इति विग्रहलाभात् 'जन्मादयोऽस्य यतः' इति सूत्ररचनापत्त्या जन्मस्थितिभङ्गरूपसामा-न्यविवक्षायामेवातिगौरवं स्यात्। समाहारद्वन्द्वाश्रयणे तु स्थितिभङ्गद्वयरूपविशेषविवक्षाया-मपि न गौरवम्, 'जन्म आदिर्यस्य स्थितिभङ्गस्य' इति विग्रहाश्रयणेन 'जन्माद्यस्य यतः' इत्येव सूत्ररचनोपपत्तेः। न हि त्रयविवक्षायामेव समाहारद्वन्द्वाश्रयणं न द्वयविवक्षायामित्यस्ति नियमः। एतेन 'स्त्रीलिङ्गपुंलिङ्गे लिङ्गविशेषौ नपुंसकलिङ्गं तदुभयानुगतं सामान्यं न तु तृतीयं लिङ्गान्तरम्' इति शाब्दिकमर्यादाश्रयणेन विशेषसामान्यशब्दार्थग्रहणशङ्कापि निर-स्ता, स्थितिभङ्गद्वयग्रहणेऽपि लिङ्गसामान्यविवक्षाया जन्मादिषु त्रिष्वपि लिङ्गविशेष-विवक्षायाश्च कर्तुं शक्यत्वेन गौरवलाघवस्थित्यभावात्। न हि लिङ्गविशेषलिङ्गसामान्य-विवक्षे द्वित्रिग्रहणयोर्नियते। उच्यते— लिङ्गविशेषविवक्षायां गौरवं लिङ्गसामान्यविव-क्षायां लाघवमित्येवात्र विवक्षितम्; मूलश्रुत्यनुसारेण जन्मादित्रयकारणत्वं लक्षणमिति तल्लाभार्थं तद्गुणसंविज्ञानबहुव्रीहिरेवात्राभिमतः। तदाश्रयणे च लिङ्गविशेषविवक्षायाम् 'जन्मादयोऽस्य यतः' इति सूत्ररचनापत्त्या गौरवं स्पष्टमेव। तत्र यद्याशङ्क्येत तर्हि अत-द्गुणसंविज्ञानबहुव्रीह्याश्रयणेन लिङ्गविशेषविवक्षा अस्त्विति, तत्रापि 'जन्मादी अस्य यतः' इति सूत्ररचनापत्त्या गौरवमस्तीति विभावयितुम् 'जन्म आदिर्ययोः' इत्यादिग्रन्थप्रवृत्तिरिति न कश्चिद्दोषः। ननु लिङ्गसामान्यविवक्षायामपि 'जन्मादीन्यस्य यतः' इति सूत्ररचना-

जन्म उत्पत्तिः आदिः अस्य— इति तद्गुणसंविज्ञानो बहुव्रीहिः । जन्मस्थितिभङ्गं समासार्थः । जन्मनश्चादित्वं श्रुतिनिर्देशापेक्षं वस्तुवृत्तापेक्षं च । श्रुतिनिर्देशस्तावत्— 'यतो वा इमानि भूतानि जायन्ते–' इति, अस्मिन्वाक्ये जन्मस्थितिप्रलयानां क्रमदर्शनात् । वस्तुवृत्तमपि जन्मना लब्धसत्ताकस्य धर्मिणः स्थितिप्रलयसंभवात् । अस्येति प्रत्यक्षादिसंनिधापितस्य धर्मिण इदमा निर्देशः । षष्ठी जन्मादिधर्मसंबन्धार्था । यत

भामती ।

न्विभजते— **जन्मोत्पत्तिरादिरस्येति** । लाघवाय सूत्रकृता जन्मादीति नपुंसकप्रयोगः कृतः; तदुपपादनाय समाहारमाह— **जन्मस्थितिभङ्गमिति** । **जन्मनश्च** इत्यादिः **कारणनिर्देशः** इत्यन्तः संदर्भो निगदव्याख्यातः । स्यादे-

कल्पतरुः ।

सामान्यविवक्षया नपुंसकप्रयोगः सूत्रे कृतः । तत्र नपुंसकैकवचनप्रयोगार्हं समाहारमाहेत्याह— **लाघवायेति** ॥

श्रुतीरविशदाः काश्चिद्वाष्याणि विषमाणि च । वाचस्पत्युक्तभावानि पदशो विभजामहे ॥ तद्गुणसंविज्ञान इति । तच्छब्देन बहुव्रीह्यर्थोऽन्यपदार्थ उच्यते । तस्य गुणत्वेन संविज्ञानं यस्मिन्समासे स तथोक्तः । सर्वस्य विशेषणत्वे समासासंभवात् समासार्थैकदेशो विशेषणमिति लभ्यते । अनादौ संसारे कथं जन्म आदिः? तत्राह— **जन्मन इति** । श्रुत्या वा कथमयुक्तं निर्दिष्टम्? अत आह— **वस्त्विति** । नानादेः संसारस्यादिर्जन्मोच्यते, किं तर्हि? प्रतिवस्तु । घटस्य हि जन्मैवादिरिति । इदमः संनिहितवचनत्वात्प्रत्यक्षमात्रपरामर्शित्वमाशङ्क्य प्रतीतिमात्रं संनिधिरित्याह— **अस्येतीति** । सर्वस्य जगतो न जन्म आकाशादेरनादित्वात्तत्राह—**षष्ठीति** । वियदधिकरणन्यायात्तस्याप्यस्ति जन्मादिसंबन्ध इत्यर्थः । जगतो जन्मादेर्वा ब्रह्मासंबन्धान्न लक्षणत्वमित्याशङ्क्याह— **यत इति** । व्याख्यातमेतदधस्तात् । एवं

परिमलः ।

पत्त्या गौरवं स्यादित्याशङ्कानिराकरणार्थमुत्तरटीकाग्रन्थमवतारयति— **तत्र नपुंसकैकवचनेति** । इतरेतरयोगद्वन्द्वसमाश्रयणे लिङ्गसामान्यविवक्षाभ्यनुज्ञानाभावात् 'ज-

इति कारणनिर्देशः। अस्य जगतो नामरूपाभ्यां व्याकृतस्य अनेककर्तृ-

---

भामती।

तत्। प्रधानकालग्रहलोकपालक्रियायदृच्छास्वभावाभावेषूपप्लवमानेषु सत्सु सर्वज्ञं सर्वशक्तिस्वभावं ब्रह्म जगज्जन्मादिकारणमिति कुतः संभावनेत्यत आह— **अस्य जगत इति**। अत्र **नामरूपाभ्यां व्याकृतस्य** इति चेतनभावकर्तृकत्व-संभावनया प्रधानाद्यचेतनकर्तृकत्वं निरुपाख्यकर्तृकत्वं च व्यासेधति। यत्खलु नाम्ना रूपेण च व्याक्रियते तच्चेतनकर्तृकं दृष्टम्, यथा घटादि। विवादाध्यासितं च जगन्नाम्ना रूपेण च व्याकृतम्, तस्माच्चेतनकर्तृकं संभाव्यते। चेतनो हि बुद्धावालिख्य नामरूपे घट इति नाम्ना रूपेण च कम्बुग्रीवादिना बाह्यं घटं निष्पादयति।

कल्पतरुः।

सूत्रपदानि व्याख्याय प्रथमसूत्रात् ब्रह्मपदानुषङ्गेण तच्छब्दाध्याहारेण च वाक्यार्थमाह— 'अस्य जगतः' इत्यादिना भाष्येण। तद्गतैर्विशेषणैर्लक्षणेऽतिव्याप्तिः परिह्रियत इत्याह— स्यादेतदित्यादिना। स्वभाव एव नियन्तेति स्वभावपक्षः, यदृच्छापक्षस्तु न किंचिन्नियामकमस्तीति। **व्यासेधति** प्रतिषेधति। उत्पत्तेः

परिमलः।

न्मादीनि—' इति सूत्ररचनापत्त्या गौरवं स्यात्। इह तु 'सर्वो द्वन्द्वो विभाषयैकवद्भवति' इति परिभाषासिद्धः समाहारद्वन्द्वः समाश्रीयते, तत्र 'स नपुंसकम्' इति सूत्रेण लिङ्गसामान्यविवक्षा अभ्यनुज्ञातेति नपुंसकैकवचनेन सूत्रलाघवं लभ्यत इत्यर्थः। **स्वभाव एव नियन्तेति**। 'कालः स्वभावो नियतिर्यदृच्छा भूतानि योनिः पुरुष इति चिन्त्यम्' इति श्वेताश्वतरोपनिषन्मन्त्रेण कालकारणत्वादिवादाः प्रत्याख्याताः। 'कथमसतः सज्जायेत' इति श्रुत्या त्वसत्कारणत्ववादः तैरिह पूर्वपक्षः कृतः। मन्त्रे पुरुषशब्दस्य विवरणं टीकायां ग्रहलोकपालशब्देन कृतम्। इदं हिरण्यगर्भादीनामप्युपलक्षणम्। क्रियाशब्देन नियतिशब्दस्य, प्रधानशब्देन योनिशब्दस्येति विवेकः। अतिव्याप्तिशब्देन कालादीनामेव कारणत्वोपपत्तौ ब्रह्म कारणं नाभ्युपगन्तव्यमित्यसंभवो विवक्षितः। तत्र पुरुषपूर्वपक्षः श्रुत्यन्तरावलम्बनः। प्रश्नोपनिषदि हि षोडशकलं पुरुषं प्रस्तुत्य 'तं त्वा पृच्छामि कासौ पुरुषः' इति भारद्वाजप्रश्ने 'तस्मै स होवाच इहैवान्तः शरीरे सोम्य स पुरुषो यस्मिन्नेताः षोडश कलाः प्रभवन्ति स ईक्षांचक्रे कस्मिन्नहमुत्क्रान्त उत्क्रान्तो भविष्यामि कस्मिन्वा प्रतिष्ठिते प्रतिष्ठास्यामीति स प्राणमसृजत प्राणाच्छ्रद्धां खं वायुर्ज्योति-

भामती ।

अत एव घटस्य निर्वर्त्यस्याप्यन्तःसंकल्पात्मना सिद्धस्य कर्मकारकभावः 'घटं करोति' इति । यथाहुः—'बुद्धिसिद्धं तु न तदसत्' इति । तथा चाचेतनो बुद्धावनालिखितं करोतीति न शक्यं संभावयितुमिति भावः । स्यादेतत् । चेतना ब्रह्मा लोकपाला वा नामरूपे बुद्धावालिख्य जगज्जनयिष्यन्ति, कृतम् उक्तस्वभावेन ब्रह्मणेत्यत आह— अनेककर्तृभोक्तृसंयुक्तस्येति । केचित्कर्तारो भवन्ति, यथा सूदर्त्विगादयः, न भोक्तारः । केचित्तु भोक्तारः, यथा श्राद्धवैश्वानरेष्ट्यादिषु पितापुत्रादयः, न कर्तारः । तस्मादुभयग्रहणम् । देशकालनिमित्तक्रियाफलानि इतीतरेतरद्वन्द्वः । देशादीनि च तानि प्रतिनियतानि चेति विग्रहः । तदाश्रयो जगत्तस्य । केचित्खलु प्रतिनियतदेशोत्पादाः, यथा कृष्णमृगादयः । केचित्प्रति-

कल्पतरुः ।

प्रागसतः कथं बुद्धावालेखनम्? अत आह— अत एवेति । यदसदिति प्रसिद्धं तत् बुद्ध्यारूढरूपेण सदेव अन्यथा तुरङ्गशृङ्गवत् कर्मत्वनिर्देशायोगादिति सत्कार्यवादिन आहुः । वैश्वानरेष्ट्यादिष्विति । चतुर्थे स्थितम् 'फलसंयोगस्त्वचोदिते न स्यादशेषभूतत्वात्' । 'वैश्वानरं द्वादशकपालं निर्वपेत्पुत्रे जाते' इत्युपक्रम्य 'यस्मिन् जात एतामिष्टिं निर्वपति पूत एव स तेजस्व्यन्नाद इन्द्रियावी पशुमान् भवति' इति श्रूयते । तत्र किं पूतत्वादि पितुः फलम् उत पुत्रस्येति संदेहे, फलस्य कर्तृगामित्वनियमादितरथा प्रेरणानुपपत्तेः पितुरिति प्राप्ते, राद्धान्तः— यस्मिन्

परिमलः ।

रापः पृथिवीन्द्रियं मनोऽन्नमन्नाद्वीर्यं तपो मन्त्राः कर्म लोका लोकेषु नाम च' इति जीवस्यैव प्राणादिनामान्तषोडशकलास्रष्टृत्वं श्रूयते । अयं च जीवपूर्वपक्ष इहैवाधिकरणे निराकार्यो न प्रधानादिपूर्वपक्षवदधिकरणान्तरे निराकृतः । 'कस्मिन्नन्वहमुत्क्रान्ते—' इत्यादिप्रश्नोपनिषद्वाक्यमपि परब्रह्मविषयमेव, 'तान्होवाचैतावदेवाहमेतत्परं ब्रह्म वेद नातः परमस्ति' इति तदुपसंहारे पिप्पलादवचनात् सकलोपनिषत्प्रसिद्धस्य जीवाधिकस्य परब्रह्मणश्चापलपितुमशक्यत्वात्, प्राणोत्क्रान्तिप्रतिष्ठाभ्यां परब्रह्मणः स्वोत्क्रान्तिप्रतिष्ठावत्त्ववीक्षणं तु स्वस्य तथाभूतजीवाभेदाभिप्रायेणेति तन्निराकरणं द्रष्टव्यम् । यदसदिति प्रसिद्धमिति । यद्यपि स्रष्टव्यसजातीयगतानुभूताकारानुसंधानेनापि सृष्टिः संभवति, तथापि यत्रानुभूतादप्यतिशयितेन वैलक्षण्येन स्रष्टव्यमिति स्रष्टव्याकारानुसंधानं तत्र तस्याकारस्य तदानीमसत्त्वप्रसिद्धिरस्तीति तात्पर्यम् । इतरथा प्रेरणानुपपत्तेरिति ।

भोक्तृसंयुक्तस्य प्रतिनियतदेशकालनिमित्तक्रियाफलाश्रयस्य मनसाप्यचिन्त्यरचनारूपस्य जन्मस्थितिभङ्गं यतः सर्वज्ञात्सर्वशक्तेः कारणाद्ब्र-

---

भामती ।

नियतकालोत्पादाः, यथा कोकिलारवादयः । केचित्प्रतिनियतानिमित्ताः, यथा नवाम्बुदध्वानादिनिमित्ता बलाकागर्भादयः । केचित्प्रतिनियतक्रियाः, यथा ब्राह्मणानां याजनादयो नेतरेषाम् । एवं केचित्प्रतिनियतफलाः, यथा केचित्सुखिनः केचिद्दुःखिनः, एवं य एव सुखिनस्त एव कदाचिद्दुःखिनः । सर्वमेतदाकस्मिकापरनाम्नि यादृच्छिकत्वे च स्वाभाविकत्वे चासर्वज्ञासर्वशक्तिकर्तृकत्वे च न घटते, परिमितज्ञानशक्तिभिर्महलोकपालादिभिर्ज्ञातुं कर्तुं चाशक्यत्वात् । तदिदमुक्तम्– **मनसाप्यचिन्त्यरचनारूपस्येति** । एकस्या अपि हि शरीररचनाया रूपं मनसा न शक्यं चिन्तयितुं कदाचित्, प्रागेव जगद्रचनायाः, किमङ्ग पुनः कर्तुमित्यर्थः । **सूत्र-**

कल्पतरुः ।

जाते निर्वपति स पूत इति जातगामित्वेन फलाम्नानात् फलभोक्तृत्वेनाचोदिते पितरि फलसंयोगो न स्याद्वचनस्य तं प्रत्यशेषभूतत्वात् । यत्त्वफलभागिनो न प्रेरणेति तन्न, पूतत्वादिगुणवत्पुत्रवत्तयैव पितुः प्रीत्युत्पत्तेः प्रेरणावकल्पनात् । अतः पुत्रगामि फलमिति । अत्र अनेककर्तृभोक्तृ इति जीवानां सृज्यत्वेन निर्देशात् जगत्कर्तृत्वायोग्यतोक्ता; मनसापि इति जगतस्तान्प्रति कार्यत्वायोग्यता इति विशेषणद्वयेन जीवकर्तृकत्वनिषेधः । व्याकृतस्य इत्यनेनानभिव्यक्तबीजावस्थस्य जगतोऽभिव्यक्त्यभिधानादणवः प्रागसत् द्व्यणुकादि आरभन्त इति मतव्युदासः । शेषं विशदं टीकायाम् । तदेवं लिलक्षयिषितजगद्योनिब्रह्मसजातीयतया परभ्रमपरिकल्पितप्रधानादेरुक्तविधजगत्प्रकृतित्वं ब्रह्म व्यवच्छिनत्ति । विजातीयात्पुनः कार्यात्कारणत्वादेव ।

परिमलः ।

तथा च प्रबलन्यायविरुद्धतया यथाश्रुतार्थप्रतिपादनाक्षमेण 'यस्मिन् जाते' इत्याद्यर्थवादेन कथंचिल्लक्षणोन्नीतेन पितृगाम्येव फलं प्रतिपाद्यत इति कल्पनीयमिति भावः । **पितुः प्रीत्युत्पत्तेरिति** । पुत्रगतमपि पूतत्वादिकं पशुहिरण्याद्यभिवृद्धिवत् पितुः प्रीत्युत्पादनद्वारा गौणपुरुषार्थो भवतीत्यर्थः । 'कारणत्वमेव' इति पाठे 'ब्रह्म व्यवच्छिनत्ति' इत्यनुषङ्गः । 'कारणत्वादेव' इति पाठे 'ब्रह्म व्यवच्छिन्नम्' इत्यध्याहारः ॥

वति, तद्ब्रह्मेति वाक्यशेषः। अन्येषामपि भावविकाराणां त्रिष्वेवान्त-

भामती।

वाक्यं पूरयति— **तद्ब्रह्मेति वाक्यशेषः**। स्यादेतत्। कस्मात्पुनर्जन्मस्थिति-भङ्गमात्रमिहादिग्रहणेन गृह्यते न तु वृद्धिपरिणामापक्षया अपीत्यत आह— **अन्येषामपि भावविकाराणां** वृद्ध्यादीनां **त्रिष्वेवान्तर्भाव इति**। वृद्धिस्तावदवयवोपचयः। तेनाल्पावयवादवयविनो द्वितन्तुकादेरन्य एव महान्पटो जायत इति जन्मैव वृद्धिः। परिणामोऽपि त्रिविधः धर्मलक्षणावस्थालक्षणः उत्पत्तिरेव। धर्मिणो हि हाटकादेर्धर्मलक्षणः परिणामः कटकमुकुटादिः तस्योत्पत्तिः। एवं कटकादेरपि प्रत्युत्पन्नत्वादिलक्षणः लक्षणपरिणाम उत्पत्तिः। एवमवस्थापरिणामो नवपुराणत्वादिरुत्पत्तिः। अपक्षयस्तु अवयवह्रासो नाश एव। तस्माज्जन्मादिषु यथास्वमन्तर्भावाद्वृद्ध्यादयः पृथङ्नोक्ता इत्यर्थः। अथैते वृद्ध्यादयो न जन्मादिष्वन्तर्भवन्ति, तथाप्युत्पत्तिस्थितिभङ्गमेवोपादातव्यम्।

कल्पतरुः।

तथा च सजातीयविजातीयव्यवच्छेदकत्वेन जगत्प्रकृतित्वस्य सिद्धं लक्षणत्वम्। **धमलक्षणेति**। धर्म इति लक्षणमिति अवस्थेति त्रीणि लक्षणानि यस्य परिणामस्य स तथोक्तः। स चोत्पत्तावन्तर्भवतीति। धर्मपरिणामं विवृणोति— **धर्मिणो हीति**। कनकादेर्धर्मिणो धर्मरूपपरिणामो नाम मुकुटकटकादिरिति सांख्यप्रक्रिया। तत्र निरूप्यमाणे परिणामशब्दालम्बनं तस्य कटकादेर्हेमादित उत्पत्तिरित्यर्थः। लक्षणपरिणाममुदाहरति— **एवमिति**। प्रत्युत्पन्नत्वं वर्तमानत्वम्। कटकादिकार्यस्य वर्तमानत्वातीतत्वभविष्यत्त्वरूपो यो लक्षणपरिणामः सोऽप्युत्पत्तिरित्यर्थः। अवस्थापरिणाममुदाहरति— **एवमवस्थेति**। अतीतादेरेवातीतत्वातीततरत्वातीततमत्वादिरूपो नवपुराणत्वाद्यापत्तिरवस्थापरिणामो नाम; स चोत्पत्तिरेवेत्यर्थः। अपक्षयस्य विनाशान्तर्भावमाह— **अपक्षयस्त्विति**॥

परिमलः।

सांख्यप्रक्रियेति। धर्मलक्षणावस्थापरिणामभेदान् पातञ्जला व्यवहरन्ति; पातञ्जले हि योगशास्त्रे 'परिणामत्रयसंयमादतीतानागतज्ञानम्' इति परिणामत्रयविषयं धारणाध्यानसमाधिरूपं संयमं फलाय विधातुं चित्तस्य परिणामत्रयलक्षणानन्तरं सूत्रितम्— 'एतेन भूतेन्द्रियेषु धर्मलक्षणावस्थापरिणामा व्याख्याताः' इति। त इह सेश्वरसांख्यानतिभिन्नत्वात् **सांख्यशब्देनोक्ताः**। **सोऽप्युत्पत्तिरिति**। वर्तमानत्वादिरपि तत्तत्कालोपा-

र्भाव इति जन्मस्थितिनाशानामिह ग्रहणम्। यास्कपरिपठितानां तु 'जायतेऽस्ति' इत्यादीनां ग्रहणे तेषां जगतः स्थितिकाले संभाव्य-

भामती।

तथा सति हि तत्प्रतिपादके 'यतो वा इमानि भूतानि' इति वेदवाक्ये बुद्धिस्थीकृते जगन्मूलकारणं ब्रह्म लक्षितं भवति। अन्यथा तु जायते अस्ति वर्धते इत्यादीनां ग्रहणे तत्प्रतिपादकं नैरुक्तवाक्यं बुद्धौ भवेत्, तच्च न मूलकारणप्रतिपादनपरम्, महासर्गादूर्ध्वं स्थितिकालेऽपि तद्वाक्योदितानां जन्मादीनां भावविकाराणामुपपत्तेः, इति शङ्कानिराकरणार्थं वेदोक्तोत्पत्तिस्थितिभङ्गग्रहणमित्याह— **यास्कपरिपठितानां त्विति**। नन्वेवमपि उत्पत्तिमात्रं सूच्यताम्,

कल्पतरुः।

तच्च न मूलकारणेति। पुरुषाणां श्रुतिमन्तरेणातीन्द्रियार्थदर्शनसामर्थ्याभावादित्यर्थः। न च वृद्ध्यादिविकारकथनादेव मूलकारणद्रष्टृत्वमनुमेयम्, अन्यथाप्युपपत्तेरित्याह— **महासर्गादिति**। परमकारणादुत्पत्त्यादयो न गृहीता इति शङ्कापनुत्तये योत्पत्तिर्ब्रह्मणः 'यतो वा' इति वाक्ये 'जायन्ते' इत्यभिहिता, या च तत्रैव स्थितिः 'जीवन्ति' इत्युक्ता, यश्च तत्रैव प्रलयः 'अभिसंविशन्ति' इत्युक्तः ते उत्पत्त्यादयः सूत्रे गृह्यन्त इति भाष्यार्थः। तत्रोत्पत्तिमात्रादेव लक्षणस्यालक्ष्यव्यावृत्तिसिद्धौ स्थितिलयोपादानमाशङ्कानिवृत्त्यर्थमित्याह— **उत्पत्तिमात्रमिति**। उत्पादकत्वं निमित्तेऽपि दृष्टमित्युपादानत्वसिद्ध्यर्थं स्थितिलयाश्रयत्वमुक्तमित्यर्थः। नन्वेवमपि लयाधारत्वादेवोपादानत्वं लभ्यते, न हि दण्डादिषु कुम्भादयो लीयन्ते, अत इतरवैयर्थ्यम्। मैवम्। उपादानत्वमेव न कुलधर्मतयोक्तं किं तु प्रकृतिविकाराभेदन्यायेनाद्वैतसिद्धये। एवं च भवतु ब्रह्म जगत उपादानमधिष्ठाता तु उत्पत्तिस्थित्योरन्यः स्यात् कुम्भकार इव कुम्भस्योत्पत्तौ राजेव च राज्यस्थेन्नीति मा

परिमलः।

धिविशेषोत्पत्तिरित्यर्थः। **पुरुषाणामिति**। पुरुषवाक्यं हि मूलप्रमाणसापेक्षम्; तदिह न तावच्छ्रुतिः, श्रुतेर्जन्मादित्रितयविषयत्वात्; नापि तदीयं प्रत्यक्षं मूलकारणाधीनमहाभूतजन्मादिषु प्रत्यक्षाप्रवृत्तेरित्यर्थः। अतीन्द्रियार्थद्रष्टृत्वमपि पुरुषगौरवादनुमेयमित्याशङ्क्याह— **न चेति**। **अन्यथाप्युपपत्तेरिति**। यास्कादयः स्वकाले हेमादीनां विकारषट्कं दृष्ट्वा पठितवन्त इत्यप्युपपत्तेर्नातीन्द्रियार्थे प्रत्यक्षं कल्पनीयमित्यर्थः। एतेन यास्क-

मानत्वान्मूलकारणादुत्पत्तिस्थितिनाशा जगतो न गृहीताः स्युरित्याशङ्क्येत; तन्मा शङ्किइति या उत्पत्तिर्ब्रह्मणः कारणात्, तत्रैव स्थितिः प्रलयश्च, त एव गृह्यन्ते। न यथोक्तविशेषणस्य जगतो यथोक्तविशेषणमीश्वरं मुक्त्वा, अन्यतः प्रधानादचेतनात् अणुभ्यो वा

भामती।

तन्नान्तरीयिकतया तु स्थितिभङ्गं गम्यत इत्यत आह— **योत्पत्तिर्ब्रह्मणः कारणादिति**। त्रिभिरस्योपादानत्वं सूच्यते। उत्पत्तिमात्रं तु निमित्तकारणसाधारणमिति नोपादानत्वं सूचयेत्। तदिदमुक्तम्— **तत्रैवेति**। पूर्वोक्तानां कार्यकारणविशेषणानां प्रयोजनमाह— **न यथोक्तेति**। तदनेन प्रबन्धेन प्रतिज्ञाविषयस्य ब्रह्मस्वरूपस्य लक्षणद्वारेण संभावनोक्ता। तत्र प्रमाणं वक्तव्यम्। यथाहुर्नैयायिकाः— 'संभावितः प्रतिज्ञायां पक्षः साध्येत हेतुना। न तस्य

कल्पतरुः।

शङ्क्यीत्युत्पत्तिस्थितिग्रहणमिति। लक्षणाख्यकेवलव्यतिरेक्यनुमानादेव प्रतिज्ञातब्रह्मप्रमितौ शास्त्रयोनित्वसमन्वयाधिकरणयोर्वैयर्थ्यमित्याशङ्क्याह— **तदनेनेति**। ब्रह्मज्ञानाय वेदान्तविचार आरभ्यत इति प्रतिज्ञायां विशेषणत्वेन ब्रह्म विषय इति प्रतिज्ञाविषयस्येत्युक्तम्। लक्षणं हि सिद्धस्य वस्तुनो भेदमवगमयति ईदृशं तदिति तत्स्वरूपं वा, न सत्ताम्। कार्येण च कारणं किंचिदस्तीत्यनुमितम्। तत्तु एकमनेकं वेति संदिग्धम्; तस्य यदैकत्वं सेत्स्यति तदा भवति तत्सर्वज्ञं सर्वशक्ति च नेतरथा। अयमेव संशयः कल्पनालाघवसंज्ञकतर्केणोत्कटैककोटिकतां

परिमलः।

वचनस्य स्मृतित्वान्मूलश्रुत्यनुमानमपि निरस्तम्, दृष्टमूलाभावे एव तदनुमानादिति भावः। **वेदान्तेति**। वेदान्तविचारः कर्तव्य इत्यार्थिकप्रतिज्ञायामित्यर्थः। **ननु चोदनासूत्रवत्** जन्मादिसूत्रं लक्षणप्रमाणोभयपरमस्तु जन्यजनकभावेन लक्षणीभवतो जगतः सकर्तृकत्वानुमाने हेतुभावस्याप्युपपत्तेः। अत उत्तराधिकरणवैयर्थ्यमेवेत्याशङ्क्य **कार्येण** कारणमनुमीयतां नाम तदेकत्वादिसिद्धौ तु श्रुतिरेव शरणीकरणीयेत्युत्तराधिकरणसार्थक्यमित्याह— **कार्येण चेति**। ननु कार्यत्वलिङ्गेन जगतः कारणानुमानानन्तरं प्रवृत्तस्तदेकत्वानेकत्वसंशयो लाघवतर्कवशादुत्कटैककोटिकसंशयरूपा संभावना संपद्यत इत्ये-

अभावाद्वा संसारिणो वा उत्पत्त्यादि संभावयितुं शक्यम्। न च

परिमलः।

तदयुक्तम्। न हि तर्कः किंचित्कोटिसहचरितानेकधर्मोपलम्भवत्किंचित्कोटिभूयोदृष्टसहचारैकधर्मोपलम्भवच्च कोट्युत्कटत्वनियामकत्वेन क्लृप्तः, किं तु प्रमाणानुग्राहकत्वेन। तथा च कार्यत्वलिङ्गकादनुमानात् भवन्ती सकर्तृकत्वानुमितिरेव लाघवतर्कोपनीतं कर्त्रैकत्वमपि विषयीकुर्वाणा सती एककर्तृकत्वानुमितिः संपद्यत इत्येव युक्तम्। गोपुरप्राकारादिषु बहुकर्तृकत्वेन निश्चितेषु लाघवावतारासंभवेऽपि तथात्वेनानिश्चितेषु वियदादिषु तदवतारे बाधकाभावादिति चेत्, मैवम्, लाघवतर्केणानुमितेर्विषयगौरवापादनस्य विरुद्धत्वात्। एककर्तृकत्वं हि अनेककर्तृकत्वाभावविशिष्टसकर्तृकत्वं न त्वेकत्वसंख्याविशिष्टकर्तृकत्वमात्रमपि, बहुष्वपि प्रत्येकमेकत्ववैशिष्ट्यसत्त्वेन तद्विषयत्वस्य बहुकर्तृकत्वाविरोधित्वात्। एवमतिगुरुविषयापादकः कथं लाघवतर्कव्यपदेशं लभेत? न ह्येवंभूतं लाघवं प्रमाणानुग्राहकं संप्रतिपन्नमस्ति यदग्रे वस्तुलाघवसिद्ध्यर्थं स्वानुग्राह्यप्रमाणस्य विषयगौरवमापादयेत्; तथा सति हीष्टपुरोवर्तिज्ञानं प्रवृत्तिकारणं गृह्णतः प्रमाणस्यानुग्राहको लाघवतर्को विसंवादिप्रवृत्तिस्थले व्यधिकरणप्रकारकज्ञानाकल्पनया वस्तुलाघवसिद्ध्यर्थं भेदाग्रहं कारणतावच्छेदकत्वेनोपनयेत् न तु ज्ञानवित्तिवेद्यतयोपस्थितामिष्टपुरोवर्तिवैशिष्ट्यम्। तस्मात्सकर्तृकत्वानुमानानुग्राहकभावात् प्रच्युतोऽयं लाघवतर्कः स्वयमप्रमाणत्वात् स्वातन्त्र्येण कर्त्रैकत्वनिश्चयमुत्पादयितुमक्षमः कर्त्रैकत्वानेकत्वसंशयस्यैकत्वकोटावुत्कटत्वमात्रं संपादयन्नुपकरोतीति कल्पनं युक्तम्; न तु प्राकारगोपुरादिषु दृष्टमवलम्ब्य प्रवृत्तां तदनेकत्वकोटिं सर्वथा निवर्तयतीति, एककोटिनिर्धारणाक्षमस्य सर्वथा कोट्यन्तरनिवर्तकत्वायोगात्। तस्य संभावनाजननमात्रेणाप्यनुपकारकत्वे लाघवात् कर्त्रैकत्वसर्वज्ञत्वादिसिद्धिमभिमन्यमानानां नैयायिकानां भ्रान्तेर्निरालम्बनत्वापत्तेश्च। वस्तुतस्तु लाघवतर्कोऽपि स्वतो दुर्बलः, अतिविचित्ररचनस्यापि प्रपञ्चस्य बहुविधापरिमितगोपुरप्रासादमण्डपमहातडागादियुक्तस्य महतो नगरस्येव क्रमसंभूतासर्वज्ञासर्वशक्तिकसंप्रतिपन्नानेकसंसारिकर्तृकत्वेनापि सिद्ध्युपपत्तौ सर्वज्ञसर्वशक्तिकैककर्त्रन्तरकल्पन एव गौरवात्। किं तु तथाभूतैककर्तृप्रतिपादकवेदान्तवाक्यनिकुरुम्बसमाश्रयणेनैव लब्धबलः तस्याप्यनुग्राहको भवति। सोऽयं वनसिंहहृदनक्रादिन्यायः। किरातैर्हन्तुं शक्योऽपि सिंहो महद्वनं शरणं प्रविश्य दुराधर्षस्तेभ्यो न बिभेति, वनं च तत् सिंहाधिष्ठानानुगृहीतं तैर्दुष्प्रवेशं भवति। तदिदं सर्वं तदुपजीवि चेत्यपि द्रष्टव्यम्— इति टीकाग्रन्थेनैव विभावयिष्यते॥

स्वभावतः, विशिष्टदेशकालनिमित्तानामिहोपादानात् । एतदेवानुमानं संसारिव्यतिरिक्तेश्वरास्तित्वादिसाधनं मन्यन्ते ईश्वरकारणवादिनः ॥

नन्विहापि तदेवोपन्यस्तं जन्मादिसूत्रे; न, वेदान्तवाक्यकुसुमग्रथनार्थत्वात्सूत्राणाम् । वेदान्तवाक्यानि हि सूत्रैरुदाहृत्य विचार्यन्ते ।

भामती ।

हेतुभिस्त्राणमुत्पतन्नेव यो हतः ॥ यथा च वन्ध्या जननी' इत्यादिरिति । इत्थं नाम जन्मादि संभावनाहेतुः यदन्ये वैशेषिकादय इत एवानुमानादीश्वरविनिश्चयमिच्छन्तीति संभावनाहेतुतां द्रढयितुमाह— **एतदेवेति** । चोदयति— **नन्विहापीति** । एतावतैवाधिकरणार्थे समाप्ते वक्ष्यमाणाधिकरणार्थमनुवदन्सुहृद्भावेन परिहरति— **न, वेदान्तेति** । वेदान्तवाक्यकुसुमग्रथनार्थत्वमेव दर्शयति— **वेदान्तेति** । विचारस्याध्यवसानं सवासनाविद्याद्वयोच्छेदः ।

कल्पतरुः ।

नीतः संभावना समभवन्न निर्णयः, विचित्रप्रासादादीनां बहुकर्तृकत्वस्य प्रायेण दृष्टत्वात्; तदिदमुक्तम्— **संभावनोक्तेति** । एवं च वक्ष्यमाणाधिकरणद्वयेन प्रमाणं वाच्यमित्यर्थः । एतदेवेति भाष्येण युक्तीनामासां संभावनाहेतुत्वं दृढीक्रियत इत्याह— **इत्थं नामेति** । नैयायिकैरपि प्रमाणादमूषां भेदो नाज्ञायि युक्तीनाम् । ततः स्तोकैवासां प्रमाणादूनता; एवं च संभावयन्तितरामित्यर्थः । **सुहृद्भावेनेति** । उत्तराधिकरणारम्भात्प्राक् क्षणमपि शिष्याणामनुपपत्तिशङ्का मा भूदिति कृपयेत्यर्थः । अत्र 'नावेदविन्मनुते तं बृहन्तम्' 'नैषा तर्केण मतिरापनेया' इत्यादिशास्त्रात्प्रागुक्तयुक्त्या च वेदैकगम्यं ब्रह्मेति समाधत्त इत्याह— **परिहरतीति** । वाक्यार्थविचारणाशब्देन शाब्दबोध उपासनासहित उक्तः परस्तादवगतिरेवेति मध्येऽध्यवसानशब्दो न युक्त इत्याशङ्क्य, नायं ज्ञानवचनः किं तु संस्कारसहितलयविक्षेपाविद्यासमाप्तिवचन इत्याह— **सवासनेति** । वृत्तिरूपसाक्षात्कारस्याविद्याध्वंसिनो

परिमलः ।

उपासनासहित इति । उपासनाशब्दो मननस्यापि संग्राहकः । **परस्तादवगतिरेवेति** । वृत्तिरूपावगत्यभिप्रायेण शङ्का । **समाप्तिवचन इति** । अवसानशब्दः समाप्तिवाचीत्यध्युपसृष्टोऽपि समाप्तिरूपनिवृत्तिपर इति भावः । एवं चाविद्यानिवृत्ति-

वाक्यार्थविचारणाध्यवसाननिर्वृत्ता हि ब्रह्मावगतिः, नानुमानादिप्रमाणान्तरनिर्वृत्ता। सत्सु तु वेदान्तवाक्येषु जगतो जन्मादिकारणवादिषु, तदर्थग्रहणदार्ढ्याय अनुमानमपि वेदान्तवाक्याविरोधि प्रमाणं भवत् न निवार्यते, श्रुत्यैव च सहायत्वेन तर्कस्याप्यभ्युपेतत्वात्। तथा हि—

भामती।

ततो हि ब्रह्मावगतेर्निर्वृत्तिराविर्भावः। तत्किं ब्रह्मणि शब्दादृते न मानान्तरमनुसरणीयम्? तथा च कुतो मननम्? कुतश्च तदनुभवः साक्षात्कारः? इत्यत आह— **सत्सु तु वेदान्तवाक्येष्विति**। अनुमानं वेदान्ताविरोधि तदुपजीवि चेत्यपि द्रष्टव्यम्। शब्दाविरोधिन्या तदुपजीविन्या च युक्त्या विवेचनं

कल्पतरुः।

मध्ये विद्यमानत्वेऽपि न सोऽध्यवसानशब्देन गृहीतः, अविद्यानिवृत्त्या स्वरूपाभिव्यक्तिं प्रति व्यवधानादिति। 'विमतं चेतनपूर्वकं कार्यत्वात्' इत्यादियुक्तिः शब्दाविरोधिनी वस्तुविशेषनिर्धारणे तदुपजीविनीति च वक्तव्यम्, ब्रह्मात्मत्वस्य केवलयुक्त्यगोचरत्वस्वाभाव्यादित्याह— **तदुपजीवि चेत्यपीति**। यथा हि किल गन्धारदेशेभ्य आनीय चोरैररण्ये कश्चिद्बद्धचक्षुर्निहितः आप्तोपदेशतस्तदुपदिष्टस्य साकल्येन गृहीतत्वात्पण्डितः स्वयमूहापोहक्षमतया च मेधावी गन्धारान् प्राप्नोति एवं परब्रह्मण आच्छिद्य विवेकदृष्टिं निरुध्याविद्यादिभिः संसारारण्ये निहितो जन्तुः परमकारुणिकगुरूपदेशतः स्वभावं प्रतिपद्यत इति भाष्यस्थश्रुत्यर्थः। यदुक्तं ब्रह्मणो मानान्तराविषयत्वे कुतो मननमिति तत्राह— **शब्दाविरोधिन्येति**। कारणस्य सर्वज्ञत्वादिसिद्धौ युक्तिः शब्दमुपजीवति न स्वतन्त्रा; कार-

परिमलः।

निर्वृत्तत्वोक्तेरवगतिशब्दः स्वरूपावगतिपर इत्यर्थादुक्तं भवति। **व्यवधानादिति**। अव्यवहितकारण एव निर्वर्तकत्वप्रसिद्धेः व्यवहिता वृत्तिस्तथात्वेन न ग्राह्येति भावः। न चैवं विचारणाशब्दोक्तश्रवणमननोपासनानां साक्षात्कारैकसाध्यायामविद्यानिवृत्तौ करणत्वाभावात् कथं विचारणाध्यवसानेति शब्दसंगतिरिति शङ्कनीयम्। न हि तत्र विचारणया अध्यवसानमिति 'कर्तृकरणे कृता बहुलम्' इति सूत्रेण तृतीयासमासः समाश्रीयते येन करणत्वप्रतीतिः स्यात्। टीकायां हि षष्ठीसमासो दर्शितः; स तु साक्षात्कारद्वारकपरम्परासंबन्धेऽप्युपपद्यते॥

'श्रोतव्यो मन्तव्यः' इति श्रुतिः 'पण्डितो मेधावी गन्धारानेवोपसंपद्येतैवमेवेहाचार्यवान्पुरुषो वेद' इति च पुरुषबुद्धिसाहाय्यमात्मनो दर्शयति। न धर्मजिज्ञासायामिव श्रुत्यादय एव प्रमाणं ब्रह्मजिज्ञासायाम्। किं तु श्रुत्यादयोऽनुभवादयश्च यथासंभवमिह प्रमाणम्, अनुभवावसा-

---

भामती।

मननम्। युक्तिश्च अर्थापत्तिरनुमानं वा। स्यादेतत्। यथा धर्मे न पुरुषबुद्धिसाहाय्यम्, एवं ब्रह्मण्यपि कस्मान्न भवतीत्यत आह— **न धर्मजिज्ञासायामिवेति। श्रुत्यादय इति**। श्रुतीतिहासपुराणस्मृतयः प्रमाणम्। अनुभवः अन्तःकरणवृत्तिभेदो ब्रह्मसाक्षात्कारः, तस्याविद्यानिवृत्तिद्वारेण ब्रह्मस्वरूपाविर्भावः प्रमाणफलम्। तच्च फलमिव फलमिति गमयितव्यम्। यद्यपि धर्मजिज्ञासायामपि सामग्र्यां प्रत्यक्षादीनां व्यापारः तथापि साक्षान्नास्ति। ब्रह्मजिज्ञासायां तु साक्षादनुभवादीनां संभवोऽनुभवार्था च ब्रह्मजिज्ञासेत्याह— **अनुभवावसानत्वात्**। ब्रह्मानुभवो ब्रह्मसाक्षात्कारः परमपुरुषार्थः, निर्मृष्टनिखिलदुःखपरमानन्दरूपत्वादिति। ननु भवतु ब्रह्मानुभवार्था जिज्ञासा, तदनुभव एव त्वशक्यः, ब्रह्मणस्तद्विषयत्वायोग्यत्वात् इत्यत आह— **भूत-**

कल्पतरुः।

णमात्रं तु संभावयन्तीतिकर्तव्यता न मानान्तरमित्यर्थः। भाष्यस्थानुभवशब्दार्थमाह— **अन्तःकरणेति**। ननु कथं वृत्तिः प्रमाणमिति भाष्ये उक्तं निष्फलत्वादित्याशङ्क्य तत्कृताविद्यानिवृत्तिद्वारा स्वरूपाभिव्यक्तिरुपचारात्फलमस्तीत्याह— **तस्येति**। धर्मजिज्ञासायां श्रुत्यादय एव प्रमाणमित्ययुक्तं वेदविषयश्रोत्रप्रत्यक्षाद्यपेक्षणादित्याशङ्क्य ज्ञातव्ये धर्मे न साक्षात्कारतदुपयोगियुक्त्यादीनां संभवः, ब्रह्मजिज्ञासा तु तत्साक्षात्कारपर्यन्तेत्याह— **यद्यपीत्यादिना**। न केवलं ब्रह्मजिज्ञासायामनुभवादीनां संभवः किं तु तत्त्वसाक्षात्कारमन्तरेणापरोक्षसंसारभ्रमनिवृत्त्ययोगात्तेन विना न पर्यवसानं चेत्याह— **अनुभवार्था चेति**। 'ब्रह्मजिज्ञासायाम्' इति सप्तम्यन्तं पदं षष्ठ्यन्तत्वेन विपरिणमय्य 'अनुभवावसानत्वात् ब्रह्मजिज्ञासायाः' इति भाष्यं योज्यम्। अनुभवोऽवसाने समाप्तौ फलत्वेन यस्याः सा तथोक्ता; धर्मजिज्ञासायां त्वनुभवः कारणत्वेनोपक्रमे उपयुक्त इत्यर्थः। इहानुभवः स्वरूपाभिव्यक्तिर्न वृत्तिः। तत्र हेतुमाह— **परमेति**। न वृत्तिरनित्यत्वाद्विचारस्य पुष्कलं फलमि-

नत्वाद्भूतवस्तुविषयत्वाच्च ब्रह्मज्ञानस्य। कर्तव्ये हि विषये नानुभवापेक्षास्तीति श्रुत्यादीनामेव प्रामाण्यं स्यात्, पुरुषाधीनात्मलाभत्वाच्च कर्तव्यस्य। कर्तुमकर्तुमन्यथा वा कर्तुं शक्यं लौकिकं वैदिकं च कर्म; यथा अश्वेन गच्छति, पद्भ्याम्, अन्यथा वा, न वा गच्छतीति। तथा 'अतिरात्रे षोडशिनं गृह्णाति' 'नातिरात्रे षोडशिनं

भामती।

वस्तुविषयत्वाच्च ब्रह्मज्ञानस्येति। व्यतिरेकसाक्षात्कारस्य विकल्परूपो विषयविषयिभावः। न त्वेवं धर्मज्ञानमनुभवावसानम्, तदनुभवस्य स्वयमपुरुषार्थत्वात्, तदनुष्ठानसाध्यत्वात्पुरुषार्थस्य, अनुष्ठानस्य च विनाप्यनुभवं शाब्दज्ञानमात्रादेव सिद्धेः इत्याह— **कर्तव्ये हीत्यादिना**। न चायं साक्षात्कारविषयतायोग्योऽपि, अवर्तमानत्वात्; अवर्तमानश्चानवस्थितत्वादित्याह—**पुरुषाधीनेति**। पुरुषाधीनत्वमेव लौकिकवैदिककार्याणामाह— **कर्तुमकर्तुमिति**। लौकिकं कार्यमनवस्थितमुदाहरति— **यथाश्वेनेति**। लौकिकेनोदाहरणेन सह वैदिकमुदाहरणं समुच्चिनोति— **तथातिरात्र इति**। कर्तुमकर्तुमित्यस्येदमुदा-

कल्पतरुः।

त्यर्थः। तदनुभव एव त्वित्यत्र वृत्तिरुक्ता; एवकारेण तु तत्कर्तृविद्यानिवृत्तिद्वारेण स्वरूपाभिव्यक्तिरशक्यतरेति सूचितम्। भाष्ये भूतशब्दः परमार्थवचनः। चशब्दः शङ्कानिवृत्त्यर्थः। व्यतिरेकः प्रपञ्चाभावोपलक्षितं स्वरूपम्; तद्विषयसाक्षात्कारस्य विकल्परूपो ब्रह्मणा सह विषयविषयिभावरूपः संबन्धोऽस्ति न तु तत्त्वतः। उक्तं हीदं प्रथमसूत्रे वृत्तिविषयत्वमपि तयैवोपहितस्य न निरुपाधेरिति, तन्न प्रस्मर्तव्यमित्यर्थः। अन्यथा वा कर्तुम् इत्यत्र कर्तुमित्यस्यानुषङ्गो भाष्ये कार्यः, करणापेक्षत्वादन्यथाकरणस्य; उदितहोमः कर्तुं शक्यः अनुदिते त्वन्यथेति तदाह—

परिमलः।

अन्यथा कर्तुमित्यत्रेति। अकरणप्रतिकोटिनिर्देशकतयोपात्तस्य कर्तुमित्यस्यान्यथाकरणप्रतिकोटिनिर्देशार्थमप्यपेक्षितत्वादनुषङ्गः कर्तव्य इत्यर्थः। ननु भाष्ये प्रतिज्ञैवाभाति न हेतुरिति न युक्तम्, टीकायां विधिप्रतिषेधाश्चार्थवन्त इति प्रतिज्ञायां विकल्पोत्सर्गापवादाश्चेत्युत्तरभाष्यस्य हेतुपरत्वेन योजितत्वादिति चेत्, उच्यते—पुरुषस्य स्वात-

गृह्णाति' 'उदिते जुहोति' 'अनुदिते जुहोति' इति। विधिप्रतिषेधाश्च अत्र अर्थवन्तः स्युः, विकल्पोत्सर्गापवादाश्च। न तु वस्तु 'एवम्,

भामती।

हरणमुक्तम्। कर्तुमन्यथा वा कर्तुमित्यस्योदाहरणमाह— उदित इति। स्यादेतत्। पुरुषस्वातन्त्र्यात् कर्तव्ये विधिप्रतिषेधानामानर्थक्यम्, अतदधीनत्वात् पुरुषप्रवृत्तिनिवृत्त्योः इत्यत आह— विधिप्रतिषेधाश्चात्रार्थवन्तः स्युः। गृह्णातीति विधिः। न गृह्णातीति प्रतिषेधः। उदितानुदितहोमयोर्विधिः एवं नारास्थिस्पर्शननिषेधो ब्रह्मघ्नश्च तद्धारणविधिः— इत्येवंजातीयका विधिप्रतिषेधा अर्थवन्तः। कुत इत्यत आह— विकल्पोत्सर्गापवादाश्च। चो हेतौ। यस्माद्ग्रहणाग्रहणयोरुदितानुदितहोमयोश्च विरोधात् समुच्चयासंभवे तुल्यबलतया च बाध्यबाधकभावाभावे सत्यगत्या विकल्पः। नारास्थिस्पर्शननिषेधतद्धारणयोश्च विरुद्धयोरतुल्यबलतया न विकल्पः। किं तु सामान्यशास्त्रस्य स्पर्शननिषेधस्य धारणविधिविषयेण विशेषशास्त्रेण बाधः। एतदुक्तं भवति— विधिप्रतिषेधैरेव स तादृशो विषयोऽनागतोत्पाद्यरूप उपनीतः येन पुरुषस्य विधिनिषेधाधीनप्रवृत्तिनिवृत्त्योरपि स्वातन्त्र्यमिव भवतीति। भूते वस्तुनि तु नेयमस्ति विधेत्याह— न तु वस्त्वेवं नैवमिति। तदनेन प्रकारविकल्पो

कल्पतरुः।

कर्तुमिति। भाष्यस्थविध्यादिशब्दानुदाहृतवाक्येषु योजयति— गृह्णातीत्यादिना। 'नारं स्पृष्ट्वास्थि सस्नेहं सवासा जलमाविशेत्' इति नारास्थिस्पर्शननिषेधः। 'शिरः कपालध्वजवान्भिक्षाशी कर्म वेदयन्। ब्रह्महा द्वादशाब्दानि मितभुक्शुद्धिमाप्नुयात्' इति ब्रह्मघ्नः शवशिरसो नारास्थ्नो ध्वजत्वेन धारणविधिः। भाष्ये प्रतिज्ञैव भाति न हेतुरत आह— एतदुक्तमिति। स्वातन्त्र्येण कर्तुं समर्थोऽपि हिताहितोपायत्वमजानन् तद्बोधकविधिनिषेधापेक्ष इत्यर्थः। अन्तःकरणजविकल्पनाद्वैविध्य-

परिमलः।

न्त्र्येण स्वत एव प्रवृत्त्युपपत्तेर्विधिप्रतिषेधानर्थक्यमित्याशङ्कापरिहारार्थत्वेन खल्विदं प्रतिज्ञाभाष्यमवतारितम्। तत्र एतदुक्तं भवतीत्यादिटीकाग्रन्थेन वर्ण्यमानम् इष्टोपायतादिप्रतिपादनमेव विधिप्रतिषेधार्थवत्त्वे हेतुः न तु विकल्पादिकमित्यभिप्रायेण हेत्वाकाङ्क्षायामेतदुक्तमित्यादिकमित्यवतारितम्। विकल्पादिप्रतिपादनं तु विरुद्धयोर्विधि-

नैवम्' 'अस्ति, नास्ति' इति वा विकल्प्यते। विकल्पनास्तु पुरुषबुद्ध्यपेक्षाः। न वस्तुयाथात्म्यज्ञानं पुरुषबुद्ध्यपेक्षम्। किं तर्हि? वस्तुतन्त्रमेव तत्। न हि स्थाणावेकस्मिन् 'स्थाणुर्वा, पुरुषोऽन्यो वा' इति तत्त्वज्ञानं भवति। तत्र 'पुरुषोऽन्यो वा' इति मिथ्याज्ञानम्। 'स्थाणुरेव' इति तत्त्वज्ञानम्, वस्तुतन्त्रत्वात्। एवं भूतवस्तुविषयाणां प्रामाण्यं वस्तुतन्त्रम्। तत्रैवं सति ब्रह्मज्ञानमपि वस्तुतन्त्रमेव, भूतवस्तुविषयत्वात्। ननु भूतवस्तुविषयत्वे ब्रह्मणः प्रमाणान्तरविषयत्वमेवेति वेदा-

---

भामती।

निरस्तः। प्रकारिविकल्पं निषेधति— **अस्ति नास्तीति**। स्यादेतत्। भूतेऽपि वस्तुनि विकल्पो दृष्टः, यथा 'स्थाणुर्वा पुरुषो वा' इति; तत्कथं न वस्तु विकल्प्यते इत्यत आह— **विकल्पनास्त्विति**। पुरुषबुद्धिः अन्तःकरणं तदपेक्षा विकल्पनाः, संशयविपर्यासाः। सवासनमनोमात्रयोनयो वा यथा स्वप्ने। सवासनेन्द्रियमनोयोनयो वा यथा 'स्थाणुर्वा पुरुषो वा' इति स्थाणौ संशयः, 'पुरुष एव' इति च विपर्यासः, अन्यशब्देन वस्तुतः स्थाणोरन्यस्य पुरुषस्याभिधानात्। न तु पुरुषतत्त्वं वा स्थाणुतत्त्वं वापेक्षन्ते, समानधर्मधर्मिदर्शनमात्राधीनजन्मत्वात्। तस्मादयथावस्तवो विकल्पना न वस्तु विकल्पयन्ति वा अन्यथयन्ति वेत्यर्थः। तत्त्वज्ञानं तु न बुद्धितन्त्रम्, किं तु वस्तुतन्त्रम्; अतस्ततो वस्तुविनिश्चयो युक्तः, न तु विकल्पनाभ्य इत्याह— **न वस्तुयाथात्म्येति**। एवमुक्तेन प्रकारेण भूतवस्तुविषयाणां ज्ञानानां प्रामाण्यस्य वस्तुतन्त्रतां प्रसाध्य ब्रह्मज्ञानस्य वस्तुतन्त्रतामाह— **तत्रैवं सतीति**। अत्र चोदयति— **ननु भूतेति**। यत्किल भूतार्थं वाक्यं तत्प्रमाणान्तरगोचरार्थतयानुवादकं दृष्टम्, यथा— नद्यास्तीरे फलानि स-

कल्पतरुः।

माह— **सवासनेति**। जाग्रद्वासनावासितं मन एव स्वप्नकारणम्, जाग्रत्संशयविपर्ययाः संस्कारसहितान्तर्बहिःकरणजा इत्यर्थः। यथावस्तुत्वं वस्त्वनुसारित्वं यासां नास्ति तास्तथोक्ताः। **न वस्त्विति**। संशया न विकल्पयन्ति विपर्यया नान्यथयन्तीत्यर्थः। खानि इन्द्रियाणि व्यतृणद्धिंसितवान् पराङ् पश्यति लोकः।

न्तवाक्यविचारणा अनर्थिकैव प्राप्ता; न, इन्द्रियाविषयत्वेन संबन्धाग्रहणात् । स्वभावतो विषयविषयाणीन्द्रियाणि, न ब्रह्मविषयाणि । सति हीन्द्रियविषयत्वे ब्रह्मणः, इदं ब्रह्मणा संबद्धं कार्यमिति गृह्येत ।

भामती ।

न्तीति । तथा च वेदान्ताः । तस्मात् भूतार्थतया प्रमाणान्तरदृष्टमेवार्थमनुवदेयुः । उक्तं च ब्रह्मणि जगज्जन्मादिहेतुकमनुमानं प्रमाणान्तरम् । एवं च मौलिकं तदेव परीक्षणीयम्, न तु वेदान्तवाक्यानि तदधीनसत्यत्वानीति कथं वेदान्तवाक्यग्रथनार्थता सूत्राणामित्यर्थः । परिहरति— **न, इन्द्रियाविषयत्वेनेति ।** कस्मात्पुनर्नेन्द्रियविषयत्वं प्रतीच इत्यत आह— **स्वभावत इति** । अत एव श्रुतिः— 'पराञ्चि खानि व्यतृणत्स्वयंभूस्तस्मात्पराङ् पश्यति नान्तरात्मन्' इति । **सति हीन्द्रियेति** प्रत्यगात्मनस्त्वविषयत्वमुपपादितम् । यथा च सामान्यतो दृष्टमप्यनुमानं ब्रह्मणि न प्रवर्तते तथोपरिष्टान्निपुणतरमुपपादयिष्यामः । उपपादितं चैतदस्माभिर्विस्तरेण न्यायकणिकायाम् । न च भूतार्थतामा-

कल्पतरुः ।

प्रत्यगात्मनस्त्वविषयत्वमिति अपरोक्षत्वाच्च प्रत्यगात्मप्रसिद्धेरित्यत्रेति । **उपरिष्टात्** तर्कपादे । **उपपादितं चेति** । 'विमतं धीमत्कृतं कार्यत्वात्' इत्यनुमानान्नेश्वरसिद्धिः । जीवकर्तृकत्वेन सिद्धसाधनादुपकरणाद्यभिज्ञकर्तृकत्वसाधने कतिपयतद-

परिमलः ।

प्रतिषेधयोर्विध्योर्वा कथमिष्टोपायताप्रतिपादकत्वमित्याशङ्कायां विकल्पेनोत्सर्गापवादरूपेण वेति हेतूपपादनार्थमित्याभिप्रेत्य टीकायां तदपि हेतुपरत्वेन योजितम् । **प्रत्यगात्मनस्त्वविषयत्वमिति** । ननु 'पराञ्चि खानि–' इति मन्त्रमुदाहृत्य प्रत्यगात्मन इन्द्रियाविषयत्वोक्तिरयुक्ता, 'कश्चिद्धीरः प्रत्यगात्मानमैक्षत् आवृत्तचक्षुरमृतत्वमिच्छन्' इति तन्मन्त्रोत्तरार्ध एव तस्य विद्वदिन्द्रियग्राह्यताया उक्तत्वादिति चेत्; सत्यम्, तत्र श्रवणादिवासितेन्द्रियग्राह्यत्वोक्तावपि शब्दमनपेक्ष्य स्वातन्त्र्येणेन्द्रियग्राह्यत्वस्य प्रत्याख्याने विरोधाभावात् । **अपरोक्षत्वाच्चेति** । प्रदेशोपलक्षणमेतत् । 'अस्मत्प्रत्ययविषयत्वात्' इति भाष्यव्याख्यानावसरे जीवभावोपाध्युपहितरूपेण विषयत्वोक्त्या स्वरूपेणाविषयत्वमुपपादितमित्यर्थः । **जीवकर्तृकत्वेन सिद्धसाधनादिति** । अतिविचित्ररचनस्यापि प्रपञ्चस्य

भामती।

त्रेणानुवादतेत्युपरिष्टादुपपादयिष्यामः। तस्मात्सर्वमवदातम्। श्रुतिश्च 'यतो वा' इति जन्म दर्शयति, 'येन जातानि जीवन्ति' इति जीवनं स्थितिम्,

कल्पतरुः।

भिज्ञतायां सर्वज्ञतासिद्धेः। सर्वतदभिज्ञकर्तृकत्वे सपक्षस्य साध्यहीनत्वात्। कुम्भं निर्मित्सवतः कुम्भकारस्य चैतक्रय्योऽयमित्यनवबोधात्। साधारणेऽपि सिद्धसाधनत्वान्मनःसंयोगहीनस्य चोपलब्धेरभावादमनस्कस्याप्यैश्वर्यादुपलब्धिसंभवे तत एव विनैवोपलब्ध्या जगन्निर्माणसंभवेनोपलब्धिमत्कर्तृकत्वस्यैव विलोपेन वृद्धिं गृध्नतो मूलच्छेदादित्यादि न्यायकणिकायां व्युदपादीति। **उपरिष्टात्** समन्वयसूत्रे। जन्मादिसूत्रेण 'यतो वा' इत्यादिवाक्यं लक्ष्यमिति भाष्ये उक्तं तदर्थं श्रुतिसूत्रयोरर्थप्रत्यभिज्ञां दर्शयति— **श्रुतिरिति**॥

परिमलः।

बहुविधापरिमितगोपुरप्रासादमण्डपमहातटाकादियुक्तस्य महतो नगरस्येव क्रमेण युगपद्वा संभूतैरसर्वज्ञासर्वशक्तिकैरपि विश्वामित्रादिवदुपचितपुण्यवशलब्धतत्तदेकदेशसृष्टिसामर्थ्यशालिभिर्बहुभिर्जीवैर्निर्मितत्वमुपपद्यते, 'धर्मिकल्पनातो वरं धर्मकल्पना' इति न्यायात्। अतोऽनुमानस्य तद्विषयत्वोपपत्तेर्न क्लृप्तजीवातिरिक्तसर्वज्ञसर्वशक्तिकैककर्त्रन्तरसिद्धिरित्यर्थः। ननूपकरणाद्यभिज्ञकर्तृकत्वं साध्यत इति नार्थान्तरमित्याशङ्क्य यत्किंचिद्यावद्विकल्पेन प्रागुक्तमर्थान्तरं दृष्टान्तस्य साध्यवैकल्यं वा स्यात् यावदिति यत्किंचिदिति वा विशेषाविवक्षायामप्यर्थान्तरं स्यादित्याह— **उपकरणेत्यादिना**। अनुमानस्यातिरिक्तेश्वरासाधकत्वमुक्त्वा तत्साधकत्वे बाधकमप्याह— **मनःसंयोगेति**। धीमत्कर्तृकत्वसाध्यसिद्ध्या सिद्ध्यन्ती धीर्नित्या अभ्युपगम्यते अनित्या वा? नाद्यः, त्वन्मते कार्यत्वे धीमत्कर्तृकत्वव्याप्तिवत् ज्ञानत्वे जन्यत्वव्याप्तेरप्यप्रतिक्षेप्यतया तद्विरोधेन ज्ञाननित्यत्वाप्तिसिद्धेः। न द्वितीयः, क्लृप्तकारणं मनःसंयोगादिकं विना ज्ञानोत्पत्त्यसंभवात्। तद्विनाप्यैश्वर्यवशात् ज्ञानोत्पत्त्यभ्युपगमे तत एव ज्ञानं विनापि स्रष्टृत्वसंभवेन त्वदभिमतसाध्यासिद्धिप्रसङ्गादित्यर्थः। ननु कार्येण च कारणं किंचिदस्तीत्यनुमितमिति पूर्वग्रन्थे युक्त्या कर्तृमात्रनिश्चयः तदेकत्वसार्वज्ञ्यादिषु संभावनेत्युक्तम्, तदनन्तरं कारणस्य सर्वज्ञत्वादिसिद्धौ युक्तिः शब्दमुपजीवति न स्वतन्त्रा कारणमात्रं तु संभावयन्तीतिकर्तव्यतेति ग्रन्थेनानुमानं कर्तृसंभावनामेव जनयति न निश्चयं तदेकत्वसार्वज्ञ्यादौ संभावनामपि न जनयति किं तु तदंशे शब्दोपजीवनमेवेत्युक्तम्; इदानीमीश्वरानुमानस्यार्थान्तरबाध-

कार्यमात्रमेव तु गृह्यमाणं किं ब्रह्मणा संबद्धम्, किमन्येन केनचिद्वा संबद्धम्, इति न शक्यं निश्चेतुम् । तस्माज्जन्मादिसूत्रं नानुमानोपन्यासार्थम् । किं तर्हि? वेदान्तवाक्यप्रदर्शनार्थम् । किं पुनस्तद्वेदान्तवाक्यं यत् सूत्रेणेह लिलक्षयिषितम्? 'भृगुर्वै वारुणिः । वरुणं पितरमुपससार । अधीहि भगवो ब्रह्मेति' इत्युपक्रम्याह— 'यतो वा इमानि भूतानि जायन्ते । येन जातानि जीवन्ति । यत्प्रयन्त्यभिसंविशन्ति । तद्विजिज्ञासस्व । तद्ब्रह्मेति ।' तस्य च निर्णयवाक्यम्—

भामती ।

'यत्प्रयन्ति–' इति तत्रैव लयम् । तस्य च निर्णयवाक्यम् । अत्र च

कल्पतरुः ।

अत्र स्वरूपलक्षणपरत्वं सूत्रस्य दर्शयितुं तस्य चेति भाष्यम्; तद्व्याचष्टे— अत्र चेति । जगद्विशेषणैः पूर्वं निर्णयेऽपि श्रुतित इह निर्णीयते । कारणं

परिमलः ।

योरुद्भावनेन संभावनामपि यथा नोत्पादयेत् तथोपपादितम्; सर्वमिदं पूर्वापरविरुद्धमिति चेत्; उच्यते—'विमतं धीमत्कर्तृपूर्वकम्' इत्याद्यनुमानं सर्वथा कर्तृसाधकं न भवतीति नेह प्रतिक्षिप्तम्, किं तु संप्रतिपन्नजीवातिरिक्तकर्तृसाधकं न भवतीति । एवमिह सर्वथैवाप्रतिक्षिप्तमनुमानं न कर्तृनिश्चायकम्, किं तु तत्संभावनामात्रजनकमिति कारणमात्रं तु संभावयन्तीति ग्रन्थेनोक्तम् ॥

तस्यायमाशयः— कार्यत्वलिङ्गकानुमानं कर्तृसामान्यमपि न निर्धारयितुमीष्टे । यथा दानपतनयोः संप्रदानापादानकारकापेक्षत्वेऽपि न कार्यान्तराणां तदपेक्षा; एवं घटादीनां कर्त्रपेक्षत्वेऽपि अङ्कुरादीनां मा भूत्तदपेक्षेत्यप्रयोजकत्वशङ्क्या घटतृणादिषु कृताकृतव्यवहारोपोद्बलितया व्याप्तिशैथिल्यात्; किं तु तन्मात्रं संभावयति, संप्रदानापादानयोरिव च कर्तुः कार्यान्तरेषु दृष्टव्यभिचाराभावात् घटपटादिषु भूयः सकर्तृकत्वदर्शनाच्च; कर्त्रैकत्वादौ तु युक्तिः संभावनामात्रमपि न जनयति कल्पानेकजीवकर्तृकत्वोपपत्तेरिति; अतो नानयोर्ग्रन्थयोः परस्परविरोधः । कार्येण च कारणं किंचिदस्त्यनुमितमित्यादिग्रन्थस्तु प्रौढिवादेन प्रवृत्त इति न किंचिदवद्यम् ॥

कल्पतरुः।

ब्रह्मानूद्य वाक्येनानन्दत्वविधानात्स्वरूपलक्षणसिद्धिः; आनन्दः सत्यादेरुपलक्षणम्। नन्वानन्दादेर्भेदे न ब्रह्मलक्षणत्वम्; अभेदे वाक्यार्थासिद्धिः; गुणभूतपदार्थविशिष्टः प्रधानपदार्थो हि वाक्यार्थः; अत्रोच्यते— यत्र पदार्थः प्रमितः तत्र स इतरपदार्थविशिष्टः प्रतिपाद्यः। यस्त्वज्ञातः स नान्यैः शक्यो विशेष्टुमिति स एव वाक्येन प्रमेयः। अप्रमिते चैतस्मिन् वाक्यस्य समासेर्न विशिष्टपरत्वम्।

परिमलः।

ननु— प्रधानादिसंशये निर्णयवाक्यमिति टीकाग्रन्थो न युक्तः, भाष्ये 'अस्य जगतो नामरूपाभ्यां व्याकृतस्य' इत्यादिना जगतः कानिचिद्विशेषणान्युक्त्वा 'न च यथोक्तविशेषणस्य जगतः' इत्याद्युत्तरग्रन्थेन जगत्कारणस्य प्रधानादिविलक्षणेश्वररूपत्वसमर्थनेन संशयाभावादित्याशङ्क्याह— **जगद्विशेषणैरिति**। निर्णयेऽपीत्यपिशब्देन ब्रह्मनिर्णये श्रुत्येकशरणानामस्माकं युक्त्या वस्तुतो निर्णयो न भवति अतः प्रधानादिसंशय इति। ननु प्रसिद्धस्यैवानुवाद्यतया लोकप्रसिद्धं लौकिकानन्दमनूद्य तस्य जगज्जन्मादिकारणत्वविधायकम् 'आनन्दाद्ध्येव—' इति वाक्यमिति प्रतिभाति; तथा सति लौकिकानन्दस्यैव जगज्जन्मादिष्वदृष्टादिवत् कारणान्तरत्वमुक्तं स्यात् न तेनानन्दरूपता ब्रह्मणः स्वरूपलक्षणं सिध्येदित्याशङ्क्याह— **कारणं ब्रह्मेति**। कल्पनीयोपस्थितिकलौकिकानन्दप्रसिद्धयपेक्षया क्लृप्तोपस्थितिकपूर्वप्रस्तुतजन्मादिकारणप्रसिद्धिः शीघ्रतरेति तया जगज्जन्मादिकारणं ब्रह्मानूद्य तस्यानन्दरूपत्वविधायकमिदं वाक्यमिति भावः। **सत्यादेरपीति**। 'आनन्दादयः प्रधानस्य' इत्यधिकरणसिद्धम् 'सत्यं ज्ञानमनन्तं ब्रह्म' इति प्रदेशान्तराम्नातलक्षणगतसत्यज्ञानाद्युपसंहारमभिप्रेत्योपलक्षणत्वोक्तिः। **नन्विति**। सत्यज्ञानादीनां ब्रह्मस्वरूपात् परस्परस्माच्च भेदे सच्चिदानन्दरूपत्वं ब्रह्मलक्षणं न सिध्येत्। अभेदे वाक्यार्थो न सिध्येत्, तस्यानेकपदार्थवैशिष्ट्यरूपत्वनियमादित्यर्थः। अभेदपक्षमालम्ब्योक्तनियमासिद्धया परिहरति— **अत्रोच्यत इति। यस्त्वज्ञात इति**। तथा चाज्ञाते ब्रह्मपदार्थे एव वाक्यस्य पर्यवसानात् पुनर्न विशिष्टपरत्वमित्यर्थः। नन्वज्ञातत्वं ब्रह्मणोऽसिद्धम्, स्वरूपलक्षणवाक्ये ब्रह्मानूद्य तस्यानन्दत्वविधानमित्यनुपदमेवोक्तत्वात्। न ह्यज्ञातमनुवाद्यम्; अत एव न विशिष्टपरत्वमित्येतदप्यसिद्धं विधेयानुवाद्यविभागे सति तत्संसर्गविषयत्वावश्यंभावादिति चेत्; उच्यते— 'अधीहि भगवो ब्रह्म' इति प्रश्नसमये ब्रह्मप्रातिपदिकार्थतया 'यतो वा' इत्यादिवाक्यश्रवणानन्तरं जगज्जन्मादिकारणतया च भृगुणा ज्ञातमपि ब्रह्म प्रधानपरमाण्वादिव्यावृत्तेन स्वरूपेण न निर्धारितमित्यज्ञातम्, जगत्का-

कल्पतरुः ।

यथा प्रकृष्टप्रकाशश्चन्द्र इति, प्रकर्षप्रकाशद्वारा चन्द्रलक्षणात्; न तद्वैशिष्ट्यम्, मानान्तरादेव तत्सिद्धेः । उपायस्तु वैशिष्ट्यम् अखण्डचन्द्रसिद्धौ । तच्चाविरोधाच्चन्द्रे-

परिमलः ।

रणत्वेन तदनुवादेऽपि नानुवाद्यसंसर्गस्य वाक्यार्थानुप्रवेशः; किं तु वायुक्षेपिष्ठत्वादेरर्थवादानूदितस्य तत्समर्पकार्थवादिकपदसंघातलक्षणीयविधिवाक्यार्थान्वयिस्तुतिद्वारतयेव 'यत इमानि भूतानि जायन्ते' इत्यादिपदसंघातलक्षणीयकारणत्वाश्रयवस्तूपस्थितिद्वारतया प्रथमावगतिमात्रम् । न चानुवाद्यस्य जगत्कारणत्वस्य वाक्यार्थान्वयसंभवे तत्समर्पकपदसंघातस्य 'पुरोडाशकपालेन तुषानुपवपति' इत्यत्र पुरोडाशकपालशब्दस्येवाधिष्ठानलक्षणा न युक्तेति वाच्यम्, ब्रह्मप्रातिपदिकार्थमात्रस्य बुभुत्सितत्वेनाबुभुत्सितस्य कारणत्वस्यापि वाक्यार्थानुप्रवेशे कल्पकाभावात् । तदेतदनुपदमेव प्रकृष्टप्रकाशदृष्टान्तविवरणे स्फुटीकरिष्यते । **यथा प्रकृष्टप्रकाश इति** । 'कश्चन्द्रः' इति प्रश्नोत्तरे 'प्रकृष्टप्रकाशश्चन्द्रः' इति वाक्ये प्रकृष्टप्रकाशशब्दौ प्रकर्षप्रकाशत्वरूपस्वार्थबोधनद्वारा तदाश्रयं बुभुत्सितं वस्तुतश्चन्द्ररूपं व्यक्तिविशेषं लक्षयतः इति तत्र प्रकर्षप्रकाशत्ववैशिष्ट्यं न वाक्यार्थज्ञानानुप्रविष्टमित्यर्थः । ननु प्रश्नोत्तरे बुभुत्सितं वक्तव्यमित्येव नियमः न त्वबुभुत्सितं न वक्तव्यमित्यपि, अबुभुत्सितस्यापि बुभुत्सितग्रहणोपायस्य सहवचनोपपत्तेः । 'काञ्च्याः को मार्गः' इति प्रश्ने मार्गग्रहणोपायतया तत्तत्प्रदेशस्थितगिरिनदीकाननादिसद्भावस्यापि सहवचनदर्शनादित्याशङ्क्याह— **मानान्तरादिति** । मानान्तरासिद्धो गिरिनद्यादिमार्गग्रहणोपायो वाक्यार्थेऽनुप्रविशतु नाम, मानान्तरसिद्धस्य तु न तदनुप्रवेशः कल्पनीय इत्यर्थः । नन्वेवं सति मानान्तरोपस्थितस्यैव प्रकर्षस्य प्रकाशत्वस्य च बुभुत्सितचन्द्रव्यक्तिग्रहणोपायत्वसंभवात् तदुपादानं व्यर्थमित्याशङ्क्याह— **उपायस्त्विति** । उपात्तमेव प्रकृष्टत्वं प्रकाशत्वं च व्यक्तिविशेषनिर्धारणोपयोगि भवति नानुपात्तम् । न हि 'चन्द्रः' इत्येवोत्तरेण 'प्रकृष्टप्रकाशत्वाश्रयव्यक्तिविशेषश्चन्द्रः' इति निर्धारणं निष्पद्यते । नन्वेवं सति प्रकृष्टप्रकाशत्ववैशिष्ट्यमपि वाक्येन बोधनीयमापतति; न हि तदबोधने तदाश्रयव्यक्तिविशेषश्चन्द्र इति निर्धारणा भवतीति चेत्; उच्यते— 'कुल घोषः' इति प्रश्नोत्तरे घोषवासयोग्यनिबिडाधारप्रतिपादनार्थे प्रवृत्ते गङ्गायां घोष इति वाक्ये गङ्गापदं स्वार्थोपस्थापनद्वारा वस्तुतः स्वार्थसंबन्धिबुभुत्सितनिबिडाधाररूपं तीरं लक्षयतीति न तीरे प्रवाहविशेषसंबन्धित्वमपि वाक्ये बोध्यम् । न च तदपि वाक्येन बोध्यमेव तीरत्वमात्रेण बोधने तीरव्यक्तिविशेषनिर्धारणासिद्धेरिति वाच्यम्, गङ्गापद-

कल्पतरुः।

ऽनुज्ञायते। सत्यादिवाक्ये त्वनन्तादिपदैर्बाध्यते वैशिष्ट्यम्। एवं च, अविशिष्टमपर्यायानेकशब्दप्रकाशितम्। एकं वेदान्तनिष्णाता अखण्डं प्रतिपेदिरे॥

ननु चन्द्रलक्षणमिदम्, ततः 'चन्द्र इतरस्माद्व्यावर्तते चन्द्रशब्देन व्यवहर्तव्यो वा प्रकृष्टप्रकाशत्वाद्व्यतिरेकेण तमोवत्' इति व्यावृत्तिविशिष्टस्य वाच्यत्वविशिष्टस्य वा वाक्येन प्रतिपाद्यत्वामिति; तन्न, अप्रमिते चन्द्रे व्यावृत्तेरनवबोधात्। प्रमितेऽपि प्रमाणान्तरात् प्रमितिर्लक्षणवाक्याद्वा? प्रथमे सामान्यतः प्रमितिर्विशेषतो वा?

परिमलः।

लक्ष्यत्वं तदर्थासंबन्धिनस्तीरान्तरस्य न संभवतीति तल्लक्ष्यत्वानुपपत्त्या अर्थात् तीरविशेषलाभोपपत्त्या तल्लाभार्थं मुख्यार्थसंबन्धित्वस्य लक्षणीयकोट्यनुप्रवेशकल्पनायोगात् यश्चार्थादर्थो न स चोदनार्थः इति न्यायात्। एवमिहापि द्रष्टव्यम्। **अनुज्ञायत इति**। न प्रतिक्षिप्यत इत्यर्थः; न तु वाक्यार्थानुप्रवेशित्वेनानुज्ञायत इति तदननुप्रवेशस्य समर्थितत्वात्॥

एवमुक्तां प्रक्रियामाश्रित्य स्वाभिमतं लौकिकवैदिकानां लक्षणवाक्यानामभेदपरवाक्यानां चाखण्डार्थत्वं निर्धारयितुमर्थगतमखण्डत्वं लक्षयति— **एवं चेति। अविशिष्टमिति**। समभिव्याहृतपदान्तरार्थासंसृष्टमित्यर्थः। अतः 'प्रकृष्टप्रकाशश्चन्द्रः' इत्यत्र बोध्यस्य चन्द्रस्य पदार्थैकदेशेन चन्द्रत्वेन वैशिष्ट्येऽपि नासंभवः। न च तत्त्वमस्यादिवाक्यार्थेष्वभेदरूपः संसर्गोऽस्तीत्यसंभवः शङ्कनीयः, संबन्धस्य द्विष्ठत्वनियमेनाभेदस्य संसर्गत्वाभावात्। 'कोकिलः पिकः' इत्यादिपर्यायानेकशब्दप्रकाशिते वाक्यार्थत्वाभावादलक्ष्येऽतिव्याप्तिवारणार्थम् अपर्यायेति विशेषणम्। अविशिष्टमित्यनेनार्थलब्धस्यैक्यस्य स्पष्टीकरणार्थम् एकमिति। पदार्थभेदे तदुभयसंसर्गस्य वाक्यार्थत्वावश्यंभावेनाविशिष्टत्वासंभवात्। एवम् 'अपर्यायानेकशब्दप्रकाशितमविशिष्टमखण्डम्' इत्यखण्डलक्षणोक्त्या 'समभिव्याहृतपदान्तरार्थसंसर्गागोचरप्रमितिजनकं वाक्यमखण्डार्थम्' इत्यखण्डार्थलक्षणं सूचितं भवतीति द्रष्टव्यम्। दृष्टान्तासिद्धिमाशङ्कते— **नन्विति**। 'व्यावृत्तिर्व्यवहारो वा लक्षणार्थः' इति नैयायिकाः। तथा च 'प्रकृष्टप्रकाशः' इति हेतुगर्भं विशेषणम् 'चन्द्रः' इति च हेत्वाश्रयभूतायाश्चन्द्रव्यक्तेरितरव्यावृत्तिचन्द्रशब्दवाच्यत्वान्यतरसाध्यवैशिष्ट्यपरमिति नाखण्डार्थतेत्यर्थः। स्यादेतत्। मा भूत् चन्द्रव्यक्तौ तादितरव्यावृत्तेः साध्यता, ज्योतिर्मण्डलमध्ये प्रकृष्टप्रकाशरूपेण तां गृह्णता प्रत्यक्षेण तस्यां नक्षत्रादिव्यावृत्तेरपि ग्रहणात्; चन्द्रशब्दवाच्यत्वस्य तु स्यात्; 'इयं

कल्पतरुः ।

नाग्रिमः, सामान्यस्यैव व्यावृत्तिसिद्धौ चन्द्रस्य तदसिद्धिप्रसङ्गात् । न चरमः, विशेषग्राहिप्रमाणादेव व्यावृत्तिसिद्धौ लक्षणवैफल्यात् । न द्वितीयः, लक्षणवाक्याच्चन्द्रप्रमितौ तस्य तत्रैव पर्यवसाने व्यावृत्तिपरत्वानुपपत्तेः । न च चन्द्रशब्दवाच्यत्वं साध्यते, अचन्द्रे चन्द्रशब्दवाच्यत्वसाधने व्याघातात् । अथ चन्द्रत्वमभ्युपेत्य चन्द्रशब्दवाच्यत्वं साध्यते तर्हि चन्द्रत्वमेव साध्यतामवश्यापेक्षितत्वात्, कृतमश्रुतवाच्यत्वकल्पनया । तस्मात्प्रकृष्टत्वे सति प्रकाशत्वमज्ञातचन्द्रज्ञापकम् । अर्थात्तु व्यावृत्त्यादिसिद्धिः । एवं चैतदपास्तम् एकेन पदेन यावदुक्तं तावतोऽपरेणाभिधाने पर्यायत्वमधिकाभिधाने च विशिष्टवाक्यार्थत्वापत्तिरिति । वाच्यार्थनानात्वस्येष्टत्वा-

परिमलः ।

व्यक्तिश्चन्द्रशब्दवाच्या' इति प्रागनवगतत्वात् अवगतौ वा लक्षणे वाक्यानपेक्षणादित्याशङ्क्याह— **न चेति** । चन्द्रत्वजातिरहिते तत्साध्यते तद्वति वा? नाद्य इत्याह— **अचन्द्रे इति । व्याघातादिति** । शब्दप्रवृत्तिनिमित्तरहितस्य तद्वाच्यत्वायोगादित्यर्थः । द्वितीये 'अयं चन्द्रः' इति चन्द्रत्वेन निश्चितायां व्यक्तौ तत्साध्यते, उतानेनैव वाक्येन चन्द्रत्वावगमनपूर्वकं तत्साध्यते? नाद्यः, 'चन्द्रत्वविशिष्टः चन्द्रशब्दवाच्यः अयं चन्द्रत्वविशिष्टः' इत्यवगच्छतस्तत्र चन्द्रशब्दवाच्यत्वनिर्णयार्थमुपदेशानपेक्षणात् । न हि 'गोसदृशो गवयः अयं च गोसदृशः' इति जानतस्तत्र गवयशब्दवाच्यत्वनिश्चयार्थमुपदेशापेक्षा दृश्यते । न द्वितीय इत्याह— **अथ चन्द्रत्वमिति । अज्ञातचन्द्रज्ञापकमिति** । यद्यपि प्रकृष्टप्रकाशव्यक्तिरेव चन्द्रः स च ज्ञात एव ; न च चन्द्रत्वेनाज्ञानं विवक्षितं व्यक्तिसमानवित्तिवेद्यस्य तस्यापि सप्रकारके व्यक्तिज्ञाने प्रकारत्वेन विषयतावश्यंभावात् ; तथापि चन्द्रत्ववैशिष्ट्यांशे सत्तानिश्चयरूपज्ञानाभावो विवक्षितः ; अनभ्यासदशापन्नजलादिज्ञानवत् यतो न तदंशे सत्तानिश्चयरूपम् अत एवोपदेशानन्तरमेव तन्निश्चयः । अन्यथोपदेशवैयर्थ्यं स्यात्, विषयान्तरासंभवात् । यद्वा ज्ञातेर्नास्ति व्यक्तिसमानवित्तिवेद्यत्वनियमः, सुवर्णकरकादिषु गृह्यमाणेष्वपि तेजस्त्वजलत्वपृथिवीत्वादिसंशयदर्शनात् । किं तु यद्व्यञ्जकतया यदवगतं तस्यास्तत्समानवित्तिवेद्यत्वनियमः । न च ज्योतिर्मण्डलमध्यवर्तिप्रकर्षविशेषयुक्तप्रकाशत्वं चन्द्रत्वव्यञ्जकमिति प्रागुपदेशात् ज्ञातम् ; अतो युज्यत एवाज्ञातचन्द्रत्वज्ञापकत्वं प्रकृष्टप्रकाशवाक्यस्य । **अर्थात्त्विति** । अप्रकृष्टप्रकाशनक्षत्रादिव्यावृत्तेः प्रत्यक्षतः सिद्धावप्यचन्द्रव्यावृत्तेश्चन्द्रशब्दवाच्यत्वस्य चार्थात्सिद्धिरित्यर्थः । ननु वाच्यनानात्वे लक्ष्यस्यापि नानात्वं स्यादित्याशङ्क्याह—

कल्पतरुः।

लक्ष्यस्य चैकत्वात्। न हि चन्द्रद्वयमस्ति। न हि लक्षणस्य विशिष्टत्वाल्लक्ष्यं विशिष्टं स्यात्। मा भूत्सामान्यवत्त्वे सति अस्मदादिबाह्येन्द्रियग्राह्यत्वं विशिष्टमित्यनित्यत्वमपि विशिष्टम्। तर्हि अनित्यत्वस्येव लक्षणानात्मकत्वाल्लक्ष्यस्य ब्रह्मणः सत्याद्यात्मकत्वं न स्यादिति चेत्, नैतदस्ति; यतः सत्तादीनां हि जातीनां व्यक्तितादात्म्यदर्शनात्। लक्ष्यव्यक्तिरपि ब्रह्म सत्तादि न जहाति नः॥ इह हि कल्पितभेदव्यक्त्याश्रितैः सामान्यैः या व्यक्तयो लक्ष्यन्ते तास्तद्रूपत्वं न जहति तरङ्गचन्द्रानुगतचन्द्रत्वेन लक्ष्यचन्द्रव्यक्तिरिव चन्द्रात्मत्वम्; एवं ब्रह्मापि मायाकार्यकुम्भादिकल्पितव्यक्त्यनुगतसत्तया लक्ष्यमाणं सत्त्वं न हास्यति। तथा ज्ञानत्वानन्दत्वाभ्यामप्यन्तःकरणवृत्युपधानलब्धभेदचिदानन्दविशेषानुगताभ्यां लक्ष्यमाणचिदानन्दव्यक्त्योरपि योज्यम्। यथा च सद्भेद औपाधिक एवं सज्ज्ञानानन्दभेदोऽपि, सत्त्वरहितज्ञाना-

परिमलः।

न हि चन्द्रद्वयमस्तीति। प्रकृष्टप्रकाशशब्दवाच्यनानात्वेऽपि तल्लक्ष्यचन्द्रव्यक्तिनानात्वं नास्तीत्यर्थः। **मा भूदिति**। यद्यपि ध्वंसप्रागभावान्यतरप्रतियोगित्वरूपमनित्यत्वं ध्वंसेन प्रागभावेन वा विशिष्टमेव, तथाप्यस्मदादिबाह्येन्द्रियग्राह्यत्वं सामान्यवत्त्वेनेव समानाधिकरणविशेषणेन विशिष्टं न भवतीत्यत्र तात्पर्यम्। 'सुवर्णं तेजः जलपृथिव्यन्यत्वे सति रूपवत्त्वात्' इत्याद्युदाहरणान्तरमिह द्रष्टव्यम्। अनित्यत्वतज्ज्ञापकदृष्टान्तेनैव दोषान्तरमाशङ्कते— **तर्हीति**। **सत्याद्यात्मकत्वं न स्यादिति**। सत्ताजात्यादितादात्म्यापन्नं हि घटादिकं सदाद्यात्मकमिष्यत इति भावः। **सत्तादि न जहातीति**। सदाद्यात्मकं भवतीत्यर्थः। ननु घटादिविषयेषु सत्तादिजातीनां व्यक्तितादात्म्यदर्शनमस्तु; ततः किमायातं ब्रह्मणः सदात्मकत्वादिसिद्धावित्याशङ्क्य श्लोकं व्याचष्टे— **इह कल्पितभेदेति**। प्रतिज्ञातमर्थं क्वचिदुदाहरणे प्रदर्शयन्नेव तन्न्यायं प्रकृते योजयति— **तरङ्गेति**। वस्तुतश्चन्द्रस्यैकत्वेऽपि तरङ्गोपाधिकल्पितभेदा बहवश्चन्द्राः सन्तीति अस्ति तावदनुगतं चन्द्रत्वसामान्यम्; तद्वाचिनश्चन्द्रशब्दस्य यदा भेदकल्पनाधिष्ठाने बिम्बचन्द्रे प्रयोगः तदा तद्वाच्यचन्द्रत्वसामान्यलक्ष्या भवति सा चन्द्रव्यक्तिः, सा च चन्द्रात्मत्वं न जहातीति दृष्टम्; तथेहापि मायाकल्पितभेदघटपटाद्यनुगतसत्तासामान्यवाचिनः सच्छब्दस्य सद्भेदकल्पनाधिष्ठाने ब्रह्मणि प्रयोगे सति तद्वाच्येन सत्तासामान्येन लक्ष्यं ब्रह्म सदात्मत्वं न जहातीत्यर्थः। ननु सच्चिदानन्दशब्दवाच्यसत्तादिसामान्यलक्ष्यव्यक्तीनां भेदादपर्यायानेकशब्दपर्यवसानास्पदं ब्रह्म न सिध्येत्; अत आह— **यथा चेति**।

'आनन्दाद्धयेव खल्विमानि भूतानि जायन्ते। आनन्देन जातानि

भामती।

प्रधानादिविषयत्वसंशये निर्णयवाक्यम्- आनन्दाद्धयेव इति। एतदुक्तं भवति-

कल्पतरुः।

नन्दयोः शून्यत्वप्रसङ्गात् बोधात्मत्वरहितस्य सतश्च भानाभावप्रसङ्गात् दृश्यत्वे कल्पितत्वेन सत्त्वायोगात् सद्बोधात्मकसाक्षिणश्च परमप्रेमास्पदत्वेनानन्दस्वाभाव्यावगमादिति। तथा च कल्पितभेदसामान्यतदपेक्षव्यक्त्याकारबाधेन सत्यज्ञानानन्दात्मकं ब्रह्म निश्चीयते। प्रयोगोऽपि- 'सत्यादिवाक्यं विशिष्टार्थपरत्वरहितम्, लक्षणवाक्यत्वात् प्रकृष्टप्रकाशादिवाक्यवत्' इति। तथा, उपाधिभेदभिन्नोऽर्थो येनैकः प्रतिपाद्यते। तदपि स्यादखण्डार्थं महत्खं कुम्भखं यथा॥ निरंशस्य हि जीवस्याणुत्वमनन्तत्वं वा स्यात्; तत्र नाणुत्वम्, सकलदेहव्याप्याह्लादानुपलम्भप्रसङ्गात्; विभोश्च नभोवत् द्रव्यत्वावान्तरजात्यनाधारस्येश्वराद्भेदायोगात्। तस्मादनन्तब्रह्मात्मनोऽस्य परिच्छेद औपाधिकः। श्रूयते च जीवस्य परस्मादौपाधिको भेदः— 'यथा ह्ययं ज्योतिरात्मा विवस्वानपो भिन्ना बहुधैकोऽनुगच्छन्। उपाधिना क्रियते भेदरूपो देवः क्षेत्रेष्वेवमजोऽयमात्मा' इति। नन्वेवंभूतस्य ब्रह्मणः कथं जगद्योनित्वम्? अत आह— एतदिति॥

परिमलः।

व्यक्त्याकारो व्यक्तिभेदः। **विशिष्टार्थपरत्वरहितमिति**। पदान्तरार्थसंसृष्टार्थपरत्वरहितमित्यर्थः। एवं तत्पदार्थविषयावान्तरवाक्यानामखण्डार्थत्वं प्रसाध्य तत्त्वमस्यादिमहावाक्यानामपि तत्साधयति— **तथेति**। 'तत्त्वमस्यादिवाक्यमखण्डार्थम्, उपाधिभेदभिन्नार्थैक्यप्रतिपादकत्वात् महाकाशो घटाकाश इति वाक्यवत्' इति श्लोकसंगृहीतेऽनुमाने हेत्वसिद्धिपरिहाराय जीवेश्वरयोः स्वाभाविकभेदाभावं जीवस्य विभुत्वेन हेतुना साधयिष्यन् परिमाणान्तरनिरासेन तस्य विभुत्वमुपपादयति— **निरंशस्येति**। 'आत्मा द्रव्यत्वावान्तरजातिरहितः, विभुत्वादाकाशवत्' इत्यनुमाने जातौ धर्मिसमानसत्ताकत्वं विशेषणं देयम्; तेन तरङ्गचन्द्रानुगतचन्द्रत्वन्यायेन जीवेष्वीश्वरे च कल्पिताया आत्मत्वजातेरभ्युपगमेऽपि न बाधः। जीवेश्वरभेदस्य स्वाभाविकत्वे तद्गतात्मत्वजातेर्धर्मिसमानसत्ताकत्वावश्यंभावात् तदभेदसाधनेन स्वाभाविकभेदनिरासासिद्धिः। उक्तानुमानानुग्राह्यां जीवानामीश्वरात् परस्परस्माच्च भेदस्यौपाधिकत्वप्रतिपादिनीं श्रुतिमुदाहरति— **यथा ह्ययमिति**॥

जीवन्ति। आनन्दं प्रयन्त्यभिसंविशन्ति' इति। अन्यान्यप्येवंजातीयकानि वाक्यानि नित्यशुद्धबुद्धमुक्तस्वभावसर्वज्ञस्वरूपकारणविषयाणि उदाहर्तव्यानि॥

जगत्कारणत्वप्रदर्शनेन सर्वज्ञं ब्रह्मेत्युपक्षिप्तम्, तदेव द्रढयन्नाह—

शास्त्रयोनित्वात्॥ ३॥

भामती।

यथा रज्ज्वज्ञानसहितरज्जूपादाना धारा रज्ज्वां सत्यामस्ति रज्ज्वामेव च लीयते, एवमविद्यासहितब्रह्मोपादानं जगत् ब्रह्मण्येवास्ति तत्रैव च लीयत इति सिद्धम्॥

सूत्रान्तरमवतारयितुं पूर्वसूत्रसंगतिमाह— **जगत्कारणत्वप्रदर्शनेनेति**।

कल्पतरुः।

अत्र हेतुमात्रं प्रतिभाति नैतज्जगद्योनित्वे साध्याविशेषादित्यसंगतिमाशङ्क्य आर्थिकप्रतिज्ञया संगतिमाहेत्याह— **सूत्रान्तरमिति**। अथ वा वेदनित्यत्वाद्ब्रह्मणो

परिमलः।

साध्याविशेषादिति। हेतुः सिद्धश्चेत् साध्यमपि सिद्धमेव; 'अस्य महतो भूतस्य—' इति श्रुत्या खलु हेतुसिद्धिरेष्टव्या; तया 'यतो वा—' इत्यादिश्रुत्यन्तरैश्च साध्यस्यापि सिद्धिरविशिष्टा। अथ श्रुतिप्रच्छादनेन साध्यासिद्धिरुच्यते तर्हि हेतोरप्यसिद्धिः स्यात् इत्येवं साध्याविशेष इत्यर्थः। **आर्थिकप्रतिज्ञयेति**। आर्थिकी सर्वज्ञत्वप्रतिज्ञा। ननु निर्विशेषब्रह्मविचारं प्रतिज्ञातवतः सूत्रकारस्य सविशेषब्रह्मगतसर्वज्ञत्वद्रढीकरणं क्वोपयुज्यते? पूर्वसूत्रे विवक्षितस्य जीवो जगत्कारणमिति शङ्काव्यावर्तनस्य स्थिरीकरणे। ननु पूर्वसूत्रे ब्रह्मणः सर्वज्ञत्ववत्सर्वशक्तिकत्वमप्यर्थलब्धम्, तत्किमिति केनचिद्धेतुना न द्रढीकृतम्; तदपि ह्युक्तशङ्कानिवर्तनक्षमम्; सत्यम्, तदपि निःश्वसितश्रुत्युदाहरणेन द्रढीकृतमेव, 'अस्य महतो भूतस्य निःश्वसितमेतद्यद्ऋग्वेदो यजुर्वेदः' इत्युपक्रम्य 'अयं च लोकः परश्च लोकः सर्वाणि च भूतान्यस्यैवैतानि सर्वाणि निःश्वसितानि' इति नामरूपात्मकस्य सर्वस्यापि प्रपञ्चस्य निःश्वसितवदप्रयत्नसाध्यब्रह्मकार्यत्वोक्तेः। **अथ वेति**। ननु वेदानित्यत्वप्रसाधनं वियत्पादे संगतं न त्वत्रेति चेत्, सत्यम्; पूर्व-

महत ऋग्वेदादेः शास्त्रस्य अनेकविद्यास्थानोपबृंहितस्य प्रदीपव-

भामती ।

न केवलं जगद्योनित्वादस्य भगवतः सर्वज्ञता, शास्त्रयोनित्वादपि बोद्धव्या । शास्त्रयोनित्वस्य सर्वज्ञतासाधनत्वं समर्थयते— **महत ऋग्वेदादेः शास्त्रस्येति** । चातुर्वर्ण्यस्य चातुराश्रम्यस्य च यथायथं निषेकादिश्मशानान्तासु ब्राह्ममुहूर्तोपक्रमप्रदोषपरिसमापनीयासु नित्यनैमित्तिककाम्यकर्मपद्धतिषु च ब्रह्मतत्त्वे च शिष्याणां शासनात् शास्त्रमृग्वेदादि; अत एव महाविषयत्वात् महत् । न केवलं महाविषयत्वेनास्य महत्त्वम्, अपि त्वनेकाङ्गोपाङ्गोपकरणतयापीत्याह— **अनेकविद्यास्थानोपबृंहितस्य** । पुराणन्यायमीमांसादयो दश विद्यास्थानानि, तैः तया तया द्वारोपकृतस्य । तदनेन समस्तशिष्टजनपरिग्रहे-

कल्पतरुः ।

विश्वयोनिता । नेति शङ्कामपाकर्तुं शास्त्रयोनित्वमुच्यते ॥ अस्मिन्पक्षे श्रौतप्रतिज्ञयैव संगतिः । अभ्युच्चयार्थत्वेन हेतुपौनरुक्त्यं परिहरति— **न केवलमिति** । हेत्वन्तरसमर्थनाच्च अधिकरणान्तरत्वम् । 'अस्य महतः' इत्यादिवाक्त्यं ब्रह्मणो वेदकर्तृत्वेन सर्वज्ञत्वं न साधयत्युत साधयतीति वेदस्य सापेक्षत्वप्रसङ्गाप्रसङ्गाभ्यां संशये, पूर्वपक्ष आशङ्क्य निराकरिष्यते । सिद्धान्तोपक्रमं भाष्यं व्याचष्टे— **चातुर्वण्यस्येत्यादिना** । पुराणन्यायमीमांसाधर्मशास्त्रषडङ्गानि दश विद्यास्थानानि । तया तया

परिमलः ।

सूत्रार्थाक्षिप्तसर्वज्ञत्वदृढीकरणार्थतयेह वेदकर्तृत्वं व्यवस्थापनीयमासीत्; तेनार्थात् ब्रह्मणः सर्वकारणत्वमनुपपन्नं वेदस्य नित्यत्वादिति शङ्कानिराकरणमपि लभ्यत इत्यानुषङ्गिकार्थकथनपरोऽयं श्लोकः । आनुषङ्गिके चार्थे न पृथक् संगत्यपेक्षा । अथ वेति अस्मिन्पक्षे इति च हेतोरार्थप्रतिज्ञान्वयमनपेक्ष्य श्रौतप्रतिज्ञयैव तदन्वय इत्यभिप्रायं न भवति येन स्वतन्त्रमिदं पक्षान्तरमित्यानुषङ्गिकत्वं न स्यात्; किं त्वार्थप्रतिज्ञयैवान्वय इति यथाश्रुतभाष्यटीकानुसारेण प्रथमः पक्षः । आनुषङ्गिकार्थविषयश्रौतप्रतिज्ञयाप्यन्वयो भाष्यटीकयोर्विवक्षित इति द्वितीयोऽयं पक्षः । प्रतिज्ञयैवेत्येवकारो भिन्नक्रमः । श्रौतप्रतिज्ञयाप्यन्वयोऽस्त्येवेत्यर्थः । ननु जगद्योनित्वसिद्धे सार्वज्ञ्ये शास्त्रयोनित्वम् अभ्युच्चयार्थं हेत्वन्तरं चेत् अधिकरणान्तरत्वं न स्यादित्यत आह— **हेत्वन्तरेति** । सिद्धहेत्वन्तराभिधाने ह्येकाधिकरण्यम्, इह शास्त्रयोनित्वहेतुः प्रसाधनीय इति तदर्थमधिकरणान्तरमि-

त्सर्वार्थावद्योतिनः सर्वज्ञकल्पस्य योनिः कारणं ब्रह्म। न हीदृशस्य शास्त्रस्य ऋग्वेदादिलक्षणस्य सर्वज्ञगुणान्वितस्य सर्वज्ञादन्यतः संभवोऽस्ति। यद्यद्विस्तरार्थं शास्त्रं यस्मात्पुरुषविशेषात्संभवति, यथा व्याकरणादि पाणिन्यादेः ज्ञेयैकदेशार्थमपि, स ततोऽप्यधिकतरविज्ञान इति

भामती।

णाप्रामाण्यशङ्काप्यपाकृता। पुराणादिप्रणेतारो हि महर्षयः शिष्टाः, तैः तया तया द्वारा वेदान्व्याचक्षाणैस्तदर्थं चादरेणानुतिष्ठद्भिः परिगृहीतो वेद इति। न चायमनवबोधको नाप्यस्पष्टबोधको येनाप्रमाणं स्यादित्याह— **प्रदीपवत्सर्वार्थावद्योतिनः**। सर्वमर्थजातं सर्वथावबोधयन् नानवबोधको नाप्यस्पष्टबोधक इत्यर्थः। अत एव **सर्वज्ञकल्पस्य** सर्वज्ञसदृशस्य। सर्वज्ञस्य हि ज्ञानं सर्वविषयं शास्त्रस्याप्यभिधानं सर्वविषयमिति सादृश्यम्। तदेवमन्वयमुक्त्वा व्यतिरेकमाह— **न हीदृशस्येति**। सर्वज्ञस्य गुणः सर्वविषयता तदन्वितं शास्त्रम्, अस्यापि सर्वविषयत्वात्। उक्तमर्थं प्रमाणयति— **यद्यद्विस्तरार्थं शास्त्रं यस्मात्पुरुषविशेषात्संभवति स पुरुषविशेषः ततोऽपि शास्त्रात् अधिकतरविज्ञानः इति** योजना। अद्यत्वेऽप्यस्मदादिभिर्यत्समीचीनार्थविषयं शास्त्रं वि-

कल्पतरुः।

द्वारेति। सृष्टिवाक्यापेक्षितसर्गादिप्रपञ्चनद्वारा पुराणमद्वैतपरम्। जातिव्यक्तिलक्षणनिरूपणेन न्यायो वैदिकपदार्थशुद्ध्यर्थः। शेषोपयोगस्तु व्यक्तः। **उक्तमर्थं प्रमाणयतीति**। अत्रायं भाष्यविभागः— महत इत्यारभ्य ब्रह्मेत्यन्तेन निःश्वसितश्रुत्या विभक्तत्वहेतूपकृतया ब्रह्मकार्यं वेद इत्युक्तम्। न हीदृशस्येत्यारभ्य अस्तीत्यन्तेन व्यतिरेकमुखेण सर्वज्ञत्वप्रतिज्ञा। यद्यदित्यादिना लोके इत्यन्तेन व्याप्तिरुक्तेति। विस्त-

परिमलः।

त्यर्थः। शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्यौतिषमिति षडङ्गानि। **जातिव्यक्तीति**। उपलक्षणमेतदपेक्षितप्रमाणादिनिरूपणस्यापि। **उक्तमर्थं प्रमाणयतीति**। यद्यदित्यादिभाष्यात् प्राचीनेन संदर्भेण हेतुनिर्देशपूर्वकं प्रतिज्ञातं सार्वज्ञ्यरूपमर्थं प्रमाणवन्तं करोतीत्यर्थः। यद्यपि हेतुनिर्देशमारभ्य प्रमाणोपन्यासः प्रवृत्तः, तथापि व्याप्त्यैव हेतुः प्रामाण्यमश्नुत इति यद्यदित्यादिव्याप्तिप्रदर्शकग्रन्थ एव प्रमाणोपन्यासा-

प्रसिद्धं लोके । किमु वक्तव्यम्— अनेकशाखाभेदभिन्नस्य देवतिर्य-

भामती ।

रुच्यते तत्रास्माकं वक्तॄणां वाक्याज्ज्ञानमधिकविषयम् । न हि ते ते असाधारणधर्मा अनुभूयमाना अपि शक्या वक्तुम् । न खल्विक्षुक्षीरगुडादीनां मधुररसभेदाः शक्याः सरस्वत्याप्याख्यातुम् । विस्तरार्थमपि वाक्यं न वक्तृज्ञानेन तुल्यविषयमिति कथयितुं विस्तरग्रहणम् । **सोपनयं निगमनमाह— किमु वक्तव्यमिति** । वेदस्य यस्मात् महतो भूतात् योनेः संभवः, तस्य महतो भूतस्य ब्रह्मणो निरतिशयं सर्वज्ञत्वं सर्वशक्तित्वं च किमु वक्तव्यमिति योजना । **अनेकशाखेति** । अत्र चानेकशाखाभेदभिन्नस्येत्यादिः संभव इत्यन्त उपनयः ।

कल्पतरुः ।

रत्वं शास्त्रविशेषणं व्याप्त्यनुपयोगात् व्यर्थमित्याशङ्क्य महाविषयत्वाद्वेदस्य ब्रह्मज्ञानेन तुल्यविषयत्वभ्रमनिवृत्तिः प्रयोजनमित्याह— **विस्तरार्थमिति** । यस्मादित्यस्य तस्येत्यनेन व्यवहितेन संबन्धमाह— **वेदस्येति** । इदमिहानुमानम्— ब्रह्म

परिमलः ।

र्थत्वेनावतारितः । अथ वा ' त्रीनुदाहरणान्तान्वा यद्वोदाहरणादिकान्' इति मीमांसकमर्यादया यद्यदित्यादिरुदाहरणोपनयनिगमनोपन्यास एव प्रमाणोपन्यासः । भाष्ये ततः प्रागन्वयमुखेन हेतोर्व्यतिरेकमुखेण प्रतिज्ञायाश्च निर्देशस्तस्य स्फुटीकरणार्थः, न त्वनुमानावयवरूप इत्यभिप्रायेणोदाहरणप्रभृतिरेवोक्तार्थे प्रमाणप्रदर्शनपरत्वेनावतारितः । प्रमाणवच्छब्दात् तत्करोतीत्यर्थे णिचि णाविष्ठवद्भावात् 'विन्मतोर्लुक्' इति मतुपो लुकि च सति 'प्रमाणवन्तं करोति' इत्यर्थे प्रमाणयतीति शब्दः । यद्वा उक्तमर्थं वेदकर्तृत्वं हेतुं व्याप्त्याद्युपन्यासेन प्रमाणं करोतीत्यर्थः । अस्मिन्पक्षे प्रमाणशब्दादेव णिच् । विभक्तत्वं भिन्नत्वं कार्यत्वे हेतुरिति वियदधिकरणे 'यावद्विकारं तु—' इति सूत्रेण प्रदर्शयिष्यते । **तुल्यविषयत्वेति** । विस्तरार्थमित्यत्र विस्तरशब्दः शब्दप्रपञ्चपरः । 'प्रथने वावशब्दे' इति शब्दातिरिक्तस्यार्थस्य प्रपञ्चे घञो विधानेन शब्दप्रपञ्च एव 'ऋदोरप्' इत्यपा विस्तरशब्दनिष्पत्तेः । विस्तररूपोऽर्थो धर्मो यस्य तद्विस्तरार्थम् । वस्तुमात्रवाचिनोऽर्थशब्दस्येह धर्मरूपे वस्तुनि पर्यवसानम् । एवं च ऋग्वेदादिरूपे शास्त्रे अर्थवादादिबहुले शब्दमात्रस्यैव प्रपञ्चो नार्थस्येति विस्तरार्थविशेषणेन ज्ञापनात् वेदस्य ब्रह्मज्ञानस्य च तुल्यविषयत्वभ्रान्तिर्निवर्तिता भवति, अतोऽधिकविषयज्ञानवत्त्वसाध्यस्य न बाध इति भावः ॥

कल्पतरुः।

वेदविषयादधिकविषयज्ञम्, तत्कर्तृत्वात्, यो यद्वाक्यप्रमाणकर्ता स तद्विषयादधिकविषयज्ञः, यथा पाणिन्यादिरिति। सर्वावभासकवेदकर्तृत्वेन पक्षधर्मताबलात्सर्वज्ञत्वसिद्धि-

परिमलः।

ब्रह्मेति। ननु— वेदविषयाधिकविषयज्ञानवत्त्वमात्रं साध्यं चेत् सर्वावभासकवेदकर्तृत्वेन पक्षधर्मताबलात् सर्वज्ञतासिद्धिरित्येतन्न घटते; वेदविषयतदधिकोभयविषयज्ञानवत्त्वं साध्यं चेत् वैदिकासदर्थोपाख्यानाद्यर्थविषयभ्रान्तिज्ञानवत्त्वमपि ब्रह्मणः सिध्येत्; किं च हेतूकृतं वेदकर्तृत्वं वेदवक्तृत्वमात्रं चेदर्थानभिज्ञाध्यापके व्यभिचारः; पूर्वानुपूर्वीमनपेक्ष्य तद्वक्तृत्वं चेदसिद्धिः; सामान्यव्याप्त्युपन्यासे च वाक्यप्रमाणस्येति प्रमाणपदं व्यर्थम्, अप्रमाणवाक्यकर्तुरपि भ्रान्तस्य प्रतारकस्य च तदर्थतदधिकोभयविषयज्ञानसत्त्वात्; तस्मात्सर्वमिदमयुक्तमिति चेत्; उच्यते— ईश्वरस्य वैदिकासदर्थोपाख्यानाद्यर्थविषयज्ञानवत्त्वेऽपि तस्य ज्ञानस्य प्रमित्युपयोग्याहार्यज्ञानत्वात् न तेन भ्रान्तिमत्त्वप्रसक्तिः। न ह्यभावप्रमित्युपयोग्यधिकरणगोचरप्रतियोगितदवच्छेदकारोपवन्तः पुरुषाः धर्मार्थप्रमित्युपयोगिकपोताख्यायिकाहंसकाकोपाख्यानादिरचनामूलारोपवन्तो वाल्मीकिकृष्णद्वैपायनादयो बालारोग्यसाधनौषधपानकर्तव्यताप्रमित्युपयोगिबालप्ररोचनार्थतदभिमतफलान्तरोपन्यासमूलारोपवन्तः पित्रादयश्च भ्रान्ता इति व्यपदिश्यन्ते। किं च यत्सत्तानिश्चयरूपं न भवति न तेनान्यत्रान्यवैशिष्ट्यावगाहिनापि भ्रान्त इति व्यपदिश्यते। न हि शुक्तौ रजतत्ववैशिष्ट्यज्ञानवानिवास्य पुरोवर्तिनि रजतत्ववैशिष्ट्यावगाहिज्ञानमप्रमाणमिति तदीयभ्रान्तिविषयतया पुरोवर्तिनि रजतत्ववैशिष्ट्यं गृह्णन् भ्रान्तिज्ञोऽपि भ्रान्त उच्यते। वेदकर्तृत्वं च वक्तृन्तराधीनानुपूर्वीमनपेक्ष्य वेदवक्तृत्वमिति नार्थानभिज्ञाध्यापके व्यभिचारः। न चैवमपि घुणाक्षरन्यायेन वेदसमानानुपूर्वीकस्य वाक्यस्यार्थान्तरविवक्षया प्रयोक्तरि व्यभिचारः, सकलवेदवक्तृत्वस्य विवक्षितत्वात्। तावच्च सर्गादौ सर्वान् वेदानध्यापितेष्वीश्वरवत्सार्वज्ञ्यरहितेषु मन्वादिषु व्यभिचारीति तद्वारणेन पूर्वोक्तविशेषणमप्यर्थवत्। उदाहरणवाक्ये प्रमाणपदं यो यस्य वाक्यस्यार्थविवक्षया प्रयोक्तेति विवक्षारूपविशेषणलाभार्थम्। तच्च विशेषणमर्थानभिज्ञाध्यापकेषु निरभिप्रायवाक्यप्रयोक्तृषून्मादग्रस्तादिषु च व्यभिचारवारणार्थम्। सर्गादौ वेदान् प्रवर्तयत ईश्वरस्यापि तत्तदर्थविवक्षा अस्तीति सामान्यव्याप्तावुपात्तस्य व्याप्यस्य पक्षानुगतिः। उक्तं हि ग्रहाधिकरणवार्त्तिके— 'शब्दब्रह्मेति यच्चेदं शास्त्रं वेदाख्यमुच्यते। तदप्यधिष्ठितं सर्वमेकेन परमात्मना॥ तथर्ग्वेदादयो देहाः प्रोक्ता येऽपि पृथक्पृथक्।

कल्पतरुः ।

रिति । यद्वा 'अयं घटः एतदन्यासर्ववित्कर्तृकत्वानधिकरणैकतदन्यावेदत्वानधिकरण-

परिमलः ।

भोग्यत्वेनात्मनां तेऽपि चैतन्यानुगताः सदा ॥ तेषामन्तर्गतेच्छानां वाक्यार्थप्रतिपादने । विवक्षा चाविवक्षा च शायते शब्दशक्तितः' इति । ननु सकलवेदकर्तृत्वहेतूकरणबलात्सकलवेदार्थविषयत्वमीश्वरज्ञानस्य सिध्यतीति तावतैव तस्य सार्वज्ञ्यसिद्धेरधिकविषयत्वं विशेषणान्तरं किमर्थम् ? न च तावता तस्य सार्वज्ञ्यं न सिध्यति, अवेदप्रतिपादिताद्यतनपुरुषपाणिगतवराटकसंख्यादिज्ञानवत्त्वस्य तेनासिद्धेः इति वाच्यम्, अधिकविषयत्वविशेषणेनापि तदसिद्धेः ; टीकायां हि इक्षुक्षीरादिमाधुर्यविशेषवद्वेदेनापि यदाहृत्य बोधयितुं न शक्यं तादृग्विशेषविषयज्ञानवत्त्वस्याप्यधिकविशेषणेन सिद्धिरिति तत्प्रयोजनमुक्तम् ; युक्तं चैतत् ; यथेक्ष्वादिमाधुर्यं स्वयमनुभूय शब्दं प्रयुञ्जानस्य यादृशं तद्विशेषज्ञानं तादृशं स शब्दो नान्यस्य जनयितुमीष्टे ; तथा मानुषादिब्राह्मपर्यन्त आनन्द उत्तरोत्तरमुत्कृष्यते ब्रह्मानन्दस्तु निरतिशय इति वैदिकशब्दः शतकृत्वः श्रुतोऽपि तमानन्दं साक्षात्कुर्वत ईश्वरस्यानुभवेन सदृशं तन्निरतिशयत्वादिरूपविशेषानुभवमन्यस्य जनयितुं न शक्नोत्येव ; एवंविधश्रुत्यबोध्यविशेषविषयत्वेन वेदरचनामूलवेदार्थाधिकवर्णावल्यादिविषयत्वेन चार्थान्तरादिति चेत् ; उच्यते— सकलवेदार्थाभिज्ञत्वमेवेह साध्यम्, पक्षधर्मताबलात्सार्वज्ञ्यसिद्धयुक्तिरपि तन्मात्राभिप्राया । न च तन्मात्रं साध्यते चेत् व्याप्तिबलादेव तत्सिध्यतीति पक्षधर्मताबलोक्तिरधिकसार्वज्ञ्यसिद्ध्यर्था स्यादिति वाच्यम्, सामान्यव्याप्तिबलात् स्वप्रयुक्तवाक्यार्थाभिज्ञत्वमात्रस्यैव सिद्धिरिति विशिष्य सकलवेदार्थाभिज्ञत्वसिद्धेः सकलवेदकर्तृत्वहेतुपक्षधर्मताबललभ्यत्वात् । वेदार्थाधिकाद्यतनवृत्तान्ताद्यभिज्ञत्वसिद्धिस्तु स्वतः सर्ववेदार्थगोचरमीश्वरज्ञानमन्यदपि सर्वं गोचरयेदिति न्यायसाम्यात् । अधिकविषयत्वस्य साध्यानुप्रवेशनं तु पाणिनीयादिदृष्ट्याप्तिबलादधिकविषयत्वमपि सेद्धुमर्हति किमुत वेदार्थविषयत्वमिति कैमुतिकन्यायेन सिषाधयिषितसाध्यसिद्धिदार्ढ्यार्थमनुमानप्रवृत्त्यनन्तरभाविन्यायलभ्यार्थानुवादरूपं वा ॥

एवं सूत्रभाष्यसूचितं सर्वज्ञत्वपर्यवसाय्यनुमानं प्रदर्श्य स्वयं साक्षात्तत्साधकमनुमानं दर्शयति— **अयं घट इति** । एतत् पदद्वयं पक्षीकृतघटपरम् । **एतदन्यश्चासावसर्ववित्कर्तृकश्च** तस्य भावस्तत्त्वं तदनधिकरणमित्येकं सकर्तृकस्य विशेषणम् । **एतदन्यश्चासाववेदश्च** तस्य भावस्तत्त्वं तदनधिकरणमिति द्वितीयं तस्य विशेषणम् ।

अनुष्यवर्णाश्रमादिप्रविभागहेतोः ऋग्वेदाद्याख्यस्य सर्वज्ञानाकरस्य अप्रयत्नेनैव लीलान्यायेन पुरुषनिःश्वासवत् यस्मान्महतो भूतात् योनेः

भामती।

तस्येत्यादि सर्वशक्तित्वं चेत्यन्तं निगमनम्। **अप्रयत्नेनेति**। ईषत्प्रयत्नेन यथा 'अलवणा यवागूः' इति। देवर्षयो हि महापरिश्रमेणापि यत्राशक्ताः तदीयमीष-

कल्पतरुः।

सकर्तृकान्यघटत्वात् घटान्तरवदिति। ईक्षणादिप्रयत्नापेक्षणादप्रयत्नशब्दः सौकर्यापेक्ष इत्याह— ईषदिति। अधुना पूर्वपक्ष आशङ्क्य निराक्रियते। कर्तृमत्त्वेन वेदस्य

परिमलः।

एवंभूतात्सकर्तृकादन्यत्वस्य साध्यस्य दृष्टान्ते प्रसिद्धिः पक्षादन्यत्वविषया। पक्षीकृतो हि घटः सकर्तृकः एतदन्यावेदत्वानधिकरणं च तत्रावेदत्वसत्त्वेऽप्येतदन्यत्वविशिष्टावेदत्वाभावात्। एतदन्यासर्ववित्कर्तृकत्वानधिकरणं च तत्रासर्ववित्कुलालकर्तृकत्वसत्त्वेऽप्येतदन्यत्वविशिष्टासर्ववित्कर्तृकत्वाभावात्। पक्षे तु वेदादन्यत्वमादाय साध्यं सिध्यद्वेदस्य सर्ववित्कर्तृकत्वमन्तर्भाव्य पर्यवस्यति। पक्षस्य यस्मात्सकर्तृकादन्यत्वं वाच्यं तस्यैतदन्यावेदत्वानधिकरणत्वं ह्यवेदत्वरूपविशेष्याभावेनोपपादनीयं न त्वेतदन्यत्वरूपविशेषणाभावेन पक्षगतान्योन्याभावप्रतियोगिनि पक्षान्यत्वसत्त्वेन तदभावासंभवात्। एवमेतदन्यासर्ववित्कर्तृकत्वानधिकरणत्वमप्यसर्ववित्कर्तृकत्वरूपस्य विशेष्यस्याभावेनोपपादनीयम्, पूर्ववत् तत्र विशेषणाभावासंभवात्। एवं च यद्यपि द्वितीयविशेषणलभ्ये वेदे पक्षनिष्ठान्योन्याभावप्रतियोगिनि प्रथमविशेषणलभ्यमसर्ववित्कर्तृकत्वानधिकरणत्वम् अकर्तृकत्वेनापि सेद्धुमर्हति, तथापि सकर्तृकविशेष्यविरोधेन तथासिद्धेर्निरोधात् वेदस्य सर्ववित्कर्तृकत्वसिद्धिः। अत्र सकर्तृकात् पटादन्यत्वेन सिद्धसाधनवारणाय द्वितीयं विशेषणम्। तेन वेदादेव सकर्तृकादन्यत्वसिद्धावपि वेदस्यासर्ववित्कर्तृकत्वेनार्थान्तरं स्यादिति तद्वारणाय प्रथमविशेषणम्। अकर्तृकत्वेनार्थान्तरवारणाय विशेष्यम्। विशेषणद्वयेऽप्येतदन्यत्वं प्रतियोगिविशेषणं दृष्टान्ते साध्यप्रसिद्ध्यर्थम्। अन्यथा पक्षीकृतघटस्य असर्ववित्कर्तृकत्वाधिकरणत्वादवेदत्वाधिकरणत्वाच्च ततोऽन्यत्वमादाय दृष्टान्ते साध्यप्रसिद्धिर्न स्यात्। न च वेदान्यत्वमादायैव तत्र साध्यप्रसिद्धिः शङ्कनीया, पक्षे साध्यसिद्धेः प्राक् वेदे असर्ववित्कर्तृकत्वानधिकरणसकर्तृकत्वसंप्रतिपत्त्यभावात्॥

संभवः— 'अस्य महतो भूतस्य निःश्वसितमेतत् यदृग्वेदः' इत्यादिश्रुतेः— तस्य महतो भूतस्य निरतिशयं सर्वज्ञत्वं सर्वशक्तिमत्वं चेति ॥

भामती ।

त्प्रयत्नेन लीलयैव करोतीति निरतिशयमस्य सर्वज्ञत्वं सर्वशक्तित्वं चोक्तं भवति। अप्रयत्नेनास्य वेदकर्तृत्वे श्रुतिरुक्ता 'अस्य महतो भूतस्य' इति । येऽपि तावत् वर्णानां नित्यत्वमास्थिषत तैरपि पदवाक्यादीनामनित्यत्वमभ्युपेयम् । आनुपूर्वीभेदवन्तो हि वर्णाः पदम् । पदानि चानुपूर्वीभेदवन्ति वाक्यम् । व्यक्तिधर्मश्चानुपूर्वी न वर्णधर्मः, वर्णानां नित्यानां विभूनां च कालतो देशतो वा पौर्वापर्यायोगात् । व्यक्तिश्चानित्येति कथं तदुपगृहीतानां वर्णानां नित्यानामपि पदता नित्या । पदानित्यतया च वाक्यादीनामप्यनित्यता व्याख्याता । तस्मान्नृत्तानुकरणवत् पदाद्यनुकरणमपि । यथा हि यादृशं गात्रचलनादि नर्तकः करोति तादृशमेव शिक्ष्यमाणानुकरोति नर्तकी, न तु तदेव व्यनक्ति । एवं यादृशीमानुपूर्वीं वैदिकानां वर्णपदादीनां करोत्यध्यापयिता तादृशीमेवानुकरोति माणवकः न तु तामेवोच्चारयति, आचार्यव्यक्तिभ्यो माणवकव्यक्तीनामन्यत्वात् । तस्मान्नित्यानित्यवर्णवादिनां न लौकिकवैदिकपदवाक्यादिपौरुषेयत्वे विवादः, केवलं वेदवाक्येषु पुरुषस्वातन्त्र्यास्वातन्त्र्ये विप्रतिपत्तिः । यथाहुः— 'यत्नतः

कल्पतरुः ।

सापेक्षत्वं वदन् प्रष्टव्यः—सापेक्षता किं पुरुषनिर्वर्त्यत्वमात्रात्, अभिनवानुपूर्वीविरचनाद्वा, मानान्तरोपलब्धार्थविषयवचनरचनाद्वा, कतिपयकालविरतसर्वसंप्रदायस्य वेदस्यैकपुरुषान्निःसरणाद्वा? नाद्यः, तवापि संमतत्वात् इत्याह— येऽपि तावदिति । व्यक्तिः अभिव्यक्तिः । द्वितीये क्रमान्यत्वमात्रमभिनवत्वं विसदृशक्रमत्वं वा । आद्यो भवद्भिरप्यङ्गीकृतः । चरमस्तु नास्माभिरपि स्वीकृत इत्याह— तस्मान्नृत्तेति ।

परिमलः ।

सापेक्षत्वं वदन्निति । एवं च सापेक्षत्वेन कृत्स्नवेदाप्रामाण्याद्वरं निःश्वसितादिश्रुतिमात्रस्योपचरितार्थत्वम् । तथा सति 'वाचा विरूप नित्यया' इत्यादिश्रुतिरप्यनुग्रहीष्यत इति पूर्वपक्षपर्यवसाने सति सर्वज्ञत्वहेत्वन्तराक्षेपतत्समाधानार्थं प्रवृत्तमेवेदमधिकरणं जगत्कारणत्वाक्षेपतत्समाधानपर्यन्तमपि फलतो भवतीति 'अथ वा वेदनित्यत्वात्—' इत्युपन्यस्ताद्वितीयपक्षपर्यन्तमेव भाष्यटीकयोरपि विवक्षितं सिध्यतीति द्रष्टव्यम् ।

भामती।

प्रतिषेध्या नः पुरुषाणां स्वतन्त्रता' इति। तत्र सृष्टिप्रलयमनिच्छन्तो जैमिनीया वेदाध्ययनं प्रत्यस्मादृशगुरुशिष्यपरम्परामविच्छिन्नामनादिमाचक्षते। वैयासिकं तु मतमनुवर्तमानाः श्रुतिस्मृतीतिहासादिसिद्धसृष्टिप्रलयानुसारेण अनाद्यविद्योपधानलब्धसर्वशक्तिसर्वज्ञानस्यापि परमात्मनो नित्यस्य वेदानां योनेरपि न तेषु स्वातन्त्र्यम्, पूर्वपूर्वसर्गानुसारेण तादृशानुपूर्वीविरचनात्। यथा हि यागादिब्रह्महत्यादयोऽर्थानर्थहेतवो ब्रह्मविवर्ता अपि न सर्गान्तरे विपरियन्ति। न हि जातु क्वचित्सर्गे ब्रह्महत्यार्थहेतुरनर्थहेतुश्चाश्वमेधो भवति, अग्निर्वा छेदयति, आपो वा दहन्ति, तद्वत्। यथात्र सर्गे नियतानुपूर्व्यं वेदाध्ययनमभ्युदयनिःश्रेयसहेतुः अन्यथा तदेव वाग्वज्रतयानर्थहेतुः एवं सर्गान्तरेष्वपीति तदनुरोधात् सर्वज्ञोऽपि सर्वशक्तिरपि पूर्वपूर्वसर्गानुसारेण वेदान्विरचयन्न स्वतन्त्रः। पुरुषास्वातन्त्र्यमात्रं चापौरुषेयत्वं रोचयन्ते जैमिनीया अपि। तच्चास्माकमपि समानम्, अन्यत्राभिनिवेशात्। न चैकस्य प्रतिभाने अनाश्वास

कल्पतरुः।

तृतीयस्त्वनभ्युपगमनिरस्त इत्याह— वैयासिकं त्विति। अनुवर्तमाना आचक्षते इत्यनुषङ्गः। ननु विवर्तत्वे वेदानां यादृच्छिकत्वापातान्न क्रमनियमः स्यात्, तत्राह— यथा हीति। सर्वज्ञस्य सर्वशक्तेर्ब्रह्मणो नोपाध्यायवत् क्रमानुरोधो युक्त इति। तत्राह— यथात्रेति। 'मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह। स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात्' इति श्रूयते॥

चतुर्थं निराकरोति— न चैकस्येति। सर्वदा संप्रदायाविच्छेदमिच्छद्भि-

परिमलः।

स वाग्वज्र इति। स स्वरवर्णहीनः प्रयुक्तो मन्त्रः वज्रवद्धिंसको यजमानं हिनस्ति। तत्र पुराकल्पसिद्धमुदाहरणम्— यथेन्द्रशत्रुरिति। त्वष्टुः पुत्रो विश्वरूपः शक्रेण हतः; स त्वष्टा इन्द्रस्य हन्तारं पुत्रं लिप्सुः तदर्थं सोमयागमनुतिष्ठन् भागालिप्सुमपि इन्द्रं नाजुहाव। इन्द्रः स्वयमेवागत्य प्रसह्य सोमरसं पपौ। त्वष्टा सोमपात्रे अवशिष्टं सोमरसमिन्द्रस्य शातयिता पुत्रो भूयादित्याशंसमानः 'स्वाहेन्द्रशत्रुर्वर्धस्व' इति मन्त्रेण जुहाव। तदा 'इन्द्रशत्रुः' इति शब्दस्तत्पुरुषस्वरं विहाय बहुव्रीहिस्वरेण प्रयुक्तः। तेन स्वरापराधेन तत्रोत्पन्नस्य वृत्रासुरस्य शक्र एव शातयिताभूदिति त्वष्टा हतपुत्र इत्या-

अथ वा यथोक्तमृग्वेदादिशास्त्रं योनिः कारणं प्रमाणमस्य ब्रह्मणो यथावत्स्वरूपाधिगमे। शास्त्रादेव प्रमाणात् जगतो जन्मादिकारणं ब्रह्माधिगम्यत इत्यभिप्रायः। शास्त्रमुदाहृतं पूर्वसूत्रे— 'यतो वा इमानि भूतानि जायन्ते' इत्यादि। किमर्थं तर्हीदं सूत्रम्, यावता पूर्वसूत्रेणैव एवंजातीयकं शास्त्रमुदाहरता शास्त्रयोनित्वं ब्रह्मणो दर्शितम्? उच्यते— तत्र सूत्राक्षरेण स्पष्टं शास्त्रस्यानुपादानाज्जन्मादिसूत्रेण केव-

---

भामती।

इति युक्तम्। न हि बहूनामप्यज्ञानां विज्ञानां वा आशयदोषवतां प्रतिभाने युक्त आश्वासः। तत्त्वज्ञानवतस्त्वपास्तसमस्तदोषस्यैकस्यापि प्रतिभाने युक्त एवाश्वासः। सर्गादिभुवां च प्रजापतिदेवर्षीणां धर्मज्ञानवैराग्यैश्वर्यसंपन्नानामुपपद्यते तत्स्वरूपावधारणम्, तत्प्रत्ययेन चार्वाचीनानामपि तत्र संप्रत्यय इत्युपपन्नं ब्रह्मणः शास्त्रयोनित्वम्, शास्त्रस्य चापौरुषेयत्वम्, प्रामाण्यं चेति। इति प्रथमवर्णकम्॥

वर्णकान्तरमारभते— अथ वेति। पूर्वेणाधिकरणेन ब्रह्मस्वरूपलक्षणासंभवाशङ्कां व्युदस्य लक्षणसंभव उक्तः। तस्यैव तु लक्षणस्यानेन अनुमानत्वाशङ्कामपाकृत्य आगमोपदर्शनेन ब्रह्मणि शास्त्रं प्रमाणमुक्तम्। अक्षरार्थस्तु अतिरोहितः॥

कल्पतरुः।

रपि संप्रदायप्रवर्तकेष्वाश्वास आस्थेयः, स वरमेकस्मिन्नेव ब्रह्मण्यवगतसार्वज्ञ्ये कृत इति भावः। ननु न वयमीश्वरं पश्यामः, कथं तत्कर्तृके वेदे विश्वासस्तत्राह— सर्गादिभुवां चेति॥

परिमलः।

दितैत्तिरीयश्रुत्यर्थोऽत्र निबद्धः। अवगतसार्वज्ञ्ये इति। ननु सार्वज्ञ्यसाधकवेदकर्तृत्वहेतुसिद्धिपरिपन्थिसापेक्षत्वशङ्कानिराकरणप्रस्तावे तदुपयोगितया सार्वज्ञ्यावगतिः कथं सिद्धवदुपन्यस्यते? अन्योन्याश्रयो हि तदा स्यात्। नैष दोषः, सार्वज्ञ्याभ्युपगमहेतुमहिमविशेषावगतेर्विवक्षितत्वात्। ननु तथाभूतमहिमविशेषावगतिर्वा कुतः, न हि वयमीश्वरं पश्याम इत्याशङ्क्योत्तरत्वेनोत्तरग्रन्थमवतारयति— नन्विति॥

लमनुमानमुपन्यस्तमित्याशङ्क्येत; तामाशङ्कां निवर्तयितुमिदं सूत्रं प्रवर्तते— 'शास्त्रयोनित्वात्' इति ॥

कथं पुनर्ब्रह्मणः शास्त्रप्रमाणकत्वमुच्यते, यावता 'आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानाम्' इति क्रियापरत्वं शास्त्रस्य प्रदर्शि-

---

भामती।

शास्त्रप्रमाणकत्वमुक्तं ब्रह्मणः प्रतिज्ञामात्रेण, तदनेन सूत्रेण प्रतिपादनीयमित्युत्सूत्रं पूर्वपक्षमारचयति भाष्यकारः— **कथं पुनरिति**। किमाक्षेपे। शुद्धबुद्धोदासीनस्वभावतया उपेक्षणीयं ब्रह्म भूतमभिदधतां वेदान्तानामपुरुषार्थोपदेशिनामप्रयोजनत्वापत्तेः, भूतार्थत्वेन च प्रत्यक्षादिभिः समानविषयतया लौकिकवाक्यवत्तदर्थानुवादकत्वेनाप्रामाण्यप्रसङ्गात्। न खलु लौकिकानि वाक्यानि प्रमाणान्तरविषयमर्थमवबोधयन्ति स्वतःप्रमाणम्, एवं वेदान्ता अपीत्यनपेक्षत्वलक्षणं प्रामाण्यमेषां व्याहन्येत। न च तैरप्रमाणैर्भवितुं युक्तम्। न चाप्रयोजनैः, स्वाध्यायाध्ययनविध्यापादितप्रयोजनवत्त्वनियमात्। तस्मात्तत्तद्विहितकर्मापेक्षितकर्तृदेवतादिप्रतिपादनपरत्वेनैव क्रियार्थत्वम्। यदि त्वसंनिधानात्तत्परत्वं न रोचयन्ते, ततः संनिहितोपासनादिक्रियापरत्वं वा वेदान्तानाम्।

कल्पतरुः।

वेदान्ता ब्रह्मणि प्रमाणं न वेति सिद्धवस्तुबोधात्फलभावाभावाभ्याम्, सिद्धं रूपादिहीनं वस्तु बोधयतो वाक्यस्य मानान्तरसापेक्षत्वानपेक्षत्वाभ्यां वा संशये, पूर्वाधिकरणद्वितीयवर्णकेनाक्षेपिकीं संगतिम् उक्त्वा पूर्वपक्षभाष्यं व्याचष्टे— **किमाक्षेप** इत्यादिना। कथमिति थमुप्रत्ययान्तः किंशब्द आक्षेपे। जैमिनिसूत्रोपन्यासो न

परिमलः।

जैमिनीति। जैमिनिना हि 'आम्नायस्य क्रियार्थत्वात्–' इत्यादिसूत्रेण कृत्स्नस्याप्याम्नायस्य प्रयोजनपर्यवसानाय क्रियार्थत्वावश्यंभावादक्रियार्थानामानर्थक्यं निष्प्रयोजनत्वं तस्मादक्रियार्थमर्थवादजातमनित्यमप्रमाणमुच्यत इति पूर्वपक्षं कृत्वा, 'विधिना त्वेकवाक्यत्वात्स्तुत्यर्थेन विधीनां स्युः' इति सूत्रेण विधिवाक्येनैकवाक्यत्वादर्थवादाः विधीनां स्तुतिरूपेणार्थेन सप्रयोजनाः स्युरिति अक्रियार्थतायामानर्थक्यं पूर्वपक्ष्युक्तमङ्गीकृत्यैवार्थवादानां विध्येकवाक्यतया प्रामाण्यमुपपादितम्। इदं तु जैमि-

तम् । अतो वेदान्तानामानर्थक्यम्, अक्रियार्थत्वात्; कर्तृदेवतादिप्रकाशनार्थत्वेन वा क्रियाविधिशेषत्वम्, उपासनादिक्रियान्तरविधानार्थत्वं वा । न हि परिनिष्ठितवस्तुस्वरूपप्रतिपादनं संभवति; प्रत्यक्षादिविषयत्वात्परिनिष्ठितवस्तुनः, तत्प्रतिपादने च हेयोपादेयरहिते पुरुषार्थाभावात् । अत एव 'सोऽरोदीत्' इत्येवमादीनामानर्थक्यं मा भूदिति 'विधिना त्वेकवाक्यत्वात्स्तुत्यर्थेन विधीनां स्युः' इति स्तावकत्वेनार्थवत्त्वमुक्तम् । मन्त्राणां च 'इषे त्वा' इत्यादीनां क्रियातत्साधनाभिधायकत्वेन कर्मसमवायित्वमुक्तम् । न क्वचिदपि वेदवाक्यानां

भामती ।

एवं हि प्रत्यक्षाद्यनधिगतगोचरत्वेनानपेक्षतया प्रामाण्यं च प्रयोजनवत्त्वं च सिध्यतीति तात्पर्यार्थः । पारमर्षसूत्रोपन्यासस्तु पूर्वपक्षदार्ढ्याय । आनर्थक्यं च अप्रयोजनवत्त्वम्, सापेक्षतया प्रमानुत्पादकत्वं चानुवादकत्वादिति । अतः इत्यादि वान्तं ग्रहणकवाक्यम् । अस्य विभागभाष्यं न हि इत्यादि उपपन्ना वा इत्यन्तम् । स्यादेतत् । अक्रियार्थत्वेऽपि ब्रह्मस्वरूपविधिपरा वेदान्ता भविष्यन्ति, तथा च 'विधिना त्वेकवाक्यत्वात्—' इति राद्धान्तसूत्रमनुग्रहीष्यते ।

कल्पतरुः ।

व्युत्थितसिद्धान्तिविस्रम्भाय अपि तु दृढपूर्वपक्षनिरासार्थं सिद्धान्तावश्यारम्भायेत्याह— पारमर्षेति । अभिधेयाभावोऽनुभवविरोधान्न युक्तो वक्तुमित्याह— आनर्थक्यं चेति । भाष्ये पौनरुक्त्यमाशङ्क्य संग्रहविवरणत्वमाह— अत इत्यादीति । वान्तमिति । उपासनादिक्रियान्तरविधानार्थत्वं वा इत्येतदन्तमित्यर्थः । ननु किमिति वेदान्तानामर्थवादवद्विधिपदैकवाक्यता मन्त्रवत्पार्थगर्थ्यमस्त्वित्याशङ्क्य तर्हि तद्वद्विधिभिर्वाक्यैकवाक्यता स्यादित्याह भाष्यकारः 'मन्त्राणां च' इति ॥

'इषे त्वा' इत्यत्र 'छिनद्मि' इत्यध्याहाराच्छाखाच्छेदः क्रिया भाति, क्वचिच्च 'अग्निर्मूर्धा' इत्यादौ तत्साधनं देवतादीति। मन्त्राश्च श्रुत्यादिभिः क्रतौ विनियुक्ताः; ते किमुच्चारणमात्रेणादृष्टं कुर्वन्तः क्रतावुपकुर्वन्त्युत दृष्टेनैवार्थप्रकाशनेनेति संदेहः । तत्र न तावत् दृष्टार्थत्वमेव मन्त्राणां शक्यं वक्तुम्, उपायान्तरेणापि मन्त्रार्थस्य स्वा-

विधिसंस्पर्शमन्तरेणार्थवत्ता दृष्टा उपपन्ना वा। न च परिनिष्ठिते वस्तु-

भामती।

न खल्वप्रवृत्तप्रवर्तनमेव विधिः, उत्पत्तिविधेरज्ञातज्ञापनार्थत्वात्। वेदान्तानां चाज्ञातं ब्रह्म ज्ञापयतां तथाभावादित्यत आह— न च परिनिष्ठित इति। अनागतोत्पाद्यभावविषय एव हि सर्वो विधिरुपेयः, अधिकारविनियोगप्रयोगो-

कल्पतरुः।

ध्यायकालावगतस्य चिन्तादिना प्रयोगसमये स्मृतिसंभवात्तावन्मात्रार्थत्वे च मन्त्राणां नित्यवदाम्नानवैयर्थ्यात्। अथ तु मन्त्रैरेवार्थप्रत्यायननियमादृष्टं कल्प्येत, तदुच्चारणादेव कल्प्यतां तस्य पुंव्यापारगोचरत्वात्स्वव्यापारे च पुरुषस्य नियोगात् तत्र च फलाकाङ्क्षणादिति प्रापप्य प्रमाणलक्षणे राद्धान्तितम्— 'यस्य दृष्टं न लभ्येत तस्यादृष्टप्रकल्पना। लभ्यतेऽर्थस्मृतिर्दृष्टा मन्त्रोच्चारणतस्त्विह। अर्थस्मृतिः प्रयोगार्था प्रयोगाच्च फलोदयः। इति दृष्टार्थसंपत्तौ नादृष्टमिह कल्प्यते'। यस्तु 'मन्त्रैरेव स्मर्तव्यम्' इति नियमः तस्य न किंचिदृष्टमस्तीत्यदृष्टं कल्प्यते। तस्मादृष्टादृष्टार्था मन्त्रा इति। **उत्पत्तिविधेरिति**। अधिकारविधितः प्रवृत्तिलाभादुत्पत्तिविधिरज्ञातकर्मस्वरूपबोधपर इत्यर्थः। **अनागतेति**। भावो भावना तद्विषयः सर्वो विधिः। यतः स उत्पाद्यः। उत्पाद्यत्वे हेतुरनागतत्वम्। अधिकारः फलसंबन्धबोधनम्। विनियोगोऽत्र क्रियायाः फलशेषत्वज्ञापनम्। प्रयोगः अनुष्ठापनम्। कर्मस्वरूपज्ञापनमुत्पत्तिः। फलसंबन्धः क्रियाया न शेषत्वमन्तरेण, तच्च नानुष्ठानं विना,

परिमलः।

न्यभिमतम् अक्रियार्थानामानर्थक्यं न्यायविरुद्धमप्रामाणिकमिति सिद्धान्ते दूष्यमेव। अतो दूष्यसूत्रोपन्यासः सिद्धान्तिनस्तस्मिन्नर्थे विश्वासार्हो न भवतीत्यर्थः। ननूपायान्तरेणापि प्रयोगसमये स्मृतिर्भवतु मन्त्रेणापि कदाचित् स्मृतिरुपपद्यत इति तदर्थं मन्त्राम्नानं स्यादित्याशङ्क्याह—**तावन्मात्रार्थत्वे चेति। भाव इति**। भावयतेर्घञि 'णेरनिटि' इति णिलोपे भावशब्दो भावनावाची स्यात्। भवतेर्घञि तु भावशब्दो भवनवाची स्यात्। **फलसंबन्धबोधनमिति**। फलपुरुषसंबन्धबोधनमित्यर्थः। अन्यगामिनि फले प्रेरणायोगात् प्रवर्तकस्वभावो विधिः फलस्य पुरुषसंबन्धं गमयतीत्येवमधिकारो विध्यधीनः। **विनियोगोऽत्रेति**। क्रियायाः फलशेषत्वस्येवाङ्गानां प्रधानशेषत्वस्यापि बोधनं विनियोग एव स्थालीपुलाकन्यायेन त्वेकोपादानम्। **फलसंबन्ध इति**। फलस्य कर्तृपुरुषगामित्वं तेनानुष्ठेयायाः क्रियायाः फलकरणत्वरूपं विनियोग-

स्वरूपे विधिः संभवति, क्रियाविषयत्वाद्विधेः । तस्मात्कर्मापेक्षितकर्तृदेवतादिस्वरूपप्रकाशनेन क्रियाविधिशेषत्वं वेदान्तानाम् । अथ प्रकरणान्तरभयान्नैतदभ्युपगम्यते, तथापि स्ववाक्यगतोपासनादिकर्मपरत्वम् ।

भामती ।

त्पत्तिरूपाणां परस्परमविनाभावात्, सिद्धे च तेषामसंभवात् । तद्वाक्यानां त्वैदंपर्यं भिद्यते । यथा 'अग्निहोत्रं जुहुयात्स्वर्गकामः' इत्यादिभ्योऽधिकारविनियोगप्रयोगाणां प्रतिलम्भात्, 'अग्निहोत्रं जुहोति' इत्युत्पत्तिमात्रपरं वाक्यम् । न त्वत्र विनियोगादयः सन्ति, सन्तोऽप्यन्यतो लब्धत्वात्केवलमविवक्षिताः । तस्मात् भावनाविषयो विधिर्न सिद्धे वस्तुनि भवितुमर्हतीति । उपसंहरति— **तस्मादिति** । अत्रारुचिकारणमुक्त्वा पक्षान्तरमुपसंक्रमते— **अथेति** ।

कल्पतरुः ।

अनुष्ठानं च नाज्ञाते इत्यविनाभावः । सिद्धं चेत्पुंव्यापारानपेक्षं फलमारभेत सदा अरभेतेति नाधिकारादिसंभव इत्यर्थः । सर्वेषामविनाभावे सर्वत्र चातूरूप्यमस्तीति कथमवान्तरभेदः ? तत्राह— **तद्वाक्यानां त्विति** । उदाहरति— **यथेति** । सर्वविधिषूत्पत्त्यादयः प्रतीयन्ते 'अग्निहोत्रं जुहुयात्' इत्यत्राप्यग्निहोत्रेणेष्टं भावयेदित्यर्थः न त्वग्निहोत्रस्य भाव्यत्वम्, अफलत्वात् । न चाग्निहोत्रस्वरूपसत्ता बोध्या । अभूद्भवति भविष्यतीत्यापत्तौ विध्युत्खातापातात् । तस्मादधिकारविधितः प्राप्तविनियोगाद्यनुवादेनोत्पत्तिविधिः स्वरूपपरो भवति । ब्रह्मणि तु भावनाभावादनुवाद्यस्यापि विनियोगादेरभावान्नोत्पत्तिविधिरित्याह— **तस्मादिति** । विधिप-

परिमलः ।

मन्तरेण न भवतीत्यर्थः । उत्पत्तिविधिना अधिकारादिप्रतीतिमुदाहरति— **अग्निहोत्रमिति** । उत्पत्तिविधेः अग्निहोत्रस्वरूपज्ञापनमात्रपरत्वे किमग्निहोत्रं कर्तव्यमिति तदर्थ उताग्निहोत्रमभूदित्यादिः ? नाद्यः, क्लेशात्मके कर्मणि स्वतः प्रेरणानुपपत्तेः । न द्वितीयः, विधिविरोधात् ? कालत्रयानवमृष्टे विधिप्रवृत्तेरित्यर्थः । **तस्मादधिकारविधित इति** । 'अग्निहोत्रं जुहुयात् स्वर्गकामः' इत्यधिकारविधिरग्निहोत्रनामकेन होमेन स्वर्गं भावयेत् इत्येवमर्थकः । फलस्यान्यगामित्वे तदर्थं प्रेरणानुपपत्तेस्तस्य कर्तृसंबन्धं बोधयन्नेव तेनानुष्ठातुं शक्याया होमक्रियायाः फलशेषत्वरूपं विनियोगमपि बोधयतीत्येवमधिकारविधिसिद्धविनियोगांशे अनुवादरूपोऽयमुत्पत्तिविधिः कर्मस्वरूप-

तस्मान्न ब्रह्मणः शास्त्रयोनित्वमिति प्राप्ते, उच्यते—

तत्तु समन्वयात् ॥ ४ ॥

तु-शब्दः पूर्वपक्षव्यावृत्त्यर्थः। तद्ब्रह्म सर्वज्ञं सर्वशक्ति जगदुत्पत्तिस्थितिलयकारणं वेदान्तशास्त्रादवगम्यते। कथम्? समन्वयात्। सर्वेषु हि वेदान्तेषु वाक्यानि तात्पर्येणैतस्यार्थस्य प्रतिपादकत्वेन समनु-

---

भामती।

एवं च सति उक्तरूपे ब्रह्मणि शब्दस्यातात्पर्यात् प्रमाणान्तरेण यादृशमस्य रूपं व्यवस्थाप्यते न तच्छब्देन विरुध्यते, तस्योपासनापरत्वात्, समारोपेण चोपासनाया उपपत्तेरिति। प्रकृतमुपसंहरति— तस्मान्नेति। सूत्रेण सिद्धान्तयति— उच्यत इति ॥

तदेतद्व्याचष्टे— तुशब्द इति। तदित्युत्तरपक्षप्रतिज्ञां विभजते— तद्ब्रह्मेति। पूर्वपक्षी कर्कशाशयः पृच्छति— कथमिति। कुतः प्रकारादित्यर्थः। सिद्धान्ती स्वपक्षे हेतुं प्रकारभेदमाह— समन्वयात्। सम्यगन्वयः समन्वयः तस्मात्। एतदेव विभजते— सर्वेषु हि वेदान्तेष्विति। वेदान्तानामैका-

कल्पतरुः।

रत्वे वेदान्तानां न केवलमनुवादत्वाभावः अपि तु विपरीतार्थत्वं च न स्यात्, पक्षान्तरे तु स्यादित्याह— एवं चेति। यादृशमिति। जीवाद्भिन्नमित्यर्थः। जीवे ब्रह्मदृष्ट्यारोपान्न भेदग्राहिप्रमाणविरोध इत्यर्थः। तदिति। सूत्रपदोक्तां सिद्धान्तपक्षप्रतिज्ञाम् इत्यर्थः ॥

सम्यगन्वय इति। तात्पर्यं सम्यक्त्वम्। ननु शास्त्रयोनित्वद्वितीयवर्णकाक्षेपसमाधानरूपमिदमधिकरणम्, तत्र च 'यतो वा' इति वाक्यमुदाह-

परिमलः।

ज्ञापनमात्रप्रयोजनो भवतीत्यर्थः। अपि त्विति। प्रत्यक्षविरुद्धार्थत्वरूपविपरीतार्थत्वदोषोऽपि परिहृतो भवतीत्यर्थः ॥

गतानि। 'सदेव सोम्येदमग्र आसीत्' 'एकमेवाद्वितीयम्' 'आत्मा वा इदमेक एवाग्र आसीत्' 'तदेतद्ब्रह्मापूर्वमनपरमनन्तरमबाह्यम्' 'अयमात्मा ब्रह्म सर्वानुभूः' 'ब्रह्मैवेदममृतं पुरस्तात्' इत्यादीनि। न च तद्गतानां पदानां ब्रह्मस्वरूपविषये निश्चिते समन्वयेऽवगम्यमाने

भामती।

न्तिकीं ब्रह्मपरतामाचिख्यासुर्बहूनि वाक्यान्युदाहरति— **सदेवेति**। 'यतो वा इमानि भूतानि' इति तु वाक्यं पूर्वमुदाहृतं जगदुत्पत्तिस्थितिनाशकारणमिति चेह स्मारितमिति न पठितम्। येन हि वाक्यमुपक्रम्यते येन चोपसंह्रियते

कल्पतरुः।

तम् इह किमिति तदुपेक्षितम्? अत आह— **यतो वेति**। तद्ब्रह्म सर्वज्ञम् इत्यादिभाष्ये 'यतः—' इत्यादिवाक्यप्रमेयकीर्तनात् तत्प्रमाणं बुद्धिस्थं भवतीति नोदाहृतमित्यर्थः। वेदान्तानां ब्रह्मात्मैकत्वे उपक्रमोपसंहारैक्यं तात्पर्यलिङ्गं सदृष्टान्तमाह— **येनेति**॥

भेदलक्षणे चिन्तितम्— 'पौर्णमासीवदुपांशुयाजः स्यात्'। 'जामि वा एतद्यज्ञस्य क्रियते यदन्वञ्चौ पुरोडाशौ उपांशुयाजमन्तरा यजति विष्णुरुपांशु यष्टव्योऽजामित्वाय प्रजापतिरुपांशु यष्टव्योऽजामित्वायाग्नीषोमावुपांशु यष्टव्यावजामित्वाय' इति श्रूयते। तत्र 'उपांशुयाजमन्तरा यजति' इति किं समुदायानुवाद उतापूर्वयागविधिरिति विशये, यथा आग्नेयादियागानाम् 'य एवं विद्वान् पौर्णमासीं यजते' 'य एवं विद्वानमावास्यां यजते' इति समुदायानुवादौ, एवमिदमपि विष्ण्वादिवाक्यविहितयागानां समुदायानुवादः; तत्र हि विष्ण्वाद्या देवताः श्रूयन्ते; 'सर्वस्मै वा एतद्यज्ञाय गृह्यते यद्ध्रुवायामाज्यम्' इति ध्रौवाज्यद्रव्यसिद्धिः; तव्यप्रत्ययाश्च विधायकाः श्रूयन्ते; न त्वन्तरावाक्येऽस्ति द्रव्यदैवतं रूपम्; 'यजति' इति च वर्तमानापदेशः; तदुक्तम्— 'यागान्विष्ण्वादिसंयुक्तान्विहितान्रूपवत्तया'।

परिमलः।

न त्वन्तरावाक्य इति। यद्यपि यागविधौ स्थिते ध्रौवाज्यं द्रव्यं लभ्यते तथापि देवताया अलाभात् वर्तमानापदेशाच्च यागविध्यसंभवे द्रव्यलाभो दूरापास्त इति भावः॥

भामती।

स एव वाक्यार्थ इति शाब्दाः। यथोपांशुयाजवाक्येऽनूचोः पुरोडाशयोर्जामिता-

कल्पतरुः।

अरूपमन्तरावाक्यमगत्यैवावलम्बते' इति पूर्वपक्षः। एतदधिकरणासिद्धान्तमाह— **अनूचोरिति**। निरन्तरयोराग्नेयाग्नीषोमीययोः पुरोडाशयोः करणे आलस्यं स्यादिति दोषं संकीर्त्य तदपनयनार्थमुपांशुयाजमाज्यद्रव्यकं विधायानन्तरम् 'अजामित्वाय' इति तद्विधानलब्धं जामितादोषसमाधानमुपसंहरति। अतः सार्थवादोपक्रमोपसंहारैकरूप्यात् एकमिदं वाक्यम्। एकवाक्यता चोपांशुयाजविधौ लभ्यते नेतरत्रानेकयागविधाविति। ननु तव्यप्रत्ययविहितयागानां समुदायानुवादोऽयमिति,

परिमलः।

आलस्यमिति। दशमाध्याये 'अजामिकरणार्थत्वाच्च' इति सूत्रभाष्ये जामिता सादृश्यमिति व्याख्यातम्। तत्रैव नयविवेके 'जामिता सादृश्यम् एकरूपा द्विः क्रियेति तेन कृताकृताननुसंधिदोषः' इति सादृश्यस्य दोषपर्यवसायित्वमुपपादितम्। इह त्वेकरूपायाः क्रियायाः पुनः पुनरनुष्ठाने तन्द्रा स्यादिति भाष्योक्तस्यैव सादृश्यस्य दोषत्वपर्यवसानमात्रं प्रकारान्तरेणोक्तमिति न भाष्यविरोधः। न्यायसुधायामप्येवमेवोक्तम्— सादृश्यस्य नैरन्तर्यानुष्ठाने सति आलस्यापादकत्वेन दोषत्वादिति। किं तु तत्र सौन्दर्यवाची जामिशब्दः तस्य सादृश्ये लक्षणेत्युक्तमिति विशेषः। **उपांशुयाजमाज्यद्रव्यकं विधायेति**। अत्रान्तरावाक्यविष्ण्वादिवाक्यसाधारण्येनोपांशुगुणकयागविधानमात्रं विवक्षितं न त्वन्तरावाक्येनोपांशुयाजविधानम्। अन्तरावाक्यमेव यागविधायकं न विष्ण्वादिवाक्यत्रयमित्यस्यार्थस्य प्रसाधयिष्यमाणैकवाक्यतासिद्ध्यधीनत्वात् ततः प्राक् अन्तरावाक्यं विष्ण्वादिवाक्यत्रयं वा यत्किंचिद्द्रौव्याज्यप्राप्तिमदुपांशुधर्मकयागविधायकमस्तीत्येतावत्येवांशे संप्रतिपत्तेः। ननु– जामितादोषोपक्रमतत्प्रतीकारोपसंहाराभ्यामेकवाक्यता नावसीयते येन तत्संरक्षणार्थमन्तरावाक्यं विधायकमिति निर्णीयेत; किं तु विष्ण्वादिवाक्येषु प्रत्येकं जामितापतीकारनिबन्धनात् वाक्यभेद एवावसीयते, तदनुसारेणोपक्रमे जामितादोषोक्तेरपि विष्ण्वादिवाक्यविधेययागत्रयस्तुत्यर्थत्वावगमात्। न खलु 'अस्मिञ्जले स्नानेन प्रतिश्यायो भवति, नयनयोरञ्जनं कुर्यात्प्रतिश्यायपरिहाराय, पिप्पलीचूर्णयुक्तं नारिकेलोदकं सेवेत प्रतिश्यायपरिहाराय, मरिचचूर्णयुक्तं क्षीरं पिबेत्प्रतिश्यायपरिहाराय' इति प्रत्येकं प्रतिश्यायप्रतीकारार्थतया अञ्जनादिविधाने प्रतिश्यायदोषोपक्रमतत्प्रतीकारोपसं-

भामती ।

दोषसंकीर्तनपूर्वकोपांशुयाजविधानेन तत्प्रतिसमाधानोपसंहारेण चापूर्वोपांशुयाजकर्मविधिपरता एकवाक्यताबलादाश्रिता, एवमत्रापि 'सदेव सोम्येदम्' इति ब्रह्मोपक्रमात् 'तत्त्वमसि' इति च जीवस्य ब्रह्मात्मनोपसंहारात् तत्परतैव

कल्पतरुः ।

तत्राह– **अपूर्वेति** । तथा हि– 'यष्टव्यः' इति कर्मप्राधान्यं विष्ण्वादिवाक्ये प्रतीयते, विष्ण्वादयो हि कर्म, यागस्तूपसर्जनम् । तत्र कर्म अप्रधानीकृत्य यागप्राधान्यं लक्षणीयं कर्मतया च देवतात्वम्, ततो गुरुतरा कल्पना । अन्तरावाक्ये तु श्रुतं यागप्राधान्यं विधिश्च पञ्चमलकाररूपः । यत्तु रूपाभाव इति तन्न, ध्रौवाज्यलाभात्; आग्नेयादीन्यागान् क्रमेणाम्नाय मन्त्रकाण्डे तत्क्रमेणैव याज्यानुवाक्या आम्नाताः, तत्रोपांशुयाजस्थाने वैष्णवप्राजापत्याग्नीषोमीयास्तिस्रः ऋचः पठ्यन्ते, ताभिस्तुल्यार्थत्वेन विकल्प्यमानाभिर्विष्ण्वादिदेवतानां समर्पितत्वात् । तस्मादपूर्व उपांशुयाजो विधेयः । विष्ण्वादिवाक्यानि त्वर्थवादाः इत्थं महीयानुपांशुयाजो यदस्मिन्विष्ण्वादयो

परिमलः ।

हारमात्रेणैकवाक्यता भवतीत्याशङ्क्याह— **तथा हीति** । विष्ण्वादिवाक्येषु यागविधाने कर्मप्रधानतव्यप्रत्ययबलात् विष्ण्वादिदेवतासंस्कारार्थयागविधानं झटिति प्रतीतं स्यात् । अतः संस्कृतदेवताविनियोगादर्शनेन ततः पराकृत्य यागानामर्थकर्मभावेन प्राधान्यं लक्षणीयमिति तेषु विलम्बिताः प्रधानभूतयागविधयः । अन्तरावाक्ये तु यागस्य अन्योपसर्जनत्वं न श्रुतमिति प्रधानभूतस्य तस्य पञ्चमलकारकल्पनेन विधिः शीघ्रतरः जामितादोषपरिहारोपयुक्तान्तरालकालयुक्तश्च । पुरोडाशद्वयनैरन्तर्यात् जामितादोषोपन्यासेन ह्युपक्रम एवैतदवगतमुपन्यस्तदोषसमाधानार्थमन्तराले किंचिद्विधित्सितमिति । तद्यद्यन्तरावाक्यं विहाय विष्ण्वादिवाक्येषु विधिराश्रीयेत तदोपक्रमानुगुण्यं न स्यात् । न हि नैरन्तर्यप्रयुक्तदोषस्यान्तराले कर्मान्तरविधानेनेव विष्ण्वादियजनविधानेन समाधानं प्रतीयते । प्रतिश्यायादिवाक्येषु तु नैवं कर्मप्राधान्यप्रतीतिः ; न वा उपक्रान्तदोषसमाधानसामर्थ्यावगतिविषययुक्तविध्यन्तरश्रवणमस्ति इति तत्र वाक्यभेदेऽपि नात्र तद्भेदः समाश्रयणीयः । तस्मान्मन्त्रवर्णप्राप्तविष्ण्वादियोगेन प्रशंसार्थेऽर्थवादत्रये प्रत्येकमाम्नातमप्यजामिकरणं तदन्वयद्वारा विधायकेऽन्तरावाक्य एवान्वेति । अत एव तैत्तिरीयशाखायाम् 'उपांशुयाजमन्तरा यजति' इत्यन्तरावाक्य एवाजामिकरणमाम्नातम् । इह त्वर्थवादत्रये अजामिकरणाभ्यासस्तद्दृढीकरणाय भविष्यतीति न तदनुरोधेन वाक्यभेदश-

भामती।

वाक्यस्य। एवं वाक्यान्तराणामपि पौर्वापर्यालोचनया ब्रह्मपरत्वमवगन्तव्यम्। न च तत्परत्वस्य दृष्टस्य सति संभवेऽन्यपरता अदृष्टा युक्ता कल्पयितुम्,

कल्पतरुः।

यष्टव्या इति। **एवं वाक्यान्तराणामिति**। ऐतरेयके 'आत्मा वा इदमेक एव' इत्युपक्रम्य 'स एतमेव पुरुषं ब्रह्म ततममपश्यत्' इति तमेव ब्रह्मात्मानमभिधाय समाप्तौ च 'प्रज्ञानं ब्रह्म' इत्युपसंहृतम्। वाजसनेयकेऽपि 'अहं ब्रह्मास्मि' इत्युपक्रम्य 'अयमात्मा ब्रह्म' इत्युपसंहृतम्। आथर्वणेऽपि 'कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवति' इति सर्वात्मकं ब्रह्मोपक्रम्य 'ब्रह्मैवेदममृतं पुरस्तात्' इति तदेव निगमितम्। वेदान्ता यदि सिद्धवस्तुपरास्तर्हि मानान्तरसापेक्षाः स्युः पुंवाक्यवदिति पूर्ववाद्यभिमतस्य प्रसङ्गे हेतोः पौरुषेयत्वेन सोपाधिकत्वं भाष्यगता-

परिमलः।

ङ्कावकाशः। **कर्मतया च देवतात्वमिति**। लक्षणीयमित्यनुषङ्गः। **तस्मादिति**। अपूर्वत्वात् यागे एव विध्यपेक्षा न विष्ण्वादिदेवतास्वपि मन्त्रवर्णतः प्राप्तिसंभवादिति भावः। सामवेदे सार्वात्म्यविषयावुपक्रमोपसंहारौ दर्शितौ। ऋग्वेदादिष्वपि तौ दर्शयति— **ऐतरेयके इति**। ऐतरेये इति तु न पाठः। इतराया अपत्यमैतरेयस्तेन प्रोक्तां शाखामधीयत इत्यैतरेयिणः। तेन प्रोक्तमित्यर्थे 'पुराणप्रोक्तेषु ब्राह्मणकल्पेषु' इति सूत्रेण णिनिप्रत्यये सति तदधीत इत्यर्थे विहितस्य प्रत्ययस्य 'प्रोक्ताल्लुक्' इति सूत्रेण प्रोक्तप्रत्ययान्तात्तस्य लुग्विधायकेन लोपे सति निष्पत्तेः। ततश्चैतरेयिणामाम्नाय इत्यर्थे 'गोत्रचरणाद्वुञ्' इति वुञ्प्रत्यये सति ह्यैतरेयके इति भाव्यम्। **स एतमेवेति**। अनेन वाक्येन प्रत्यगात्मैव ब्रह्मेत्युपक्रान्तम्। तदुपसंहारे च प्रज्ञानशब्दो जीवपरः, 'सर्वाण्येवैतानि प्रज्ञानस्य नामधेयानि' इति प्राक् प्रज्ञानशब्देन जीवस्य निर्दिष्टत्वात्। **वेदान्ता यदीति**। वेदान्तानां सापेक्षत्वप्रसञ्जकस्य भूतार्थत्वहेतोः पौरुषेयत्वेन सोपाधिकत्वम् अयमभिसंधिरित्यारभ्य प्रवृत्तेन टीकाग्रन्थेनोच्यमानं परिनिष्ठितवस्तुविषयत्वेऽपीति भाष्यगतापिशब्देन भूतार्थत्वस्य सापेक्षत्वव्यभिचारं दर्शयतोक्तसाध्ये प्रयोजकान्तरसद्भावसूचनेन द्योत्यत इत्येतदभिसंधिशब्देनाहेत्यर्थः॥

ननु— अयमभिसंधिरित्यादिटीकाग्रन्थस्योक्तरीत्योपाध्युद्भावनपरत्वेनावतारणमयुक्तम्, तस्य ग्रन्थस्य सापेक्षत्वापादने भूतार्थत्वं प्रसङ्गहेतुः पौरुषेयत्वं वेति विकल्प्य प्रथमपक्षं व्यभिचारेण निरस्य अथेत्यादिग्रन्थेन द्वितीयपक्षमुद्भाव्य तं पक्षं वेदान्तानां

परिमलः ।

पौरुषेयत्वं नास्तीति प्रसङ्गहेत्वसंमत्या दूषयित्वा भूतार्थत्वे मानान्तरेण शक्यग्रहत्वात् पौरुषेयत्वमपि स्यादिति प्रसङ्गहेतोरप्यापादनशङ्कां यद्युच्येतेत्यादिग्रन्थेनोद्भाव्य तर्हि कार्यार्थत्वेऽपि तत एव हेतोस्तत्स्यादित्येतदर्थप्रतिपादकतयैव तस्य ग्रन्थस्य प्रवृत्तेः तस्य पौरुषेयत्वोपाध्युद्भावनपरत्वे तमुपाधिमसहमानस्य पूर्वपक्षिणः सापेक्षत्वे पौरुषेयत्वं प्रयोजकमित्युक्त्यसंभवेनाथेत्यादिशङ्काग्रन्थस्यानन्वयप्रसङ्गाच्च; यद्युच्येतेत्यादिशङ्काग्रन्थोपसंहारे तस्मात् पौरुषेयत्वेन सापेक्षत्वं दुर्वारं न तु भूतार्थत्वेनेति भूतार्थत्वं हेतुं परित्यज्य पौरुषेयत्वस्य हेतुतयैवोपादानस्य स्पष्टीकरणाच्चेति चेत्, उच्यते— टीकायां भूतार्थतया खलु सापेक्षत्वमाशङ्क्यते इत्यनुवादानन्तरं भूतार्थतया वेदान्तानां सापेक्षत्वम् उत पौरुषेयतयेति विकल्पो न प्रसरति; भूतार्थत्वहेतौ व्यभिचारेण दूषिते तत्रैव वाक्यत्वविशेषणाशङ्कां विहाय वाक्यत्वविशेषितभूतार्थत्वहेतुना प्रसाधनीयस्य पौरुषेयत्वस्य हेत्वन्तरस्य शङ्का च न सामञ्जस्यमश्नुते। तस्मात् पौरुषेयत्वमुपाधिमुद्भावयिष्यतो गूढाभिसंधेः सिद्धान्तिनोऽयं विकल्पः— दृष्टान्तीकृतेषु पुंवाक्येषु सापेक्षत्वे त्वदीयसाधनं भूतार्थत्वं प्रयोजकं मदुद्भावनीयोपाधिरूपं पौरुषेयत्वं वेति। अत एव पक्षे हेतुविकल्पोऽयं न भवति किं तु दृष्टान्ते साध्यप्रयोजकधर्मविकल्पः इति दर्शयितुमेव टीकायां पुंवाक्यनिदर्शनेन हीति पुंवाक्यानामिति च विशेषितम्। ततः प्रथमपक्षे व्यभिचारेण दूषिते तत्र वाक्यत्वविशेषणे कृतेऽपि सिद्धान्ती पौरुषेयत्वमुपाधिं ब्रूयादिति तं पक्षं परित्यज्य तदभिमतमुपाधिं साधनव्यापकत्वेनानुपाधिं व्यवस्थापयिष्याम इति मन्यमानस्य पूर्वपक्षिणः पक्षान्तरपरिग्रहाशङ्का— अथ पुरुषबुद्धिप्रभवतयेति। पौरुषेयत्वस्य सापेक्षत्वप्रयोजकत्वमङ्गीकृत्य तस्य वेदान्तेष्वभावेन साधनाव्यापकतयोपाधित्वोद्भटनम्— एवं तर्हीति। वेदान्तानां भूतार्थवाक्यत्वहेतुना पौरुषेयत्वापादनेन साधनव्यापकतया अनुपाधित्वशङ्का— यद्युच्येतेति। तस्मात् पौरुषेयत्वेनेति तदुपसंहारवाक्येनाप्यनुपाधित्वशङ्काया एव तत्फलेन सहोपसंहारः, वेदान्तानां पौरुषेयत्वमापाद्योपाधेः साधनव्यापकत्वान्निरुपाधिकेन भूतार्थत्वेन सापेक्षत्वमापाद्यते न तु तदनापाद्य सोपाधिकेन भूतार्थत्वेनेति। ततः प्रतिबन्दिग्रहणेन वेदान्तानां भूतार्थत्वेऽप्यपौरुषेयत्वोपपत्त्योपाधेः साधनाव्यापकत्वव्यवस्थापनेन भूतार्थत्वहेतुकसापेक्षत्वप्रसङ्गानुमानस्य सोपाधिकत्वप्रदर्शनपरः अत्र ब्रूम इत्यादिग्रन्थः। अत एव तदुपसंहारवाक्यम्— तेनापौरुषेयत्वे सिद्धे भूतार्थानामपि वेदान्तानां न सापेक्षतया प्रामाण्यविघात इति। तस्मादुपाध्युद्भावनपरतया व्याख्यानं युक्तमेव। प्रमाणान्तरसिद्धार्थानुवादकतया स्वप्रामाण्यसिद्धौ तत्प्रामाण्यमुक्त-

अर्थान्तरकल्पना युक्ता, श्रुतहान्यश्रुतकल्पनाप्रसङ्गात्। न च तेषां कर्तृदेवतादिस्वरूपप्रतिपादनपरता अवसीयते, 'तत्केन कं पश्येत्' इत्यादिक्रियाकारकफलनिराकरणश्रुतेः। न च परिनिष्ठितवस्तुस्वरूपत्वेऽपि प्रत्यक्षादिविषयत्वं ब्रह्मणः, 'तत्त्वमसि' इति ब्रह्मात्मभावस्य

भामती।

अतिप्रसङ्गात्। न केवलं कर्तृपरता तेषामदृष्टा, अनुपपन्ना चेत्याह— **न च तेषामिति**। सापेक्षत्वेनाप्रामाण्यं पूर्वपक्षबीजं स्मारयित्वा दूषयति— **न च परिनिष्ठितवस्तुस्वरूपत्वेऽपीति**। अयमभिसंधिः— पुंवाक्यनिदर्शनेन हि भूतार्थतया वेदान्तानां सापेक्षत्वमाशङ्क्यते। तत्रैवं भवान् पृष्टो व्याचष्टाम्, किं पुंवाक्यानां सापेक्षता भूतार्थत्वेन आहो पौरुषेयत्वेन? यदि भूतार्थत्वेन ततः प्रत्यक्षादीनामपि परस्परापेक्षत्वेनाप्रामाण्यप्रसङ्गः। तान्यपि हि भूतार्थान्येव। अथ पुरुषबुद्धिपूर्वकतया पुंवाक्यं सापेक्षम्, एवं तर्हि अतत्पूर्वकाणां वेदान्तानां भूतार्थानामपि नाप्रामाण्यं प्रत्यक्षादीनामिव नियतेन्द्रियलिङ्गादिजन्मनाम्। यद्युच्येत सिद्धे किलापौरुषेयत्वे वेदान्तानामनपेक्षतया प्रामाण्यं सिध्येत्, तदेव तु भूतार्थत्वेन न सिध्यति, भूतार्थस्य शब्दानपेक्षेण पुरुषेण मानान्तरतः शक्यज्ञानत्वाद्बुद्धिपूर्व विरचनोपपत्तेः, वाक्यत्वादिलिङ्गकस्य वेदपौरुषेयत्वानु-

कल्पतरुः।

पिशब्देन द्योत्यत इत्याह— **अयमभिसंधिरिति**। तस्यैवानैकान्तिकत्वमाह— **प्रत्यक्षादीनामपीति**। वाक्यस्य सतः सिद्धवस्तुपरत्वे पौरुषेयत्वापत्तिरिति साधनव्याप्तिमुपाधेः शङ्कते— **यद्युच्येतेति**। वाक्यत्वादि लिङ्गं यस्य तत् तथा। कार्यपरतायां हि वेदान्तानां न वाक्यत्वादिना सापेक्षत्वमनुमेयम्, पौरुषेयत्वस्यो-

परिमलः।

निरीक्षकत्वं सापेक्षत्वं पूर्वानुपूर्व्यनपेक्षपुंविशेषबुद्ध्यधीनानुपूर्वीमत्त्वं पौरुषेयत्वमिति साध्योपाध्योर्भेदः। **तस्यैवेति**। यस्य हेतोरुपाधिरुद्भावनीयः तस्यैव व्यभिचारं तावदाहेत्यर्थः। यद्यपि दृष्टान्तीकृतेषु पुंवाक्येषु भूतार्थत्वं सापेक्षत्वप्रयोजकं न भवतीत्येतदुपपादकः प्रत्यक्षादिषु सत्यपि भूतार्थत्वे सापेक्षत्वाभावः उपाध्युद्भावनोपयोगिप्रयोजकान्तरशङ्कावसरदानार्थमिहोच्यते, तथापि स एव हेतोः पक्षे साध्यासाधकत्वसिद्ध्युपयो-

भामती ।

मानस्याप्रत्यूहमुत्पत्तेः ; तस्मात्पौरुषेयत्वेन सापेक्षत्वं दुर्वारम्, न तु भूतार्थत्वेन ; कार्यार्थत्वे तु कार्यस्यापूर्वस्य मानान्तरागोचरतया अत्यन्तानुभूतपूर्वस्य तत्त्वेन समारोपेण वा पुरुषबुद्धावसमारोहात् तदर्थानां वेदान्तानामशक्यरचनतया पौरुषेयत्वाभावादनपेक्षं प्रमाणत्वं सिध्यतीति, प्रामाण्याय वेदान्तानामपि कार्यपरत्वमातिष्ठामहे । अत्र ब्रूमः— किं पुनरिदं कार्यमभिमतमायुष्मतः यदशक्यं पुरुषेण ज्ञातुम्? अपूर्वमिति चेत्, हन्त कुतस्त्यमस्य लिङाद्यर्थत्वम्, तेनालौकिकेन संगतिसंवेदनविरहात् । लोकानुसारतः क्रियाया एव लौकिक्याः कार्यतया लिङादेरवगमात् । 'स्वर्गकामो यजेत' इति साध्यस्वर्गविशिष्टो

कल्पतरुः ।

पाधित्वादेव; न च साधनव्याप्तिरित्याह— **कार्यार्थत्व इति** । तत्त्वेन याथात्म्येन । कार्ये मानान्तरायोग्यत्वस्यासिद्धत्वात्तत्परत्वेऽपि वेदान्तानां पौरुषेयत्वं संभवतीति न साधनव्याप्तिः; ततश्च दुरपवादं वाक्यत्वादिलिङ्गकं पौरुषेयत्वमित्याशयेनाह— **अत्र ब्रूम इत्यादिना** । **किं पुनरिति** । कृतियोग्यस्य कार्यत्वे भावार्थस्यापि तत्त्वेन मानान्तरयोग्यत्वमित्यर्थः । तर्ह्यलौकिकं कार्यमिति शङ्कते— **अपूर्वमिति** । तर्हि मानान्तरानवगते संगतिग्रहायोगाल्लिङादीनामबोधकत्वापात इत्याह— **हन्तेति** । ननु 'यजेत' इति श्रुतेः कार्यता भाव्यतोऽपूर्वसिद्धिरिति तत्राह— **लोकानुसारत इति** । स्वर्गकामपदसमभिव्याहारसंज्ञकतर्कानुगृहीतवेदादेव क्रियाविलक्षणापूर्वे लिङादीनां संबन्धग्रह इति शङ्कते— **स्वर्गकाम इति** । अयं तर्कोऽतिप्रसङ्गीत्याह— **चैत्येति** ।

परिमलः ।

गी व्यभिचारोऽपीत्यभेददृष्ट्या अनैकान्तिकतामाहेत्युक्तम्— **कार्ये मानान्तरायोग्यत्वस्यासिद्धत्वादिति** ॥

ननु वेदान्तानां कार्यपरत्वेऽपि पौरुषेयत्वानुमानं प्रसरति कार्यस्यापि मानान्तरयोग्यत्वाविशेषादिति पैरुषेयत्वानुमानमुक्त्वा तत्फलमुपाधेः साधनव्यापकत्वमप्यभिधाय ततश्चेत्यादिग्रन्थेन पुनरपि पौरुषेयत्वानुमानप्रसर एवोपसंहियते, उपाधिविधूनने सति निरुपाधिकेन वाक्यत्वेन सापेक्षत्वानुमानमेव खलूपसंहर्तव्यम्? सत्यम् । वाक्यत्वादिलिङ्गकं पौरुषेयत्वमित्यत्र पौरुषेयत्वशब्देन पुरुषबुद्धिप्रभवत्वपरेण सापेक्षत्वमेवोक्तम् । अथ वा पौरुषेयत्वं संभवतीति पूर्ववाक्येण पौरुषेयत्वानुमानस्य बाधकाभावमात्रमुक्तम्; ततश्चेत्यादिग्रन्थेन तत्फलतया पौरुषेयत्वानुमानप्रवृत्तिरुक्ता ; प्रागेव साधनव्याप्त्यु-

भामती ।

नियोज्योऽवगम्यते, स च तदेव कार्यमवगच्छति यत्स्वर्गानुकूलम् । न च क्रिया क्षणभङ्गुरा आमुष्मिकाय स्वर्गाय कल्पत इति पारिशेष्याद्वेदत एवापूर्वे कार्ये लिङादीनां संबन्धग्रह इति चेत्, हन्त चैत्यवन्दनादिवाक्येष्वपि स्वर्गकामादिपदसंबन्धादपूर्वकार्यत्वप्रसङ्गः, तथा च तेषामप्यशक्यरचनत्वेनापौरुषेयत्वापातः । स्पष्टदृष्टेन पौरुषेयत्वेन वा तेषामपूर्वार्थत्वप्रतिषेधे वाक्यत्वादिना लिङ्गेन वेदान्तानामपि पौरुषेयत्वमनुमितमित्यपूर्वार्थता न स्यात् । अन्यतस्तु वाक्यत्वादीनामनुमानाभासत्वोपपादने कृतमपूर्वार्थत्वेनात्र तदुपपादकेन । उपपादितं चापौरुषेयत्वमस्माभिर्न्यायकणिकायाम्, इह तु विस्तरभयान्नोक्तम् । तेनापौरुषेयत्वे सिद्धे भूतार्थानामपि वेदान्तानां न सापेक्षतया प्रामाण्यविघातः । न

कल्पतरुः ।

कर्तृस्मरणात् स्पष्टदृष्टपौरुषेयत्वेन बुद्धादिवचसामकार्यार्थत्वे वेदानामपि पौरुषेयत्वस्य वाक्यत्वादिना अनुमितत्वादकार्यार्थत्वं समानमित्यर्थः । स्मर्यमाणकर्तृकत्वेन वाक्यत्वादि सोपाधिकमित्याशङ्क्य सिद्धार्थवेदान्तेष्वपि तत्समम्; अतः कार्यार्थत्वमनपेक्षतायामप्रयोजकमित्याह— अन्यतस्त्विति । वर्तमानसंप्रयोगजप्रत्यक्षस्य कार्यरूपधर्मगोचरत्वानुपपत्तेर्योगसामर्थ्यस्यापीन्द्रियाविषयेष्वेवातिशयकारित्वान्न धर्मस्य प्रत्यक्षता, लिङ्गाद्यभावाच्च नानुमेयत्वादि । न चाज्ञाते पुंसां वचनरचना

परिमलः ।

क्तिस्तु वक्ष्यमाणानुमानफलत्वाभिप्रायेणेति नेतव्यम् । अकार्यार्थत्वं समानमिति । निष्प्रत्यूहेन वाक्यत्वादिहेतुना पौरुषेयत्वेऽनुमिते सति मानान्तरागोचरापूर्वकार्यार्थत्वकल्पनैव न प्रवर्तते यथा चैत्यवन्दनादिवाक्येषु । अतस्तत्कल्पनया पौरुषेयत्वप्रत्याख्यानप्रत्याशा दुराशेति भावः । स्मर्यमाणकर्तृकत्वेनेति । चैत्यवन्दनादिवाक्येष्वपि 'पश्यामीहं भिक्षवो दिव्येन चक्षुषा सुकृतं दुष्कृतं च' इति तदागमकर्तृबुद्धवचसैव कर्तृप्रतीतिरस्तीति भावः । सिद्धार्थवेदान्तेष्वपीति । यथा वेदान्तानां कार्यार्थत्वपक्षे तेषां पौरुषेयत्वानुमानं कर्तृस्मरणोपाधिना निरस्यते तथा तेषां सिद्धार्थत्वपक्षेऽपि तन्निरसितुं शक्यमित्यप्रयोजकं कार्यार्थत्वकल्पनमित्यर्थः । कार्यरूपेति । कार्यं रूपयतीति अनुष्ठेयं ज्ञापयतीति कार्यरूपो यागाद्यनुष्ठानप्रयोजकः तद्धेतुस्वर्गादिश्रेयःसाधनत्वाकारः, तेन रूपेण यागादिर्धर्मः । अतो यागादेः स्वरूपतः प्रत्यक्षत्वेऽपि धर्मत्वाकारेणातीन्द्रियता । यथाहुः— 'श्रेयःसाधनता ह्येषां नित्यं वेदात्प्रतीयते । तादृप्येण च

शास्त्रमन्तरेणानवगम्यमानत्वात् । यत्तु हेयोपादेयरहितत्वादुपदेशानर्थ-

भामती ।

चानधिगतगन्तृता नास्ति येन प्रामाण्यं न स्यात्, जीवस्य ब्रह्मताया अन्यतोऽनधिगमात् । तदिदमुक्तम्— 'न च परिनिष्ठितवस्तुस्वरूपत्वेऽपि' इति । द्वितीयं पूर्वपक्षबीजं स्मारयित्वा दूषयति— **यत्तु हेयोपादेयरहितत्वादिति** । विध्यर्थावगमात् खलु पारम्पर्येण पुरुषार्थप्रतिलम्भः । इह तु 'तत्त्वमसि' इत्यवगतिपर्यन्ताद्वाक्यार्थज्ञानात् बाह्यानुष्ठानायासानपेक्षात्साक्षादेव पुरुषार्थप्रतिलम्भः 'नायं सर्पो रज्जुरियम्' इति ज्ञानादिवेति । सोऽयमस्य विध्यर्थज्ञानात् प्रकर्षः । एतदुक्तं भवति— द्विविधं हीप्सितं पुरुषस्य— किंचिदप्राप्तं यथा ग्रामादि, किंचित्पुनः प्राप्तमपि भ्रमवशादप्राप्तमित्यवगतं यथा स्वग्रीवावनद्धं ग्रैवेयकम् । एवं जिहासितमपि द्विविधम्, किंचिदहानं जिहासति यथा वलयितचरणं फणिनम्, किंचित्पुनर्हीनमेव जिहासति यथा चरणाभरणे नूपुरे फणिनमारोपितम् । तत्राप्राप्तप्राप्तौ चात्यक्त्यागे च बाह्योपायानुष्ठानसाध्यत्वात् तदुपायतत्त्वज्ञानादस्ति परा-चीनानुष्ठानापेक्षा । न जातु ज्ञानमात्रं वस्त्वपनयति । न हि सहस्रमपि रज्जुप्रत्यया वस्तुसन्तं फणिनमन्यथयितुमीशते । समारोपिते तु प्रेप्सितजिहासिते तत्त्वसाक्षात्कारमात्रेण बाह्यानुष्ठानानपेक्षेणैव शक्येते प्राप्तुमिव हातुमिव । समारोपमात्रजीविते हि ते, समारोपितं च तत्त्वसाक्षात्कारः समूलघातमुपहन्तीति । तथेहाप्यविद्यासमारोपितजीवभावे ब्रह्मण्यानन्दे वस्तुतः शोकदुःखादिरहिते समारोपितनिबन्धनस्तद्भावः 'तत्त्वमसि' इति वाक्यार्थतत्त्वज्ञानादवग-

कल्पतरुः ।

संभवतीति वैदिकी रचना न पौरुषेयीति न्यायकणिकायां व्युत्पादितम् । नन्वपौरुषेयतया अनपेक्षत्वेऽपि 'अग्निर्हिमस्य भेषजम्' इतिवन्मानान्तरगृहीतग्राहित्वमित्याशङ्क्य 'तत्त्वमसि' इति ब्रह्मात्मभावस्येति भाष्यशेषेण परिहृतमित्याह—**न चानधिगतेति** । सर्वस्मिन्नुपपादितेऽर्थे भाष्यं संवादयति— **तदिदमिति** । सिद्धार्थत्वे सत्यपुरुषार्थनिष्ठत्वं स्यादिति द्वितीयं पूर्वपक्षबीजम् । सर्वक्लेशप्रहाणादिति भाष्यस्थप्रशब्दार्थमाह— **सोऽयमस्येति** । बाह्यानुष्ठानानपेक्षमज्ञाननिवृत्त्यानन्दाविर्भावफलमन्वयव्यतिरेकिनिदर्शनयुगलद्वयप्रदर्शनपुरःसरं ब्रह्मज्ञानस्य दर्शयति— **एतदुक्तमित्यादिना** । **ग्रैवेयकं** ग्रीवालंकारः । **समूलघातमिति** । कषादित्वादनुप्रयोगः । सह मूलेनोपहन्तीत्यर्थः । **समारोपितनिबन्धन इति** । समारोपिता अविद्या

क्यामिति, नैष दोषः ; हेयोपादेयशून्यब्रह्मात्मतावगमादेव सर्वक्लेशप्रहाणात्पुरुषार्थसिद्धेः । देवतादिप्रतिपादनस्य तु स्ववाक्यगतोपासनार्थत्वेऽपि न कश्चिद्विरोधः । न तु तथा ब्रह्मण उपासनाविधिशेषत्वं संभवति,

---

भामती ।

तिपर्यन्तान्निवर्तते । तन्निवृत्तौ प्राप्तमप्यानन्दरूपमप्राप्तमिव प्राप्तं भवति, त्यक्तमपि शोकदुःखाद्यत्यक्तमिव त्यक्तं भवति, तदिदमुक्तम्— **ब्रह्मात्मावगमादेव** जीवस्य सर्वक्लेशस्य सवासनस्य विपर्यासस्य ; स हि क्लिश्नाति जन्तूनतः क्लेशः, तस्य प्रकर्षेण हानात् पुरुषार्थस्य दुःखनिवृत्तिसुखाप्तिलक्षणस्य सिद्धेरिति । यत्तु 'आत्मेत्येवोपासीत' 'आत्मानमेव लोकमुपासीत' इत्युपासनावाक्यगतदेवतादिप्रतिपादनेनोपासनापरत्वं वेदान्तानामुक्तं तद्दूषयति— **देवतादिप्रतिपादनस्य तु** आत्मेत्येतावन्मात्रस्य **स्ववाक्यगतोपासनार्थत्वेऽपि न कश्चिद्विरोधः** । यदि न विरोधः, सन्तु तर्हि वेदान्ता देवताप्रतिपादनद्वारेणोपासनाविधिपरा एवेत्यत आह— **न तु तथा ब्रह्मण इति** । उपास्योपासकोपासनादिभेदसिद्ध्यधीनोपासना न निरस्तसमस्तभेदप्रपञ्चे वेदान्तवेद्ये ब्रह्मणि संभवतीति नोपासनाविधिशेषत्वं वेदान्तानां तद्विरोधित्वादित्यर्थः । स्यादेतत् । यदि विधि-

कल्पतरुः ।

निबन्धनं यस्य जीवभावस्य स तथोक्तः । आत्मानमेव लोकं चैतन्यम् । देवता सगुणं ब्रह्म । आदिशब्दात् प्राणविशुद्ध्यादि गृह्यते । उपासनवाक्यैकदेशमुपास्यसमर्पकं विविनक्ति— आत्मेतीति । यदवादि पूर्वपक्षिणा न क्वचिदपि वेदवाक्यानां विधिमन्तरेणार्थवत्तेति, तत्र किं यदि वेदान्ता विधिमन्तरेण प्रमाणं तर्ह्यर्थवादाः किं न स्युरिति प्रतिबन्दी मता, अथ वा वेदवाक्यस्य सिद्धपरस्यान्यत्रादर्शनाद्व्याप्त्यभावेन न वेदान्तानां सिद्धवस्तुपरत्वमिति । आद्यमर्थवादाधिकरणपूर्वपक्षं संगृह्यनाशङ्कते— स्यादेतदित्यादिना । रुदतो यदश्रु अशीर्यत तद्रजतमभवत्तस्माद्रजतमदक्षिण्यमिति निन्दा बर्हिषि बर्हिःसाध्ये यागे रजतं न देयमिति निषेधशेष इति सिद्धान्तं दर्शयन्नर्थवादानां नोपेक्षाफलत्वमिति ताव-

परिमलः ।

धर्मत्वं तस्मान्नेन्द्रियगोचरः' इति । **व्याप्त्यभावेनेति** । वेदान्तानां सिद्धवस्तुपरत्व-

एकत्वे हेयोपादेयशून्यतया क्रियाकारकादिद्वैतविज्ञानोपमर्दोपपत्तेः । न हि ब्रह्मैकत्वविज्ञानेनोन्मथितस्य द्वैतविज्ञानस्य पुनः संभवोऽस्ति येनोपासनाविधिशेषत्वं ब्रह्मणः प्रतिपाद्येत । यद्यप्यन्यत्र वेदवाक्यानां

भामती ।

विरहेऽपि वेदान्तानां प्रामाण्यम्, हन्त तर्हि 'सोऽरोदीत्' इत्यादीनामप्यस्तु स्वतन्त्राणामेवोपेक्षणीयार्थानां प्रामाण्यम्; न हि हानोपादानबुद्धी एव प्रमाणस्य फले, उपेक्षाबुद्धेरपि तत्फलत्वेन प्रामाणिकैरभ्युपेतत्वादिति कृतम् 'बर्हिषि रजतं न देयम्' इत्यादिनिषेधविधिपरत्वेनैतेषामित्यत आह— **यद्यपीति** । स्वाध्यायविध्यधीनग्रहणतया हि सर्वो वेदराशिः पुरुषार्थतन्त्र इत्यवगतम् । तत्रैकेनापि वर्णेन नापुरुषार्थेन भवितुं युक्तम्, किं पुनरियता 'सोऽरोदीत्' इत्यादिना पदप्रबन्धेन । न च वेदान्तेभ्य इव तदर्थावगममात्रादेव कश्चित्पुरुषार्थ उपलभ्यते । तेनैष पदसंदर्भः साकाङ्क्ष एवास्ते पुरुषार्थमुदीक्षमाणः । 'बर्हिषि रजतं न देयम्' इत्ययमपि निषेधविधिः स्वनिषेध्यस्य निन्दामपेक्षते । न ह्यन्यथा ततश्चेतनः शक्यो निवर्तयितुम् । तद्यदि दूरतोऽपि न निन्दामवाप्स्यत्ततो निषेधविधिरेव रजतनिषेधे च निन्दायां च दर्विहोमवत्स्वस्य सामर्थ्यद्वयमकल्पयिष्यत् ।

कल्पतरुः ।

दाह— **स्वाध्यायेति** । प्रयोजनपर्यवसायिबोधजनकत्वतदभावाभ्यां विशेषं दर्शयन् प्रतिबन्दीं परिहरति— **न च वेदान्तेभ्य इति** । ननु निषेध एव स्वनिषेध्यस्यानर्थहेतुत्वान्यथानुपपत्त्या निन्दां कल्पयिष्यति, नेत्याह— **तद्यदीति** । अर्थवादादेव निन्दालाभे निषेधकस्य निषेधे निन्दायां च तात्पर्यं न कल्प्यमित्यर्थः । ननु 'सोऽरोदीत्' इति वाक्ये निन्दा न भाति किं तु भूतानुवाद इत्याशङ्क्य मुख्यार्थे प्रयोजनाभावान्नि-

परिमलः ।

मनुमातुं न शक्यं वेदवाक्यत्वस्य तेन व्याप्त्यभावादित्यर्थः । **निन्दा न भातीति** । ननु 'अश्रुजं हि यो बर्हिषि ददाति पुरास्य संवत्सराद्गृहे रुदन्ति' इति वाक्यशेषेण यागे रजतदानस्य बलवदनिष्टानुबन्धित्वरूपा निन्दा भातीति चेत्, न, संवत्सरात्प्राक् रोदनस्य क्वचित्क्वाचिददर्शनेन वाक्यशेषस्य पारलौकिकानिष्टानुबन्धित्वलक्षकतायाः समाश्रयणीयत्वात् । सिद्धार्थव्युत्पत्त्यनुपमर्दोपमर्दाभ्यां वर्णकयोः पूर्वपक्षभेदमुक्त्वा ब्रह्मणः शास्त्रप्रमाणकत्वप्रतिक्षेपाप्रतिक्षेपाभ्यां तद्भेदं यद्यपीत्यादि-

विधिसंस्पर्शमन्तरेण प्रमाणत्वं न दृष्टम्, तथाप्यात्मविज्ञानस्य फलपर्यन्तत्वान्न तद्विषयस्य शास्त्रस्य प्रामाण्यं शक्यं प्रत्याख्यातुम्। न चानुमानगम्यं शास्त्रप्रामाण्यम्, येनान्यत्र दृष्टं निदर्शनमपेक्ष्येत।

भामती।

तदेवमुत्तप्रयोः 'सोऽरोदीत्' इति च 'बर्हिषि रजतं न देयम्' इति च पदसंदर्भयोर्लक्ष्यमाणनिन्दाद्वारेण नष्टाश्वदग्धरथवत् परस्परं समन्वयः। न त्वेवं वेदान्तेषु पुरुषार्थापेक्षा, तदर्थावगमादेवानपेक्षात्परमपुरुषार्थलाभादित्युक्तम्। ननु विध्यसंस्पर्शिनो वेदस्यान्यस्य न प्रामाण्यं दृष्टमिति कथं वेदान्तानां तदस्पृशां तद्भविष्यतीत्यत आह— **न चानुमानगम्यमिति**। अबाधितानधिगतासंदिग्धबोधजनकत्वं हि प्रमाणत्वं प्रमाणानां तच्च स्वत इत्युपपादितम्। यद्यपि चैषामीदृग्बोधजनकत्वं कार्यार्थापत्तिसमधिगम्यं तथापि तद्बोधोपजनने मानान्तरं नापेक्षन्ते नापीमामेवार्थापत्तिं परस्पराश्रयप्रसङ्गादिति स्वत इत्युक्तम्। ईदृग्बोधजनकत्वं च कार्ये इव विधीनाम्, वेदान्तानामपि ब्रह्मण्यस्तीति दृष्टान्तानपेक्षं तेषां ब्रह्मणि प्रामाण्यं सिद्धं भवति। अन्यथा नेन्द्रियान्तराणां रूपप्रका-

कल्पतरुः।

न्दा लक्ष्यत इत्याह— **लक्ष्यमाणेति**। द्वितीयमुद्धाव्य निषेधति-- **ननु विध्यसंस्पर्शिन इत्यादिना**। तच्च स्वत इत्युपपादितं न्यायकणिकायामित्यर्थः। ननु प्रमया कार्येण प्रमाणानां तज्जनकत्वमनुमेयम्, कथं न चानुमानगम्यमिति भाष्यमित्याशङ्क्याह— **यद्यपीति**। कार्यार्थापत्त्यपरपर्यायानुमानेन मानान्तरेण वा प्रमा नोत्पद्यते किं तूदितायां तस्यामनुमानं प्रवर्तत इत्यर्थः। प्रमाणान्तरं तावदपेक्ष्यमाणं न दृश्यते। एतदर्थापत्त्यपेक्षणे दूषणमाह— **नापीति**। अपेक्ष्यत इत्यनुषङ्गः। उत्पन्नायां प्रमायां प्रमाणानां प्रमाजनकत्वस्यानुमानं ततश्च प्रमोत्पत्तिरिति परस्पराश्रयत्वप्रसङ्गः। शास्त्रप्रामाण्यमनुमानेन न भवतीति भाष्यार्थो न पुनरनुमानेन ज्ञेयमिति। कार्यविरहिवेदान्तेभ्यः प्रमा यद्युत्पद्यते तदा स्वतः परतो वेति चिन्ता; न तूत्पद्यत इत्यत आह— **ईदृगिति**। सिद्धे ब्रह्मणि वेदान्तेभ्यः प्रमोत्पत्तिरनुभवसिद्धेत्यर्थः। यद्यनुभवसिद्धाप्यन्यत्र सिद्धार्थार्थवादादावदर्शनादपह्नूयेत तदा अतिप्रसङ्ग इत्याह—**अन्यथेति**। एवं तावत्सिद्धेऽर्थेऽपि प्रमाणान्तरपरतन्त्राणां पौरुषेयवाक्यानामङ्गीकृत्य प्रामाण्यं वेदान्तेषु क्रियाविषयतामन्तरेण नैरपेक्ष्यपुरुषार्थ-

तस्मात्सिद्धं ब्रह्मणः शास्त्रप्रमाणकत्वम् ॥

अत्रापरे प्रत्यवतिष्ठन्ते— यद्यपि शास्त्रप्रमाणकं ब्रह्म, तथापि

भामती ।

शनं दृष्टमिति चक्षुरपि न रूपं प्रकाशयेदिति । प्रकृतमुपसंहरति— **तस्मादिति** । आचार्यैकदेशीयानां मतमुत्थापयति— **अत्रापरे प्रत्यवतिष्ठन्त इति** । तथा हि— 'अज्ञातसंगतित्वेन शास्त्रत्वेनार्थवत्तया । मननादिप्रतीत्या च कार्यार्थाद्ब्रह्मनिश्चयः' । न खलु वेदान्ताः सिद्धब्रह्मरूपपरा भवितुमर्हन्ति, तत्राविदितसंगतित्वात् । यत्र हि शब्दा लोकेन न प्रयुज्यन्ते न तत्र तेषां संगतिग्रहः । न चाहेयमनुपादेयं रूपमात्रं कश्चिद्विवक्षति प्रेक्षावान्, तस्याबुभुत्सितत्वात् ।

कल्पतरुः ।

पर्यवसाने न लभ्येते इति मतं ब्रह्मात्मैक्यस्य प्रमाणान्तरागम्यत्वेन तदवगममात्रायत्तप्रयोजनलाभेन च पराणुदत् । इदानीं कार्यान्वित एवार्थे पदसंगतिग्रहेण सिद्धं वस्तु न शब्दप्रमेयमिति वेदान्ता उपासननियोगपरा इत्यन्ये मन्यन्ते, तन्मतेन पूर्वपक्षमाह— **अज्ञातेति** । अथ वा आरोपितब्रह्मभावस्य जीवस्योपास्तिपरा वेदान्ता न ब्रह्मात्मत्वे प्रमाणमिति पूर्वः पक्षः । अयं तु सन्तु वेदान्ता मानं ब्रह्मात्मवस्तुनि । किं तु ज्ञानविधिद्वारेत्येष भेदः प्रतीयताम् ॥

अत एव भाष्यं यद्यपि शास्त्रप्रमाणकं ब्रह्मेति । कार्यविषयाद्वाक्यात् ब्रह्मनिश्चय इति प्रतिज्ञासामर्थ्यादेव न सिद्धार्थादिति लभ्यते । तत्र हेतुः सिद्धे वस्तुन्यज्ञातसंगतित्वेनेति । यत्र वृद्धप्रयुक्तशब्दविषयत्वं तत्र संगतिः शब्दस्य गृह्यते सिद्धे तु तद्व्यावर्तमानं स्वव्याप्यं संगतिग्रहं व्यावर्तयतीत्यभिप्रेत्याह— **यत्र हीति । लोकेनेति** । वृद्धैः प्रयोगव्यापकवक्तृविवक्षाश्रोतृप्रतिपत्तीच्छयोरभावात्सिद्धे प्रयोगाभावमाह— **न चेति । रूपमात्रं** वस्तुमात्रम् । सर्वपदानां कार्यार्थत्वे सति पर्यायत्वमाशङ्क्याह— **तत्र किंचिदिति । कार्यार्थः** कार्यशेषः । अत्र प्रयोगः- गोपदं

परिमलः ।

भाष्यसिद्धं दर्शयति— **अथ वेति** । **लोकेन न प्रयुज्यन्ते** इत्ययुक्तम्, पामरजने निरर्थकसिद्धार्थपदसंघातप्रयोगस्य संभावितत्वादित्याशङ्क्य लोकेनेति पदं व्याचष्टे— **वृद्धैरिति । प्रेक्षावता** उत्तमवृद्धजनेनेत्यर्थः । **पर्यायत्वमाशङ्क्येति** । न च कार्या

भामती।

अबुभुत्सितावबोधने च प्रेक्षावत्ताविघातः स्यात्। तस्मात् प्रतिपित्सितं प्रतिपिपादयिषन्नयं लोकः प्रवृत्तिनिवृत्तिहेतुभूतमेवार्थं प्रतिपादयेत्, कार्यं चावगतं तद्धेतुरिति तदेव बोधयेत्। एवं च वृद्धप्रयोगात् पदानां कार्यपरतामवगच्छति। तत्र किंचित्साक्षात् कार्याभिधायकम्, किंचित्तु कार्यार्थस्वार्थाभिधायकम्, न तु भूतार्थपरता पदानाम्। अपि च नरान्तरस्य व्युत्पन्नस्यार्थप्रत्ययमनुमाय तस्य च पदशब्दभावाभावानुविधानमवगम्य शब्दस्य तद्विषयबोधकत्वं निश्चेतव्यम्। न च भूतार्थरूपमात्रप्रत्यये परनरवर्तिनि किंचिल्लिङ्गमस्ति। कार्यप्रत्यये तु नरान्तरवर्तिनि प्रवृत्तिनिवृत्ती स्तो हेतू इत्यज्ञातसंगतित्वान्न ब्रह्मरूपपरा वेदान्ताः। अपि च वेदान्तानां वेदत्वाच्छास्त्रत्वप्रसिद्धिरस्ति। प्रवृत्तिनिवृत्तिपराणां च पदसंदर्भाणां शास्त्रत्वम्। यथाहुः— 'प्रवृत्तिर्वा निवृत्तिर्वा नित्येन कृतकेन वा। पुंसां येनोपदिश्येत तच्छास्त्रमभिधीयते' इति। तस्माच्छास्त्रत्वप्रसिद्ध्या व्याहतमेषां स्वरूपपरत्वम्। अपि च न ब्रह्मरूपप्रतिपादनपराणामेषामर्थवत्त्वं पश्यामः। न च 'रज्जुरियं न भुजङ्गः' इति यथाकथंचिल्लक्षणया वाक्यार्थतत्त्वनिश्चयाद्यथा भयकम्पादिनिवृत्तिः, एवम् 'तत्त्वमसि' इति

कल्पतरुः।

न कार्यान्विते गोत्वे गृहीतसंबन्धम्, तत्र वृद्धैरप्रयुक्तत्वात् तुरगपदवत्। एवं सर्वत्र सिद्धे वस्तुन्युत्तमवृद्धस्य शब्दप्रयोगाभावमुक्त्वा मध्यमवृद्धप्रवृत्तेर्व्युत्पत्तिलिङ्गभूतायास्तत्राभावाच्च तत्र न व्युत्पत्तिरित्याह— **अपि चेति**। शास्त्रत्वेनेत्यादिहेतून् व्याचष्टे— **अपि चेत्यादिना**। **न च रज्जुरिति**। नकारोऽयं सांसारिकधर्माणां न च निवृत्तिरिति उपरि संबन्धनीयः। **यथाकथंचिदिति**। सिद्धपदार्थसंसर्गस्य नियोगाविनाभावादिहापि मा भैषीरिति नियोगं कल्पयित्वा अन्यपरादेव

परिमलः।

न्वितत्तत्तदर्थविशेषपरत्वेनापर्यायत्वमुपपादयितुं शक्यम्। कार्यवाचिनि लिङादिपदे कार्यान्वितार्थान्तराभावेन कार्यान्विते पदानां शक्तिरित्युक्त्यसंभवादिति शङ्काभिप्रायः। कार्ये शक्तिरिति नियमः। तस्य नियमस्य कार्यवाचिपदानां तन्मात्रशक्त्या तादितरपदानां तदन्वितस्वस्वार्थशक्त्या च निर्वाह इति परिहाराभिप्रायः। **नियोगाविनाभावादिति**। मध्यमवृद्धप्रवृत्तिलिङ्गापेक्षप्राथमिककार्यव्युत्पत्तिग्रहोपजीविनां पाश्चात्यव्यवहाराणाम् उपजीव्यानुसारेण कार्याविनाभावादित्यर्थः। एतेन व्याकरणकोशाप्तवाक्यप्रसिद्धपद-

भामती ।

वाक्यार्थावगमान्निवृत्तिर्भवति सांसारिकाणां धर्माणाम्, श्रुतवाक्यार्थस्यापि पुंसस्तेषां तादवस्थ्यात् । अपि च यदि श्रुतब्रह्मणो भवति सांसारिकधर्मनिवृत्तिः कस्मात् पुनः श्रवणस्योपरि मननादयः श्रूयन्ते ? तस्मात्तेषां वैयर्थ्यप्रसङ्गादपि न ब्रह्मस्वरूपपरा वेदान्ताः, किं त्वात्मप्रतिपत्तिविषयकार्यपराः । तच्च कार्यं स्वात्मनि नियोज्ये नियुञ्जानं नियोग इति च मानान्तरापूर्वतयापूर्वमिति चाख्यायते । न च विषयानुष्ठानं विना तत्सिद्धिरिति स्वसिद्ध्यर्थं तदेव कार्यं स्वविष-

कल्पतरुः ।

वाक्यात्सिद्धरूपार्थनिश्चय इत्यर्थः । किं त्विति । आत्मप्रतिपत्तिर्विषयोऽवच्छेदको यस्य तत्तथा । ननु नियोगोऽपूर्वमिति प्राभाकरैर्वाक्यार्थो वर्ण्यते स किमन्य एव कार्यात् ? नेत्याह— तच्चेति । कार्यपरेभ्यो वेदान्तेभ्यः कथं वस्तुसिद्धिरित्याशङ्क्य विध्याक्षेपलक्षणोपादानप्रमाणादित्याह— न चेति । स्वप्रतीत्युपाधित्वेन विषयस्य । स्वनिर्वर्तकत्वेन करणस्य । कार्यं स्वावच्छेदकज्ञानानिरूपणाय ज्ञेयमात्मानमपेक्षते चेत् तर्हि न श्रौतत्वमात्मन इत्याशङ्क्य विध्याक्षिप्तस्य श्रौतत्वे गुरुसंमति-

परिमलः ।

समभिव्याहारैः सिद्धार्थेऽपि व्युत्पत्तिग्रहः संभवतीत्यपि शङ्का निरस्ता, । तेष्वपि प्राथमिकव्युत्पत्तिग्रहानुसारेण कार्यवाचिपदाध्याहारावश्यंभावात् । ननु— न च रज्जुरियमित्यादिर्निवृत्तिर्भवतीत्यन्तः सिद्धान्तिशङ्कानुवादग्रन्थः; तन्मध्ये कथं तदनभिमतनियोगाविनाभावोक्तिः । नैष दोषः । पूर्वपक्षिणापि संप्रतिपन्नो हि दृष्टान्तीकर्तव्यः । न च तत्केवलसिद्धार्थपरमर्थवादिति पूर्वपक्षिणः संप्रतिपत्तिरस्ति, तत्रापि कार्यवाचिपदाध्याहाराभ्युपगमात् इति पूर्वपक्ष्याशयानुसारेण यथाकथंचिल्लक्षणयेति टीकातद्व्याख्यानयोरवतारणात् रज्जुवाक्यस्य परमते कार्यपरत्वेऽपि रज्जुरियं न भुजंग इति सिद्धार्थांश एव भयादिनिवृत्त्युपयोगी न तु कुलधर्मतया परकल्पितः कार्यांश इति सिद्धार्थपरतत्त्वमस्यादिवाक्यदृष्टान्तत्वसंगतिः । टीकायां स्वविषयस्य करणस्यात्मज्ञानस्येत्यत्र स्वविषयस्येति पदं व्याचष्टे—**स्वप्रतीत्युपाधित्वेन विषयस्येति** । लिङा ह्यपूर्वं कार्यत्वेनाभिधेयम्, कार्यत्वं च कृतिसाध्यत्वम्, न चापूर्वस्य साक्षात्कृतिसाध्यत्वं संभवति, अतो यद्वारा तस्य कृतिसाध्यत्वं घटनीयं स धात्वर्थो यागदानहोमादिरनुबन्धोऽवच्छेदको विषय इति च प्राभाकरैर्व्यवह्रियते । करणस्येति पदं व्याचष्टे— **स्वनिर्वर्तकत्वेन करणस्येति** ।

भामती।

यस्य करणस्यात्मज्ञानस्यानुष्ठानमाक्षिपति। यथा च कार्यं स्वविषयाधीननिरूपणमिति ज्ञानेन विषयेण निरूप्यते, एवं ज्ञानमपि स्वविषयमात्मानमन्तरेणाशक्यनिरूपणमिति तन्निरूपणाय तादृशमात्मानमाक्षिपति, तदेव

परिमलः।

तदाहुः— 'कृतितत्साध्यमध्यस्थो यागादिर्विषयो मतः। कार्ये संघटिताकारे करणत्वेन संमतः' इति॥

न श्रौतत्वमात्मन इति। ननु 'आत्मानमुपासीत' इति श्रुतकर्मकारकविशिष्टा खलूपास्तिक्रिया विधिविषयत्वेनान्वेति; कथं तर्हि श्रुतस्यात्मनः कर्मकारकस्याश्रौतत्वशङ्का? कथं च तस्य विध्याक्षिप्ततया श्रौतत्वनिर्वहणेन तत्समाधानम्? न हि 'गामानय' इत्यत्र श्रुतस्य गोः कर्मकारकस्य 'पिधेहि' इति प्रयोगे द्वारस्येवाक्षेप्यता अस्ति। उच्यते— आत्ममात्रस्य विधिविषयक्रियाकर्मतया अन्वयः श्रौतः; न तु भाष्योदाहृतसर्ववेदान्तसमाहृतविज्ञानानन्दादिस्वभावस्यात्मनः। तथाभूतात्मस्वरूपाभिप्राये शङ्कासमाधाने। अत एव टीकायाम् 'तादृशमात्मानमाक्षिपति' इति 'तादृगात्मप्रतिपत्तिविधिपरेभ्यो वेदान्तेभ्यः' इति चोक्तम्। ननु तादृक्स्वभावोऽपि 'विज्ञानमानन्दं ब्रह्म' इत्यादिपदबोध्यः। मैवम्, कार्यान्विते पदानां व्युत्पत्तेः। कार्यान्वितार्थ एव पदसंघातोऽर्थवान् अन्यस्त्वनर्थक एव। एवं च ग्राहकग्रहणदशायां विज्ञानानन्दादिस्वभावस्योपास्तिनियोगेन सह प्रारब्धमप्यन्विताभिधानं निर्वहति। आत्ममात्ररूपकर्मकारकावच्छिन्नोपास्तिक्रियारूपोपादानप्रमाणविषयविधौ पर्यवसिते पश्चात् पदान्तरैस्तद्विशेषणतया श्रवणस्यानुवादमात्ररूपत्वेन केवलं तत्तत्पदार्थस्मृतिमात्रहेतुत्वप्रसक्तेः। तस्मादुपास्तिनियोग एव प्रथमारब्धग्राहकग्रहणनिर्वाहार्थं पूर्वं ज्ञानानन्दादिस्वभावावच्छिन्नत्वमात्मकारकस्यापाद्य पश्चात् तद्विशिष्टोपास्तिक्रियाविषयो भवतीत्येवं विध्याक्षेपरूपोपादानप्रमाणप्रसादलभ्यैव ज्ञानानन्दादिरूपब्रह्मैक्यस्य प्रत्यगात्मनि तात्पर्येण निश्रेयतारूपा विधेयता। एवमेव 'तथा द्रव्येषु गुणश्रुतिरुत्पत्तिसंयोगात्' इति पूर्वतन्त्राधिकरणे 'सोमारौद्रं चरुं निर्वपेत् शुक्लानां व्रीहीणाम्' इत्यत्र पृथक्पदाभ्यां विशेषणतया श्रुतयोर्व्रीहिद्रव्यशुक्लगुणयोरविवक्षामाशङ्क्य ग्राहकविध्याक्षेपबलात् तद्विवक्षा प्राभाकरैः समर्थिता। **श्रौतत्वे इति।** एवं च तद्विधेयमिति गुरुग्रन्थस्य प्रथमारब्धग्राहकग्रहणनिर्वाहाय यत्किंचिद्द्वारेण विध्यन्वयितया शब्दबोध्यमित्यर्थ इति तात्पर्यम्। एवं हि विध्याक्षिप्तस्य श्रौतत्वे संमतिर्दर्शिता भवति। विध्याक्षेपरूपविधिव्यापारात्मकमुपादानं शब्दप्रमाणान्तर्भूतम्; न तु 'पीनो देवदत्तो दिवा न भुङ्क्ते' इति लौकिकवाक्यार्थज्ञानमूल-

प्रतिपत्तिविधिविषयतयैव शास्त्रेण ब्रह्म समर्प्यते; यथा यूपाहवनीयादीन्यलौकिकान्यपि विधिशेषतया शास्त्रेण समर्प्यन्ते, तद्वत्। कुत एतत्?

भामती।

कार्यम्। यथाहुः— 'यत्तु तत्सिद्ध्यर्थमुपादीयते आक्षिप्यते तदपि विधेयमिति तन्त्रे व्यवहारः' इति। विधेयता च नियोगविषयस्य ज्ञानस्य भावार्थतयानुष्ठेयता, तद्विषयस्य त्वात्मनः स्वरूपसत्ताविनिश्चितिः। आरोपिततद्भावस्य त्वन्यस्य निरूपकत्वे तेन तन्निरूपितं न स्यात्। तस्मात्तादृगात्मप्रतिपत्तिविधिपरेभ्यो वेदान्तेभ्यः तादृगात्मविनिश्चयः। तदेतत्सर्वमाह— **यद्यपीति**। विधिपरेभ्योऽपि वस्तुतत्त्वविनिश्चय इत्यत्र निदर्शनमुक्तम्— **यथा यूपेति**। 'यूपे पशुं बध्नाति' इति बन्धनाय विनियुक्ते यूपे, तस्यालौकिकत्वात्कोऽसौ यूप इत्यपेक्षिते 'खादिरो यूपो भवति' 'यूपं तक्षति' 'यूपमष्टाश्रीकरोति' इत्यादिभिर्वाक्यैस्तक्षणादिविधिपरैरपि संस्कारावि[ष्ट] विशिष्टसंस्थानं

कल्पतरुः।

माह— **यथाहुरिति**। तत्सिद्ध्यर्थं विधेयसिद्ध्यर्थम्। **उपादीयते** इत्यस्य व्याख्यानम् **आक्षिप्यते** इति। ज्ञानस्य प्रमात्वात्प्रत्यक्षवन्न विधेयता आत्मनश्च नित्यत्वात्तदयोग इत्याशङ्क्याह— **विधेयता चेति**। ज्ञानमिहोपासनम्, तच्च क्रियेत्यनुष्ठेयम्; आत्मनस्तु स्वरूपसत्ताविनिश्चितिरज्ञातज्ञप्तिर्विधेयतेति न विरोध इत्यर्थः। ननु वाग्धेनूपास्त्यादाविवारोप्यस्य विधेयधीविषयत्वं किं न स्यात्? अत आह— **आरोपितेति**। 'ब्रह्मास्मि' इति ज्ञाने यादृगर्थो भाति तद्भाव आरोपितो यस्य स तथा; तस्यान्यस्य ज्ञाननिरूपकत्वे तेन प्रतिभासमानार्थेन तत् ज्ञानं निरूपितं न स्यात्। न च सत्यां गतौ युक्त आरोप इति। इयं च प्रतिपत्तिविधिविषयतयेति भाष्यस्य व्याख्या। प्रतिपत्तिविधेर्नियोगस्य विषयभूतप्रतिपत्तिं प्रत्यवच्छेदकत्वेन विषयतयेति भाष्यार्थः॥

परिमलः।

श्रुतार्थापत्तिवत् शाब्दप्रमोपजीवि तदनन्तरं प्रवर्तमानं प्रमाणान्तरमिति गुरुमतमर्यादा। नन्वारोपितस्यापि विषयतया निरूपकत्वमस्त्येवेत्याशङ्क्याह— **न च सत्यां गताविति**। गगनस्य तत्तत्कर्णपुटावच्छेदेन प्रतिपुरुषव्यवस्थितश्रोत्रभाववदेकस्यैव व्यापकस्य ब्रह्मचैतन्यस्य तत्तदविद्योपाध्यवच्छेदेन प्रतिशरीरव्यवस्थितप्रत्यगात्मभाव उपपद्यते इत्येवं

प्रवृत्तिनिवृत्तिप्रयोजनपरत्वाच्छास्त्रस्य। तथा हि शास्त्रतात्पर्यविदामनुक्रमणम्— 'दृष्टो हि तस्यार्थः कर्मावबोधनं नाम' इति; 'चोदनेति क्रियायाः प्रवर्तकं वचनम्' 'तस्य ज्ञानमुपदेशः' 'तद्भूतानां क्रियार्थेन समाम्नायः' 'आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानाम्' इति च। अतः पुरुषं क्वचिद्विषयविशेषे प्रवर्तयत्कुतश्चिद्विषयविशेषान्निवर्तयच्चार्थवच्छास्त्रम्। तच्छेषतया चान्यदुपयुक्तम्। तत्सामान्याद्वेदान्तानामपि तथैवार्थवत्त्वं स्यात्। सति च विधिपरत्वे, यथा स्वर्गादिकामस्याग्निहो-

---

भामती।

दारु यूप इति गम्यते। एवमाहवनीयादयोऽप्यवगन्तव्याः। प्रवृत्तिनिवृत्तिपरस्य शास्त्रत्वं न स्वरूपपरस्य कार्य एव च संबन्धो न स्वरूपे, इति हेतुद्वयं भाष्यवाक्येनोपपादितम्—**प्रवृत्तिनिवृत्तिप्रयोजनत्वात्** इत्यादिना **तत्सामान्याद्वेदान्तानामपि तथैवार्थवत्त्वं स्यात्** इत्यन्तेन। न च स्वतन्त्रं कार्यं

कल्पतरुः।

एवमाहवनीयादयोऽपीति। 'यदाहवनीये जुह्वति' इति विहिते क आहवनीय इति वीक्षायाम् 'वसन्ते ब्राह्मणोऽग्नीनादधीत' इत्यादिविधिभिः संस्कारविशिष्टोऽग्निराहवनीय इति गम्यते, तथा अपूर्वदेवतास्वर्गादिकं अन्यविधिपरेणैव शास्त्रेण समर्थ्यते। श्लोकोक्तहेतुद्वयं भाष्येण संगमयति— **प्रवृत्तिनिवृत्तिपरस्येति**। 'तद्भूतानाम्–' इति सूत्रोदाहरणेन कार्यान्वितेऽर्थे शब्दसंगतिर्न सिद्ध इत्युक्तम्। 'आम्नायस्य' इत्येतद्विहायेतरवाक्यैः प्रवृत्त्यादिपरस्य शास्त्रत्वमुक्तम्। तेन तु सिद्धरूपपरस्य न शास्त्रत्वमित्युक्तम्। तस्य वेदस्य कर्मावबोधो नियोगज्ञानं दृष्टं प्रयोजनम्। चोदनासूत्रे चोदनेति शब्देन क्रियाया नियोगस्यानुष्ठापकं वचनमाहुरिति। तत्तेषु पदार्थेषु भूतानां वर्तमानानां पदानां क्रिया कार्यं तदर्थत्वेन समाम्नायः समुच्चारणमित्यर्थः। **न चेति**। नियोगस्य स्वकीयत्वेन बोद्धारं **नियोज्यम्** अधिकारिणं

परिमलः।

गतौ सत्यां वाग्धेनुत्वादिवदारोपो न युक्त इत्यर्थः। **अपूर्वदेवतेति**। सौर्यादावुदीच्याङ्गजन्योपकारसाहित्यायाधिकारविध्याक्षेप्यमौपादानिकं यदुत्पत्त्यपूर्वं तद्विषयमिहापूर्वपदं न त्वधिकारापूर्वविषयम्, प्रस्तुते गुरुमते तस्यैव लिङर्थस्य विधितया अन्य-

त्रादिसाधनं विधीयते, एवममृतत्वकामस्य ब्रह्मज्ञानं विधीयत इति यु-

भामती ।

नियोज्यमधिकारिणमनुष्ठातारमन्तरेणेति नियोज्यभेदमाह— **सति च विधिपरत्व इति** । 'ब्रह्म वेद ब्रह्मैव भवति' इति सिद्धवदर्थवादादवगतस्यापि ब्रह्मभवनस्य नियोज्यविशेषाकाङ्क्षायां ब्रह्म बुभूषोर्नियोज्यविशेषस्य रात्रिसत्रन्यायेन प्रतिलम्भः । पिण्डपितृयज्ञन्यायेन तु स्वर्गकामस्य नियोज्यस्य कल्प-

कल्पतरुः ।

कर्माणि स्वामिनं तत्रैव कर्तारम् **अनुष्ठातारम् इति** । नियोज्यभेदो नियोज्यविशेषः । 'अमृतत्वकामः' इति अश्रवणान्नियोज्यासिद्धिमाशङ्क्याह— **ब्रह्म वेदेति** । भवतीति सिद्धरूपेणावगतस्य फलस्य साध्यत्वाभिव्यक्त्यर्थमेवंकामशब्दवाच्यनियोज्यविशेषाकाङ्क्षायां विपरिणामेन ब्रह्म बुभूषुर्विद्यादिति वाक्यार्थः स्यादित्यर्थः ॥

रात्रिसत्रेति । चतुर्थे चिन्तितम्— 'क्रतौ फलार्थवादमङ्गवत्काष्णाजिनिः' 'प्रतितिष्ठन्ति ह वा य एता रात्रीरुपयन्ति' इति श्रूयते । तत्र रात्रिशब्देन आयुः ज्योतिः इत्यादिवाक्यविहिताः सोमयागविशेषा उच्यन्ते । किमत्र स्वर्ग एवाधिकारिविशेषणमुत प्रतिष्ठेति संशयः । तत्रैवंकामा इत्यश्रवणाद्विधिशक्तिलभ्यः स्वर्ग एव विशेषणम् । संदेहे हि वाक्यशेषस्वीकारो न निश्चये । निश्चितश्चेह सर्वाभिलषितः स्वर्गो विधिसामर्थ्यान्नियोज्यविशेषणम् । या तु प्रतिष्ठाविषया श्रुतिः सापि लक्षणया स्वर्गपरैव कल्प्यत इति प्राप्तम् । क्रतौ रात्रिसत्रादौ न प्रतिष्ठादि विवक्षितमित्येतावन्मात्रेण 'अङ्गवत्–' इति सूत्रे प्रयाजाद्यङ्गफलार्थवादोदाहरणम् ; न तु तद्वत् परार्थत्वमस्ति रात्रिसत्राणाम् । एवं प्राप्ते, उच्यते— 'फलमात्रेयो निर्देशादश्रुतौ ह्यनुमानं स्यात्' । प्रतिष्ठाफलस्य निर्देशात्तदेवाधिकारिविशेषणम् । यत्तु विधिशक्त्या स्वर्ग इति तन्न । मुख्यार्थश्रुतिपदानुगुण्येन विधिशक्तौ पर्यवसि-

परिमलः ।

विधिपरेण शास्त्रेण सिद्ध्यभावात् । **एवंकाम इत्यश्रवणादिति** । वर्तमानापदेशात् सिद्धरूपैव प्रतिष्ठा प्रतीयते न साध्यरूपेति तस्या अपि फलत्वं कल्प्यम्, ततो वरं विश्वजिन्न्यायेन विधिशक्त्यवगतस्वर्गफलकल्पनमिति भावः । **प्रतिष्ठाफलस्य निर्देशादिति** । अत्यन्ताश्रुतफलकल्पनाद्वरं श्रुताया एव प्रतिष्ठाया विपरिणामेन फलत्वकल्पनम् । तथा च यत्तदोर्व्यत्यासेन योजनया 'प्रतितिष्ठन्ति' इत्यत्र सनर्थान्तर्भावनेन च ये प्रति-

भामती ।

नायामर्थवादस्यासमवेतार्थतयात्यन्तपरोक्षा वृत्तिः स्यादिति । ब्रह्मभावश्चामृतत्व-

कल्पतरुः ।

तायामानुमानिकस्वर्गकल्पनानवकाशात् । तस्माद्वाक्यशेषस्थमेव फलमिति । विश्व-जिन्न्यायेनेति वक्तव्ये विश्वजिति नैमित्तिकाधिकारे फलकल्पना कृत्वाचिन्तयेति पिण्डपितृयज्ञः स्थिरोदाहरणत्वेनोदाहृतः । **असमवेतार्थतयेति** । अश्रूयमाणत्वेन ब्रह्मभवनशब्देनासमवेतः स्वर्गोऽर्थस्तत्परतयेत्यर्थः । यद्यपि ब्रह्मभवनस्य फलत्वेऽप्येवंक्राम इति लक्षणास्तीति परोक्षवृत्तिता तुल्या, तथापि श्रुतं ब्रह्मभवनं न हीयते, हीयते तु पूर्वपक्षे । तदिदमुक्तम्– **अत्यन्तेति** । पिण्डपितृयज्ञन्यायोऽनुक्रम्यते । चतुर्थे एव निरणायि— 'पितृयज्ञः स्वकालत्वादनङ्गं स्यात्' । 'अमावास्यायामपराह्णे पिण्ड-पितृयज्ञेन चरन्ति' इत्यत्रानारभ्याधीतवाक्ये श्रुतः पिण्डपितृयज्ञः क्रत्वर्थः पुरुषार्थो वेति संशये, कर्मवाच्यमावास्याशब्दसमभिव्याहारात्तदङ्गत्वम् । यद्यपि कालस्यापि साधारणोऽयं शब्दः, तथापि फलकल्पनापरिहाराय कर्मवाच्येव । अतः क्रत्वर्थ इति प्राप्ते, सिद्धान्तः— कालकर्मसाधारणोऽप्यमावास्याशब्दोऽपराह्णशब्दसमानाधिकृत इह कालपर एव । न च साधारण्यम्, काले रूढत्वात्कर्मणि च तत्संबन्धेन लाक्षणिकत्वात् । तस्मात्कर्मसमभिव्याहाराभावाद्विश्वजिन्न्यायेन स्वर्गकामनियोज्यकल्पनया स्वर्गफलः पिण्डपितृयज्ञ इति ॥

परिमलः ।

तिष्ठासन्ति त एता रात्रीरुपेयुरिति वाक्यविपरिणामः कार्य इति भावः । **नैमित्तिकाधिकारे इति** । 'यः सत्रायागुरते स विश्वजिता यजेत' इति विहितो विश्वजिन्नैमित्तिकाधिकारः । ननु 'पितृयज्ञः स्वकालत्वादनङ्गं स्यात्' 'अङ्गं वा समभिव्याहारात्' इति याज्ञिकाभिमतद्वितीयपक्षानुसारेण पितृयज्ञो यदि दर्शाङ्गमिष्यते तदा सोऽपि नियोज्याकाङ्क्षाराहित्यात्स्थिरोदाहरणं न स्यात् इत्याशङ्कापरिहाराय तदनङ्गत्वव्यवस्थापकाधिकरणानुक्रमणम् । दर्शप्रकरणपठितत्वे प्रकरणात् तदङ्गत्वमेव स्यादित्यनारभ्याधीतत्वोक्तिः । ननु 'पूर्वेद्युरमावास्यायां वेदिं करोति' इति कर्मणीव 'ऐन्द्रं पयोऽमावास्यायाम्' इति कालेऽप्यमावास्याशब्दो दृश्यत इत्याशङ्क्याह– **यद्यपीति** । ननु यदि प्रकृतम् 'सा वैश्वदेवी' इति तत्पदेन परामर्शनीयं तर्हि दध्यपि प्रकृतमिति तद्वा परामर्शनीयं कुतो न स्यात्; तस्माद्विनिगमनाविरहादुभयं विहायामिक्षा दधिपयोभ्यां निष्पन्नं द्रव्यान्तरमित्यङ्गीकृत्य तत्परामर्शित्वकल्पनं युक्तम् । सर्वनाम्नः प्रकृतपरामर्शित्वासंभवे प्रकरिष्यमाण-

क्तम् । नन्विह जिज्ञास्यवैलक्षण्यमुक्तम्— कर्मकाण्डे भव्यो धर्मो जिज्ञास्यः, इह तु भूतं नित्यनिर्वृत्तं ब्रह्म जिज्ञास्यमिति; तत्र धर्मज्ञानफलादनुष्ठानसापेक्षाद्विलक्षणं ब्रह्मज्ञानफलं भवितुमर्हति । नार्हत्येवं भवितुम्, कार्यविधिप्रयुक्तस्यैव ब्रह्मणः प्रतिपाद्यमानत्वात् । 'आत्मा वा अरे द्रष्टव्यः' 'य आत्मापहतपाप्मा··· सोऽन्वेष्टव्यः स विजिज्ञासितव्यः' 'आत्मेत्येवोपासीत' 'आत्मानमेव लोकमुपासीत' 'ब्रह्म वेद ब्रह्मैव भवति' इत्यादिषु विधानेषु सत्सु, 'कोऽसावात्मा?' 'किं तद्ब्रह्म?'

भामती ।

मिति अमृतत्वकामस्य इत्युक्तम्। अमृतत्वं च अमृतत्वादेव, न कृतकत्वेन शक्यमनित्यमनुमातुम्, आगमविरोधादिति भावः। उक्तेन धर्मब्रह्मजिज्ञासयोर्वैलक्षण्येन विध्यविषयत्वं चोदयति— **नन्विति** । परिहरति— **नार्हत्येवमिति** । अत्र चात्मदर्शनं न विधेयम् । तद्धि दृशेरुपलब्धिवचनत्वात् श्रावणं वा स्यात् प्रत्यक्षं वा । प्रत्यक्षमपि लौकिकमहंप्रत्ययो वा, भावनाप्रकर्षपर्यन्तजं वा । तत्र श्रावणं न विधेयम्, स्वाध्यायविधिनैवास्य प्रापितत्वात्, कर्मश्रावणवत् । नापि लौकिकं प्रत्यक्षम्, तस्य नैसर्गिकत्वात् । न चौपनिषदात्मविषयं भावनाधेयवैशद्यं विधेयम्, तस्योपासनाविधानादेव वाजिनवदनुनिष्पादितत्वात् । तस्मा-

कल्पतरुः ।

ननु ज्ञानविधिर्यदि ब्रह्मभावफलः कथं तर्हि भाष्ये अमृतत्वकामस्येत्युक्तम्, तत्राह— **ब्रह्मभावश्चेति** । अमृतत्वशब्देन ब्रह्मभावनिर्देशस्य प्रयोजनमाह— **अमृतत्वं चेति** । अत्र भाष्यकारेण ब्रह्मज्ञानं विधेयमिति निर्देशात् द्रष्टव्य इति विध्युदाहृतेश्च प्रमाणज्ञानविध्यङ्गीकारेण पूर्वपक्ष इति भ्रमः स्यात् तन्निवर्तयति— **अत्र चेत्यादिना** । **दृशेरिति** । 'द्रष्टव्यः' इति वाक्योपात्तदृशिधातोरुपलब्धिवचनत्वेनोपासनानभिधायकत्वादित्यर्थः । स्वाध्यायविधेरर्थावबोधपर्यन्तत्वात्तेनैव श्रवणजन्यज्ञानस्य प्रापितत्वादित्यर्थः । भावनयाधेयं जन्यं वैशद्यं यस्य तत्प्रत्यक्षं तथा । **वाजिनवदिति** । यथा आमिक्षार्थविहितदध्यानयनाद्वाजिनमप्रयोजकमानुषङ्गिकतया जायते एवमदृष्टरूपामृतत्वाय विहितादुपासनात्साक्षात्कारो नान्तरीयिकतया जायत इति तदुत्पादनं न विधेयमित्यर्थः । चतुर्थे स्थितम्— 'एकनिष्पत्तेः

इत्याकाङ्क्षायां तत्स्वरूपसमर्पणेन सर्वे वेदान्ता उपयुक्ताः— नित्यः सर्वज्ञः सर्वगतो नित्यतृप्तो नित्यशुद्धबुद्धमुक्तस्वभावो विज्ञानमानन्दं ब्रह्म इत्येवमादयः । तदुपासनाच्च शास्त्रदृष्टोऽदृष्टो मोक्षः फलं भविष्यति । कर्तव्यविध्यननुप्रवेशे तु वस्तुमात्रकथने हानोपादानासंभवात् 'सप्तद्वीपा वसुमती' 'राजासौ गच्छति' इत्यादिवाक्यवद्वेदान्तवाक्यानामानर्थक्यमेव स्यात् । ननु वस्तुमात्रकथनेऽपि 'रज्जुरियम्, नायं सर्पः' इत्यादौ भ्रान्तिजनितभीतिनिवर्तनेनार्थवत्त्वं दृष्टम्; तथेहाप्यसंसार्यात्मवस्तुकथनेन संसारित्वभ्रान्तिनिवर्तनेनार्थवत्त्वं स्यात् । स्यादेतदेवम्, यदि रज्जुस्वरूपश्रवणमात्रेणेव सर्पभ्रान्तिः, संसारित्वभ्रान्तिर्ब्रह्मस्वरूपश्रवणमात्रेण निवर्तेत; न तु निवर्तते; श्रुतब्रह्मणोऽपि यथापूर्वं सुखदुःखादिसंसारिधर्मदर्शनात्, 'श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' इति च श्रवणोत्तरकालयोर्मननिदिध्यासनयोर्विधिदर्शनात् । तस्मात्प्रतिपत्तिविधिविषयतयैव शास्त्रप्रमाणकं ब्रह्माभ्युपगन्तव्यमिति ॥

भामती ।

दौपनिषदात्मोपासना अमृतत्वकामं नियोज्यं प्रति विधीयते । 'द्रष्टव्यः' इत्यादयस्तु विधिसरूपा न विधय इति । तदिदमुक्तम्— **तदुपासनाच्चेति** । अर्थ-

कल्पतरुः ।

सर्वं समं स्यात्' । 'तप्ते पयसि दध्यानयति सा वैश्वदेव्यामिक्षा वाजिभ्यो वाजिनम्' इति श्रूयते । तत्र संशयः– किमामिक्षैव दध्यानयनं प्रयुञ्जीत उत वाजिनमपीति । तत्रैकस्माद्ध्यानयनात्पयसः सकाशादामिक्षावाजिनयोर्निष्पत्तेः सर्वमामिक्षादि प्रयोजकं स्यादिति प्राप्ते, राद्धान्तः— 'संसर्गरसनिष्पत्तेरामिक्षा वा प्रधानं स्यात्' । अत्र हि दधिसंसृष्टं पय एव प्रकृतं देवतासंबन्धि निर्दिश्यते सा वैश्वदेवीति । न पुनस्ततो निष्पन्नं किंचित्तत्रानयतेर्द्विकर्मकत्वाद्यत्प्रति दध्यानीयते तत्पय आनयनस्य

परिमलः ।

परामर्शित्वस्य 'अथैष ज्योतिः' इत्यादौ दृष्टत्वादित्याशङ्क्याह– **तत्रानयतेरिति** । द्विकर्म-

अत्राभिधीयते— न, कर्मब्रह्मविद्याफलयोर्वैलक्षण्यात् । शारीरं वाचिकं मानसं च कर्म श्रुतिस्मृतिसिद्धं धर्माख्यम्, यद्विषया जिज्ञासा

भामती ।

वत्तया मननादिप्रतीत्या चेत्यस्य शेषः प्रपञ्चो निगदव्याख्यातः । तदेकदेशिमतं दूषयति— **अत्राभिधीयते**– न एकदेशिमतम् । कुतः? **कर्मब्रह्म-**

कल्पतरुः ।

संस्कार्यम् । संस्कारस्य कर्मणः संस्कार्यमेव प्रयोजकम् । संस्कृतस्य च पयस आमिक्षात्वात् तस्याश्च स्त्रीत्वात्स्त्रीलिङ्गमविरुद्धम् । ननु यदि दधिसंस्कृतं पय एव रूपभेदेऽप्यामिक्षा भूत्वा दध्यानयनं प्रयुञ्जीत तर्हि वाजिनमपि दधिसंयुक्तं पय एवेति किं न प्रयुञ्जीत । नेत्युच्यते, संसर्गरसनिष्पत्तेः । दधिसंसृष्टस्य पयसो यो रसः तस्यामिक्षायामुपलम्भाद्रूपभेदेऽपि तस्यामस्ति संसृष्टं पय इति अनुमीयते । रूपाभेदेऽपि तक्रपयसोः रसभेदेन भेदोपलम्भात् ; न वाजिने, तस्य कटुतिक्तरसत्वादिति । हेतुद्वयविवरणेन पूर्वकृतेनोत्तरग्रन्थस्य व्याख्यातत्वमाह— **अर्थवत्तयेति** । 'वेदान्ता यद्युपासां वि-

परिमलः ।

कधात्वर्थान्वयि पयोऽपि कर्मैव ; तत्र कस्यानयनेन किं संस्कार्यमिति संदेहे दध्यानयनेन पयः संस्कार्यमिति पयसः प्रधानकर्मत्वद्योतनाय कर्मण्यपि तस्मिन् सप्तमीप्रयोगः । यच्च प्रधानं तदेव सर्वनाम्ना परामर्शनीयम् । अतः पयःपरामर्शितच्छब्दसामानाधिकरण्यादामिक्षाशब्दो दध्यानयनेन संस्कृतस्य पयस एव वाचकः, न तदुत्पन्नस्य द्रव्यान्तरस्येत्यवसीयत इत्याशयः । **रूपभेदेऽपि** द्रवत्वकठिनत्वधर्मभेदेऽपि । **तर्हि वाजिनमपीति** । दधिसंस्कृतं पय एवामिक्षावाजिनात्मतया रूपद्वयं प्राप्तमित्यपि कल्पनोपपत्तेरामिक्षावत् वाजिनमपि पयस्त्वाविशेषात् दध्यानयनस्य प्रयोजकं भवेदेव । ततश्च वाजिनापचारे पयोन्तरमानीय दध्यानयनेन संस्कृत्य वाजिनं निष्पादनीयमिति शङ्कार्थः । **तस्यामस्तीति** । तादात्म्येनेति शेषः । **रूपाभेदेऽपि** द्रवत्वधर्माभेदेऽपि । एतदुपलक्षणम् । विनापि दध्यानयनम् अतिपाकेन पिण्डीभूतस्य पयसो रूपभेदेऽपि भेदाभावादित्यपि द्रष्टव्यम् । एवं रसानुवृत्तेरेवाभेदप्रयोजकत्वादामिक्षायामेव पयःपरामर्शितत्पदसामानाधिकरण्यं दृश्यते न वाजिने इति भावः । यद्विषया जिज्ञासा इत्यादिभाष्यगतविशेषणैः प्रतीयमानावेदान्तानामुपास्तिविधिपरत्वे प्राचि तन्त्रे विचारितत्वेनात्र विचारो विफलः स्यादिति युक्तिः 'वेदान्ता यद्युपासाम्–' इति श्लोकपूर्वार्धेन संगृहीता ; सा न

भामती ।

विद्याफलयोर्वैलक्षण्यात् । पुण्यापुण्यकर्मणोः फले सुखदुःखे । तत्र मनुष्यलोकमारभ्य आ ब्रह्मलोकात्सुखस्य तारतम्यमधिकाधिकोत्कर्षः । एवं मनुष्यलोकमारभ्य दुःखतारतम्यमा चावीचिलोकात् । तच्च सर्वं कार्यं च विनाशि च । आत्यन्तिकं त्वशरीरत्वमनतिशयं स्वभावसिद्धतया नित्यमकार्यमात्मज्ञानस्य फलम् ।

कल्पतरुः ।

दधति विधिसंशोधिमीमांसयैव प्राच्या तहींरितार्था इति विफलमिदं ब्रह्मजिज्ञासनं स्यात् । अप्यत्युच्चातिनीचो जनिमृतिभयभाग्वैधधीसाध्यमोक्षः कर्मोत्थैः स्वर्गपश्वाद्यतिमधुरफलैः कोऽपराधः कृतो नः' । वेदान्ता यद्युपासनाविधिपरास्तर्हि विहितोपासनायाः पक्षमासादिकालमिततया तत्साध्यफलमपि सातिशयमनित्यं च स्यात्; अतो न विधिपरत्वं वेदान्तानामिति तात्पर्यम् अतो न कर्तव्यशेषत्वेन ब्रह्मोपदेशो युक्तः इत्यन्तस्य भाष्यस्य दर्शयति— **पुण्यापुण्येत्यादिना** । भाष्ये यद्विषया जिज्ञासेति धर्मस्य प्राचि तन्त्रे विचारितत्वोक्तिः उपास्तेरपि विहितायाः धर्मत्वेन पुनरविचार्यत्वाय । अधर्मोऽपीत्यधर्मोक्तिः पुण्यफलभोगावसान इवोपास्तिफलभोगसमाप्तावधर्मफलं भोक्तव्यमिति दर्शनाय । चोदनालक्षणत्वोक्तिः यागवद्विहितोपास्तेर्धर्मत्वाय । एवं शरीरवागित्यादिविशेषणानि कर्मफलवदुपास्तिफलस्य शरीरोपभोग्यत्वादि प्रसञ्जयितुम् । संपतत्यनेनास्माल्लोकादमुं लोकमिति संपातः कर्म । इष्टं श्रौतम् । पूर्तं स्मार्तं वाप्यादि । दत्तं दानमिति । **आत्यन्तिकमिति** । देवदत्तस्यात्यन्तिकमशरीरत्वं देवदत्तशरीरप्रागभावासमानकालीनो

परिमलः ।

क्षोदक्षमा वैधफलविषयतया स्वर्गदेवतावत् विधिशेषैः ब्रह्मस्वरूपमात्रस्य प्राचीनतन्त्रन्यायैः कथंचित्सिद्धिसंभवेऽपि तन्निर्गुणत्वादेर्विद्याभेदाभेदोपसंहारानुपसंहारस्य विशेषस्य च एतत्तन्त्रव्युत्पादयिष्यमाणन्यायैकनिर्णेयस्य ततो निर्णयालाभात् । अतोऽभ्युच्चयमात्रं सा युक्तिः । मूलयुक्तिस्तु श्लोकोत्तरार्धसंगृहीता मोक्षस्य सातिशयत्वानित्यत्वापत्तिः इत्येतत् सूचयितुं तत्रैव भाष्यस्य तात्पर्यं दर्शयति टीकाकार इत्यवतारयति— **वेदान्ता यद्युपासनाविधिपरा इति ॥**

अधर्मफलं भोक्तव्यमिति । 'तद्य इह कपूयचरणाः—' इत्यादिश्रुत्या धर्मफलभोगानन्तरं कदाचिदधर्मफलभोगस्याप्युक्तत्वादिति भावः । इदमप्यभ्युच्चयमात्रम्, अहंग्रहोपासनाभिस्तत्फलप्राप्तेः प्रागेव सर्वपापक्षयस्याङ्गीकृतत्वात् । **देवदत्तशरीरेति** ।

परिमलः ।

देवदत्तशरीरासमानकालीनत्वं प्रलयकालोत्पन्ने तदीयशरीरध्वंसेऽप्यस्तीति तद्वारणाय प्रागभावविशेषणम् । शरीरप्रागभावासमानकालीनत्वं चरममुक्तशरीरध्वंसादन्यत्र न संभवतीत्यव्याप्तिवारणायाद्यदेवदत्तविशेषणम् । देवदत्तमुक्तिकाले तदन्यस्यापि कस्यचित् संसारिणः संभवति देवदत्तशरीरप्रागभावासमानकालीनः शरीरध्वंसः स आत्यन्तिको मा भूदिति द्वितीयदेवदत्तविशेषणम् । एवमपि देवदत्तस्योपान्त्यशरीरध्वंसो यद्यन्त्यशरीरोत्पत्तिकाले तदुत्पत्त्यनन्तरं वा स्यात्, तदा सोऽप्यात्यन्तिको भवेदिति तद्वारणाय शरीरतत्प्रागभावासमानकालीनत्वं विवक्षितम् ॥

ननु आत्यन्तिकमशरीरत्वम् इत्थं ध्वंसरूपतया निर्वक्तुमयुक्तम्, तस्य साध्यत्वेन वैधोपासनाफलत्वप्रसङ्गात् । किं तु भाष्यटीकोक्तप्रकारेण तत्फलत्वासंभवनिर्वाहाय शरीराद्यवभासकालेऽप्यनुवर्तमानः तन्मिथ्यात्वशरीरघटको यस्तदत्यन्ताभावः तद्रूपो वाच्यः । अन्यथा भाष्यटीकाविरोधः स्यादिति चेत्, उच्यते– यद्यात्यन्तिकाशरीरत्वस्य वैधफलत्वनिर्वाहायात्यन्ताभावत्वं परित्यज्य विद्योदयसमनन्तरभाविध्वंसरूपत्वं पूर्वपक्षी शङ्कते, तदापि तस्य न वैधफलत्वप्रत्याशा; शरीरध्वंसमात्रस्यापुरुषार्थत्वेन शरीरस्यान्येषां चोपाधीनां ध्वंसेनोपलक्षितस्य ब्रह्मानन्दस्यैव पुरुषार्थत्वात् तस्य च नित्यत्वात् इति दर्शयितुं ध्वंसपक्षोऽप्युपन्यस्तः । तथैव च तात्पर्यं सर्वोपाधीत्याद्यग्रिमवाक्येन स्फुटीकृतम् । ननु ब्रह्मानन्दस्य नित्यप्राप्तत्वेऽपि कण्ठगतरुचकवत् भ्रान्त्या अनवाप्तकल्पस्यावाप्त्या अमुख्यफलत्वमभ्यधायि टीकायाम्, तस्य मुख्यफलत्वमप्युपपादयितुं शक्यम् 'यस्मिन्सत्यग्रिमक्षणे यस्य सत्त्वं यद्व्यतिरेके चासत्त्वं तत्तज्जन्यम्' इति लक्षणानुसारेण; 'अस्ति हि विद्योदयात् प्राक् 'मम निरतिशयानन्दो नास्ति, न प्रकाशते' इति व्यवहारालम्बनं रजते रजतत्वाभाववत् भ्रान्तिसिद्धं विद्यानिवर्त्यं निरतिशयानन्दाभावरूपं तदसत्त्वम्; न च प्रतियोगिव्यधिकरणं प्राक् तदसत्त्वं यस्यास्ति तथाभूतमेव जन्यं वैधफलमिति नियमः, अतथाभूतस्यापि दुःखप्रागभावपरिपालनादेः प्रायश्चित्तादिफलत्वसंप्रतिपत्तेः; तस्मात् ब्रह्मानन्दस्य नित्यत्वेऽपि वैधोपासनाफलत्वमुपपद्यत इति तन्नित्यत्वेन तत्फलत्वाभावोपपादनं नोपपद्यत इति चेत्, उच्यते— प्राक्सिद्धस्य फलत्वं द्वेधा निवृत्तिप्रसक्तौ परिपाल्यत्वेन वा अनवाप्तत्वभ्रान्तौ तदपनयेन वा । तत्राद्यमेव लौकिकेन वैदिकेन वा कर्मणा भवति; द्वितीयं तु विद्ययैव । सा च विद्या अत्र अविहितोपासनया षड्जादिसाक्षात्कारवत् स्वयमेव भवतीति विध्यनपेक्षा टीकायामेवोपपादिता । तस्माद्युक्तमेव भ्रान्त्या अनवाप्तकल्पस्य ब्रह्मानन्दस्य नोपासनाविधिफलत्वमिति ॥

भामती।

तद्धि फलमिव फलम्, अविद्यापनयनमात्रेणाविर्भावात्। एतदुक्तं भवति—त्वयाप्युपासनाविधिपरत्वं वेदान्तानामभ्युपगच्छता नित्यशुद्धबुद्धत्वादिरूपब्रह्मात्मता जीवस्य स्वाभाविकी वेदान्तगम्यास्थीयते। सा चोपासनाविषयस्य विधेर्न फलम्, नित्यत्वादकार्यत्वात्। नाप्यनाद्यविद्यापिधानापनयः, तस्य स्वविरोधिविद्योदयादेव भावात्। नापि विद्योदयः, तस्यापि श्रवणमननपूर्वकोपासनाजनितसंस्कारसचिवादेव चेतसो भावात्। उपासनासंस्कारवदुपासनापूर्वमपि चेतःसहकारि, दृष्टं च खलु नैयोगिकं फलमैहिकमपि, यथा चित्राकारीर्यादिनियोगानामनियतानियतफलानामैहिकफलतेति चेत्, न, गान्धर्वशास्त्रार्थोपासनावासनाया इवापूर्वानपेक्षायाः षड्जादिसाक्षात्कारे वेदान्तार्थोपासनावासनाया जीवस्य ब्रह्मभावसाक्षात्कारेऽनपेक्षाया एव सामर्थ्यात्। तथा चामृतीभावं प्रत्यहेतुत्वादुपासनापूर्वस्य, नामृतत्वकामस्तत्कार्यमवबोद्धुमर्हति। अन्यदिच्छत्यन्य-

कल्पतरुः।

देवदत्तशरीरध्वंसः, सर्वोपाधिप्रत्यस्तमयोपलक्षितं स्वरूपमिति यावत्। विधेयोपास्तिवादिनं प्रति तत्फलस्य मोक्षस्य अनित्यत्वादिप्रसङ्गनमिष्टप्रसङ्ग इत्याशङ्क्याह—एतदुक्तमिति। उपास्तिविधेः फलं ब्रह्मात्मत्वमुताविद्यानिवृत्तिर्विद्योदयो वेति विकल्प्य क्रमेण निराकरोति—त्वयापीत्यादिना। उपासनापूर्वमपि चेतःसहकारि, ततश्च विध्यवकाश इत्यर्थः। ऐहिकस्य मर्दनसुखवन्न विधिफलत्वमित्याशङ्क्याह—दृष्टं चेति। कारीर्यादिनियोगा इह जन्मनि नियतसस्यद्धर्यादिफलाः, चित्रादिनियोगफलं पश्वादि भुवि भोग्यमपीह जन्मनि वा जन्मान्तरे वा भवति। तत्कार्यमिति।

परिमलः।

कारीर्यादिनियोगा इति। 'यदि वर्षेत्तावत्येव होतव्यं यदि न वर्षेत् श्वोभूते हविर्निर्वपेत्' इत्यादिलिङ्गात् कारीरी तात्कालिकसस्यार्थवृष्टिहेतुत्वादैहिकफला। आदिशब्देन 'आग्नेयं कृष्णग्रीवमालभेत सौम्यं बभ्रुं ज्योगामयाव्यग्निं वा एतस्य शरीरं गच्छति सोमं रसो यस्य ज्योगामयत्यग्नेरेवास्य शरीरं निष्क्रीणाति सोमाद्रसमुत यदीतासुर्भवति जीवत्येव' इत्यादिश्रुतिविहितानि तच्छरीरगतव्याधिनिवृत्त्याद्यर्थानि कर्माणि गृह्यन्ते। ज्योगामयावी दीर्घरोगी। चित्रादिनियोगफलमिति। इदं चतुर्थे योगसिद्ध्यधिकरणस्य द्वितीयवर्णके चिन्तितम्। तदेवम् 'चित्रया यजेत पशुकामः' इत्यादिविधिविहितानां मनुष्यशरीरोपभोगयोग्यफलकानां कर्मणां किं नियमेन देहान्तरे फलम्

भामती ।

त्करोतीति हि विप्रतिषिद्धम् । न च तत्कामः क्रियामेव कार्यमवगमिष्यति नापूर्वमिति सांप्रतम्, तस्या मानान्तरादेव तत्साधनत्वप्रतीतेर्विधेर्वैयर्थ्यात् । न चावघातादिविधितुल्यता, तत्रापि नियमापूर्वस्यान्यतोऽनवगतेः । न च ब्रह्मभूयादन्यदमृतत्वमार्थवादिकं किंचिदस्ति, येन तत्काम उपासनायामधि-

कल्पतरुः ।

तत् अपूर्वं कर्तव्यत्वेनावबोद्धुं नार्हतीत्यर्थः । अपूर्वं चेन्न साक्षात्कारोपयोगि, तर्ह्युपासनक्रियैव तदर्थं विधीयताम्, नेत्याह— न च तत्काम इति । नन्ववघातवदुपास्तावप्यस्तु नियमापूर्वम्, नेत्याह— न च ब्रह्मभूयादिति । नेह परमापूर्ववन्नियमापूर्वसाध्यमस्ति ब्रह्मभावस्य नित्यत्वादित्यर्थः ॥

परिमलः ।

उत तस्मिन् देहे देहान्तरे वेत्यनियम इति संशये, पूर्वपक्षः— वर्तमानदेहारम्भककर्मणां यत् फलं तद्भोगार्थत्वाद्वर्तमानदेहस्य तत्फलभोगावसाने तन्नाशावश्यम्भावात्, अन्येष्टौ 'दक्षिणे हस्ते जुहूं सादयति' इत्यादिवाक्यैर्यज्ञपात्राणां प्रतिपत्तिविधानेन तदपेक्षचित्राद्यदृष्टोत्पत्तिसमनन्तरभाविफलस्य वर्तमानदेहभोग्यत्वासंभवाच्च स्वर्गजनकादृष्टवत् चित्राद्यदृष्टस्यापि स्वफलभोगप्रदानार्थं तद्योग्यदेहारम्भकत्वनियमाच्च नियमेन देहान्तर एव चित्रादिफलमिति । सिद्धान्तस्तु— ऐहिकमपि चित्रादिफलं भवत्येव चित्राद्यनुष्ठानानन्तरं पश्वादिफलदर्शने तदर्थं तदतिरिक्तादृष्टकल्पनाहेत्वभावात्, अनन्तरमेव फलादर्शने देशकालादिसहकार्यपेक्षया विलम्बः कल्प्यः, तस्मिन् देहे फलादर्शने तत्फलभोगविरोधिप्रारब्धकर्मणा प्रतिबन्धः कल्प्यः, प्रतिबन्धेन च तेन देहान्तरारम्भपूर्वकं तत्र फलं दातव्यमिति कल्प्यम् । वर्तमानदेहारम्भककर्मणो देशकालाद्यपेक्षया यदा न फलप्रदत्वं तदा तस्मिन् देहे तज्जन्मकृतचित्राद्यदृष्टस्यापि फलप्रदत्वमुपपद्यते । पात्रप्रतिपत्तिस्तु सकलकर्मानुष्ठानसमाप्त्यनन्तरभावित्वात् पुरुषार्था ; क्रत्वर्थत्वेऽप्यदत्तफलक्रतुमात्रार्था ; 'आहिताग्निमग्निभिर्दहन्ति यज्ञपात्रैश्च' इति श्रुतेर्दहने विनियोक्ष्यमाणानां यज्ञपात्राणां संस्कारार्था वा ; अन्यथा कारीर्यादीनामैहिकफलत्वाभावप्रसङ्गात् । एतेन कर्मणां फलप्रदानार्थं देहारम्भकत्वनियमोऽपि निरस्तः । तस्मादामुष्मिकत्वानियमश्चित्रादिफलस्येति । नेह परमापूर्ववदिति । यद्यप्याचार्यमते अवघातादिनियमः प्रत्यासन्नाग्नेयाद्यवान्तरापूर्वप्रयुक्तः तथापि गुरुमते फलवत्परमापूर्वप्रयुक्त इति तन्मतमनुसृत्य परमापूर्वेत्युक्तम् । न चावघातनियमस्य परमापूर्वप्रयुक्तत्वे तत्साधनत्वाविशेषादाज्यसांनाय्य-

भामती।

क्रियेत, विश्वजिन्न्यायेन तु स्वर्गकल्पनायां तस्य सातिशयत्वं क्षयिष्णुत्वं चेति न नित्यफलत्वमुपासनायाः। तस्माद्ब्रह्मभूयस्याविद्यापिधानापनयमात्रेणाविर्भावात्, अविद्यापनयस्य च वेदान्तार्थविज्ञानादवगतिपर्यन्तादेव संभवात्, उपासनायाः संस्कारहेतुभावस्य संस्कारस्य च साक्षात्कारोपजनने मनःसाचिव्यस्य च

कल्पतरुः।

विश्वजिन्न्यायेनेति। 'विश्वजिता यजेत' इत्याद्यश्रुताधिकारं लिङ्गप्रकरणालब्धाधिकारं चोदाहरणम्। निषेधे हि सामर्थ्यात्प्रवृत्तक्रियोऽधिकारी लभ्यते, अङ्गविधिषु तु प्रकरणात् इति न चिन्त्योऽधिकारः। एवं सतीह संदेहः किं नियोज्योऽध्याह्रियतां न वेति। तत्र लोके 'द्वारं द्वारम्' इत्यादौ क्रियया विना कारकाभिधानापर्यवसानाद्युक्तोऽध्याहारः; इह तु विषयेण कार्यस्यान्विताभिधानपर्यवसानादनध्याहारे प्राप्ते, उच्यते— अत्राप्यभिधेयापर्यवसानद्वारा अभिधानापर्यवसानमेव; कार्यं हि कृतिसाध्यत्वेन कृतिनिरूप्यम्; नरव्यापाररूपा च कृतिः; सा च यथा

परिमलः।

योरप्यवघातप्रसङ्गः, तुषविमोकादिदृष्टप्रयोजनव्यवस्थया व्रीह्यादिषु तद्व्यवस्थोपपत्तेः; अन्यथाम्नेयाद्यपूर्वप्रयुक्तत्वेऽपि तत्साधनस्रुगादिसाधारण्यप्रसङ्गानिवारणादिति भावः। विश्वजिन्न्यायं गुरुमतेनोपन्यस्यति— **विश्वजितेति**। **प्रवृत्तक्रियः** प्रवृत्तचिकीर्षः। 'न कलञ्जं भक्षयेत्' इत्यादिनिषेधवाक्यान्यपि फलतो विधिवाक्यानि, तत्र भक्षयत्यादिधातुसमभिव्याहृतनञ्प्रतिपाद्यं भक्षणादिनिवृत्तिरूपमौदासीन्यं विषयः। तत् यद्यप्यभावार्थत्वात् स्वतः साध्यं न भवति तथापि निषेध्योन्मुखतया प्रचलितावस्थेऽनुत्पन्नतदनुकूलस्पन्दव्यापारे पुरुषे निषेध्यचिकीर्षापनयनद्वारा परिपाल्यत्वेन तत् साध्यं भवतीति तस्य नियोगविषयत्वोपपत्तिः। तत्र चार्थान्निषेध्यचिकीर्षुर्नियोज्य इति गुरुमतम्। **इह तु विषयेणेति**। नियोगगतकृतिसाध्यतारूपकार्यताघटकत्वेन विषय एव तत्प्रतीत्यनुबन्धः न तु नियोज्यः, तदभावेऽप्यध्ययननियोगस्य प्रयाजादिनियोगानां च प्रतीतेरिति भावः॥

उच्यत इति। अयमाशयः— कार्यत्वेन प्रतीयमानो नियोगः स्वस्य कार्यताघटके विषये प्रवर्तकस्वभावस्तत्र प्रवर्तनीयं पुरुषमपेक्षते; अन्यथा प्रवर्तकत्वव्याघातात्; अन्यतः प्रवृत्तिसिद्धौ तु न तमपेक्षते; तथा च आचार्यकनियोगेन अध्ययने माणवकस्य दर्शपूर्णमासनियोगेन तन्नियोज्यस्य तदङ्गेषु प्रयाजादिषु च प्रवृत्तिसिद्ध्या

'अथातो धर्मजिज्ञासा' इति सूत्रिता । अधर्मोऽपि हिंसादिः प्रतिषेधचो-

---

कल्पतरुः ।

स्वसाध्यधात्वर्थनिरूप्या एवं स्वाश्रयनरनिरूप्या ; तदेवं कृतेः कर्तापि कार्ये कृति-द्वारा संबन्धित्वेन निरूपक इति तमन्तर्भाव्यैव नियोगधीः । न चासावबुद्ध्वा आत्मनः कार्येण संबन्धं स्वतस्तेन संबध्यते ; स्वसंबन्धिकार्यबोद्धा च नियोज्य इति सोऽध्याहार्य इति स्थिते ; चिन्ता— किं सर्वेषामध्याहार उत एकस्येति । तत्राविशेषात्सर्वेषामिति प्राप्ते, उच्यते— एकेनाकाङ्क्षाशान्तेरेकस्येति । एवं स्थिते विचारः— किं यस्य कस्यचिन्नियोज्यस्याध्याहार उत स्वर्गकामस्येति । तत्राविशेषादनियम इति प्राप्ते, उच्यते— 'स स्वर्गः स्यात्सर्वान् प्रत्यविशिष्टत्वात्' । स्वर्गकाम एवाध्याहार्यः ; विशेषो हि गम्यते ; पुरुषाणां सुखाभिलाषित्वात् ; दुःखनिवृत्तेरपि तत्रैवान्तर्भावात् । दुःखनिवृत्तिस्तु न सुखाविनाभूता, सुषुप्ते सत्यामपि तस्यां सुखजन्मादर्शनात् । अनवच्छिन्नस्य सुखस्य स्वर्गत्वात् तस्य च सर्वसुखविशेषान् प्रत्यविशिष्टत्वाद्विशेषे च मानाभावात्स्वर्ग एव नियोज्यविशेषणं स्यादिति । कृत्वा-

परिमलः ।

तन्नियोगानां कर्तृपुरुषविशेषानपेक्षायामपि विश्वजिदादावन्यतः प्रवृत्त्यलाभात् तदपेक्षास्तीत्यतस्तदध्याहारो युक्त इति । स च फलकामोऽध्याहार्यः, पुरुषाणां कामप्रवणतया तत्र प्रयुक्तिलाघवात् । निषेधवाक्येषु तु न कामी नियोज्योऽध्याहार्यः, औदासीन्यस्य परिपाल्यत्वसिद्धये तत्प्रच्युतिप्रसक्त्यर्थं सामर्थ्यान्निषेध्योन्मुखस्य नियोज्यस्यावश्यं प्राप्त्या तत एवाकाङ्क्षाशान्तेः । **किं सर्वेषामिति** । किं सर्वफलकामानामध्याहारः उतैकफलकामस्येत्यर्थः । **अन्तर्भावादिति** । यस्य यदा यदवच्छेदेन सुखं तस्य तदा तदवच्छेदेन न दुःखमित्यविनाभावादित्यर्थः । एतदुपलक्षणम्, सुखस्य भावरूपत्वेन लघूपस्थितिकत्वाच्चेत्यपि द्रष्टव्यम् । **अनवच्छिन्नस्येति** । पुत्रपश्वाद्येकैकविषयविशेषमात्रानवच्छिन्नस्य देशविशेषदेहविशेषभोग्यस्य संकल्पोपनतसर्वविषयप्रयुक्तस्य स्वर्गसुखस्य पुत्रपश्वादिसुखविशेषान् प्रति सामान्यरूपत्वादित्यर्थः । **विशेषे च मानाभावादिति** । सर्वसुखविशेषानुगतसामान्यमुल्लङ्घ्य किंचिद्विषयविशेषावच्छिन्नसुखग्रहणे मानाभावादित्यर्थः । इत्थं गुरुणा निबन्धने व्याख्यातम् । प्रायः सर्वपुरुषान् प्रति स्पृहणीयत्वेनाविशिष्टत्वादिति भाष्यकारादिव्याख्या । नन्वत्र विश्वजिदधिकरणे भाष्यकारैः 'तस्मात् पितृभ्यः पूर्वेद्युः क्रियते' इति पितृयज्ञवाक्यम् 'यः

दनालक्षणत्वाज्जिज्ञास्यः परिहाराय। तयोश्चोदनालक्षणयोरर्थानर्थयोर्धर्माधर्मयोः फले प्रत्यक्षे सुखदुःखे शरीरवाङ्मनोभिरेवोपभुज्यमाने विषयेन्द्रियसंयोगजन्ये ब्रह्मादिषु स्थावरान्तेषु प्रसिद्धे। मनुष्यत्वादारभ्य ब्रह्मान्तेषु देहवत्सु सुखतारतम्यमनुश्रूयते। ततश्च तद्धेतोर्धर्मस्यापि तारतम्यं गम्यते। धर्मतारतम्यादधिकारितारतम्यम्। प्रसिद्धं चार्थित्वसामर्थ्यविद्वत्तादिकृतमधिकारितारतम्यम्। तथा च यागाद्यनुष्ठायिनामेव विद्यासमाधिविशेषादुत्तरेण पथा गमनम्, केवलैरिष्टापूर्तदत्तसाधनैर्धूमादिक्रमेण दक्षिणेन पथा गमनम्, तत्रापि सुखतारतम्यम्, तत्साधनतारतम्यं च शास्त्रात् 'यावत्संपातमुषित्वा' इत्यस्माद्गम्यते। तथा मनुष्यादिषु स्थावरान्तेषु सुखलवश्चोदनालक्षणधर्मसाध्य एवेति गम्यते तारतम्येन वर्तमानः। तथोर्ध्वगतेष्वधोगतेषु च देहवत्सु दुःखतारतम्यदर्शनात्तद्धेतोरधर्मस्य प्रतिषेधचोदनालक्षणस्य तदनुष्ठायिनां

भामती।

मानान्तरसिद्धत्वात्, 'आत्मेत्येवोपासीत' इति न विधिः, अपि तु विधिसरूपोऽयम्। यथोपांशुयाजवाक्ये 'विष्णुरुपांशु यष्टव्यः' इत्यादयो विधिसरूपा न

कल्पतरुः।

चिन्ता चेयम्। 'यः सत्रायागुरेत्स विश्वजिता यजेत' इति सत्रप्रवृत्तस्यागुरणोपरमे निमित्ते प्रायश्चित्ततया विहितत्वेन साधिकारत्वादिति॥

परिमलः।

सत्रायागुरते' इति विश्वजिद्वाक्यं च विषयवाक्यत्वेनोदाहृतम्। तत्र द्वितीयोदाहरणमयुक्तम्, विश्वजितो नैमित्तिकाधिकारत्वादित्याशङ्क्याह— **कृत्वाचिन्तेति। आगुरणोपरमे इति।** उद्यमनिवृत्तावित्यर्थः। 'गुरी उद्यमने' इति धातोः कुटादित्वेन ङित्त्वाद्गुणाभावः।

ननु— उद्यमनिवृत्तौ विश्वजिदित्ययुक्तम् 'यः सत्राय—' इति वाक्यात् सत्रं संकल्प्य तत्प्रयुञ्जानस्य विश्वजिदिति प्रतीतेरित्याशङ्क्याह— **प्रायश्चित्ततयेति।** एवं हि

च तारतम्यं गम्यते। एवमविद्यादिदोषवतां धर्माधर्मतारतम्यनिमित्तं शरीरोपादानपूर्वकं सुखदुःखतारतम्यमनित्यं संसाररूपं श्रुतिस्मृतिन्याय-प्रसिद्धम्। तथा च श्रुतिः 'न ह वै सशरीरस्य सतः प्रियाप्रिययोरप-हतिरस्ति' इति यथावर्णितं संसाररूपमनुवदति। 'अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशतः' इति प्रियाप्रियस्पर्शनप्रतिषेधाच्चोदनालक्षणधर्म-कार्यत्वं मोक्षाख्यस्याशरीरत्वस्य प्रतिषिध्यत इति गम्यते। धर्मकार्यत्वे हि प्रियाप्रियस्पर्शनप्रतिषेधो नोपपद्येत। अशरीरत्वमेव धर्मकार्यमिति चेत्, न; तस्य स्वाभाविकत्वात्— 'अशरीरꣳ शरीरेषु अनवस्थेष्व-वस्थितम्। महान्तं विभुमात्मानं मत्वा धीरो न शोचति' 'अप्राणो ह्यमनाः शुभ्रः' 'असङ्गो ह्ययं पुरुषः' इत्यादिश्रुतिभ्यः। अत एवानुष्ठे-

---

भामती।

विधय इति तात्पर्यार्थः। श्रुतिस्मृतिन्यायप्रसिद्धमित्युक्तम्, तत्र श्रुतिं दर्शयति— तथा च श्रुतिरिति। न्यायमाह— अत एवेति। यत्किल स्वाभाविकं तन्नित्यम्, यथा चैतन्यम्; स्वाभाविकं चेदम्, तस्मान्नित्यम्। परे हि द्वयीं नित्यतामाहुः— कूटस्थनित्यतां परिणामिनित्यतां च। तत्र नित्यमित्युक्ते मा भूदस्य परिणामिनि-

कल्पतरुः।

यत्किलेति। स्वाभाविकनित्यचैतन्यात्मकस्य ब्रह्मात्मत्वस्य साध्यत्वं व्याहत-मित्यर्थः। भाष्ये कूटस्थनित्यमिति विशेषणं न परिणामिव्यवच्छेदाय, सिद्धान्ते तन्नित्यत्वासंमतेः; अतो वैयर्थ्यमित्याशङ्क्याह— परे हीति। परभ्रान्तिर्व्यवच्छेद्येत्यर्थः। इदं तु पारमार्थिकमिति भाष्ये कूटस्थनित्यत्वे पारमार्थिकत्वं हेतूकृतम्, तत्तदा घटेत यदि 'यत् पारमार्थिकं तदविकृतम्' इति व्याप्तिः स्यात्; तदर्थं परिणामिनित्यस्य भ्रमसिद्धत्वमाह— परिणामीति। परिणामो हि पूर्वरूपत्यागेन रूपान्तरापत्तिः।

परिमलः।

श्रूयते— 'सर्वाभ्यो वा एष देवताभ्यः सर्वेभ्यः पृष्ठेभ्यः सर्वेभ्यश्छन्दोभ्यः आत्मानमा-गुरते यः सत्रायागुरते स विश्वजिता अतिरात्रेण सर्वपृष्ठेन सर्वस्तोमेन सर्ववेदसदक्षि-णेन यजेत सर्वाभ्य एव देवताभ्यः सर्वेभ्यः पृष्ठेभ्यः सर्वेभ्यश्छन्दोभ्य आत्मानं निष्क्री-

यकर्मफलविलक्षणं मोक्षाख्यमशरीरत्वं नित्यमिति सिद्धम्। तत्र किंचि-

भामती।

त्यतेत्याह- **तत्र किंचिदिति**। परिणामिनित्यता हि न पारमार्थिकी। तथा हि— तत्सर्वात्मना वा परिणमते एकदेशेन वा? सर्वात्मना परिणामे कथं न तत्त्वव्याहतिः? एकदेशपरिणामे वा स एकदेशस्ततो भिन्नो वा अभिन्नो वा? भिन्नश्चेत् कथं तस्य परिणामः? न ह्यन्यस्मिन् परिणममानेऽन्यः परिणमति, अतिप्रसङ्गात्। अभेदे वा कथं न सर्वात्मना परिणामः? भिन्नाभिन्नं तदिति चेत्, तथा हि— तदेव कारणात्मनाभिन्नं भिन्नं च कार्यात्मना; कटकादय इवाभिन्ना हाटकात्मना भिन्नाश्च कटकाद्यात्मना; न च भेदाभेदयोर्विरोधान्नैकत्र समवाय इति युक्तम्; विरुद्धमिति नः क संप्रत्ययो यत्प्रमाणविपर्ययेण वर्तते; यत्तु यथा प्रमाणेनावगम्यते तस्य तथाभाव एव; 'कुण्डलमिदं सुवर्णम्' इति सामानाधिकरण्यप्रत्यये व्यक्तं भेदाभेदौ चकास्तः; तथा हि— आत्यन्तिकेऽभेदेऽन्यतरस्य द्विरवभासप्रसङ्गः; भेदे चात्यन्तिके न सामानाधिकरण्यं गवाश्ववत्;

कल्पतरुः।

तत्र पूर्वरूपस्य सर्वात्मना त्यागेन रूपान्तरोत्पत्तौ जातस्य प्राक्तनरूपत्वं व्याहतम् अतोऽनित्यत्वमित्युक्ते शङ्कते- **एकदेशेति**। य एकदेशो नश्यति स धर्मिणः सकाशाद्भिन्न इति पक्षे न धर्मिणः परिणामः किं त्वेकदेशस्य स चानित्य इति न परिणामिनित्यत्वसिद्धिरित्याह— **भिन्नश्चेदिति**। नश्यतश्चैकदेशस्य धर्म्यभेदे सर्वात्मना वस्त्वपगमान्न नित्यत्वमित्याह— **अभेदे इति**। पक्षद्वयोक्तदोषपरिहारायैकमेव कार्यकारणात्मकं वस्तु तस्य कार्याकारेण परिणामित्वं तानि च कार्याणि भिन्नानि कारणाकारेण च नित्यत्वं तच्चाभिन्नमिति शङ्कते— **भिन्नाभिन्नमिति**। यत्प्रमाणविपर्ययेण विरोधेन वर्तते तद्विरुद्धमिति संप्रत्यय इत्यनुषङ्गः। एकस्य कार्यकारणरूपेण द्व्यात्मकत्वे प्रमाणमाह— **कुण्डलमिति**। **द्विरवभासेति**। हेम हेमेति वा कुण्डलं कुण्डलमिति वेत्यर्थः। अपर्यायानेकशब्दवाच्यत्वेन हेमकुण्डलयोर्भेदः सामानाधिकरण्याच्चाभेद इत्युक्ते हेमत्वस्य कुण्डलव्यक्त्याश्रितत्वाद्वा कुण्डलाकारसंस्थानस्य कनकत्वस्य चैकद्रव्याश्रितत्वेन वा सामानाधिकरण्यं नाभेदादित्याशङ्क्य

परिमलः।

णीते' इति। एवं निष्क्रयद्वारेण संस्तवः सत्रप्रवृत्तौ न युज्यते; अतः सत्रं संकल्प्य दैवान्मानुषाद्वा प्रतिबन्धात् ततो निवृत्तस्य प्रायश्चित्ततयेदं विश्वजिद्विधानमित्यर्थः॥

भामती ।

आधाराधेयभावे एकाश्रयत्वे वा न सामानाधिकरण्यम्, न हि भवति कुण्डं बदरामिति; नाप्येकासनस्थयोश्चैत्रमैत्रयोश्चैत्रो मैत्र इति; सोऽयमबाधितोऽसंदिग्धः सर्वजनीनः सामानाधिकरण्यप्रत्यय एव कार्यकारणयोर्भेदाभेदौ व्यवस्थापयति; तथा च कार्याणां कारणात्मत्वात् कारणस्य च सद्रूपस्य सर्वत्रानुगमात्, सद्रूपेणाभेदः कार्यस्य जगतः, भेदः कार्यरूपेण गोघटादिनेति;

कल्पतरुः ।

व्यभिचारयति— आधारेति । दृष्टान्ते सिद्धौ भेदाभेदौ दार्ष्टान्तिके योजयति— तथा चेति । लोके कार्यस्य कुण्डलादेः कारणात्मकत्वात्परमकारणस्य च सतः सर्वत्र हेमवदनुगमात् 'सन् घटः' इत्यादिसामानाधिकरण्यवशेन जगतः कार्यस्य सता कारणरूपेणाभेदो व्यावृत्तकार्यरूपेण च भेद इत्यर्थः । भेद इति

परिमलः ।

व्यभिचारयतीति । ननु ययोः कयोश्चिदाधाराधेयत्वेनैकाश्रितत्वेन वा सामानाधिकरण्यमिति नात्र शङ्का येन कुण्डबदरयोश्चैत्रमैत्रयोश्च व्यभिचार उच्येत; किं त्वेकप्रवृत्तिनिमित्तस्यापरप्रवृत्तिनिमित्ताधाराश्रितत्वेन वा प्रवृत्तिनिमित्तद्वयस्याप्येकाश्रितत्वेन वा सामानाधिकरण्यमिति; तथैव ह्याचार्यैरवतारिकाग्रन्थे शङ्काभिप्रायो लिखितः; तथैव च तदभिप्रायो वर्णयितुं युक्तः; 'भिन्नप्रवृत्तिनिमित्तानां शब्दानामेकस्मिन्नर्थे वृत्तिः सामानाधिकरण्यम्' इति प्रसिद्ध्यनुरोधात्; न च हेमकुण्डलयोरवयवावयविनोर्भेदपक्षे हेमत्वस्य कुण्डलाश्रितत्वं हेमत्वकुण्डलत्वयोरेकाश्रितत्वं च नास्तीति वाच्यम्, हेमत्वस्यावयवावयविवृत्तिजातित्वेन तत्सत्त्वादिति चेत्, उच्यते— हेमावयवातिरिक्तं कुण्डलरूपम् अवयविद्रव्यान्तरमभ्युपगम्यते चेत् तत् पीतरूपगुरुत्वकठिनत्वरहितमेव वाय्वादिसदृशमभ्युपगन्तव्यम्, अवयवावयविगतस्य पीतरूपद्वयस्य गुरुत्वद्वैगुण्यस्य चानुपलम्भात्। घटकुड्ययोरिव कठिनद्रव्ययोरवयवावयविनोरेकत्र भूतलादौ समावेशासंभवाच्च। 'अवयवावयविभावानापन्नयोरेवासमावेशः' इति विशेषनियमकल्पनस्य गौरवपराहतस्याप्रामाणिकत्वात्। एवं च कुण्डले पीतरूपाद्यभावेन तदभिव्यङ्ग्यस्य हेमत्वस्य तत्रासंभवेन एकप्रवृत्तिनिमित्तस्येत्यादेः सामानाधिकरण्यप्रयोजकत्वाभ्युपगमे तेन 'सुवर्णं कुण्डलम्' इति सामानाधिकरण्यानिर्वाहात् तन्निर्वाहाय हेमकुण्डलादीनामाधाराधेयभावमात्रमेकाश्रितत्वमात्रं वा तत्प्रयोजकमास्थेयमित्यभिप्रेत्य टीकायां कुण्डबदरयोश्चैत्रमैत्रयोश्च व्यभिचार उक्त इति तात्पर्यम्। भेदो रूपादिवत् भावरूप इति पक्षे स किमभे-

भामती।

यथाहुः— 'कार्यरूपेण नानात्वमभेदः कारणात्मना। हेमात्मना यथाभेदः कुण्डलाद्यात्मना भिदा' इति। अत्रोच्यते— कः पुनरयं भेदो नाम, यः सहाभेदेनैकत्र भवेत्? परस्पराभाव इति चेत्, किमयं कार्यकारणयोः कटक-हाटकयोरस्ति न वा? न चेत्, एकत्वमेवास्ति न च भेदः। अस्ति चेद्भेद एव नाभेदः। न च भावाभावयोरविरोधः, सहावस्थानासंभवात्। संभवे वा कटकवर्धमानयोरपि तत्त्वेनाभेदप्रसङ्गः, भेदस्याभेदाविरोधात्। अपि च कटकस्य हाटकादभेदे यथा हाटकात्मना कटकमुकुटकुण्डलादयो न

कल्पतरुः।

किं रूपादिवत् भावरूपो धर्मः उतैक्याभावः? नाद्यः, ऐकान्तिकाभेदानिषेधात्। द्वितीयमाशङ्क्याह— किमयं कार्येति। तत्त्वेनेति। कटकत्ववर्धमानत्वरूपेण तयोरितरेतराभेदप्रसङ्ग इत्यर्थः। कार्यस्य कारणाभेदे च सर्वकार्याणामेककार्यात्मकत्वप्रसङ्गः एककार्यस्य सर्वकार्याभिन्नेन कारणेनाभेदादित्याशङ्क्याह— अपि चेति।

परिमलः।

दविरुद्धस्तदविरुद्धो वा? आद्ये भावाभावरूपत्वपक्षे वक्ष्यमाणं दूषणं भविष्यतीत्यभिप्रेत्य द्वितीये दूषणमाह— ऐकान्तिकेति। तथा च भेदे सत्येवात्यन्ताभेदोऽपि स्यादित्यर्थः। द्वितीयमाशङ्क्याहेति। परस्पराभाव इति चेदिति पूर्वग्रन्थेनाशङ्क्येत्यर्थः। तत्त्वेनाभेदप्रसङ्ग इत्यस्य तात्त्विकाभेदप्रसङ्ग इत्यर्थो भाति, स तु नानिष्टः कारणात्मना कटकवर्धमानयोरभेदाङ्गीकारात्– इत्याशङ्क्य तत्त्वेनेति पदं व्याचष्टे— कटकत्वेति॥

ननु भावाभावरूपयोरपि भेदाभेदयोर्हाटकत्वकटकत्वावच्छेदभेदेन वृत्तिरभ्युपगम्यते; अतस्तयोर्न सहावस्थानासंभवः; न च भेदावच्छेदककटकत्वावच्छेदेन कटके वर्धमानाभेदप्रसङ्गः; नापि कटकाभिन्नहाटकाभिन्ने मुकुटे कटकत्वेनापि कटकाभेदप्रसङ्गः; नाप्यनुवृत्तिव्यावृत्तिव्यवस्थाभावप्रसङ्गः; नापि हाटकत्वेनावगते कटकत्वादिना जिज्ञासाद्यनुपपत्तिः; भेदाभेदमनङ्गीकुर्वद्भिरपि ह्येकस्मिन् धर्मिणि केनचित्प्रकारेण निश्चिते तदन्यप्रकारेण जिज्ञासासंशयादिकं समर्थ्यते; अभेदवत् भेदस्याप्यभ्युपगमे का जिज्ञासानुपपत्तिः; यत्तु हेमनिर्णयेन कटकादीनां निर्णये तदभेदः कारणमित्यादि, तत्र वैपरीत्यमपि वक्तुं शक्यम्; हेमनिर्णयेन कटकादीनामनिर्णये तद्भेदः कारणम्, तदभावादभेदादनिर्णयकार्याभाव औत्सर्गिकः प्राप्तः स कारणस्य भेदस्य सद्भावादपोद्यत इति;

भामती ।

भिद्यन्ते एवं कटकात्मनापि न भिद्येरन्, कटकस्य हाटकादभेदात् । तथा च हाटकमेव वस्तुसत् न कटकादयः, भेदस्याप्रतिभासनात् । अथ हाटकत्वेनैवा-

कल्पतरुः ।

एवमेककार्यात्मकत्वादितरकार्याणां तस्य च कारणाभेदाद्भेदासिद्धावैकान्तिकाद्वैतापात इत्याह— **तथा च हाटकमेवेति** । कटकस्य हि द्वे रूपे स्तः हाटकत्वं कटकत्वं च, तत्र हाटकत्वरूपेणास्य कुण्डलादिभिरभेद इष्ट एव न कटकत्वरूपेण व्यावृत्तत्वात्तस्येति प्रस्मृतपराभिसंधिः स्वप्रक्रियया शङ्कते—**अथेति** । सिद्धान्ती

परिमलः ।

अस्ति ह्यनिर्णयस्यापि निर्णयप्रतिबन्धकसद्भावाधीनं परिपाल्यत्वरूपं कार्यत्वम् ; तस्मात्सर्वमिदं भेदाभेददूषणजातमयुक्तम् ; युक्तत्वे वा स्वमतेऽप्येतत्प्रसज्येत— स्वमतेऽपि हि भेदाभेदाभ्यामेव सामानाधिकरण्योपपादनम् ; अभेदः सत्यो भेदस्तत्राध्यस्त इति परं स्वमते विशेष उक्तः ; तत्र भेदप्रतीतावभेदोऽपि सह प्रतीयत इत्युपगन्तव्यम्, भेदप्रतीतिमात्रेण सामानाधिकरण्योपपादनासंभवात् ; तयोर्विरुद्धयोरेकत्र प्रतीतिः कथम् ? कथं च मुकुटे कुण्डलाभिन्नहाटकाभिन्ने कुण्डलत्वेनापि कुण्डलाभेदो न स्यात् ? कथं च हाटके प्रतीते कुण्डलादिजिज्ञासा स्यात् ? अपि च, अभेदः सत्यः भेदोऽध्यस्त इत्यर्धजरतीयमप्ययुक्तम्, सह प्रतीत्यभ्युपगमे अन्यतरबाधावश्यंभावकल्पकाभावात् ; सत्यानृतयोर्ब्रह्मतदध्यस्तप्रपञ्चयोः सिद्धान्ते तात्त्विकाभेदानङ्गीकाराच्च ; तथैवारम्भणाधिकरणे टीकाकारैरपि वक्ष्यमाणत्वात् ; इहानुपदमेव पूर्वग्रन्थे तस्मात्तेऽपि हाटकात् भिन्ना एवेति तस्मात् ते हेम्नो भिद्यन्त इति च हाटककटकाभेदप्रतिक्षेपाच्च ; तस्मात् सर्वमिदमनुपपन्नमिति चेत्, अत्र ब्रूमः— हाटकत्वं कटकत्वं च किमेकस्मिन्वर्तते न वा ? न चेत्, एकस्मिन्नवच्छेदकभेदेन भेदाभेदयोर्विरुद्धयोर्वृत्तिसमर्थनं न लभ्यते । वर्तते चेत्, किं कटकत्वं हाटकत्वादन्यदुत तदेव ? अन्यच्चेत्, प्रवृत्तिनिमित्तभेदेनैव सामानाधिकरण्योपपादनलाभात् नैकस्मिन् धर्मिणि अभेदवत् भेदोऽप्यङ्गीकार्यः । अतः सामानाधिकरण्योपपादनार्थं भेदाभेदमभ्युपगच्छता प्रवृत्तिनिमित्तभेदेनान्यथोपपत्तिपरिहाराय हाटकत्वमेव कटकत्वं न ततोऽन्यदित्येष्टव्यमित्यभिप्रेत्य सहावस्थानासंभवादि सर्वमिदं दूषणमुक्तम् । इममेवाभिप्रायं सहावस्थानासंभवादिदूषणोक्तौ गर्भितं विस्मृत्य अथ हाटकत्वेनैवाभेद इत्यादिशङ्काग्रन्थः प्रवृत्त इत्याचार्यैरवतारितम्— **प्रस्मृतपराभिसंधिः स्वप्रक्रियया शङ्कत इति** । एवं चाभेदसत्तया कुण्डलादेर्शातत्वापादनेऽपि न वैपरीत्यशङ्कावकाशः,

भामती ।

भेदो न कटकत्वेन, तेन तु भेद एव कुण्डलादेः । यदि हाटकादभिन्नः कटकः कथमयं कुण्डलादिषु नानुवर्तते ? नानुवर्तते चेत् कथं हाटकादभिन्नः कटकः ? ये हि यस्मिन्ननुवर्तमाने व्यावर्तन्ते ते ततो भिन्ना एव, यथा सूत्रात्कुसुमभेदाः । नानुवर्तन्ते चानुवर्तमानेऽपि हाटकत्वे कुण्डलादयः, तस्मात्तेऽपि हाटकाद्भिन्ना एवेति । सत्तानुवृत्त्या च सर्ववस्त्वनुगमे 'इदमिह नेदम्, इदमस्मान्नेदम्, इद-

कल्पतरुः ।

तु कटकहाटकयोरभेदाद्घाटकस्य कुण्डलादिष्वनुवृत्तेरभेदे कटकस्यापि तैरभेदः स्यादिति पूर्वोक्तमेव परिहारं स्मारयति— **यदि हाटकादिति** । कटकस्य कुण्डलादिष्वनुवृत्त्यनभ्युपगमे तेष्वनुवृत्तहाटकादभेदाभावः स्यादिति प्रतिजानीते— **नानुवर्तते चेदिति** । अनुवृत्ताद्व्यावृत्तस्य भेदे व्याप्तिमाह— **ये हीति** । उपनयमाह— **नानुवर्तन्ते इति** । अर्थाद्धेतुसिद्धिर्द्रष्टव्या । निगमयति— **तस्मादिति** । कुण्डलादिषु हेमानुवृत्त्या यदि तदभेदात्कटकादीनामनुगमः तदा सत्तानुवृत्त्या तदभिन्नसर्ववस्तूनामितरेतराभेदापत्तेर्व्यवहारपारिप्लव इत्याह— **सत्तेति** । **इति वि-**

परिमलः ।

अभेदे सत्यवच्छेदकभेदाभावेन भेद एव न संभवतीति तात्पर्येण प्रत्युतेत्यादिटीकातद्व्याख्यानयोः प्रवृत्तेः । स्वमतेनाभेदव्यवस्थापनं तु व्यावहारिकाभेदविषयं न तात्त्विकाभेदविषयमिति नारम्भणाधिकरणविरोधः । नाप्यभेदप्रतिक्षेपकपूर्वग्रन्थविरोधः । अत एवाभेदप्रतिक्षेपको यस्मिन् गृह्यमाणे यन्न गृह्यत इत्यादिटीकाग्रन्थो वस्तुतः कार्यकारणयोरभेदाभावं सप्रमाणमुपसंहरतीति भेदाभेदवाद्यभिमतवास्तवाभेदप्रतिक्षेपपरतया अवतारितः । भेदस्याध्यस्तत्वोक्तिस्तु प्रतिभासमात्रकल्पितत्वाभिप्राया । अत एवारम्भणाधिकरणटीकायाम् 'वाचा केवलमारभ्यते विकारजातं न तु तत्त्वतोऽस्ति यतो नामधेयमात्रमेतत् यथा पुरुषस्य चैतन्यं राहोः शिर इति विकल्पनामात्रम्' इत्यारम्भणश्रुतेरर्थ उक्तः । भेदबाधावश्यंभावोऽप्यारम्भणश्रुतिप्राप्तः । तदनुकूलन्यायमात्रमिह विरोधादन्यतरबाधादिप्रक्रियया दर्शितम् ॥

ननु यद्युपादानेहमाद्यतिरिक्तकटकमुकुटादिविकारभेदः कल्पनामात्रसिद्ध इति मतं कथं तर्हि वाक्यान्वयाधिकरणटीकायाम् 'न तु मृद्विकारः शरावादिः शतशोऽपि मृन्मृदिति चिन्त्यमानस्तज्जन्मना मृद्भावसाक्षात्कारेण शक्यो निवर्तयितुं तत्कस्य हेतोः

भामती ।

मिदानीं नेदम्, इदमेवं नेदम्' इति विभागो न स्यात्, कस्यचित् कचित् कदाचित् कथंचिद्विवेकहेतोरभावात्। अपि च दूरात्कनकमित्यवगते न तस्य कुण्डलादयो विशेषा जिज्ञास्येरन्, कनकादभेदात्तेषाम्, तस्य च ज्ञातत्वात्। अथ भेदो-

कल्पतरुः ।

भागो न स्यात् इत्यस्य प्रत्येकं संबन्धः। इह क्षीरे इदं दधि नेदं तैलमिति संसर्गतदभावव्यवस्था न स्यात्। इदं पटादिकमस्मात् कुड्याद्भिद्यते इदं कुड्यमस्मात्कुड्यान्न भिद्यते इत्यर्थासंकरो न स्यात्। इदानीं वसन्ते काले इदं कोकिलरुतमस्ति इदमम्बुदध्वानं नेति व्यवस्था न स्यात्। इदं कुम्भाद्येवं कम्बुग्रीवत्वादिप्रकारमिदं पटादि नैवमिति प्रकारासंकरो न स्यादित्यर्थः। उक्तास्वव्यवस्थासु हेतुमाह— कस्यचिदिति। कुतश्चिदित्यपि द्रष्टव्यम्। इतश्च कार्यस्य कारणेन न वास्तवमैक्यमित्याह— अपि चेति। निश्चितकनकाभेदान्न कुण्डलादिषु संशय

परिमलः ।

तस्यापि मृदो भिन्नस्य तात्त्विकत्वात् वस्तुनश्च ज्ञानेनोच्छेत्तुमशक्यत्वात्' इत्युक्तम्? उच्यते— शरावादिसंस्थानविशेषस्य व्यावहारिकसत्यत्वाभिप्रायं तद्वाक्यम्। इह तूपादान एव पूर्वावस्थोपमर्देन तदवस्थान्तरं जायते; न तूपादानभिन्नं तदारब्धं तदागन्तुकावस्थाविशेषवदवयवि द्रव्यान्तरमस्ति इत्युपादानविकारयोः सत्येवाभेदे भेदकल्पनामात्रमित्यारम्भणाधिकरणे वक्ष्यमाणमिह स्मारितम्। तत्स्मारणं च न भेदाभेदाभ्यां सामानाधिकरण्यमुपपादयितुम्, तस्य हेमत्वकुण्डलत्वयोरुपादानरूपैकद्रव्याश्रितत्वेनोपपत्तेः। तथैवात्र तदुपपादनस्य विवक्षितत्वात्। अत एवाचार्यैर्वाक्यान्वयाधिकरणे वक्ष्यते— 'सामानाधिकरण्यं यद्धेमकुण्डलयोर्न तत्। भेदाभेदावगाहीति प्राग्वाचस्पतिनेरितम्' इति। किं तु सुवर्णकुण्डलाभेदे कथम् 'सुवर्णेन कुण्डलं कृतम्' सौवर्णं कुण्डलम्' इत्यादिभेदव्यवहार इत्याकाङ्क्षायाम् 'पुरुषस्य चैतन्यम्' इतिवत् कल्पनामात्रसिद्धभेदालम्बनः स व्यवहार इति भेदव्यवहारमात्रोपपादनार्थं कृतमिति सर्वमनवद्यम्। अस्मिन् संदर्भे कथं तर्हीति टीकावतारिकाग्रन्थे न ह्यत्यन्तभेदे तद्भवति कुण्डलकटकयोरदर्शनादिति कुण्डलकटकयोरत्यन्तभेदः सिद्धवत्कृत्योपन्यस्तः। तदुपन्यासो लोकदृष्ट्यनुसारेण वा भेदवादिमतानुसारेण वा कटकत्वकुण्डलत्वाद्यवच्छेदेन भेद एव नाभेदोऽपीत्यभिप्रायेण वा नेतव्यः, भेदाभेदवादिमते हाटकात्मना तयोरभेदात्, यथा हाटकात्मना कटकमुकुटकुण्डलादयो न भिद्यन्त इति टीकायामपि तथैव तन्मतस्थितिप्रदर्शनाच्च ॥

त्परिणामिनित्यं स्यात्, यस्मिन्विक्रियमाणेऽपि तदेवेदमिति बुद्धिर्न विहन्यते; यथा पृथिव्यादि जगन्नित्यत्ववादिनाम्, यथा वा सांख्यानां

भामती।

ऽप्यस्ति कनकात् कुण्डलादीनामिति कनकावगमेऽप्यज्ञातास्ते; नन्वभेदोऽप्यस्तीति किं न ज्ञाताः? प्रत्युत ज्ञानमेव तेषां युक्तम्, कारणाभावे हि कार्याभाव औत्सर्गिकः, स च कारणसत्तया अपोद्यते। अस्ति चाभेदे कारणसत्तेति कनके ज्ञाते ज्ञाता एव कुण्डलादय इति तज्जिज्ञासाज्ञानानि चानर्थकानि स्युः। तेन यस्मिन् गृह्यमाणे यन्न गृह्यते तत्ततो भिद्यते। यथा करभे गृह्यमाणेऽगृह्यमाणो रासभः करभात्। गृह्यमाणे च दूरतो हेम्नि न गृह्यन्ते तस्य भेदाः कुण्डलादयः, तस्मात्ते हेम्नो भिद्यन्ते। कथं तर्हि हेम कुण्डलमिति सामानाधिकरण्यम् इति चेत्, न ह्याधाराधेयभावे समानाश्रयत्वे वा सामानाधिकरण्यमित्युक्तम्। अथानुवृत्तिव्यावृत्तिव्यवस्था च हेम्नि ज्ञाते कुण्डलादिजिज्ञासा च कथम्? न खल्वभेद ऐकान्तिकेऽनैकान्तिके चैतदुभयमुपपद्यते इत्युक्तम्। तस्माद्भेदा-

कल्पतरुः।

इत्युक्ते संशयसंभवं भेदप्रयुक्त्या शङ्कते— **अथेति**। सिद्धान्ती अविनिगममाह— **नन्विति**। हेमनिर्णयेन कटकादीनां निर्णये तदभेदः कारणम्, तदभावाद्भेदरूपानिर्णयकार्याभाव औत्सर्गिकः प्राप्तः, स कारणस्याभेदस्य भावादपोद्यते घटसामग्रीत इव तत्प्रागभावः, ततः कनकनिश्चये कटकादिनिश्चयादविनिगम एव न, किं तु वैपरीत्यनिश्चय इत्याह— **प्रत्युतेति**। तेषां कुण्डलादीनां जिज्ञासा तद्विषयज्ञानानि चेत्यर्थः। वस्तुतः कार्यकारणयोरभेदाभावं सप्रमाणकमुपसंहरति— **तेनेति**। यदि हेमकुण्डलयोर्न भेदाभेदौ तर्हि सामानाधिकरण्यं न स्यात् न ह्यत्यन्तभेदे तद्भवति, कुण्डलकटकयोरदर्शनात्। नाप्यत्यन्ताभेदे, हेम हेमेत्यनुपलम्भादिति पूर्ववाद्युक्तमनुवदति— **कथं तर्हीति**। यदि हेम्नः सकाशात् कुण्डलादीनां भेदाभेदौ तर्हि तेषामनुवृत्तहेम्नः सकाशात् अभेदादितरेतरव्यावृत्तिर्न स्यात् न स्याच्च हेम्नि निर्णीते संशय इति प्रतितर्केण मिथो विरोधाख्येन सामानाधिकरण्यानुपपत्तितर्कं दूषयति— **अथेति**। अत्यन्ताभेदे मा नामोपपादि हेमादेरनुवृत्तिव्यावृत्तिव्यवस्था मा च घटिष्ट हेम्नि ज्ञाते कुण्डलादिजिज्ञासा, भेदाभेदमते ते किं न स्याताम् इत्याशङ्क्य पूर्वोक्तमविनिगममुत्सर्गापवादं च स्मारयति— **अनैकान्तिके चेति**। निरुद्धे एवं अनेकान्तवादिनि स्वमतेन सामानाधिकरण्यमुपपाद-

गुणाः । इदं तु पारमार्थिकं कूटस्थनित्यं व्योमवत्सर्वव्यापि सर्वविक्रिया-

भामती ।

भेदयोरन्यतरस्मिन्नवहेयेऽभेदोपादानैव भेदकल्पना, न भेदोपादानाभेदकल्पनेति युक्तम् । भिद्यमानतन्त्रत्वाद्भेदस्य, भिद्यमानानां च प्रत्येकमेकत्वात्, एकाभावे चानाश्रयस्य भेदस्यायोगात्, एकत्वस्य च भेदानधीनत्वात्, नायमयमिति च भेदग्रहस्य प्रतियोगिग्रहसापेक्षत्वात्, एकत्वग्रहस्य चान्यानपेक्षत्वात्, अभेदोपादानैवानिर्वचनीयभेदकल्पनेति सांप्रतम् । तथा च श्रुतिः— 'मृत्तिकेत्येव सत्यम्' इति । तस्मात् कूटस्थनित्यतैव पारमार्थिकी, न परिणामिनित्यतेति सिद्धम् । **व्योमवत्** इति च दृष्टान्तः परसिद्धः, अस्मन्मते तस्यापि कार्यत्वेनानित्यत्वात् । अत्र च **कूटस्थनित्यम्** इति निर्वर्त्यकर्मतामपाकरोति । **सर्वव्यापि** इति प्राप्यकर्मताम् । **सर्वविक्रियारहितम्** इति विकार्यकर्मताम् ।

कल्पतरुः ।

यति— **तस्मादिति** । विरोधादन्यतरबाधेऽप्यभेदो बाध्य इति सौगतमतमाशङ्क्याह— **अभेदोपादानेति** । भेदः किं धर्मिप्रतियोगिनोर्व्यासज्य वर्तते उत प्रतियोगिनमपेक्ष्य धर्मिण्येव ? आद्ये धर्मिप्रतियोगिनोः प्रत्येकवर्त्येकत्वापेक्षेत्युक्त्वा द्वितीये धर्म्यैक्यापेक्षेत्याह— **एकाभावे चेति** । ततः स्वसत्तायामभेदापेक्षत्वाद्भेदस्य स एवाभेदेऽध्यस्त इत्यर्थः । प्रतीतावपि भेदस्यैवाभेदापेक्षेत्याह— **नायमिति** ।

परिमलः ।

सौगतमतमाशङ्क्य इत्यत्र गौतममतमिति पाठश्चेत् स निर्विशङ्कः । न्यायसूत्रकृता गौतमेन प्रत्यक्षपरीक्षायाम् 'न चैकदेशोपलब्धिरवयविसद्भावात्' इति घटाद्येकदेशसंनिकर्षे सति न तदुपलब्धिमात्रं तद्भिन्नस्यावयविनः सद्भावात् तस्याप्युपलब्धिरस्तीति प्रतिज्ञाय, 'साध्यत्वादवयविनि संदेहः' इत्यवयवभिन्नोऽवयवी सिद्धो नास्तीति तत्र संदेहमुपन्यस्य, 'सर्वाग्रहणमवयव्यसिद्धेः' 'धारणाकर्षणोपपत्तेश्च' इति सूत्राभ्याम् अवयवभिन्नावयव्यभावे परमाणूनामन्त्यावयवानाम् अतीन्द्रियत्वात् तदाश्रितस्य गुणकर्मसामान्यादेः सर्वस्याप्यग्रहणं स्यात्; अतो गुणकर्मादिग्रहणात् अस्ति तदाश्रयः पटादिरवयवी; तथा एकदेशधारणे कृत्स्नधारणादेकदेशाकर्षणे कृत्स्नाकर्षणाच्च सोऽस्ति, अन्यथा अवयवानां भिन्नत्वात् कस्यचिदवयवस्य धारणाकर्षणाभ्यामन्यस्य धारणाकर्षणानुपपत्तेरित्यवयवभिन्नावयविप्रसाधनेन अवयवाभेदनिराकरणात् । सौगतमतमिति पाठस्तु सौगतैरवयवि-

रहितं नित्यतृप्तं निरवयवं स्वयंज्योतिःस्वभावम्, यत्र धर्माधर्मौ सह कार्येण कालत्रयं च नोपावर्तेते; तदेतदशरीरत्वं मोक्षाख्यम्— 'अन्यत्र धर्मादन्यत्राधर्मादन्यत्रास्मात्कृताकृतात्। अन्यत्र भूताच्च भव्याच्च' इत्यादिश्रुतिभ्यः। अतस्तद्ब्रह्म, यस्येयं जिज्ञासा प्रस्तुता। तद्यदि कर्तव्यशेषत्वेनोपदिश्येत, तेन च कर्तव्येन साध्यश्चेन्मोक्षोऽभ्युपगम्येत, अनित्य एव स्यात्। तत्रैवं सति यथोक्तकर्मफलेष्वेव तारतम्यावस्थितेष्वनित्येषु कश्चिदतिशयो मोक्ष इति प्रसज्येत। नित्यश्च मोक्षः सर्वैर्मोक्षवादिभिरभ्युपगम्यते। अतो न कर्तव्यशेषत्वेन ब्रह्मोपदेशो युक्तः।

भामती।

निरवयवम् इति संस्कार्यकर्मताम्। व्रीहीणां खलु प्रोक्षणेन संस्काराख्योंशो यथा जन्यते, नैवं ब्रह्मणि कश्चिदंशः क्रियाधेयोऽस्ति, अनवयवत्वात्; अनंशत्वादित्यर्थः। पुरुषार्थतामाह— **नित्यतृप्तमिति**। तृष्या दुःखरहितं सुखमुपलक्षयति। क्षुद्दुःखनिवृत्तिसहितं हि सुखं तृप्तिः। सुखं चाप्रतीयमानं न पुरुषार्थ इत्यत आह— **स्वयंज्योतिरिति**। तदेवं स्वमतेन मोक्षाख्यं फलं

कल्पतरुः।

मृत्तिकेति श्रुतिः कारणमेव सत्यमित्याह— अतोऽत्यन्ताभेदपरेति। अनंशत्वमाकारभेदराहित्यम्, नित्यतृप्तत्वादीनि श्रुत्युक्तान्येव भाष्येऽनूदितानीति नासिद्धानि। कार्यविलक्षणानधिगतविषयलाभात् स्वमते शास्त्रपृथक्त्वसिद्धिः अतस्तद्ब्रह्म इति भाष्ये उक्ता। प्राग्घि मोक्षस्य नित्यत्वान्नियोगायोग उक्तः; इदानीं तत्साधनज्ञानस्य केवलदृष्टा-

परिमलः।

स्थाने अवयवसंघातस्याभिषिक्तत्वात् संघातस्यावयवभेदाभिप्रायो योज्यः। नन्वनंशेऽपि संस्कारकर्मजन्यातिशयोऽस्त्वित्याशङ्क्याह— **अनंशत्वमिति**। आकारभेदो धर्मभेदः। तद्ब्रह्मेति वाक्ये यस्येयं जिज्ञासा प्रस्तुतेति विशेषणस्य तात्पर्यमाह— **कार्यविलक्षणेति**। **स्वमते इति**। पूर्वपक्षिमते तु न शास्त्रपृथक्त्वसिद्धिः, उभयोरपि तन्त्रयोः कार्यविषयत्वाविशेषादिति भावः। शास्त्रपृथक्त्वसिद्धिस्तद्ब्रह्मेति भाष्ये उक्तेति पाठः। अतस्तद्ब्रह्मेत्यतःशब्दः संपातायातः। टीकायाम्, 'तदेवं स्वमतेन मोक्षाख्यं फलं नित्यं

अपि च 'ब्रह्म वेद ब्रह्मैव भवति' 'क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे' 'आनन्दं ब्रह्मणो विद्वान्न बिभेति कुतश्चन' 'अभयं वै जनक प्राप्तोऽसि' 'तदात्मानमेवावेदहं ब्रह्मास्मीति, तस्मात्तत्सर्वमभवत्' 'तत्र

भामती ।

नित्यं श्रुत्यादिभिरुपपाद्य क्रियानिष्पाद्यस्य तु मोक्षस्यानित्यत्वं प्रसज्जयति— **तद्यदीति** । न चागमबाधः, आगमस्योक्तेन प्रकारेणोपपत्तेः । **अपि च ज्ञान-जन्यापूर्वजनितो मोक्षो नैयोगिक इत्यस्यार्थस्य सन्ति भूयस्यः श्रुतयो निवारिका इत्याह— अपि च ब्रह्म वेदेति** । अविद्याद्वयप्रतिबन्धापनयमात्रेण च विद्याया मोक्षसाधनत्वम्, न स्वतोऽपूर्वोत्पादेन वा इत्यत्रापि श्रुतीरुदाहरति—

कल्पतरुः ।

र्थत्वाच्च स उच्यत इत्याह— तदेवमित्यादिना । उपपाद्य इत्यस्य निवारिका इत्याह इत्यनेन संबन्धः । एवं फलस्वभावेन नियोगाभावमुक्त्वा फलविज्ञानस्वभावेनाप्युच्यत इत्याह— अविद्याद्वयेति । स्वत इति । विहितक्रियारूपेणेत्यर्थः । न्यायसूत्रे दोषो

परिमलः ।

श्रुत्यादिभिरुपपाद्य क्रियानिष्पाद्यस्य तु मोक्षस्यानित्यत्वं प्रसज्जयति तद्यदीति । न चागमबाधः, आगमस्योक्तेन प्रकारेणोपपत्तेः । अपि च ज्ञानजन्यापूर्वजनितो मोक्षो नैयोगिक इत्यस्यार्थस्य सन्ति भूयस्यः श्रुतयो निवारिका इत्याह' इति केषुचित्कोशेषु पाठः । कोशान्तरेषु तु 'तदेवं स्वमतेन मोक्षाख्यं फलं नित्यं श्रुत्यादिभिरुपपाद्य ज्ञानजन्यापूर्वजनितो मोक्षो नैयोगिक इत्यस्यार्थस्य सन्ति भूयस्यः श्रुतयो निवारिकाः' इति पाठः । अस्मिन्पाठे उपपाद्येत्यस्य निवारिका इत्यव्यवहितनिवारणक्रियया अन्वयः प्रतिभाति; तदन्वयो न युक्तः, नैयोगिकत्वनिवारणार्थाभिः श्रुतिभिः श्रुत्यन्तरोदाहरणपूर्वकं मोक्षफलनित्यत्वस्याप्रतिपादितत्वादित्याशङ्क्य उपपाद्येत्यस्याहेत्यनेन संबन्धमाह— **उपपाद्येत्यस्येति** । **एवं फलस्वभावेनेति** । तदेवमिति टीकावतारिकाग्रन्थे मोक्षस्य नित्यत्वेन नैयोगिकत्वासंभवस्य प्रागुपपादितस्यानुवादपूर्वकं मोक्षसाधनज्ञानस्य तात्कालिकब्रह्मप्राप्तिसाधनत्वात् नैयोगिकत्वासंभव उच्यत इति तस्य टीकाग्रन्थस्य तात्पर्यमुक्तम्, इदानीं तु ब्रह्मभावप्राप्तिफलस्य प्राप्तप्राप्तिरूपस्य तात्कालिकफलत्वस्वाभाव्येन नियोगासंभवं तदेवमित्यादिग्रन्थोक्तमनूद्य फलसाधनस्य तत्त्वज्ञानस्याविद्योच्छेदद्वारकत्वस्वाभाव्येन नियोगद्वारकत्वासंभव उच्यत इत्येवमविद्याद्वयेत्यादिटीका अवतार्यते ।

को मोहः कः शोक एकत्वमनुपश्यतः' इत्येवमाद्याः श्रुतयो ब्रह्मविद्यानन्तरमेव मोक्षं दर्शयन्त्यो मध्ये कार्यान्तरं वारयन्ति। तथा 'तद्धैतत्पश्यन्नृषिर्वामदेवः प्रतिपेदेऽहं मनुरभवं सूर्यश्च' इति ब्रह्मदर्शनसर्वात्मभावयोर्मध्ये कर्तव्यान्तरवारणायोदाहार्यम्— यथा 'तिष्ठन्गायति' इति तिष्ठतिगायत्योर्मध्ये तत्कर्तृकं कार्यान्तरं नास्तीति गम्यते। 'त्वं हि नः पिता योऽस्माकमविद्यायाः परं पारं तारयसि' 'श्रुतं ह्येव मे भगवद्दृशेभ्यस्तरति शोकमात्मविदिति; सोऽहं भगवः शोचामि, तं मा भगवाञ्छोकस्य पारं तारयतु' 'तस्मै मृदितकषायाय तमसः पारं दर्शयति भगवान्सनात्कुमारः' इति चैवमाद्याः श्रुतयो मोक्षप्रतिबन्धनिवृत्तिमात्रमेवात्मज्ञानस्य फलं दर्शयन्ति। तथा च आचार्यप्रणीतं न्यायोपबृंहितं सूत्रम्— 'दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायादपवर्गः' इति। मिथ्याज्ञानापायश्च ब्रह्मात्मैकत्वविज्ञानाद्भवति। न चेदं ब्रह्मात्मैकत्वविज्ञानं संपद्रूपम्— यथा 'अनन्तं

भामती।

त्वं हि नः पितेति। न केवलमस्मिन्नर्थे श्रुत्यादयः, अपि त्वक्षपादाचार्यसूत्रमपि न्यायमूलमस्तीत्याह— तथा चाचार्यप्रणीतमिति। आचार्यश्चोक्तलक्षणः पुराणे— 'आचिनोति च शास्त्रार्थमाचारे स्थापयत्यपि। स्वयमाचरते यस्मादाचार्यस्तेन चोच्यते' इति। तेन हि प्रणीतं सूत्रम्— 'दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायादपवर्गः' इति। पाठापेक्षया कारणमुत्तरम्, कार्यं च पूर्वम्, कारणापाये कार्यापायः, कफापाय इव कफोद्भवस्य ज्वरस्यापायः। जन्मापाये दुःखापायः, प्रवृत्त्यपाये जन्मापायः, दोषापाये प्रवृत्त्यपायः, मिथ्याज्ञानापाये दोषापायः। मिथ्याज्ञानं चाविद्या रागाद्युपजननक्रमेण दृष्टेनैव संसारस्य परमं निदानम्। सा च तत्त्वज्ञानेन ब्रह्मात्मैकत्वविज्ञानेनैवावगतिपर्यन्तेन विरोधिना निवर्त्यते। ततोऽविद्यानिवृत्त्या ब्रह्मस्वरूपाविर्भावो मोक्षः। न तु विद्याकार्यस्तज्जनितापूर्वकार्यो वेति सूत्रार्थः।

भामती ।

तत्त्वज्ञानान्मिथ्याज्ञानापाय इत्येतावन्मात्रेण सूत्रोपन्यासः; न त्वक्षपादसंमतं तत्त्वज्ञानमिह संमतम् । तदनेनाचार्यान्तरसंवादेनायमर्थो दृढीकृतः । स्यादेतत् । नैकत्वविज्ञानं यथावस्थितवस्तुविषयम्, येन मिथ्याज्ञानं भेदावभासं निवर्तयन्न विधिविषयो भवेत्; अपि तु संपदादिरूपम् । तथा च विधेः प्रागप्राप्तं पुरुषेच्छया कर्तव्यं सत् विधिगोचरो भविष्यति; यथा वृत्त्यनन्तत्वेन मनसो विश्वेदेवसाम्याद्विश्वान्देवान्मनसि संपाद्य मन आलम्बनमविद्यमानसमं कृत्वा प्राधान्येन संपाद्यानां विश्वेषामेव देवानामनुचिन्तनं तेन चानन्तलोकप्राप्तिः; एवं चिद्रूपसाम्याज्जीवे ब्रह्मरूपं संपाद्य जीवमालम्बनमविद्यमानसमं कृत्वा प्राधान्येन ब्रह्मानुचिन्तनं तेन चामृतत्वफलप्राप्तिः; अध्यासे त्वालम्बनस्यैव प्राधान्येनारोपिततद्भावस्यानुचिन्तनम्, यथा 'मनो ब्रह्मेत्युपासीत' 'आदित्यो ब्रह्मेत्यादेशः'। एवं जीवमब्रह्म 'ब्रह्मेत्युपासीत' इति; क्रियाविशेषयोगाद्वा, यथा 'वायुर्वाव संवर्गः' 'प्राणो वाव संवर्गः'; बाह्या खलु

कल्पतरुः ।

रागादिः, प्रवृत्तिः कर्म। आरोप्यत्वसाम्येऽप्यध्यासात्संपदो भेदमाह—**मन इति** । आरोप्यप्रधाना संपत्, अधिष्ठानप्रधानोऽध्यासः। आरोपितस्तद्भावो ब्रह्मादिभावो यस्य

परिमलः ।

अतो न पूर्वटीकावतारिकाग्रन्थेनार्थैक्यशङ्का । न स्वत इत्ययुक्तं स्वत एव हि विद्याया मोक्षसाधनत्वं नान्यायत्तमित्याशङ्क्य व्याचष्टे— **विहितक्रियारूपेणेति । आरोप्यप्रधानेति** । यद्यपि बृहदारण्यकोपनिषदि 'अथ संपदः' इति संपदुपासनानामुपक्रमे अल्पेषु कर्मसु महतां कर्मणां तत्फलाय बुद्ध्या संपादनं संपत्, अश्वमेधादीनि महान्ति कर्माणि कात्स्न्र्येनानुष्ठातुमशक्तानां संभवदङ्गमात्रसाहित्येन तान्यनुतिष्ठतां तदङ्गाश्रयोपासनाविशेषैस्तत्फलसंपादनं वा संपदिति द्वेधा भाष्यकारैर्व्याख्यातम्। वार्त्तिककारैरपि 'फलवत्कर्मणां क्वापि किंचित्सामान्यसंश्रयात्। संपत्तिर्महतां संपदल्पीयःकर्मसूच्यते ॥ यदि वा तत्फलस्यैव किंचित्सामान्यवर्त्मना। संपादनं भवेत्संपदग्निहोत्रादिकर्मणि ॥ नातिभारोऽस्ति नो बुद्धेः शास्त्रं चेत्तत्परं भवेत्। विदुषां श्रेयसेऽतोऽध्वा न क्वचित्प्रतिहन्यते' इति। 'अनन्तं वै मनः' इति विहितविश्वेदेवोपासनाया इष्ट्यादिषु सर्वकर्मानुसंधातुर्ब्रह्मणः तदनुसंधानकरणं मनः अधिष्ठानमिति 'कतिभिरयमद्य ब्रह्मा यज्ञं दक्षिणतो देवताभिर्गोपायति' इत्याद्युपक्रमवशादवगतम्, अतस्तस्या अपि कर्मसंबन्धः। तथापि तमर्थं सिद्धं कृत्वा

भामती।

वायुदेवता संवर्गः स हि वह्न्यादीन् संवृङ्क्ते। महाप्रलयसमये हि वायुर्वह्न्यादीन्संवृत्य संहृत्यात्मनि स्थापयति। यथाह द्रविडाचार्यः— 'संहरणाद्वा संवरणाद्वा स्वात्मीभावाद्वायुः संवर्गः' इति। अध्यात्मं च प्राणः संवर्ग इति। स हि सर्वाणि वागादीनि संवृङ्क्ते। प्रायणकाले हि स एव सर्वाणीन्द्रियाणि संगृह्योत्क्रामतीति। सेयं संवर्गदृष्टिर्वायौ प्राणे च दशाशागतं जगद्दर्शयति यथा, एवं जीवात्मनि बृंह-

कल्पतरुः।

तन्मनआदि तथा। **वह्न्यादीन्** इत्यादिशब्दात्सूर्यचन्द्रापो गृह्यन्ते। **वागादीनीति** चक्षुःश्रोत्रमनांसि। संवृत्य उद्यम्य लयं गमयितुं चालयित्वेत्यर्थः। **संवरणादिति**। उद्यमनादित्यर्थः; यो हि यदुद्यच्छति तत्स्ववशतया संवृणोतीति। **स्वात्मीभावादिति**। साम्येन कारणात्मत्वोपगमनादित्यर्थः। यद्यपि श्रुतौ स्वापे प्राणः संवर्ग उक्तः तथापि न्यायसाम्याल्लयस्य चात्र प्रकटत्वात्प्रायणमुदाहृतम्। अग्न्यादेरुपलक्षणत्वात्सर्वाश्रयत्वं वायुप्राणयोरुपास्यमित्याह— **सेयमिति**। **दशाशागतं** दशदिग्गतम्। संवर्गदृष्टान्तं निगमयति— **यथेति**। दार्ष्टान्तिकमाह— **एवमिति**।

परिमलः।

संपदुपासनानामारोप्यप्राधान्यं प्रतीकोपासनानामधिष्ठानप्राधान्यं चानादिवृद्धव्यवहारसंप्रदायसिद्धमिह लिखितम्। ननु— संवरणम् उद्यमनमिति व्याख्यानमयुक्तम्, तयोर्भेदात् इत्याशङ्क्य लक्षणाबीजं संबन्धमाह— **यो हीति**। ननु टीकायां संवृङ्क्त इत्यस्य संहृत्य संवृत्यात्मनि स्थापयतीत्यर्थमुक्त्वा तत्र संमतिरप्युदाहृता 'संहरणाद्वा संवरणाद्वा स्वात्मीभावाद्वायुः संवर्गः' इति; तत्र संवृङ्क्त इत्यस्य संहरणार्थत्वं तावदुपपद्यते, 'वृजि वर्जने' इति लुग्विकरणपठितादिदितो धातोरात्मनेपदेन सिद्धस्य संवृङ्क्त इत्यस्य वर्जयतीत्यर्थकस्य संहरणे पर्यवसानोपपत्तेः; तथैव संवरणार्थकत्वमप्युपपद्यते, 'वृजि वरणे' इति रुधादिगणपठितात् परस्मैपदिनो धातोः छान्दसेन पदव्यत्ययेन संवृङ्क्त इति रूपसिद्धेः; अस्ति च संवरणं संहृतस्योपादानेन स्वात्मभावापादने; किमर्थं संवरणेनोद्यमनं लक्षणीयं मुख्यार्थान्वयानुपपत्त्यभावात्? सत्यम्; वायुस्वभावात् चालनमपि संभवतीति द्योतनाय तात्पर्यतस्तथा व्याख्यातम्। **अग्न्यादेरुपलक्षणत्वादिति**। ननु वायुः अग्निसूर्यचन्द्रापः संहृत्य स्वात्मभावमापादयति प्राणो वाक्चक्षुःश्रोत्रमनांसीत्युक्त्वा 'ते वा एते पञ्चान्ये पञ्चान्ये दश सन्तस्तत्कृतम्' इति तेऽग्न्यादयो वागादयश्च वायुप्राणाभ्यां सह दशेति वाक्यशेषे परिगणिताः, कथमग्न्यादिग्रहणं सर्वोप-

भामती ।

णक्रियया ब्रह्मदृष्टिरमृतत्वाय फलाय कल्पत इति । तदेतेषु त्रिष्वपि पक्षेष्वात्मदर्शनोपासनादयः प्रधानकर्माणि अपूर्वविषयत्वात्, स्तुतशस्त्रवत् । आत्मा तु द्रव्यं कर्मणि गुण इति संस्कारो वात्मनो दर्शनं विधीयते । यथा दर्शपूर्णमासप्रकरणे 'पत्न्यवेक्षितमाज्यं भवति' इति समाम्नातम्, प्रकरणिना च गृहीतमुपांशुयागाङ्गभूताज्यद्रव्यसंस्कारतयावेक्षणं गुणकर्म विधीयते, एवं कर्तृ-

कल्पतरुः ।

बृंहणक्रियया देहादिपरिणमनक्रियया । आत्मदर्शनोपासनादय इति । दर्शनं प्रतिपत्तिः । एतच्च प्रमाणज्ञानं विधेयमिति मतमवलम्ब्योक्तम् । आदिशब्दो दृष्टान्तभूतमननाद्युपास्त्यर्थः ॥

स्तुतशस्त्रवदिति । भेदलक्षणेऽभिदधे— 'स्तुतशस्त्रयोस्तु संस्कारो याज्यावदेवताभिधानत्वात्' । 'आज्यैः स्तुवते, प्रउगं शंसति' इति स्तुतशस्त्रे समाम्नाते । आज्यप्रउगशब्दौ स्तोत्रशस्त्रविशेषनामनी । प्रगीतमन्त्रसाध्यं देवतादिगुणसंबन्धाभिधानं स्तोत्रम् । शस्त्रमप्रगीतमन्त्रसाध्यम् । ते किं देवताप्रकाशनाख्यसंस्कारार्थत्वेन गुणकर्मणी उतापूर्वार्थत्वेन प्रधानकर्मणी इति संदेहे, गुणसंबन्धाभिधानाद्गुणिन्या देवताया अभिधानेन याज्यावत्क्रतूपयोगिदेवतास्मरणस्य दृष्टत्वाद्गुणकर्मत्वे प्राप्ते, सिद्धान्तः— 'अपि वा श्रुतिसंयोगात्प्रकरणे स्तौतिशंसती क्रियोत्पत्तिं विदध्याताम्' । स्तुतिरिह विहिता श्रूयते स्तौति शंसतीति । स्तुतिश्च गुणाभिधानं न स्वरूपप्रकाशनम्, यथा 'विशालवक्षाः क्षत्रिययुवा' इति । यत्राभिधानविवक्षा न तत्र स्तुतिं प्रतीमः, यथा 'यो विशालवक्षास्तमानय' इति । तस्मात् स्तौतिशंसती श्रौतार्थलाभाय प्रकरणे अपूर्वोत्पत्तिं प्रति स्तोत्रशस्त्रे विदध्यातामिति । एवमिहात्मोपासनं प्रधानकर्म, आत्मा तु भूतो भव्यशेष इति । अवेक्षितमिति निष्ठया आज्ये कर्मण्यवेक्षणं गुणीकृतम् । भाव्युपयोगमाज्यस्याह— **दर्शपूर्णमासेति** । पूषानुमन्त्रणमन्त्रवदुत्कर्षं वारयति— **प्रकरणिना चेति** । ग्रहणे हेतुमाह— **उपांशुवति** ।

परिमलः ।

लक्षणं स्यात्, व्यवस्थिताग्न्यादिविषयदशसंख्योक्तिविरोधादिति चेत्, उच्यते— 'दश सन्तस्तत्कृतम्' इति दशसंख्यावत्त्वं कृतायसादृश्येन तादृप्यं चोक्तमुपजीव्य दशसंख्यावत्त्वेन 'दशाक्षरा विराडन्नं विराड्' इत्यर्थवादान्तरोक्तप्रक्रियया सर्वांशागतसकलान्नरूपत्वं कृतत्वेन कृतायो यथा दशसंख्यान्तर्भाववत्त्वेन तामत्तीव एवं वायुप्राणरूपैषा दशा-

भामती ।

त्वेन क्रत्वङ्गभूते आत्मनि 'आत्मा वा अरे द्रष्टव्यः' इति दर्शनं गुणकर्म विधीयते, 'यैस्तु द्रव्यं चिकीर्ष्यते गुणस्तत्र प्रतीयेत' इति न्यायात्; अत आह—

कल्पतरुः ।

'सर्वस्मै वै—' इति वाक्यात्सर्वार्थमप्याज्यमुत्पत्तावविहितद्रव्यकोपांशुयागाङ्गम्, आग्नेयादीनामुत्पत्तिशिष्टपुरोडाशाद्यवरोधात्; सत्यप्यत्राज्यभागाद्यङ्गेष्वाज्यनिवेशे न प्रधानहविष्ट्वमिति । द्रव्यसंस्कारकस्य गुणकर्मत्वे जैमिनीयसूत्रमुदाहरति— **यैस्त्विति** । यैरवघातादिभिर्द्रव्यं चिकीर्ष्यते संस्कर्तुमिष्यते गुणस्तत्र प्रतीयेत, द्रव्ये गुणभूतं कर्म प्रतीयेतेत्यर्थः । आत्मोपास्त्यादेः संस्कारकर्मत्वं प्रकरणाद्वाक्याद्वा भवद्भवेत्, नाद्य

परिमलः ।

त्मिका देवता दशसंख्यासंस्तुतं सर्वमन्नमत्तीवेति सर्वान्नात्तृत्वं चोक्तं वाक्यशेषे— 'तस्मात्सर्वासु दिक्षु अन्नमेव सैषा विराडन्नादी' इति । एवं चेहाग्न्यादेरुपलक्षणत्वोक्तिर्वाक्यशेषतः सर्वाशागतभोग्यभोक्तृरूपसकलजगदाश्रयत्वप्राप्तेरुपलक्षणार्था । अत एव ज्योतिरधिकरणे सकलान्नात्रादित्वरूपमिदं सार्वात्म्यं वाक्यशेषार्थमेवाचार्या वर्णयिष्यन्ति । 'पूष्णोऽहं देवयज्यया' इति पूषानुमन्त्रणमन्त्रस्य पूषदेवताकेष्टिषूत्कर्षः । **सर्वस्मै वेति** । 'सर्वस्मै वा एतद्यज्ञाय गृह्यते यद्ध्रुवायामाज्यम्' इति वाक्यात् ध्रौवाज्यमविहितद्रव्यकसर्वयागाङ्गं सदुपांशुयाजस्याप्यङ्गं भवतीत्यर्थः ॥

सत्यप्यत्राज्यभागाद्यङ्गेष्वाज्यनिवेशेन प्रधानहविष्ट्वमिति ननूपांशुयाजाज्यस्यैव प्रधानहविष्ट्वेऽप्याज्यभागादीनामप्याज्यं हविरिति तद्व्यारेणाज्यसंस्काराणामाज्यभागाद्यर्थत्वमप्यस्त्येव, 'द्रव्यसंस्काराः प्रकरणाविशेषात्सर्वकर्मणाम्' इति जैमिनिना तथा सूत्रितत्वात् । द्रव्यसंस्काराः न केवलं प्रधानार्थाः किं त्वङ्गप्रधानार्था इति निर्णयार्थं प्रवृत्तस्य 'प्रकरणविशेषादसंयुक्तं प्रधानस्य' इत्यधिकरणस्य 'लिङ्गदर्शनाच्च' इति गुणसूत्रेणाज्यसंस्काराणामाज्यभागप्रभृत्यङ्गार्थत्वमप्यस्तीत्यत्र 'ध्रुवामेवाग्रेऽभिघारयति ततो हि प्रथममाज्यभागौ यक्ष्यन्भवति' इति ध्रौवाज्याभिघारणप्राथम्ये तद्धविष्काज्यभागप्राथम्यहेतुकरणस्य लिङ्गतयोपन्यासाच्च । तस्मादवेक्षणस्याज्यसंस्कारस्य प्रधानमात्रार्थत्वोक्तिरयुक्तेति चेत्, उच्यते— नात्र तस्य प्रधानमात्रार्थत्वमुक्तम्, किं तु टीकायामुपांशुयाजग्रहणमन्येषामप्याज्यहविष्कयागानामुपलक्षणमभिप्रेत्योपांशुयाजः किमित्याज्यहविष्कयागसामान्योपलक्षकतया निर्दिष्टः, प्राथमिकत्वादाज्यभागावेव तथा निर्देशार्हावित्याशङ्कायां प्राधान्यादुपांशुयाजस्तथा निर्दिष्ट इत्ययमर्थः सत्यप्यत्रेत्यादिग्रन्थेन दर्शितः । अतो न दोषः ।

वै मनोऽनन्ता विश्वेदेवा अनन्तमेव स तेन लोकं जयति' इति। न चाध्यासरूपम्— यथा 'मनो ब्रह्मेत्युपासीत' 'आदित्यो ब्रह्मेत्यादेशः' इति च मनआदित्यादिषु ब्रह्मदृष्ट्यध्यासः। नापि विशिष्टक्रियायोगनिमित्तम् 'वायुर्वाव संवर्गः' 'प्राणो वाव संवर्गः' इतिवत्। नाप्याज्यावेक्षणादिकर्मवत्कर्माङ्गसंस्काररूपम्। संपदादिरूपे हि ब्रह्मात्मैकत्वविज्ञानेऽभ्युपगम्यमाने, 'तत्त्वमसि' 'अहं ब्रह्मास्मि' 'अयमात्मा ब्रह्म' इत्येवमादीनां वाक्यानां ब्रह्मात्मैकत्ववस्तुप्रतिपादनपरः पदसमन्वयः पीड्येत। 'भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः' इति चैवमादीन्यविद्यानिवृत्तिफलश्रवणान्युपरुध्येरन्। 'ब्रह्म वेद ब्रह्मैव भवति' इति चैवमादीनि तद्भावापत्तिवचनानि संपदादिरूपत्वे न सामञ्जस्येनोपपद्येरन्। तस्मान्न संपदादिरूपं ब्रह्मात्मैकत्वविज्ञानम्। अतो न पुरुषव्यापारतन्त्रा ब्रह्मविद्या। किं तर्हि, प्रत्यक्षादिप्रमाणविषयवस्तुज्ञानवद्वस्तु-

---

भामती।

न चेदं ब्रह्मात्मैकत्वविज्ञानमिति। कुतः, संपदादिरूपे हि ब्रह्मात्मैकत्वविज्ञान इति। दर्शपूर्णमासप्रकरणे हि समाम्नातमाज्यावेक्षणं तदङ्गभूताज्यसंस्कार इति युज्यते। न च 'आत्मा वा अरे द्रष्टव्यः' इत्यादि कस्यचित्प्रकरणे समाम्नातम्। न चानारभ्याधीतमपि 'यस्य पर्णमयी जुहूर्भवति' इत्यव्यभिचरितक्रतुसंबन्धजुहूद्वारेण जुहूपदं क्रतुं स्मारयद्वाक्येन यथा पर्णतायाः क्रतुशेषभावमापादयति, नैवमात्माप्यव्यभिचरितक्रतुसंबन्धः, येन तद्दर्शनं क्रत्वङ्गं सदात्मानं क्रत्वर्थं संस्कुर्यात्। तेन यद्यप्ययं विधिः, तथापि 'सुवर्णं हिरण्यं भार्यम्' इतिवत् विनियोगभङ्गेन प्रधानकर्मैवापूर्वविषयत्वान्न गुणकर्मेति

कल्पतरुः।

इत्याह दृष्टान्तवैषम्यपूर्वकम्— दर्शपूर्णमासेति। न द्वितीय इत्याह— न चानारभ्येति। यद्यप्ययमिति। विधित्वाभावो हि पूर्वपक्षोपन्यासे वर्णित इति॥

सुवर्णं हिरण्यं भार्यमितिवदिति। शेषलक्षणेऽभिहितम्— 'अद्रव्यत्वात्तु

कल्पतरुः।

शेषः स्यात्'। 'तस्मात्सुवर्णं हिरण्यं भार्यं दुर्वर्णोऽस्य भ्रातृव्यो भवति' इत्यनारभ्याधीते संशयः— किं शोभनवर्णहिरण्यधारणं क्रत्वङ्गमुत पुरुषधर्म इति। तत्र फलकल्पनाभयात् क्रतुनिवेशः; दुर्वर्णः इत्यादि त्वेवंकामशब्दविरहान्न फलपरम्; न च सत्रवद्विपरिणामः, क्रत्वङ्गत्वेन गतिसंभवात्; तथा च वैदिककर्मत्वसाम्यादग्निहोत्रादिप्रकरणनिवेश इति प्राप्ते, अद्रव्यत्वात् द्रव्यदेवतासंबन्धराहित्यान्न

परिमलः।

फलकल्पनाभयादिति। उपलक्षणमेतत्। पुरुषार्थत्वे हिरण्यरूपसाधनविशिष्टस्य धारणस्य विधायकं वाच्यमिति कृत्यप्रत्ययोक्तकर्मप्राधान्यभङ्गभयादित्यपि द्रष्टव्यम्। **क्रतुनिवेश इति**। धारणसंस्कृतस्य हिरण्यस्य विनियोगाकाङ्क्षया कल्प्य इति भावः। **सत्रवद्विपरिणाम** इति स्थाने सक्तुवद्विपरिणाम इति क्वचित्पाठः। हिरण्यसाधनकेन धारणेनेष्टं भावयेदिति सक्तुन्यायाद्विपरिणामे सति अनारभ्याधीतस्य तस्य क्रतुनिवेशकल्पकाभावात् फलविशेषाकाङ्क्षायामार्थवादिकफलविपरिणामोऽपि कल्प्य इति भावः। क्रत्वङ्गत्वेन गतौ सत्यां कृत्यप्रत्ययावगतकर्मप्राधान्यभङ्गः फलविपरिणामः फलाय हिरण्यविशिष्टधारणविधिरिति त्रयमपि नाश्रयणीयमिति परिहारार्थः॥

ननु— अनारभ्याधीतस्य कुतः क्रतुनिवेशसिद्धिः? संस्कृतविनियोगनियमाच्चेत्, कुतः क्रतुसंबन्धावगतेः प्राक् संस्कारविधित्वनिर्णयः? तन्निर्णयेऽपि लौकिककर्मसु वा निवेशः कुतो न स्यात्? तत्राह— **वैदिककर्मत्वसाम्यादिति**। 'तप्ते पयसि दध्यानयति' इत्यत्र पयसः क्रतुसंबन्धात् प्रागेव दध्यानयनसंस्कार्यत्वे अवगते पश्चात् 'सा वैश्वदेवी' इति वाक्येन संस्कृतविनियोगाकाङ्क्षापूरणं दृष्टम्। एवमिहापि धारणसंस्कार्यत्वेनावगते हिरण्ये तद्विनियोगाकाङ्क्षाप्रसूतार्थापत्त्या वैदिककर्मत्वसादृश्योपस्थितेष्वग्निहोत्रादिषु विनियोगकल्पनया तत्पूरणमिति भावः॥

द्रव्यदेवतेति। ननु द्रव्यदेवतासंबन्धराहित्येन धारणस्य यागत्वाद्यभाव एव सिध्येत्, न तु धारणरूपतयैव स्वतन्त्रकर्मत्वस्याभावोऽपि। सत्यम्; धारणस्य स्वतन्त्रकर्मत्वं लक्षितयागरूपतया मुख्यधारणरूपतया वेति विकल्पं मनसि निधाय आद्यपक्षनिराकरणार्थत्वेनेदमद्रव्यसूत्रं योजितम्। द्वितीयपक्षनिराकरणं तु 'द्रव्यपरत्वाच्च' इति तदनन्तरसूत्रेण धारणस्य स्वातन्त्र्ये कृत्यप्रत्ययावगतद्रव्यप्राधान्यविरोधं दर्शयता कृतमित्यभिप्रायः। ननु अद्रव्यसूत्रस्य द्रव्यदेवतासंबन्धराहित्येन यागत्वनिराकरणार्थतायाम् 'अद्रव्यदेवतात्वात्तु शेषः स्यात्' इति शबरस्वामिलिखितः सूत्रस्य पाठो लिखितुं युक्तः न तु 'अद्र-

तन्त्रैव। एवंभूतस्य ब्रह्मणस्तज्ज्ञानस्य च न कयाचिद्युक्त्या शक्यः कार्यानुप्रवेशः कल्पयितुम्। न च विदिक्रियाकर्मत्वेन कार्यानुप्रवेशो ब्रह्मणः— 'अन्यदेव तद्विदितादथो अविदितादधि' इति विदिक्रियाकर्मत्वप्रतिषेधात्, 'येनेदं सर्वं विजानाति तं केन विजानीयात्' इति च। तथोपास्तिक्रियाकर्मत्वप्रतिषेधोऽपि भवति— 'यद्वाचानभ्युदितं येन वागभ्युद्यते' इत्यविषयत्वं ब्रह्मण उपन्यस्य, 'तदेव ब्रह्म त्वं विद्धि, नेदं यदिदमुपासते' इति। अविषयत्वे ब्रह्मणः शास्त्रयोनित्वानुपपत्तिरिति चेत्, न; अविद्याकल्पितभेदनिवृत्तिपरत्वाच्छास्त्रस्य।

भामती।

स्थवीयस्तयैतद्दूषणमनभिधाय सर्वपक्षसाधारणं दूषणमुक्तम्, तदतिरोहितार्थतया न व्याख्यातम्। किं च ज्ञानक्रियाविषयत्वविधानमस्य बहुश्रुतिविरुद्धमित्याह— न च विदिक्रियेति। शङ्कते— अविषयत्वे इति। ततश्च शान्तिकर्माणि वेतालोदय इति भावः। निराकरोति— न। कुतः? अविद्याकल्पितभेदनिवृत्तिपरत्वादिति। सर्वमेव हि वाक्यं नेदंतया वस्तुभेदं बोधयितुमर्हति।

कल्पतरुः।

स्वतन्त्रं कर्म किं तु क्रतुशेष इति सूत्रार्थः। सिद्धान्तस्तु— 'अप्रकरणे तु तद्धर्मस्ततो विशेषात्'। तद्धर्मः पुरुषधर्म एवंजातीयकः, यतो अप्रकरणेऽयमाम्नातः प्रकरणाधीताद्धर्माद्विशिष्यते। न च 'आहवनीये जुह्वति' इति होमानुवादेनाहवनीयवि-

परिमलः।

व्यत्वात्—' इति वार्त्तिककारलिखितः पाठः; तस्मिन् पाठे ह्यद्रव्यत्वात् विधेयद्रव्याभावात् धारणमात्रविधानसंभवेन द्रव्यस्यापि तद्विशेषणतया विधानाभावात् न हिरण्यसाधनकधारणरूपस्वतन्त्रकर्मविधिरित्येव सूत्रार्थो वर्णयितुं युक्तः। सत्यम्, देवतापदयुक्तो भाष्यकारलिखितः सूत्रपाठः सांप्रदायिको न भवतीति वार्त्तिककारैरस्यक्तत्वात् यथावार्त्तिकं सूत्रं पठित्वा तत्रैव भाष्यकारदर्शितोऽप्यर्थो योजितः। अस्मिन्नर्थे द्रव्यशब्दः संप्रदानत्वार्हदेवतारूपद्रव्यवाचीति तदभावेन द्रव्यदेवतासंयोगराहित्यरूपहेतुसिद्धिरित्यभिप्रायः। सिद्धान्तस्त्विति। न चाधानसंस्कृताह-

भामती।

न हीक्षुक्षीरगुडादीनां मधुररसभेदः शक्य आख्यातुम्। एवमन्यत्रापि सर्वत्र द्रष्टव्यम्। तेन प्रमाणान्तरसिद्धे लौकिके एवार्थे यदा गतिरिदृशी शब्दस्य तदा कैव कथा प्रत्यगात्मन्यलौकिके। अदूरविप्रकर्षेण तु कथंचित्प्रतिपादनमिहापि समानम्। त्वंपदार्थो हि प्रमाता प्रमाणाधीनया प्रमित्या प्रमेयं घटादि व्याप्नोतीत्यविद्याविलसितम्। तदस्य अविषयीभूतोदासीनतत्पदार्थप्रत्य-

कल्पतरुः।

धानवत्क्रत्वनुवादेन सुवर्णधारणं विहितम्, येन साक्षाद्वाक्येन क्रतुसंबन्धि भवेत्। नाप्यव्यभिचारिक्रतुसंबन्धाश्रयद्वारा वाक्यात्पर्णमयी तावत्क्रतुमुपनिपतेत्, सुवर्णधारणस्य लोकेऽपि विद्यमानत्वेन क्रत्वव्यभिचाराभावात्। तस्माद्विनियोगभङ्गेन हिरण्यसाधनकं धारणं वाक्यशेषगताय फलाय विधीयत इति पुरुषधर्म इति। एवमिहाप्यात्मसाधनकदर्शनेनामृतत्वं भावयेदिति विधानात् प्रधानकर्मतैवेति॥

अपूर्वं विषयो जन्यमस्येत्यपूर्वविषयम्। न केवलम् इक्षुक्षीरादिरसविशेष एवानभिधेयः प्रतीयते अपि तु सर्ववाक्यार्थोऽपि। तथा सति ब्रह्माप्यनभिधेयमेव वेदान्ततात्पर्यगम्यमित्याह— **एवमन्यत्रापीति**। गामानयेति हि वाक्ये गवानयनकर्तव्यता अर्थः, सोऽपि साधारण इति न विवक्षितगवानयनं वक्ति वाक्यम्, प्रकरणादिवशेन त्वर्थात्तत्सिद्धिरिति। **अदूरविप्रकर्षेणेति**। साक्षादनभिधानादस्ति विप्रकर्षः, स चादूरः, वस्तुगतधर्मपरामर्शद्वारा वस्तुविशेषस्य लक्षणया प्रतिपादनादिति। प्रत्यगात्मत्वेनाविषयतया प्रतिपादयदिति भाष्यं व्याचक्षाणो वेदान्तानामदूरविप्रकर्षेण वस्तुबोधकत्वमुपपादयति— **त्वंपदार्थो हीति**। **व्याप्नोतीति** यत्तदविद्याविलसितमित्यर्थः। **तत्** तत्र सतीत्यर्थः। अविषयीभूतोदासीनतत्पदार्थस्य प्रत्यगात्मनश्च 'तत्त्वमसि' इति सामानाधिकरण्येनास्य संसारिणः प्रमा-

परिमलः।

वनीयवत् दध्यानयनसंस्कृतपयोवच्च साक्षाद्वाक्येन क्रतुसंबन्धानवगमेऽपि पर्णतावदव्यभिचरितक्रतुसंबन्धाभावेऽपि हिरण्यस्य श्रुतधारणकर्मत्वान्यथानुपपत्त्या अग्निहोत्रादिषु निवेशः कल्प्यः स्यादिति वाच्यम्, तेषु हिरण्यस्येदृशो विनियोग इति तद्विशेषकल्पनायां विनिगमकाभावेन विनियोगविशेषं विना तेषु निवेशस्यानिर्वाहात्। न च येषु क्रतुषु हिरण्यविनियोगः संप्रतिपन्नः तेषु तद्द्वारा धारणस्य निवेशः कल्प्यतामिति वाच्यम्, 'हिरण्यं हस्ते भवति' 'हिरण्येन षोडशिनः स्तोत्रमुपाकरोति' 'हिर-

न हि शास्त्रमिदंतया विषयभूतं ब्रह्म प्रतिपिपादयिषति। किं तर्हि? प्रत्यगात्मत्वेनाविषयतया प्रतिपादयत् अविद्याकल्पितं वेद्यवेदितृवेदनादिभेदमपनयति। तथा च शास्त्रम्— 'यस्यामतं तस्य मतं मतं यस्य न वेद सः। अविज्ञातं विजानतां विज्ञातमविजानताम्' 'न दृष्टेर्द्रष्टारं पश्येर्न श्रुतेः श्रोतारं शृणुया न मतेर्मन्तारं मन्वीथा न विज्ञातेर्विज्ञातारं विजानीयाः' इति चैवमादि। अतोऽविद्याकल्पितसंसारित्वनिवर्तनेन नित्यमुक्तात्मस्वरूपसमर्पणान्न मोक्षस्यानित्यत्वदोषः। यस्य तूत्पाद्यो मोक्षः, तस्य मानसं वाचिकं कायिकं वा कार्यमपेक्षत इति

भामती।

गात्मसामानाधिकरण्येन प्रमातृत्वाभावात् तन्निवृत्तौ प्रमाणादयस्तिस्रो विधा निवर्तन्ते। न हि वक्तुरवस्तुत्वे वाक्यवाचकवचनानि वस्तुसन्ति भवितुमर्हन्तीति। तथा हि— 'विगलितपराग्वृत्त्यर्थत्वं पदस्य तदस्तदा त्वमिति हि पदेनैकार्थत्वे त्वमित्यपि यत्पदम्। तदपि च तदा गत्वैकार्थ्यं विशुद्धचिदात्मतां त्यजति सकलान्कर्तृत्वादीन्पदार्थमलान्निजान्' इत्यान्तरश्लोकः। अत्रैवार्थे श्रुतीरुदाहरति,— तथा च शास्त्रम्— यस्यामतमिति। प्रकृतमुपसंहरति— अतोऽविद्याकल्पितेति। परपक्षे मोक्षस्यानित्यतामापादयति— यस्य त्विति।

कल्पतरुः।

तृत्वाभावात्तन्निवृत्तौ प्रमित्या प्रमेयं व्याप्नोतीत्येवंभावस्य निवृत्तौ त्रयः प्रकारा निवर्तन्त इत्यर्थः। विगलितेति। विगलिता पराक्त्वेन वृत्तिर्वर्त्तनं यस्य स विगलितपराग्वृत्तिः तादृशः प्रत्यक्त्वमापन्नोऽर्थो यस्य तद्विगलितपराग्वृत्त्यर्थं तस्य भावस्तत्त्वम् एतत्तदस्तत्पदस्य तदा काले भवति। कदेत्यत आह— त्वमिति हीति। तदा तत्पदेन। एकार्थस्यैव व्याख्या— विशुद्धेति। आन्तरश्लोको मध्यश्लोकः। परपक्षे इति। 'साध्यश्चेन्मोक्षोऽभ्युपगम्येत अनित्य एव स्यात्' इति भाष्येणापादितैवानित्यता अनूद्यते नित्येऽपि मोक्षे अविद्यानिवृत्तिसंस्कारः कर्मसाध्य इति

परिमलः।

ण्यस्तज ऋत्विजो भवन्ति' इत्यादिहिरण्यविनियोगवत्सु क्रतुषु तद्धारणस्यापि प्राप्तेः,

युक्तम्। तथा विकार्यत्वे च। तयोः पक्षयोर्मोक्षस्य ध्रुवमनित्यत्वम्। न हि दध्यादि विकार्यम् उत्पाद्यं वा घटादि नित्यं दृष्टं लोके। न च आप्यत्वेनापि कार्यापेक्षा, स्वात्मस्वरूपत्वे सत्यनाप्यत्वात्; स्वरूपव्यतिरिक्तत्वेऽपि ब्रह्मणो नाप्यत्वम्, सर्वगतत्वेन नित्याप्तस्वरूपत्वात्सर्वेण ब्रह्मण आकाशस्येव। नापि संस्कार्यो मोक्षः, येन व्यापारमपेक्षेत। संस्कारो हि नाम संस्कार्यस्य गुणाधानेन वा स्यात्, दोषा-

---

भामती।

कार्यमपूर्वं यागादिव्यापारजन्यम्, तदपेक्षते मोक्षः स्वोत्पत्ताविति। **तयोः पक्षयोरिति**। निर्वर्त्यविकार्ययोः; क्षणिकं विज्ञानमात्मेति बौद्धाः। तथा च विशुद्धविज्ञानोत्पादो मोक्ष इति निर्वर्त्यो मोक्षः। अन्येषां तु संसाररूपावस्थामपहाय या कैवल्यावस्थावाप्तिरात्मनः स मोक्ष इति विकार्यो मोक्षः— यथा पयसः पूर्वावस्थापहानेनावस्थान्तरप्राप्तिर्विकारो दधीति। तदेतयोः पक्षयोर्न नित्यता मोक्षस्य, कार्यत्वात्, दधिघटादिवत्। 'अथ यदतः परो दिवो ज्योतिर्दीप्यते' इति श्रुतेर्ब्रह्मणो विकृताविकृतदेशभेदावगमादविकृतदेशब्रह्मप्राप्तिरुपासनादिविधिकार्या भविष्यति; तथा च प्राप्यकर्मता ब्रह्मण इत्यत आह— **न चाप्यत्वे नापीति**। अन्यदन्येन विकृतदेशपरिहाण्याविकृतदेशं प्राप्यते। तद्यथोपवेलं जलधिरतिबहलचपलकल्लोलमालापरस्परास्फालनसमुल्लसत्फेनपुञ्जस्तबकतया विकृतः, मध्ये तु प्रशान्तसकलकल्लोलोपसर्गः स्वच्छः स्थिरतयाविकृतः, तस्य मध्यमविकृतं पौतिकः पोतेन प्राप्नोति; जीवस्तु ब्रह्मैवेति किं केन प्राप्यताम्? भेदाश्रयत्वात्प्राप्तेरित्यर्थः। अथ जीवो ब्रह्मणो भिन्नस्तथापि न तेन ब्रह्माप्यते, ब्रह्मणो विभुत्वेन नित्यप्राप्तत्वादित्याह— **स्वरूपव्यतिरिक्तत्वेऽपीति**। संस्कारकर्मतामपाकरोति— **नापि संस्कार्य इति**। द्वयी हि संस्कार्यता, गुणाधानेन वा यथा बीजपूरकुसुमस्य लाक्षारसावसेकः, तेन हि तत्कुसुमं संस्कृतं

कल्पतरुः।

पक्षप्रतिक्षेपेण अनित्यत्वं स्थापयितुमित्यर्थः। **उपवेलं** वेलायाः समीपे। विकृतः; तत्र हेतुः— **अतिबहुलेति**। समुल्लसन्तः फेनपुञ्जस्तबका यस्य तस्य भावस्तत्ता। पोतेन दीव्यति व्यवहरतीति पौतिकः। अशुद्धिर्ब्रह्मणि सती उतासती; प्रथमस्तु

पनयनेन वा । न तावद्गुणाधानेन संभवति, अनाधेयातिशयब्रह्मस्वरूपत्वान्मोक्षस्य । नापि दोषापनयनेन, नित्यशुद्धब्रह्मस्वरूपत्वान्मोक्षस्य । स्वात्मधर्म एव सन् तिरोभूतो मोक्षः क्रिययात्मनि संस्क्रियमाणेऽभिव्यज्यते, यथा आदर्शे निघर्षणक्रिययां संस्क्रियमाणे भास्वरत्वं धर्म

भामती ।

लाक्षारससवर्णं फलं प्रसूते । दोषापनयेन वा यथा मलिनमादर्शतलं निघृष्टमिष्टकाचूर्णेनोद्भासितभास्वरत्वं संस्कृतं भवति । तत्र न तावद्ब्रह्मणि गुणाधानं संभवति । गुणो हि ब्रह्मणः स्वभावो वा भिन्नो वा? स्वभावश्चेत् कथमाधेयः, तस्य नित्यत्वात् । भिन्नत्वे तु कार्यत्वेन मोक्षस्यानित्यत्वप्रसङ्गः । न च भेदे धर्मधर्मिभावः, गवाश्ववत् । भेदाभेदश्च व्युदस्तः, विरोधात् । तदनेनाभिसंधिनोक्तम्— **अनाधेयातिशयब्रह्मस्वरूपत्वान्मोक्षस्य** इति । द्वितीयं पक्षं प्रतिक्षिपति—**नापि दोषापनयनेनेति** । अशुद्धिः सती दर्पणे निवर्तते; न तु ब्रह्मणि असती निवर्तनीया, नित्यनिवृत्तत्वादित्यर्थः । शङ्कते— **स्वात्मधर्म एवेति** । ब्रह्मस्वभाव एव मोक्षोऽनाद्यविद्यामलावृत उपासनादिक्रिययात्मनि संस्क्रियमाणेऽभिव्यज्यते, न तु क्रियते । एतदुक्तं भवति— नित्यशुद्धत्वमात्मनोऽसिद्धम्,

कल्पतरुः ।

भिन्नाभिन्नविकल्पनाभ्यां निरसनीयः; चरमं निरस्यति— न त्विति । अनाद्यविद्यामलेति शङ्कितुर्वास्तव्यविद्याभिमतेति । ननु नित्यशुद्धत्वादात्मनि न हेयसंभव इत्युक्ते कथं शङ्का? अत आह— **एतदुक्तमिति** । ब्रह्मणि नाविद्या किं तु जीवे सा चानिर्वाच्येत्युक्तमध्यासभाष्ये । तथाविधा च ज्ञाननिरस्येत्युपा-

परिमलः ।

दक्षिणारूपहिरण्यवत्स्वपि दीयमानस्य प्रतिगृह्यमाणस्य च तस्य धारणप्राप्तेः, हिरण्यार्थतया धारणविधाने सुवर्णश्रुतिवैफल्यापत्तेश्च । तस्मात् शोभनवर्णहिरण्यसाधनकधारणविधिः पुरुषार्थ इत्येव युक्तम् । एवं सतीयमेव श्रुतिः 'दाक्षायणी ब्रह्मसूत्री कमण्डलुधरो द्विजः' इत्यादिपुरुषार्थहिरण्यधारणस्मृतेर्मूलं भविष्यतीति तस्या मूलान्तरकल्पनागौरवमपि परिहृतं भवतीति । **इत्युक्तमध्यासभाष्य इति** । अन्तःकरणाद्यवच्छिन्नः प्रत्यगात्मा इदमनिदंरूपश्चेतनः कर्ता भोक्ता कार्यकारणाविद्याद्ययाधार इत्यध्यासभाष्यटीकायामुक्तमित्यर्थः ॥

इति चेत्, न; क्रियाश्रयत्वानुपपत्तेरात्मनः। यदाश्रया क्रिया, तमविकुर्वती नैवात्मानं लभते। यद्यात्मा स्वाश्रयक्रियया विक्रियेत, अनि-

---

भामती।

संसारावस्थायामविद्यामलिनत्वादिति। शङ्कां निराकरोति— **न**। कुतः? **क्रियाश्रयत्वानुपपत्तेः**। नाविद्या ब्रह्माश्रया, किं तु जीवे, सा त्वनिर्वचनीयेत्युक्तम्, तेन नित्यशुद्धमेव ब्रह्म। अभ्युपेत्य त्वशुद्धिं क्रियासंस्कार्यत्वं दूष्यते। क्रिया हि ब्रह्मसमवेता वा ब्रह्म संस्कुर्यात्, यथा निघर्षणमिष्टकाचूर्णसंयोगविभागप्रचयो निरन्तर आदर्शतलसमवेतः; अन्यसमवेता वा। न तावद्ब्रह्मधर्मः क्रिया, तस्याः स्वाश्रयविकारहेतुत्वेन ब्रह्मणो नित्यत्वव्याघातात्। अन्याश्रया तु कथमन्यस्योपकरोति, अतिप्रसङ्गात्। न हि दर्पणे निघृष्यमाणे मणिर्विशुद्धो

कल्पतरुः।

स्तिर्विफलेत्यर्थः। निघर्षणस्य व्याख्यानम् **इष्टकेति**। एतच्च धात्वर्थः संयोगविभागावेवेति मतमाश्रित्य। **अन्याश्रया त्विति**। यद्यपि स्पन्दरूपा भावना चैत्राश्रिता दर्पणस्योपकरोति तथापि संयोगविभागाख्यधात्वर्थद्वारा तौ च नात्मनीत्यर्थः।

परिमलः।

ननु— घर्षणस्यादर्शगतेष्टकाचूर्णसंयोगविभागप्रचयतया व्याख्यानमयुक्तम्, फलं हि तत्प्रचयः पुरुषव्यापाररूपाया घर्षणक्रियायाः— यथा तण्डुलविक्लित्तिः पचिक्रियाया इत्याशङ्क्याह— **एतच्चेति**। सर्वत्र फलमेव धात्वर्थः न तु तदनुकूलव्यापारः, त्यजिगमिधात्वोः पर्यायतापत्तेः। एक एव हि पूर्वदेशविभागोत्तरदेशसंयोगरूपफलद्वयस्याप्यनुकूलो व्यापारः पुरुषस्पन्दः। यद्युच्येत फलविशेषावच्छिन्नो व्यापारो धात्वर्थः ततः पूर्वदेशं त्यजति उत्तरदेशं गच्छतीत्यर्थभेदस्तयोरिति तर्ह्यावश्यिकत्वात् लाघवाच्च तत्तत्फलमेव धात्वर्थोऽस्तु। न चैवं सति पचेर्विक्लित्त्यर्थतायां विक्लित्त्युदयात्प्राक् पचतीति वर्तमानप्रयोगो न स्यात् न स्याच्च तण्डुलान् पचतीति तण्डुलानां कर्मतया निर्देशः। धात्वर्थरूपविक्लित्तिक्रियाजन्यस्य तण्डुलेषु फलान्तरस्याभावात्तस्याः परसमवेतत्वाभावाच्चेति वाच्यम्, धात्वर्थरूपफलानुकूलव्यापारस्याख्यातार्थत्वाङ्गीकारेण पचतीति लडर्थस्य वर्तमानत्वस्यैकप्रत्ययोपात्ते तस्मिन्नन्वयोपपत्तेः तज्जन्यविक्लित्तिरूपफलभागित्वेन तण्डुलानां कर्मतयानिर्देशोपपत्तेश्चेति मण्डनाचार्याणां मतमनुसृत्य संयोगविभागरूपस्य घर्षतिधात्वर्थत्वमुक्तमिति भावः॥

त्यत्वमात्मनः प्रसज्येत । 'अविकार्योऽयमुच्यते' इति चैवमादीनि वाक्यानि बाध्येरन् । तच्चानिष्टम् । तस्मान्न स्वाश्रया क्रिया आत्मनः संभवति । अन्याश्रयायास्तु क्रियाया अविषयत्वान्न तयात्मा संस्क्रियते। ननु देहाश्रयया स्नानाचमनयज्ञोपवीतधारणादिकया क्रियया देही संस्क्रियमाणो दृष्टः, न; देहादिसंहतस्यैवाविद्यागृहीतस्यात्मनः संस्क्रिय-

भामती ।

दृष्टः । तच्चानिष्टमिति । तदा बाधनं परामृशति । अत्र व्यभिचारं चोदयति— ननु देहाश्रययेति । परिहरति— न । देहसंहतस्येति । अनाद्यनिर्वाच्याविद्योपधानमेव ब्रह्मणो जीव इति च क्षेत्रज्ञ इति चाचक्षते । स च स्थूलसूक्ष्मशरीरेन्द्रियादिसंहतस्तत्संघातमध्यपतितस्तदभेदेनाहमितिप्रत्ययविषयीभूतः,

कल्पतरुः ।

संयोगविभागातिरिक्तधात्वर्थपक्षेऽपि समानं धात्वर्थस्य संयोगविभागद्वारा अतिशयजनकत्वात्; न चात्मनि क्रियाजन्यातिशयसंभव इति । तदा तच्छब्देन बाध्येरन्नित्युक्तं बाधनं परामृशति; तत् अव्यवहितम् । अनित्यत्वमात्मनः प्रसज्येतेत्युक्तं त्वनित्यत्वं व्यवहितमिति । ननु देहादावहंविभ्रमवत एव संस्कार्यत्वमिति कथम्? स्वत एव किं न स्यादत आह— अनाद्यनिर्वाच्येति । ननु नाविद्यामात्रोपहिते सुषुप्तवद्व्यवहारसिद्धिरत आह— स्थूलेति । स्थूलसूक्ष्माणि च तानि यथाक्रमं शरीरेन्द्रियाणि । आदिशब्दात्प्राणादयः । संहतत्वमपि न तटस्थत्वेन तत्संयोगित्वं किं तु तत्र प्रविष्टत्वमित्याह— तत्संघातेति । प्रवेशोऽपि न भेदेन प्रतिभासमानत्वेन किं तु ऐक्याध्यासेनेत्याह— तदभेदेनेति । अङ्गरागश्चन्दनादिः ।

परिमलः ।

ननु— फलस्य धात्वर्थत्वे विक्लित्त्युदयात्प्राक् पाको वर्तत इति प्रयोगो न स्यात्, तत्र पचिधातोरुपरि तदर्थविक्लित्त्यनुकूलव्यापारवाचकस्याख्यातस्याभावात् । तत्तत्फलानुकूलव्यापारसामान्यरूपेणाख्यातार्थत्वे च पचति यजतीत्यादावधःसंतापनद्रव्यत्यागादिव्यापारविशेषप्रतीतिर्न स्यात्; तत्र तत्राधःसंतापनादिव्यापारविशेषस्यापि तदर्थतायामाख्यातस्य नानार्थत्वं स्यात्; तस्मात् तत्तद्व्यापारविशेष एव धात्वर्थः; त्यजिगम्योरपर्यायता तु फलस्योपलक्षणतयाप्युपपद्यत इति मन्यमानानामन्येषां मते कथमिहोपपत्तिरित्याशङ्क्याह— संयोगविभागातिरिक्तेति । दर्पणेष्टकाचूर्णसंयोगविभागफलकः पुरुषव्यापारो घर्षतिधात्वर्थ इति पक्षेऽपीत्यर्थः ॥

माणत्वात्। प्रत्यक्षं हि स्नानाचमनादेर्देहसमवायित्वम्। तया देहाश्रयया तत्संहत एव कश्चिदविद्ययात्मत्वेन परिगृहीतः संस्क्रियत इति युक्तम्। यथा देहाश्रयचिकित्सानिमित्तेन धातुसाम्येन तत्संहतस्य तदभिमानिन आरोग्यफलम्, 'अहमरोगः' इति यत्र बुद्धिरुत्पद्यते— एवं स्नानाचमनयज्ञोपवीतधारणादिकया 'अहं शुद्धः संस्कृतः' इति यत्र बुद्धिरुत्पद्यते, स संस्क्रियते। स च देहेन संहत एव। तेनैव अहंकर्त्रा अहंप्रत्ययविषयेण प्रत्ययिना सर्वाः क्रिया निर्वर्त्यन्ते। तत्फलं च स एवाश्नाति, 'तयोरन्यः पिप्पलं स्वाद्वत्ति अनश्नन्नन्योऽभिचाकशीति' इति मन्त्रवर्णात्— 'आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः' इति च। तथा 'एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा। कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्च' इति, 'स पर्यगाच्छुक्रमकायमव्रणमस्नाविरं शुद्धमपापविद्धम्' इति च—

भामती।

अतः शरीरादिसंस्कारः शरीरादिधर्मोऽप्यात्मनो भवति, तदभेदाध्यवसायात्। यथा अङ्गरागधर्मः सुगन्धिता कामिनीनां व्यपदिश्यते। तेनात्रापि यदाश्रिता क्रिया सांव्यवहारिकप्रमाणविषयीकृता तस्यैव संस्कारो नान्यस्येति न व्यभिचारः। तत्त्वतस्तु न क्रिया न संस्कार इति। सनिदर्शनं तु शेषमध्यासभाष्य एव कृतव्याख्यानमिति नेह व्याख्यातम्। तयोरन्यः पिप्पलमिति। अन्यो जीवात्मा। पिप्पलं कर्मफलम्। अनश्नन्नन्य इति। परमात्मा। संहतस्यैव भोक्तृत्वमाह मन्त्रवर्णः— आत्मेन्द्रियेति। अनुपहितशुद्धस्वभावब्रह्मप्रदर्शनपरौ मन्त्रौ पठति— एको देव इति। शुक्रं दीप्तिमत्। अव्रणं दुःखरहितम्।

कल्पतरुः।

फलितमाह— तेनेति। देहादावैक्येनाध्यस्ते आत्मनि क्रिया आरोप्यते तज्जन्यसंस्कारश्च, अतो नान्याश्रितक्रियाफलभाक्त्वमन्यस्येति न व्यभिचार इत्यर्थः। आरोपितसंस्कारान्न फलभाक्त्वमिति शङ्कामहंप्रत्ययस्य रूप्याद्यध्यासवैलक्षण्येन परिहरति— सांव्यवहारिकेति। 'स्नु प्रस्रवणे' इति धातुमभिप्रेत्याह— अविगलि-

एतौ मन्त्रावनाधेयातिशयतां नित्यशुद्धतां च ब्रह्मणो दर्शयतः । ब्रह्मभावश्च मोक्षः । तस्मान्न संस्कार्योऽपि मोक्षः । अतोऽन्यन्मोक्षं प्रति क्रियानुप्रवेशद्वारं न शक्यं केनचिद्दर्शयितुम् । तस्माज्ज्ञानमेकं मुक्त्वा क्रियाया गन्धमात्रस्याप्यनुप्रवेश इह नोपपद्यते । ननु ज्ञानं नाम मानसी क्रिया, नः; वैलक्षण्यात् । क्रिया हि नाम

भामती ।

अस्रावि॰ अविगलितम् । अविनाशीति यावत् । उपसंहरति— तस्मादिति । ननु मा भून्निर्वर्त्यादिकर्मताचतुष्टयी; पञ्चमी तु काचित् विधा भाविष्यति, यया मोक्षस्य कर्मता घटिष्यत इत्यत आह— अतोऽन्यदिति । एभ्यः प्रकारेभ्यो न प्रकारान्तरमन्यदास्ति, यतो मोक्षस्य क्रियानुप्रवेशो भविष्यति । एतदुक्तं भवति— चतसृणां विधानां मध्येऽन्यतमतया क्रियाफलत्वं व्याप्तम्, सा च मोक्षाद्व्यावर्तमाना व्यापकानुपलब्ध्या मोक्षस्य क्रियाफलत्वं व्यावर्तयतीति । तर्किं मोक्षे क्रियैव नास्ति, तथा च तदर्थानि शास्त्राणि तदर्थाश्च प्रवृत्तयोऽनर्थकानीत्यत उपसंहारव्याजेनाह— तस्माज्ज्ञानमेकमिति । अथ ज्ञानं क्रिया मानसी कस्मान्न विधिगोचरः, कस्माच्च तस्याः फलं निर्वर्त्यादिष्वन्यतमं न मोक्ष इति चोदयति— ननु ज्ञानमिति । परिहरति— न । कुतः? वैलक्षण्यात् । अयमर्थः— सत्यम्, ज्ञानं मानसी क्रिया, न त्वियं ब्रह्मणि फलं जनयितुमर्हति, तस्य स्वयंप्रकाशतया विदिक्रियाकर्मभावानुपपत्तेरित्युक्तम् ।

कल्पतरुः ।

तमिति । क्रियानुप्रवेशस्य द्वारान्तरं मोक्षे भवत्विति शङ्कायां भाष्ये तदभावप्रतिज्ञैव भाति न हेतुरित्याशङ्क्याह— एतदुक्तमिति । न च विदिक्रियाविषयत्वेनेति भाष्ये ज्ञानाविषयत्वस्योक्तत्वात्पुनः शङ्कोत्तरे व्यर्थे इत्याशङ्क्य परिहारान्तराभिप्रायतामाह— अयमर्थ इत्यादिना । यदवादि पूर्वपक्षे ज्ञानस्य भावार्थत्वात् विधेयत्वमिति तत्र क्रियात्वमभ्युपेत्य विधेयत्वं निराक्रियत इत्याह— सत्यमिति । वस्तुतो विदिक्रियायाः कर्मभावानुपपत्तेरित्यर्थः । औपाधिकं तु कर्मत्वमनिष्टं

परिमलः ।

वस्तुतो विदिक्रियाकर्मभावेत्यादिव्याख्याने बीजमाह— औपाधिकं त्विति । वृत्त्युप-

सा, यत्र वस्तुस्वरूपनिरपेक्षैव चोद्यते, पुरुषचित्तव्यापाराधीना च, यथा— 'यस्यै देवतायै हविर्गृहीतं स्यात्तां मनसा ध्यायेद्वषट् करिष्यन्' इति, 'संध्यां मनसा ध्यायेत्' इति चैवमादिषु । ध्यानं चिन्तनं यद्यपि मानसम्, तथापि पुरुषेण कर्तुमकर्तुमन्यथा वा कर्तुं शक्यम्, पुरुषतन्त्रत्वात् । ज्ञानं तु प्रमाणजन्यम् । प्रमाणं च यथाभूतवस्तुविषयम् । अतो ज्ञानं कर्तुमकर्तुमन्यथा वा कर्तुं न शक्यम् । केवलं वस्तुतन्त्रमेव तत्; न चोदनातन्त्रम्, नापि पुरुषतन्त्रम्; तस्मान्मानसत्वेऽपि ज्ञानस्य महद्वैलक्षण्यम् । यथा च 'पुरुषो वाव गौतमाग्निः' 'योषा वाव गौतमाग्निः' इत्यत्र योषित्पुरुषयोरग्निबुद्धिर्मानसी भवति; केवल-

---

भामती ।

तदेतस्मिन्वैलक्षण्ये स्थिते एव वैलक्षण्यान्तरमाह— क्रिया हि नाम सेति । यत्र विषये वस्तुस्वरूपनिरपेक्षैव चोद्यते । यथा देवतासंप्रदानकहविर्ग्रहणे देवतावस्तुस्वरूपानपेक्षा देवताध्यानक्रिया । यथा वा योषिति अग्निवस्त्वन-

कल्पतरुः ।

नियोगवादिनाम् । यदा तु ज्ञानं क्रियैव न भवतीत्येवंपरतया भाष्यं व्याख्यायते तदा पचतीतिवज्ज्ञानातीति पूर्वापरीभावप्रसिद्धिर्दुश्चिकित्सा स्यादिति । वैलक्षण्यान्तरमिति । ज्ञेयवैलक्षण्यं प्रागुक्तमिदानीं ज्ञानस्याविधेयत्वं वैलक्षण्यमुच्यत इति । यत्र विषये या वस्त्वनपेक्षा चोद्यते तत्र सा क्रियेति तच्छब्दाध्याहारेण योजयितुं यत्रशब्दार्थमाह— यत्र विषये इति । ध्यानस्य वस्त्वनपेक्षामुक्त्वा पुरुषेच्छाधी-

परिमलः ।

रागोपाधिकं कर्मत्वमित्यर्थः । इदं तु परानुगुण्यान्नेति भावः । तच्छब्दाध्याहारेण योजयितुमिति । यत्रेत्यस्य प्रतिनिर्देशार्थं तत्रेति शब्दाध्याहारेण योजयितुमित्यर्थः । एवं च टीकायां तत्रशब्दाश्रवणेऽपि तदध्याहारोऽभिप्रेत इति सूचितं भवति । यच्छब्दाध्याहारेण योजयितुमिति पाठे तु सेति शब्दस्य प्राङ्निर्देशार्थे येति शब्दस्याध्याहारेण योजयितुमित्यर्थः । अनेनोभयमप्यध्याहार्यमिति सिद्धम् । अत एवाचार्यैस्तत्रेति येति चोभयमप्यध्याहृत्य वाक्यं पूरितम् ॥

चोदनाजन्यत्वात्तु क्रियैव सा पुरुषतन्त्रा च; या तु प्रसिद्धेऽग्नावग्निबुद्धिः, न सा चोदनातन्त्रा; नापि पुरुषतन्त्रा; किं तर्हि, प्रत्यक्ष-

भामती ।

पेक्षाग्निबुद्धिर्या सा क्रिया हि नामेति योजना । न हि 'यस्यै देवतायै हविर्गृहीतं स्यात्तां ध्यायेद्वषट्करिष्यन्' इत्यस्माद्विधेः प्राग्देवताध्यानं प्राप्तम्, प्राप्तं त्वधीतवेदान्तस्य विदितपदतदर्थसंबन्धस्याधिगतशब्दन्यायतत्त्वस्य 'सदेव सोम्येदम्' इत्यादेः 'तत्त्वमसि' इत्यन्तात्संदर्भात् ब्रह्मात्मभावज्ञानम्, शब्दप्रमाणसामर्थ्यात्। इन्द्रियार्थसंनिकर्षसामर्थ्यादिव प्रणिहितमनसः स्फीतालोकमध्यवर्तिकुम्भानुभवः । न ह्यसौ स्वसामग्रीबललब्धजन्मा मनुजेच्छयान्यथाकर्तुमकर्तुं वा शक्यः, देवताध्यानवत्, येनार्थवानत्र विधिः स्यात्। न चोपासना वानुभवपर्यन्तता वास्य विधेर्गोचरः, तयोरन्वयव्यतिरेकावधृतसामर्थ्ययोः साक्षात्कारे वानाद्यविद्यापनये वा विधिमन्तरेण प्राप्तत्वेन पुरुषेच्छयान्यथाकर्तुमकर्तुं वा अशक्यत्वात्। तस्माद्ब्रह्मज्ञानं मानसी क्रियापि न विधिगोचरः । पुरुषचित्तव्यापाराधीनायास्तु क्रियाया वस्तुस्वरूपनिरपेक्षिता क्वचिदविरोधिनी, यथा देवताध्यानक्रियायाः । न ह्यत्र वस्तुस्वरूपेण कश्चिद्विरोधः । क्वचिद्वस्तुस्वरूपविरोधिनी, यथा योषित्पुरुषयोरग्निबुद्धिरित्येतावता भेदेन निदर्शनमिथुनद्वयोपन्यासः । क्रियैवेत्येवकारेण वस्तुतन्त्रत्वमपाकरोति । ननु 'आत्मेत्ये-

कल्पतरुः ।

नत्वमुपपादयति— न हि यस्यै इति । वषट्करिष्यन् होता । विध्यर्थानुष्ठानात्प्राक् प्रमाणवशाद्ध्यानं न सिध्यति; ततः पुरुषेच्छावशवर्तीति । शाब्दज्ञानाभ्यासो वा तस्यैव साक्षात्कारपर्यन्तता वा पुरुषेच्छाधीनेत्याशङ्क्याह— न चेति । उपासनायाः साक्षात्कारे अनुभवपर्यन्तताशब्दोक्तसाक्षात्कारस्याप्यविद्यापनये प्राप्तत्वादित्यर्थः । क्रियायाः क्वचिद्वस्तुस्वरूपविरोधित्वं प्रमाणज्ञानाद्वैलक्षण्यमाह— क्वचिद्वस्तुस्वरूपविरोधिनीति । वस्तुतन्त्रत्वमपाकरोतीति । अनेन ज्ञानमेव तन्न

परिमलः ।

ननु तां ध्यायेदिति विधितः प्राग्देवताध्यानमप्राप्तमित्यसिद्धं तं विधिमनपेक्ष्यापि तत्तदर्थवादावगमितदेवतारूपाणां स्वेच्छया कदाचिदनुचिन्तनसंभवादित्यत आह— विध्यर्थेति । वषट्कुर्यादिति विध्यर्थवषट्कारानुष्ठानात् प्राक्काले नियमेन ध्यानं तद्विधिं विना न प्राप्तमित्यर्थः । नन्वधीतवेदस्य न्यायविचारपूर्वकार्थज्ञानमपि विधिं विना न प्राप्नोतीति

विषयवस्तुतन्त्रैवेति ज्ञानमेवैतत्; न क्रिया— एवं सर्वप्रमाणविषयवस्तुषु वेदितव्यम्। तत्रैवं सति यथाभूतब्रह्मात्मविषयमपि ज्ञानं न चोदनातन्त्रम्। तद्विषये लिङादयः श्रूयमाणा अपि अनियोज्यविषय-

---

भामती ।

वोपासीत' इत्यादयो विधयः श्रूयन्ते; न च ते प्रमत्तगीताः, तुल्यं हि सांप्रदायिकम्, तस्माद्विधेयेनात्र भवितव्यमित्यत आह—**तद्विषये लिङादय इति** । सत्यं श्रूयन्ते लिङादयः, न त्वमी विधिविषयाः, तद्विषयत्वेऽप्रामाण्यप्रसङ्गात् । हेयोपादेयविषयो हि विधिः । स एव च हेय उपादेयो वा, यं पुरुषः कर्तुमकर्तुमन्यथा वा कर्तुं शक्नोति । तत्रैव च समर्थः कर्ताधिकृतो नियोज्यो भवति । न चैवंभूतान्यात्मश्रवणमननोपासनदर्शनानीति विषयतदनुष्ठात्रोर्विधि-

कल्पतरुः ।

क्रियेति भाष्ये क्रियाशब्देन क्रियागतमवस्तुतन्त्रत्वं लक्षयित्वा प्रतिषिध्यत इति व्याख्यातम्। अत एव हि भाष्यकारो ब्रह्मज्ञानं न चोदनातन्त्रमिति दार्ष्टान्तिके चोदनातन्त्रत्वं प्रतिषेधति, न ब्रवीति न क्रियेति । अतः क्रियात्वमभ्युपेत्य ज्ञाने विधेयत्वं न मृष्यत इति गम्यते । **सांप्रदायिकं** गुरुमुखाध्ययनादि । विधिः कार्यं विषयो येषां ते विधिविषयाः । यः समर्थः शक्तः स कर्ता यः कर्ता स कर्मण्यधिकृतः स्वामी योऽधिकृतः स नियोगं स्वकीयतया बुध्यमानो नियोज्यः स च तत्रैव वर्णितरूपे विषये सति भवति तस्मिन्नसति न भवतीत्यर्थः ॥

उक्तविषयत्वस्य श्रवणादावभावमाह— **न चैवमिति** । श्रवणं हि ब्रह्मात्मनि

परिमलः ।

चेत्, न, तस्याध्ययनविधिना फलवदर्थावबोधपरतां नीतैर्विशेषतः संदिह्यमानार्थैर्वेदान्तैराक्षिप्ततया मुमुक्षूणां प्राप्तिसत्त्वात् इति भावः । टीकाकारैः सर्वापेक्षाधिकरणे चतस्रः प्रतिपत्तयो ब्रह्मणि प्रथमा तावदुपनिषद्वाक्यश्रवणमात्रात् भवति यां किलाचक्षते श्रवणमिति द्वितीया मीमांसासहितात्तस्मादेवोपनिषद्वाक्यात् यामाचक्षते मननमिति तृतीया चिन्तासंततिमयी यामाचक्षते निदिध्यासनमिति चतुर्थी तु साक्षात्कारवती वृत्तिरूपेति; श्रवणादिरूपतयोक्तानां चतुर्णामपि ज्ञानानां प्राप्तत्वेन विधातुमशक्यत्वमुपपादितमेव । इदानीं न्यायतस्तात्पर्यावधारणं श्रवणं तदनुग्राहकानुमानादिरूपयुक्त्यनुचिन्तनं मननमिति पक्षे विधान्तरेणापि तयोर्निदिध्यासनस्य च विधानासंभवमाह— **श्रवणं हीति** ॥

त्वात्कुण्ठीभवन्ति उपलादिषु प्रयुक्तक्षुरतैक्ष्ण्यादिवत्, अहेयानुपादेयवस्तुविषयत्वात्। किमर्थानि तर्हि 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यः'

भामती।

व्यापकयोरभावाद्विधेरभाव इति प्रयुक्ता अपि लिङादयः प्रवर्तनायामसमर्था उपल इव क्षुरतैक्ष्ण्यं कुण्ठमप्रमाणीभवन्तीति। **अनियोज्यविषयत्वादिति**। समर्थो हि कर्ताधिकारी नियोज्यः। असामर्थ्ये तु न कर्तृता ततो नाधिकृतोऽतो न नियोज्य इत्यर्थः। यदि विधेरभावान्न विधिवचनानि, किमर्थानि तर्हि वचनान्येतानि विधिच्छायानीति पृच्छति— **किमर्थानीति**। न चानर्थ-

कल्पतरुः।

तत्त्वमसिवाक्यस्य तच्छब्दश्रुत्यादिपर्यालोचनया तात्पर्यावगमः। अस्य च विषयविशेषावच्छिन्नस्य प्रत्ययस्यानवगमे तत्कर्तव्यत्वबोधायोगात्; अवगमे च श्रवणस्यैव जातत्वात्पुनः कर्तुमकर्तुमन्यथा वा कर्तुमशक्यत्वम्। एवं मननस्यापि विषयविशेषनियतयुक्त्यालोचनस्यावगतस्य कर्तुमशक्यत्वादि इति। उपासनस्यापि यथा-

परिमलः।

विषयविशेषावच्छिन्नस्येति। ननु सामान्यतस्तात्पर्यावगमो विधेयोऽस्त्वित्याशङ्क्य विशेषग्रहणं कृतम्। तथा च सर्वेषां वेदानामर्थपरत्वमापादयता अर्थज्ञानफलकाध्ययनविधिनैव च वेदान्तानामपि कर्मकाण्डवत् सामान्यतोऽर्थतात्पर्यावगमसिद्धेर्न तदवगमार्थं श्रवणविधिरभ्युपेयः, किं तु तेषामखण्डे ब्रह्मणि न्यायतस्तत्तात्पर्यमवगच्छेदिति विषयविशेषावच्छिन्नतात्पर्यावगतिविषयः सोऽभ्युपेतव्यः। तथा च प्राक् तदवगमानवगमयोरुक्तदूषणद्वयमापततीति भावः। ननु साङ्गाध्ययनवतो वेदान्तानां सगुणनिर्गुणरूपेषु नानाविधेष्वर्थेषु स्फुरितेषु कैषां तात्पर्यमिति संदेहे च सति बुद्ध्यारूढनिर्गुणरूपविषयविशेषावच्छिन्नं तात्पर्यं न्यायतो निश्चिनुयादिति विधातुं शक्यत इति चेत्, न, वेदान्तार्थनिश्चयात् फलविशेषप्रतीतौ तदर्थतात्पर्यनिर्णयाय स्वत एव न्यायविचारे प्रवृत्त्युपपत्त्या कर्मकाण्डार्थविचार इव विध्यनपेक्षणात्। **युक्त्यालोचनस्येति**। युक्तिविशेषालोचनविधाने प्राक् तदवगमानवगमाभ्यां प्राप्तिर्विधानाशक्तिश्च। सामान्यतो युक्त्यालोचनं तु न विधेयम्, असंभावनादिनिरासरूपदृष्टार्थत्वेन स्वत एव प्राप्तेः इति भावः। **उपासनस्यापीति**। उपासनं हि प्रत्ययावृत्तिः सा श्रवणमननकालयोरेकैकप्रत्ययोत्पत्तावपि प्रत्ययद्वयरूपा सिद्धैव विधेयनिदिध्यासनावगमकाले विधेयावृत्त्यवगमस्य ब्रह्मात्मै-

इत्यादीनि विधिच्छायानि वचनानि?— स्वाभाविकप्रवृत्तिविषयविमुखीकरणार्थानीति ब्रूमः। यो हि बहिर्मुखः प्रवर्तते पुरुषः 'इष्टं मे भूयादनिष्टं मा भूत्' इति, न च तत्रात्यन्तिकं पुरुषार्थं लभते, तमात्यन्तिकपुरुषार्थवाञ्छिनं स्वाभाविककार्यकरणसंघातप्रवृत्तिगोचरादिमुखीकृत्य प्रत्यगात्मस्रोतस्तया प्रवर्तयन्ति 'आत्मा वा अरे द्रष्टव्यः' इत्यादीनि; तस्यात्मान्वेषणाय प्रवृत्तस्याहेयमनुपादेयं चात्मतत्त्वमुपदिश्यते— 'इदं सर्वं यदयमात्मा' 'यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत्...केन कं विजानीयात्' 'विज्ञातारमरे केन विजानीयात्'

भामती।

कानि युक्तानि, स्वाध्यायविध्यधीनग्रहणत्वानुपपत्तेरिति भावः। उत्तरम्— स्वाभाविकेति। अन्यतः प्राप्ता एव हि श्रवणादयो विधिसरूपैर्वाक्यैरनूद्यन्ते। न चानुवादोऽप्यप्रयोजनः, प्रवृत्तिविशेषकरत्वात्। तथाहि— तत्तदिष्टानिष्टविषयेप्साजिहासापहृतहृदयतया बहिर्मुखो न प्रत्यगात्मनि मनः समाधातुमर्हति। आत्मश्रवणादिविधिसरूपैस्तु वचनैर्मनसो विषयस्रोतः खिलीकृत्य प्रत्यगात्मस्रोत उद्घाट्यत इति प्रवृत्तिविशेषकरता अनुवादानामस्तीति सप्रयोजनतया स्वाध्यायविध्यधीनग्रहणत्वमुपपद्यत इति। यच्च चोदितमात्मज्ञानमनुष्ठाना-

कल्पतरुः।

श्रवणमननं प्रत्ययावृत्तेः अवगमे द्वित्रिवारावृत्तेरवश्यंभावाद्विधित्सितार्थस्य ज्ञातस्य न पुनः कर्तव्यत्वं दर्शनस्य त्वशक्यत्वं स्फुटमिति। अन्यतः प्राप्ता इति। दर्शनार्थं कर्तव्यत्वेनान्वयव्यतिरेकावगतान् श्रवणादीननुवदन्ति वचांसि तद्गतप्राशस्त्यलक्षणया तेषु रुचिमुत्पाद्यानात्मचिन्तायामरुचिं कुर्वन्ति प्रवृत्त्यतिशयं

परिमलः।

क्यविषयत्वस्यापि सद्भावात् तामादाय प्रत्ययत्रयरूपापि सा सिद्धा। आवृत्तिमात्रं हि ध्यानशब्दार्थो न तु शतसहस्रादिसंख्याविशेषनियतावृत्तिः। तथा च द्वित्रप्रत्ययोत्पत्तावपि आवृत्तिशास्त्रार्थो लब्ध एव भवति। यथा सकृन्मुसलपातनेऽपि 'सर्वौषधस्य पूरयित्वावहन्ति' इत्यत्रावघातशास्त्रार्थः। यदि ध्यानस्य साक्षात्काररूपदृष्टफलकत्वमिष्यते

'अयमात्मा ब्रह्म' इत्यादिभिः। यदप्यकर्तव्यप्रधानमात्मज्ञानं हानायोपादानाय वा न भवतीति, तत्तथैवेत्यभ्युपगम्यते। अलंकारो ह्ययमस्माकम्— यद्ब्रह्मात्मावगतौ सत्यां सर्वकर्तव्यताहानिः कृतकृत्यता चेति। तथा च श्रुतिः— 'आत्मानं चेद्विजानीयादयमस्मीति पूरुषः। किमिच्छन्कस्य कामाय शरीरमनुसंज्वरेत्' इति। 'एतद्बुद्ध्वा बुद्धिमान्स्यात्कृतकृत्यश्च भारत' इति च स्मृतिः। तस्मान्न प्रतिपत्तिविधिशेषतया ब्रह्मणः समर्पणम्॥

यदपि केचिदाहुः— प्रवृत्तिनिवृत्तिविधितच्छेषव्यतिरेकेण केवलवस्तुवादी वेदभागो नास्तीति, तन्न; औपनिषदस्य पुरुषस्यानन्य-

---

भामती।

नङ्गत्वादपुरुषार्थ इति तदयुक्तम्; स्वतोऽस्य पुरुषार्थत्वे सिद्धे यदनुष्ठानानङ्गत्वं तद्दूषणं न दूषणमित्याह— यदपीति। अनुसंज्वरेत् शरीरं तप्यमानमनुतप्येत। सुगममन्यत्। प्रकृतमुपसंहरति— तस्मान्न प्रतिपत्तीति॥

प्रकृतसिद्ध्यर्थमेकदेशिमतं दूषयितुमनुभाषते— यदपि केचिदाहुरिति। दूषयति— तन्नेति। इदमत्राकूतम्— 'कार्यबोधे यथा चेष्टा लिङ्गं हर्षाद-

कल्पतरुः।

जनयन्तीत्यर्थः। प्रकृतसिद्ध्यर्थं सिद्धे वस्तुनि वेदान्तप्रामाण्यसिद्ध्यर्थं सिद्धे वस्तुनि संगतिग्रहविरहादि दूषयितुमित्यर्थः। उपनिषदां सिद्धबोधकत्वे आक्षिप्ते पुरुषस्योपनिषद्गम्यत्वसिद्धवत्कारो भाष्ये अनुपपन्न इत्याशङ्क्य तदुपयोगिन्यायः सामर्थ्यात् द्योतित इत्याह— इदमत्रेति। परनरवर्तिशब्दार्थावबोधलिङ्गस्य प्रवृत्तेः सिद्धवस्तुन्यसंभवान्न व्युत्पत्तिरित्युक्तम् अज्ञातसंगतित्वेनेति; तत्राह— कार्यबोधे इति। यदुक्तमर्थवत्तयेति तत्सिद्धपुत्रजन्मादिबोधेऽपि हर्षादिप्रयोजनलाभान्न

परिमलः।

तदा परं दार्शपूर्णमासिकावघातस्येव यावद्दृष्टफलोदयमावृत्तिर्लभ्यते। तथा दृष्टफलकत्वे तु न विध्यपेक्षा। उपायान्तरप्राप्त्यभावात् नियमस्यापि नावकाशः। न चाविच्छिन्नप्रत्य-

भामती।

यस्तथा। सिद्धबोधेऽर्थवत्त्वैवं शास्त्रत्वं हितशासनात्'। यदि हि पदानां कार्याभिधाने तदर्थस्वार्थाभिधाने वा नियमेन वृद्धव्यवहारे सामर्थ्यमवधृतं भवेत्, न भवेदहेयानुपादेयभूतब्रह्मात्मतापरत्वमुपनिषदाम्; तत्राविदितसामर्थ्यत्वात्पदानां लोके, तत्पूर्वकत्वाच्च वैदिकार्थप्रतीतेः। अथ तु भूतेऽप्यर्थे पदानां लोके शक्यः संगतिग्रहः, तत उपनिषदां तत्परत्वं पौर्वापर्यपर्यालोचनयावगम्यमानमपह्नुत्य न कार्यपरत्वं शक्यं कल्पयितुम्, श्रुतहान्यश्रुतकल्पनाप्रसङ्गात्। तत्र तावदेवमकार्येऽर्थे न संगतिग्रहः यदि तत्परः प्रयोगो न लोके दृश्येत, तत्प्रत्ययो वा व्युत्पन्नस्योन्नेतुं न शक्येत। न तावत्तत्परः प्रयोगो न दृश्यते लोके, कुतूहलभयादिनिवृत्त्यर्थानामकार्यपराणां पदसंदर्भाणां प्रयोगस्य लोके बहुलमुपलब्धेः। तद्यथा आखण्डलादिलोकपालचक्रवालाधिवसतिः सिद्धविद्याधरगन्धर्वाप्सरःपरिवारो ब्रह्मलोकावतीर्णमन्दाकिनीपाथःप्रवाहप्रपातधौतकलधौतमयशिलातलो नन्दनादिप्रमदावनविहारिमणिमयशकुन्तकमनीयनिनदमनोहरः पर्व-

कल्पतरुः।

शब्दानां कार्यपरत्वं नियच्छतीत्याह— अर्थवत्त्वैवमिति। आखण्डलादीनाम् इन्द्रादीनां चक्रवालं समूहः। धौतानि शोधितानि कलधौतमयानि सौवर्णानि शिलातलानि यस्य स तथा। प्रमदावनानि प्रमदाभिः सह नृपाणां क्रीडावनानि तेषु विहारिणां संचरणशीलानां मणिमयशकुन्तानां रत्नमयपक्षिणां निनदः शब्दः।

परिमलः।

यावृत्तिर्ध्यानशब्दार्थः सा न सिद्धेति वाच्यम्, यथाश्रवणमननं प्रत्ययावृत्तिरूपं ध्यानं कर्तव्यमिति विध्यर्थावगमकाले श्रवणे यथाभूतः प्रत्ययः मनने च यथाभूतः तयोरपि क्रमेणानुसंधेयत्वेन नैरन्तर्यस्यापि प्राप्तेरिति भावः। आखण्डलादीनामित्यादि। ननु कुतूहलभयनिवृत्त्यादिप्रयोजनसत्त्वेऽप्याद्यव्युत्पत्तिग्रहानुसारेण कार्याध्याहारः स्यादिति चेत्, किमाद्यव्युत्पत्तिग्रहकाले गामानयेत्यादिवाक्यगतानां सर्वेषां पदानां कार्यवाचित्वमध्यवसितमिति तदनुसारेण द्वितीयादिप्रयोगेषु श्रुतैरपि सर्वैः पदैः कार्यसामान्ये बोधिते तद्विशेषजिज्ञासया कार्यविशेषवाचिक्रियापदाध्याहारः, उताद्यव्यवहारस्य क्रियापदघटितत्वं दृष्टमिति तदनुरोधेन? नाद्यः; क्रियापदसमभिव्याहारात् कार्यस्य गोपदसमभिव्याहारात् कर्मकारकस्येव प्रतीत्युपपत्त्या पदान्तराणां कर्मकारक इव कार्येऽपि शक्तेरकल्पनीयत्वात्। यथा प्रवृत्तिः कार्यावगतिपूर्विका तथा कार्यावगतिरपि प्रवृत्तिविषयशुद्धपदार्थ-

परिमलः ।

गोचरज्ञानपूर्विकेति नियमस्य प्रत्यक्षाधीनस्वप्रवृत्तिस्थले दृष्टत्वेन प्रयोज्यस्य प्रवृत्त्या कार्यावगतेरिव कार्यावगत्या तदन्वितशुद्धपदार्थज्ञानस्याप्यनुमितेरनिवार्यतया तस्मिन् उक्तमवृद्धवाक्यं विना कारणान्तराभावेन आद्यव्युत्पत्तिग्रहसमय एव शुद्धे गवादिपदार्थे शब्दसामर्थ्यग्रहणावश्यंभावाच्च । साक्षात्प्रवृत्तिजनकज्ञान एव शब्दस्य सामर्थ्यं कल्पनीयमिति चेत्, तर्हि ममेदं कार्यमिति ज्ञान एव तस्य सामर्थ्यं कल्प्येत, तस्यैव गामानयेति वाक्यजन्यमदंशरहितज्ञानानन्तरभाविनः साक्षात्प्रवर्तकत्वात् । नापि द्वितीयः, दण्डेन गामानयेत्यत्र आद्यव्युत्पत्तिग्रहणे करणश्रवणेऽप्यग्रे घटं पश्येत्यादौ करणानध्याहारवत् कार्यानध्याहारस्याप्युपपत्तेः । आद्यव्युत्पत्तिग्राहकवाक्यस्य आनयनकार्यघटितत्वे द्वितीयादिप्रयोगेष्वपि तदध्याहारापत्तेः । आनयनं विना अग्रे कार्यान्तरघटितवाक्यश्रवणादानयननियमस्त्यज्यत इति चेत्, तर्हि कार्यवाचिपदरहितानां सिद्धार्थवर्णनपराणां काव्यादीनां बहुलमुपलम्भात् कार्यनियमोऽपि त्यक्तव्य इति तुल्यम् । एवमाद्यव्युत्पत्तिग्रहानुरोधेनाग्रे सिद्धार्थप्रयोगेषु कार्यमध्याहर्तव्यामित्यभिमाने भग्ने हर्षलिङ्गोपजीविसिद्धार्थव्युत्पत्तिग्रहोपपादनमपि निरवद्यम् । अन्यथा ह्यविदितार्यजनभाषार्थं इत्यादिटीकाग्रन्थेन प्राक् स्वभाषायां शब्दार्थव्युत्पत्तिमतः प्रबुद्धस्य हर्षलिङ्गोपजीवि पुत्रस्ते जात इत्यत्र व्युत्पत्तिग्रहणमुपपादितमयुक्तम्, आद्यव्युत्पत्तिग्रहानुसारेण तत्रापि स्नानदानादिकं कुर्विति कार्यपरत्वस्फुरणात् इति शङ्कावकाशः स्यात् । न च पुत्रस्ते जात इत्यत्राद्यव्युत्पत्तिग्रहोऽप्युक्तरीत्या संभवतीति शङ्कनीयम्, स्तनंधयस्यातिबालस्याद्यव्युत्पत्तिग्रहसमये जातः शिशुः चैत्रस्य पुत्र इति पुत्रजन्म हर्षकारणमिति च बोधाभावात् । ननु तद्बोधवतः प्रबुद्धस्यापि पुत्रस्ते जात इति शब्दस्य पुत्रजननरूपार्थपरत्वग्रहणं न संभवति; मुखविकासानुमितहर्षकारणं पुत्रजन्मज्ञानं पुत्रपदाङ्कितपटवासप्रदर्शनलिङ्गजन्यमनुमितिरूपम्, पुत्रस्ते जात इति वाक्यं तु स्नानदानादिकर्तव्यतार्थकमिति चैत्रस्य हर्षजन्म जातं स्नानदानादिप्रवृत्तिं च पश्यतस्तद्भाषानभिज्ञस्य विपरीतार्थप्रतीतेरेव प्राप्तेरिति चेत्, उच्यते— लाटदेशे पटवासप्रदर्शनपुरःसरं पुत्रजननवार्त्तां वाचैव स्फुटं वदन्ति वार्त्ताहारा इति तद्देशप्रसिद्धिं जानन् वार्त्ताहारवाक्यस्य पुत्रजननमेवार्थ इति प्रत्येतीति न तस्यार्थान्तरप्रतीतिप्रसङ्गः । एवं च प्राग्भवीयसंस्कारोद्बोधेन पटवासप्रदर्शनकृतेन तद्देशप्रक्रियामाश्रित्याद्यव्युत्पत्तिग्रहोऽपि पुत्रस्ते जात इत्यत्रोपपादयितुं शक्यः । अवश्यं च मातापित्रादिभिश्चन्द्रः गौरित्यादिशब्देषु चन्द्राद्यभिमुखाङ्गुलीनिर्देशपूर्वकमुच्चार्यमाणेष्वाद्यव्युत्पत्तिग्रहे बालस्य जायमाने सर्वसिद्धे शब्दविशेषोच्चारणसहितार्थविशेषाभिमुखाङ्गुलीनिर्देशस्य तस्मिन्नर्थे तस्य शब्दस्य शक्तिग्रहार्थत्वं जन्मान्तरे प्रबुद्धेन तदा

भामती।

तराजः सुमेरुरिति। नैष भुजङ्गो रज्जुरियमित्यादिः। नापि भूतार्थबुद्धिर्व्युत्पन्नपुरुषवर्तिनी न शक्या समुन्नेतुम्, हर्षादेरुन्नयनहेतोः संभवात्। तथा हि—अविदितार्यजनभाषार्थो द्रविडो नगरगमनोद्यतो राजमार्गाभ्यर्णं देवदत्तमन्दिरमध्यासीनः प्रतिपन्नजनकानन्दनिबन्धनपुत्रजन्मा वार्त्ताहारेण सह नगरस्थदेवदत्ताभ्याशमागतः पटवासोपायनार्पणपुरःसरं दिष्ट्या वर्धसे देवदत्ते पुत्रस्त जात इति वार्त्ताहारव्याहारश्रवणसमनन्तरमुपजातरोमाञ्चकञ्चुकं विकसितनयनोत्पलमतिस्मेरमुखमहोत्पलमवलोक्य देवदत्तमुत्पन्नप्रमोदमनुमिमीते, प्रमोदस्य च प्रागभूतस्य तद्वयाहारश्रवणसमनन्तरं प्रभवतस्तद्धेतुताम्। न चायमप्रतिपादयन् हर्षहेतुमर्थं हर्षाय कल्पत इत्यनेन हर्षहेतुरर्थ उक्त इति प्रतिपद्यते। हर्षहेत्वन्तरस्य चाप्रतीतेः पुत्रजन्मनश्च तद्धेतोरवगमात्तदेव वार्त्ताहारेणाभ्यधायीति निश्चिनोति। एवं भयशोकादयोऽप्युदाहार्याः। तथा च प्रयोजनवत्तया भूतार्थाभिधानस्य प्रेक्षावत्प्रयोगोऽप्युपपन्नः। एवं च ब्रह्मस्वरूपज्ञानस्य परमपुरुषार्थहेतुभावादनुपदिशतामपि पुरुषप्रवृत्तिनिवृत्ती वेदान्तानां पुरुषहितानुशासनाच्छास्त्रत्वं सिद्धं भवति। तत्सिद्धमेतत्, विवादाध्यासितानि वचनानि भूतार्थविषयाणि,

कल्पतरुः।

अभ्यर्णं निकटम्। प्रतिपन्नं जनकस्य पितुरानन्दनिबन्धनं पुत्रजन्म येन स तथोक्तः। सिन्दूरारञ्जितपुत्रपदाङ्कितः पटः पटवासः, स एवोपायनमुपहारो लाटानां प्रसिद्धः। महोत्पलं पद्मम्। अर्थवत्तैवामिति श्लोकभागं व्याचष्टे— तथा चेति। अनेन सिद्धस्याप्यप्रतिपित्सितत्वाप्रतिपिपादयिषितत्वे प्रत्युक्ते। शास्त्रत्वं हितशासनात् इत्येतद्व्याचष्टे— एवं चेति। प्रवृत्तिनिवृत्त्याश्रयणं हि शास्त्रं पुरुषार्थाय, तं तु वेदान्ता अन्तरेणाप्यायासं ज्ञानादेवानयन्तीति भवन्तितरां शास्त्राणीत्यर्थः। तत्सिद्धमिति। तच्छब्देन तस्मादर्थेन सिद्धशब्दव्युत्पत्त्यादि परामृशता वक्ष्यमाणहेतोरसिद्धिरुद्भृता। ज्योतिष्टोमादिवाक्ये बाधं परिहरति— विवादेति। भूतार्थविषयाणीति। न कार्यविषयाणीत्यर्थः। इतरथा भूतार्थप्रतीति-

परिमलः।

अवगतं बालेन स्मर्यत इत्येवोपपादनीयम्, तत्र गत्यन्तराभावात्। तथेहापि भविष्यति। एवं जन्मान्तरानुभवसंभवमभिप्रेत्य लाटानां प्रसिद्ध इत्युक्तम्। प्रसिद्धः प्रकर्षेण सिद्धः अनादिकालप्रवृत्त इत्यर्थः॥

शेषत्वात् योऽसावुपनिषत्स्वेवाधिगतः पुरुषोऽसंसारी ब्रह्मस्वरूपः उत्पा-

भामती ।

भूतार्थविषयप्रमाजनकत्वात् । यद्यद्विषयप्रमाजनकं तत्तद्विषयं यथा रूपादिविषयं चक्षुरादि, तथा चैतानि, तस्मात्तथेति । तस्मात्सुष्ठूक्तम्— **तन्न, औपनिषदस्य पुरुषस्यानन्यशेषत्वादिति** । उपनिपूर्वात्सदेर्विशरणार्थात्क्विप्युपनिषत्पदं व्युत्पादितं उपनीयाद्वयं ब्रह्म सवासनामविद्यां हिनस्तीति ब्रह्मविद्यामाह । तद्धेतुत्वाद्वेदान्ता अप्युपनिषदः, ततो विदितः औपनिषदः पुरुषः । एतदेव विभजते— **योऽसावुपनिषत्स्वेवेति** । अहंप्रत्ययविषयाद्विनक्ति— **असंसा-**

कल्पतरुः ।

मात्रजनकत्वसाधने सिद्धसाधनात् प्रमितिजनकत्वस्य साधने हेतोः साध्यसमतापातात् । यत्तच्छब्दावपि प्रस्तुतभूतार्थौ परामृशतः । उपोपसर्गः सामीप्यार्थमाह । नीत्ययं निश्चयार्थः । सदेरर्थमाह— **सवासनामिति** । वस्त्वक्रियाशेषं वेदान्तविषयं दर्शयितुं भाष्ये विशेषणानि प्रयुक्तानि, तानि व्याचष्टे— **अहंप्रत्ययेत्यादिना** ।

परिमलः ।

न कार्यविषयाणीत्यर्थ इति । नन्वेवं सति कार्यविधिशेषतया स्वर्गदेवतादिभूतार्थप्रमितिजनके सार्थवादविधिवाक्ये व्यभिचारः स्यात् । नैष दोषः, भूतार्थप्रमितिशब्देन स्वातन्त्र्येण भूतार्थप्रतीतेर्विवक्षितत्वात्, प्रतीतौ याथार्थ्यविशेषणस्यानपेक्षितत्वात् । अत एव हेत्वसिद्धिपरिहारार्थं सिद्धव्युत्पत्तिप्रसाधनापेक्षा पूर्ववाक्ये दर्शिता । यथाश्रुतहेतोर्हि न तदपेक्षा अस्ति, वेदान्तानां ज्ञानविधिशेषतया ब्रह्मप्रमितिजनकत्वस्य परेणाप्यङ्गीकृतत्वात् । **प्रतीतिजनकत्वसाधन इति** । कारणानां हि तत्तदर्थविषयत्वं फलद्वारकम् उपपादनीयम्, न साक्षात् तत्तदर्थविषयत्वमस्ति । एवं च फलरूपायां प्रतीतावनन्यशेषत्वरूपभूतार्थविशेषणाविवक्षायां सिद्धसाधनम् । सिद्धसाधनपरिहाराय तद्विवक्षायां हेतुसाध्याभेद इत्यर्थः । ननु यदनन्यशेषभूतार्थविषयप्रतीतिजनकं तत् कार्यविषयं न भवतीति विशेषव्याप्तिरेव संभवति, चक्षुरादीनामनन्यशेषभूतार्थविषयाणामानयनादिगतकार्यत्वविषयत्वाभावात् । किमर्थं सामान्यव्याप्तिप्रत्यायनार्थं यत्तच्छब्दावुपन्यस्ताविति आशङ्क्याह— **यत्तच्छब्दावपीति** । यद्विषयेत्यत्र तद्विषयमित्यत्र च समस्तौ यत्तच्छब्दौ न समभिव्याहृतपरौ, किं तु प्रकृतभूतार्थपरामर्शिनौ । तथा च तद्विषयमित्यस्य भूतार्थविषयमित्यर्थलाभे सति तेन लक्षणया कार्यविषयत्वाभावरूपमभिमतसाध्यं बोधनीयमिति भावः । **उपोपसर्ग इत्यादि** । तथा च अद्वितीयं ब्रह्माह-

द्यादिचतुर्विधद्रव्यविलक्षणः स्वप्रकरणस्थोऽनन्यशेषः, नासौ नास्तीति

भामती।

रीति। अत एव क्रियारहितत्वाच्चतुर्विधद्रव्यविलक्षणः। अतश्च चतुर्विधद्रव्यविलक्षणो यदनन्यशेषः। अन्यशेषं हि भूतं द्रव्यं चिकीर्षितं सदुत्पत्त्याद्याप्यं संभवति। यथा 'यूपं तक्षति' इत्यादि। यत्पुनरनन्यशेषं भूतभाव्युपयोगरहितम्, यथा 'सुवर्णं भार्यम्' 'सक्तून् जुहोति' इत्यादि, न तस्योत्पत्त्याद्याप्यता। कस्मात्पुनरस्यानन्यशेषतेत्यत आह— यतः **स्वप्रकरणस्थः**। उपनिषदामनारभ्याधीतानां पौर्वापर्यपर्यालोचनया पुरुषप्रतिपादनपरत्वेन पुरुषस्यैव प्राधान्येनेदं प्रकरणम्। न च जुह्वादिवदन्यभिचरितक्रतुसंबन्धः पुरुष इत्युपपादितम्।

कल्पतरुः।

भाष्येऽसंसारी इति त्वंपदलक्ष्यनिर्देशः ब्रह्मेति तस्य ब्रह्मत्वमुक्तम्। क्रियारहितत्वमसंसारित्वम्। व्यवहितमप्यनन्यशेषत्वमुत्पत्त्याद्यभावे हेतुत्वेन संबन्धयति— **अतश्चेति**। उत्पत्त्यादिभिराप्यं साध्यम्। सक्तवो हि प्राङ् न विनियुक्ताः; न च होमेन रक्षाशेषा उपयोक्ष्यन्ते; अतो न संस्कार्या इति विनियोगभङ्गेन होमप्राधान्यमिति। अनन्यशेषत्वे स्वप्रकरणस्थत्वं हेतुत्वेन योजयति— **कस्मादिति**।

परिमलः।

मर्थनिष्कृष्टसाक्षिरूपत्वेनाहमर्थनेदिष्टं निश्चित्य निश्चयरूपतया विषयीकृत्य सवासनामविद्यां शृणाति हिनस्तीत्युपनिषदिति निर्वचनं कृतं भवति, सदेरिह विशरणार्थत्वस्य टीकायामुक्तत्वात्। **व्यवहितमपीति**। ननु क्रियातच्छेषव्यतिरिक्तकेवलसिद्धवस्तुबोधको वेदभागो नास्तीति पूर्वपक्षिमतस्य निरासे तन्नेति प्रतिज्ञाते हेतुत्वेनोपन्यस्तमनन्यशेषत्वं संग्रहवाक्ये तदुपपादनार्थं च योऽसावुपनिषत्स्वित्यादिवाक्यम्; तत्र प्रयाजादिवत् प्रकरणेन जुह्वादिवद्वाक्येन वा विनियोगाभावेनोपपद्यमानमनन्यशेषत्वं किमर्थं व्यवहितान्वयमाश्रित्य चतुर्विधद्रव्यविलक्षणत्वे हेतुत्वेन योजितम्? किमर्थं च भाष्ये संग्रहवाक्यानुपन्यस्तं तत्रोपन्यस्तयोरौपनिषदत्वानन्यशेषत्वयोरनुपपादकं चतुर्विधद्रव्यविलक्षणत्वं विवरणवाक्येऽस्मिन्नुपन्यस्तम्? उच्यते— यदि प्रकरणादिविनियोजकाभावेन क्रियाशेषतया अन्वयो नास्ति तर्हि कर्मकारकत्वेन तच्छेषतया अन्वयोऽस्तु, एवमपि क्रियान्वयानियमस्य न भङ्ग इत्याशङ्कान्तरनिराकरणार्थं चतुर्विधद्रव्यविलक्षणत्वमुपन्यस्तम्; तत्राप्यनन्यशेषत्वं हेत्वभवनक्षममिति व्यवहितान्वयः समाश्रितः। 'स एष

नाधिगम्यत इति वा शक्यं वदितुम्; 'स एष नेति नेत्यात्मा' इत्या-

भामती ।

अतः स्वप्रकरणस्थः सोऽयं तथाविध उपनिषद्भ्यः प्रतीयमानो न नास्तीति शक्यो वक्तुमित्यर्थः । स्यादेतत् । मानान्तरागोचरत्वेनागृहीतसंगतितया अपदार्थस्य ब्रह्मणो वाक्यार्थत्वानुपपत्तेः कथमुपनिषदर्थतेत्यत आह— **स एष नेति नेत्यात्मेत्यात्मशब्दात्** । यद्यपि गवादिवन्मानान्तरगोचरत्वमात्मनो नास्ति, तथापि प्रकाशात्मन एव सतस्तत्तदुपाधिपरिहाण्या शक्यं वाक्यार्थत्वेन निरूपणम्, हाटकस्येव कटककुण्डलादिपरिहाण्या । न हि प्रकाशः स्वसंवेदनो न भासते, नापि तदवच्छेदकः कार्यकरणसंघातः । तेन 'स एष नेति नेत्यात्मा' इति तत्तदवच्छेदपरिहाण्या बृहत्त्वादापनाच्च स्वयंप्रकाशः शक्यो वाक्यात् ब्रह्मेति चात्मेति च निरूपयितुमित्यर्थः । अथोपाधिनिरासवदुपहितमप्यात्मरूपं

कल्पतरुः ।

एवं सिद्धार्थव्युत्पत्तिसमर्थनेनोपनिषदां ब्रह्मात्मैक्ये प्रामाण्यमुक्तम् । इदानीं भवत्वन्यत्र सिद्धे पुत्रजन्मादौ संगतिग्रहो न ब्रह्मण्यविषयत्वादतो न तत्रोपनिषत्प्रामाण्यमित्याशङ्क्य तत्परिहारपरत्वेन भाष्यमवतारयति— **स्यादेतदित्यादिना** । स्वयंप्रकाशत्वेन स्फुरत्यात्मनि समारोपितदृश्यनिषेधेन लक्षणया शक्यं शास्त्रेण निरूपणमिति भाष्याभिप्रायमाह— **यद्यपीत्यादिना** ॥

ननु प्रमाणान्तरमिते तथाविधस्य निषेधात्कथमात्मन्युपाधिनिषेधद्वारा लक्षणा? अत आह—**न हि प्रकाश इति** । भासमाने भासमानं निषेध्यमित्येतावत्; न तु मानेन भासमाने इति, वैयर्थ्यात्; तादिह स्वतो भात्यात्मनि तत्साक्षिक उपाधिः शक्यनिषेध इति तदवच्छेदकोऽपि न न भासत इत्यन्वयः । न केवलं निषेधमुखेनैवाविषयतया निरूपणम् अपि त्वात्मादिपदैरपि व्याप्त्याद्यभिधानमुखेन परिच्छेदाभावोपलक्षितः स्वप्रभ आत्मा लक्षणीयः, स चात्मपदयुक्तात् 'नेति नेति' इति वाक्यादात्मैवेति निरूप्यते, ब्रह्मपदयुक्ताच्चायमात्मा ब्रह्मेत्यादेर्ब्रह्मेति निरूप्यत इत्याह— **तेनेति** ।

परिमलः ।

नेति नेत्यात्मा' इति बृहदारण्यकपञ्चमाध्यायाम्नातवाक्ये विधेयानुवाद्यविभागमनुवाद्यस्य 'अथात आदेशो नेति नेति' इति तच्चतुर्थाध्यायाम्नातवाक्यतः प्राप्तिं च दर्शयति— **य आत्मेति** । स एष इत्यस्य 'कस्मिन्नु प्राणः प्रतिष्ठित इत्यपान इति' इत्यादिना प्रस्तुते

त्मशब्दात् आत्मनश्च प्रत्याख्यातुमशक्यत्वात्, य एव निराकर्ता तस्यै-वात्मत्वात्। नन्वात्मा अहंप्रत्ययविषयत्वादुपनिषत्स्वेव विज्ञायत इत्य-नुपपन्नम्; न, तत्साक्षित्वेन प्रत्युक्तत्वात्। न ह्यहंप्रत्ययविषयकर्तृत्व-

---

भामती।

कस्मान्न निरस्यत इत्यत आह— **आत्मनश्च प्रत्याख्यातुमशक्यत्वात्।** प्रकाशो हि सर्वस्यात्मा तदधिष्ठानत्वाच्च प्रपञ्चविभ्रमस्य। न चाधिष्ठानाभावे विभ्रमो भवितुमर्हति। न हि जातु रज्ज्वभावे रज्ज्वां भुजङ्ग इति वा धारेति वा विभ्रमो दृष्टपूर्वः। अपि चात्मनः प्रकाशस्य भासा प्रपञ्चस्य प्रभा। तथा च श्रुतिः— 'तमेव भान्तमनु भाति सर्वं तस्य भासा सर्वमिदं विभाति' इति। न चात्मनः प्रकाशस्य प्रत्याख्याने प्रपञ्चप्रथा युक्ता। तस्मादात्मनः प्रत्याख्यानायोगाद्वेदान्तेभ्यः प्रमाणान्तरागोचरसर्वोपाधिरहितब्रह्मस्वरूपावगति-सिद्धिरित्यर्थः। उपनिषत्स्वेवावगत इत्यवधारणममृष्यमाण आक्षिपति— **नन्वात्मेति**। सर्वजनीनाहंप्रत्ययविषयो ह्यात्मा कर्ता भोक्ता च संसारी, तत्रैव च लौकिकपरीक्षकाणामात्मपदप्रयोगात्। य एव लौकिकाः शब्दास्त एव वैदिकास्त एव च तेषामर्था इत्यौपनिषदमप्यात्मपदं तत्रैव प्रवर्तितुमर्हति, नार्थान्तरे तद्विपरीत इत्यर्थः। समाधत्ते— **न** अहंप्रत्ययविषय औपनिषदः पुरुषः। कुतः? **तत्साक्षित्वेन**। अहंप्रत्ययविषयो यः कर्ता कार्यकरणसंघातो-पहितो जीवात्मा तत्साक्षित्वेन परमात्मनोऽहंप्रत्ययविषयत्वस्य **प्रत्युक्तत्वात्**। एतदुक्तं भवति— यद्यपि 'अनेन जीवेनात्मना' इति जीवपरमात्मनोः पारमार्थिकमैक्यं तथापि तस्योपहितं रूपं जीवः, शुद्धं तु रूपं तस्य साक्षि,

कल्पतरुः।

इतिरिदमर्थे। य आत्मा इदं न इदं नेति चतुर्थे व्याख्यातः स एष पञ्चमाध्याये निरू-प्यत इत्यर्थः। न केवलमधिष्ठानत्वेन प्रपञ्चसत्ताप्रदत्वादात्मसत्यता, अपि तु तत्स्फुर-णप्रदत्वाच्चेत्याह— अपि चेति। संस्कार्यत्वनिरासप्रस्तावे 'साक्षी चेता' इति मन्त्रोदा-हरणेन प्रत्युक्तत्वादिति भाष्यार्थः। न ह्यहंप्रत्ययविषयेत्यादिभाष्यमात्मनोऽनधिगतत्वे-

परिमलः।

प्राणादिपञ्चके वृत्त्यसंभवात् 'अगृह्यो न हि गृह्यते' इत्यादिना प्रस्तोष्यमाणे वृत्तिं प्रकट-

तिरेकेण तत्साक्षी सर्वभूतस्थः सम एकः कूटस्थनित्यः पुरुषो विधिकाण्डे तर्कसमये वा केनचिदधिगतः सर्वस्यात्मा। अतः स न केनचित्प्रत्याख्यातुं शक्यः, विधिशेषत्वं वा नेतुम्— आत्मत्वादेव च सर्वे

भामती।

तच्च मानान्तरानधिगतमुपनिषद्गोचर इति। एतदेव प्रपञ्चयति— न ह्यहंप्रत्ययविषयेति। विधिशेषत्वं वा नेतुं न शक्यः। कुतः? आत्मत्वादेव।

कल्पतरुः।

नौपनिषदत्वोपपादनार्थम्, तदवतारयति— एतदेवेति। भाष्ये तत्साक्षीति विधिकाण्डानधिगतत्वमुक्तम्। सर्वभूतस्थत्वेन बौद्धसमयानधिगतिः; विनश्यत्सु सर्वेषु भूतेषु स्थितो न विनश्यतीत्यर्थः। सावयव आत्मेति विवसनसमयानधिगतिः समत्वेन। जीवोत्पत्तिवादिपाञ्चरात्रतन्त्रानधिगतिः कूटस्थनित्यत्वेन। काणादादितर्कानधिगतिः सर्वस्यात्मेति वर्णिता। अन्यतोऽनधिगतिमुक्त्वा बाधाभाव उक्तः अत इति। अधिगते हि बाधः नानधिगते इत्यर्थः। अथ वा सर्वस्यात्मत्वेन प्रत्याख्यातुं न शक्यः। औपनिषदस्य पुरुषस्यानन्यशेषत्वादिति भाष्यं तद्योऽसावुपनिषत्स्वित्यादिना विवृतम्। पुनरभिहितविशेषणस्यात्मनोऽहंप्रत्ययविरोधमाशङ्क्य तन्मिथ्यात्वेनौपनिषदत्वं विवृतं न तत्साक्षित्वेनेत्यादिना। अनन्यशेषत्वविवरणाय विधिशेषत्वं वेति भाष्यम्; तदनुषङ्गेण व्याचष्टे— न शक्य इति। विध्यशेषत्वे आत्मत्वादिति हेतुं व्याचष्टे— कुत इत्यादिना।

परिमलः।

यितुमेपक्षितमध्याहरति— निरूप्यत इति। विनश्यत्स्विति। 'समं सर्वेषु भूतेषु तिष्ठन्तं परमेश्वरम्। विनश्यत्स्वविनश्यन्तम्' इति स्मृतौ सर्वभूतस्थत्वस्य तथा विवरणादिति भावः। अव्यवधानस्वारस्यादात्मत्वादेवेत्यग्रिमभाष्यगतैवकारस्वारस्याच्च अथ वेति पक्षः। नन्वनन्यशेषत्वं प्रागुपपादितमेव, इहापि विधिशेषत्वं वा नेतुमिति भाष्येण किमर्थं पुनरुपपाद्यत इत्याशङ्क्य तदपौनरुक्त्याय पूर्वोक्तमनुवदति— औपनिषदस्येति। प्रागनन्यशेषत्वमुपनिषत्प्रतिपाद्यत्वं च संग्रहवाक्ये यदुपन्यस्तं तत्रानन्यशेषत्वं प्रकरणादिविनियोजकाभावेनोपपादितम्। औपनिषदत्वं कार्य एव व्युत्पत्तिग्रह इति शङ्कानिरासेनाविषये ब्रह्मणि व्युत्पत्तिग्रहासंभवशङ्कानिरासेन कर्तृत्वाद्यवगाह्यहंप्रत्ययविरोधशङ्कानिरासेन चोपपादितम्। इदानीं तदनन्यशेषत्वं विधिशेषत्वाभावरूपतया विपरीतुमात्मत्वरूपहेत्वन्तरेण चोपपादयितुमिदं भाष्यमित्यर्थः। अनुषङ्गेणेति। न

षाम्— न हेयो नाप्युपादेयः। सर्वं हि विनश्यद्विकारजातं पुरुषान्तं

भामती।

न ह्यात्मा अन्यार्थः, अन्यत्तु सर्वमात्मार्थम्। तथा च श्रुतिः—'न वा अरे सर्वस्य कामाय सर्वं प्रियं भवति आत्मनस्तु कामाय सर्वं प्रियं भवति' इति। अपि चातः सर्वेषामात्मत्वादेव न हेयो नाप्युपादेयः। सर्वस्य हि प्रपञ्चजातस्य ब्रह्मैव तत्त्वमात्मा, न च स्वभावो हेयः, अशक्यहानत्वात्। न चोपादेयः, उपात्तत्वात्। तस्माद्धेयोपादेयविषयौ विधिनिषेधौ न तद्विपरीतमात्मतत्त्वं विषयीकुरुत इति सर्वस्य प्रपञ्चजातस्यात्मैव तत्त्वमिति। एतदुपपादयति— सर्वं हि विनश्यद्विकारजातं पुरुषान्तं विनश्यति। अयमर्थः— पुरुषो हि श्रुतिस्मृतीतिहासपुराणतदविरुद्धन्यायव्यवस्थापितत्वात्परमार्थसन्। प्रपञ्चस्वनाद्यविद्योपदर्शितोऽपरमार्थसन्। यश्च परमार्थसन्नासौ प्रकृतिः रज्जुतत्त्वमिव सर्पविभ्रमस्य विकारस्य। अत एवास्यानिर्वाच्यत्वेनाद्दढस्वभावस्य विनाशः। पुरुषस्तु परमार्थसन्। नासौ कारणसहस्रेणाप्यसन् शक्यः कर्तुम्। न हि सहस्रमपि शिल्पिनो घटं पटयितुमीशत इत्युक्तम्। तस्मादविनाशिपुरुषान्तो विकार-

कल्पतरुः।

मा भूद्विधेयकर्मशेषत्वेन विधिविषयत्वमात्मनः स्वत एव विधीयतां निषिध्यतां चेत्याशङ्कामपनेतुं न हेय इति भाष्यम्। तत्रापि हेतुत्वेनात्मत्वादित्येतद्योजयति—अपि चेति। अनन्यशेषत्वे स्वतो विधेयत्वाभावे चात्मत्वं हेतुरित्यपिचशब्दार्थः। अत इति। भाष्योक्तादेव हेतोरित्यर्थः। तमेवाह— सर्वेषामिति। ननु घटादिविनाशस्य मृदादौ दर्शनात्कथं पुरुषावधिः सर्वस्य लयः? अत आह— पुरुषो हीति। कल्पितस्याधिष्ठानत्वायोगात् सत्तत्त्वमेव तत्तदवच्छिन्नमनिर्वाच्यविश्वोदयव्ययहेतुरित्यर्थः। ननु पुरुषोऽप्यनिर्वाच्य इति, नेत्याह— पुरुषस्त्विति। अनन्तः अनवधिः। विकारो नास्तीत्युक्तं भेदाभे-

परिमलः।

शक्य इत्यनुषङ्गेणेत्यर्थः। न त्वतःशब्दस्याप्यनुषङ्गेणेत्यर्थः, अतःशब्दोक्तहेतोः पुनर्निर्देशरूपस्यात्मत्वादेवेत्यग्रिमभाष्यगतहेतोः पूर्वत्राप्यन्वयस्य टीकायां वक्ष्यमाणत्वात्। अपि च 'सर्वेषामात्मत्वादेव न हेयो नाप्युपादेयः' इति टीकापाठो न व्याख्यानापेक्षः। अपि चात एवेति पाठेऽप्यतःशब्दः सर्वात्मत्वादिति भाष्योक्तहेतुपरामर्शीति व्याचष्टे— भाष्योक्तादेव हेतोरित्यर्थ इति। भाष्ये 'अत इत्युक्तादेव हेतोरित्यर्थः' इति पाठेऽप्यव-

विनश्यति; पुरुषो हि विनाशहेत्वभावादविनाशी; विक्रियाहेत्वभावाच्च कूटस्थनित्यः; अत एव नित्यशुद्धबुद्धमुक्तस्वभावः; तस्मात् 'पुरुषान्न परं किंचित्सा काष्ठा सा परा गतिः' 'तं त्वौपनिषदं पुरुषं पृच्छामि' इति चौपनिषदत्वविशेषणं पुरुषस्योपनिषत्सु प्राधान्येन प्रकाश्यमानत्वे उपपद्यते। अतो भूतवस्तुपरो वेदभागो नास्तीति वचनं साहसमात्रम् ॥

यदपि शास्त्रतात्पर्यविदामनुक्रमणम्— 'दृष्टो हि तस्यार्थः कर्मा-

---

भामती।

विनाशः शुक्तिरज्जुतत्त्वान्त इव रजतभुजङ्गविनाशः। पुरुष एव हि सर्वस्य प्रपञ्चविकारजातस्य तत्त्वम्। न च पुरुषस्यास्ति विनाशो यतोऽनन्तः। विनाशः स्यादित्यत आह— पुरुषो हि विनाशहेत्वभावादिति। न हि कारणानि सहस्रमप्यन्यदन्यथयितुमीशत इत्युक्तम्। अथ मा भूत्स्वरूपेण पुरुषो हेय उपादेयो वा, तदीयस्तु कश्चिद्धर्मो हास्यते, कश्चिच्चोपादास्यत इत्यत आह— विक्रियाहेत्वभावाच्च कूटस्थनित्यः। त्रिविधोऽपि धर्मलक्षणावस्थापरिणामलक्षणो विकारो नास्तीत्युक्तम्। अपि चात्मनः परमार्थसतो धर्मोऽपि परमार्थसन्निति न तस्यात्मवदन्यथात्वं कारणैः शक्यं कर्तुम्। न च धर्मान्यथात्वादन्यो विकारः। तदिदमुक्तम्— विक्रियाहेत्वभावादिति। सुगममन्यत्। यत्पुनरेकदेशिना शास्त्रविद्वचनं साक्षित्वेनानुक्रान्तं तदन्यथोपपादयति— यदपि

कल्पतरुः।

दविचारे। धर्मान्यथात्वविक्रियाया अभावमुक्त्वा तद्धेत्वभावमप्याह— अपि चेति। भाष्ये— यत एव धर्मान्यथात्वाभावः अत एव नित्यशुद्धत्वादिस्वभावः। पुरुषावधिः सर्वस्य लय इत्यत्र श्रुतिमाह— तस्मात्पुरुषादिति। कल्पितस्याकल्पितमधिष्ठानमित्युक्तयुक्तिपरामर्शी तस्माच्छब्दः। निरतिशयस्वतन्त्रतया विधिशेषत्वाभावे श्रु-

परिमलः।

मेवार्थो भाष्ये उक्तादेव हेतोरित्यर्थ इति व्यवहितयोजनया ग्राह्यः। तस्मात् पुरुषादिति प्रतीकग्रहणे पुरुषादित्यादि श्रुतिवाक्यं तस्मादिति भाष्यम्; तस्यार्थमाह— कल्पितस्येति। 'दृष्टो हि तस्यार्थः—' इति शाबरवचने तस्यशब्दार्थमाह— वेदस्येति।

बबोधनम्' इत्येवमादि, तत् धर्मजिज्ञासाविषयत्वाद्विधिप्रतिषेधशास्त्राभिप्रायं द्रष्टव्यम्। अपि च 'आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानाम्'

भामती।

शास्त्रतात्पर्यविदामनुक्रमणमिति। 'दृष्टो हि तस्यार्थः प्रयोजनवदर्थावबोधनम्' इति वक्तव्ये धर्मजिज्ञासायाः प्रकृतत्वाद्धर्मस्य च कर्मत्वात् 'कर्मावबोधनम्' इत्युक्तम्। न तु सिद्धरूपब्रह्मावबोधनव्यापारं वेदस्य वारयति। न हि सोमशर्मणि प्रकृते तद्गुणाभिधानं परिसंचष्टे विष्णुशर्मणो गुणवत्ताम्। विधिशास्त्रं विधीयमानकर्मविषयम्, प्रतिषेधशास्त्रं च प्रतिषिध्यमानकर्मविषयमित्युभयमपि कर्मावबोधनपरम्। अपि च 'आम्नायस्य क्रियार्थत्वात्' इति शास्त्रकृद्वचनम्। तत्रार्थग्रहणं यद्यभिधेयवाचि ततो भूतार्थानां द्रव्यगुणकर्मणामानर्थक्यमनभिधेयत्वं प्रसज्येत, न हि ते क्रियार्था इत्यत आह— **अपि चाम्नायस्येति**। यद्युच्येत न हि क्रियार्थत्वं क्रियाभिधेयत्वम्, अपि तु क्रियाप्रयोजनत्वम्। द्रव्यगुणशब्दानां च क्रियार्थत्वेनैव भूतद्रव्यगुणाभिधानम्, न स्वनिष्ठतया।

कल्पतरुः।

तिमुदाहृत्य मानान्तरागम्यतया वेदान्तैकवेद्यत्वे श्रुतिमुदाहरति— तं त्वेति। **तस्य** वेदस्येत्यर्थः। ननु तर्हि धर्मावबोधनमिति वक्तव्यं तत्राह— **धर्मस्य चेति**। ननु प्रतिषेधानामनुष्ठेयाबोधकत्वात्कथं कर्मावबोधप्रयोजनता? अत आह— **प्रतिषिध्यमानेति**। शाबरवचनवत् 'आम्नायस्य' इति सूत्रे आम्नायशब्दो विधिनिषेधपर इति सिध्यति। विकल्पमुखेन परिहारान्तरमाह— अपि चेति। द्रव्यगुणकर्मणां तच्छब्दानामित्यर्थः। क्रियार्थत्वादित्यत्रानर्थक्यमित्यत्र चार्थशब्दः अभिधेयपरः प्रयोजनपरो वेति विकल्प्य आद्यं निरस्य द्वितीयं निरस्यति— यद्युच्येतेत्यादिना। ननु चोदना हि भूतं भवन्तं भविष्यन्तमित्येवंजातीयकं शक्तोत्यवगमयितुमिति

परिमलः।

प्रतिषिध्यमानेतीति। 'अथातोधर्मजिज्ञासा' इत्यत्र अकारप्रश्लेषेण अधर्मविचारोऽपि प्रतिज्ञात इत्यधर्मरूपं प्रतिषिध्यमानमपि भाष्ये कर्मशब्देन संगृहीतम्। तत्संग्रहार्थमेव धर्मशब्दमपहाय कर्मशब्दग्रहणमिति भावः। 'आम्नायस्य—' इति सूत्रे कस्यचित् परिहारस्यानुक्तत्वादपि चेत्ययुक्तमित्याशङ्क्य शाबरवचने कृतः परिहारः तत्रापि साम्येन प्राक् सिद्ध इत्याह— **शाबरेति**। ननु विशिष्टे पदशक्तिर्नास्ति चेत् कथमन्वितपदार्थप्रतीतिः? न

इत्येतदेकान्तेनाभ्युपगच्छतां भूतोपदेशानामानर्थक्यप्रसङ्गः । प्रवृत्तिनिवृत्तिव्यतिरेकेण भूतं चेद्वस्तूपदिशति भव्यार्थत्वेन, कूटस्थनित्यं भूतं

भामती ।

यथाहुः शास्त्रविदः— 'चोदना हि भूतं भवन्तम्' इत्यादि । एतदुक्तं भवति— कार्यमर्थमवगमयन्ती चोदना तदर्थं भूतादिकमप्यर्थं गमयतीति । तत्राह— प्रवृत्तिनिवृत्तिव्यतिरेकेण भूतं चेदिति । अयमभिसंधिः— न तावत्कार्यार्थ एव स्वार्थे पदानां संगतिग्रहो नान्यार्थ इत्युपपादितं भूतेऽप्यर्थे व्युत्पत्तिं दर्शयद्भिः । नापि स्वार्थमात्रपरतैव पदानाम् । तथा सति न वाक्यार्थ-

कल्पतरुः ।

शाबरवचसि विधिवाक्यस्य भूतादिबोधिता भाति, न द्रव्यादिशब्दानां क्रियाप्रयोजनता; अत आह— कार्यमर्थमिति । कार्यान्वितभूतबोधित्वे विधिवाक्यस्य कथं तन्न्यायेन ब्रह्मवाक्येष्वक्रियाशेषभूतवस्तुबोधित्वसिद्धिः? अत आह— अयमभिसंधिरिति । कार्यान्वितबोधित्वनियमः शब्दानां किं व्युत्पत्तिबलादुत प्रयोजनार्थम्? तत्र केवलभूतवस्त्ववगमादपि प्रयोजनसिद्धिमुत्तरत्र वक्ष्यति । न तावद्व्युत्पत्तिबलादित्याह— न तावदिति । कार्यार्थे कार्यशेषे । ननु कार्यान्वितपरत्वनियमाभावे पदानामतिलाघवायान्वितपरत्वमपि त्यज्यताम्, अत आह— नापीति । तत्किमिदानीं विशिष्टे पदशक्तिः? नेत्याह— स्वार्थमिति ॥

अयमभिसंधिः— पदैः पदार्था एवाभिधीयन्ते; अर्थान्तरान्विततया तु लक्ष्यन्ते । अन्यथा स्वरूपमात्रातिरेकिविशिष्टाभिधाने गौरवं स्यात् । नन्वभिहितार्थस्वरूपाणां विशिष्टैरविनाभावाभावात्कथं लक्षणा; न हि गवार्थस्यानयत्यविनाभावः चारयतिनाप्यन्वयात् । न चार्थान्तरमात्रान्वयो लक्ष्यः, तस्य व्यवहारानुपयोगात्; तन्न, अनविनाभाविभिरपि मञ्चैः पुरुषलक्षणात् । ननु मा भूदविनाभावनियमः तथापि वाच्यस्य लक्ष्येण संबन्धो वाक्यार्थे चानन्वयो वाच्यः; मञ्चा हि संबद्धाः पुंभिर्न च वाक्यार्थेऽन्वीयन्ते; यथाह शालिकनाथः— 'वाच्यार्थस्य च वाक्यार्थे संसर्गानुपपत्तितः । तत्संबन्धवशप्राप्तस्यान्वयाल्लक्षणोच्यते' इति;

परिमलः ।

हि वृत्त्यविषये शाब्दबोधो भवतीत्यत आह— अयमभिसंधिरिति । अनविनाभाविभिरपीति । 'मञ्चाः क्रोशन्ति' इत्यत्र हि मञ्चशब्देन मञ्चेषु शयानाः शिशवो लक्ष्यन्ते ॥

कल्पतरुः।

तदिह गामानयेत्यादौ न श्रौतार्थस्य वाक्यार्थेनानन्वयः; नाप्यन्वितस्य लक्ष्यस्यास्त्यभिधेयेन संबन्धोऽन्वितस्यान्वयान्तराभावात्तत इह न लक्षणेति। अत्रोच्यते— मुख्यार्थपरिग्रहे अनुपपत्तिस्तावल्लक्षणाया निदानम्, तत्र यथा पदेन पदार्थलक्षणायां वाच्यार्थस्य वाक्यार्थे संबन्धानुपपत्तिः एवं वाक्यार्थप्रत्ययोद्देशेन प्रयुक्तस्य पदवृन्दस्य येऽभिधेया अनन्वितपदार्थाः तेषां वाक्यार्थीभावानुपपत्तिरेवान्वितलक्षणाया निदानम्। न चान्वितरूपस्याभिधेयस्वरूपेण संबन्धानुपपत्तिः, विशिष्टस्वरूपयोस्तादात्म्यस्य कस्यापि स्वीकारात्। नन्वेवमप्यभिहितार्थैरर्थान्तरान्वितलक्षणायां कथं नियमः, अर्थान्तराणामानन्त्यात्? तदुच्यते— 'आकाङ्क्षासत्तियोग्यत्वसहितार्थान्तरान्वितान्। पदानि लक्षयन्त्यर्थानिति नातिप्रसङ्गिता'। प्रयोगस्तु— गोपदं गामानयेति वाक्येनानयत्यन्वितगोत्ववाचकं पदत्वात्तुरगपदवदिति॥

परिमलः।

अत्रोच्यत इति। ननु लक्षकशब्दवाच्यस्य वाक्यार्थेन अनन्वयनियमशङ्कायाः किमुत्तरमिहोक्तम्? न चान्वितं लक्ष्यमेव वाक्यार्थेनान्वितं भवति न त्वविशिष्टं वाच्यस्वरूपमित्युक्तनियमाधिरोधो विशिष्टस्वरूपयोस्तादात्म्यस्य कस्यापि स्वीकारादिति वाच्यलक्ष्यसंबन्धप्रतिपादनेन द्योतित इति वाच्यम्, विशिष्टस्य विशेष्यघटितमूर्तेर्वाक्यार्थान्वये तद्घटकस्य विशेष्यस्यापि तदन्वयानिवारणात्; न च विशिष्टस्वरूपयोः संबन्धोक्त्या स्वरूपभिन्नं तदघटितं विशिष्टमङ्गीकृतमिति शङ्कनीयम्, तादात्म्यसंबन्धस्य विशिष्टे विशेष्यानुप्रवेशाविरोधित्वेन संबन्धः स्वीकृत इत्येतावता तदनुप्रवेशविरोधिभेदाप्रसक्तेः; अत एवाचार्यैरिहैव वक्ष्यते—भवतु कार्यान्विते भूते संगतिग्रहः तथापि स्वरूपं तत्र प्रतीयत एव विशिष्टेऽपि स्वरूपसंभवादिति; तस्माद्वाच्यार्थानन्वयनियमाशङ्कायाः परिहारो न लब्ध इति चेत्; लब्ध एव वाक्यार्थीभावानुपपत्तिरेवान्वितलक्षणाया निदानमित्यन्वयानुपपत्तिमनपेक्ष्यानुपपत्त्यन्तरस्य लक्षणाबीजत्वप्रदर्शनेन; लक्ष्यार्थग्रहणसमाधेयानुपपत्तिमात्रं लक्षणाबीजं न तु वाच्यार्थस्य वाक्यार्थेऽन्वयानुपपत्तिरेव येन वाच्यार्थानन्वयनियमः स्यात्, 'काकेभ्यो दधि रक्ष्यताम्' इत्याद्यजहल्लक्षणास्थले मुख्यार्थान्वयानुपपत्त्यभावेऽपि तात्पर्यानुपपत्तेर्लक्षणाबीजत्वाङ्गीकारादिति। **आकाङ्क्षासत्तीति**। नन्वेवं सति अवश्यापेक्षिताकाङ्क्षादिवशादेव वाक्यार्थरूपान्वयप्रतीत्युपपत्तेर्न तत्र लक्षणा कल्पनीया; न च प्रमाकरणप्रत्यासत्तिमन्तरेण संसर्गरूपस्यापि प्रमेयस्य भानं न संभवति प्रत्यक्षे प्रकारविशेष्ययोरिव संसर्गांशेऽपि संनि-

भामती ।

प्रत्ययः स्यात् । न हि प्रत्येकं स्वप्रधानतया गुणप्रधानभावरहितानामेकवाक्यता दृष्टा । तस्मात्पदानां स्वार्थमभिदधतामेकप्रयोजनवत्पदार्थपरतयैकवाक्यता । तथा च तत्तदर्थान्तरविशिष्टैकवाक्यार्थप्रत्यय उपपन्नो भवति । यथाहुः शास्त्र-

कल्पतरुः ।

एतत्सर्वमाह— एकेति । एकप्रयोजनसिद्ध्युपयोगित्वं हि पदार्थानामितरेतरवैशिष्ट्यमन्तरेण न घटते; अतः प्रयोजनवत्त्वायैकवाक्यत्वाय च लक्षणयान्वितपरत्वं पदानां वाच्यमित्यर्थः । ननु विशिष्टानामप्यर्थानां भेदात्कथमेकवाक्यता? अत आह— तथा चेति । गुणभूतनानापदार्थविशिष्टप्रधानार्थस्यैक्यादेकवाक्यत्वमित्यर्थः । पदानामनन्वितार्थापर्यवसाने अन्वितार्थपर्यवसाने च भट्टसंमतिमाह— यथाहु-

परिमलः ।

कर्षापेक्षादर्शनादिति वाच्यम्, तथा नियमाभावात्, अनुमितिकरणे धूमे वह्निव्याप्तिसत्त्वमात्रेण पर्वतसंबन्धिवह्न्यनुमितिदर्शनात्, पक्षधर्मताबलात् साध्यस्य पक्षसंबन्धभानमिति चेत् इहाप्याकाङ्क्षादिबलात् प्रधानपदार्थे समभिव्याहृतगुणान्वयप्रतीतिरस्त्विति चेत्, मैवम्, एवमपि शब्दबोध्यस्य वृत्तिविषयत्वनियमाप्रत्याख्यानात् । करणप्रत्यासत्तिमनपेक्ष्यानुमितौ भासमानस्यापि पक्षसाध्यसंबन्धस्य शब्देन बोधने कर्तव्ये 'पर्वतो वह्निमान्' इति तदभिधायकमतुप्प्रत्ययापेक्षादर्शनात्। 'घटः पटो न' इत्यत्रान्योन्याभावे 'घटे पटो न' इत्यत्र संसर्गाभावे च प्रतियोगिसंबन्धस्य शब्दवृत्तिविषयत्वं विनैव शाब्दबोधविषयत्वं दृष्टमिति चेत्, न, तदन्यवाचिनो नञः शक्तावधिकरणसंबन्धस्येव तदन्यवाचिनस्तदभाववाचिनश्च नञः शक्तौ प्रतियोगिसंबन्धस्यापि शक्यत्वेनानुप्रवेशकल्पनात्, अन्याभावशब्दयोः शक्तौ तदननुप्रवेशात् । तदर्थवाचित्वेनाङ्गीकृतस्य नञः शक्तावपि न तदनुप्रवेश इत्यभ्युपगमे तयोः प्रयोगे इव नञः प्रयोगेऽपि प्रतियोगिनि पञ्चमीषष्ठ्योर्नञः प्रयोग इव तयोः प्रयोगेऽपि प्रतियोगिनि प्रथमाया वा निवारयितुमशक्यत्वात् । तस्मादन्वयांशेऽपि वृत्तिकल्पनं युक्तमेव । न च तथापि प्राक् शक्यसंबन्धित्वेनाज्ञातस्यापूर्वस्य वाक्यार्थस्य लक्ष्यत्वं न युज्यत इति वाच्यम्, प्रागविज्ञातहरिद्रानामकनदीविशेषणे 'हरिद्रायां नद्यां घोषविशेषः' इति श्रुते वाक्ये नदीपदसमभिव्याहारेण तदानीमेव हरिद्राशब्दस्य नदीविशेषशक्तिग्रहणेन नदीलिङ्गात् तत्संबन्धित्वेनानुमितस्य तीरस्येव आकाङ्क्षाद्युपस्थापितस्य वाक्यार्थस्यान्वयस्य वृत्त्युपस्थापितत्वसिद्ध्यर्थं लक्ष्यत्वोपपत्तेः ॥

नोपदिशतीति को हेतुः? न हि भूतमुपदिश्यमानं क्रिया भवति। अक्रियात्वेऽपि भूतस्य क्रियासाधनत्वात्क्रियार्थ एव भूतोपदेश इति

भामती ।

विदः— 'साक्षाद्यद्यपि कुर्वन्ति पदार्थप्रतिपादनम् । वर्णास्तथापि नैतस्मिन्पर्यवस्यन्ति निष्फले ॥ वाक्यार्थमितये तेषां प्रवृत्तौ नान्तरीयकम् । पाके ज्वालेव काष्ठानां पदार्थप्रतिपादनम्' इति । तथा चार्थान्तरसंसर्गपरतामात्रेण वाक्यार्थप्रत्ययोपपत्तौ न कार्यसंसर्गपरत्वनियमः पदानाम् । एवं च सति कूटस्थनित्यब्रह्मरूपपरत्वेऽप्यदोष इति । भव्यं कार्यम् । ननु यद्भव्यार्थं भूतमुपदिश्यते न तद्भूतम्, भव्यसंसर्गिणा रूपेण तस्यापि भव्यत्वादित्यत आह— **न हि भूतमुपदिश्यमानमिति** । न तादात्म्यलक्षणः संसर्गः, किं तु कार्येण सह प्रयोजनप्रयोजनिलक्षणोऽन्वयः । तद्विषयेण तु भावार्थेन भूतार्थानां क्रियाकारकलक्षण इति न भूतार्थानां क्रियात्मत्वमित्यर्थः । शङ्कते— **अक्रियात्वेऽपीति** । एवं

कल्पतरुः ।

रिति । यदा लक्षणया योग्येतरान्वितपरत्वं पदानां पदार्थानां च लक्षणायां द्वारत्वेन तत्परत्वं तदा वेदान्तानां कार्यानन्वितब्रह्मपरत्वोपपत्तिरित्याह— **एवं च सतीति** । भव्यार्थत्वेनेति भाष्ये भव्यशब्दो भवनकर्तृवचनत्वादुत्पाद्यमात्रपरो मा भूदित्याह— **भव्यमिति** । भाष्ये भूतस्य क्रियात्वप्रतिषेधस्य प्रसक्तिमाह— **नन्विति** । भव्यसंसर्गिणा रूपेण भूतमपि भव्यमित्यत्र किं कार्यं भव्यमुत क्रिया? उभाभ्यामपि भूतार्थस्य नैक्यमित्याह— **न तादात्म्येति** । कार्यं हि साध्यतया प्रयोजनं भूतं साधकतया प्रयोजनीति । प्रवृत्तिनिवृत्तिव्यतिरेकेणेत्यादिभाष्येण कार्यान्वयनियमभङ्गेन कूटस्थनित्यवस्तूपदेशस्य समर्थितत्वेऽपि कार्यान्विते व्युत्पत्तिनियममभ्युपेत्यापि परिहारान्तरं वक्तुमुक्तशङ्कामनुवदतीत्याह— **शङ्कत इति** । अङ्गीकृते कार्यान्वितव्युत्पत्तिनियमे कूटस्थनित्योपदेशानुपपत्तिरित्याह— **एवं चेति** । भवतु कार्यान्विते

परिमलः ।

एकवाक्यान्तर्गतानां सर्वेषां पदानाम् इतरपदार्थान्वितस्वस्वार्थलक्षकतायां वाक्यार्थान्वयभेदेन वाक्यभेदमाशङ्क्य समभिव्याहृतयावद्गुणान्वितप्रधानपदार्थरूप एक एव लक्षणीयो वाक्यार्थ इति परिहरति— **नन्वित्यादिना** । इयं च वाक्यार्थलक्षणा समभिव्याहृतसकलपदवृत्तिः प्रधानपदमात्रवृत्तिर्वेत्यन्यदेतत् । **व्युत्पत्तिनियममिति** । प्रथमं

चेत्, नैष दोषः; क्रियार्थत्वेऽपि क्रियानिर्वर्तनशक्तिमद्वस्तूपदिष्टमेव; क्रियार्थत्वं तु प्रयोजनं तस्य; न चैतावता वस्त्वनुपदिष्टं भवति ।

भामती ।

चाक्रियार्थकूटस्थनित्यब्रह्मोपदेशानुपपत्तिरिति भावः । परिहरति— नैष दोषः । क्रियार्थत्वेऽपीति । न हि क्रियार्थं भूतमुपदिश्यमानमभूतं भवति, अपि तु क्रियानिर्वर्तनयोग्यं भूतमेव तत् । तथा च भूतेऽर्थेऽवधृतशक्तयः शब्दाः क्वचित्स्वनिष्ठभूतविषया दृश्यमाना भूत्वा क्रीत्वा वा न कथंचित्क्रियानिष्ठतां गमयितुमुचिताः । न ह्युपहितं शतशो दृष्टमप्यनुपहितं क्वचिद्दृष्टमदृष्टं भवति ।

कल्पतरुः ।

भूते संगतिग्रहः, तथापि स्वरूपं तत्र प्रतीयत एव, विशिष्टेऽपि स्वरूपसद्भावात् । ततः किम्? अत आह— तथा चेति । स्वनिष्ठभूतविषया इति । कार्यानन्वितभूतविषया इत्यर्थः । न त्वनन्वितविषयत्वमेव, अन्विते भूतपदतात्पर्यस्य समर्थितत्वात् । ते च वक्ष्यमाणोदाहरणेषु दृश्यमाना नाध्याहारादिभिः क्लेशेनान्यथयितव्या इत्यर्थः । स्यादेतत् । कार्यान्विते गृहीतसंगतेः पदस्य कथं शुद्धसिद्धाभिधायिता, न हि गोत्वे गृहीतशक्ति गोपदमभिदधाति तुरगत्वम्, अत आह— न हीति । एवं मन्यते कार्यान्वयो न शब्दार्थः किं तूपाधिः । तथा हि— कर्तव्यतातदभावावगमाधीनत्वात् प्रवृत्तिनिवृत्त्योः प्रवृत्तिनिवृत्तिसाध्यत्वात्प्रयोजनस्य तदधीनत्वाच्च विवक्षाप्रयोगयोः प्रयोगाधीनत्वाच्च वाक्यार्थप्रतिपत्तिव्युत्पत्त्योर्विवक्षादिवत्कार्यान्वयस्यापि शब्दार्थावगत्युपायतामात्रमवगम्यते । अतो विरहय्यापि कार्यान्वयं प्रयोगभेदे भवति भूतं वस्तु पदवाच्यम् । कथमपरथा भवतां प्रमाणान्तरगृहीतकार्यान्वितगृहीतसंगतिकपदबृन्दस्य वेदेऽपूर्वान्विताभिधायिता? तदिदमुक्तमुपहितं शतशो दृष्टमपि तदेव क्वचिदनुपहितं यदि दृष्टं भवति तदा तददृष्टं न हि भवति, किं तु दृष्टमेव भवतीति ॥

परिमलः ।

कार्यान्वितप्रयोग एव शक्तिग्रह इति नियममभ्युपेत्येत्यर्थः । कार्यान्विते शक्तिमभ्युपेत्येत्यभिसंधिमजानानस्य शङ्का— स्यादेतदिति । अभिसंधिमुद्घाटयति— एवमिति । किं तूपाधिरिति । शब्दार्थावगताबुपायमात्रमित्यर्थः । एतदेव विवृणोति— तथा हीति । कथमपरथेति । प्राथमिकव्युत्पत्तिग्रहे कार्यान्वयनियमवत् कार्यस्य प्रमाणान्तरगृहीतत्व-

यदि नामोपदिष्टं किं तव तेन स्यादिति, उच्यते— अनवगतात्मवस्तूपदेशश्च तथैव भवितुमर्हति; तदवगत्या मिथ्याज्ञानस्य संसारहेतोर्नि-

---

भामती।

तथा च वर्तमानापदेशा अस्तिक्रियोपहिता अकार्थाः अप्यटवीवर्णकादयो लोके बहुलमुपलभ्यन्ते। एवं क्रियानिष्ठा अपि संबन्धमात्रपर्यवसायिनः, यथा कस्यैष पुरुष इति प्रश्ने उत्तरं राज्ञ इति। तथा प्रातिपदिकार्थमात्रनिष्ठाः, यथा कीदृशास्तरव इति प्रश्ने उत्तरं फलिन इति। न हि पृच्छता पुरुषस्य वा तरूणां वास्तित्वनास्तित्वे प्रतिपित्सिते, किं तु पुरुषस्य स्वामिभेदस्तरूणां च प्रकारभेदः। प्रष्टुरपेक्षितं चाचक्षाणः स्वामिभेदमेव प्रकारभेदमेव च प्रतिवक्ति, न पुनरस्तित्वम्, तस्य तेनाप्रतिपित्सितत्वात्। उपपादिता च भूतेऽप्यर्थे व्युत्पत्तिः प्रयोजनवति पदानाम्। चोदयति- **यदि नामोपदिष्टं** भूतं **किं तव**— उपदेष्टुः श्रोतुर्वा प्रयोजनं **स्यात्**, तस्माद्भूतमपि प्रयोजनवदेवोपदेष्टव्यं नाप्रयोजनम्, अप्रयोजनं च ब्रह्म, तस्योदासीनस्य सर्वक्रियारहितत्वेनानुपकारकत्वादिति भावः। परिहरति— **उच्यत इति**। **अनवगतात्मवस्तूपदेशश्च तथैव**— प्रयोजनवानेव

कल्पतरुः।

अटवीवर्णकादय इति। तद्यथा अस्ति किल ब्रह्मगिरिनामा गिरिवरः; त्रैयम्बकजटाजूटकलनाय विनिर्मिता इव पाण्डुरेव पटी भाति यत्र गोदावरी नदी। यत्र च, सकुसुमफलचूतरुद्धघर्मद्युतिकरपातवनालिषूपजाते तमसि हरकिरीटचन्द्रनुन्ने धवलनिशा इव भान्ति वासराणीत्यादय इति। **क्रियानिष्ठा इति**। अत्र अकारप्रश्लेषः। अभ्युपेत्य कार्यान्वयनियमं पर्यहार्षीत् इदानीमभ्युपगमं त्यजति— **उपपादिता चेति**। एवं तावद्व्युत्पत्तिविरोधं परिहृत्य निष्प्रयोजनत्वचोद्यमुद्भाव्य परिहरति— **यदि नामेत्यादिना**। समुच्चयासंभवादप्यर्थश्चकारः शङ्काद्योती, तामेवाह—

परिमलः।

नियमोऽप्यस्ति व्युत्पित्सोः सवानयनबन्धनाद्यदर्शने व्युत्पत्तिग्रहासंभवात् तदन्वयो यथा व्युत्पत्तिग्रहोपायमात्रतया अन्यथासिद्धस्तव न शब्दार्थकोटावनुप्रविशति एवं कार्यान्वयोऽपीत्यर्थः। **अस्ति किलेति**। नासिकाव्यम्बकस्थाने निवसद्भिराचार्यैरयं ग्रन्थः कृत इति प्रसिद्धिः। अतस्तत्रत्यगिरिनदीवनवर्णनं कृतम्। **जटाजूटकलनाय** जटाकलापबन्धाय। **पाण्डुरा पटी** उष्णीषरूपा। हरः तत्र नित्यसंनिहितः त्र्यम्बकदेवः।

भामती ।

भवितुमर्हति । अप्यर्थश्चकारः । एतदुक्तं भवति— यद्यपि ब्रह्मोदासीनं तथापि तद्विषयं शाब्दज्ञानमवगतिपर्यन्तं विद्या स्वविरोधिनीं संसारमूलनिदानमविद्यामुच्छिन्दत्प्रयोजनवदित्यर्थः । अपि च येऽपि कार्यपरत्वं सर्वेषां पदानामास्थिषत, तैरपि 'ब्राह्मणो न हन्तव्यः' 'न सुरा पातव्या' इत्यादीनां न कार्यपरता शक्यास्थातुम् । कृत्युपहितमर्यादं हि कार्यं कृत्या व्याप्तं तन्निवृत्तौ निवर्तते, शिंशपात्वमिव वृक्षत्वनिवृत्तौ । कृतिर्हि पुरुषप्रयत्नः, स च विषयाधीननिरूपणः । विषयश्चास्य साध्यस्वभावतया भावार्थ एव पूर्वापरीभूतोऽन्योत्पादानुकूलो भवितुमर्हति, न द्रव्यगुणौ । साक्षात्कृतिव्याप्यो हि कृतेर्विषयः । न च

कल्पतरुः ।

यद्यपीति । एवं तावत् द्रव्यगुणादिशब्दानां विधिवाक्यगतानां केवलभूतार्थतामापाद्य तद्वत् ब्रह्मापि शब्दगोचर इत्युक्तम्; इदानीं तु निषेधवाक्यवद्वेदान्ताः सिद्धपरा इत्याह— अपि चेत्यादिना । यत्र कृतिस्तत्रैव कार्यम् । निषेधेषु कृतिनिवृत्तौ तद्व्याप्तं कार्यं निवर्तत इत्युक्त्वा कृतेरपि तद्व्यापकधात्वर्थनिवृत्त्या निवृत्तिमाह— कृतिर्हीत्यादिना । न घटवत्प्रतिक्षणं समाप्तः किं तु पचतीतिवत् पूर्वापरीभूतः । स च भवत्यादाविव नात्मलाभः किं तु कर्तुरन्यस्योत्पाद्यस्यौदनादेरुत्पादनायामनुकूलः प्रयत्नविषयः । तत्र हेतुमाह— साध्येति । न द्रव्यगुणौ कृतिविषयाविति अत्र हेतुः— साक्षादिति । तत्रापि तदुत्पादनानुकूलो व्यापारः कृतिविषय इत्यर्थः । 'भावार्थाः

परिमलः ।

पचतीति । पाको हि पूर्वापरीभूताधःसंतापनादितण्डुलविक्लित्तिफलपर्यन्तक्रियासंतानरूपो नैकक्रियात्मकः । अतो घटादिवत्प्रतिक्षणं पर्याप्तवृत्तिर्न भवतीत्यर्थः । उत्पादनायामिति । उत्पत्तावित्यर्थः, ओदनोत्पत्त्यनुकूलपुरुषव्यापारस्य पाकस्यैवौदनोत्पादनात्वेन तस्य तदनुकूलत्वाभावात् । यद्वा प्रज्वलनादिरूपोऽग्न्यादिव्यापारोऽपि भवत्योदनोत्पादना तदनुकूलश्च पुरुषव्यापार इति तदभिप्रायो णिचः प्रयोगः । प्रयत्नविषय इति । साध्यतयेति शेषः । उद्देश्यतया प्रयत्नविषयत्वस्य घटभवनादौ फलेऽपि सत्त्वेन तद्व्यावृत्तत्वाभावात् । तत्र हेतुमाहेति । हेतुभूतं साध्यत्वमिह चिकीर्षाविषयत्वं न तु प्रयत्ननिर्वर्त्यत्वम्, साध्याविशेषात् । ननु द्रव्यगुणयोरपि घटरूपादिकयोः कृत्यपेक्षोत्पत्तिकत्वादस्ति साध्यतया कृतिविषयत्वमित्याशङ्क्य तत्रापि तदुत्पत्त्यनुकूलस्य तदुत्पादनारूपदण्डचक्रादिव्यापारानुकूलस्य च पुरुषव्यापारस्यैव तथात्वमित्याह— तत्रा-

भामती।

द्रव्यगुणयोः सिद्धयोरस्ति कृतिव्याप्यता। अत एव शास्त्रकृद्वचः— 'भावार्थाः कर्मशब्दास्तेभ्यः क्रिया प्रतीयेत' इति। द्रव्यगुणशब्दानां नैमित्तिकावस्थायां कार्यावमर्शेऽपि, भावस्य स्वतः, द्रव्यगुणशब्दानां तु भावयोगात्कार्यावमर्श इति

कल्पतरुः।

कर्मशब्दास्तेभ्यः क्रिया प्रतीयेतैष ह्यर्थो विधीयते' इति द्वितीयगतमधिकरणम्। अत्र गुरुमतेनार्थं संकलयति— द्रव्येति। अत्रावमर्शेऽपीत्यन्तः पूर्वः पक्षः। अयमर्थः— पदस्मारितानन्वितार्थेषु निमित्तेषु भावान्वितावस्था नैमित्तिकी, तस्यामस्ति सिद्धयोरपि द्रव्यगुणयोः क्रियान्वयेन साध्यता, अतो द्रव्यगुणभावार्थवाचकशब्दानामविशेषेण साध्यार्थवाचकत्वात्साध्यार्थविषयत्वाच्च नियोगस्याविशेषेण नियोगविषयसमर्पकत्वमिति। राद्धान्तमाह— भावस्येति। भावशब्दस्येत्यर्थः। कार्यावमर्श इत्यनुषङ्गः। भावशब्दो हि स्वत एव साध्यरूपां क्रियामवमृशति। द्रव्या-

परिमलः।

पीति। पदस्मारितेति। ननु गुरुमते अन्विताभिधानाङ्गीकारात् कथं कार्यान्विते गृहीतशक्तिकैः पदैरनन्वितार्थानां स्मारणं कथ्यते? उच्यते— शक्तिग्रहात् पूर्वं तदर्था या अनन्वितार्थोपस्थितिः सा अत्र निमित्तत्वेन विवक्षिता। उक्तं हि निबन्धनपञ्जिकायामृजुविमलायाम्— अनन्वितावस्था हि संबन्धग्रहणोपायतां गच्छन्ती वाक्यार्थप्रतिपत्तौ निमित्तम्, एवं हि संबन्धग्रहणमयमर्थोऽनेन शब्देनाकाङ्क्षितसंनिहितयोग्यार्थान्तरान्वितः सन्नभिधीयते' इति। अत्र अयमर्थ इत्यनन्वितावस्थस्य शुद्धस्य गवादेरुपस्थितिरुक्ता। एवं च पदस्मारितेत्यनेन शक्तिग्रहणार्थं पदश्रवणसमये कारणान्तरप्रत्यायितत्वं विवक्षितमिति न विरोधः। यद्वा कार्यसामान्ये गृहीतशक्तिकैः पदैः स्मारितास्तस्यामवस्थायां समभिव्याहृतकार्यविशेषानन्वितार्था विवक्षिता इति न विरोधः॥

अविशेषेणेति। नन्वविशेषेण द्रव्यगुणभावार्थवाचकाः सर्वेऽपि नियोगविषयसमर्पका इत्ययं प्रतिपदाधिकरणपूर्वपक्षः, तं वाक्यभेदतः प्रतीयमानक्रियाकारकभावरूपविनियोगविरोधेनानेकापूर्वाभ्युपगमगौरवप्रसङ्गेन च निराकृत्य तेषु कश्चिदेव नियोगविषयसमर्पक इत्यनिर्धारणेन तस्मिन्नधिकरणे स्थिते, तेषु भावार्थवाचकशब्द एव नियोगविषयसमर्पक इति निर्धारणार्थं हि भावार्थाधिकरणम्। सत्यम्। इहाविशेषेणेत्यनेन द्रव्यगुणभावार्थानां त्रयाणामपि कार्यत्वमविशिष्टमित्यनध्यवसायेन पूर्वपक्षो विवक्षितः। अनध्यवसायपूर्वपक्ष एव निबन्धनटीकायां दर्शितः। भाष्यगतस्याविशेषे-

भामती ।

भावार्थेभ्य एवापूर्वावगतिर्न द्रव्यगुणशब्देभ्य इति । न च 'दध्ना जुहोति

कल्पतरुः ।

दिशब्दास्तु क्रियायोगद्वारा द्रव्यादीन्साध्यतया अवमृशन्ति । किमत इत्यत आह– **भावार्थेभ्य इति** । नियोगो हि साक्षात्कृतेरविषयः सन् तद्विषयत्वाय स्वावच्छेदकत्वेन साक्षात्साध्यस्वभावं भावार्थमाकाङ्क्षति; तल्लाभे च न क्रियायोगद्वारा साध्यस्य द्रव्यादेस्तद्विषयता युक्ता; अतो भावार्थशब्देभ्य एव 'यजति' इत्यादिभ्यो विषयविशिष्टापूर्वाधिगतिरिति । भावनावाचिभ्योऽपि भावो भावनेत्यादिभ्यो नापूर्वाधिगतिरिति कर्मशब्दा इत्युक्तम् । धात्वर्थवाचिभ्यः कर्मशब्देभ्योऽपि याग इत्येवमादिभ्यो

परिमलः ।

णेति पूर्वपक्षे हेतूपन्यासस्य च अनध्यवसाय एव तात्पर्यं वर्णितम् । यद्वा विवरणटीकानुसारेण प्रतिपदाधिकरणशरीरमत्र लिखितम् । तन्मते हि प्रतिपदाधिकरणं कर्मैव विषयो न द्रव्यगुणाविति निर्धारणान्तम्; भावार्थाधिकरणं तु किं कर्म नाम्ना विषयतया समर्प्यते उत आख्यातेनेति विशेषविचारार्थम्; प्रतिपदाधिकरणस्य भावार्थसूत्रव्यतिरेकेण सूत्रान्तराभावात् तदेव सूत्रमिह लिखितमिति न कश्चिद्दोषः । **भावार्थशब्देभ्य एवेति** । भावार्थशब्दा यजत्यादिधातवः तेभ्यो यद्यपि विषयमात्रस्याधिगतिः तथापि विषयाधीनप्रतिपत्तिकत्वादपूर्वस्य कार्यस्य विषयवाचकेभ्य एव तस्याप्यधिगतिरुक्ता । एवमेवोक्तमृजुविमलायाम् 'विध्यर्थो लिङादिभिः प्रत्याय्यते तस्य च तत्प्रतिपाद्यमानस्य विषयाधीनप्रतिपत्तित्वात् भावार्थानां च विषयबोधकत्वात् ततोऽपूर्वं प्रतीयत इत्युच्यते न पुनरपूर्वस्यामी भावार्था वाचकाः' इति । **भावो भावनेत्यादिभ्य इति** । भवतेः णिजन्तात् 'एरच्' इति सूत्रेण भाववाचिन्यच्प्रत्यये 'णेरनिटि' इति सूत्रेण णिलोपे च कृते निष्पन्नो भावशब्दो भावनाशब्दपर्यायः । ननु गुरुमते भावार्थशब्दस्य पूर्वापरीभाववैशिष्ट्यमर्थः; उक्तं हि निबन्धनटीकायाम्– 'पूर्वापरभावे हि भावार्थत्वं भवति भावशब्दस्य पूर्वापरीभाववाचित्वात्' इति; सत्यम्; ण्यन्ताद्भवतेरजन्तस्य भावशब्दस्य भावनावाचित्वमप्युपपद्यते । न च भावनाया धात्वर्थत्वासंभवः; कृतिसाध्यत्वेन नियोगवाचिनां लिङादीनामिव तत्संघटनार्थं तथात्वेन यागादिविषयसमर्पकाणां धातूनां विशेषणभूतकृतिरूपभावनार्थत्वस्यापि सत्त्वात् । **कर्मशब्दा इत्युक्तमिति** । कर्मशब्दः क्रियत इत्यर्थे कृञ्धातोरौणादिके मनिन्प्रत्यये सति निष्पन्नः कृतिविषयवाची, न च कृतिः कृतिविषय इति तद्वार्त्तिः । **याग इत्येवमादिभ्य इति** । यागादिशब्दा

भामती।

'संततमाघारयति' इत्यादिषु दध्यादीनां कार्यविषयता। तत्रापि हि होमाघार-भावार्थविषयमेव कार्यम्। न चैतावता 'सोमेन यजेत' इतिवत्, दधि-सांतत्यादिविशिष्टहोमाघारविधानात् 'अग्निहोत्रं जुहोति' 'आघारमाघारयति'

कल्पतरुः।

नैवापूर्वाधिगतिरिति भावार्था इत्युक्तम्। अतो धात्वर्थोपरक्तभावना येषु भाति 'यजेत' इत्यादिषु तेभ्योऽपूर्वं प्रतीयेत एष हि भावनासाध्योऽपूर्वलक्षणोऽर्थो विधीयत इति सूत्रार्थः। ननु द्रव्यगुणौ विधीयेते दधिसांतत्ये, तत्र तयोरेव कार्यावच्छेदकता; अत आह— **न च दध्नेति**। आघारः क्षारणम्। सांतत्यमविच्छिन्नत्वम्। यदि दध्यादावपि भावार्थो विधेयः तर्हि न्यायविरोध इत्याशङ्क्याह— **न चैतावतेति**। ज्योतिष्टोमे श्रूयते 'सोमेन यजेत' इति। तथा 'ऐन्द्रवायवं गृह्णाति, मैत्रावरुणं गृह्णाति, आश्विनं गृह्णाति' इति। तत्र संशयः— किमैन्द्रवायवादिवाक्ये विहितानां सोमरसानां यागानां च यथाक्रमम् 'सोमेन यजेत' इति सोमयागशब्दावनुवदितारौ उत द्रव्ययुक्तस्य कर्मणो विधातारौविति। तत्रैन्द्रवायवादिवाक्येषु द्रव्यदेवताख्यरूप-

परिमलः।

भवन्ति वस्तुतः कृतिविषयाणां वाचका इति कर्मशब्दाः न तु भावार्थाः तेभ्यो यागादीनां कृतिसाध्यत्वेन प्रतीत्यभावादिति तद्व्यावृत्तिः। **तेभ्योऽपूर्वं प्रतीयेत इति**। अनेन सूत्रे क्रियाशब्दः क्रियतेऽनेनेति व्युत्पत्त्या फलकरणत्वेन रूपेण अपूर्वपर इति दर्शितम्। **एष हीति**। ननु 'एष ह्यर्थो विधीयते' इति सूत्रशेषस्येत्थं गुरुमते व्याख्यानम्— **कथम्!** अपूर्वस्य कृतिसाध्यतया प्राधान्येन प्रतिपाद्यस्य फलकरणतया तच्छेषत्वमित्याशङ्का-निराकरणार्थम् 'एष हि' इत्यादिसूत्रशेषः; 'यजेत स्वर्गकामः' इत्यादिभिर्वाक्यैः यागेन स्वर्गकामः स्वकामनाविषयं स्वर्गं साधयेदित्येषोऽर्थो यस्माद्विधीयते तस्मात् तेनापूर्वं कृत्वेत्यपूर्वस्यापि फलकरणत्वेन सिद्धिर्भवति; स्वसिद्ध्यर्थं फलं साधयतश्चापूर्वस्य न प्राधान्यभङ्गः; 'आत्मसिद्ध्यनुकूलस्य नियोज्यस्य प्रसिद्धये। कुर्वत्स्वर्गादिकमपि प्रधानं कार्यमेव नः' इति न्यायादिति; सत्यम्; इहापि स एवार्थ उपन्यस्तः **अपूर्वलक्षणोऽर्थो विधीयत** इति; अत्र करणत्वेनेति शेषाध्याहारेण सोऽर्थः स्पष्टीभवति। पशुसोमाधिकरणसूत्रस्य 'द्रव्यसंयोगाच्चोदना पशुसोमयोः' इत्यादेर्महत्त्वादुदाहृतसोमवाक्यमात्रविषयत्वाभावाच्च तत्र लिखितम्। **द्रव्यदेवताख्येति**। ऐन्द्रवायवादिवाक्येषु गृह्णातेः 'सोममभिषुणोति' 'सोमं पावयति' इत्यादिसंनिहितवाक्यान्तरप्रकृत-

कल्पतरुः ।

प्रतीतेर्यागानुमानादितरत्र रूपाप्रतीतेः समुदायानुवाद इति प्राप्ते, द्वितीये राद्धान्तितम्—नानुवादत्वम्, अप्रत्यभिज्ञानात्; लतावचनो हि सोमशब्दो न रसवचनः; ऐन्द्रवायवादिशब्दास्तु रसानभिदधतीति न तदनुवादी सोमशब्दः । न च 'यजेत' इति प्रत्यक्षे यागे तदनुमानम्, अतः प्राप्त्यभावान्न यजिरप्यनुवादी । तस्मात्सोमवाक्ये यागविधिरितरत्र रसानामिन्द्रादिदेवताभ्यो ग्रहणान्युपकल्पनानि विधीयन्त इति । एवं यथा 'सोमेन' इति वाक्ये विशिष्टविधिः एवं दधिसांतत्यादिवाक्यानि यदि द्रव्यगुणविशिष्टहोमाधारविधायीनि तर्हि अग्निहोत्राधारवाक्ये तद्विहितहोमानामाधाराणां च समुदायावनुवदेतां तथा चाधिकरणान्तरविरोध इति शङ्का । तथा हि द्वितीये स्थितम्—'आधाराग्निहोत्रमरूपत्वात्' । 'आधारमाधारयति' 'ऊर्ध्वमाधारयति' 'संततमाधारयति' तथा 'अग्निहोत्रं जुहोति' 'दध्ना जुहोति' 'पयसा जुहोति' इति श्रूयते । तत्र संशयः— किं संततदध्यादिवाक्यविहितानामाधारहोमानामाधाराग्निहोत्रवाक्ये समुदायानुवादिनी, उतापूर्वयोराधारहोमयोर्विधातृणी इति । तत्रानुवादिनी अरूप-

परिमलः ।

सोमरसविषयत्वात् द्रव्यप्रतीतिः । **इतरत्रेति** । सोमवाक्ये देवताख्यरूपाप्रतीतेरित्यर्थः । **समुदायानुवाद इति** । यजिर्यागसमुदायस्य सोमशब्दस्तद्द्रव्यसोमरससमुदायस्य चानुवाद इत्यर्थः । अनुवादस्य च प्रयोजनं सोमशब्दस्य तत्प्रख्यन्यायेन कर्मनामधेयत्वप्राप्त्या 'स एष यज्ञः पञ्चविधोऽग्निहोत्रं दर्शपूर्णमासौ चातुर्मास्यानि पशुः सोमः' इत्यादौ सोमशब्देनापि क्रतुव्यवहारसिद्धिरिति नानुवादवैयर्थ्यम् । **प्रत्यक्षे यागे इति** । ऐन्द्रवायवादिवाक्यैर्देवताविशिष्टेषु ग्रहणेषु चोदितेषु यागं विना ग्रहणमात्रेण द्रव्यस्य देवतासंबन्धासिद्धेर्यागापेक्षायाम् 'सोमेन यजेत' इत्येतत्सर्वानेतान् द्रव्यदेवतासंबन्धानुपपादयत् यागान्तरानुमानं निरुन्ध्यादित्यर्थः । एवं चोत्पत्तिवाक्यविहितस्य लताद्रव्यस्याभिषवादिवाक्यपर्यालोचनेन रसद्वारा साधनत्वमित्यवगतेस्तस्य रसस्येन्द्रवाय्वाद्युद्देश्यकग्रहणसंस्कारविधिसामर्थ्यादुत्पत्तिवाक्यविधेये यागे देवता लभ्यते, तत्तद्देवतोद्देशेन गृहीतस्य रसस्य तत्तद्देवतायै त्यागाभावे ग्रहणे देवतोद्देशांशस्यादृष्टार्थत्वापत्तेः । अतो न तत्र देवताख्यरूपालाभदोषः । **अरूपत्वादिति** । अत्र रूपशब्दो न द्रव्यदेवतामात्रपरः किं तु सांतत्यादिसाधारण्यार्थं गुणसामान्यपरः । **न ह्यत्रेति** । 'दध्ना जुहोति' 'पयसा जुहोति' 'तण्डुलैर्जुहोति' इत्यादिवाक्यविहितानां होमानाम् 'संततमाधारयति' 'ऊर्ध्वमाधारयति' 'ऋजुमाधारयति' इत्यादिवाक्यविहितानामाधाराणां च यानि रूपाणि दध्यादीनि सांतत्यादीनि च तेभ्योऽन्यदुपदिष्टमतिदिष्टं वा रूपं नास्ति तेषां च कर्मान्तरगुणानां नान्यत्रान्वयः संभवती-

भामती ।

इति तदनुवादः । यद्यप्यत्रापि भावार्थविषयमेव कार्यं तथापि भावार्थानुबन्ध-

कल्पतरुः ।

त्वात्; न ह्यत्र दधिसांतत्यादिवाक्यविहितहोमाधारेभ्यो विशिष्टं रूपमास्ति । होमाधार-मात्रं तु प्रकृतमुपलभ्यते । अतोऽनुवादत्वे प्राप्ते, राद्धान्तः—विधी इमौ स्यातामाधारयति-जुहोतिशब्दाभ्यामनुष्ठेयार्थप्रतीतेः । तत्संनिधौ श्रुतस्य सांतत्यदध्यादिवाक्यस्य विशि-ष्टविधित्वे गौरवप्रसङ्गेन तद्विहितभावार्थानुवादेन गुणविधानार्थत्वादिति । नैतेन विरु-ध्यते सांतत्यदध्यादिवाक्ये भावार्थविषयं कार्यमित्यभ्युपगमः । तत्र हेतुमाह—**यद्यपीति** ।

परिमलः ।

त्यर्थः । ननु दधिसांतत्यादिवाक्यानि होमाधारविधायकानीति सिद्धान्ती न मन्यते, किं त्वग्नि-होत्राधारवाक्यविहितहोमाधारानुवादेन गुणविधायकानीत्येव मन्यते, तं प्रति कथं तद्विहि-तहोमाधारेभ्य इति सिद्धवत्कृत्य कथनम्; उच्यते— अग्निहोत्राधारवाक्याभ्यां होमाधारयो-र्विधानमेव न संभवति, होमक्षारणसामान्ययोर्होमान्तरक्षारणान्तरविधिसिद्धत्वेन विशेषोप-स्थितिं विना अननुष्ठेयत्वेन च विधानायोगात्, तद्विशेषयोश्च विशेषकरूपाश्रवणेनाप्रतीतेः; न च नामनी विशेषके स्यातामिति वाच्यम्; विशेषकान्तरानुपस्थितौ कयोर्होमक्षारणविशे-षयोरेते नामनी इति बोद्धुमशक्यत्वात् । न च 'उद्भिदा यजेत पशुकामः' इत्यत्र नामैव विशेषकं दृष्टमिति शङ्कनीयम्, पशुफलेन प्रकृतिवच्छब्दसंनिधापितसौमिकाङ्गजातेन च लब्धविशेषे एवोद्भिन्नामप्रवृत्तेः । न च दधिसांतत्यादिगुणैरेव विशेषलाभः । तथा सति गुणविधिप्रवृत्त्यनन्तरं होमाधारविशेषविधौ, तयोर्विधाने सति तदनुवादेन गुणवि-धानमिति परस्पराश्रयापत्तेः । तस्मात् विशेषकसद्भावात् दधिसांतत्यादिसगुणवाक्येष्वेव होमविशेषाणामाधारविशेषाणां च विधानम् । निर्गुणवाक्ये तदनुवादके । अनुवादप्रयो-जनमग्निहोत्राधारनाम्नोः संनिहितसर्वहोमाधारनामत्वसिद्धया 'अग्निहोत्रं जुहुयात् स्वर्ग-कामः' इति फलवाक्येन सर्वेषां होमानां फलसंबन्धसिद्धिः । 'इन्द्र ऊर्ध्वोऽध्वर इत्या-धारमाधारयति' इति गुणवाक्येन सर्वेषामाधाराणां मन्त्रसंबन्धसिद्धिश्चेति पूर्वपक्ष्याशयः । **अनुष्ठेयार्थप्रतीतेरिति** । विशेषकाश्रवणेऽप्यनुष्ठापकविधिसामर्थ्यादेवानुष्ठेयः कश्चन होम-विशेष आधारणविशेषश्चात्र विवक्षित इति ज्ञायते । अतस्तयोर्विधानं नामविशेषो-पबन्धश्चेत्युभयमुपपद्यते । समुदायानुवादश्च निष्फलः । राजसूयनाम्न इव फलवाक्य-गतस्यैवाग्निहोत्रनाम्नो गुणवाक्यगतस्यैव चाधारनाम्नः संनिहितसर्वधात्वर्थपरत्वोपपत्तेरिति भावः । **गुणविधानार्थत्वादिति** । गुणविशिष्टकर्मविधाने च दध्यादिवाक्यविहितहो-

भामती ।

तया द्रव्यगुणावविषयावपि विधीयेते । भावार्थो हि कारकव्यापारमात्रतया विशिष्टः कारकविशेषेण द्रव्यादिना विशेष्यत इति द्रव्यादिस्तदनुबन्धः । तथा च भावार्थे विधीयमाने स एव सानुबन्धो विधीयत इति द्रव्यगुणावविषयावपि तदनुबन्धतया विहितौ भवतः । एवं च भावार्थप्रणालिकया द्रव्यादिसंक्रान्तो विधिर्गौरवाद्विभ्यत्स्वविषयस्य चान्यतः प्राप्ततया तदनुवादेन तदनु-

कल्पतरुः ।

यद्यपि संततादिवाक्ये साक्षात्कृतिविषयत्वाद्भावार्थस्य तदवच्छिन्नमेव कार्यं यद्यपि च कार्यं प्रति साक्षादविषयावनवच्छेदकौ द्रव्यगुणौ, तथापि भावार्थं प्रत्यनुबन्धतया अवच्छेदकतया विधीयेते । तत्र हेतुमाह— भावार्थो हीति । तर्हि भावार्थो द्रव्यादिश्च विधेयः? तर्हि वाक्यभेदः; नेत्याह— तथा चेति । तर्हि सन्ततादिवाक्यानि विशिष्टविधयः स्युः स्याच्चाग्निहोत्रादिवाक्यमनुवादः; तत्राह— एवं चेति । यद्यप्यत्र विशिष्टविषयो विधिः प्रतीयते, तथापि भावार्थद्वारा द्रव्यादिकमपि विषयीकरोति, तत्र संक्रान्तो यदि भावार्थमन्यतो विहितं न लभेत तर्हि गौरवमप्युररीकृत्य विशिष्टं विदधीत, अथ लभेत तत उपपदाकृष्टशक्तिर्द्रव्यादिपरो भवत्यनुवदति तु भावार्थम् । यथाहुः— 'सर्वत्राख्यातसंबद्धे श्रूयमाणे पदान्तरे । विधिशक्त्युपसंक्रान्तेः स्याद्धातोरनुवादता' इति । तदिहाग्निहोत्रादिवाक्यत एव भावार्थलाभात्

परिमलः ।

मानां न देवतालाभः । 'यदग्नये च प्रजापतये च सायं जुहोति' 'यत् सूर्याय च प्रजापतये च प्रातर्जुहोति' इति वाक्यविहितहोमयोर्न द्रव्यलाभः । तयोरपि दध्यादिवाक्याविशेषेण पूर्वपक्षे होमान्तरविधायकत्वस्य वक्तव्यत्वादित्याद्यपि दूषणं द्रष्टव्यम् । पदान्तरे गुणवाचिनि न तु नामधेयरूपेऽपि । अत्र विधिशक्तेर्गुणसंक्रमणेन धातोरनुवादतोक्तिस्तात्पर्यपर्यवसानविषयार्थाभिप्राया न तु शब्दवृत्तिबोध्याभिप्राया; द्रव्यगुणयोः स्वतः सिद्धतया धात्वर्थानुवादेन तन्मात्रविधानासंभवात् । उक्तं हि आधाराग्निहोत्राधिकरणवार्त्तिके— 'सर्वत्रैव विशिष्टविधानोत्तरकालं किं प्राप्तं किमप्राप्तमित्यन्वेषणायामप्राप्तमात्रविषयोपसंहारादिधेर्भावनाधात्वर्थयोरनुवाद इत्यभिधीयते न त्वादित एव तावन्नूद्य द्रव्यं गुणो वा विधीयते तत्र पश्चात्तने व्यापारे मन्दबुद्धिप्रतिपत्त्यर्थं स्थूलेन न्यायेन कथ्यमाने शास्त्रकृता एवैता वचनव्यक्तय इति भ्रान्तिः' इति । इहापि टीकायां तथैवोक्तम् । न चैवं गुणमात्रविधानफलकवाक्येष्वपि विशिष्टविध्यभ्युपगमे प्राप्तकर्मण्यनेकगुणविधानप्रयुक्तो वाक्य-

भामती।

बन्धीभूतद्रव्यादिपरो भवतीति सर्वत्र भावार्थविषय एव विधिः। एतेन 'यदाग्नेयोऽष्टाकपालो भवति' इत्यत्र संबन्धविषयो विधिरिति परास्तम्। ननु न भवत्यर्थो विधेयः, सिद्धे भवितरि लब्धरूपस्य भवनं प्रत्यकर्तृत्वात्; न खलु गगनं भवति; नाप्यसिद्धे, असिद्धस्यानियोज्यत्वात्, गगनकुसुमवत्; तस्माद्भवनेन प्रयोज्यव्यापारेणाक्षिप्तः प्रयोजकस्य भावयितुर्व्यापारो विधेयः; स च व्यापारो भावना, कृतिः, प्रयत्न इति निर्विषयश्चासावशक्यप्रतिपत्तिः; अतो विषयापेक्षायामाग्नेयशब्दोपस्थापितो द्रव्यदेवतासंबन्ध एवास्य विषयः। ननु व्यापारविषयः पुरुषप्रयत्नः कथमव्यापाररूपं संबन्धं गोचरयेत्? न हि घटं कुर्वित्यत्रापि साक्षान्नामार्थं घटं पुरुषप्रयत्नो गोचरयति, अपि तु दण्डादि हस्ता-

कल्पतरुः।

द्रव्यादिपरता। मीमांसकैकदेशिनः 'आग्नेयः' इत्यादौ द्रव्यदेवतासंबन्धो विधेय इत्याहुः। तत्रापि सिद्धस्य न विधेयत्वमित्युक्तमतिदिशति— एतेनेति। एकदेशी संबन्धस्य भावनावच्छेदकत्वेन विधेयत्वं शङ्कते— नन्वित्यादिना। ननु यथाश्रुतभवत्यर्थ एव विधीयतां किं संबन्धविधिनेत्याशङ्क्य भवत्यर्थस्य कर्ता सिद्धोऽसिद्धो वा। प्रथमे विधिवैयर्थ्यं चरमे नियोज्याभावाद्विध्यभाव इत्युक्त्वा किं तर्हि विधेयमिति विवक्षायामाह— तस्मादिति। प्रयोज्यः उत्पाद्यः। तद्व्यापारो हि भवनम्। तस्य हि व्यापारं भवतिधातुर्विशिनष्टि भवतीति। भवनं च नोत्पादकव्यापारमन्तरेणेति भवनाविनाभूतो भावकव्यापारो विधेय इत्यर्थः। नन्वित्यादिना चोद्यच्छलेन सिद्धान्ती मीमांसकैकदेशिनं दूषयति। भवतु लक्षितभावनाया विधानं तस्यास्तु न संबन्धो विषयः तस्य दध्यादिवत् साक्षात्कृतिविषयत्वायोगादित्यर्थः। नन्वव्यापारोऽपि घटादिः करोत्यर्थरूपभावनाविषयो दृश्यते, अत आह— न हीति। यदि दण्डा

परिमलः।

भेदो न स्यात्, प्रत्येकं गुणेषु विध्यनवतारादिति वाच्यम्; शब्दबोध्यस्यार्थस्य विशिष्टरूपेणैक्येऽपि तत्र तात्पर्यविषयार्थभेदसद्भावेन तदभिप्रायत्वादनेकगुणविधानप्रयुक्तवाक्यभेदवर्णनस्य। तदप्युक्तं वार्त्तिके— 'विधित्वे भावनास्थेऽपि तादर्थ्ये प्रविभज्यते। विशेषणफले चास्मिन् वाक्यभेदो भविष्यति' इति। शब्दावबोध्यार्थभेद इव तात्पर्यविषयार्थभेदेऽपि ह्यविशिष्टं गौरवम्। मीमांसकैकदेशिनः गुरुमते निबन्धनप्रस्थानानुवर्तिनः। नन्वव्यापारोऽपीति। होमसाधनस्य दध्यादेर्होमद्वारापि साध्य-

भामती ।

दिना व्यापारयति । तस्माद्भटार्थो कृतिं व्यापारविषयामेव प्रतिपद्यते, न तु स्वरूपतो घटविषयाम् । उद्देश्यतया त्वस्यामस्ति घटो न तु विषयतया । विषयतया तु हस्तादिव्यापार एव । अत एव 'आग्नेयः' इत्यत्रापि द्रव्यदेवतासंबन्धाक्षिप्तो यजिरेव कार्यविषयो विधेयः । किमुक्तं भवति, आग्नेयो भवतीति ? आग्नेयेन

कल्पतरुः ।

दिविषयो हस्तादिव्यापारः कृतिविषयस्तर्हि कथं 'घटं कुरु' इति घटस्य कृतिकर्मता भाति ? अत आह-- **घटार्थामिति** । घटविषयव्यापार एव कृतिसाध्यो घटस्तूद्देश्यतया प्रयोजनमिति कर्मत्वनिर्देश इत्यर्थः । यदि संबन्धो न विधेयस्तर्ह्याग्नेयवाक्ये किं विधेयम् ? अत आह सिद्धान्त्येव-- **अत एवेति** । अत्यक्तस्य हविषो देवतासंबन्धासंभवात् यागः संबन्धाक्षिप्तः । ननु यजेरप्यपुमर्थत्वात्कथं विधेयता ? अत आह-- **आग्नेयेनेति** । यागेनेत्याग्नेयपदस्य लक्ष्यनिर्देशो भावयेदिति भवतिपदस्य । यत एवाग्नेयादिवाक्ये यागविधिरत एवानुवादे 'यजते' इति श्रुतम् । अन्यथा संबन्ध एव श्रूयेतेत्यर्थः । उक्तं द्वितीये-- 'प्रकरणं तु पौर्णमास्यां रूपावचनात्' । एवं समामनन्ति-- 'यदाग्नेयोऽष्टाकपालोऽमावास्यायां च पौर्णमास्यां चाच्युतो भवति तावब्रूतामग्नीषोमावाज्यस्यैव न तावुपांशुपौर्णमास्यां यजन्तीति ताभ्यामेतमग्नीषोमीयमेकादशकपालं पूर्णमासे प्रायच्छत्' 'ऐन्द्रं दध्यमावास्यायामैन्द्रं पयोऽमावास्यायाम्' इति । तथा 'य एवं विद्वान् पौर्णमासीं यजते' 'य एवं विद्वानमावास्यां यजते' इति । तत्र संदेहः-- किमिमौ यजती कर्मणोरपूर्वयोर्विधातारावुत प्रकृताग्नेयादियागानां समुदायस्यानुवदितारावेति । तत्राभ्यासात्कर्मान्तरविधी; न च द्रव्यदेवते न स्तः; ध्रौवाज्यस्य साधारण्यान्मान्त्रवर्णिकदेवतालाभाच्च; आज्यभागक्रमे हि चतस्रोऽनुवाक्याः सन्ति; द्वे आग्नेय्यौ द्वे सौम्ये; ते च क्रमाद्बलीयसा वाक्येनाज्यभागाभ्यामपच्छिद्यानयोः कर्मणोर्विधास्येते ।

परिमलः ।

त्वासंभवान्मा भूद्विषयत्वम्, द्रव्यदेवतासंबन्धस्य तु स्यात्, तस्य यागद्वारा साध्यत्वात्; किंचिद्द्वारा साध्यमपि हि साध्यमेव । अत एव हस्तादिव्यापारद्वारा घटस्य कृतिसाध्यत्वात् 'घटं करोति' इति द्वितीयानिर्देश इति भावः । **उद्देश्यतयेति** । घटोत्पत्तिमुद्दिश्य हस्तादिव्यापारं कुर्वन् 'घटं करोति' इत्युच्यते घटस्याप्युद्देश्यतया कृतिविषयत्वादित्यर्थः । **लक्ष्यनिर्देश इति** । आक्षेप्यस्यापि शाब्दत्वसिद्ध्यर्थं लक्ष्यतोक्तिः । **ध्रौवाज्यस्य** 'सर्वस्मै वा एतद्यज्ञाय गृह्यते यद्ध्रुवायामाज्यम्' इत्युत्सर्गतः सर्वयज्ञा-

कल्पतरुः ।

एवं हि समामनन्ति—'वार्त्रघ्नी पौर्णमास्यामनूच्येते वृधन्वती अमावास्यायाम्' इति । वृत्रघ्नपदवत्यौ वार्त्रघ्नी वृधन्वत्पदवत्यौ वृधन्वती । तस्मात्कर्मान्तरविधिः– इत्येवं प्राप्ते, अभिधीयते— प्रक्रियत इति प्रकरणं प्रकृतानि कर्माणि पौर्णमास्यमावास्यासंयुक्त-वाक्ययोरालम्बनम् । कुतः? रूपावचनात् । ध्रौवाज्यलाभेऽपि देवता न लभ्यते । न च मन्त्रवर्णेभ्यस्तल्लाभः, तेषां क्रमादाज्यभागशेषत्वात् । यत्तु वाक्यं बलीय इति, सत्यम्, बलवदपि न क्रमस्य बाधकमविरोधात् । क्रमावगताज्यभागाङ्गभावस्यानुवाक्यायुगलद्वयस्य पौर्णमास्यमावास्याकालयोर्विभागेन प्रयोगव्यवस्थापकत्वात् । काले हीमौ शब्दौ रूढौ न कर्मणि । कालद्वयोपहितकर्मसमुदायद्वयानुवादस्य च प्रयोजनं

परिमलः ।

र्थत्वेन विहितस्य । **वृत्रघ्नपदवत्याविति** । वृत्रहननप्रकाशकपदवत्यावित्यर्थः, 'अग्निर्वृत्राणि जङ्घनत्' 'त्वं राजोत वृत्रहा' इत्यग्नेः सोमस्य च मन्त्रयोर्वृत्रघ्नपदाभावात् । **वृधन्वत्पदवत्याविति** । वृद्धिप्रकाशकपदवत्यावित्यर्थः, 'कविर्विप्रेण वावृधे' 'वर्धयामो वचोविदः' इति तन्मन्त्रयोर्वृधन्वत्पदाभावात् । **प्रक्रियत इति** । सूत्रे प्रकरणशब्दः कर्मणि व्युत्पन्नः तत्रैकवचनमविवक्षितं पौर्णमासीशब्दो विद्वद्वाक्यद्वयोपलक्षणम् आलम्बनशब्दस्याध्याहार इति दर्शितम् । **अविरोधादिति** । पौर्णमास्यमावास्याशब्दयोः कालवाचित्वमादाय क्रमाविरोधे शक्योपपादने न तद्विरोधिकर्मविशेषपरत्वमङ्गीकार्यम्; तदङ्गीकारे च विद्वद्वाक्यविधेयत्वेनाभ्युपगतयोः पौर्णमास्यमावास्यासंज्ञकयोः कर्मणोः पृथक्पृथगग्निप्रकाशकसोमप्रकाशकमन्त्रद्वयमनूच्येतेत्यनुवाक्यात्वेन विहितं स्यादिति मन्त्रविकल्पस्तत्प्रकाश्यदेवताविकल्पश्च भवेत्; आज्यभागयोः पुरोनुवाक्यान्तरकल्पनागौरवं च भवेदिति भावः । **बलवदपि** इत्यपिशब्देनाभ्युपगमवादं सूचयता क्रम एव लिङ्गसाहित्येनात्र वाक्याद्बलीयान्, अग्नेः सोमस्य च प्रागेवाज्यभागयोर्देवतात्वेन क्लृप्ततया तदुभयप्रकाशिकानां वार्त्रघ्नीवृधन्वतीनां तयोर्विनियोजकस्य लिङ्गस्यापि सद्भावादित्यपि व्यञ्जितम् । **काले हीति** । विद्वद्वाक्यविधेयपौर्णमास्यमावास्यासंज्ञककर्मद्वयाभ्युपगमे तयोः संज्ञयोः कालयोगेन निमित्तेन लक्षणैव वाच्या न त्वपूर्वा रूढिः कल्पनीया, 'पौर्णमास्यां पौर्णमास्या यजेत' 'अमावास्यायाममावास्यया यजेत' इति वाक्ययोरपि तत्रैव कर्मद्वये कालविधायकत्वप्राप्तेः; एवं च वार्त्रघ्नीवृधन्वतीवाक्यद्वयश्रुतयोः पौर्णमास्यमावास्याशब्दयोर्मुख्यवृत्तिसंभवे लक्षणा नाश्रयणीयेति भावः । यद्युच्येत आज्यभागयोः कालयोगाश्रवणात् प्रधानद्वारा कालयोगाश्रयणे विकृतिषु 'यदीष्ट्या यदि पशुना यदि सोमेन

कल्पतरुः।

'दर्शपूर्णमासाभ्याम्' इत्यधिकारवाक्यगतद्वित्वोपपादनम्। तस्मात्समुदायानुवादावि-

परिमलः।

यजेतामावास्यायां पौर्णमास्यां वा यजेत' इति कालविकल्पविधानात् पौर्णमासीकालो-पांशुयाजाग्नीषोमीयविकारो यदामावास्यायां क्रियते अमावास्याकालसांनाय्यैन्द्राग्नविकारो वा पौर्णमास्यां तदा पौर्णमासीकालप्रधानाङ्गयोराज्यभागयोर्वृधन्वतीप्राप्तेरमावास्याकालप्रधानाङ्गयोर्वार्त्रघ्नीप्राप्तेः प्रकृतिवद्भावबाधः स्यात्; अतस्तदबाधाय पौर्णमास्याख्यकर्माङ्गयोर्वार्त्रघ्न्यौ अमावास्याख्यकर्माङ्गयोर्वृधन्वत्याविति वार्त्रघ्न्यादिवाक्यद्वयस्य आज्यभागविषयत्वेऽपि कर्मलक्षणा आश्रयणीयेति; तथापि क्रमाविरोधादिपूर्वोक्तन्यायैराज्यभागविषयतयैवावतिष्ठत इति द्रष्टव्यम्। **द्वित्वोपपादनमिति**। 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' इति फलवाक्यगताग्नेयादित्रिकद्वयरूपसमुदायद्वयोपपादनं विद्वद्वाक्यद्वयेन समुदायद्वयकरणस्य प्रयोजनम्; तदुपपादनाभावे आग्नेयादीनां षण्णामिव प्रयाजादीनामपि फलसंबन्धेनाङ्गप्रधानव्यवस्था न सिध्येत्। तथा हि— अप्रसिद्धार्थं नामाख्यातपरतन्त्रम्, आख्यातं स्वरसतो यावद्भूह्लाति तावति वर्तते, यथा बहूनामिष्टिपशुसोमयागानां संनिधौ पठिते 'राजा स्वाराज्यकामो राजसूयेन यजेत' इति वाक्ये श्रुतमाख्यातं विशेषकाभावात् संनिधिपठितसर्वयागग्राहीति तत्समभिव्याहृतमप्रसिद्धार्थं राजसूयनामापि तावद्यागवृत्ति; अत एवेष्टिपशुसोमात्मकाः सर्वे यागा राजसूये समप्रधानभूताः; प्रसिद्धार्थं तु नाम नाख्यातपरतन्त्रं किं त्वाख्यातमेव तत्परतन्त्रमित्याख्यातमपि स्वगृहीतार्थमात्रे व्यवस्थापयति; यथा 'ज्योतिष्टोमेन स्वर्गकामो यजेत' इति वाक्ये श्रुतं नाम 'त्रिवृत् पञ्चदशः सप्तदश एकविंशः एतानि वाव तानि ज्योतींषि य एतस्य स्तोमाः' इत्यर्थवादोपदर्शितज्योतिर्नामकत्रिवृदादिस्तोमचतुष्टयसंबन्धनिमित्तकम् 'ग्रहं वा गृहीत्वा चमसं वोन्नीय स्तोत्रमुपाकुर्यात्' इति वाक्येन तत्संबन्धितया प्रसिद्धे सोमयागे वर्तते इत्याख्यातमपि तन्मात्रे वर्तयति; अत एव सोमयाग एव प्रधानभूतः तत्संनिधिपठिता इष्टिपशवस्तदङ्गानि; एवं स्थिते यद्याग्नेयादिषु षट्सु समुदायद्वयं प्रागेव प्रसिद्धं न स्यात्, तदा फलवाक्यगतम् 'दर्शपूर्णमासाभ्याम्' इति पदमप्रसिद्धार्थमाख्यातपरतन्त्रं सत् संनिहितसर्वयागानुवदनस्वरसप्रवृत्ताख्यातानुसारेण राजसूयनामवत् संनिहितसर्वयागनाम स्यात्; द्विवचनं छान्दसेन वचनव्यत्ययेनोपपद्येत, द्विवचनान्तप्रतिरूपकमव्ययमिति वा कल्प्येत; न हि कालयोगिषु प्राक्सिद्धसमुदायद्वयाभावे दर्शपूर्णमासनाम द्विवचनान्तं प्रसिद्धार्थं भवेत्; येषामाग्नेयादीनामुत्पत्तिवाक्यावगतः कालयोगोऽस्ति

भामती ।

यागेन भावयेदिति । अत एव 'य एवं विद्वान् पौर्णमासीं यजते' 'य एवं

कल्पतरुः ।

ति । उत्पत्त्यधिकारयोरविसंवादार्थमप्याग्नेयादिवाक्ये यागविधिरभ्युपेय इत्याह— अत

परिमलः ।

तेषां द्वित्वप्रसिद्ध्यभावात् , ययोराज्यभागयोर्द्वित्वप्रसिद्धिरस्ति तयोः कालयोगावगत्यभावात् ; तस्मादवगतकालयोगेष्वाग्नेयादिषु द्वित्वप्रसिद्ध्यर्थं समुदायद्वयकरणं सप्रयोजनम् ; तथा सति ह्याग्नेयादीनामेव प्रसिद्धार्थेन नाम्नोपात्तानां फलसंबन्धेन प्राधान्यं प्रयाजादीनां तदङ्गतेति व्यवस्था सिध्यति । ननु फलवाक्यस्थस्य द्विवचनान्तनाम्नः षट्स्विव विद्वद्वाक्यस्थयोरेकवचनान्तनाम्नोः त्रिषु त्रिष्वनन्वितार्थत्वेन अप्रसिद्धार्थतया यजतिपारतन्त्र्याविशेषादनयोरपि संनिहितसर्वयागानुवदनस्वरसयजत्यनुरोधेन तावन्नामत्वप्रसक्तिरपरिहार्या ; यद्युच्येत तथा सति पौर्णमासीत्यमावास्येति च विद्वद्वाक्ययोर्नामपृथक्त्वं नोपपद्यते ; अतस्तदेव परस्परव्यावृत्तनामिव्यवस्थां गमयतीति तद्व्यवस्थासिद्धये तत्तत्कालयोगिष्वेव यागेषु तयोः प्रवृत्तिः कल्पनीयेति ; एवं तर्हीयं युक्तिर्विद्वद्वाक्यद्वयेन समुदायद्वयसंपादनमनपेक्ष्य 'दर्शपूर्णमासाभ्याम्' इति शब्द एव योजयितुं शक्यते ; तत्रैव चेयं युक्तिः 'दर्शपूर्णमासयोरिज्याप्राधान्यमविशेषात्' इति चतुर्थीपान्त्याधिकरणे 'पृथक्त्वेन त्वभिधानयोर्निवेशः' इति सिद्धान्तसूत्रावयवेन केषुचिदित्यध्याहारवता दर्शिता ; तस्य ह्ययमर्थः— 'दर्शपूर्णमासाभ्याम्' इति द्विवचनश्रुत्या दर्शाभिधानस्य पूर्णमासशब्दवाच्यात् पूर्णमासशब्दस्य च दर्शाभिधानवाच्यात् पृथक्त्वेन निवेशः प्रतीयते ; अतः प्रकृतयागमात्रवाचित्वे पृथक्त्वायोगात् केषुचिदेव यागेषु निवेशो युक्त इति ; एवं तर्हि समुदायद्वयप्रसिद्ध्यर्थं विद्वद्वाक्यानुसरणेऽप्युक्तयुक्त्यन्वेषणे यथासूत्रं फलवाक्य एवेयमन्विष्यताम् ; अथोच्येत द्विवचनश्रवणं छान्दसत्वादिना नेतुं शक्यमिति, विद्वद्वाक्ययोर्नामद्वयश्रवणमपि सर्वेषां संनिहितयागानां नामद्वयाभ्युपगमेन नेतुं शक्यमिति तुल्यमिति चेत् ; उच्यते— तैत्तिरीयशाखायाम् 'य एवं विद्वान् पौर्णमासीं यजते यावदुक्थ्येनोपाप्नोति तावदुपाप्नोति य एवं विद्वानमावास्यां यजते यावदतिरात्रेणोपाप्नोति तावदुपाप्नोति' इति विद्वद्वाक्यान्नातयोः पौर्णमास्यमावास्ययोर्व्यवस्थितफलार्थवादः श्रूयते ; स तन्नाम्नोर्नामिभेदाभावे नोपपद्यत इति स्पष्टं नामिभेदः प्रतीयते ; अतो विद्वद्वाक्याभ्यां समुदायद्वयसिद्धिराश्रिता । एवं च फलवाक्ये एव समुदायद्वयसंपादनं तत्समुदायान्तर्गतानां समुदायिनां फलसंबन्धबोधनं चेति प्रतिपत्तिगौरवमपि परिहृतं भवति । तस्माद्युक्तं विद्वद्वाक्ययोः प्रयोजनकथनम् ॥

भामती ।

विद्वानमावास्यां यजते' इत्यनुवादो भवति 'यदाग्नेयः' इत्यादिविहितस्य यागषट्कस्य । अत एव च विहितानूदितस्य तस्यैव 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' इत्यधिकारसंबन्धः । तस्मात्सर्वत्र कृतिप्रणालिकया भावार्थविषय एव विधिरित्येकान्तः । तथा च 'न हन्यात्' 'न पिबेत्' इत्यादिषु यदि कार्यमभ्युपेयेत ततस्तव्यापिका कृतिरभ्युपेतव्या, तद्व्यापकश्च भावार्थो विषयः । एवं च प्रजापतिव्रतन्यायेन पर्युदासवृत्त्याहननापानसंकल्पलक्षणया तद्विषयो विधिः स्यात् । तथा च प्रसज्यप्रतिषेधो दत्तजलाञ्जलिः प्रसज्येत । न च सति संभवे लक्षणा न्याय्या । 'नेक्षेतोद्यन्तम्' इत्यादौ तु 'तस्य व्रतम्' इत्यधिकारात्प्रसज्यप्रतिषेधासंभवेन पर्युदासवृत्त्यानीक्षणसंकल्पलक्षणा युक्ता ।

कल्पतरुः ।

एवेति । अत्राप्यधिकारविधौ 'यजेत' इति दर्शनात्प्रागपि यागविधिरित्यर्थः । कृतिनिर्वर्त्यस्य धात्वर्थस्यैव नियोगावच्छेदकतेत्युपसंहरति— तस्मादिति । विधिर्नियोगः । एवं नियोगकृतिभावार्थानां व्याप्यव्यापकतामुक्त्वा व्यापकनिवृत्त्या व्याप्यनिवृत्तिं निषेधेष्वाह— तथा चेत्यादिना । निषेधेषु भावार्थापादनमिष्टप्रसङ्ग इत्याशङ्क्याभ्युपगमे बाधकमाह— एवं चेति । नामधात्वर्थयोर्योगे हि नञः पर्युदासकता । 'न हन्यात्' इत्यादौ त्वाख्यातयोगात् प्रतिषेधो भाति तत्रानीक्षणवल्लक्ष्यः पर्युदास इत्येको दोषः अपरश्च विधिनिषेधविभागलोप इत्यर्थः ॥

प्रजापतिव्रतन्यायं विभजते निषेधेषु तदभावाय— नेक्षेतेति । तत्र हि 'तस्य ब्रह्मचारिणो व्रतम्' इत्यनुष्ठेयवाचिव्रतशब्दोपक्रमादेकस्मिंश्च वाक्ये प्रक्रमाधीनत्वादुपसंहारस्याख्यातयोगिना नञा प्रतीतोऽपि प्रतिषेधोऽननुष्ठेयत्वादुपेक्ष्यते । धात्वर्थयोगेन च पर्युदासो लक्षणीयः । तथा चेक्षणविरोधिनी क्रिया सामान्येन प्राप्ता;

परिमलः ।

अविसंवादार्थमिति । उत्पत्तिवाक्येन यस्येष्टसामान्ये करणत्वं बोधितं तस्यैवाधिकारवाक्येनाकाङ्क्षितेष्टविशेषकरणत्वबोधनायामविसंवादो भवति । उत्पत्तिवाक्येन यत्र फले द्रव्यदेवतासंबन्धस्य करणत्वं बोधितं तत्रैव फले तं परित्यज्य तदाक्षिप्तस्य यागस्य करणत्वबोधने तु तयोर्विसंवादः स्यादित्यर्थः । नामधात्वर्थयोरिति । नामयोगे पर्युदासतायां तदन्यतद्विरोध्यन्यतरत्वरूपायामब्राह्मणाधर्माद्युदाहरणम् । धात्वर्थयोगे तु 'नेक्षेत' इति प्रदर्शयिष्यमाणमुदाहरणम् । नञा प्रतीतोऽपीति । प्रधानभूताख्यातान्वयिना नञा प्रतीतोऽप्याख्यातार्थस्य कर्तव्यत्वस्याभावोऽननुष्ठेयत्वात् त्यज्यत इत्यर्थः । लक्षणीय इति ।

वृत्तिः प्रयोजनं क्रियत इत्यविशिष्टमर्थवत्त्वं क्रियासाधनवस्तूपदेशेन, अपि च 'ब्राह्मणो न हन्तव्यः' इत्येवमाद्या निवृत्तिरुपदिश्यते। न च सा क्रिया। नापि क्रियासाधनम्। अक्रियार्थानामुपदेशोऽनर्थकश्चेत्,

---

भामती।

तस्मात् 'न हन्यात्' 'न पिबेत्' इत्यादिषु प्रसज्यप्रतिषेधेषु भावार्थाभावात्तद्व्याप्तायाः कृतेरभावः, तदभावे च तद्व्याप्तस्य कार्यस्याभाव इति न कार्यपरत्वनियमः सर्वत्र वाक्य इत्याह— ब्राह्मणो न हन्तव्य इत्येवमाद्या इति। ननु कस्मान्निवृत्तिरेव कार्यं न भवति, तत्साधनं वेत्यत आह— न च सा क्रियेति। क्रियाशब्दः कार्यवचनः। एतदेव विभजते— अक्रियार्थानामिति। स्यादेतत्— विधिविभक्तिश्रवणात्कार्यं तावदत्र प्रतीयते तच्च न भावार्थमन्तरेण; न च रागतः प्रवृत्तस्य हननपानादावकस्मादौदासीन्यमुपपद्यते विना विधारकप्रयत्नम्; तस्मात्स एव प्रवृत्त्युन्मुखानां मनोवाग्देहानां विधारकः प्रयत्नो

कल्पतरुः।

तद्विशेषबुभुत्सायां च सर्वक्रियाप्रत्यासन्नः संकल्प इत्यवगतम्; ईक्षे इति तु संकल्प ईक्षणपर्युदासेन नाद्रियते; ततोऽनीक्षणसंकल्पलक्षणा युक्ता; नैवं निषेधेषु संकोचकमस्तीत्यर्थः। एवं निषेधेषु भावार्थाभावमभिधाय तद्व्याप्तकृतिनियोगयोरभावमाह— तस्मादिति। तदयं प्रयोगः। विमतं न नियोगावच्छेदकम्, अभावत्वात् संमतवदिति। क्रियाशब्द इति। विभागभाष्येऽक्रियार्थानामानर्थक्याभिधानादिह क्रियाशब्दः कार्यवचनः; अकार्यार्थानां ह्यानर्थक्यं नियोगवादिनो मतं न भावार्थाविषयाणाम्, नियोगस्याप्यभावार्थत्वादिति। निषेधेषु भावार्थाभावान्न कार्यमित्युक्तम्, तत्र हेत्वसिद्धिं शङ्कते— स्यादेतदिति। विधिश्रुतिसिद्धो नियोगो विषयं भावार्थमाक्षिपतु; स एव कः? न तावद्धननादिस्तस्य रागप्राप्तेः। अनुपात्तक्रियाविधौ च लक्षणाप्रसङ्गात्। अत आह— न च रागत इति। लक्षणया हननविरोधी यत्नो विधेयः

परिमलः।

नञीक्षतिधातुभ्यामिति शेषः। सर्वक्रियेति। सर्वा हि पुरुषस्य क्रिया संकल्पपूर्विकेति तस्य तत्प्रत्यासत्तिः। ननु धातुर्लक्षकश्चेत् धात्वर्थसंकल्प एव किमिति न लक्ष्यत इत्याशङ्क्य नञा योगादित्याह— ईक्षे इतीति। संकोचकमिति। हन्यादिति प्रकृतिविशिष्टप्रत्ययान्वयस्वरसस्य नञः प्रधानं प्रत्ययं परित्यज्य प्रकृतिमात्रान्वयरूपं संकोचापादकं

'ब्राह्मणो न हन्तव्यः' इत्यादिनिवृत्त्युपदेशानामानर्थक्यं प्राप्तम्। तच्चानिष्टम्। न च स्वभावप्राप्तहन्त्यर्थानुरागेण नञः शक्यमप्राप्तक्रियार्थत्वं कल्पयितुं हननक्रियानिवृत्त्यौदासीन्यव्यतिरेकेण। नञश्चैष स्वभावः,

---

भामती।

निषेधविधिगोचरः क्रियेति नाक्रियापरमस्ति वाक्यं किंचिदपीत्याह— **न च हननक्रियानिवृत्त्यौदासीन्यव्यतिरेकेण नञः शक्यमप्राप्तक्रियार्थत्वं कल्पयितुम्।** केन हेतुना न शक्यमित्यत आह— **स्वभावप्राप्तहन्त्यर्थानुरागेण नञः।** अयमर्थः— हननपानपरो हि विधिप्रत्ययः प्रतीयमानस्ते एव विधत्ते

कल्पतरुः।

प्रयोजनलाभे च लक्षणा न दोषायेत्यर्थः। **इत्याहेति।** अस्यां शङ्कायामाहेत्यर्थः। व्यवहितान्वयेन व्याकुर्वन् भाष्यमुदाहरति— **न चेति।** भाष्ये नञ इति पदम् अनुरागेणेत्यधस्तनेनाप्राप्तक्रियार्थत्वमित्युपरितनेन च संबध्यते। स्वभावप्राप्तहन्त्यर्थानुरागेणेति नेदमनुवादस्थम्, तथा सति हि सर्वमेव भाष्यं प्रतिज्ञापरं स्यात्— स्वभावप्राप्तहन्त्यर्थानुरागेण यन्नञोऽप्राप्तक्रियार्थत्वं तन्नेति। तच्च न युक्तम्, नञश्चेत्युत्तरभाष्यस्य चशब्दयोगेन शङ्कानिरासित्वाद्धेत्वदर्शनात्। तन्मा भूदिति पृथक्कृत्य हेतुभागमाकाङ्क्षापूर्वकं योजयति— **केनेति।** किमिह विधेयं हननादि वा नञर्थो वा विधारकप्रयत्नो वेति विकल्प्य क्रमेण दूषयति— **हननेत्यादिना।** अत्र विधारकप्रयत्नविधिरेव शङ्कितः स एव च निराकर्तव्यः। इतरत्तु पक्षद्वयं परस्य शाखाचङ्क्रमनिरासार्थं दूषितम्। ननु नञर्थश्चेन्न विधीयते तर्हि हननं नास्तीत्यादाविव

परिमलः।

नास्तीत्यर्थः। **शाखाचङ्क्रमनिरासार्थमिति।** विधारकप्रयत्नविधिपक्षे स्थिरशङ्कायोग्ये लक्षणाप्रसङ्गेन दूषिते तमपहाय तर्हि न हन्यादित्यत्र श्रुतधातुनञर्थमध्य एव किंचिद्विधेयमस्त्वित्युत्तानधीः शङ्केत तन्मा भूदित्येतदर्थं तदपि पक्षद्वयं विकल्पमुखेनोद्भाव्य दूषितमित्यर्थः। ननु नञर्थविधिपक्षो विधारकप्रयत्नविधिपक्षादपि स्थिरशङ्कायोग्यः। तथा हि— न हन्यादित्यत्र नञः संनिधानात् घात्वर्थेन हननेनान्वय इति तस्य हननाभावोऽर्थः; स च प्रागभावरूपोऽनादिरपि हननचिकीर्षाध्वपनयद्वारा परिपाल्यत्वेन साध्यः; अतः स एव नियोगविषयोऽस्त्विति स्थिरैव शङ्का; न चैषा हननाभावस्य स्वतःसिद्धत्वहेतुना निराकर्तुमपि शक्या, स्वतःसिद्धस्यापि तस्य परिपाल्यत्वेन साध्य-

परिमलः ।

ताया भाष्यटीकयोरनुपदमेव वर्णयिष्यमाणत्वात्; किं च गुरुमते; 'न हन्यात्' इत्यादिनिषेधवाक्येषु हननाद्यभावो नियोगविषय इत्येव सिद्धान्तः; तन्मते हि 'प्रतिषेधेष्वकर्मत्वात्' इति षष्ठाध्यायगताधिकरणे 'न कलञ्जं भक्षयेत्' इत्यादिषु चतुर्थगतप्रजापतिव्रताधिकरणन्यायेन अभक्षणसंकल्पो विधिविषय इति पूर्वपक्षे प्राप्ते, श्रुतभक्षणाद्यभावात्मकस्यौदासीन्यस्यैव स्वतःसिद्धस्यापि प्रसक्तचिकीर्षाद्यपनयद्वारा साध्यत्वेन नियोगविषयत्वसंभवात् न लक्षणया अभक्षणादिसंकल्पस्य तथात्वमङ्गीकर्तुं युक्तमिति सिद्धान्तः; इत्थंभूतः पक्षः कथं शङ्कायोग्यत्वेनापि नेक्षितः? उच्यते— 'हन्यात्' 'भक्षयेत्' इत्यादिपदं परिपूर्णं हि नञा संबध्यते न पदैकदेशभूतं धातुमात्रम्। अतो धात्वर्थविशिष्टस्य प्रत्ययार्थस्याभावो नञा लभ्यते नोपसर्जनस्य धात्वर्थस्याभावः। एवं च नञर्थस्य प्रधानसंबन्धोऽपि भवति। गुणसंबन्धो हि 'गुणानां च परार्थत्वादसंबन्धः समत्वात् स्यात्' इति न्यायविरुद्धः। एवं च प्रत्ययार्थस्याभावे एव वाक्यार्थे स्थिते कोऽत्र विधिरस्तीति तं प्रत्यप्रतीतो हननाद्यभावो विषय इत्युपपाद्यते। यद्युच्येत व्युत्पत्त्या न्यायेन च प्राप्तोऽपि नञ आख्यातान्वयो न संभवति, रागप्राप्तहननादिविषयस्य नियोगस्याप्रसक्त्या तदभावबोधनासंभवात्; अतस्तस्य विशेष्यमतिलङ्घ्य तद्विशेषणधात्वर्थान्वय इष्यत इति। एवमपि हननाद्यभावो विषयो न लभ्यते; नामार्थान्वयिन इव धात्वर्थान्वयिनोऽपि नञः पर्युदासार्थत्वनियमेन प्रतिषेधार्थत्वासंभवात्। यथाहुः— 'नामधात्वर्थयोगे तु नैव नञ्प्रतिषेधकः। वदत्यब्राह्मणाधर्मान्यमात्रविरोधिनौ' इति। एवं च धात्वर्थान्वयेन नञः पर्युदासार्थकत्वे सति हननादिविरोधी विधारकप्रयत्नो विषयो भवेदिति तृतीयपक्ष एवान्तर्भवेत्। यथा कथंचित् नञो हननाद्यभावार्थत्वसमर्थनेऽपि तस्य साक्षात्कृतिसाध्यत्वाभावात् तदवस्थितिमुद्दिश्य कर्तव्यस्तदाक्षेप्यो विधारकप्रयत्न एव यदाग्नेयवाक्ये श्रुतद्रव्यदेवतासंबन्धाक्षेप्यो याग इव ते विधेयः स्यादिति तृतीयपक्षान्तर्भावदोषो नातिवर्तते। एवं हननाद्यभावस्य विधेयत्वासंभव आचार्यैर्नामधात्वर्थयोगे हि नञः पर्युदासतेत्युक्त्या यदाग्नेयवाक्ये श्रुतद्रव्यदेवतासंबन्धाक्षेप्यस्य यागस्येव विधिरिति समर्थनेन च सिद्धः। अतो नञर्थविधिविकल्पोऽत्र आख्यातार्थाभावविषयः पर्यवस्यतीति तस्यापुरुषतन्त्रस्य स्वतःसिद्धतया प्राप्तत्वादिति टीकायां दोष उक्तः। तत्र चौदासीन्यरूपस्येत्येतदभावरूपत्वाभिप्रायम्। यद्वा यथा पुरुषस्यानीप्सितेष्वौदासीन्यं स्वतःसिद्धम्, एवमयमपि नञर्थ इत्यौदासीन्यसादृश्याभिप्रायमिति सर्वमनवद्यम् ॥

ननु नञर्थश्चेदित्यादिना अभावश्चेत्यादिटीकावतारिकाग्रन्थेन स्वमते हनना-

भामती ।

इत्युत्सर्गः । न चैते शक्ये विधातुम्, रागतः प्राप्तत्वात् । न चात्र नञः प्रसज्यप्रतिषेधो विधेयः, तस्याप्यौदासीन्यरूपस्य सिद्धतया प्राप्तत्वात् । न च विधारकः प्रयत्नः, तस्याश्रुतत्वेन लक्ष्यमाणत्वात्, सति संभवे च लक्षणाया अन्याय्यत्वात्, विधिविभक्तेश्च रागतः प्राप्तप्रवृत्त्यनुवादकत्वेन विधिविषयत्वायोगात् । तस्माद्यत्पिबेद्धन्याद्वेत्यनूद्य तन्नेति निषिध्यते, तदभावो ज्ञाप्यते, न तु नञर्थो विधीयते । अभावश्च स्वविरोधिभावनिरूपणतया भावच्छायानुपातीति सिद्धे सिद्धवत्, साध्ये च साध्यवद्भासत इति साध्यविषयो नञर्थः साध्यवद्भासत इति नञर्थः कार्य इति भ्रमः । तदिदमाह— **नञश्चैष स्वभाव इति** । ननु बोधयतु स्वसंबन्धिनोऽभावं नञ्, प्रवृत्त्युन्मुखानां

कल्पतरुः ।

सिद्धतया प्रतीयेतेत्याशङ्क्याह— **अभावश्चेति** । रागप्राप्तकर्तव्यताकहननलक्षणप्रतियोगिगतं साध्यत्वमभावे समारोप्यत इत्यर्थः । कर्तव्यत्वाभावबोधस्य निवर्तकत्वमयुक्तं सत्यपि तस्मिन्हननगतदृष्टेष्टसाधनत्वप्रयुक्तकर्तव्यताया अनपायादित्युत्तरभाष्यस्य शङ्कामाह— **ननु बोधयत्विति** । औदासीन्यस्य प्रागभावतया कारणा-

परिमलः ।

भावमर्थमङ्गीकृत्य तथात्वे 'न हन्यात्' इत्यस्य हननं नास्तीत्यतो विशेषो न स्यादिति शङ्का तदनन्तरग्रन्थेन 'न हन्यात्' इत्यत्र प्रतियोगिनो लिङा कर्तव्यतया प्रतीतेस्तदभावेऽपि प्रतियोगिच्छायानुपातिनि कर्तव्यताभ्रमो विशेष इति परिहाराभिप्रायकथनं च न युक्तम्; न हि स्वमते 'न हन्यात्' इत्यत्र हननाभावो वाक्यार्थः किं तु हननकर्तव्यत्वाभावः; स च हननस्य बलवदनिष्टानुबन्धित्वपर्यवसायी, तथा अनुपदमेव टीकाकारैराचार्यैश्च वक्ष्यमाणत्वात्; किं तु टीकाग्रन्थ इत्थमवतारयितुं युक्तः— ननु हननाभावो न विधेयश्चेत् कथं 'न हन्यात्' इत्यत्र हननाभावः कर्तव्यतयोच्यत इति प्रतिभातीति— परिहाराभिप्रायश्चेत्थं वर्णनीयः; न हन्यादित्यव्यवधानात् नञो धात्वर्थान्वयेन हननाभावोऽर्थ इति कश्चन भ्रमः ततः प्रतियोगिच्छायानुपातिनि तस्मिन् कर्तव्यतयोच्यत इति कश्चन भ्रमः, एवं भ्रमद्वयावलम्बन एव केषांचित् हननाभावस्य विधेयत्वेन व्यवहार इति । सत्यम् । टीकाग्रन्थस्यैवमर्थः स्पष्ट इति प्रौढया अर्वान्तरमपि दर्शितम् । **कर्तव्यत्वाभावबोधस्येति** । कर्तव्यत्वविशिष्टेष्टसाधनत्वाभावबोधस्येत्यर्थः । इष्टसाधनत्वाभाव एव हि नञर्थ इति वक्ष्यते । **इष्टसाधनत्वप्रयुक्तकर्तव्यताया**

यत्स्वसंबन्धिनोऽभावं बोधयतीति। अभावबुद्धिश्चौदासीन्ये कारणम्।

भामती।

तु मनोवाग्देहानां कुतोऽकस्मान्निवृत्तिरित्यत आह— **अभावबुद्धिश्चौदासीन्य**-परिपालनकारणम्। अयमभिप्रायः— 'ज्वरितः पथ्यमश्नीयात्' 'न सर्पायाङ्गुलिं दद्यात्' इत्यादिवचनश्रवणसमनन्तरं प्रयोज्यवृद्धस्य पथ्याशने प्रवृत्तिं भुजगाङ्गुलिदानोन्मुखस्य च ततो निवृत्तिमुपलभ्य बालो व्युत्पित्सुः प्रयोज्यवृद्धस्य प्रवृत्तिनिवृत्तिहेतू इच्छाद्वेषावनुमिमीते। तथा हि— इच्छाद्वेषहेतुके वृद्धस्य प्रवृत्तिनिवृत्ती, स्वतन्त्रप्रवृत्तिनिवृत्तित्वात्, मदीयस्वतन्त्रप्रवृत्तिनिवृत्तिवत्। कर्तव्यतैकार्थसमवेतेष्टानिष्टसाधनभावावगमपूर्वकौ चास्येच्छाद्वेषौ, प्रवृत्तिनिवृत्तिहेतुभूतेच्छाद्वेषत्वात्, मत्प्रवृत्तिनिवृत्तिहेतुभूतेच्छाद्वेषवत्। न जातु मम

कल्पतरुः।

नपेक्षत्वादध्याहरति— **परिपालनेति**। निषेधेषु नञ्समभिव्याहृतविधिप्रत्ययेन प्रकृत्यर्थभूतहननादिगतक्षुद्रेष्टोपायतामनपबाध्य तद्गतगुरुतरादृष्टानिष्टोपायता ज्ञाप्यते अतो निवृत्त्युपपत्तिरिति वक्तुं लोके विधिनिषेधयोरिष्टानिष्टोपायत्वबोधकत्वं व्युत्पत्तिबलेन दर्शयति— **अयमभिप्राय इत्यादिना प्रवर्तकेषु वाक्येषु** इत्यतः प्राक्तनेन ग्रन्थेन। इन्दूदयगतहितसाधनतायां न प्रवृत्तिहेतुता; प्राक्कृतभुजगाङ्गुलिदाने च नाधुना निवृत्तिहेतुत्वम्; ततो विशिनष्टि— **कर्तव्यतेति**। कर्तव्यतया सहैकस्मिन् धात्वर्थे समवेताविष्टानिष्टसाधनभावौ तौ तथोक्तौ। फलेच्छाद्वेषयोरुक्तविधसाधनभावावगतिपूर्वकत्वाभावादनैकान्तिकत्वमाशङ्क्याह— **प्रवृत्तिनिवृत्तिहेतुभूतेति**। दृष्टान्ते साध्यविकलतामाशङ्क्याह— **न जात्विति**। शब्दादीनामपूर्वपर्यन्तानां ये प्रत्य-

परिमलः।

इति। इष्टसाधनत्वावगतिकार्यप्रवृत्तेरित्यर्थः। **शब्दादीनामिति**। विधिनिषेधात्मकः शब्द एव पुरुषस्य प्रवृत्तिं निवृत्तिं च भावयन् शब्दभावनेत्युच्यत इति लिङादियुक्तेषु वाक्येषु द्वे भावने अवगम्येते शब्दात्मिका चार्थात्मिका चेति यथाश्रुतवार्त्तिकग्रन्थानुसारी कश्चित्पक्षः। स मीमांसकैरेव 'तत्र शब्दः स्वरूपेण वायुवच्चेत्प्रवर्तकः। प्रमाणत्वं विहन्येत नियमाच्च प्रवर्तयेत्' इत्यादिन्यायैर्निराकृतः। लिङादिभिर्नञ्समभिव्याहृतलिङादिभिश्च बोधितः प्रवर्तनानिवर्तनात्मकः शब्दस्य व्यापारः शब्दभावना। लोके हि प्रैषाध्येषणादिः प्रवर्तकस्य पुरुषस्य व्यापारः 'गामानय' इत्यादिवाक्येषु प्रवृत्तिनिवृत्तिहेतुत्वेनावगतः। अपौरुषेये वेदे वक्तृपुरुषव्यापारासंभवात् शब्दस्यैव स व्यापार इत्यन्यः

भामती ।

शब्दतद्व्यापारपुरुषाशयत्रैकाल्यानवच्छिन्नभावनापूर्वप्रत्ययपूर्वाविच्छाद्वेषावभूताम् । अपि तु भूयो भूयः स्वगतमालोचयत उक्तकारणपूर्वावेव प्रत्यवभासेते । तस्माद्बुद्ध्य स्वतन्त्रप्रवृत्तिनिवृत्ती इच्छाद्वेषभेदौ च कर्तव्यतैकार्थसमवेतेष्टानिष्टसाधनभावावगमपूर्वावित्यानुपूर्व्या सिद्धः कार्यकारणभाव इतीष्टानिष्टसाधनतावगमात्प्रयोज्यवृद्धप्रवृत्तिनिवृत्ती इति सिद्धम् । स चावगमः प्रागभूतः शब्दश्रवणानन्तरमुपजायमानः शब्दश्रवणहेतुक इति प्रवर्तकेषु वाक्येषु 'यजेत' इत्यादिषु शब्द एव कर्तव्यमिष्टसाधनं व्यापारमवगमयंस्तस्येष्टसाधनतां कर्तव्यतां चावगमयति, अनन्यलभ्यत्वादुभयोः, अनन्यलभ्यस्य च शब्दार्थत्वात् ।

कल्पतरुः ।

यास्तत्पूर्वाविच्छाद्वेषौ बालस्य मा भूतां प्रत्यक्षव्यवहारे सर्वेषामभावादित्यर्थः । पचतीत्यादौ प्रतीतापि भावना न प्रवर्तिकेति त्रैकाल्यानवच्छिन्नेत्युक्तम् । **इत्यानुपूर्व्या सिद्धः कार्यकारणभाव** इत्यन्वयव्यतिरेकप्रदर्शनपरम् । **इष्टेत्यादिसिद्धमित्यन्तमिष्टानिष्टोपायतावगमस्य प्रवृत्तिनिवृत्ती प्रति हेतुत्वप्रदर्शनपरम्** इति विवेक्तव्यम् । ननु कर्तव्यतेष्टसाधनत्वविशिष्टव्यापारपरः शब्दोऽस्तु किं धर्ममात्रपरत्वेनेत आह— **अनन्यलभ्यत्वादिति** । व्यापारो लोकसिद्ध इति न शब्दार्थ इत्यर्थः ।

परिमलः ।

पक्षः । वेदस्येश्वरकर्तृकत्वात् तदभिप्राय एवाज्ञारूपः प्रवर्तको निवर्तकश्च लिङादीनां नञ्युक्तलिङादीनां चार्थ इत्युदयनादितार्किकपक्षः । त्रैकाल्यानवच्छिन्नरूपेण लिङादिनञ्युक्तलिङाद्यसाधारणार्थभूता अर्थभावनैव प्रवर्तिका निवर्तिका चेति शब्दभावनामनङ्गीकुर्वतां मीमांसकैकदेशिनां पक्षः । विधिनिषेधलिङादिबोध्यापूर्वरूपो नियोगः प्रवर्तको निवर्तकश्चेति प्राभाकरपक्षः ॥

प्रत्यक्षव्यवहारे इति । न च स्वेच्छाधीने प्रत्यक्षव्यवहारे प्रवर्तनाद्यभावेऽपि परप्रेरितव्यवहारे प्रेरयितृपुरुषप्रेरणात्मकं प्रवर्तनादिकमस्तीति शङ्कनीयम्, तत्रापि स्वेष्टानिष्टसाधनताज्ञानं विना चेतनस्य प्रवृत्तिनिवृत्त्यसंभवेन आवश्यिकस्य तस्यैव प्रवृत्तिनिवृत्तिहेतुत्वे प्रेरयितृव्यापारस्य तेनान्यथासिद्धेः । न च यागस्य स्वर्गकारणत्वनिर्वाहार्थम् अपूर्वमिव प्रेरयितृपुरुषव्यापारस्य प्रवृत्त्यादिकारणत्वनिर्वाहार्थम् इष्टसाधनतादिज्ञानं द्वारत्वेन कल्प्यते, यतस्तेनान्यथासिद्धिर्न स्यात् । क्लृप्तमेव हि तस्य स्वेच्छाधीनव्यवहारस्थले प्रवृत्त्यादिकारणत्वम् । **अन्वयव्यतिरेकेति** । टीकायां कार्यकारणभावशब्दस्तद्ग्राहकान्वयव्यतिरेकपर इति भावः । **व्यापारो लोकसिद्ध इति** ।

परिमलः ।

साध्यत्वेष्टसाधनत्वयोर्धर्मी व्यापारो ह्यत्र यागादिकः, स च यज्यादिधात्वर्थत्वेन लोकप्रसिद्ध इति यज्यादिधातुसमभिव्याहारादेव तयोर्धर्मिसंबन्धसिद्धेः न धर्म्यपि लिङादिशब्दार्थ इत्यर्थः । यद्वा कृतिसाध्यत्वेष्टसाधनत्वविशिष्टयागस्वर्गयोर्व्यापारेऽपूर्वे शक्तिरिति शङ्का । व्यवहितयोः कार्यकारणभावे द्वारापेक्षाया लोकसिद्धत्वेन आक्षेपादेव तत्सिद्धेर्नापूर्वरूपो व्यापारः शब्दार्थः । अतो न तत्र शाब्दयोः कृतिसाध्यत्वेष्टसाधनत्वयोरन्वयः, किं तु यज्यादिधात्वर्थ एवान्वयः इति भावः । ननु यदि यागादिः समभिव्याहारलभ्यत्वात् अपूर्वव्यापारो लौकिकन्यायलभ्यत्वाच्च न लिङाद्यर्थः तर्हि कर्तव्यत्वमपि तदर्थो न भवेत्, तदपि हि कृतिसाध्यत्वरूपं लोकत एवावगन्तुं शक्यं यागादिः कृत्या साधयितुं शक्यः न तु चन्द्रमण्डलहरणादिवदशक्य इति ॥

स्यादेतत् । यः स्वर्गादिफलकामादिरधिकारी तत्कृत्यैव साधनीयत्वं न लोकतः सिद्धमित्यन्यकृत्या साधितानामपि तेषामन्यफलार्थत्वं प्रसज्येत तन्मा भूदिति कर्तव्यत्वस्यापि लिङाद्यर्थानुप्रवेशः कल्प्यः; तथा सति हि समभिव्याहृतस्य स्वर्गकामादेर्यदिष्टं तत्साधनत्ववत् तत्कृतिसाध्यत्वमपि सिध्यति; न च 'यजेत' इत्यादिकर्त्रभिप्रायार्थकात्मनेपदबलात् तत्सिद्धिः स्यादिति वाच्यम्; आत्मनेपदस्यासार्वत्रिकत्वात्; 'आग्नेयमष्टाकपालं निर्वपेद्यस्कामः' इत्यादौ तदभावात्; न च तत्र 'अग्नीनादधीत' इत्याधानवाक्यगतात्मनेपदबलात्तत्सिद्धिः स्यात्, तत्र साक्षादाधानफलस्याग्निसंस्कारस्याहवनीयादिगतत्वेनाग्निसाध्यक्रतुफलानां परम्परया आधानसाध्यानां कर्तृगामित्वमपेक्ष्यैव तत्रत्यात्मनेपदस्य निर्वाह्यत्वादिति वाच्यम्, अग्निनिरपेक्षजपादिविधिश्रुतफलानां कर्तृगामित्वस्य ततो निर्वाहाभावात्, येनाधानं कृतं तस्याग्निषु तेन स्वफलकामनया क्षेत्रजपुत्रोत्पादनन्यायादन्येन यागानुष्ठापनप्रसङ्गस्यैवमप्यपरिहाराच्च ; तस्मात्फलकामकर्तव्यत्वं न लोकसिद्धमिति तल्लाभाय कर्तव्यत्वं लिङाद्यर्थ इत्यभ्युपेयम्— इति चेत्, न, कर्तव्यत्वस्य तदर्थत्वाभ्युपगमेऽपि तच्छङ्कानपायात्; यः पुत्रगतपूतत्वादिवत्पित्रादिगतं स्वर्गं कामयते सोऽपि स्वर्गकाम इति तत्कृत्या साधितस्य यागस्य पित्रादिगतस्वर्गजनकत्वशङ्का हि तथैवानुवर्तेत । यद्युच्येत— प्रवर्तको विधिः कर्तृगतफलपर्यवसायिन्येव पुरुषं प्रवर्तयतीति नियमः; पुत्रगतपूतत्वादिकमपि सत्पुत्रेण भाविफलमालोचयतः स्वगतफलपर्यवसायीति परम्परया स्वफलोपयोगि; इह 'स्वर्गकामः' इत्यादौ पूतत्वादाविव परम्पराश्रयणे प्रमाणाभावादौत्सर्गिकं साक्षात्त्वं न त्यक्तव्यमिति स्वकीयस्वर्गकामादिरेव तदर्थः; अतो नातिप्रसङ्गो भवति— इति; एवं तर्हि कर्तव्यत्वस्य लिङाद्यर्थत्वाभावेऽपि 'स्वर्गकामो यजेत' इति सामानाधिकरण्येन स्वकीयस्वर्गकामस्यैव यागकर्तृत्वप्रतीतेस्तस्य न तदर्थत्वमभ्युपगन्तव्यम्;

भामती ।

यत्र तु कर्तव्यतान्यत एव लभ्यते, यथा 'न हन्यात्' 'न पिबेत्' इत्यादिषु, हननपानप्रवृत्त्यो रागतः प्रतिलम्भात्, तत्र तदनुवादेन नञ्समभिव्याहृता लिङादिविभक्तिरन्यतोऽप्राप्तमनयोरनर्थहेतुभावमात्रमवगमयति । प्रत्यक्षं हि तयोरिष्टसाधनभावोऽवगम्यते, अन्यथा रागविषयत्वायोगात् । तस्माद्रागादिप्राप्तकर्तव्यतानुवादेनानर्थसाधनताप्रज्ञापनपरम् 'न हन्यात्' 'न पिबेत्' इत्यादिवाक्यम्, न तु कर्तव्यतापरमिति सुष्ठूक्तमकार्यनिष्टत्वं निषेधानाम् । निषेध्यानां चानर्थसाधनताबुद्धिरेव निषेध्याभावबुद्धिः । तया खल्वयं चेतन आपाततो रम-

कल्पतरुः ।

ननु हननादिषु प्रत्यक्षदृष्टेष्टसाधनत्वकर्तव्यत्वयोर्निषेद्धुमशक्यत्वात्कथमभावबुद्धिरिति भाष्यम्, अत आह— निषेध्यानां चेति । दृश्यमानमपीष्टं बह्वदृष्टानिष्टोदयावहत्वादनिष्टमित्यनर्थहेतुत्वज्ञापनपरं वाक्यम् । एवं च पर्युदासपक्षादस्य पक्षस्य न विशेष इति न शङ्क्यं श्रुतेष्टोपायत्वाभावोपपत्तयेऽनिष्टोपायत्वकल्पनात् । त्वन्मते श्रुतं परित्यज्या-

परिमलः ।

'यजेत' इत्यत्र ह्याख्यातसामान्यार्थकृत्याक्षिप्तस्तदाश्रयः कर्ता प्रतीयत एव यत्रैकवचनाद्यर्थसंख्यान्वयः; तस्मात्कर्तव्यत्वं लिङाद्यर्थ इति नाभ्युपेयमिति चेत्, सत्यम् । यद्यपि सूक्ष्मदृष्ट्या अन्यलभ्यमपि कर्तव्यत्वं प्रवर्तकज्ञानविषयत्वात् प्रवृत्तिप्रयोजनस्य लिङादेरर्थोऽभ्युपेयते तथापि कर्तव्यत्वेष्टसाधनत्वयोर्धर्मी यागादिस्तदर्थो नाभ्युपेयः, धातुसमभिव्याहारादेव तयोस्ताद्धर्म्यसिद्धेः स्पष्टत्वादित्यत्र तात्पर्यम् ॥

श्रुतेष्टोपायत्वाभावोपपत्तये इति । नन्विष्टसाधनत्वाभावः श्रुत इत्ययुक्तम्, तस्य 'न हन्यात्' इत्येतदर्थत्वाभावात्, सांदृष्टिकेष्टोपायत्वे विद्यमाने तदभावस्य बाधितत्वात्; हननेष्टसाधनतामनपबाध्य तद्गतगुरुतरादृष्टानिष्टोपायता ज्ञाप्यत इति पूर्ववाक्ये तदबाधनस्योक्तत्वाच्च; एवं च श्रुतेष्टसाधनत्वाभावोपपत्तये गुरुतरानिष्टसाधनत्वं कल्प्यत इत्यप्ययुक्तम्, गुरुतरानिष्टसाधनत्वे कल्पितेऽपि सांदृष्टिकेष्टोपायत्वस्य प्रत्यक्षसिद्धस्यापनेतुमशक्यत्वेन तदभावोपपादनायोगादिति चेत्, उच्यते— गुरुतरानिष्टसाधनत्वे कल्पिते तत्प्रतिसंधानेन सांदृष्टिकफलादिच्छा निवर्तेत तन्निवृत्तौ च तस्येष्टत्वं नास्तीति इष्टसाधनत्वाभावस्य 'न हन्यात्' इत्येतदर्थतायां न काचिदनुपपत्तिः । गुरुतरानिष्टसाधनत्वकल्पनायाश्च न तदुपपादकत्वासंभवः, पूर्ववाक्ये तात्कालिकक्षुद्रेष्टसाधनत्वानपबाधनोक्तिस्तु तात्कालिकफलत्वाभिमतसाधनत्वयोग्यतायाः स्वरूपतो बाधनाभावपरा न तु तस्य फलस्येच्छा-

भामती ।

णीयतां पश्यन्नप्यायतिमालोच्य प्रवृत्त्यभावं निवृत्तिमवबुध्य निवर्तते । औदासीन्यमात्मनोऽवस्थापयतीति यावत् । स्यादेतत् । अभावबुद्धिश्चेदौदासीन्यस्थापनकारणं यावदौदासीन्यमनुवर्तेत ; न चानुवर्तते ; न ह्युदासीनोऽपि विषयान्तरव्यासक्तचित्तस्तदभावबुद्धिमान् ; न चावस्थापककारणाभावे कार्यावस्थानं दृष्टम् ;

कल्पतरुः ।

श्रुतविधारकप्रयत्नविधिकल्पनादिति । आयतिर्भाविफलम् । प्रवृत्त्यभावमित्यस्य व्याख्या— निवृत्तिमिति । उद्यमक्रियाया मयोपरन्तव्यमिति बुद्ध्या निवर्तते, न तु प्रवृत्तिप्रागभावमात्रमित्यर्थः । यथोक्ताभावबुद्धेरौदासीन्यस्थापकत्वेऽपि क्षणिकत्वात्तद्ध्वंसे हननोद्यमः स्याच्छश्वत्तत्संततौ च विषयान्तरज्ञानानुदयप्रसङ्ग इति शङ्कते— स्यादेतदिति ।

परिमलः ।

विषयत्वबाधनाभावपरापीति न विरोधः । ननु आस्तिककामुकस्य रागान्धस्य सत्यपि भाविनरकदुःखावश्यंभावावगमे तात्कालिकफलेच्छा नापैतीति तं प्रतीष्टसाधनत्वाभावबोधकस्य निषेधवाक्यस्याप्रामाण्यं स्यात् ; सर्वान्प्रति प्रमाणभूतस्य च वेदवाक्यस्य पुरुषभेदेन प्रामाण्याप्रामाण्यवैलक्षण्यं न युक्तमिति चेत्, यद्येवमत्रापरितोषः तदैवमुपपादनीयम्— इष्टोपायत्वमात्रं न लिङाद्यर्थः किं तु बलवदनिष्टाननुबन्धित्वविशेषितम् ; तथा च निषेधवाक्यैर्विशिष्टाभावबोधने नास्ति बाधः । विशेष्यवति विशिष्टाभावो विशेषणाभावेनोपपादनीय इति तदुपपादनार्थं विशेषणाभावात्मकबलवदनिष्टानुबन्धित्वकल्पनेति श्रुतेष्टसाधनत्वाभावोपपत्तये इत्यादिग्रन्थस्य तात्पर्यम् । सत्यपि तात्कालिकेष्टात् वस्तुतो भाविनरकानिष्टस्याधिक्ये रागान्धस्य तात्कालिकसुखमेव ततोऽधिकमिति मोहान्निषिद्धाचरणं निषेधवाक्यप्रामाण्यं चोपपद्यते । ग्रन्थे गुरुतराद्दृष्टानिष्टसाधनत्वकल्पनोक्तिः निन्दार्थवादरहितेषु निषेधवाक्येषु । निन्दार्थवादसत्त्वे तु तत एव तल्लाभः । हननादिषु निषेध्येषु तात्कालिकेष्टापेक्षया भाव्यनिष्टस्य गुरुतरत्ववचनं निन्दार्थवादः यागादिषु विधेयेषु तात्कालिकक्लेशापेक्षया भाविन इष्टस्य गुरुतरत्ववचनं स्तुत्यर्थवाद इति हि वृद्धाः । न च यागादीनां विधेयानां लिङादिना बलवदनिष्टाननुबन्धित्वबोधने स्तुत्यर्थवादवैयर्थ्यमिति शङ्कनीयम्, तद्बोधनेऽपि इष्टानिष्टयोः साम्येन तुल्यायव्ययत्वशङ्कापरिहारेण स्तुत्यर्थवादसाफल्यादित्येषा दिक् ॥

ननु निवृत्तिशब्देन प्रवृत्त्यभावः केन प्रकारेण व्याख्यातो भवतीत्याकाङ्क्षायां तेन लभ्यं विशेषमाह— उद्यमक्रियाया इति । प्रवृत्त्यभावमवबुद्धयेत्येतावता अनादिसिद्धप्रवृत्तिप्रागभावबोधमात्रमुक्तं स्यात् । न तद्बोधमात्रान्निवर्तते किं तु खङ्गोद्यमना-

सा च दग्धेन्धनाग्निवत्स्वयमेवोपशाम्यति। तस्मात्प्रसक्तक्रियानिवृत्त्यौदासीन्यमेव 'ब्राह्मणो न हन्तव्यः' इत्यादिषु प्रतिषेधार्थं मन्यामहे,

---

भामती।

न हि स्तम्भावपाते प्रासादोऽवतिष्ठतेऽत आह— **सा च दग्धेन्धनाग्निवत्स्वयमेवोपशाम्यति**। तावदेव खल्वयं प्रवृत्त्युन्मुखो न यावदस्यानर्थहेतुभावमधिगच्छति। अनर्थहेतुत्वाधिगमोऽस्य समूलोद्धारं प्रवृत्तिमुद्धृत्य दग्धेन्धनाग्निवत्स्वयमेवोपशाम्यति। एतदुक्तं भवति— यथा प्रासादावस्थानकारणं स्तम्भो नैवमौदासीन्यावस्थानकारणमभावबुद्धिः, अपि त्वागन्तुकाद्विनाशहेतोस्त्राणेनावस्थानकारणम्। यथा कमठपृष्ठनिष्ठुरः कवचः शस्त्रप्रहारत्राणेन राजन्यजीवावस्थानहेतुः। न च कवचापगमे चासति च शस्त्रप्रहारे राजन्यजीवनाश इति। उपसंहरति— **तस्मात्प्रसक्तक्रियानिवृत्त्यौदासीन्यमेवेति**। औदासीन्यम-

कल्पतरुः।

यथाग्निः पुनर्ज्वालोपजननिदानमिन्धनं दहन्नुपशान्तोऽपि भवति भाविनीनां ज्वालानामुदयविरोधी एवमभावबुद्धिः क्षणिकतया स्वयमेव उपशाम्यन्त्यपि हननाद्यहितोपायतानवबोधं दग्ध्वा तन्निदाना उपरितनीः प्रवृत्तीर्निरुणद्धीति। भाष्यार्थमाह— **तावदेवेति**। न ह्यभावबुद्धिरौदासीन्यस्थानादिनः स्थापनकारणं येन तदभावे कारणाभावादिदं न भवेदपि त्वपवादनिरासिकेत्याह— **एतदुक्तमिति**। अनादित्वादौत्सर्गिकमौदासीन्यं तत्रापवादनिवर्तकासंनिधावप्यौत्सर्गिकस्थेम्नि दृष्टान्तमाह— **यथेति**। कमठः कूर्मः। यदौदासीन्यं तत्प्रागभावरूपत्वादुक्तमपि न निवृत्तिहेतुः; ततः कर्तव्यत्वेन प्रसक्तक्रियाप्रतियोगिकनिवृत्तिरूपेण विशिष्टं निवृत्त्युपयोगि यद्धन्यात्तन्नेति; प्रसक्तक्रियानिवृत्तिरूपता चौदासीन्यस्य न सर्वदा, सर्वदा क्रियाप्रसङ्गाभावात्। अतः काकवदुपलक्षणम्। तादृश्या निवृत्त्योपलक्ष्यौदासीन्यं विशिनष्टि भाष्यकार इत्याह— **औदासीन्यमिति**। ननु केयं प्रसक्तक्रियानिवृत्तिः? न तावद्धननादिप्रागभावः, अनादित्वादेव तद्बोधनस्यानुपयोगात्। नापि तद्ध्वंसः, प्रसक्तक्रियाया अनुदयेन ध्वंसायोगात्।

परिमलः।

दिरूपा या हननोद्यमक्रिया तस्या उपरन्तव्यमिति कर्तव्यत्वेनानुसंधीयमाना या खड्गादिपरावर्तनक्रिया तदुपलक्षितत्वेन निवृत्तिरूपापन्नं प्रवृत्त्यभावमवबुध्य निवर्तते निवृत्तिरूपापन्नप्रवृत्त्यभाववान्भवतीत्यर्थः। **यद्धन्यात्तन्नेतीति**। इदं वाक्यं प्रसक्तक्रियानिवृत्तिप्रतिपादकतया नोपात्तम्, खड्गादिपरावर्तनरूपतया वक्ष्यमाणायाः प्रसक्तक्रियानिवृत्तेर्न

अन्यत्र प्रजापतिव्रतादिभ्यः। तस्मात्पुरुषार्थानुपयोग्युपाख्यानादिभूतार्थवादविषयमानर्थक्याभिधानं द्रष्टव्यम्॥

यदप्युक्तम्— कर्तव्यविध्यनुप्रवेशमन्तरेण वस्तुमात्रमुच्यमानमनर्थकं स्यात् 'सप्तद्वीपा वसुमती' इत्यादिवदिति, तत्परिहृतम्; 'रज्जुरियम्, नायं सर्पः' इति वस्तुमात्रकथनेऽपि प्रयोजनस्य दृष्टत्वात्। ननु

भामती।

जानतोऽप्यस्तीति प्रसक्तक्रियानिवृत्त्योपलक्ष्य विशिनष्टि। तत्किमक्रियार्थत्वेनानर्थक्यमाशङ्क्य क्रियार्थत्वोपवर्णनं जैमिनीयमसमञ्जसमेवेत्युपसंहारव्याजेन परिहरति— **तस्मात्पुरुषार्थेति**। पुरुषार्थानुपयोग्युपाख्यानादिविषयावक्रियार्थतया क्रियार्थतया च पूर्वोत्तरपक्षौ, न तूपनिषद्विषयौ, उपनिषदां स्वयं पुरुषार्थरूपब्रह्मावगमपर्यवसानादित्यर्थः। यदप्यौपनिषदात्मज्ञानमपुरुषार्थं मन्यमानेनोक्तम्— **कर्तव्यविध्यनुप्रवेशमन्तरेणेति**। अत्र निगूढाभिसंधिः पूर्वोक्तं परिहारं स्मारयति— **तत्परिहृतमिति**। अत्राक्षेप्ता स्वोक्तमर्थं स्मारयति— **ननु श्रुत-**

कल्पतरुः।

उच्यते— हननोद्यतखड्गादेः परावर्तनमुच्यते। निवृत्तिरिति तस्मिन्हि हननं न भविष्यति॥ एषा च निवृत्तिः नञर्थबोधफलं नञर्थस्तु हननगतेष्टसाधनत्वाभाव एवेति। भाष्ये जैमिनीयमानर्थक्याभिधानं क्रियासंनिधिस्थार्थवादादिविषयमित्युक्तम्; तत् आम्नायस्य क्रियार्थत्वादिति हेतोस्तद्बलेनाक्रियार्थानामप्रामाण्यपूर्वपक्षस्य विध्येकवाक्यत्वेन प्रामाण्यमिति सिद्धान्तस्य च तद्विषयत्वोपलक्षणार्थमित्याह— **पुरुषार्थानुपयोगीति**। स्वयं पुमर्थब्रह्मावगमपरत्वमुपनिषदामसिद्धमित्याशङ्क्य भाष्यव्याख्यया परिहरति— **यदपीत्यादिना**। नावगतब्रह्मात्मभावस्येति भाष्ये अवगतिशब्दाभि-

परिमलः।

हन्यादित्येतदर्थत्वाभावात्। किं तु निवृत्तिरूपखड्गादिपरावर्त्यताबुद्धिः केन भवतीत्याकाङ्क्षायाम् 'न हन्यात्' इत्येतदर्थभूतानिष्टसाधनत्वज्ञानेन भवतीत्येतदर्थप्रतिपादकतयोपात्तम्। **एषा चेति**। 'न हन्यात्' इत्यनेन हननगतबलवदनिष्टाननुबन्धित्वविशिष्टेष्टसाधनत्वाभावावगतिः, ततो बलवदनिष्टानुबन्धित्वकल्पनम्, तेनोद्यतं खड्गादिकं परावर्तनीयमिति बुद्धिः, ततस्तत्परावर्तनवैशिष्ट्येन लब्धपरिपालनतया निवृत्तिरूपापन्नौदासीन्यप्राप्तिरिति क्रमः॥

श्रुतब्रह्मणोऽपि यथापूर्वं संसारित्वदर्शनान्न रज्जुस्वरूपकथनवदर्थवत्त्वमित्युक्तम्; अत्रोच्यते—नावगतब्रह्मात्मभावस्य यथापूर्वं संसारित्वं शक्यं दर्शयितुम्, वेदप्रमाणजनितब्रह्मात्मभावविरोधात्। न हि शरीराद्यात्माभिमानिनो दुःखभयादिमत्त्वं दृष्टमिति, तस्यैव वेदप्रमाणजनितब्रह्मात्मावगमे तदभिमाननिवृत्तौ तदेव मिथ्याज्ञाननिमित्तं दुःखभयादिमत्त्वं भवतीति शक्यं कल्पयितुम्। न हि धनिनो गृहस्थस्य धनाभिमानिनो धनापहारनिमित्तं दुःखं दृष्टमिति, तस्यैव प्रव्रजितस्य धनाभिमानरहितस्य तदेव धनापहारनिमित्तं दुःखं भवति। न च कुण्डलिनः कुण्डलित्वाभिमाननिमित्तं सुखं दृष्टमिति तस्यैव कुण्डलाद्वियुक्तस्य कुण्डलित्वाभिमानरहितस्य तदेव कुण्डलित्वाभिमाननिमित्तं सुखं भवति। तदुक्तं श्रुत्या—'अशरीरं वा व सन्तं न प्रियाप्रिये स्पृशतः' इति। शरीरे पति-

---

भामती।

ब्रह्मणोऽपीति। निगूढमभिसंधिं समाधातोद्घाटयति— अत्रोच्यते— नावगतब्रह्मात्मभावस्येति। सत्यं न ब्रह्मज्ञानमात्रं सांसारिकधर्मनिवृत्तिकारणम्, अपि तु साक्षात्कारपर्यन्तम्। ब्रह्मसाक्षात्कारश्चान्तःकरणवृत्तिभेदः श्रवणमननादिजनितसंस्कारसचिवमनोजन्मा षड्जादिभेदसाक्षात्कार इव गान्धर्वशास्त्रश्रवणाभ्याससंस्कृतमनोयोनिः। स च निखिलप्रपञ्चमहेन्द्रजालसाक्षात्कारं समूलमुन्मूलयन्नात्मानमपि प्रपञ्चत्वाविशेषादुन्मूलयतीत्युपपादितमधस्तात्। तस्माद्रज्जुस्वरूपकथनतुल्यतैवात्रेति सिद्धम्। अत्र च वेदप्रमाणमूलतया वेदप्रमाणजनितेत्युक्तम्। अत्रैव सुखदुःखानुत्पादभेदेन निदर्शनद्वयमाह— न हि धनिन इति। श्रुतिमत्रोदाहरति— तदुक्तमिति। चोदयति— शरीरे पतिते

कल्पतरुः।

प्रायमाह— सत्यमिति। साक्षात्कारस्य स्वरूपत्वान्न निवर्तकतेति तत्राह— ब्रह्मसाक्षात्कारश्चेति। आत्मानमपि स्वं साक्षात्कारमपि इति। श्रवणादिसंस्कृतमनोजन्यश्चेत्साक्षात्कारः कथं तर्हि वेदप्रमाणजनितेति भाष्यम्? अत आह— अत्र चेति। अशरीरत्वं देहपातोत्तरकालमिति शङ्कायां सशरीरत्वस्य निमित्तवर्णनमयुक्तमित्या-

तेऽशरीरत्वं स्यात्, न जीवत इति चेत्, न; सशरीरत्वस्य मिथ्याज्ञाननिमित्तत्वात्। न ह्यात्मनः शरीरात्माभिमानलक्षणं मिथ्याज्ञानं मुक्त्वा अन्यतः सशरीरत्वं शक्यं कल्पयितुम्। नित्यमशरीरत्वमकर्मनिमित्तत्वादित्यवोचाम। तत्कृतधर्माधर्मनिमित्तं सशरीरत्वमिति चेत्, न; शरीरसंबन्धस्यासिद्धत्वात् धर्माधर्मयोरात्मकृतत्वा-

---

भामती।

इति। परिहरति— न; सशरीरत्वस्येति। यदि वास्तवं सशरीरत्वं भवेन्न जीवतस्तन्निवर्तेत। मिथ्याज्ञाननिमित्तं तु तत्। तच्चोत्पन्नतत्त्वज्ञानेन जीवतापि शक्यं निवर्तयितुम्। यत्पुनरशरीरत्वं तदस्य स्वभाव इति न शक्यं निवर्तयितुम्, स्वभावहानेन भावविनाशप्रसङ्गादित्याह— नित्यमशरीरत्वमिति। स्यादेतत्। न मिथ्याज्ञाननिमित्तं सशरीरत्वम् अपि तु धर्माधर्मनिमित्तम्, तच्च स्वकारणधर्माधर्मनिवृत्तिमन्तरेण न निवर्तते, तन्निवृत्तौ च प्रायणमेवेति न जीवतोऽशरीरत्वमिति शङ्कते— तत्कृतेति। तदित्यात्मानं परामृशति। निराकरोति— न, शरीरसंबन्धस्येति। न तावदात्मा साक्षाद्धर्माधर्मौ कर्तुमर्हति, वाग्बुद्धिशरीरारम्भजनितौ हि तौ नासति शरीरसंबन्धे भवतः, ताभ्यां तु शरीरसंबन्धं

कल्पतरुः।

शङ्कयाह— यदीति। यदि सशरीरत्वं मिथ्यात्वाज्जीवत एव ज्ञानेन निवर्त्यं तर्ह्यशरीरत्वमप्यभावत्वात्तथेत्याशङ्क्य, न, तत्त्वतः शरीरसंबन्धाभावोपलक्षितस्य तथात्वादित्याह— यत्पुनरिति। भाष्ये तच्छब्देन न ह्यात्मन इति प्रस्तुतात्मपरामर्श इत्याह— तदितीति। शरीरसंबन्धस्येत्यादि असिद्धेरित्यन्तं भाष्यं व्याचष्टे— न तावदिति। शरीरसंबन्धस्य धर्माधर्मयोरित्यादि प्रसङ्गादित्यन्तं भाष्यं विवृणोति— ताभ्यां त्विति। आत्मनि स्वतोऽसिद्धाभ्यां धर्माधर्माभ्यां जन्यशरीरसंबन्धं प्रति प्रीयमाणो वादी सिद्धे शरीरसंबन्धे धर्मादिसंबन्धः तत्सिद्धौ शरीरादिसंबन्ध इति परस्पराश्रयं स्वपक्षे प्रापयतीत्यर्थः। धर्माधर्मव्यक्त्योः शरीरसंबन्ध-

परिमलः।

अभावत्वात्तथेति। अभावो हि ब्रह्मस्वरूपे नान्तर्भवति। अतः प्रपञ्चान्तःपातित्वान्मिथ्येत्यर्थः। तथात्वात् अशरीरत्वरूपत्वात्। अनादित्वादिति सत्का-

सिद्धेः, शरीरसंबन्धस्य धर्माधर्मयोस्तत्कृतत्वस्य चेतरेतराश्रयत्वप्रसङ्गात्; अन्धपरम्परैषा अनादित्वकल्पना, क्रियासमवायाभावाच्चात्मनः कर्तृत्वानुपपत्तेः। संनिधानमात्रेण राजप्रभृतीनां दृष्टं कर्तृत्वमिति चेत्, न; धनदानाद्युपार्जितभृत्यसंबन्धित्वात्तेषां कर्तृत्वोपपत्तेः;

भामती।

रोचयमानो व्यक्तं परस्पराश्रयत्वं दोषमावहति। तदिदमाह– **शरीरसंबन्धस्येति**। यद्युच्येत सत्यमस्ति परस्पराश्रयत्वम्, न त्वेष दोषोऽनादित्वाद्बीजाङ्कुरवदित्यत आह– **अन्धपरम्परैषानादित्वकल्पना**। यस्तु मन्यते नेयमन्धपरम्परातुल्यानादिता। न हि यतो धर्माधर्मभेदात्र आत्मशरीरसंबन्धभेदस्तत एव शरीरसंबन्धात् स धर्माधर्मभेदः किं त्वेष पूर्वस्मादात्मशरीरसंबन्धात्पूर्वधर्माधर्मभेदजन्मनः, एष त्वात्मशरीरसंबन्धोऽन्यस्माद्धर्माधर्मभेदादिति, तं प्रत्याह– **क्रियासमवायाभावादिति**। शङ्कते— **संनिधानमात्रेणेति**। परिहरति— **नेति**।

कल्पतरुः।

व्यक्तेश्चेतरेतरहेतुकत्वे यद्यपीतरेतराश्रयत्वम्, तथापि न दोषोऽनादित्वादिति सत्कार्यवादी शङ्कते– **यद्युच्येतेति**। तत्र नित्यसत्योर्व्यक्त्योर्न हेतुहेतुमत्ता, अभिव्यक्त्योस्तु कादाचित्क्योरितरेतराधीनत्वे एकस्या अप्यसिद्धेरन्धपरम्परातुल्या अनादित्वकल्पना स्यादित्याह– **अन्धपरम्परेति**। असत्कार्यवादी व्यक्तिभेदेनेतरेतराश्रयं परिहरतीत्याह– **यस्त्विति**। **किं त्वेष इति**। इदानींतनशरीरसंबन्धहेतुरित्यर्थः। पूर्व **एवात्मशरीरसंबन्धो** विशेष्यते— **पूर्वधर्माधर्मभेदजन्मन इति**। पूर्वाभ्यां धर्माधर्मविशेषाभ्यां जन्म यस्य तथोक्तः। **एष त्विति**। वर्तमान इत्यर्थः। आत्मन्यध्यासप्रस्तावोक्तयुक्तिभिर्नैकोऽपि क्रियासंबन्धः कथमनन्तव्यक्तिसंभव इति परिहरति इत्याह— **तं प्रत्याहेति**। देहात्मसंबन्धहेतुर्मिथ्याभिमानः प्रत्यक्ष इत्युक्तम्। तदाक्षिप्य समा-

परिमलः।

र्यवादी शङ्कत इति। उभयोः सादित्वे खलु परस्परहेतुहेतुमद्भावाधीनः परस्पराश्रयः प्रसज्यते। उभयोरनादित्वे तदभावात् न परस्पराश्रयप्रसक्तिरित्यर्थः। टीकायां यस्तु मन्यत इत्यग्रिमग्रन्थेनासत्कार्यवादमवलम्ब्य प्रवाहानादित्वशङ्कायाः करिष्यमाणत्वात् इयं शङ्का सत्कार्यवादालम्बना स्वरूपानादित्वविषया योजिता। **अन्धपरम्परेति**। स्वरूपनित्यत्वपक्षेऽपि अभिव्यक्त्योरनित्ययोः परस्परहेतुहेतुमद्भावेन तत्कृतपरस्पराश्रया-

न त्वात्मनो धनदानादिवच्छरीरादिभिः स्वस्वामिभावसंबन्धनिमित्तं किंचिच्छक्यं कल्पयितुम्। मिथ्याभिमानस्तु प्रत्यक्षः संबन्धहेतुः। एतेन यजमानत्वमात्मनो व्याख्यातम्। अत्राहुः— देहादिव्यतिरिक्तस्यात्मनः आत्मीये देहादावहमभिमानो गौणः, न मिथ्येति चेत्, न; प्रसिद्धवस्तुभेदस्य गौणत्वमुख्यत्वप्रसिद्धेः। यस्य हि प्रसिद्धो वस्तुभेदः— यथा केसरादिमानाकृतिविशेषोऽन्वयव्यतिरेकाभ्यां सिंहशब्दप्रत्ययभाङ्मुख्योऽन्यः सिद्धः, ततश्चान्यः पुरुषः प्रायिकैः क्रौर्यशौर्यादिभिः सिंहगुणैः संपन्नः सिद्धः, तस्य तस्मिन्पुरुषे सिंहशब्दप्रत्ययौ गौणौ भवतः; नाप्रसिद्धवस्तुभेदस्य। तस्य त्वन्यत्रान्यशब्दप्रत्ययौ भ्रान्तिनिमित्तावेव भवतः, न गौणौ; यथा मन्दान्धकारे स्थाणुरयमित्यगृह्यमाणविशेषे

भामती।

उपार्जनं स्वीकरणम्। न त्वियं विधात्मनीत्याह— **न त्वात्मन इति**। ये तु देहादावात्माभिमानो न मिथ्या अपि तु गौणः माणवकादाविव सिंहाभिमान इति मन्यन्ते, तन्मतमुपन्यस्य दूषयति— **अत्राहुरिति**। प्रसिद्धो वस्तुभेदो यस्य पुरुषस्य स तथोक्तः। उपपादितं चैतदस्माभिरध्यासभाष्य इति नेहोपपाद्यते। **यथा मन्दान्धकारे स्थाणुरयमित्यगृह्यमाणविशेषे** वस्तुनि पुरुषात्सांशयिकौ **पुरुषशब्दप्रत्ययौ स्थाणुविषयौ**, तत्र हि पुरुषत्वमनियतमपि समारोपितमेव।

कल्पतरुः।

धत्ते— **ये त्विति**। अप्रसिद्धवस्तुभेदस्यान्यत्रान्यशब्दप्रत्ययौ भ्रान्तिनिमित्ताविति प्रतिज्ञाय संशयनिमित्तशब्दप्रत्ययोदाहरणं भाष्येऽनुपपन्नमित्याशङ्क्य भ्रान्तिशब्देन समारोप उक्तः; अस्ति च संशयस्यापि समारोपत्वमित्याह— **तत्र हि पुरुषत्व-**

परिमलः।

नपायात् उत्पत्तिस्थानीयां कादाचित्कीमभिव्यक्तिमङ्गीकृत्यापि स्वरूपनित्यत्वकल्पनेयमन्धपरम्पराप्राप्तपटशौक्ल्योपदेशवदप्रामाणिकीत्यर्थः। **संशयनिमित्तेति**। संशयशब्देन विशेषादर्शनादिसंशयकारणकलापो विवक्षितः, संशयस्य प्रत्ययशब्देन तत्कार्यतया ग्रहणात्। संशयशब्दस्य मुख्यार्थत्वे तु संशयमूलकशब्दप्रयोगजन्यप्रत्ययान्तरपरः

पुरुषशब्दप्रत्ययौ स्थाणुविषयौ, यथा वा शुक्तिकायामकस्माद्रजतमिदमिति

भामती ।

एवं संशये समारोपितमनिश्चितमुदाहृत्य विपर्ययज्ञाने निश्चितमुदाहरति— **यथा वा शुक्तिकायामिति । शुक्लभास्वरस्य द्रव्यस्य पुरःस्थितस्य सति शुक्तिकारजतसाधारण्ये यावदत्र रजतविनिश्चयो भवति तावत्कस्माच्छुक्तिविनिश्चय एव न भवति, संशयो वा; द्वेधा युक्तः, समानधर्मधर्मिणो दर्शनात् उपलब्ध्यनुपलब्ध्यव्यवस्थातः; विशेषद्वयस्मृतेश्च, संस्कारोन्मेषहेतोः सादृश्यस्य द्विष्ठत्वें-**

कल्पतरुः ।

मिति । भ्रान्तेरप्युपचितनिमित्तापेक्षणादकस्मादित्ययुक्तमित्याशङ्क्याह— **शुक्लभास्वरस्येति** । साधारणधर्मिणि दृष्टे किं तन्मात्रं विपर्ययकारणम, उत सादृश्यादिदोषमिलितम्? नाद्यः, धवलभास्वररूपस्य शुक्तिरजतसाधारण्ये सति व्यवहितरजतनिश्चयात् प्रागेव संनिहितशुक्तिनिश्चयप्रसङ्गात्, इत्यभिधाय द्वितीयं दूषयति— **संशयो वेति** । समानो धर्मो यस्य स तथोक्तः । दृष्टेऽपि साधारणे धर्मिणि निश्चयः स्याद्यद्यन्यतरकोटिनिर्णायकं प्रमाणं स्यात् स्थाणुत्व इव शाखादिदर्शनम्; बाधकं वा प्रमाणं कोट्यन्तरे उपलभ्येत यथा तत्रैव पुरुषत्वविपरीतनिश्चेष्टत्वादि; नैवमिहेत्याह— **उपलब्धीति** । उपलब्धिः साधकं प्रमाणम् अनुपलब्धिर्बाधकं तयोरभावोऽत्राव्यवस्था । ततः संशयो वा युक्त इत्यधस्तनेनान्वयः । ननु विशेषद्वयस्मृतौ संशयः इह तु रजतमेव स्मृतमिति विपर्यय एवेति तत्राह— **विशेषद्वयेति** । अत्र हेतुमाह— **संस्कारेति** । इतिशब्दो हेतौ; उद्बुद्धः संस्कारो हि स्मृतिहेतुस्तदुद्बोधहेतुश्च सादृश्यम्; तस्य द्विष्ठत्वेन शुक्तिरजतोभयनिष्ठत्वेन हेतुनोभयत्रैतत्सादृश्यं तुल्यमिति यतोऽतः संशय एव युक्तः । न च रागाद्विपर्ययः,

परिमलः ।

प्रत्ययशब्दो योज्यः । **उपचितनिमित्तापेक्षणादिति** । करणदोषादिबहुनिमित्तापेक्षणादित्यर्थः । **साधारणधर्मिणि दृष्टे इति** । धवलभास्वरवर्णरूपसादृश्याविशिष्टे धर्मिणि **दृष्टे** किं सादृश्यविशिष्टधर्मिज्ञानमात्रं विपर्ययकारणम् उत सादृश्येनैव **अन्यैश्च दोषैर्मिलितमित्यर्थः** । **द्वितीयं दूषयतीति** । सादृश्यवद्दोषस्यापि प्रवेशितत्वात् यद्यपि शुक्तिप्रमा न भवति दोषस्य प्रमाप्रतिबन्धकत्वात्, तथापि संशयः किं न स्यात् तस्यापि भ्रान्तिवद्दोषजन्यत्वादिति दूषयतीत्यर्थः । **समानधर्मधर्मिण इति** विशेषणं व्याचष्टे— **समानो धर्मो यस्येति । न च रागादिति** । रागः संशयव्यावृत्तो भ्रान्ये-

निश्चितौ शब्दप्रत्ययौ, तद्वद्देहादिसंघाते अहम् इति निरुपचारेण शब्दप्रत्ययावात्मानात्माविवेकेनोत्पद्यमानौ कथं गौणौ शक्यौ वदितुम्? आत्मानात्मविवेकिनामपि पण्डितानामजाविपालानामिवाविविक्तौ शब्दप्रत्ययौ भवतः। तस्माद्देहादिव्यतिरिक्तात्मास्तित्ववादिनां देहादावहंप्रत्ययो मिथ्यैव, न गौणः। तस्मान्मिथ्याप्रत्ययनिमित्तत्वात्सशरीरत्वस्य सिद्धं जीवतोऽपि विदुषोऽशरीरत्वम्। तथा च ब्रह्मविद्विषया श्रुतिः—

भामती।

नोभयत्र तुल्यमेतदिति; अत उक्तम्—अकस्मादिति। अनेन दृष्टस्य हेतोः समानत्वेऽप्यदृष्टं हेतुरुक्तम्। तच्च कार्यदर्शनोन्नेयत्वेनासाधारणमिति भावः। आत्मानात्मविवेकिनामिति। श्रवणमननकुशलतामात्रेण पण्डितानाम्; अनुत्पन्नतत्त्वसाक्षात्काराणामिति यावत्। तदुक्तम्— 'पश्वादिभिश्चाविशेषात्' इति। शेषमतिरोहितार्थम्। जीवतो विदुषोऽशरीरत्वे च श्रुतिस्मृती उदाहरति—

कल्पतरुः।

विरक्तस्यापि शुक्तौ रजतभ्रमादिति। एषात्र संशयसामग्रयक्षपादैः वर्णिता 'समानानेकधर्मोपपत्तेर्विप्रतिपत्तेरुपलब्ध्यनुपलब्ध्यव्यवस्थातश्च विशेषापेक्षो विमर्शः संशयः' इति। समानः साधारणधर्मः। अनेकस्माद्व्यावृत्तोऽसाधारणोऽनेकधर्मः। एवमिहापि विपर्ययनियामकं दृष्टं नास्तीत्युपपाद्याकस्माच्छब्द एवमभिप्राय इत्याह— अत इति। कथं तर्हि दृश्यमानविपर्ययनियमः? तत्राह— अनेनेति। दृष्टं हेतुं प्रतिषिध्य कार्यनियमं प्रतिजानानेन भाष्यकारेणादृष्टं कर्म हेतुत्वेनार्थादुक्तमिति। ननु तदपि समं किं न स्यात्तत्राह— तच्चेति। श्रुतिस्मृतीरिति। श्रुतीः स्मृतीश्चेत्यर्थः। साक्षा-

परिमलः।

कपक्षपाती दोष इति भावः। समानानेकधर्मेति। अत्राव्यवस्थात इत्येतदन्तेन सूत्रांशेन त्रिविधा संशयसामग्री वर्णिता। विशेषापेक्ष इत्यनेनान्यतरविशेषावधारणाकाङ्क्ष इत्यर्थकेन स्वयमनवधारणात्मकत्वमुक्तम्। तेन 'विशेषापेक्षो विमर्शः' इति सूत्रांशेनानवधारणज्ञानं संशय इति तल्लक्षणं दर्शितम्। अनेकस्माद्व्यावृत्त इति। अनेकशब्दस्य धर्मपदेन समासे शाकपार्थिवादिवन्मध्यमपदलोपेनानेकस्मात् सजातीयविजातीयात् व्यावृत्तोऽसाधारणो धर्म इत्यर्थेन एकधर्मलाभ इति भावः। कार्यनियमं प्रतिजानानेनेति पाठः साधुः,

'तद्यथाहिनिर्ल्वयनी वल्मीके मृता प्रत्यस्ता शयीतैवमेवेदꣳ शरीरं शेते अथायमशरीरोऽमृतः प्राणो ब्रह्मैव तेज एव' इति; 'सचक्षुरचक्षुरिव सकर्णोऽकर्ण इव सवागवागिव समना अमना इव सप्राणोऽप्राण इव' इति च। स्मृतिरपि— 'स्थितप्रज्ञस्य का भाषा' इत्याद्या स्थितप्रज्ञस्य लक्षणान्याचक्षाणा विदुषः सर्वप्रवृत्त्यसंबन्धं दर्शयति। तस्मान्नावगतब्रह्मात्मभावस्य यथापूर्वं संसारित्वम्। यस्य तु यथापूर्वं संसारित्वं नासाववगतब्रह्मात्मभाव इत्यनवद्यम्॥

यत्पुनरुक्तं श्रवणात्पराचीनयोर्मननिदिध्यासनयोर्दर्शनाद्विधिशेषत्वं ब्रह्मणः, न स्वरूपपर्यवसायित्वमिति, तन्न; श्रवणवदवगत्यर्थत्वा-

---

भामती।

तथा चेति। सुबोधम्। प्रकृतमुपसंहरति— तस्मान्नावगतब्रह्मात्मभावस्येति। ननूक्तं यदि जीवस्य ब्रह्मात्मत्वावगतिरेव सांसारिकधर्मनिवृत्तिहेतुः, हन्त मननादिविधानानर्थक्यम्, तस्मात्प्रतिपत्तिविधिपरा वेदान्ता इति, तदनुभाष्य दूषयति— यत्पुनरुक्तं श्रवणात्पराचीनयोरिति। मननिदिध्यासनयोरपि न विधिः, तयोरन्वयव्यतिरेकसिद्धसाक्षात्कारफलयोर्विधिसरूपैर्वचनैरनुवादात्। तदिदमुक्तम्— अवगत्यर्थत्वादिति। ब्रह्मसाक्षात्कारोऽवगतिस्तदर्थत्वं मनन-

कल्पतरुः।

त्कारो हि दृष्टं फलं तादर्थ्यं मननादेर्वदन् भाष्यकारो विधिं न मृष्यत इत्याह— तदिदमिति॥

अत्रैके वदन्ति— अदृष्टाश्रवणादेरवगत्युपायता, कृतश्रवणादीनामपि केषांचिदिह साक्षात्कारासमुन्मेषात् तात्कालिकश्रवणादिविधुरवामदेवादेरप्यपरोक्षज्ञानसमुदयात् जन्मान्तरकृतस्य च विधिमन्तरेण साधनभावानवकल्पनात्; श्रवणादिविध्यनभ्युपगमे च तद्विध्युररीकारप्रवृत्तप्रथमसूत्रतद्भाष्यकदर्थनादयुक्तस्तदनभ्युपगम

परिमलः।

'संप्रतिभ्यामनाध्याने' इत्युत्कण्ठापूर्वकस्मरणरूपाध्यानव्यतिरिक्तार्थे संप्रतिपूर्वात् जानातेरात्मनेपदविधानात्। प्रतिजानतेति पाठस्तु कथंचिदाध्यानार्थविवक्षया समर्थनी-

कल्पतरुः ।

इति । तन्न, न तावदनुष्ठितसाधनस्येह फलादर्शनं तद्विधिव्याप्तम् अनवरतं वैशेषिकाद्यसच्छास्त्रश्राविणामप्यपटुमतीनां केषांचित्तच्छास्त्रार्थानवबोधदर्शनेऽपि तच्छ्रवणविध्यभावात् । नापि भवान्तरकृतकर्मण इह फलजनकता तद्विधिव्याप्ता । जातिस्मरस्य प्राचि भवे धनमुपार्ज्य भुवि निखन्य प्रमीतस्येह जन्मनि तदादाय भोगान् भुञ्जानस्यापि प्राग्भवीयधनोपार्जनायाः संप्रतितनफलार्थमविहिताया अपि हेतुभावोपलम्भात् । प्रथमसूत्रं तु शास्त्रीयविषयफलनिरूपकं न विधिविचारपरमिति । किं च, प्राधान्यं श्रवणादेर्न भवतामपि संमतम् । गुणकर्मत्वमत्रैव भाष्य-

परिमलः ।

यः । तन्नेति । नन्वनुष्ठितस्य फलादर्शनं जन्मान्तरकृतकर्मणः फलजनकत्वं च तद्विधिव्याप्तमिति शङ्कितुर्नाभिप्रायः, येन तद्व्याप्तिभङ्गतः परिहियेत, किं त्वन्वयव्यतिरेकव्यभिचारात् लोकतः कारणत्वं ग्रहीतुं न शक्यम्; अतो विधिबोध्यकारणत्वमङ्गीकृत्य तन्निर्वाहार्थं फलप्रतिबन्धकदुरितनिवृत्त्यादिवैकल्यकल्पनया अन्वयव्यभिचारो जन्मान्तरकृतश्रवणादिकल्पनया व्यतिरेकव्यभिचारश्च परिहरणीय इति तदभिप्रायः; न च विध्यभावे केवलमुदाहृतदृष्टान्तद्वयेनायं व्यभिचारः परिहृतो भवति; श्रुतवैशेषिकादिशास्त्राणां केषांचिदवबोधानुत्पत्तौ हि मतिमान्द्यालस्यानभ्यासादिरूपकारणवैकल्यं स्पष्टं दृष्टमस्ति; शब्दमात्रस्य शाब्दप्रमाजनकत्वं चान्यत्र सामान्यतः सिद्धमस्ति; अतस्तत्रान्वयव्यभिचारस्य प्राक्सिद्धकारणत्वाविरोधित्वेऽप्यत्र बहुशः कृतश्रवणमननानां सम्यक्सकलवेदान्तार्थनिर्णयवतां साक्षात्कारानुदयः किंचिद्दृष्टकारणवैकल्यप्रयुक्तत्वेनादृश्यमानः कथं प्रागसिद्धस्य साक्षात्कारे शब्दप्रमाणकारणत्वस्य ग्रहणे विरोधी न स्यात्? जन्मान्तरोपार्जितनिधिखननेनोपभोगे च पूर्वानुभूतस्मरणं दृष्टं कारणं सिद्धमस्ति; अतस्तत्र व्यतिरेकव्यभिचारसमाधानसंभवेऽप्यत्र जन्मान्तरकृतश्रवणादेरन्यतः सिद्धयभावेन तत्कल्पकस्य विधेरप्यभावे जाग्रद्व्यतिरेकव्यभिचारश्च कथं कारणत्वग्रहविरोधी न स्यात्? तस्माद्विधिव्यभिचारोद्भावनं कृतशङ्कापरिहारानुपयुक्तम्; तथा **प्राधान्यं श्रवणादेर्न भवतामपि संमतम्** इत्येतदप्ययुक्तम्, अर्थज्ञानफलकाध्ययनविधेरिव साक्षात्कारफलश्रवणविधेरपि प्रधानकर्मत्वस्यैव प्राप्तेः— इति चेत्, उच्यते— उभयतो व्यभिचारेण श्रवणस्य साक्षात्कारकारणत्वं लोकत इव बाधेन विधितोऽपि ग्रहीतुं न शक्यमिति प्रागेव शब्दापरोक्षनिराकरणेनोक्तप्रायम् । अतो विधिना कारणत्वं निश्चित्य व्यभिचारः परिहरणीय इति शङ्कितुरभिप्रायो न संभवतीत्यभिप्रेत्य यद्यनयोक्तिभङ्ग्या विधिव्याप्तिराशङ्किता तदेदमपि दूषणान्तरमिति विधिव्याप्तौ व्यभिचार उपन्यस्तः ।

न्मननिदिध्यासनयोः । यदि ह्यवगतं ब्रह्मान्यत्र विनियुज्येत, भवेत्तदा

भामती ।

निदिध्यासनयोरन्वयव्यतिरेकसिद्धमित्यर्थः । अथ कस्मान्मननादिविधिरेव न भवतीत्यत आह— यदि ह्यवगतमिति । न तावन्मननिदिध्यासने प्रधानकर्मणी अपूर्वविषये अमृतत्वफले इत्युक्तमधस्तात् । अतो गुणकर्मत्वमनयोरवघातप्रोक्षणादिवत्परिशिष्यते, तदप्ययुक्तम्, अन्यत्रोपयुक्तोपयोक्ष्यमाणत्वाभावा-

कल्पतरुः ।

कृद्भिर्निजुह्वे ॥ यदि ह्यवगतं ब्रह्मान्यत्र विनियुज्येतेत्यादिनेति ॥

इत्युक्तमधस्तादिति । गान्धर्वशास्त्राभ्यासवदपूर्वानपेक्षया साक्षात्कारहेतुतोक्तेत्यर्थः । गुणकर्म ह्युपयोक्ष्यमाणशेषो यथा अवघातादि उपयुक्तशेषो वा यथा कृतप्रयोजनप्रयाजशेषाज्यस्य हविःषु क्षारणम् 'प्रयाजशेषेण हवींष्यभिघारयेत्' इति विहितम्; तदिहात्मन उपयुक्तोपयोक्ष्यमाणत्वाभावान्न तद्विषयं मननादि गुणकर्मेत्याह— तदपीति । न च श्रवणादिसंस्कृतस्यात्मनः साक्षात्कारजन्मन्यस्तूपयोग इति श्रवणादिगुणकर्मत्व-

परिमलः ।

अथ यदि श्रवणस्य प्रधानकर्मत्वेऽर्थबाधात् तत्परित्यज्य श्रवणादिनिर्णीतमात्मतत्त्वमैन्द्रियिकस्वसाक्षात्कारोत्पादनसमर्थं भवति 'लवणक्षारक्षोदिनि पात्रे गोमूत्रपूरिते क्षिप्तम् । मर्दितमपि शालितुषैर्यदविकृतं तत्तु मौक्तिकं जात्यम् ॥ घृष्टं सदात्मनः स्वच्छां छायां यन्निकषोपले । स्फुटं प्रदर्शयेदेतद्वैडूर्यं जात्यमुच्यते' इत्यादिशास्त्रोक्तपरीक्षाप्रकारनिर्णीतमिव रत्नतत्त्वम् इत्युपयोक्ष्यमाणसंस्कारतया गुणकर्मत्वमिष्यते तदा न चेत्यादिना दूषणमुक्तमिति न किंचिदनुपपन्नम् ॥

ननु प्रयाजशेषवाक्यस्य 'प्रयाजशेषं हविःषु क्षारयेत्' इत्यर्थकल्पनं न युक्तम्, क्षारणेन प्रतिपाद्यतया प्रयाजशेषस्य शेषितायाः क्षारणदेशतया हविषां शेषतायाश्च प्रसङ्गात्; नैतद्युक्तम्; तथा सति हि 'चात्वाले कृष्णविषाणां प्रास्यति' इतिवत् हविःषु प्रयाजशेषे च सप्तमीद्वितीये स्याताम्; इह तु द्वितीयया हविषां संस्कार्यत्वेन प्राधान्यं तृतीयया प्रयाजशेषस्य तत्संस्कारार्थत्वेन शेषत्वं च प्रतीयते इत्याशङ्क्य विशेषयति— कृतप्रयोजनेति । निर्वृत्तप्रयोजनस्य हि शेषः प्रतिपत्तिमपेक्षते; करिष्यमाणाज्यभागार्थमाज्यं प्रयाजशेषाज्येनासंसर्गसिद्धये तस्य क्वचित् क्षारणमपेक्षते तस्मादपेक्षितप्रतिपत्त्यर्थत्वमेव युक्तं न त्वनपेक्षितहविःसंस्कारार्थत्वम् । एवं च क्षारणस्य दृष्टार्थत्वमपहायादृष्टार्थत्वस्वीकारश्च परिहृतो भवति । प्रयाजेषु विनियुक्तस्य पुनः क्षारणे

वेधिशेषत्वम्; न तु तदस्ति, मननानिदिध्यासनयोरपि श्रवणवदवगत्यङ्गत्वात्। तस्मान्न प्रतिपत्तिविधिविषयतया शास्त्रप्रमाणकत्वं ब्रह्मणः संभवतीत्यतः स्वतन्त्रमेव ब्रह्म शास्त्रप्रमाणकं वेदान्तवाक्यसमन्वयादिति सिद्धम्। एवं च सति 'अथातो ब्रह्मजिज्ञासा' इति तद्विषयः पृथक् शास्त्रारम्भ उपपद्यते। प्रतिपत्तिविधिपरत्वे हि 'अथातो धर्मजिज्ञासा' इत्येवारब्धत्वान्न पृथक् शास्त्रमारभ्येत; आरभ्यमाणं चैवमारभ्येत— 'अथातः परिशिष्टधर्मजिज्ञासा' इति, 'अथातः क्रत्वर्थपुरुषार्थयोर्जिज्ञासा' इतिवत्। ब्रह्मात्मैक्यावगतिस्त्वप्रतिज्ञातेति तदर्थो युक्तः शास्त्रारम्भः— 'अथातो ब्रह्मजिज्ञासा' इति। तस्मात् 'अहं ब्रह्मास्मि' इत्येतदवसाना एव

भामती।

दात्मनः। विशेषतस्त्वौपनिषदस्य कर्मानुष्ठानविरोधादित्यर्थः। प्रकृतमुपसंहरति— तस्मादिति। एवं च सिद्धरूपब्रह्मपरत्वे उपनिषदां ब्रह्मणः शास्त्रार्थस्य धर्मादन्यत्वाद्भिन्नविषयत्वेन शास्त्रभेदात् 'अथातो ब्रह्मजिज्ञासा' इत्यस्य शास्त्रारम्भत्वमुपपद्यत इत्याह— एवं च सतीति। इतरथा तु धर्मजिज्ञासैवेति न शास्त्रान्तरमिति न शास्त्रान्तरारम्भत्वं स्यादित्याह— प्रतिपत्तिविधिपरत्व इति। न केवलं सिद्धरूपत्वाद्ब्रह्मात्मैक्यस्य धर्मादन्यत्वम् अपि तु तद्विरोधादपीत्युपसंहारव्याजेनाह— तस्मादहं ब्रह्मास्मीति। इतिकरणेन ज्ञानं

कल्पतरुः।

सिद्धिः, अपूर्वोपयोगिन एव गुणकर्मत्वात्, दृष्टे तु साक्षात्कारेऽपूर्वाभावेन तदयोगादिति। ननु बाह्यक्रियाविधिः प्रथमकाण्डे गतो मानसज्ञानविधिविचाराय पृथगारम्भ इति शङ्कापोहार्थमारभ्यमाणं चेति भाष्यम्। 'अहं ब्रह्मास्मि' इति वाक्यस्य तदर्थस्य चेतरप्रमाणावसानत्वमयुक्तं नित्यनिवृत्तिप्रसङ्गादित्याशङ्क्य ज्ञानपर इतिशब्द इत्याह— इति-

परिमलः।

विनियोग इति विनियुक्तविनियोगविरोधोऽपि परिहृतो भवति। तस्मात् द्वितीयातृतीययोः सप्तमीद्वितीयार्थतैव युक्तेति भावः॥

अपूर्वेति। अदृष्टपर्यवसायिन एव गुणकर्मणो विध्यपेक्षणात् श्रवणादेस्तु दृष्ट-

सर्वे विधयः सर्वाणि चेतराणि प्रमाणानि। न ह्यहेयानुपादेयाद्वैतात्मावगतौ सत्याम्, निर्विषयाण्यप्रमातृकाणि च प्रमाणानि भवितुमर्हन्तीति। अपि चाहुः— 'गौणमिथ्यात्मनोऽसत्त्वे पुत्रदेहादिबाधनात्। सद्ब्रह्मा-

---

भामती।

परामृशति। विधयो हि धर्मे प्रमाणम्। ते च साध्यसाधनेतिकर्तव्यताभेदाधिष्ठाना धर्मोत्पादिनश्च तदधिष्ठाना न ब्रह्मात्मैक्ये सति प्रभवन्ति, विरोधादित्यर्थः। न केवलं धर्मप्रमाणस्य शास्त्रस्येयं गतिः, अपि तु सर्वेषां प्रमाणानामित्याह— **सर्वाणि चेतराणि प्रमाणानीति**। कुतः? **न हीति**। अद्वैते हि विषयविषयिभावो नास्ति। न च कर्तृत्वम्, कार्याभावात्। न च करणत्वम्, अत एव। तदिदमुक्तम्— **अप्रमातृकाणि च** इति चकारेण। अत्रैव ब्रह्मविदां गाथा उदाहरति— **अपि चाहुरिति**। पुत्रदारादिष्वात्माभिमानो गौणः। यथा स्वदुःखेन दुःखी यथा स्वसुखेन सुखी तथा पुत्रादिगते-

कल्पतरुः।

करणेनेति। विधीनामद्वैतज्ञानविरोधं दर्शयति— **विधयो हीति**। त्र्यंशा भावना हि धर्मः। तद्विषया विधयः साध्यादिभेदाधिष्ठानास्तद्विषयाः। अपि चैतेऽनुष्ठेयं धर्ममुपादिशन्तस्तदुत्पादिनः पुरुषेण तमनुष्ठापयन्तीति साध्यधर्माधिष्ठानास्तत्प्रमाणानीति यावत्; अतो नित्यसिद्धाद्वैतब्रह्मावगमे तेषां विरोध इत्याह— **धर्मोत्पादिन इति**। न हीति हेतुभाष्यस्य प्रतीकोपादानम्। न हीत्यादि निर्विषयाणीत्यन्तं भाष्यं व्याख्याति— **अद्वैते हीति**। विधेयनिषेध्यवाक्यार्थभेदः साध्यसाधनादिपदार्थभेदः स्तम्भाद्यर्थभेदश्चाद्वैतावगतौ न भवतीति भाष्यार्थः। अप्रमातृकाणीत्येतद्व्याचष्टे— **न च कर्तृत्वमिति**। ज्ञानकर्तृत्वमित्यर्थः। निर्विषयाण्यप्रमातृकाणीति बहुव्रीही विशेषणपरौ। तथा सति हि विषयप्रमातृनिषेधयोर्हेतुत्वसिद्धिः। भाष्ये चकारः करणनिषेधार्थ इत्याह— **तदिदमिति**। भाष्यस्थप्रमाणशब्दो भावसाधनत्वेन ज्ञानवाची ततश्चकारेण करणनिषेधः। पुत्रादावहमित्यभिमानो गौणात्मा चेत्तर्हि मुख्यात्मना किं गुणसाम्यम्? अत आह— **यथेति**। बाह्लीको नाम देश-

परिमलः।

द्वारेणैव साक्षात्कारोपयोगित्वात् नादृष्टानुप्रवेशोऽस्तीति न तत्प्राप्तार्थविषयविध्यपेक्षेत्यर्थः। **त्र्यंशा भावना हि धर्म इति**। कौमारिलमतानुसारेण साध्यसाधनेतिकर्त-

त्माहमित्येवं बोधि कार्यं कथं भवेत्॥ अन्वेष्टव्यात्मविज्ञानात्प्राक्प्रमातृत्व-
मात्मनः। अन्विष्टः स्यात्प्रमातैव पाप्मदोषादिवर्जितः॥ देहात्मप्रत्ययो

भामती।

नापीति सोऽयं गौणः। न त्वेकत्वाभिमानः, भेदस्यानुभवसिद्धत्वात्। तस्मात् गौर्वाहीकः इतिवद्गौणः, देहेन्द्रियादिषु त्वभेदानुभवान्न गौण आत्माभिमानः, किं तु शुक्तौ रजतज्ञानवन्मिथ्या। तदेवं द्विविधोऽयमात्माभिमानो लोकयात्रां वहति। तदसत्त्वे तु न लोकयात्रा, नापि ब्रह्मात्मैकत्वानुभवः, तदुपायस्य श्रवणमननादेरभावात्। तदिदमाह— **पुत्रदेहादिबाधनात्**। गौणात्मनोऽसत्त्वे पुत्रकलत्रादिबाधनम्। ममकाराभाव इति यावत्। मिथ्यात्मनोऽसत्त्वे देहेन्द्रियादिबाधनं श्रवणादिबाधनं च। ततश्च न केवलं लोकयात्रासमुच्छेदः सद्ब्रह्माहमित्येवं बोधि बोधशीलं यत्कार्यम्, अद्वैतसाक्षात्कार इति यावत्, **तदपि कथं भवेत्**। कुतस्तदसंभव इत्यत आह— **अन्वेष्टव्यात्मविज्ञानात्प्राक्प्रमातृत्वमात्मनः**? उपलक्षणं चैतत्। प्रमाप्रमेयप्रमाणविभाग इत्यपि द्रष्टव्यम्। एतदुक्तं भवति— एष हि विभागोऽद्वैतसाक्षात्कारकारणम्, ततो नियमेन प्राग्भावात्। तेन तदभावे कार्यं नोत्पद्यत इति। **न च प्रमातुरात्मनोऽन्वेष्टव्य आत्मान्य इत्याह— अन्विष्टः स्यात्प्रमातैव पाप्मदोषादिवर्जितः।** उक्तं

कल्पतरुः।

विशेषः, तन्निवासी तच्छब्दोक्तः। पुत्रादेरुपकारकत्वारोपाद्य आत्माभिमानस्तस्मिन्निवृत्ते ममत्वबाधनेत्याह— **गौणात्मन इति**। श्रवणादिप्रमाणबाधमुक्त्वा प्रमित्यभावमाह— **न केवलमिति**। बोधीतीन्नन्तपाठो व्याख्यातः। सप्तम्यन्तस्तु निगदव्याख्यातः। नियतप्राक्सत्त्वं हि कारणत्वं प्रमात्रादिश्च ज्ञानकरणं तस्मिन् सकृदुदिततत्त्वसाक्षात्कारानिवृत्ते नोर्ध्वं ज्ञानानुवृत्तिरित्यर्थपरत्वेन प्रथमार्धं व्याख्याय प्रमातृलये फलिनोऽभावात् मोक्षस्यापुमर्थतेति शङ्कां द्वितीयार्धव्याख्यया निरस्यति— **न च प्रमातुरिति**। अन्वेष्टव्यः परमात्मा अन्वेष्टुः प्रमातृत्वोपलक्षिताच्चिदेकरसान्न भिन्नः ततोऽध्यस्तप्रमातृत्वबाधेऽप्युपलक्षित आत्मैव पापदोषादिरहितोऽन्विष्टो विदितः स्यात् अतो नोक्तदोष इत्यर्थः। ननु यद्यन्वेष्टुरात्मभूतं ब्रह्म किमिति तर्हि संसारे न चकास्ति तत्राह— **उक्तमिति**। प्रमात्रादेस्तत्त्वज्ञानहेतुतां सिद्धवत्कृत्य ज्ञानात्तन्निवृत्तौ हेत्वभावात्फलाभाव उक्तः। स न, बाध्यस्य प्रमात्रादेः प्रमानुत्पादकत्वापातात् इति शङ्कोत्तर-

यद्वत्प्रमाणत्वेन कल्पितः । लौकिकं तद्वदेवेदं प्रमाणं त्वात्मनिश्चयात्' इति ॥

इति चतुःसूत्री समाप्ता ॥

भामती ।

हि ग्रीवास्थग्रैवेयकनिदर्शनम् । स्यादेतत् । अप्रमाणात्कथं पारमार्थिकाद्वैतानुभवोत्पत्तिरित्यत आह— देहात्मप्रत्ययो यद्वत्प्रमाणत्वेन कल्पितः । लौकिकं तद्वदेवेदं प्रमाणं तु । अस्यावधिमाह— आत्मनिश्चयात् । आ ब्रह्मस्वरूपसाक्षात्कारादित्यर्थः । एतदुक्तं भवति— पारमार्थिकप्रपञ्चवादिभिरपि देहादिष्वात्माभिमानो मिथ्येति वक्तव्यम्, प्रमाणबाधितत्वात् । तस्य च समस्तप्रमाणकारणत्वं भाविकलोकयात्रावाहित्वं चाभ्युपेयम् । सेयमस्माकमप्यद्वैतसाक्षात्कारे विधा भविष्यति । न चायमद्वैतसाक्षात्कारोऽप्यन्तःकरणवृत्तिभेद एकान्ततः परमार्थः । यस्तु साक्षात्कारो भाविकः, नासौ कार्यः, तस्य ब्रह्मस्वरूपत्वात् । अविद्या तु यद्यविद्यामुच्छिन्द्याज्जनयेद्वा, न तत्र काचिदनु-

कल्पतरुः ।

त्वेन तृतीयश्लोकं व्याख्याति— स्यादेतदिति । यदलीकं तन्न प्रमाहेतुरिति व्याप्तिं प्रशिथिलयति— एतदुक्तमिति । य उत्पद्यतेऽनुभवो न स पारमार्थिकः यः पारमार्थिको न स उत्पद्यते अतश्चाप्रमाणात् कथं पारमार्थिकानुभवोत्पत्तिरित्ययमिष्टप्रसङ्ग इत्याह— न चायमिति । वृत्तावपि प्रतिबिम्बितचिदंशः सत्योऽस्ति, तत उक्तम्— एकान्तत इति । ननु वृत्तिरूपसाक्षात्कारोऽलीकत्वादविद्यात्मकः कथमविद्यामुच्छिन्द्यादविद्यां वा कथं स्वविरोधिनं तं जनयेत् ? अत आह— अविद्या त्विति । अलीकस्यापि सत्यविषयत्वादविद्यानिवर्तकत्वोपपत्तिः । दृष्टं च स्वप्नोपलब्धव्याघ्रादीनां स्वोपादानाविद्यानिवर्तकत्वमिति भावः । अविद्यामयी वृत्ति-

परिमलः ।

व्यताभेदो मतान्तरेष्वप्यविशिष्टः । स्वप्नोपलब्धेति । स्वप्नेषु उपर्यापतन्तो दृष्टा व्याघ्रादय आकुलतामुत्पाद्य स्वप्नदृशमुत्थापयन्तो भवन्ति स्वोपादानाविद्यानिवर्तकाः । इह श्रुतिव्याख्यानेष्वस्नाविरं सिरारहितमिति व्याख्यातम्; तत् स्नावाः सिरा अस्य सन्तीति स्नाविरं न स्नाविरम् अस्नाविरम् इतीशावास्योपनिषद्विवरणानुसारेण; प्राक्तु

भामती।

पपत्तिः। तथा च श्रुतिः— 'विद्यां चाविद्यां च यस्तद्वेदोभयं सह। अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुते' इति। तस्मात्सर्वमवदातम्॥ ४॥

इति चतुःसूत्री समाप्ता॥

कल्पतरुः।

र्यद्याविद्यामुच्छिन्द्यात्तामेव स्वनिवर्तिकामविद्यां जनयेद्वा उभयथाप्युक्तमार्गेण न काचिदनुपपत्तिरित्यर्थः। विद्यां वृत्तिमविद्यां च कार्यकारणभावेन सहिते यो वेद सोऽविद्योपादानत्वेन तन्मय्या वृत्त्या तदुपादानं मृत्युमविद्यां तीर्त्वा स्वरूपभूतविद्योपलक्षितममृतमश्नुत इति श्रुतेरर्थः॥

भाष्योदाहृतश्रुतयो व्याख्यायन्ते; उत्तरत्रापि तत्तदधिकरणसमाप्तौ श्रुतयो व्याख्यास्यन्ते। सदेवेति। सदित्यस्तितामात्रमुक्तम्, एवशब्दोऽवधारणार्थः, किं तदवधियत इत्यत आह— इदमिति; यदिदं व्याकृतं जगदुपलभ्यते तदग्रे प्रागुत्पत्तेर्विकृतरूपपरित्यागेन सदेवासीत्; हे सोम्य प्रियदर्शनेति श्वेतकेतुः पित्रा संबोध्यते। मा भूत्स्थूलं पृथिवीगोलकादीदम्बुद्धिग्राह्यं प्रागुत्पत्तेः, अन्यत्तु महदादिकं किमासीत्? नेत्याह— एकमेवेति; स्वकार्यपतितमन्यन्नासीदित्यर्थः; मृदो

परिमलः।

अस्नाविरमविगलितमिति टीकानुसारेणान्यथा व्याख्यातम्। एवमन्यत्रापि मतभेदेनाविरोधो द्रष्टव्यः। टीकायां विद्याविद्ययोः कार्यकारणभावं निवर्त्यनिवर्तकभावं चोपपाद्य तदर्थविषयत्वेन 'विद्यां चाविद्यां च' इति मन्त्रस्योदाहृतत्वात् तदनुसारेण मन्त्रं योजयति— अविद्यामिति। अत्रेदं सकलमूलपूर्वापरग्रन्थगतजीवविषयप्रतिबिम्बावच्छेदव्यवहारद्वयतात्पर्यावधारणाय चिन्तनीयम् अनयोः पक्षयोराचार्याणां कतरः पक्षः सिद्धान्त इति। द्वितीय एव, आद्यस्याचार्यैर्दूषितत्वादिति चेत्, न; अध्यासपूर्वपक्षे हि तद्दूषणं कृतम; सिद्धान्ते तस्यासमाहितत्वात् सिद्धान्ताभिमतमेव तद्दूषणमिति चेत्, न, असारं तद्दूषणमित्यनादरेणापि तदनुद्धारोपपत्तेः; तथा हि— रूपवत एव प्रतिबिम्ब इति नास्ति नियमः, रूपसंख्यापरिमाणसंयोगविभागपरत्वापरत्वचलनमुखत्वादिजातीनां प्रतिबिम्बदर्शनात्; द्रव्यस्य सत इति विशेष्यत इति चेत्, न, पृथिव्यादिनवकानुगतस्य द्रव्यत्वस्यासिद्धेः; द्रव्यं द्रव्यमिति तत्र तत्र लौकिकानामनुगतप्रत्ययाभावात् तार्किकपरिभाषाया निष्प्रमाणकत्वात्। गुणाश्रयस्य सत इति विशेष्यत इति चेत्, न, संख्याया एव संख्यारूपगुणाश्रयभूताया नीरूपायाः प्रतिबिम्बदर्शनात्; अस्ति हि संख्यायामपि

कल्पतरुः ।

घटाकारेण परिणमयितृकुम्भकारवत् किं सतोऽन्यन्निमित्तकारणमासीत्? नेत्याह— **अद्वितीयमिति** । आप्नोतीत्यात्मा परमकारणं वै इति जगतः प्रागवस्थां स्मारयति; इदमित्यादिपदव्याख्या पूर्ववत् । तदिति प्रकृत आत्मा परामृश्यते य 'इन्द्रो मायाभिः पुरुरूप ईयते' इत्युक्तः; नपुंसकप्रयोगस्तु विधेयब्रह्मापेक्षः; तदेतदेव यत् ब्रह्म; तद्वा किं लक्षणमित्यत आह— **अपूर्वमिति**; नास्य पूर्वं कारणं विद्यत इत्यपूर्वम्; अकार्यमित्यर्थः; तथा नास्यापरं कार्यं वास्तवं विद्यत इत्यनपरम् अकारणमिति यावत्; नास्यान्तरं जात्यन्तरम् अन्तराले विद्यत इत्यनन्तरम् दाडिमादिवत्स्वगतरसान्तरविधुरमित्यर्थः; एवंविधमन्यदपि कूटस्थमेतदनात्मकतया बाह्यमस्य न विद्यत इत्यबाह्यमिति । यत्पुरस्तात् दृश्यमविद्यादृष्टीनामब्रह्मेव प्रतिभासते तत्सर्वमिदममृतं ब्रह्मैव वस्तुत इत्यर्थः । तथा 'पश्चाद्दक्षिणतः' इत्यादिमन्त्रशेषेण सर्वात्मत्वमवगन्तव्यम् । संपतत्यस्मादमुं लोकं फलभोगायेति संपातः कर्म तद्यावत्तावदुषित्वा आवर्तत इति । इष्टं श्रौतम् । पूर्तं स्मार्तम् । दत्तं दानम् । परमार्थतः शरीरसंबन्धरहितं वा व एव सन्तं भवन्तम्, तमात्मानं वैषयिके प्रियाप्रिये न

परिमलः ।

संख्या एकत्वं प्रथमसंख्या द्वित्वं द्वितीयसंख्या बहुत्वेषु त्रित्वं प्रथमसंख्या चतुष्टं द्वितीयसंख्येत्यादिव्यवहारात्; अत एव 'वसन्ताय कपिञ्जलानालभेत' इत्यत्र त्रित्वमेव बहुवचनार्थो न तु चतुष्ट्वादिकं प्रथमातिक्रमे कारणाभावादिति न्यायविदः; अत एव च द्वावेकत्वसंख्यारूपावयवावस्था द्वित्वसंख्याया इत्याद्यर्थे ब्राह्मणद्वितयं ब्राह्मणद्वयमित्यादिशब्दनिष्पत्त्यर्थम् 'संख्याया अवयवे तयप्' इत्यादिसूत्रैस्तयप्प्रत्ययादयो विहिताः; अत एव च 'रक्षसां निहतान्यासन् सहस्राणि चतुर्दश' इत्याद्यभियुक्तव्यवहाराः; ननु संख्यासु वस्तुतो नास्ति संख्यान्तरं किं तु द्वित्वसंख्या द्वितीयेत्यादिसजातीयसंख्याव्यवहाराः सत्ता सतीति व्यवहारवदभेदेऽपि धर्मधर्मिभावकल्पनया, सहस्राणि चतुर्दशेत्यादिविजातीयसंख्याव्यवहाराः सहस्रादिसंख्याश्रयगतचतुर्दशसंख्यादिसामानाधिकरण्येन तत्कल्पनया, अतो न संख्याया मुख्यं गुणाश्रयत्वमिति चेत्, उच्यते— तुल्यमेतदात्मनोऽपि; आनन्दादिधर्मास्तदभिन्ना इति तस्यापि हि न मुख्यं गुणाश्रयत्वम्; तस्माद्रूपवत एव प्रतिबिम्ब इति नियममवलम्ब्यात्मप्रतिबिम्बनिराकरणं तावदयुक्तम् । तथा 'रूपवत्येव प्रतिबिम्बः' इति नियममवलम्ब्यापि निराकरणमयुक्तम् । किं प्रतिबिम्बोपाधेर्वस्तुतो रूपवत्त्वं प्रतिबिम्बने प्रयोजकमिष्यते उत रूपवत्त्वेन ग्रहणम् । आद्ये नात्मनोऽन्तःकरणे प्रतिबिम्बनानुपपत्तिः; अन्तःकरणस्य त्रिवृ-

कल्पतरुः ।

स्पृशतः । एवं परमार्थतोऽशरीरं शरीरेष्वनवस्थेष्वनित्येष्ववस्थितं नित्यं महान्तम्, महत्त्वमापेक्षिकमित्याशङ्क्याह— विभुम्, मन्तृमन्तव्यभेदनिषेधार्थमाह— आत्मानमिति; ईदृशमात्मानं मत्वा धीरो धीमान्न शोचति । प्राणः क्रियाशक्तिः परमार्थतो न विद्यते यस्य सोऽप्राणः; तथा ज्ञानशक्तिमन्मनो यस्य नास्ति सोऽमनाः; क्रियाशक्तिमत्प्राणनिषेधेन तत्प्रधानानि कर्मेन्द्रियाणि ज्ञानशक्तिमन्मनोनिषेधेन तत्प्रधानानि ज्ञानेन्द्रियाणि च सविषयाणि निषिद्धानि; यस्मादेवं तस्माच्छुभ्रः शुद्ध इति। स्वप्नाद्यवस्थाकृतकर्मस्वकर्तात्मेत्युक्तम् 'स यत्तत्र किंचित्पश्यत्यनन्वागतस्तेन भवति इति पूर्ववाक्ये, तत्र हेतुरुच्यते— असङ्गो हीति; मूर्तं हि मूर्तान्तरेण संसृज्यमानं स्पन्दते; आत्मा स्वयं पुरुषो न मूर्तः; अतो न केनचित्संज्यत इत्यसङ्गः; अतो न कर्तेति । धर्मादधर्मात्तत्फलसुखदुःखाच्च कृतात् कार्यप्रपञ्चात् अकृतात्कारणात् अन्यत्र पृथग्भूतं भूतादेः कालादन्यत्र तेनानवच्छेद्यं यत्पश्यसि तद्वदेति मृत्युं प्रति नचिकेतसः प्रश्नः । अस्य विदुषोऽप्रवृत्तफलानि कर्माणि तस्मिन् परावरे ब्रह्मणि आत्मत्वेन दृष्टे क्षीयन्ते; परं कारणम्, अवरं कार्यम्, तद्रूपे तद-

परिमलः ।

त्करणेन पञ्चीकरणेन वा रूपवत्त्वात् । न द्वितीयः, निजरूपवत्त्वेनागृह्यमाणेऽपि स्फटिके संनिहितजपाकुसुमप्रतिबिम्बनेन अरुणः स्फटिक इति व्यवहारदर्शनात् । तस्मात् निरवद्यः प्रतिबिम्बपक्षः । प्रतिबिम्बपक्षे एव च जीवतदन्तर्यामिभावेनान्तःकरणे द्विगुणीकृत्य वृत्तिरुपपद्यते । ननु प्रतिबिम्बपक्षे केन दृष्टान्तेन द्विगुणीकृत्य वृत्युपपत्तिः; अभ्भस्याकाशस्य प्रतिबिम्बो नाभ्युपगतः; आलोकस्य तु प्रतिबिम्ब एव नावच्छेदोऽपि; न च जलान्तर्गतसिकतादिग्रहणार्थं तदन्तरालोकप्रवेशस्य अवश्यंभावात् तेन तस्या अवच्छेदोऽप्यङ्गीकरणीय इति वाच्यम्, आलोकप्रतिबिम्बेनैव सिकतादिप्रकाशोपपत्तेः; न च समारोपितस्य प्रतिबिम्बालोकस्य सिकतादिभिः संयोगो नास्तीति वाच्यम्, सद्योऽपवरकप्रविष्टस्य समारोपितेन तमसा तत्रत्यघटादिप्रकाशप्रतिबन्धवत् समारोपितेनालोकेन सिकतादिप्रकाशजननोपपत्तेः— इति चेत्; मैवम्, जलेनाकाशस्यावच्छेद एव तत्रालोकस्य प्रतिबिम्ब एवेति कल्पने दृष्टान्तसंप्रतिपत्त्यभावेऽपि प्रतिबिम्बाश्रयान्तःकरणेन सर्वगतस्यात्मनोऽवच्छेदस्याप्यवश्यंभावेन स्वत एव द्विगुणीकृत्य वृत्तिसिद्धेः ॥

प्रतिबिम्बपक्ष एव च सूत्रकारादिसंमतः । 'अंशो नानाव्यपदेशात्' इत्यधिकरणे ह्यैकात्म्यवादे कर्मतत्फलव्यतिकरशङ्कापरिहारार्थं प्रवृत्तेन 'आभास एव च'

कल्पतरुः ।

धिष्ठाने । ब्रह्मणः स्वभावमानन्दं विद्वान् । यदस्मिन्देहे जले सूर्यवत् प्रविष्टं ब्रह्म जीवाभिधं तदाचार्येण बोध्यमानमात्मानमेव विधूतकल्पनमवेत् विदितवत्; किं सांख्यमत इव द्वैतमत्या? न, अपि तु अहं ब्रह्माद्वितीयमस्मीति; तस्मादेव विज्ञानादविद्याकृतासर्वत्वनिवृत्त्या तद्ब्रह्म सर्वमभवत् । 'यस्मिन् सर्वाणि भूतानि आत्मैवाभूद्विजानतः' इति यः सर्वात्मभावो विद्याभिव्यक्त उक्तः, तत्रात्मनि तत्र वा ज्ञानकाले आत्मैकत्वं पश्यतः को मोहः? तत्पदलक्ष्यं ब्रह्म एतदात्मभावेनावस्थितमहमस्मीति पश्यन्नेतस्मादेव दर्शनादृषिः वामदेवाख्यः परं ब्रह्म अविद्यानिवृत्तिद्वारा प्रतिपेदे ह प्रतिपन्नवान् किलेति, हशब्दो व्यवधानेन संबन्धनीयः; स एतस्मिन्दर्शने स्थितः सर्वात्मभावप्रकाशकान् 'अहं मनुः' इत्यादीन्मन्त्रांश्च ददर्श । भारद्वाजादयः षडृषयः परविद्याप्रदं पिप्पलादं गुरुं विद्यानिष्क्रयार्थमनुरूपमन्यदपश्यन्तः पादयोः प्रणम्य प्रोचुः— त्वं ह्यस्माकं पिता ब्रह्मशरीरस्याजरामरस्य विद्यया जनयितृत्वात् इतरौ तु शरीरमेव जनयतः; जनयितृत्वमपि सिद्धस्यैवाविद्यानिवृत्तिमुखेनेत्याह— यस्त्वं नः अस्मानविद्यामहोदधेः परमपुनरावृत्तिलक्षणं पारं तारयसि विद्याप्लवेनेति प्रश्नोपनिषत् । 'श्रुतं ह्येव मे' इत्यादि च्छन्दोगश्रुतिः सनत्कुमारनारदसंवादरूपा; तत्रापि

परिमलः ।

इति सूत्रेण जीवस्य ब्रह्मप्रतिबिम्बत्वमुक्तं तथैव च भाष्यकारैर्व्याख्यातम् । आभास एवैष जीवः परस्यात्मनो जलसूर्यकादिवत्प्रतिपत्तव्यः न स एव साक्षात् नापि वस्त्वन्तरम् । अतश्च नैकस्मिन् जलसूर्यके कम्पमाने जलसूर्यकान्तरं कम्पते । एवं नैकस्मिन् जीवे कर्मफलसंबन्धिनि जीवान्तरस्य तत्संबन्धः । एवमव्यतिकर एव कर्मफलयोरिति । टीकाकारैरपि तस्मिन्नधिकरणे जीवब्रह्माभेदे सकलजीवगतदुःखभाक्त्वं ब्रह्मणः स्यादिति शङ्कापरिहार एतत्सूत्रसिद्धं प्रतिबिम्बत्वमाश्रित्यैव समर्थितः । न च मोक्षस्यानर्थबहुलता यतः प्रतिबिम्बानामेव श्यामतावदातते न बिम्बस्य एवं जीवानामेव नानावेदनाभिः संबन्धः ब्रह्मणस्तु बिम्बस्येव न तदभिसंबन्ध इति । आचार्यैरप्येतदभिप्रायः स्पष्टीकृतः बिम्बप्रतिबिम्बयोरवदाततत्वश्यामत्वादिव्यवस्थानान्न धर्मसाङ्कर्यमित्यर्थ इति । तस्मात्प्रतिबिम्बपक्ष एवाचार्यणामभिमतः । अत एवानिर्वाच्याविद्याद्वितयसचिवस्येति प्रथमश्लोकगतचराचरपदव्याख्यानसमये एव जीवस्य प्रतिबिम्बत्वमुक्तं जीवानामपि चराचरोपाधिकानां तत्प्रतिबिम्बत्वेन तद्विवर्ततेत्याहेति । अवच्छेदपक्षस्तु भाष्यटीकागतघटाकाशादिदृष्टान्तस्वरसप्राप्तो न दूषितः परं न तु स्वतन्त्रेषु स्ववाक्येषु जीवोऽवच्छेद इति क्वचिदप्युक्तम् । तस्मात् प्रतिबिम्बपक्ष एवा-

कल्पतरुः।

'तारयतु' इत्यन्तमुपक्रमस्थं वाक्यम्, शेषमाख्यायिकोपसंहारस्थं वाक्यान्तरम्; मे मम भगवद्दृशेभ्यो भगवत्सदृशेभ्यः इदं श्रुतम्, यत्तरति शोकं मनस्तापमकृतार्थबुद्धिमात्मविदिति; सोऽहमनात्मवित्त्वाच्छोचामि, अतस्तं मां शोकसागरस्य पारमन्तं भगवांस्तारयतु आत्मज्ञानोडुपेनेति। वल्कलादिवच्चित्तरञ्जको रागादिकषायो मृदितः क्षालितो विनाशितो यस्य ज्ञानवैराग्याभ्यासक्षारजलेन तस्मै नारदाय तमसोऽविद्यालक्षणस्य पारं परमार्थतत्त्वं दर्शितवान्। संवर्गविद्यायां श्रूयते— 'वायुर्वाव संवर्गो यदा वा अग्निरुद्वायति उपशाम्यति वायुमेवाप्येति प्रलीयते; यदा सूर्योऽस्तमेति वायुमेवाप्येति; यदा चन्द्रोऽस्तमेति वायुमेवाप्येति; यदाप उच्छुष्यन्ति वायुमेवापियन्ति वायुर्ह्येवैतान्सर्वान्संवृङ्क्ते इत्यधिदैवम्; अथाध्यात्मम्; प्राणो वाव संवर्गो यदा वै पुरुषः स्वपिति प्राणं तर्हि वागप्येति प्राणं चक्षुः प्राणं श्रोत्रं प्राणं मनः' इति। तद्ब्रह्म विदितात्कार्यादन्यदेव; अथो अपि अविदितात्कारणात् अधि उपरि अन्यदित्यर्थः। येन प्रमात्रा इदं सर्वं वस्तु विजानाति लोकः तं केन करणेन विजानीयात् करणस्य ज्ञेयविषयत्वात्प्रमातरि वृत्त्यनुपपत्तेः; तस्मात्प्रमातापि न ज्ञेयः किमु तत्साक्षीत्यर्थः। यद्वाचा शब्देनानभ्युदितम् अप्रकाशितम्; येन ब्रह्मणा सा वागभ्युद्यते प्रकाश्यते इत्यविषयत्वम् उपन्यस्याह, तदेवात्मभूतम् प्रमातृत्वादिकल्पना अपोह्येत्येवकारार्थः; ब्रह्म महत्तममिति त्वं विद्धि हे शिष्य, यदुपाधिविशिष्टं देवतादीदमित्युपासते जनाः इदं त्वं ब्रह्म न विद्धीति। यस्य ब्रह्मामतमविषय इति निश्चयः तस्य तद्ब्रह्म मतं सम्यग्ज्ञातम्; यस्य पुनर्मतं विषयतया

परिमलः।

चार्याणां सिद्धान्त इति। एवं प्रतिबिम्बपक्षः श्रेयानिति मन्यमानानां मतानुसारेणाचार्याणां तात्पर्यं योजितम्॥

अथावच्छेदपक्षमभ्युपगच्छतां मतमनुसृत्योच्यते— प्रतिबिम्बपक्षो भाष्यकारैरेव 'न स्थानतोऽपि' इत्यधिकरणे निराकृतः। तत्र हि 'अत एव चोपमा सूर्यकादिवत्' इति सूत्रेण सूर्यादिप्रतिबिम्बदृष्टान्ते श्रुत्युदाहृते दर्शिते सूर्यादिवदात्मनः प्रतिबिम्बो न युज्यत इति तदाक्षेपकत्वेन 'अम्बुदवदग्रहणात्तु न तथात्वम्' इति सूत्रं व्याख्यातम्। यथा अम्बु सूर्यादिभ्यो मूर्तेभ्यो विप्रकृष्टदेशं गृह्यते, न तथा आत्मनो विप्रकृष्टदेशं प्रतिबिम्बनयोग्यं वस्तु गृह्यते; अतो न काप्यात्मनः सर्वगतस्य प्रतिबिम्बो युक्त इति। ततः 'वृद्धिह्रासभाक्त्वमन्तर्भावादुभयसामञ्जस्यादेवम्' इति सूत्रमुक्तानुपपत्त्या सूर्यादिवदात्मनः प्रतिबिम्बनमनुपपन्नमित्यङ्गीकृत्यैव श्रुतिषु सूर्यादिप्रतिबिम्बोपादानस्य

कल्पतरुः ।

मतं ब्रह्मेति मतिर्न स वेद ब्रह्म भेदबुद्धित्वात्; एतौ विद्वदविद्वत्पक्षावनुवदत्येवमेवेति निश्चयार्थम्– अविज्ञातमिति; विषयत्वेनाविज्ञातमेव ब्रह्म सम्यग्विजानताम्; विज्ञातमेव विषयतया भवति यथावदविजानताम्। दृष्टेश्चक्षुर्जन्यायाः कर्मभूताया द्रष्टारं स्वभावभूतया नित्यदृष्टया व्याप्तारं दृश्ययानया न पश्येः विज्ञातेर्बुद्धिधर्मस्य निश्चयस्य विज्ञातारमिति पूर्ववत्। तयोर्जीवपरयोर्मध्ये एको जीवः पिप्पलं कर्मफलम्; अन्यः परमात्मा अभिचाकशीति पश्यत्येव नात्ति। आत्मीयं शरीरम् आत्मा, शरीरादिसंयुक्तमात्मानमित्यर्थः। एको देवो गूढः छन्नः, सर्वव्यापित्वं न गगनवत् किं तु सर्वभूतान्तरात्मा, कर्माध्यक्षः कर्मफलप्रदाता, सर्वभूतानामधिवासोऽधिष्ठानम्; साक्षित्वे हेतुश्चेतेति; चैतन्यस्वभाव इत्यर्थः; केवलो दृश्यवर्जितः निर्गुणो ज्ञानादिगुणवान् न भवति। स आत्मा परितः समन्तात् अगात्सर्वगतः; शुक्रमित्यादयः शब्दाः पुंलिङ्गत्वेन विपरिणेयाः स इत्युपक्रमात्; अकायो लिङ्गशरीरवर्जितः; अव्रणोऽक्षतः अस्नाविरः सिरारहितः; अव्रणत्वास्नाविरत्वाभ्यां स्थूलदेहराहित्यमुक्तम्; शुक्र इति बाह्याशुद्धिविरह उक्तः; शुद्ध इत्यान्तररागाद्यभावः; अपापविद्धो धर्माधर्मरहितः। भाष्येऽनाधेयातिशयत्वनित्यशुद्धत्वयोः पूर्वं सिद्धवदुक्तहेत्वोः सिद्धिमेतौ मन्त्रौ दर्शयत इति बोद्धव्यम्। आत्मानं साक्षिणमयं परमात्मास्मीत्यपरोक्षतया जानीयाच्चेत् कश्चित्पुरुषः; चेच्छब्दः आत्मसाक्षात्कारस्य दुर्लभत्वप्रदर्शनार्थः; स स्वव्यतिरिक्तमात्मनः किं फलमिच्छन् कस्य वा पुत्रादेः कामाय प्रयोजनाय तदलाभनिमित्ततया शरीरं संतप्यमानमनु तदुपाधिः सन् संज्वरेत् संत-

परिमलः ।

तात्पर्यान्तरवर्णनपरतया व्याख्यातम्। यथा सूर्यादिप्रतिबिम्बस्य जलाद्युपाधिगतवृद्धिह्रासाद्यधीनवृद्धिह्रासादिभाक्त्वम् एवमात्मनोऽप्यन्तःकरणादिगतवृद्धिह्रासाद्यधीनवृद्धिह्रासादिभाक्त्वमित्येतावता जलसूर्यादिदृष्टान्तीकरणम्, न तु प्रतिबिम्बनेन दृष्टान्तदार्ष्टान्तिकयोः सर्वथा साम्यस्यानपेक्षितत्वादिति। बृहदारण्यकभाष्येऽपि 'स एष इह प्रविष्ट आ नखाग्रेभ्यः' इति वाक्यव्याख्यानावसरे सर्वगतस्यात्मनः कः प्रवेशो नामेति विमृश्य प्रतिबिम्बनं प्रवेश इति पक्षम् 'अम्बुवदग्रहणात्तु' इति सूत्रोक्तेन विप्रकृष्टदेशोपाध्यभावेनैव दूषयित्वा देहादावात्मन उपलभ्यमानत्वं प्रवेशः। न हि पाषाणादाविव देहादावात्मनोऽनुपलब्धिरस्तीति प्रवेशपदार्थस्यान्यथोपपादनेन प्रतिबिम्बपक्षदूषणं स्थिरीकृतम्। न हि लोकेऽपि जलाद्विप्रकृष्टदेशस्यैव चैत्रादेस्तदन्तर्निमग्नत्वेन विप्रकृष्टदेशस्यापि जले प्रतिबिम्बो दृश्यते, न च सावयवस्य चैत्रस्य जलान्तर्निमग्नाधरकायस्य ऊर्ध्वकायप्रतिबिम्बवदन्तःकरणादिगतस्यात्मनस्तदभिमुखप्रदेशान्तरप्रतिबिम्ब उपपादयितुं शक्यः,

कल्पतरुः।

प्येत; निरुपाध्यात्मदर्शिनो नान्यदस्ति प्रयोजनं नाप्यन्यः पुत्रादिरित्याक्षेपः। य आत्मा चतुर्थे 'अथात आदेशो नेति नेति' इति वाक्येन विश्वदृश्यनिषेधेन व्याख्यातः स एष पञ्चमेऽध्याये निरूप्यत इत्यर्थः। यथेन्द्रियादिभ्यः परं परमासीन्नैवं पुरुषादस्ति किंचित्परम्; सा पुरुषलक्षणा काष्ठा अवधिः सूक्ष्मत्वमहत्त्वादेः सैव गतिः परमः पुरुषार्थः। यस्त्वदुदाहृतसविशेषब्रह्मणां पृथिव्येव यस्यायतनमित्युपक्रम्योपन्यस्तानामधिष्ठानं तमौपनिषदमुपनिषद्भिरेव विज्ञेयम्, विशेषणस्य व्यावर्तकत्वादयमर्थो लभ्यते, पुरुषं त्वा त्वां पृच्छामि हे शाकल्येति याज्ञवल्क्यस्य प्रश्नः। 'अत्र ब्रह्म समश्नुते' इति पूर्ववाक्ये जीवन्मुक्तिरुक्ता; तत्र देहे वर्तमानोऽपि पूर्ववन्न संसारीत्यत्र दृष्टान्तः, तत्तत्र यथा अहिनिर्ल्वयनी अहित्वग्वल्मीकादौ प्रत्यस्ता प्रक्षिप्ता मृता प्राग्वदहिना आत्मत्वेनानभिमता शयीत वर्तेत एवमेवेदं विद्वच्छरीरं मुक्तेन पूर्ववदात्मत्वेनानभिमतं शेते; अथायं सर्पस्थानीयो जीवन्मुक्तः शरीरे वर्तमानोऽप्यशरीरः; अहिरपि हि त्यक्तत्वचा संयुक्तोऽपि तामहमिति नाभिमन्यते; अशरीरत्वादेवामृतः प्राणिति जीवतीति प्राणः निरुपाधिः सन्नित्यर्थः; एष च ब्रह्मैव तच्च ब्रह्म तेज एव विज्ञानज्योतिः। परमार्थविवेकतोऽचक्षुरपि बाधितानुवृत्त्या सच्चक्षुरिवेत्यादिश्रुत्यन्तरयोजना॥

इति चतुःसूत्री समाप्ता॥

परिमलः।

निरवयवत्वशब्दकोपापत्तेः। तस्मात् बहुषु जलपात्रेषु चन्द्रस्य यावत एकत्र प्रतिबिम्बस्तावतोऽप्यन्येष्विव कृत्स्नस्यैवात्मन एकत्रान्तःकरणे प्रतिबिम्बितस्यान्येष्वपि प्रतिबिम्बो वक्तव्यः। ननु बहूनां दर्पणानां पुरतस्तिर्यक् प्रसारितस्य वंशदण्डस्य दर्पणेषु भिन्नभिन्नप्रदेशानामिवान्तःकरणेष्वात्मनस्तत्तदन्तःकरणाभिमुखभिन्नभिन्नप्रदेशानां प्रतिबिम्बो वाच्यः। सावयवत्वे हि तथा वक्तुं शक्यम्। न च निदाघार्तस्य जाह्नवीजलनिमग्नसर्वकायस्य सर्वाङ्गीणसुखोत्पत्त्यर्थमा केशादा नखाग्रादन्तःकरणव्याप्तौ सत्यां व्यवधानरहितस्तदभिमुखात्मप्रदेशो लभ्यते यस्य तत्र प्रतिबिम्बो वर्ण्येत। एवमविप्रकृष्टदेशरूपं दूषणं भाष्ये व्यक्तमिति दूषणान्तरमाचार्यैः पूर्वपक्षिमुखेनोद्घाटितम्। रूपवत एव रूपवत्येव प्रतिबिम्ब इत्यस्य चाक्षुषस्यैव चाक्षुष एव प्रतिबिम्ब इत्यर्थः। न ह्यस्य नियमस्य क्वचिद्भङ्गोऽस्ति मुखादिप्रतिबिम्बे तदीयचाक्षुषसर्वगुणानुभवात् कस्तूरिकादिप्रतिबिम्बे तदाघ्राणेऽपि सौरभानुभवाच्च। गुहादिषु प्रतिध्वनिर्ध्वनेः प्रतिबिम्ब इति केचित्। तन्न, स एव हि गगनगुणः शब्दः दुन्दुभिसमुद्रदावानल-

परिमलः ।


झञ्झामारुतादिध्वनीनां पृथिव्यादिशब्दत्वात् । एवं च यद्यपि 'आभास-' इति सूत्रेण प्रतिबिम्बपक्ष उक्त इति प्रतिभाति, तथापि एकत्र जीवस्य प्रतिबिम्बत्वाभ्युपगमोऽन्यत्र तद्दूषणं च परमास्तस्य सूत्रकारस्य न संभवतीति किंचिदनुसारेण कस्मिंश्चिन्नेतव्ये प्रतिबिम्बदूषणस्याविप्रकृष्टदेशत्वादियुक्तिपूर्वकं कृतत्वात् 'आभास एव च' इति सूत्रे भाष्यकारैरपि श्रुत्योपपत्त्या वा प्रतिबिम्बत्वस्य असमर्थितत्वात्तदेव सूत्रम् 'वृद्धिह्रासभाक्त्वम्' इति सूत्रोक्तन्यायात् प्रतिबिम्बसादृश्यप्रतिपादनपरं योज्यम्, तावताप्यव्यतिकरसिद्धेः, तदधिकरणटीकायां बिम्बप्रतिबिम्बयोर्ब्रह्मजीवदृष्टान्तत्वेनोपपादनाच्च । वस्तुतस्तु 'आभास एव च' इति सूत्रं प्रतिबिम्बत्वरूपस्य प्रतिबिम्बसादृश्यरूपस्य वा आभासत्वस्य प्रतिपादनपरमेव न भवति; 'षड्विंशतिरित्येव ब्रूयात्' इतिवदेवकारोपहतविधिशक्तिकत्वेन यथाप्राप्तानुवादत्वात् । तथा हि— प्रकृतावग्नीषोमीयपशावश्विगुप्रैषे 'षड्विंशतिरस्य वङ्क्रयः' इति श्रुतम् । अस्य च्छागस्य पशोरेकैकस्मिन् पार्श्वे त्रयोदश त्रयोदशास्थीनीति षड्विंशतिर्वङ्क्रिशब्दोक्तानि पार्श्वास्थीनीत्यर्थः । अश्वमेधे त्वश्वस्य पशोरेकैकस्मिन् पार्श्वे सप्तदश सप्तदशास्थीनीति चतुस्त्रिंशद्वङ्क्रयः । तत्प्रकाशको वैशेषिको मन्त्रः पठ्यते 'चतुस्त्रिंशद्वाजिनो देवबन्धोर्वङ्क्रीरश्वस्य स्वधितिः समेति' इति। तेनोपदिष्टेन षड्विंशतिमन्त्रस्य सर्वथा निवृत्तौ प्रसक्तायां पुनरपि तत्र पठ्यते 'षड्विंशतिरित्येव ब्रूयात् न चतुस्त्रिंशदिति' । तेन प्राकृतमन्त्रः प्राप्यमाणः किं षड्विंशतिपदयुक्त एव प्राप्नोति उताश्ववङ्क्रिसंख्यानुसारेण षड्विंशतिरिति पदस्थाने चतुस्त्रिंशत्पदोहयुक्त इति संशये, 'षड्विंशतिरित्येव ब्रूयात्' इति वचनात् 'नास्ति वचनस्यातिभारः' इति न्यायात् षड्विंशतिपदयुक्त एवेति प्राप्य; सिद्धान्तितं नवमे— 'षड्विंशतिरित्येव ब्रूयात्' इति वाक्यं न षड्विंशतिपदयोगेन प्राकृतमन्त्रविधायकम्, एवकारोपहतविधिशक्तिकत्वेन तस्य चतुस्त्रिंशन्मन्त्रनिषेध एव तात्पर्यात् । ततश्च निषेधेन वैशेषिकमन्त्रनिवृत्तौ प्राकृतमन्त्रोऽतिदेशेनैव प्राप्नोतीति 'षड्विंशतिरिति' इत्येतत्प्राप्तानुवादकम् । यथाप्राप्ति चानुवादो भवति; प्राप्तिश्च चतुस्त्रिंशत्पदोहेनैव, यथा द्विपशुके पशुबन्धे द्विपञ्चाशत्पदोहेनैव । तस्मादश्वमेधे चतुस्त्रिंशत्पदोहयुक्त एव षड्विंशतिमन्त्रः प्रयोक्तव्य इति। एवम् 'आभास एव—' इति सूत्रस्याप्येवकारोपहतविधिशक्तिकत्वेन जीवः साक्षाद्ब्रह्मैव न भवतीति भाष्यदर्शिते निषेध एव तात्पर्यम् । आभास इति तु यथाप्राप्तानुवादकम् । प्राप्तिश्च 'वृद्धिह्रासभाक्त्वम्' इति सूत्रोक्तन्यायात् प्रतिबिम्बसादृश्यस्येति तस्यैवानुवादकं न तु कस्यचिदर्थस्य विधायकम् । तस्मादवच्छेदपक्षे न सूत्रादिविरोधशङ्का । तत्र तत्र प्रतिबिम्बत्व-

परिमलः।

व्यवहारस्तु वृद्धिह्रासभाक्त्वसूत्रक्लृप्तसादृश्यमूलो गौणः। न हि ज्वलनाद्भिन्नत्वेनावगते माणवके 'अग्निरधीते' 'अग्निरागच्छति' इत्यादिप्रयोगसहस्रसत्त्वेऽप्यग्निशब्दो माणवके मुख्यत्वमश्नुवीत, अन्तःकरणगतस्यैवात्मनो जीवान्तर्यामिभावेन भेदस्त्वविद्याश्रयत्वतद्विषयत्वान्तःकरणसंवलितत्वतदसंवलितत्वाद्युपाधिभेदादुपपद्यते। अन्यथा 'षडस्माकमनादयः' इति सिद्धान्ते जीवेश्वरभिन्नत्वेनाभ्युपगतस्य जीवेश्वरतद्भेदादिसकलप्रपञ्चविवर्ताधिष्ठानत्वेन सर्वगतस्य शुद्धचैतन्यस्याप्यन्तःकरणे सत्त्वमवर्जनीयम्, तत्तु प्रतिबिम्बपक्षमाश्रित्य द्विगुणीकृत्य वृत्त्युपपादनेनापि न निर्वहतीति त्रिगुणीकृत्य वृत्तिरुपपादनीया भवेत्, प्रतिब्रह्मोपासनमुपास्यधर्मिभेदस्याचार्यैरानन्दमयाधिकरणारम्भे वक्ष्यमाणत्वात्। दहराण्डिल्यविद्याद्युपास्यभिन्नभिन्नसगुणब्रह्मसत्त्वमपि तस्मिन्नभ्युपगन्तव्यमिति तदर्थं चतुःपञ्चगुणादिवृत्तिरप्युपपादनीया भवेत्। न च तदुपपादनं शक्यम्, दृष्टान्ताभावात्। तस्मात् जीवेश्वरोपाधिभ्यां वास्तवतदुभयाभावेन तत्तद्गुणोपाधिभेदेन चावच्छेदकभेदेन जीवेश्वरशुद्धचैतन्यादीनां भेद आस्थेयः। एवं जीवेश्वरयोरप्यवच्छेदकभेदेन भेदो भविष्यतीति नानुपपन्नमत्र किंचिदिति॥

इत्थं सत्संप्रदायाध्वप्राप्तयोः पक्षयोर्द्वयोः।
समर्थनं यथाबुद्धि कृतं प्रीत्यै विपश्चिताम्॥

इति चतुःसूत्री समाप्ता॥



॥ श्रीः ॥

॥ आभोगः ॥



दैत्येन्द्रं वरदर्पितं सरभसं भित्त्वाट्टहासे कृते
दृष्ट्वा यं कमलालया कुशलिनं जैत्रश्रियालंकृतम् ।
संहृष्टा परिषस्वजे सुरगणैः संस्तूयमानं विभुं
तं लक्ष्मीकुचकुङ्कुमाङ्किततनुं लक्ष्मीनृसिंहं नुमः ॥ १ ॥

महीधरकुलोत्तंसो रामाम्बागर्भसंभवः ।
लक्ष्मीनृसिंहस्तनुते कल्पवृक्षप्रदीपिकाम् ॥ २ ॥

क्व कल्पकतरुर्दिव्यो दुरालोको दुरासदः ।
मादृशैश्चर्मचक्षुर्भिर्मन्दप्रज्ञैस्तथापि तु ॥ ३ ॥

आसाद्य कल्पकतरुं दिशा परिमलोक्तया ।
आलोक्य भक्तिचक्षुर्भ्यामाभोगोऽयं प्रकाश्यते ॥ ४ ॥

आचार्यश्चिकीर्षितस्य ग्रन्थस्य निर्विघ्नपरिसमाप्तये शिष्टाचारपरिपालनाय च कृतं मङ्गलं शिष्यशिक्षायै ग्रन्थतो निबध्नन्नस्य शास्त्रस्य विषयादिकं दर्शयति— **यदज्ञातमिति** । १ तत्परमं ब्रह्म प्रत्यग्रूपेण वर्तमानं नमस्याम इत्यन्वयः । ननु सकलप्रपञ्चाश्रयस्य ब्रह्मणः कथं तद्विरुद्धकर्तृभोक्तृजीवरूपतेत्याशङ्क्य विरुद्धधर्माणां मिथ्यात्वं बहुविधेत्यादिना दर्शितम् । बहुविधस्य नानारूपस्य वियदादेः साधारणस्य कर्तृत्वादेस्तत्तज्जीवासाधारणस्य च जगतो विभ्रमस्य विभ्रममात्रसिद्धस्य धरं धारकं कलितं जीवैरित्यर्थः । प्रकाशमाने ब्रह्मणि कथं जगदारोप इत्यत उक्तमज्ञातमिति । एवमपि नीरूपे ब्रह्मणि कथं जगदारोप इत्यत उक्तं वियदिति । यद्वद्यथा वियदज्ञातं सद्बालैस्तत्स्वरूपमजानानैस्तलमलिनतायोगि कलितम् अवाङ्मुखश्यामम्हाकटाहत्वेन ज्ञातं तद्वद्ब्रह्माप्यज्ञातं जीवनिष्ठाज्ञानविषयीकृतं सज्जगदधिष्ठानत्वेन ज्ञातमित्यर्थः । प्रत्यग्रूपस्य ब्रह्मणः सदादिरूपेण ज्ञायमानत्वादज्ञातत्वमसिद्धमित्यत उक्तमुन्मुद्रेति । उन्मुद्रमुपाधिविशेषानवच्छिन्नं ज्ञानं प्रततमपरिच्छिन्नं सुखं तद्रूपं सद्रूपं चेत्यर्थः । तथा च ब्रह्मणः सदादिरूपेण भानेऽपि यथोक्तरूपेणाज्ञातत्वमविरुद्धमिति भावः । उक्तरूपे ब्रह्मणि प्रमाणं दर्शयितुं श्रुति-

शतेत्याद्युक्तम् । श्रुतीनां यानि शतान्यपरिमितानि शिरांसि वेदान्तास्तैः प्रकटितं प्रकाशितमित्यर्थः । नमस्कारश्च प्रत्यगभेदानुसंधानम्, निर्विशेषब्रह्मणि नमस्कारक्रियाकर्मत्वानुपपत्तेः । अत्र पूर्वार्धे अज्ञातत्वविपर्यस्तत्वाभ्यां ब्रह्म शास्त्रस्य विषयो निर्दिष्टः; जगत्कारणत्वं च तल्लक्षणमुक्तम्; प्रपञ्चस्य कल्पितत्वेन मिथ्यात्वाज्जीवब्रह्माभेदाविरोधश्च दर्शितः । उत्तरार्धे अखण्डानन्दस्फूर्तिः प्रयोजनम्, ब्रह्मणि वेदान्ताः प्रमाणम्, वेदान्तानां ब्रह्मण्येव समन्वय इति च दर्शितम् ॥ १ ॥ प्रतीचो यथोक्तब्रह्मरूपस्फूर्तिरपि दक्षिणामूर्त्युपासना धीना 'अजात इत्येवं कश्चिद्भीरुः प्रपद्यते रुद्र यत्ते दक्षिणं मुखं तेन मा पाहि नित्यम्' इति श्वेताश्वतरोपनिषच्छ्रुतेरिति मनसि निधाय 'नान्दीश्लोको विधातव्यश्चन्द्रनामाङ्क एव
२ सः' इति शास्त्रानुरोधेन चन्द्रत्वेन रूपयन्दक्षिणामूर्तिं नमस्करोति— **बोधेति** । अत्र शंकरमित्यनेन मुक्तिसुखप्रदत्वं दर्शितम् । संसारेत्यादिविशेषणेन च मुक्त्युपपादकतयानर्थनिवृत्तिर्दर्शिता । तदर्थश्च– संसारोऽहंममाध्यासलक्षणः, स एव सहस्ररश्मिस्तापकत्वसाम्यात्, तज्जनिताः क्लेशा अविद्यास्मितारागद्वेषाभिनिवेशाख्याः, तन्निवर्तकमिति । सोम इति श्लिष्टरूपकेण उमासहायत्वापरित्यागेनैव चन्द्रत्वेन रूपणं कृतम्, उमाया ब्रह्मविद्याप्रदत्वस्य 'तन्नाकाशे स्त्रियमाजगामोमां हैमवतीं बहु शोभमानाम्' इति तलवकारिणामुपनिषदि प्रसिद्धत्वात् 'उमासहायम्' इति श्रुत्या तत्सहितस्यैव ध्येयत्वश्रवणाच्च । प्रसिद्धे चन्द्रे किरणसहस्रैर्व्योमगततिमिरनिवर्तकत्वं समुद्रवृद्धिहेतुत्वं च प्रसिद्धम् । योगिचिन्त्यत्वं च तस्य द्विजराजतया तदुपास्यत्वात् अर्चिरादिमार्गमध्यवर्तिचन्द्रलोकाधिपतित्वेन तत्रत्यैर्योगिभिरुपास्यत्वाच्च । अतश्चन्द्रत्वरूपणोपयोगितया शंकरेऽपि तद्धर्मान्दर्शयितुं बोधेत्यादिविशेषणानि । बोधैस्तत्त्वंपदान्तवाक्यश्रवणजन्यैस्तत्तदन्तःकरणवृत्त्यवच्छेदकृतभेदैश्चित्स्वरूपैरेवाभीशुशतैः किरणशतैः हृदेव व्योम तद्गतमबोधतिमिरं स्वरूपाज्ञानान्धकारं दारयन् । अनेन श्रवणमुक्तम् । प्रज्ञा ऊहापोहकुशला बुद्धिः, सैव वारिधिः, तमुन्नतिं प्रापयन्नित्यर्थः । अनेन मननमुक्तम् । सदोदेतीत्यनेन प्रसिद्धचन्द्राद्विशेषोक्त्या व्यतिरेकोऽपि दर्शितः । निर्मलयोगिचिन्त्येत्यनेन निदिध्यासनमुक्तम्। तदनेन मुमुक्षुणा श्रवणादिभिर्दक्षिणामूर्तिरूपमुपास्यमित्युक्तं भवति ॥ २ ॥ श्रीनृसिंहस्य बन्धनिवर्तकत्वम् 'आत्मबन्धहरः' इत्यादिश्रुतिसिद्धमिति मोहनिवर्तनेन तस्यैव
४ प्रत्यग्रूपेणाविर्भावं प्रार्थयते— **माद्यदिति** । माद्यन्प्रपञ्चरूपेणोज्जृम्भमाणो यो मोहो मूलाविद्या, स एव महेभः, तस्य कुम्भौ आवरणविक्षेपांशौ, तयोर्दलनं सम्यगनुष्ठितैः श्रवणादिभिरसंभावनाविपरीतभावनानिवृत्त्या शिथिलीकरणम्, तेन प्रोद्भूतः संजातो निर्दुष्टमुक्ताफलसदृशः; अथ वा सन् सत्यवस्तुविषयकत्वात् मौक्तिको मुक्तिप्रयोजनको यो द्यौतोऽखण्डाकारवृत्तिरूपो भक्तजनसमवेतः, तेनालंकृतं सविलासाविद्यानिवृत्त्याभिव्यक्तं सत्सुखाद्वयं वपुः स्वरूपं यस्येत्यर्थः । इतरदेवतापेक्षया श्रीनृसिंहस्य भक्तजनवात्सल्यं सर्वान्तर्यामित्वप्रकटनं च विशेषं दर्शयितुमाह— **प्रह्लादेति** । प्रह्लादोक्ता या गीः 'त्वय्यस्ति भगवान्विष्णुर्मयि चान्यत्र चास्ति सः' इत्यादिरूपा, तस्याः प्रमाणं प्रामाण्यसंपादनम्, तदेव विधिः कार्यं तदर्थमित्यर्थः । 'चर्मणि द्वीपिनं हन्ति' इत्यादिवन्निमित्तसप्तमी । श्रीनृसिंहस्यैव जीवरूपेण प्रविष्टत्वात्प्रकटीभवनं सिद्धमिति कथं तत्प्रार्थनमित्याशङ्क्य सदादिरूपेण प्रकटने सि-

द्धेऽपि निष्प्रपञ्चाखण्डसच्चिदानन्दरूपेण प्रकटनं प्रार्थ्यत इत्यखण्डितमिति क्रियाविशेषणेन दर्शितम् ॥ ३ ॥ ग्रन्थनिर्माणसामर्थ्याय सरस्वतीं नमस्करोति—**ललितैरिति**। अत्र वर्णसमूहरूपपदविन्यासानां पदविन्यासैरित्यनेन निर्दिष्टानां पुनरावृत्तेन तेनैव पदेन चरणविन्यासत्वेन विद्वद्वदनानां रङ्गस्थलत्वेन वेदाविरुद्धानां शास्त्राणां वेदानां च वाद्यत्वेन रूपणाच्च सरस्वत्या नर्तकीरूपत्वं गम्यम् ॥ ४ ॥ स्वाभिलषितसर्वार्थसिद्धये सर्वाभीष्टप्रदत्वेन प्रसिद्धं गणेशमपि नमस्करोति— **भजमानेति**। भजमानानां सेवमानानां तत्तत्कार्येषु प्रसक्ता विघ्ना एव भित्तयः, ५
तासां प्रभित्तिः प्रभेदनसाधनकुद्दालः । करणे किन्प्रत्ययः । न तु भावे, 'विदारणे भिदान्यत्र भित्तिः' इति शाब्दिकसंकेतात् । तमिवेत्यर्थः । महागणेशमिति महत्त्वविशेषणेन दशभुजस्य महागणपतेर्वामाधःकरेण स्वविषाणधारणस्य शुण्डाग्रस्थितकलशस्थितरत्नवर्षेण भक्तेभ्यः सकलसंपत्प्रदानस्य च मन्त्रशास्त्रप्रसिद्धत्वात्स एवोपास्य इति सूचितम् ॥ ५ ॥ चिकीर्षितग्रन्थप्रतिपाद्यत्वनिश्चयाय व्यासाचार्यौ श्लोकद्वयेन नमस्करोति— **यन्न्यायेति**। यस्य व्यासस्य न्यायसूत्रैर्ग्रथिता आत्मबोध एव सौरभ्यं तद्गर्भा वेदान्तवाक्यपद्ममालेत्यर्थः ॥ ६ ॥ **भगवत्पादः** श्रीशंकराचार्यः ॥ ७ ॥ 'यस्य देवे परा भक्तिः' इति शास्त्रमनुसरन्गुरुपरमगुरुविद्यागुरून्क्रमेण नमस्करोति— **स्वयंप्रभेत्यादिना**। स्वप्रकाशसुखरूपं ब्रह्मैव भक्तानुग्रहाय दयया स्वीकृतशरीरं सदन्वर्थानुभवानन्दपदप्रतिपाद्यमित्यर्थः ॥ ८ ॥ **विद्येति**। विद्या ब्रह्मविद्या, तदुपायः प्रश्रयो विनयः, संयमश्च, धारणाध्यानसमाधित्रयमेकवस्तुविषयं संयमः; तथा च योगसूत्रम्—'त्रयमेकत्र संयमः' इति । शुभफलाः परमपुरुषार्थफलाः ॥ ९ ॥ **ग्रन्थेति**। सुखप्रकाशाख्यं शशिनं विद्यागुरुं नौमीत्यन्वयः । प्रसिद्धे चन्द्रे उदयमात्रेण कुमुदमुकुलविकासकत्वं ततो बहिर्निर्गमनेन स्वरूपप्रकाशनाख्यव्याक्रियामात्रेण तमोनिवर्तकत्वं ततः सकलविरणपरिपूर्णस्य गोशब्दवाच्यैः स्वकिरणैस्तारकशब्दवाच्यप्रोद्यन्नक्षत्रदीप्तिमदखण्डाकाशप्रकाशकत्वं च प्रसिद्धम् । तान्धर्मान्शशित्वरूपणोपयोगितया गुरौ दर्शयति— **ग्रन्थेत्यादिना**। ग्रन्थानां ग्रन्थयः कठिनभागाः तन्नामका मुकुलाः, अनभिव्यक्तत्वसाम्यात्, यस्य गुरोरुदये संनिधाने सति स्फुटीभवन्ति, यत्र गुरौ व्याकुर्वत्यपि व्याख्यानमारभमाणेऽपि लोकस्य मोहाख्यं तिमिरं संशाम्यति, यस्य गोभिर्वाग्भिः परमं व्योम ब्रह्म नीराज्यते शिष्येभ्यः प्रकाश्यते । कथमिव ? प्रोद्यत्तारकदिव्यदीप्ति यथा तथा । दिवि हार्दाकाशे भवा दीप्तिरखण्डाकारवृत्तिः, सैव तारिकेति कर्मधारयः । 'पुंवत्कर्मधारय—' इति सूत्रेण पुंवद्भावः । प्रोद्यन्ती सविलासाविद्यानिवर्तनेनोज्जृम्भमाणा तारका दिव्यदीप्तिर्यस्मिन्कर्मणीति बहुव्रीहिः । तथा च शिष्याणामुपदेशकाल एव तन्महिम्ना विनैव मननादिकमुदेति साक्षात्कार इति भावः ॥ १० ॥ स्वव्याख्येयग्रन्थगौरवप्रकटनाय तत्कर्तारं स्तौति— **वैदिकेति**। नयैर्न्यायैर्विजिताः प्रतिवादिनो दैत्या येनेत्यर्थः । 'असुर्या नाम ते लोका अन्धेन तमसावृताः । तांस्ते प्रेत्याभिगच्छन्ति ये के चात्महनो जनाः' इति श्रुतिप्रसिद्धं सकलवेदान्तप्रतिपाद्यसच्चिदानन्दाद्वितीयब्रह्मप्रद्वेषिणां वाद्यन्तराणां दैत्यत्वम् । विबुधेश्वरा विद्वच्छ्रेष्ठाः तेषामाचार्यः स्वकृतग्रन्थव्याजेन तत्त्वोपदेशात्पूर्वाचार्यैः सुरक्षितं वैदिकमार्गं तत्कालसमुद्यदुद्दामदुर्वादिदैत्यविजयेन वेद्युपजीविनां सुराणां मार्गं विबुधेश्वरस्य देवेन्द्रस्याचार्यो बृहस्पतिरिव सद्योऽपि सुरक्षितं चक्रे यः स जयति- ६

त्यर्थः ॥ ११ ॥ अपेक्षितसकलार्थप्रदत्वेन कल्पकवृक्षतया रूपयंश्चिकीर्षितं ग्रन्थं प्रतिजानीते— **रूढोऽयमिति**। वेद एव काण्डो जलधिजलम्, तस्माद्रूढ उत्पन्नः, नयमया न्यायमया विटपाः शाखा यस्य सः। वृक्षे बहुषु विटपेषु वीनां पक्षिणां चारेण संचारेण भूरिशाखाविचारत्वं प्रसिद्धम्, तदत्रापि दर्शयति— **भूरीति**। भूर्यः शाखा वेदभागाः, तेषां विचारो मीमांसा यस्य सः, सन्तः शोभना असाधुत्वादिदोषरहिता वर्णाः पदादिरूपा अनन्तानि पर्णानि यस्य सः, समुदितः समुत्पन्नः परमब्रह्मबोधः अखण्डाकारा वृत्तिरेव प्रसूनं यस्य सः। ब्रह्मभावस्याग्रफलस्य हस्तप्राप्यत्वं स्वरूपत्वेन संनिहितत्वात्। जीवविश्वेशौ जीवपरमात्मानौ वीन्द्रौ पक्षीन्द्रौ प्रतिपाद्यौ यस्य सः। संसार एवार्कः, तदुत्पन्नास्तापा आध्यात्मिकादिदुःखानि, तदुपशमन-
७ समर्थः। तादृशः कल्पवृक्षस्तन्यत इत्यर्थः। **श्रीमदिति**। शरीरमेव शारीरकम्। कुत्सितार्थे कप्रत्ययः। तन्निवासी शारीरको जीवः, तमधिकृत्य प्रवृत्तो विचारो मीमांसा। तस्याः श्रीमत्त्वं शब्दसारत्यमर्थगाम्भीर्यं न्यायदार्ढ्यं श्रुतिस्मृतीतिहासपुराणानामैककण्ठ्यं च। तच्च श्रीशंकरभगवत्पादकृतभाष्यरूपाया एव नान्यासामिति तेन विशेषणेन तासामनुपादेयत्वं सूचितम्। तद्व्याख्याया इत्यर्थः। समाप्त्यादीत्यादिपदेन प्रचयगमनमुक्तम्। प्रतिजीवमविद्याभेदाभ्युपगमाद्दीकायामविद्याद्वित्वोक्तिरयुक्तेत्याशङ्क्य प्रत्येकजीवाभिप्रायेणेत्याशयेनाह— **एकेति**। ननु ब्रह्मणो वियदाद्याकारेण विवर्तमानत्वे स्वरूपविलयापत्तिरित्यत आह—**अतत्त्वत इति**। मृत्पिण्डादेरिव तत्त्वतोऽन्यथाभाव एव स्वरूपविलयो न तु रज्ज्वादेः सर्पादिभाववदतत्त्वतोऽन्यथाभावेऽपीति भावः। तत्प्रतिबिम्बत्वेन ब्रह्मप्रतिबिम्बत्वेन। यद्यपि टीकाकारेण जीवानां प्रतिबिम्बत्वं नेष्यते अवच्छिन्नस्यैव जीवत्वसमर्थनात्, तथापि प्रतिबिम्बपक्षोऽपि संभवतीति सूचयितुं तथा व्याख्यातम्। जीवानां ब्रह्मविवर्तत्वे मिथ्यात्वापत्या मोक्षानुपपत्तिरित्यरुचेराह— **अथ वेति**। श्रुत्यादिषु भौतिकानां हिरण्यगर्भसृष्टत्वकीर्तनात्तस्य स्वातन्त्र्येणैव तत्स्रष्टृत्वमिति भ्रमव्युदासाय ब्रह्मण एव चराचरस्रष्टृत्वम् 'इदꣳ सर्वमसृजत, यदिदं किं च' इत्यादिश्रुतिसिद्धं विशिष्य कीर्तितमित्यर्थः। **अज्ञातत्वेति**। अविद्यासाचिव्यस्य तद्विषयतारूपत्वेन तत एवाज्ञातत्वकथनादिति भावः। **ज्ञानपदसूचितमिति**। अपरिमितत्वस्य सुख इव ज्ञानेऽप्यन्वयादिति भावः। शास्त्रयोनित्वाधिकरणन्यायेन वेदकर्तृत्वेनैव सर्वज्ञत्वसिद्धेरितरद्वयर्थमित्यरुचेराह— **यद्वेति**। **सर्वज्ञतेति**। नित्यमित्यस्य सर्वज्ञतादावप्यन्वयः। आत्मनः स्वरूपस्य सम्यक्सामस्त्येन बोधः स्फूर्तिः। अधिष्ठातृत्वं नियन्तृत्वम्। निरुक्तादीनीत्यादिपदेन च्छन्दोज्योतिषशीक्षाकल्पव्याकरणानि गृह्यन्ते। **ईश्वरायेति**। ऐश्वर्यमत्र सार्वज्ञ्यं विवक्षितम्; एवं च सर्वज्ञायेति तदर्थः; तथा च निघण्टुः— 'वेधास्त्रिषु स्यात्सर्वज्ञे नरि विष्णुविरिञ्चयोः' इति। व्यासस्य सर्वज्ञत्वे हेतुकथनार्थं ज्ञानशक्तीत्युत्तरार्धमित्याशयेनाह— **हरेरिति**। 'तॄ प्लवनतरणयोः' इत्यस्माद्धातोर्भावे 'ऋदोरप्' इत्यपि कृते तर इति रूपम्। ततः स्वार्थिकेऽप्रत्यये कृते तर एव तारः। ततः अवेत्यनेन योगे अवमतस्तारः प्राप्तिः। प्राप्तेरवमतत्वं च लीलापरिगृहीतादिव्यमङ्गलविग्रहान्निकृष्टशरीरप्राप्तित्वात्। स यस्मिन्निति बहुव्रीहिप्रदर्शनम्। व्यधिकरणबहुव्रीहिरप्यभियुक्तसंमत एव, 'न धातुलोप आर्धधातुके' इति पाणिनिसूत्रे धातोर्लोपो यस्मिन्निति बहुव्रीह्याश्रयणात् 'स-

च्छास्त्रजन्मा हि विवेकलाभः' इत्यादिप्रयोगाच्च । एतेन— भावे 'ऋदोरप्' इत्यपि कृते अवतर इति प्रसङ्गात्करणाधिकरणयोः 'अवे तॄस्त्रोर्घञ्' इत्यनेन सूत्रेण घञि कृते अवतार इति रूपम् । एवं च ज्ञानशक्तेरवतार इति षष्ठीतत्पुरुष एव । प्राप्तिर्यस्मिन्सोऽवतार इत्यवतारपदार्थप्रदर्शनमेव ग्रन्थे कृतं न तु बहुव्रीहिप्रदर्शनम्— इति परिमलोक्तं चिन्त्यम्; ज्ञानशक्तेरवतारः प्राप्तिर्यस्मिन्स तथोक्त इति कृत्स्नपदव्याख्यानस्यैव स्वरसतो दर्शनात्, 'अवतारान्करोत्येषा' 'कृतधरणितलापूर्वहंसावतारः' इत्यादिप्रयोगदर्शनेनावतारशब्दस्य भावेऽपि घञन्तत्वमाश्रित्य प्राप्त्यर्थकत्वस्यावश्यमभ्युपगन्तव्यत्वाच्च । व्यासे विष्णुशक्तिसद्भावं विष्णुपुराणवचनेन द्रढयति— **तथा चाहेति** । विष्णोर्व्यासरूपत्वं च स्वकीयाया ज्ञानशक्तेस्तत्रावतारणादिति ध्येयम् । हितमिति क्रियाविशेषणम् ॥ अत्र सूत्रे ब्रह्मविचारकर्तव्यता द्रश्यते । तद्व्याख्यानार्थं प्रवृत्ते भाष्ये अध्यासाक्षेपसमाधाने टीकायां विषयप्रयोजनाक्षेपः । ततश्च कथमिदं संगच्छतामित्याशङ्क्य सूत्रसूचितयोर्विषयप्रयोजनयोरध्यासाधीनत्वादाक्षेपसमाधानाभ्यामध्याससमर्थनेन विषयप्रयोजने साधयितुमेव भाष्यं प्रवृत्तमिति कथयितुमथेत्यादिटीकेत्याह— **इह भगवतेति** । सूत्रे अथशब्देन साधनचतुष्टयसंपत्त्यानन्तर्यकथनात्साधनचतुष्टये च मुमुक्षुत्वमनुप्रविष्टमिति तेन पदेन सप्रयोजनत्वं ब्रह्मजिज्ञासापदेन ब्रह्मणो जिज्ञास्यत्वकथनासंदिग्धत्वं च सूचितमित्यर्थः । 'आह कोऽयम्' इत्यादेरपि भाष्यस्याध्यासविषयत्वात्तदपि भाष्यमध्यासाक्षेपादिपरतया व्याख्यातुमथेत्यादिटीकेति भ्रमः स्यात् । न च तद्भाष्यमध्यासाक्षेपादिपरं लक्षणादिपरत्वादित्यत उक्तम्— आह कोऽयमित्यतः प्राक्तनेति । बहुग्रन्थव्यवधानादुत्तरावधिं दर्शयति— **आशयवानिति** । 'अथ यदसंदिग्धम्' इत्यथशब्दो न मङ्गलार्थः, तस्यादावेव कृतत्वात्; नानन्तर्यार्थः, अवधेरलाभात्; नापि प्रश्नार्थः, तथात्वे तदवसाने 'इति चेत्' इति भवितव्यतया इत्याशयवानिति कथनायोगादित्यत आह— **अथशब्द इति । प्रतिग्रन्थेति** । शास्त्रीयविषयप्रदर्शनपरेण मङ्गलश्लोकेनैव जगत्कारणे निर्विशेषे ब्रह्मणि भाष्यतात्पर्यस्य वर्णितत्वात्प्रतिवाक्यव्याख्यानप्रारम्भस्फुटीकरणार्थमथशब्द इत्यर्थः । एवं च टीकायामथेति नोत्तरपदैरन्वितम्, किं तु विच्छिन्नम्, योग्यतया च भाष्यविभजनं प्रारभ्यत इति तदर्थ इति ध्येयम् । ननु युष्मदस्मदित्यादिभाष्यस्य विषयप्रयोजनाक्षेपसमाधानपरतामाचक्षाणेन टीकाकृता तद्भाष्यमेवं व्याख्यातम्— शास्त्रमिदमनारभ्यम्, विषयप्रयोजनशून्यत्वात्; न तावद्ब्रह्म विषयः, तस्य प्रत्यगात्मतयाहमनुभवेनैव निश्चितत्वात्ततोऽधिकस्य वेदान्तप्रतिपाद्यस्यासिद्धेः; नाप्यनर्थनिवृत्तिः प्रयोजनम्, सत्यस्य निवृत्त्ययोगान्निवर्तकासंभवाच्च; न चाहंप्रत्ययस्य देहेन्द्रियादितादात्म्याध्यस्तमिथ्यात्मविषयकत्वात्तद्व्यतिरिक्तस्याकर्तृभोक्तृरूपस्य नाहंप्रत्ययगम्यत्वमिति विषयसिद्धिः अनर्थतद्धेत्वोर्मिथ्यात्वात्सम्यग्ज्ञानेन तन्निवृत्तिरिति प्रयोजनसिद्धिरपीति वाच्यम्, अध्यासस्यैवासंभवात्; न हि विविक्तत्वेन भासमानयोरध्यासः संभवतीति । एवं सति तत्पुनर्ब्रह्मेत्यादिभाष्येण पुनरुक्तमिदं भाष्यम्, अनिश्चितत्वेन विषयत्वाक्षेपपरत्वादुभयोरपि भाष्ययोरित्यत आह— **इहेति** । ननु यदसंदिग्धमित्यादिटीकया ब्रह्म न जिज्ञास्यमसंदिग्धत्वादप्रयोजनत्वाच्चेत्यनुमानं सूचितम्, तत्र व्यापकमजिज्ञास्यत्वम्, तद्विरुद्धस्य जिज्ञास्यत्वस्योपलब्धिरिति विरुद्धमापद्यत इति कथं व्यापकविरुद्धोपलब्धिरिति टीकया

सिद्धान्त्यनिष्टापादनमित्याशङ्क्य यथोक्तानुमाने हेत्वोरप्रयोजकत्वाशङ्कायां जिज्ञास्यत्वव्यापकत्वात्संदिग्धत्वसप्रयोजनत्वयोर्व्यापकाभावे व्याप्याभावो युक्त इति नाप्रयोजकत्वमित्येवमभिप्राया टीकेत्याह-- **जिज्ञास्यत्वेति**। **मुमुक्षुणेति**। अत्र ब्रह्म न विचार्यसंदिग्धत्वादित्येवानुमानशरीरं यद्रूपं यं प्रत्यसंदिग्धं तत्तेन न विचार्यमिति सामान्यव्याप्तिमभिप्रेत्य प्रकृताभिप्रायेण मुमुक्षुकीर्तनम्, न तु साध्यावयन्तर्भावेण; मुमुक्षुणेति साध्यैकदेशनिर्देशः तदनन्तरं ब्रह्मेति पक्षनिर्देशः ततो न विचार्यमिति साध्यैकदेशान्तरनिर्देश इत्यापत्त्या ग्रन्थकृतोऽचातुर्यापत्तेः, सामान्यव्याप्त्याश्रयणस्यावश्यिकतया तत एव यथोक्तसाध्यलाभे विशिष्य तत्कीर्तनवैफल्याच्च। एवं च परिमले मुमुक्षुणेत्यादेः साध्यावयप्रवेशमाश्रित्य विवक्षया क्लेशेन ग्रन्थव्याख्यानं चिन्त्यम्, यथाश्रुतस्यैव सरसत्वात्। 'बृह बृहि वृद्धौ' इति स्मरणेन बृंहतेरपि बर्हतिसमानार्थत्वात्पौनरुक्त्यमाशङ्क्य णिजर्थो विवक्षित इति परिहरति-- **देहा-**
१० **दीनामिति**। टीकोक्तं देहालम्बनत्वं देहमात्रालम्बनत्वम्, तथात्वे अहं जानामीति
११ ज्ञानाश्रयत्वप्रतीत्ययोगादित्यत आह-- **आत्मैक्येति**। ननु तदालम्बनत्वे हीत्यादिटीकया कथं परिहारः उक्तप्रतिसंधानस्य देहतादात्म्याध्यासाविरोधित्वादित्याशङ्क्य, आत्मा देहादिभ्यो भिद्यते तेषु व्यावर्तमानेष्वप्यनुवर्तमानत्वात्, न चासिद्धिः, उक्तानुसंधानादिति युक्तिसहकृतेनाहंप्रत्ययेन भेदग्रहान्नाध्यास इत्यभिप्रायमाह-- **देहादिति। देहैक्यं मन्वानमिति**। 'तदेवेदं शरीरम्' इति प्रत्यभिज्ञानादिति भावः। टीकायाम्-- **स्वप्नान्ते**। योगमहिमनिर्मितत्वेन व्याघ्रशरीरस्य कृत्रिमत्वम्। टीकायाम्-- बुद्धिमनसोरिति, अहं मनसा संदिहे बुद्ध्या निश्चिनोमि इति कर्तृकरणभावावगमादिति भावः। यथाश्रुत इति। आरोपित इति न व्याख्येयमिति भावः। टीकायाम्-- संसारश्चेति। अहंममाध्यासादिरूपः संसार आत्मयाथात्म्यानुभवेन तदननुभवनिवर्तनेन निवर्तनीय इत्यर्थः। स चानुभवः किमनादिरुतागन्तुकः? नाद्य इत्याह टीकायाम्-- स चेदिति। द्वितीयेऽपि किं सर्वजनीनप्रत्यगात्मविषयक एव सः उताकर्तृभोक्तृब्रह्माभिन्नविषयक इति विकल्प्य प्रथमकल्पे अननुभवस्य निवर्तनीयस्यासिद्धिरित्याह
१२ टीकायाम्-- कुतश्चेति। द्वितीयं शङ्कते-- **नन्विति**। टीकायाम् अन्यथयितुम् अन्यथा कर्तुम् अकर्तृभोक्तृरूपं कर्तुमित्यर्थः। **युक्तमिति निर्देशादिति**। भाष्य इति शेषः। **पुरुषान्तरवचन इति**। आत्ममात्रवाचकत्वेऽपि संबोध्यत्वं प्रयोगोपाधिमाश्रित्य पुरुषान्तरे प्रयोगात्तत्प्रतिपादक इत्यर्थः। **तथा त्वंकारेति**। त्वमहमिति गौणं सामानाधिकरण्यमित्यर्थः। **दृश्यते चेति**। पटः शुक्लः इति शुक्लशब्दो गुणवाचको गुणिनि निरूढलक्षणया प्रयुक्तः, रथाङ्गशब्दस्तु चक्रवाकशब्दैकदेशचक्रशब्दपर्यायतया तद्वाच्ये चक्रवाके सांप्रतिक्या संप्रतिभवया लक्षणया प्रयुक्त इत्यर्थः। एवं गौणत्वाविशेषेऽपि निरूढसांप्रतिकते युक्ते इति भेदस्फुटीकरणार्थं सांप्रतिकीं गौणीमाश्रित्य भाष्ये युष्मच्छब्दप्रयोग इति भावः। इदमस्मत्प्रत्ययगोचरयोरिति वक्तव्य इति टीकया युष्मदस्मच्छब्दयोः पराक्त्वप्रत्यक्त्वलक्षकत्वकथनेन युष्मदस्मत्प्रत्ययगोचरयोरिति पराक्प्रत्यक्प्रत्ययगोचरयोरित्येवं व्याख्यातम्। स्फुटसामानाधिकरण्यप्रत्ययोग्यपराक्त्वविलक्षणपराक्प्रतिपत्त्यर्थं च युष्मच्छब्देन तन्निर्देशः। अत एव 'प्रत्ययोत्तरपदयोश्च' इति सूत्रेण प्रत्यये उत्तरपदे च परतो युष्मदस्मदोर्मपर्यन्तस्य यथाक्रमं

त्व म इत्यादेशयोर्विधानात् त्वदीयं मदीयं त्वत्पुत्रो मत्पुत्रः इत्यादिवत् त्वन्मत्प्रत्ययगोचरयोः इति भवितव्यम्, 'त्यदादीनि सर्वैर्नित्यम्' इत्येकशेषविधानादस्मच्छब्दस्यैव शेषः स्यादिति च शङ्काद्वयं निरस्तम्, अत्र युष्मदस्मच्छब्दयोर्लाक्षणिकतया सर्वनामसंज्ञावैधुर्येण यथोक्तकार्याप्रसक्तेः मुख्ययोरेव सर्वादिगणपठितत्वेन तत्रैव तत्कार्यप्रवृत्त्यौचित्यात्। यूयं वयमिति प्रत्ययगोचरयोरिति बहुवचनान्तस्यैव प्रयोगाभ्युपगमेन 'प्रत्ययोत्तरपदयोश्च' इति सूत्रेण च 'त्वमावेकवचने' इत्यधिकारबलादेकार्थवाचिनोरेव युष्मदस्मदोर्मपर्यन्तस्य त्वमादेशविधानान्न प्रकृते तत्प्रसक्तिरित्यप्याहुः। विषयविषयिणोरिति भाष्यव्याख्यानार्थं चित्स्वभाव इत्यादिटीका। तत्र बुद्धिरन्तःकरणम्, इन्द्रियाणि ज्ञानेन्द्रियाणि कर्मेन्द्रियाणि च, विषया वियदादयः शब्दादयश्च। एतेषां विषयशब्दवाच्यत्वमवयवव्युत्पत्त्या दर्शयितुमेते ह्रीत्यादिटीका। अवबध्नन्तीति। 'षिञ् बन्धने' इति स्मरणादिति भावः। **सहानवस्थानमिति**। विरुद्धस्वभावयोरितिपदनिर्देश्यमिति भावः। दृष्टान्ते परस्परात्मत्वेनास्फुरणमसिद्धमिति शङ्कते– **नन्विति**। यस्य भेदग्रहस्तस्य तदस्तीति परिहरति– **तद्धेतोरिति**। वृत्तिशब्दव्याख्यानार्थं **वर्तने इति**। स्वरूपे इत्यर्थः। **अविवेकादिति**; भेदाग्रहादित्यर्थः। **तन्मात्रेति**; विरोधेन यथाभाष्यमितरेतरभावानुपपत्तिमात्रसाधने वास्तवतादात्म्याभावस्य सिद्धान्तिनाप्यङ्गीकृतत्वेन सिद्धसाधनापत्तेरित्यर्थः। **धर्मिणोरपीति**। धर्मिधर्मयोरिव धर्मिणोः संसर्गाध्यासानभ्युपगमादिति भावः। टीकायाम्––तद्धर्मीणां त्विति। तथा च चिदात्माध्यस्तकर्तृत्वभोक्तृत्वाद्यनर्थनिवृत्तिरेव शास्त्रस्य प्रयोजनमिति भावः। धर्माध्यासस्यापि विवेकाग्रहपूर्वकत्वात्कथं बुद्धिपूर्वकपरिवर्तनवाचिविनिमयशब्द इत्यतो व्याचष्टे– **व्यत्यास इति**। तथा च व्यत्यासमात्रे लक्षणया प्रयुक्त इति भावः। नीरूपस्यापि गगनस्य कूपादौ प्रतिबिम्बदर्शनाद्वचभिचार इत्यत आह– **गगनस्य त्विति**। नन्वात्मनो वस्तुतः प्रतिबिम्बासंभवेऽपि गगनस्येव प्रतिबिम्बितत्वभ्रमोऽस्तु; तावतापि तदेकलोलीभूते देहादौ धर्माध्याससंभवादित्याशङ्क्य युज्यते गगनैकलोलीभूतालोकप्रतिबिम्बे गगनप्रतिबिम्बत्वभ्रमेण गगनस्य सलिले प्रतिबिम्बितत्वभ्रमः; प्रकृते तु नात्मैकलोलीभूतं देहादौ प्रतिबिम्बयोग्यं किंचिदस्ति येन तत्प्रतिबिम्बे आत्मप्रतिबिम्बितत्वारोपेण तद्द्वारा देहादावात्मप्रतिबिम्बभ्रमः स्यादित्याह– **आत्मनास्त्विति**। पारिशेष्यमुपपादयन्नाह– **धर्माध्यासो हीति**। नन्वत इत्यादिभाष्ये इतरेतरभावानुपपत्त्या अध्यासाभावसाधनं दृश्यते तदनुपपन्नं तस्या इतरेतरभावप्रतीत्यनुपपत्तिरूपाया अध्यासाभावत्वेन साध्याविशेषादित्याशङ्क्य, अनुपपत्तिरूपपत्त्यभावः ततश्च विवेकाग्रहरूपाध्यासोपपत्त्यभावेन हेतुना अध्यासाभावः साध्यत इति न साध्याविशेष इत्याशयेनाह–– **अध्यासानुपपत्तिमिति**। अथ वेत्यादिग्रन्थः केषुचित्कोशेषु दृश्यते; स प्रौढिवादः, भाष्ये विषयविषयिणोरध्यासानुपपत्तेरेव दर्शनेन विषयविषयिप्रतीतेरध्यासलक्षणाभावप्रदर्शनपरत्वायोगात्, एतदुक्तं भवतीत्युत्तरटीकाविरोधाच्चेति ध्येयम्। इत्थंभावमेव दर्शयति– **चिदात्मन इति**। चिदात्मनो यदैक्यं तस्य विषये आरोप इत्यर्थः। **भाष्यसूचितामिति**। इतरेतरविवेकेनेत्यंशेनेत्यर्थः। टीकायाम् अभिदधतीति शत्रन्तं बहुवचनान्तं पदम्। दर्शनीयेत्यस्य विशेष्यमाह–– **सुन्दरीति। अज्ञातत्वं सूचितमिति**। ततश्च विषयत्वसिद्धिरिति भावः। इदमुपलक्षणम्, **कथं चानुपप्लव** इत्यनेन विपर्यासविरोधिना श्रवणादिजन्येन शुद्धात्मसाक्षात्कारेणानर्थनिवृत्तिसं-

१३ १४ १५ १६ १७

भवात्प्रयोजनमपि सूचितामिति द्रष्टव्यम्। टीकायां ज्येष्ठत्वं प्रथमप्रवृत्तत्वम्, न तूपजीव्यत्वम्। अत उपजीव्यविरोधादित्यस्य प्रथमप्रवृत्तप्रत्यक्षविरोधादित्यर्थः, अन्यथा ज्येष्ठस्यापीत्युत्तरशङ्कानुत्थितेः। पौर्वापर्यन्यायेन अनुपदमेव टीकायां प्रदर्शयिष्यमाणेनेति शेषः। ननु टीकायां प्रमितावनपेक्षत्वेऽप्युत्पत्तौ प्रत्यक्षापेक्षत्वादित्यादिशङ्का न युक्ता, आगमज्ञानस्यैव प्रत्यक्षतया आगमस्य तज्ज्ञानस्य वा तत उत्पत्त्ययोगेन तदपेक्षत्वाभावात्तज्जन्यप्रमित्युत्पत्तेस्तदपेक्षत्वेऽपि तस्य कल्पस्य पूर्वटीकयैव निरस्तत्वादित्याशङ्क्य कल्पयोर्भेदं दर्शयन्नाह-- **आगमस्येति**। अनेन स्वकार्ये प्रमितौ यत्प्रमितत्वं भ्रमत्वशङ्कानिरासो विषयपरिच्छेदकत्वं वा तत्रानपेक्षत्वादिति टीका येजिता। **आद्यद्वयं निरस्येति**। अपौरुषेयतयेत्यादिविशेषणद्वयेनेति शेषः। टीकायाम्- तद्विरोधादिति। आगमजन्यप्रमित्यपेक्षितागमप्रत्यक्षजातीयाहमनुभवविरोधादागमेन तत्त्वज्ञानस्यानुत्पत्तिलक्षणमेवाप्रामाण्यमित्यर्थः। **आगमस्य किं प्रत्यक्षेति**। वेदान्तवाक्यजन्यस्य तत्तात्पर्यविषयतत्त्वज्ञानस्येत्यर्थः। **व्यावहारिकेति**। व्यवहारप्रयोजनकेन प्रवृत्त्यादिव्यवहारपर्यन्तं विद्यमानविषयकत्वलक्षणेन प्रामाण्येनेत्यर्थः। टीकायाम्-- अन्यधर्मा इति। ध्वनिधर्मा इत्यर्थः। न चानन्यपरामिति टीकाया अभ्यासे हि भूयस्त्वमर्थस्य भवतीत्यादिटीकया पौनरुक्त्यमाशङ्क्य प्रयोजनभेदादपौनरुक्त्यमाह-- **पूर्वमिति**। विधिवाक्यगतस्य शब्दस्य लाक्षणिकार्थासंभवेऽपि वेदान्तानां किमायातम्, तेषामविधित्वादित्यत आह-**तत्तुल्यमिति**। तौल्ये हेतुः- **अनवगतेति**। 'न विधौ परः शब्दार्थः' इति। नायमागमः, किं त्वनुवादस्य पुरोवादानुरोधितया लाक्षणिकत्वसंभवेऽपि विधावत्यन्तानधिगतार्थज्ञापके यथाश्रुत्येव तदर्थः प्रतिपत्तव्य इति न्यायः, स च वेदान्तेष्वपि तुल्य इति भावः। यद्यपि 'सोमेन यजेत' इत्यादौ मत्वर्थलक्षणाभ्युपगमान्नायं नियमः समस्ति, तथापि बलवद्बाधके सत्येवान्यपरत्वं नान्यथेति भावः। किमुपजीव्यत्वं प्रत्यक्षस्य प्राबल्ये तन्त्रमुत ज्येष्ठत्वमिति विकल्प्य प्रथमं निराकृत्य द्वितीयं निराकारोतीत्याह-- **एवं तावदिति**। अनपेक्षितस्य पूर्वस्यापि बाध्यत्वे जैमिनिसूत्रसंवादमाह टीकायाम्-तथा चेति। **ज्योतिष्टोम इति**। यज्ञशालातो हविर्धानान्निर्गच्छतामृत्विजाम् 'अध्वर्यु प्रस्तोतान्वारभते प्रस्तोतारमुद्गातोद्गातारं प्रतिहर्ता प्रतिहर्तारं ब्रह्मा ब्रह्माणं यजमानो यजमानं प्रशास्ता' इति श्रुतानामृत्विग्यजमानानामित्यर्थः। अपच्छिन्द्यात् विच्छिन्नसंबन्धो भवेदित्यर्थः। **किं पूर्वमिति**। पूर्वोत्पन्ननिमित्तकं प्रायश्चित्तमित्यर्थः। नैमित्तिकस्येति। निमित्ते सति कर्तव्यमित्यवगमपूर्वकस्य पूर्वस्य प्रायश्चित्तस्येत्यर्थः। सौलप्रतिज्ञासूचितं हेतुमाह- **इतरस्येति**। **तद्बाधकतयेति**। पूर्वोत्पन्ननिमित्तकप्रायश्चित्तकर्तव्यतावगमबाधनद्वारा तत्प्रायश्चित्तबाधकतयेत्यर्थः। पूर्वस्यैव परबाधकतयोदयः किं न स्यादित्यत आह-- **पूर्वोदयेति**। श्लोके पूर्वमिति प्रथमान्तं पदम्। पूर्वोत्पन्नज्ञानमित्यर्थः। अनन्यथोत्पादादिति। पूर्वबाधात्मतान्यतिरिक्तेन प्रकारेणोत्पादानर्हत्वादित्यर्थः। दुर्बलप्रमाणेनातिदेशेन कुशानां कथं प्रथमतः प्राप्तिरित्यत आह-- **उपकाराकाङ्क्षिण्यामिति**। विकृतिभावनया प्रथममुपकारस्यैवाकाङ्क्षितत्वेन शराणामक्लप्तोपकारतया तत्प्रापकेण प्रत्यक्षेणापि शरशास्त्रेण न विकृतिभावनापेक्षितोपकारसमर्पणमिति दुर्बलेनाप्यतिदेशेनैव क्लृप्तोपकारकुशविषयेणोपकारमुखेन कुशाः प्रापिता इति कुशा एव

प्रथमं प्राप्ता इत्यर्थः । **निरपेक्षैरिति** । यद्यपि शरशास्त्रं चोदकापेक्षम् 'शरमयं बर्हिर्भवति' २२
इति बर्हिःकार्ये शरविधानात्, तथापि न स्वबोध्ये कुशांशे तदपेक्षेति भावः । ततश्च यथा चरमभाव्यपच्छेदनिमित्तकप्रायश्चित्तकर्तव्यताबुद्ध्या पूर्वापच्छेदनिमित्तकप्रायश्चित्तकर्तव्यताबुद्धेस्तस्मिन्प्रयोगे भ्रमत्वापादनं बाधः, तथैव वेदान्तवाक्यजन्यया चरमभाविन्यापि सच्चिदानन्दब्रह्माभेदबुद्ध्या निरपेक्षया कर्तृत्वादिविशिष्टविषयिणी प्रत्यक्षबुद्धिर्बाध्यत इत्यर्थः । ननु— निरवकाशस्य प्रत्यक्षस्य कथं बाधः? न च व्यावहारिकविषये सावकाशत्वम्, तस्यापि कालान्तरे बाध्यत्वात्प्रातीतिकप्रामाण्यवद्व्यावहारिकप्रामाण्यस्याप्यप्रामाण्यत्वात्; न च निरवकाशस्यापि शुक्तिरजतज्ञानवदत्यन्तबाधे को दोष इति वाच्यम्, तस्य दोषमूलकत्वेन वैषम्यात्- इत्याशङ्क्य प्रत्यक्षस्यापि तुल्यं दोषमूलकत्वं वादिसंप्रतिपत्तेरिति दर्शयितुमपि चेत्यादि टीकेत्याह— **एवं तावदिति** । अहमिहेत्यादिप्रतीतेर्देहप्रादेशिकत्वमेव विषय इति वदन्प्रष्टव्यः— किं देहगतत्वेनैव प्रादेशिकत्वं विषयः, उतात्मगतत्वेन? आद्येऽपि किं शुद्धस्यैव देहस्य धर्मः किं वा शबलस्य आहो उपचरितात्मभावस्येति विकल्प्य तत्र कल्पद्वयं निराकर्तुं न हि तदैवमिति टीका । तत्र शुद्धदेहविषयत्वेऽहमिति सामानाधिकरण्यं न स्यादिति प्रथमकल्पनिराकरणं सिद्धवत्कृत्य द्वितीयकल्पनिराकरणं स्फोरयति— **तव मत इति** । अध्यासमाक्षिपतस्तव मत इत्यर्थः । तृतीयं शङ्कते— **नन्विति** । अस्मिन्कल्पे ज्ञातृत्वं मुख्यमुपचरितं वा, द्वयमपि निराकर्तुं गौणत्वे वेति टीका । तत्र यथोपचरिताग्निभावे माणवके दग्धृत्वानुल्लेखस्तथैव 'जानान' इति देहे ज्ञातृत्वोल्लेखो न स्यादित्येवं प्रथमकल्पनिराकरणपरतया टीकां योजयति— **उपचरितेति** । द्वितीये जानान इति व्यर्थं स्यात्, वक्त्रा स्वज्ञानाप्रकाशनादित्येवं टीकां योजयंस्तं कल्पमाशङ्क्य निराकरोति— **न चेति** । २३
इदानीमात्मगतत्वेनैव प्रादेशिकत्वं विषय इति कल्पमुत्थापयति— **अथेति** । प्रादेशिकत्वं प्रदेशवर्तित्वम् । अग्निहोत्रशब्दस्य नैयभिकाग्निहोत्रवचनत्वमधिकरणानुक्रमेण दर्शयति— **प्रमाणेति** । **यदग्नये चेति** । न च प्राप्ते कर्मण्यग्निप्रजापत्योरुभयोरपि विधौ वाक्यभेदः स्यादिति वाच्यम्, चशब्दनिर्दिष्टस्य समुच्चयस्यैव विधानेन तद्द्वारा देवतयोः कर्मान्वयात् । स्पष्टं चैतन्न्यायसुधायाम् । **प्रख्यापनादिति** । अनेन तस्य विधित्सितस्य गुणस्य प्रख्यं प्रख्यापकमन्यच्छास्त्रं यस्मिन्नग्निहोत्रादिपदे तन्नामधेयमिति नामधेयमिति पदस्य यस्मिन्निति पदस्य चानुषङ्गेण सूत्रव्याख्या सूचिता । ननु पूर्वपक्षसिद्धान्तयोर्व्यधिकरणबहुव्रीहिरेव किमर्थमिष्यते, होत्रशब्दस्य भावे त्रन्प्रत्ययान्तताश्रयणे अग्नये होत्रं होम इति चतुर्थीसमासस्यापि संभवादित्यत आह—**न चात्रेति**। तादर्थ्यप्रकृतिविकारभावयोरभावादित्यर्थः । 'चतुर्थी तदर्थ—' इति सूत्रे तदर्थेन प्रकृतिविकारभावे समास इष्यत इति वार्त्तिकेन प्रकृतिविकारभावस्थल एव 'यूपाय दारु' इत्यादौ समासस्य नियमितत्वादिति भावः। **कुण्डपा-** २४
यिनामिति । कुण्डपायिनामयनाख्ये सत्रे 'मासमग्निहोत्रं जुहोति' इति श्रुतं यद्वाक्यं तत्रेत्यर्थः । किं मासस्य स्वरूपेणैव विधेयत्वमुत तात्पर्यगत्या 'सायं जुहोति' इत्यादौ सायंकालादेरिव? नाद्य इत्याह— **न तावदिति** । न द्वितीय इत्याह— **नापीति** । किं २५
स्वरूपेणैव नित्याग्निहोत्रस्य संनिधिरुत नान्ना? आद्य आह— **तस्येति** । सायमादिवा-

क्यस्थले तु स्वरूपेणैव संनिधेर्वैषम्यमिति भावः। द्वितीयमाशङ्क्य निराकरोति— **न चेति। अन्यत्रेति**। नित्याग्निहोत्रवाक्य इत्यर्थः। ततश्च तादृशस्यैव विधानार्हत्वान्नात्र च तद्रूपानुपस्थितेराख्यातपरतन्त्रमेव नामेति तत्स्वारस्यावगतं कर्मान्तरत्वमप्रतिहतमिति भावः। **तस्मादिति**। अवच्छेदकधात्वर्थभेदादित्यर्थः। सूत्रगतप्रयोजनपदेन प्रयुज्यते विधीयत इति
२६ व्युत्पत्त्या भावनोच्यत इति दर्शयति— **विधेयेति**। साध्यसादृश्यमेव दर्शयति— **सप्तमे स्थितमिति**। अग्निहोत्रशब्दो मासाग्निहेत्रे गौणो वा न वेति तदर्थसंशयं सिद्धवत्कृत्य पूर्वपक्षमाह— **तत्रेति**। उद्भिदादिवत्सामानाधिकरण्यादेव नामत्वमवगम्यत इत्यर्थः। अवयवार्थानुगमाभावान्न नामत्वमित्यनुशयेन गुणविधित्वपक्षमालम्बते पूर्वपक्षी— **अग्नीति**। न तावच्चतुर्थीतत्पुरुषः, प्रकृतिविकारभावाभावात्; नापि बहुव्रीहिः, व्यधिकरणबहुव्रीहिस्वीकारस्य प्रमाणान्तरायत्तत्वेन तत्प्रख्यशास्त्रबलेन नित्याग्निहोत्रवाक्ये तथाभ्युपगमेऽपि प्रकृते तदभ्युपगमायोगात् एतदपेक्षया नित्ये रूढस्य गौणत्वौचित्याच्च; तदेतदाह— **न तावदिति**। सामानाधिकरण्यमात्रमकिंचित्करमनेकार्थत्वापत्तेः विनिगमकसद्भावेन नित्ये मुख्यत्वाच्चेत्याह— **तत्सिद्ध इति**। तत्तस्मात्करणात्सिद्धे कर्मणि गुणविधानासंभवात्कर्मण एव विधेयत्वेन सिद्धे कर्मभेदे इत्यर्थः। परशब्दस्य परत्र मुख्यसादृश्यमुपादाय प्रवृत्तावपि कथं धर्मातिदेशकत्वमित्यत आह— **तच्च सादृश्यमिति। तात्सिद्ध्यर्थमिति**। विहितसादृश्यनिर्वाहार्थमित्यर्थः। सूत्रं व्याचष्टे— **क्रियाया इति**। विधिशब्दस्य विधीयत इति विधिरिति कर्मव्युत्पत्तिमाश्रित्याह— **विधेयेति**। उदाहरणान्तरस्य प्रयोजनं दर्शयन्नाह— **लोकसिद्धेति**। टीकायां सिंहादनुभवसिद्धभेदे माणवक इत्यन्वयः। न त्वहंकारस्येति टीकायामहंकारोऽहंशब्दः। **तत्तयेति**। निर्लुठितगर्भतयेत्यर्थः। **वादीति**। वादिनां देहतदतिरिक्तत्वादिविवादो न स्यादित्यर्थः। द्वितीयं कल्पं निराकरोतीत्याह— **एवमिति**। भेदे सिद्ध इति टीकायां सिद्धिर्निश्चयः। फलितमाह— **निरूढेऽपीति**। नार्थयोस्तादात्म्यं प्रतीयते, भेदनिश्चयादिति शेषः। अन्यथा इदमपि तैलशब्दवाच्यमित्यभिमानो न स्यादिति भावः। टीकायामभेदाध्यवसाय इत्यनन्तरं प्रकृते तु सोऽस्तीति शेषम-
२७ भिप्रेत्याह— **प्रतीयते त्विति**। सिद्धं गौणत्वमित्यन्वयं व्यावर्तयति— **तत्तस्मादिति**। किमभिज्ञारूपाहंप्रत्ययादात्मनो देहादिभ्यो भेदनिश्चयः किं वा प्रत्यभिज्ञारूपादिति विकल्प्य प्रथमं न त्वहंकारस्येत्यादिना निराकृत्य मम देहो मम चक्षुरहं जानामीत्यादिप्रत्ययानां ममात्मा ममान्तःकरणमित्यादिप्रत्ययानामिव शबलिताशबलितभेदग्राहकाणां स्पष्टं भेदावभासकत्वाभावेऽपि 'योऽहं बाल्ये पितरावन्वभूवं स एवाहं स्थाविरे प्रणप्तॄननुभवामि' इत्यादिप्रत्यभिज्ञानानां बालस्थविरशरीरभेदावभासकानां तदुभयानुसंधातुरेकस्यात्मनस्ताभ्यां भेदावभासकत्वादस्तु प्रत्यभिज्ञारूपाहंप्रत्ययाद्भेदनिश्चय इति द्वितीयं कल्पमाशङ्क्य निराकरोतीत्याह— **अभिज्ञारूपेति**। किमयं भेदानुभवः सर्वेषामपि अथ वा परीक्षकाणामेवेति विकल्प्य प्रथमं निराकर्तुं परीक्षकाणामित्यादिटीका; सा न युक्ता प्रत्यभिज्ञाप्रत्यक्षस्य सर्वसाधारणत्वादित्याशङ्क्य किमत्र लौकिकानां प्रत्यक्षेणैव भेदो भासते उत तत्पूर्वकेणानुमानेनेति विकल्प्य प्रथमं निराकरोति— **आत्मैक्यमिति**। योऽहं सोऽहमित्यहंपदार्थस्य तत्तेदंता-

स्पदत्वेन भानवद्बालस्थविरशरीरप्रतियोगिकभेदास्पदत्वेनानवाभासनादात्मैक्यमेव प्रत्यभिज्ञाविषयो न देहाद्भेद इत्यर्थः । द्वितीयमनुजानाति— **भिन्नाभ्यामिति** । बालस्थविरशरीरे भिन्ने भिन्नपरिमाणत्वात्; न चाप्रयोजकत्वम्, भिन्नयोः परिमाणयोरवयवोपचयापचयाधीनत्वेन तदुपचये पूर्वावयविनोऽवान्तरकार्यरूपतया तत्सहितानामागन्तुकावयवानामवयव्यन्तरारम्भकत्वावश्यंभावात् तदपचये च कतिपयावयवनाशेऽप्यवयविनाशावश्यंभावेन शिष्टानामवयवानामवयव्यन्तरारम्भकत्वस्यावश्यिकत्वाच्चेत्यनुमानेनैव शरीरयोः परस्परभेदो विनिश्चेतव्यः, न तु प्रत्यक्षेण, तयोर्भिन्नकालतया तद्भेदस्य प्रत्यक्षायोगात्, योऽयं मदीयो देहः पूर्वं पुष्ट आसीत्स एवेदानीं कृश इत्यभेदप्रत्यभिज्ञाया अपि दर्शनेन यथोक्तानुमानोपोद्बलनमन्तरा प्रत्यक्षेण तन्निश्चयायोगाच्च; ततश्च शरीरयोरेवं भेदं प्रसाध्य तदनन्तरं शरीरात्मानौ भिन्नौ एकत्वनानात्वविरुद्धधर्माश्रयत्वादित्यनुमानान्तरादात्मनि शरीरभेदः साधनीय इत्यर्थः । निराकरोति— **तच्चेति** । तदथोक्तमनुमानं व्याप्त्यादिप्रतिसंधानसापेक्षतया व्याप्त्यादिनिश्चायकशास्त्रपरिचयमन्तरा न लौकिकैर्ज्ञातुं शक्यमित्यर्थः । लोकप्रसिद्धकार्यकारणभावधूमवह्न्यादिव्याप्तेः शास्त्रेण विना ग्रहीतुं शक्यत्वेऽपि परिमाणभेदाधीनद्रव्यभेदादिस्थलीयव्याप्त्यादिस्वरूपं न शास्त्रेण विना सुग्रहमिति भावः । द्वितीयमाशङ्कते— **तर्हीति । गौण इति**। ततश्च न सर्वसाधारण्येन विषयसिद्धिरिति भावः । २८
परीक्षकाणामपि किं सर्वदा भेदग्रहसत्त्वादध्यासायोग उत विचारसमये? आद्यं टीकया निराकरोति— **नेत्याहेति** । टीकायां लोकसामान्यं लोकसाम्यम् । प्रवृत्त्यादिलक्षणव्यवहारसमये विदुषामपि पश्वादिभिरविशेषादिति टीकोदाहृतभाष्यफक्किकार्थः । टीकायाम्— शास्त्रचिन्तका इति । **शास्त्रचिन्तकाः** सन्तः खल्वेवं विवेचयन्ति न प्रतिपत्तारः सन्त इत्यर्थः । ततश्च शास्त्रचिन्तनदशायामेव विवेकग्रहो न प्रतिपत्तिदशायामिति भावः । द्वितीयं निराकरोति— **अपरोक्षेति** । दिङ्मोहादौ तथा दर्शनादिति भावः । टीकायां घटशब्देन सेचनघट उच्यते, मणिकादिशब्दैस्तदधिकपरिमाणा विस्तीर्णमुखा मार्त्तिका उच्यन्ते । तथा चापस्तम्बगृह्यम्— 'मणिकं प्रतिष्ठाप्य तस्मिंश्चतुर उदकुम्भानानयति' इति । **आत्मावयवानामिति,** आत्मशब्दवाच्यानामवयवानामित्यर्थः । **काकतालीया वेति** । आगच्छतः काकस्य पततस्तालफलस्य च यथा यादृच्छिकः समागमस्तथा समुदायापत्तिरपि यादृच्छिकी वेत्यर्थः । **आद्यं निरस्येति** । किं शरीरावयवे वृक्णे सति आत्मावयवोऽपि वृक्ण उत न? नाद्यः, तस्य शरीरव्यतिरिक्तप्रदेशे वर्तमानस्य शरीरोपाधिकसमुदायभावापत्त्ययोगेन व्यर्थत्वात् अवयवान्तरेषु निबिडेषु प्रवेशायोगाच्च । नाद्यः, व्यासक्तस्य चैतन्यस्य कतिपयसमुदायिनाशेऽयोगादित्येवं समुदायस्य त्विग्यादिटीकया निरस्येत्यर्थः । शीर्णत्वे हेतुमाह— **यादृच्छिकेति** । मूर्च्छादिदशायामचैतन्याभ्युपगमादिष्टापत्तिं वारयति— **स्वस्थानामिति । विवेकासिद्धाविति** । 'माणवको न सिंहः' इतिवत् 'नाहं कृशो नाहमन्धो नाहं गच्छामि' इति निर्विचिकित्सभेदप्रत्यक्षादर्शनादिति भावः । **विषयसिद्धिमिति**। अहंप्रत्ययाविषयीभूताकर्तृभोक्तृस्वरूपस्यैव विषयत्वलाभादिति भावः। **प्रयोजनसिद्धिमिति** । अध्यासात्मकाहमनुभवप्रसञ्जितकर्तृत्वभोक्तृत्वदुःखशोकाद्यनर्थनिवृत्तेरौपनिषदात्मसाक्षात्कारजन्यायाः प्रयोजनवत्सं-

३१ भवादित्यर्थः। टीकायाम्— उपव्याख्यानमिति। तथापीति भाष्ये संग्रहेण व्याख्यातस्याहंप्रत्ययस्य स्वरूपादिभिः प्रपञ्चनम्। तथा च 'तस्योपव्याख्यानम्' इति च्छान्दोग्यवाक्यव्याख्यानभाष्यम्— एवमुपासनमेवं विभूतिरेवं च फलमित्यादिकथनमुपव्याख्यानमिति। स्वरूपशब्देन धर्म्यध्यासस्वरूपं धर्माध्यासस्वरूपं च गृह्यत इत्याह— **स्वरूपमिति**। व्यवहारे इदमभिलापो वार्यते इदंविषयकत्वं वा, आद्यं न प्रतीतित इति टीकांशेन परिहरति—**आशङ्क्याहेति**। द्वितीयं वस्तुत इति टीकाभिप्रायकथनेन परिहरति— **अहमिति प्रतीतेऽपीति**। ततश्च तद्वतेदमंशद्योतनाय भाष्ये इदंशब्दप्रयोग इति भावः। **एकस्येति**। अध्यासे देवदत्तादेः कर्तृत्वाद्व्यवहार इत्यत्र गम्यमानास्तिधातुनिर्दिष्टभवनक्रियायां च व्यवहारस्यैव कर्तृत्वादित्यर्थः। कृतेरिव धात्वर्थस्यापि कर्त्राक्षेपकत्वाद्भक्त्वा गमनमित्यादिवदविरोध इत्याह— **व्यवहारेति**। उपसंहारभाष्ये एवमयमनादिरनन्त इत्यादि भाष्ये। **अध्यास एवेति**। उपक्रमस्थस्यापि व्यवहारशब्दस्याभिज्ञाभिलपनसाधारणस्योपसंहारस्थेन विशेषवाचकेनाध्यासपदेनार्थनिर्णयो युक्त इति भावः। अध्यस्य व्यवहार इति स्ववाक्यगतोपपदादेव निर्णयसिद्धेरार्थिकार्थस्य पश्चादुपसंहारसंभवाच्च न दोष इति परिहरति— **उच्यत इति**। पौर्वापर्यायोगे हेतुमाह— **चित इति**। अध्यासाधीनतादात्म्याभावे शुद्धायाश्चित आश्रयत्वानर्हतया निराश्रयक्रियाया एवासंभवे कुतः पौर्वापर्यमित्यर्थः। आद्यं दोषं स्वयं परिहरति— **तन्नेति**। पौर्वापर्यमात्रेऽपि क्त्वाप्रत्ययदर्शनादस्पष्टत्वप्रसक्तिरित्याह— **सुप्त्वेति**। टीकायम्— अथाविवेक एवेति। जातिव्यक्त्योरिव वस्तुसत्तादात्म्यमेवेत्यर्थः। धर्मधर्म्यध्यासयोरेव द्विविधव्यवहारहेतुत्वं युक्तम्, न तु मिथुनीकरणमात्रस्य; ततश्च योग्य-
३३ ताविरहादानन्तर्यमात्रमकिंचित्करमित्याशयेनाह— **मिथुनीकरणादिति**। युगलीकरणं न तादात्म्यम्, किं तु साहित्यमेकबुद्धिविषयत्वलक्षणम्, तावतापि भेदाग्रहसिद्धेरित्याशयेनाह— **युगलीकरणं नामेति। किमिति नोक्तमिति**। सुबोधत्वादिति भावः। टीकायां
३४ संवृतिशब्देन प्रतीतिमात्रसिद्धमुच्यते। **च्विप्रत्ययो भवतीति**। कृभ्वस्तियोगे सति संपत्तिकर्तरि च्विप्रत्ययोभ वतीत्यर्थः। सत्यानृतयोर्मिथुनभावमप्राप्तयोरेव मिथुनभावस्य विवक्षितत्वादिति भावः। 'अस्य च्वौ' इति च्वेर्लुप्तत्वेऽपि 'प्रत्ययलोपे प्रत्ययलक्षणम्' इति शास्त्रादकारस्य च्वौ परत ईकार इत्यर्थः। नैसर्गिक इति भाष्यस्य तात्पर्यवर्णने बीजमाह— **समारोपेति**। पूर्वपूर्वमिथ्याज्ञानोपदर्शितस्येति टीकायां मिथ्याज्ञानशब्देन तत्संस्कारो विवक्षितः, उत्तरोत्तराध्यासहेतुधर्मिज्ञानादिकाले पूर्वपूर्वमिथ्याज्ञानस्य नष्टत्वेन तस्य बुद्धीन्द्रियादिविषयोपदर्शनद्वारा उत्तरोत्तराध्यासहेतुत्वायोगात्; ततश्च अनादित्वादिति टीकायामनादित्वमपि पूर्वपूर्वमिथ्याज्ञानसंस्काराणामुत्तरोत्तरमिथ्याज्ञानानां चोक्तम्। एवं च तदनादित्वं किं व्यक्त्योर्जात्योः समुदाययोर्वेति विकल्प्य **कैश्चिद्दूषितमित्याह— अत्रैक इति**। बीजत्वाङ्कुरत्वजात्यवच्छिन्नयोरिव भ्रमत्वतत्संस्कारत्वजात्यवच्छिन्नयोरपि निमित्तनैमित्तिकभावो युज्यत एवेति परिहरति— **तत्र ब्रूम इति**। ननु टीकाकृता किमित्यध्यासव्यवहारयोरेवानादित्वमुक्तम्, भ्रमोपादानस्य मूलाज्ञानस्यापि वक्तव्यत्वात्; अत एव मिथ्याज्ञाननिमित्त इति भाष्येण मिथ्याभूतमज्ञानं निमित्तमुपादानं यस्येति तदुपादानमुक्तमिति केचिद्व्याचक्षत इत्याशङ्क्य शङ्काभाष्ये विवे-

काग्रहविरहेणैवाध्यासाक्षेपात्तत्सद्भाव एवाध्यासोपयोगितया समर्थनीयः । अध्यासस्य दुरपह्नवत्वाय तत्फलकीर्तनं विवेकाग्रहोपयोगितया च मिथुनीकरणमुक्तम् । तत्र च परस्पराश्रयपरिहाराय निमित्तनैमित्तिकयोरध्यासव्यवहारयोरेवानादित्वमुक्तम्, न तु भ्रमोपादानस्यापि, अनुपयोगात् । अत एव न भाष्यस्य मूलाज्ञानपरत्वम्, निमित्तशब्दविरोधाच्च; तदनादित्वं तु देवताधिकरण एव संगतमिति तत्रैव वक्ष्यत इत्याशयेन परिहरति— **अत्र चेति** । ननु प्रकाशमानतैव सत्तेत्युत्तरग्रन्थपर्यालोचनया शङ्कावादिना प्रतीयमानस्यापारमार्थिकत्वं नेष्यते, ततश्च न तु प्रतीयमानस्येति टीकानुपपत्तिरित्याशङ्क्य प्रतीतिमात्रमारोपे तन्त्रं न तु प्रतीयमानस्य परमार्थसत्तापीति त्वयोक्तं सत्यामिति सिद्धान्तयुक्तानुवादेन तन्निराकरणपरतया टीकायोजनामभिप्रेत्य व्याचष्टे— **सत्यानृते इति** । अनेन परमार्थसत्तेत्यनन्तरमितिशब्दाध्याहारेण इति यत्त्वयोक्तं तदद्धा सत्यामित्येवं टीका व्याख्याता । नन्वनृतस्य प्रतीत्यसंभवं विवेकग्रहस्य दूरापास्तत्वात्कथं युष्मदस्मदित्यादिना विवेकग्रहादध्यासाक्षेप इत्याशङ्क्य प्रतीत्यभ्युपगमेन स ग्रन्थः प्रवृत्त इत्याशयेनाह— **युष्मदस्मदिति** । देहादि किमत्यन्तमसत् उतानिर्वचनीयमिति विकल्प्य प्रथमं निरस्तं प्रतीतिरेव त्विति टीकया । तत्र प्रतीतिं व्याचष्टे— **अपरोक्षेति** । **अनुवादायोगः स्यादिति** । अत्यन्तासत इति पदेन प्रतीतिनिषेधार्थमनुवादायोगः स्यादित्यर्थः । द्वितीयं शङ्कते— **नन्विति** । प्रकाशमानत्वस्यैव परमार्थसत्तारूपत्वान्नानिर्वचनीयतेति परिहरति— **अत आहेति** । टीकायां नासन्त इत्यसत्त्वानिर्वाच्यत्वयोरुभयोरपि निषेधः लक्षणवाक्ये यथोक्तशङ्कापरिहारादर्शनादाचक्षाण एव परिहरतीत्ययुक्तमित्यत आह— **दृष्टग्रहणेनेति** । एतच्च तस्य च दृष्टत्वमात्रमुपयुज्यत इति टीकायां स्पष्टमिति भावः । **संक्षिप्तमिति** । एकपदनिर्दिष्टत्वादिति भावः । उच्छेदो बाधकप्रत्ययानन्तरमननुवृत्तिः, तिरस्कारः प्रवृत्त्यादिकार्याक्षमत्वम्, अनयोः प्रत्ययान्तरेण विषयापहारलक्षणे बाधे सत्येव संभवात्; स एव टीकायामवसादादित्वेनोक्तः । नन्ववभासपदस्य विस्तृतलक्षणान्तर्भावे शेषवैयर्थ्यम्, अनन्तर्भावे लक्षणासंभव इत्यत आह— **अवभासपदस्येति । भाष्यवाक्यार्थत्वेनेति** । ततश्च लक्षणवाक्यगतावभासपदसूचितं संक्षिप्तं लक्षणं टीकाकारेण कल्पितमिति भावः । लक्षणप्रयोजनयोर्व्यावृत्तिव्यवहारयोः संग्रहलक्षणेनैव सिद्धेर्विस्तृतं व्यर्थमित्याशङ्क्य मतान्तरनिरासस्तस्य फलमित्याह— **परत्रेत्यादीति** । स्वरूपेण सदपीत्यनेनारोपणीयस्य देशान्तरसत्त्वाभ्युपगमेऽन्यथाख्यात्यापत्तिरित्यत आह— **अपिशब्देनेति** । पूर्वदृष्टपदस्य स्मृतिरूपपदसमभिव्याहारलब्धमनृतार्थकत्वं नान्यथा; ततश्च युक्ता शङ्केति गूढाभिसंधिराह— **स्मृतिरूपविशेषणेति** । उदाहरणद्वयप्रदर्शनस्य फलमाह— **पूर्वदृष्टस्येत्यादिना** । लक्षणवाक्यार्थे पूर्वदृष्टस्य परत्र तादात्म्यावभास इति यो धर्म्यध्यासांशस्तमभिप्रेत्येति योजना । एवमुत्तरत्रापि । टीकायाम्— स्वस्तिमत्यां स्वस्तिकचिह्नवत्याम् । ननु गोत्वप्रत्यभिज्ञायां नातिव्याप्तिः, अवभासपदेनैव तद्वारणात्, तस्य मिथ्याज्ञानार्थकत्वात्, अन्यथा नानार्थत्वापत्तेरित्याशङ्क्य न तावदवयवार्थस्वीकारप्रयुक्तो दोष इत्याह— **अवभासपदस्येति** । अलंकारकत्वादेव नानार्थत्वं न दोषायेत्याह— **सकृच्छ्रुतेति** । अन्यथा श्लेषादिवैफल्यापत्तेरिति भावः । गूढमभिसंधिं शङ्का-

३५

३६

३७

पूर्वकं प्रकटयति— **नन्वित्यादिना** । स्मृतिसादृश्यं संस्कारजन्यत्वरूपमेव किमिति न स्वा-
३८ कृतमित्यत आह— **प्रत्यभिज्ञाया अपीति** । परत्रेति विशेषणव्यावर्त्यमाह— **स्मृतिरू-
पेति** । ननु न स्मृतावतिव्याप्तिः, स्मृतिरूपपदेनैव तद्वारणात्; असंनिहितविषयत्वं हि स्मृति-
रूपत्वमुक्तम्, तच्चाधिष्ठाने आरोप्यस्य परमार्थतोऽसत्त्वमिति वक्ष्यते; स्मृतिविषयश्च परमा-
र्थसन्निति कथं तत्रातिव्याप्तिरित्याशङ्क्य यथाश्रुताभिप्रायेण तत्कथनमित्याह— **असंनिहित-
विषयत्वे विवक्षित इति । तन्निवृत्तय इति** । स्मृतिविषयस्य स्वदेशान्यदेशेऽनवभा-
सनात् परत्रेति विशेषणेन स्मृतिव्यावृत्तिरिति भावः । नन्वनेन भाष्येण कीदृशमध्यासलक्षणमु-
क्तम्? न तावद्यथाश्रुतम्, प्रत्यभिज्ञायामतिव्याप्तेः अनिर्वचनीयरजतस्य विलक्षणस्यैव शुक्त्या-
दावुत्पत्त्यभ्युपगमेन तस्य पूर्वदृष्टत्वाभावाच्च; न चारोप्यतावच्छेदकधर्मेण पूर्वदृष्टस-
जातीयत्वं विवक्षितमिति वाच्यम्, अपूर्वव्यक्तिविशेषाध्यासस्थले तस्य पूर्वदृष्ट-
सजातीयत्वे मानाभावात् अनुभूयमानारोपाव्याप्तेश्च; नापि परत्र सत्ये पूर्वदृष्टस्यानृतस्य
स्मृतिरूपः स्मर्यमाणसदृशोऽसंनिहितविषयोऽवभासोऽध्यासः, आरोप्यरजतादेरसंनिहितत्वा-
सिद्धेः आत्माध्यासाधिष्ठानस्य देहादेः सत्यत्वाभावात् वंशोरगादौ करालत्वाद्यध्यासाव्याप्तेश्च ।
परिमले तु— अधिष्ठानासमानसत्ताकस्यावभासोऽध्यास इति लक्षणमभिमतम्; यद्वृतमव-
भास्यं तदधिष्ठानम् । तथा च न गोत्वप्रत्यभिज्ञायामतिव्याप्तिः, गोत्वादेर्गोव्यक्त्यादिरूपा-
धिष्ठानसमसत्ताकत्वात्, ब्रह्मणि तु वियदादीनामध्यस्तत्वमेवेति सर्वाध्यासानुगतं लक्षणमि-
त्युक्तम्; तच्चिन्त्यम्, प्रत्यभिज्ञायामतिव्याप्तेः, गोव्यक्तेरचिरप्रध्वंसित्वेन सादित्वेन च गोत्वस्य
तद्विलक्षणत्वेन तत्सत्तयोरपि चिराचिरकालभावित्वेन साद्यनादित्वेन च भेदावश्यंभावात्,
प्रातीतिकव्यावहारिकपारमार्थिकरूपेण सत्तात्रैविध्यनियमस्य स्वपरिभाषामात्रत्वेन परं प्रत्यु-
पन्यासानर्हत्वात्; किं च स्वाप्निके गजे गजत्वप्रत्यभिज्ञायामतिव्याप्तिः अधिष्ठानस्य प्रातीति-
कत्वात्तस्मिन्गजे गजत्वस्य बाधाभावेन तस्य व्यावहारिकत्वात् प्रातीतिके प्रातीतिकाध्यासाव्या-
प्तेश्च; तस्मादसंगतं लक्षणमित्याशङ्क्य निष्कृष्टं लक्षणमाह— **अनेनेति** । असंनिधानस्य
देशान्तरावस्थानरूपत्वेऽन्यथाख्यात्यापत्तिरित्यत आह—**असंनिधानं चेति** । अयमाशयः—
सत्येऽनृतावभास इत्येव लक्षणम् । अधिष्ठानस्य सत्यत्वं च बाधाधिष्ठानत्वम् । यस्मिन्बाध्य-
मानेऽपि यत्तिष्ठति तस्य तदपेक्षया सत्यत्वात् । स्वरूपेण सतोऽप्यारोप्यस्य समारोपणीयत्वे-
नानृतत्वं स्पष्टमेव टीकायामुक्तम् ततश्च नात्माध्यासाव्याप्तिः देहादावात्मतादात्म्ये बाध्यमानेऽपि
तदानीं देहादेरबाध्यमानत्वात् । एवं करालत्वादिबाधाधिष्ठानत्वेन वंशोरगादेः सत्यत्वावश्यंभावान्न
तत्राप्यव्याप्तिः, स्वाप्निकगजादौ च गजत्वादेर्बाधाभावान्नातिव्याप्तिरपीति सर्वमनवद्यम्॥

नन्वेवमप्यारोप्यानृतत्वफलकं स्मृतिरूपत्वविशेषणं व्यर्थम्, पूर्वदृष्टपदेनैव तत्सिद्धेरि-
त्याशङ्क्य मतान्तरनिरासद्वारा तदर्थस्फोरणाय तदुपादानम्, पूर्वदृष्टत्वमात्रेण तदनिरासादित्याश-
३९ येनाह—**अथ वेति** । नापसिद्धान्तपरिहाराय तदुपादानम्, किं तु सत्ख्यातिनिरासायेत्यथवाश-
ब्दार्थः । श्लोके असंनिधानेनेति च्छेदः । **सत्ख्यातिरिति** । अधिष्ठाने परमार्थतो विद्यमानार्थवि-
षयिणी ख्यातिरित्यर्थः । **असत्ख्यातिरिति** । पुरोवर्तिन्यविद्यमानार्थविषयिणी ख्यातिरित्य-
र्थः । अनेनाख्यात्यन्यथाख्यात्यात्मख्यात्यसत्ख्यातयश्चतस्रोऽपि निर्दिष्टाः । ता अवभासपदेन

वारिताः, असदादेः स्पष्टं पुरोवस्थितत्वेनावभासायोगादित्यर्थः। नन्वेवं पूर्वदृष्टपदं व्यर्थमित्यत
आह— **असंनिहितस्येति। उक्तमेवेति**। टीकायामिति शेषः। सत्याधिष्ठानाभावेन **स्व-** ४०
प्रभ्रमेऽव्याप्तिं प्रसञ्जयति– स्वप्नज्ञान इति। किमियमव्याप्तिः सिद्धान्तरीत्या उत लोकरीत्या?
नाद्यः, अन्तःकरणतद्धर्माणामिव स्वप्नप्रपञ्चस्यापि साक्ष्यधिष्ठानकत्वादित्येवमभिप्रायेण नाप्य-
व्याप्तिरित्यनेन निराकृत्य द्वितीयं स्वप्नज्ञानस्यापीत्यनेन निराकृतम्। तत्र स्मृतिविभ्रमस्येति न
कर्मधारयः, सिद्धान्ते स्वप्नभ्रमस्यान्तरप्रत्यक्षरूपतया स्मृतिरूपत्वाभावादित्यत आह— **स्मृ-**
ताविति। स्मृतिशब्दं कर्मव्युत्पन्नमाश्रित्याह—**स्मर्यमाण इति**। पूर्वदृष्टत्वमुपपादयति—
अनुभूयमान इति। पूर्वमिति शेषः। एतच्च प्रौढ्योक्तम्, आरोप्यस्य तदधिष्ठाने पूर्वदृष्टत्वो-
पपादनवैफल्यात् तन्निष्ठस्य संनिहितदेशकालत्वस्यारोपणीयतयाप्यनृतत्वाभावेन तदध्यासे लक्ष-
णाव्याप्तेश्च अत एव टीकाग्रन्थेषु तत्र तत्र पूर्वदृष्टस्येत्यपि क्वचित्पाठो दृश्यत इति ध्येयम्। एवं
'पीतः शङ्खः' इत्यादावतिदेशोऽपि लोकरीतिमनुसृत्यैव, सिद्धान्ते पूर्वदृष्टत्वानपेक्षणात् पीतत्वादेः
स्वरूपेणाप्यारोप्यतया सामानाधिकरण्यपर्यन्तधाधनायोगाच्चेत्याशयेनाह— **अन्यार्थमिति**। ४१
पूर्वप्रमितत्वव्यावर्तनार्थमित्यर्थः। टीकायां पित्तद्रव्यस्य वेगेन निर्गच्छदत्यच्छनयनरश्म्येकलो-
लीभावोक्तिस्तस्य परकीयचक्षुरयोग्यत्वप्रदर्शनाय। ननु पीतिमतपनीययोः कथमसंसर्गाग्रहणं
तयोरसंसर्गस्यैवाभावात्, प्रत्युत संसर्गसत्त्वेन तस्यैव ग्रहणादित्याशङ्क्य दृष्टान्तदार्ष्टान्तिकयोरसं-
सर्गस्य विद्यमानाविद्यमानत्वेन भेदेऽपि तदग्रहणमविशिष्टमिति सारूप्यमुपपादयति— **पीति-**
मतपनीययोरिति। टीकायां सामानाधिकरण्यं तादात्म्यम्; तच्च पीतिमतपनीययोः प्रसि-
द्धमनुभूयमानयोः पीतिमशङ्खयोरारोप्यत इत्यर्थः। एतच्च तादात्म्यस्यारोप्यत्वमभ्युपेत्योक्तं
शङ्के पीतिम्न एवारोपसंभवादिति ध्येयम्। प्रतिबिम्बविभ्रमस्थले पूर्ववैषम्येण शङ्कां दर्श-
यति— **आदर्शादिष्विति**। आदर्शे मुखं नारोप्यते, किं तु मुख एव दर्पणाभिमुख्ययो- ४२
रारोप इति परिहरति— **आशङ्क्याहेति**। टीकायां सौरेण तेजसा प्रातिलोम्येन प्रवर्तितं
मुखसंयुक्तं चाक्षुषं तेजो मुखं ग्राहयदित्यन्वयः। मुखे अधिकरणत्वेन दर्पणस्यैवारोपात् पूर्व-
दृष्टत्वं न देशताविशेषणमित्याशयेन व्याचष्टे— **पूर्वदृष्टयोरिति। तयोरेवेति**। आदर्शोद- ४३
कयोरेव विद्यमानमाभिमुख्यं चेत्यर्थः। उल्मुकज्वालासु शकटाक्षादिषु पूर्वदृष्टचक्राकारतया आ-
रोपे शीघ्रभ्रमणं दोष इति दर्शयितुं शीघ्रभ्रमितेत्युक्तम्। गन्धर्वनगरभ्रमं व्याचष्टे— **अभ्रे-**
ष्विति। वसावर्णेषु चेति। नायनरश्मिसहनिर्गतवसावयवगतेषु चक्षुषा गृह्यमाणेष्वि-
त्यर्थः। अत्रापि सामानाधिकरण्यं तादात्म्यम्। भङ्गशब्दस्यापि तरङ्गवाचित्वे
पौनरुक्त्यमित्यत आह— **तरङ्गविच्छेदानामिति**। टीकायामसतः प्रकाशनं न संभवतीति ४४
वदन्प्रष्टव्यः किं सत एव भानमुत रूपान्तरेण सतोऽसता रूपान्तरेण भानमिति विकल्प्य
प्रथमं मरीचितोयस्यापि प्रकाशमानस्य परमार्थसत्त्वे तत्कार्यं पिपासोपशमनादिकं स्यादिति
तथा सतीत्यादिना निराकृत्य द्वितीयं निराकरोति— न चेति। किं मरीचीनां तोयस्य
स्वरूपेणैव भानमुत तादात्म्येन? नाद्यः, मरीचयस्तोयमिति च प्रतीत्यापत्तौ मरीचिषु
तोयार्थिप्रवृत्त्यनापत्तेः, द्वितीये किं मरीचीनां तोयात्मत्वमसत् उत सत्? नाद्यः, असतो
भानानभ्युपगमादित्याह— यत इति। तोयाद्यात्मना असतामित्यन्वयः। द्वितीयं निरा-

करोति— न चेति । तथात्वे तोयकार्यापत्तेरिति टीकार्थः । मरीचीनां तोयात्मत्वमसदेव ; न चासतो भानायोगः, अत्यन्तासत्त्वं हि भानविरोधि तोयतादात्म्यासत्त्वं तु मरीचीनां स्वरूपमेव असत्त्वस्य सत्त्वाभावतया सत्त्वस्य च धर्म्यभेदेन तोयात्मना असत्त्वस्य तोयतादात्म्याभावरूपतया तस्य मरीचिरूपत्वादिति प्रथमकल्पाभ्युपगमेन यद्युच्येतेत्यादिशङ्का ;
४५ अतो न तट्टीकासांगत्यमित्यवतारयति—**मरीचीनामिति** । टीकायाम्–**ततश्च** भावात्मनेति । असतोऽपि तोयात्मत्वस्य मरीचिरूपभावान्तरात्मनोपाख्येयतया व्यवहारयोग्यतयेत्यर्थः । स्वस्य प्रत्यय इति षष्ठीतत्पुरुषे स्वानन्तरभाविप्रत्ययसामर्थ्यादसत्प्रकाशनसामर्थ्यं स्वस्येति स्यात् अतो व्याचष्टे— **स्वसमानेति** । शून्यवादिमते ज्ञानस्याप्यसत्त्वात्पूर्वज्ञानाधीनत्वमुत्तरज्ञानस्य सत्त्वं नाधिकमिति दर्शयितुं स्वप्रत्ययेति विशेषणमिति भावः । शक्तेरपि विज्ञानरूपत्वान्न दोष इति परिहरति— **अत आहेति** । अनवस्थापाताच्चेति हेतुः । पक्षान्तर इति व्याचष्टे- **उपलब्धौ वेति** । असतः प्रत्ययजन्योपकाराधारत्ववत्प्रत्ययोपकारकत्वाधार-
४६ त्वस्याप्ययोगात् कथं तदभ्युपगम इत्यत आह–**इत्युपहास इति** । असत्यपीत्यनेन तदप्युद्घाटितमिति भावः । कः पुनरेष सदसतोः संबन्ध इति संबन्धस्य पृष्टत्वात्स्वभावकथनमयुक्तमित्याशङ्क्य असता साकं प्रत्ययस्य स्वभावः स्वाभाविकसंबन्ध इति टीकार्थं इत्याशयेनाह— **असत इति । स्वभावश्चेति** । तादात्म्यमित्यर्थः । अत्र टीकायां निस्तत्त्वस्यानुभवगोचरत्वाभावे मरीचितोयप्रत्ययस्य किं मरीचीनां तोयात्मना सत्त्वं विषयः उत तदात्मना असत्त्वम् ? आद्ये प्रवृत्तिसंवादापत्तिरिति दूषितम्, तत्किमिदानीमिति द्वितीयमाशङ्कत इत्याशयेनाह— **पूर्वपक्ष्याहेति** । तोयात्मना असत्त्वस्यैव साध्यत्वेन तदात्मनेति हेतोः साध्याविशेषमाशङ्क्याह— **तदात्मनेति** । तदात्मना असत्त्वस्य सर्वसंप्रतिपन्नत्वं हेतुरिति भावः । असत्त्वमतिरिक्तामिति मन्वानः शङ्कते— **तर्हीति** । यत्प्रतियोगिनिरूपणाधीननिरूपणकं यत्स्वरूपं तदेव तदसत्त्वमिति न दोष इत्याह— **तोयमपेक्ष्येति** । यदिदं मरीचीनां तोयरूपेणासत्त्वं स्वरूपं तत्किं तेनैव रूपेण भ्रमो विषयीकरोति, उत रूपान्तरेण तोयात्मना ? नाद्यः, भ्रमत्वव्याघातादिति तत्किमित्यादिटीकाभिप्रायकथनेन निराकुर्वन्द्वितीयमाशङ्कत इत्याह— **तोयरूपेणेत्यादिना** । वस्त्वन्तरमपि किं मरीचितोयोभयभिन्नम् एतदन्यतररूपं वेति विकल्प्य प्रथमं निराकर्तुं न चारोपितमिति टीका, तदभिप्रायं
४७ दर्शयन्नेवोत्तरटीकाभिप्रायमाह— **अस्मिन्विभ्रम इत्यादिना । एवं मरीचितोयतादात्म्यमनिर्वाच्यं प्रसाध्येति** । अनेन मरीचिषु तोयमारोपणीयं सदनिर्वाच्यमास्थेयमिति
४८ वर्णितः । **तथेति** । स्वरूपेणापीत्यन्वयः । मरीचितोयमनिर्वाच्यं बाध्यत्वे सति पुरोवस्थितत्वेन टीकार्थो भासमानत्वात् तत्तादात्म्यवदिति भावः । **मुधा अमुष्येति** । स्पष्टम् । पुरोवस्थितत्वे नावभासमानत्वान्नेदं रजतमिति इदम्येव रजतबाधदर्शनात्पूर्वानुभूतविलक्षणस्यैव रजतस्यानुभूयमानत्वात्स्वाग्निकगजादाविव विलक्षणरजतायुत्पत्तिसामग्र्या अपि कल्पनीयत्वात् । 'न तत्र रथा न रथयोगा न पन्थानो भवन्त्यथ रथान्रथयोगान्पथः सृजत' इति प्रातीतिकसृष्टेरपि श्रुतिसिद्धत्वान्नात्मनि देशान्तरे वा सत्त्वकल्पना युक्तेत्यर्थः । पूर्वदृष्टमिवेत्यनेन कथं परिहार इत्याशङ्क्य पूर्वदृष्टसाजात्यप्रतिपादनद्वारा पूर्वप्रमितत्वव्यावर्तनफलं पूर्वदृष्टग्रहणमित्याशयमाह—

अभिनवत्वेऽपीति । मृषेति । मतमितीतिशब्दाध्याहारेण श्लोकार्थो योज्यः । देहादि ४९
सदिति । नासन्त इति पूर्वपक्ष्युक्तसाध्यस्य पर्यवसितमेतत् साध्यम् । तच्च प्रमितिविषयत्वं न त्वबाध्यत्वम्, तस्यैवोपाधित्वात् । उपाधिः प्रयोजकः । एतावत्सिद्धवत्कृत्य साधनव्यापकत्वशङ्कानिरासाय टीकेत्याह— **न चेति ।** नन्वबाध्यत्वं बाध्यभिन्नत्वम्; ततश्च प्रपञ्चमात्रस्य ५०
बाध्यतया पक्षमात्रव्यावर्तकं बाध्यत्वविशेषणमित्यबाध्यत्वोपाधेः पक्षेतरता स्यादित्याशङ्क्य व्यावहारिकस्यैव विवादास्पदस्य पक्षतया बाध्यत्वविशेषणस्य विपक्षमरीचितोयादिव्यावर्तकत्वान्न दोष इत्याह— **विपक्षस्येति ।** ननु देहादि न बाध्यं प्रमाणप्रमितत्वादात्मवत्, ततश्च न मिथ्यात्वम् अन्यथा आत्मनोऽपि मिथ्यात्वापत्तेरिति शङ्कते— **नन्विति ।** तत्त्ववेदकप्रमाणप्रमितत्वमुपाधिरिति परिहरति— **तत्राहेति ।** टीकागतं सत्तानिर्वचनं प्रकृते संगमयति— **यदुक्तमिति ।** चिदात्मनोऽपि सत्त्वमिति । ततश्च प्रकाशमानत्वाविशेषा- ५१
दुभयोरपि देहादिचिदात्मनोः सत्त्वमसत्त्वं वा स्यात् । ततश्च तद्वदेव बाध्यत्वमबाध्यत्वं वा प्रसज्येत, न वैषम्यम्; एवं च सति अबाध्यत्वोपाधेः साध्याव्यापकत्वं साधनव्यापकत्वं वा स्यादित्यर्थः । विशेषेति । प्रकाशमानत्वापेक्षया स्वयं प्रकाशमानत्वस्य विशेषत्वादित्यर्थः । ततश्चोपाधेः साध्यव्यापकत्वसाधनाव्यापकत्वे सिद्धे इत्युपपादयति— **स्वयंप्रकाशत्वादित्यादिना । दृष्टश्येति ।** अधिष्ठानारोप्यभावव्यतिरेकेण तयोः संबन्धान्तरानिरूपणादित्यर्थः । **संसारस्येति ।** देहादिप्रपञ्चरूपस्येत्यर्थः । **शास्त्रप्रामाण्यादिति ।** 'भिद्यते हृदयग्रन्थिः' इत्यादिशास्त्रप्रामाण्यादित्यर्थः । ब्रह्मज्ञाननिवर्हणीयत्वाय प्रपञ्चमिथ्यात्ववर्णनमिति तावत्परिहरति— **तन्नेति ।** प्रपञ्चो न ज्ञाननिवर्त्यः सत्यत्वादात्मवदित्यनुमानं ज्योतिष्टोमो न स्वर्गफल इत्यागमविरोधादमानमिति **शङ्कते— यत्त्विति ।** क्रियात्मन एव सतो ज्योतिष्टोमस्य स्वर्गफलकत्वबोधकागमवदिहापि सत्यस्य सतः प्रपञ्चस्य ज्ञाननिवर्त्यत्वबोधक आगमो यथोक्तानुमानबाधकत्वेनेष्यते ज्ञाननिवर्त्यत्वमात्रबोधको वा; नाद्य इत्याह— **तन्नेति ।** द्वितीये मिथ्यात्वमेवायातीत्याह— **प्रत्युतेति ।** क्षणिकस्य यागस्य श्रुतस्वर्गसाधनत्वान्यथानुपपत्त्या लोकरीतिमनुसृत्य व्यापारकल्पनवदिहापि श्रुतज्ञाननिवर्त्यत्वसिद्ध्यर्थं बन्धमिथ्यात्वस्यैव सिद्धेः, अन्यथा यागस्य नष्टस्यापि शास्त्रबलेन स्वर्गसाधनत्वोपपत्तेरपूर्वकल्पनं न स्यादिति भावः । अनुमानस्य व्यभिचारमाशङ्कते— **यद्यपीति ।** आदिपदाभ्यां विषयेषु दोषदर्शनं तन्निवर्त्यौ रागश्च गृह्यते । स्वमतेन तावत्प्रौढ्या परिहरति— **विषादेरिति ।** प्रमारूपज्ञानानिवर्त्यत्वं साध्यम् । ध्यानं च मानसी क्रिया, अतो न दोष इति परिहरति— **ध्यानस्य चेति । अदृष्टान्तत्वात्** अतुल्यत्वात् । अस- ५२
त्यप्रपञ्चनिवर्तकब्रह्मप्रमित्यतुल्यत्वादित्यर्थः । रागस्यापि भावनयैव निवृत्तिर्न तु दोषज्ञानमात्रेणेति भावः । एवमपि सेतुदर्शननिवर्त्यपापे व्यभिचारः सेतुभ्रममात्रेण पापानिवृत्त्या तस्य प्रमात्वेनैव तन्निवर्तकत्वादित्यत आह— **सेतुदर्शनं चेति । न प्रमित्यात्मनेति ।** ततश्च प्रमात्वमात्रप्रयुक्तनिवर्तकताशालिज्ञानानिवर्त्यत्वं साध्यमिति साध्यस्यापि सत्त्वान्न व्यभिचार इत्यर्थः । न च रजतभ्रमस्य रज्जुभ्रमेणापि निवृत्तिदर्शनान्न प्रमात्वप्रयुक्तं ज्ञानस्य भ्रमनिवर्तकत्वमिति वाच्यम्, तदधिष्ठानकसकलभ्रमनिवृत्तौ तत्प्रमात्वस्य तन्त्रत्वाभ्युपग-

मात् तत्रापि नान्तरीयकस्य नेदं रजतमिति ज्ञानस्यैव निवर्तकत्वाच्च । ननु सेतुदर्शनवदात्मज्ञानस्यापि 'द्रष्टव्यः' इति विध्यायत्तमेव बन्धनिवर्तकत्वम्, ततश्च सिद्धसाधनमित्यत आह-- **आत्मनः प्रमा त्विति** । अधिष्ठानतत्त्वसाक्षात्कारस्य सकलतदध्यस्तनिवर्तकत्वस्य लोके दृष्टत्वेन 'ब्रह्म वेद ब्रह्मैव भवति' 'क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे' इत्यादिश्रुतिषु ब्रह्मतत्त्वसाक्षात्कारानन्तरं बन्धनिवृत्तौ विलम्बाभावावगमेन च तस्य प्रमात्वेनैव निवर्तकत्वादित्यर्थः । नन्वेवं विधिवैयर्थ्यमत आह-- **तद्विधेरिति** । जीवस्य ब्रह्मैकत्वसिद्ध्यर्थमपि बन्धमिथ्यात्ववर्णनमित्याह-- **यत्त्विति** । **अविवादादिति** । उपाधेर्मिथ्यात्वे तत्परिणामस्य संसारस्यापि मिथ्यात्वादिति भावः । विप्रतिपत्तेरिति । लक्षणानां विरुद्धत्वादित्यर्थः । मतिसंवादार्थैव तदुपन्यास इति परिहरति-- **अत आहेति** । तर्हि मतान्तराभिमतख्यातिस्वीकारापत्तिरित्याशङ्क्य प्रकारान्तरेण यथोक्तलक्षणानिर्वाहादर्थादनिर्वचनीयतासिद्धिरित्याह-- **एवंलक्षणकत्वं चेति** । तर्हि कथं मतभेद इत्यत ५३
आह-- **विप्रतिपत्तिस्त्विति** । सोऽप्यंशो बलादङ्गीकारयितव्य इति भावः । अन्यथाख्यात्यनुवादशङ्कां व्यावर्तयति-- **अन्यत्रेति** । तन्मते शुक्त्यादौ रजतादेर्धर्मिण एवारोपादिति भावः । **आत्मख्यातीति** । आत्मनो ज्ञानस्याकारो यो रजतादिस्तस्य बाह्ये ख्यातिरित्यर्थः । **मतभेदेनेति** । बाह्यास्तित्ववादिमते बाह्यं घटादिकमेव भ्रमाधिष्ठानम्, विज्ञानमात्रास्तित्ववादिमते तु बाह्यमलीकमेव तदधिष्ठानमिति विशेषमाहेत्यर्थः । अधिष्ठानज्ञानाभावे कथमारोप इत्याशङ्क्य तत्प्रत्यक्षाभावेऽपि तदनुमानं संभवतीत्याह- **यद्यपीत्यादिना**। **अधिष्ठानमिति** । तज्ज्ञानमित्यर्थः । अधिष्ठानवदाकारोऽपि बाह्यः किमिति न भवेदित्यत आह- **आरोप्यं त्विति** । तैस्तथानभ्युपगमादिति भावः । उपपत्तिस्त्वित्यादिटीकाया एषोऽर्थः- रजतस्य सत्त्वे तस्य ज्ञानाकारत्वे च किं प्रमाणमित्यत आह- उपपत्तिस्त्विति । न तावत्प्रमाणाभावाद्रजतस्यासत्त्वमित्याह- यद्यादर्शमिति । नापि बाधकादित्याह- नेदमिति । एवं रजतस्य सत्त्वं प्रसाध्य तस्य ज्ञानाकारत्वमर्थापत्त्या साधयति- तथा चेति । अनुमानादिति पक्षं निराकर्तुं तदनुमानमिति टीका । तदभिप्रायमाह-- **सहोपलम्भेति** । 'सहोपलम्भनियमादभेदो नीलतद्धियोः' इत्यादिबौद्धकारिकोक्तं यद्येन नियतसहोपलम्भं तत्ततो न भिद्यते यथा एकस्माच्चन्द्रमसो ५४
द्वितीयश्चन्द्रमा इत्याद्यनुमानं साहित्यस्य भेदाविनाभावान्नाभेदसिद्धिरिति निराकरिष्यत इत्यर्थः । प्रतिपत्तुः प्रत्ययाभेदेऽपि रजतस्याहमित्युल्लेखापादने को हेतुरित्यत आह-- **प्रतिपत्तुरिति** । एते पञ्चम्यौ ते च समानाधिकरणे इत्यर्थः । **ज्ञानात्मकादिति** । ततश्च तादृशप्रतिपत्रपेक्षया रजतस्यानतिरेकादिति टीकार्थ इति भावः । रजतानुभवः किमान्तरं रजतमान्तरत्वेनैवावगाहते उत बाह्यत्वेनेति विकल्प्य प्रथमं निराकृत्य द्वितीयं शङ्कत इत्याह-- **वस्तुत इति** । तर्हि सविकल्पकानुभवस्य भ्रान्तित्वात् कथमनेन रजतसिद्धिरित्यत आह- **भ्रान्तिरूपेति** । सविकल्पकस्य द्वौ विषयौ ग्राह्योऽध्यवसेयश्च । तत्राद्योऽबाधितः स्वलक्षणत्वात्, द्वितीयस्तु बाधितो बाह्यत्वादित्यर्थः । एवमपि रजतमात्रं सिध्येत्, तस्य ज्ञानाकारता कुत इति शङ्कते-- **सिद्ध इति** । **प्रागुक्तेति** । बहिर्बाधितमर्थादान्तर इत्यादिनेत्यर्थः । आन्तरत्वप्रतिपत्तिप्रकारस्य दर्शितत्वादसंनिधानेत्यादिपरिहारासामञ्जस्यमाशङ्क्य यदिदमिदंत्वं

प्रतिषिध्यते नेदं रजतमिति, तत्किं पुरोवर्तित्वं बहिष्ट्वं वा? नाद्य इत्याह— **इदंतेति ।** न द्वितीयः, इदंत्वस्य संनिहितत्वरूपत्वेन बहिष्ट्वरूपत्वाभावादित्याशयेनाह— **अख्यातिमते हीति ।** व्यवहारस्यैव बाध इत्यत्र नियामकमाह— **सर्वसंमतस्येति ।** रजतज्ञा- ५५
नस्य शुक्तिकायां रजतप्रसञ्जकत्वं शुक्तिविषयकत्वे सत्येव भवति, नान्यथा; ततश्च किं तत्र भासमानत्वाच्छुक्तिका तदालम्बनम् उत पुरोवर्तित्वेन अथ वा तत्कारणत्वेनेति विकल्प्य प्रथमं न ह्यित्यादिटीकया निराकृत्य द्वितीयं शङ्कते— **ननु मा भास्विति ।** रजतसंज्ञानस्य शुक्तिविशेष्यकत्वानभ्युपगमेन तत्प्रत्यक्षत्वाभावे शुक्तेस्तत्र साक्षात्कारणत्वाभावात्परम्परया तदुपपादयंस्तृतीयं कल्पमाशङ्कते— **अथेति ।** अगृहीतभेदज्ञानद्वयादेव मिथ्याव्यवहारसिद्धेर्न विशिष्टज्ञानावश्यंभाव इति परिहरति— **तत्राहेति ।** अर्थमारोपितं प्रतिषिध्येति । रजतज्ञानेन शुक्तिकायां प्रसञ्जितं देशान्तरस्थमेव रजतमारोपितमिति नैयायिकमतसिद्धमारोपितं प्रतिषिध्येत्यर्थः । किं सामग्र्याबलाद्व्यधिकरणप्रकारकज्ञानाभ्युपगमः विसंवादिप्रवृत्त्यन्यथानुपपत्त्या वेति विकल्प्य प्रथमम् अपि चेत्यादिटीकया निराकृत्य द्वितीयं शङ्कते— **ननु मिथ्येति ।** भेदाग्रहादेव प्रवृत्तिसिद्धेर्न तदर्थं विपर्ययाङ्गीकार इति परिहरति— **तत्राहेति ।** ५६
शुक्तित्वस्य विशेषत्वोपपादनार्थं सामान्यग्रहणमित्याशयेन व्याचष्टे— **शुक्तित्वरूपस्येति ।** गृहीतमिदमिर्तीति । पूर्वानुभूतत्वरूपतत्ताप्रकाशनस्वभावेत्यर्थः । सत्यरजतज्ञानसारूप्यमुपपादयति— **संनिहितेति ।** न गृह्णात इति । विद्यमानस्यापि भेदस्य दोषादग्रहणमिति भावः । व्यवहारनिवृत्तेः स्वकारणभेदाग्रहाभावादेव सिद्धेर्न बाधकज्ञानफलत्वमित्याशङ्क्य परम्परया तदित्याह— **इतरेतरेति ।** इतरेतराभावो भेदः; तथा च नेदं रजतमिति बाधकज्ञानेन पुरोव- ५७
र्तिरजतयोर्भेदबोधनादित्यर्थः । विप्रतिपन्ना इति विशेषणवैफल्यमाशङ्क्याह— **सर्व इति ।** संदेहाश्च विभ्रमाश्चेत्यर्थः । ननु ग्रहणस्मरणयोर्विशिष्टज्ञानस्य वा पक्षत्वे अन्यतरमते आश्रयासिद्धिरित्यत आह— **अयथार्थेति । नाश्रयासिद्धिरिति ।** इदमुपलक्षणम् । साध्यमपि सर्वविषयावच्छेदेन याथार्थ्यं विवक्षितमिति धर्म्यंशयाथार्थ्यमादाय न सिद्धसाधनमित्यपि द्रष्टव्यम् । टीकायां किं तु तस्य रजतादेरिति । तथा च तद्विवेकेति । भाष्यगतत्तच्छब्देन यदध्यास इति यच्छब्दनिर्दिष्टस्य रजतादेरध्यासशब्दोपस्थापितस्याध्यासस्थले मतद्वयसंमतस्य रजतस्मरणस्य च ग्रहणं विवेकप्रतियोगितया च पुरोवस्थितद्रव्यतज्ज्ञानयोरुपस्थितिः विवेकाग्रहोपयोगितया च पूर्वगृहीते रजते तत्तांशग्रमोष उक्तः । ततश्च तयो रजततत्स्मरणयोः शुक्तितज्ज्ञानाभ्यां भेदाग्रहनिबन्धन इति भाष्यार्थ इति भावः । प्रवृत्तिव्यपदेशयोरिदं रजतमिति विशिष्टज्ञानाधीनत्वानभ्युपगमादस्तीति सिद्धवन्निर्देशायोगमाशङ्क्य प्रसाध्यत्वाभिप्रायेण योजयति— **पुरोवर्तिनीति ।** टीकायां तौ कथमग्रहणमात्रादिति । सुषुप्तावपि तदापत्तेरिति भावः । स्वरूपतो विषयतश्चागृहीतभेदज्ञानमात्रस्य प्रवर्तकत्वे रजते नेदं रजतमिति ज्ञानादपि प्रवृत्त्यापत्तिरित्यत उक्तं टीकायाम्— समीचीनपुरःस्थितेति । टीकायां तस्मात्सत्तामात्रेण भेदाग्रह इति । पुरोवर्त्यगृहीतासंसर्गकभेदप्रतियोगित्वेनानुपस्थितेष्टज्ञानस्य पुरोवर्तिज्ञानाद्भेदाग्रह इत्यर्थः । टीकायां चेतनव्यवहारस्येति । प्रेक्षावत्प्रवृत्तेरिष्टतावच्छेदकप्रकारकप्रवृत्तिविषयविशेष्यकज्ञानमन्तरेणानुपपत्तेरित्यर्थः । आशयमजानानः शङ्कते टीकायाम्— ननु सत्यमिति ।

आशयमुद्घाटयति टीकायाम्— **मैवमिति** । नन्वगृहीतभेदयोर्ग्रहणस्मरणयोरपीष्टावच्छेदक-प्रकारकत्वात्प्रवृत्तिविषयविशेष्यकत्वाच्च तत एव प्रवृत्त्युपपत्तेर्न विशिष्टज्ञानकल्पने प्रमाणमित्यत आह— **किमगृहीतेति** । रजतस्मरणस्य प्रवृत्तिविषयकत्वाभावात्तद्विषयकेच्छाजन-
५८ कत्वाभावाच्च न तत्र प्रवर्तकत्वमिति परिहरति— **न द्वितीय इत्याहेति** । ग्रहणेऽपि तुल्यमिति । रजतस्मरणस्य पुरोवर्त्यविषयकत्वे तद्विषयकप्रवृत्त्यनुपपत्तिवच्छुक्तिज्ञानस्यापि रजताविषयकत्वे तदिच्छाविरहेण तदर्थिप्रवृत्त्यनुपपत्तेस्तुल्यत्वादित्यर्थः । व्यतिरेकमुखेन सूचितमिच्छायाः पुरोवर्तिन्यावश्यिकत्वमन्वयमुखेनाह— **यदि तदिच्छेदिति** । टीकायां यद्यतथात्वेनेति । पुरोवर्तिनोऽरजतत्वेनाग्रहणाद्रजतार्थिनः पुरोवर्तिनीच्छा जायत इत्यर्थः । टीकायामपक्षधर्मत्वादिति । इदं पुरोवर्तिरजतार्थीष्टसाधनं रजतत्वादिति हेतोः पक्षीभूते शुक्तिकाशकले अविद्यमानत्वादित्यर्थः । टीकायामेकदेशदर्शनामिति । एकदेशविशिष्टतया तद्धर्मिदर्शनमित्यर्थः । टीकायाम् अनुमानं ज्ञातसंबन्धस्यैकदेशदर्शनादेकदेशान्तरेऽसंनिकृष्टेऽर्थे बुद्धिरिति शबरस्वामिवाक्यमुदाहृतम्, तद्व्याचष्टे- **ज्ञातसंबन्धस्येति** । लिङ्गलिङ्ग्युभयविशिष्टस्य धर्मिणस्तदन्यतरविशिष्टवैशिष्ट्येनैकदेशत्वं बोध्यम् । समारोपवादिनोऽपि पुरोवर्तिनि रजतत्वाभावादपक्षधर्मत्वं तुल्यमित्याशङ्क्य असता वैशिष्ट्येण तत्र तत्सत्त्वाभ्युपगमान्न दोष इत्याह— **समारोपे त्विति** । फलज्ञानस्य प्रवर्तकत्वमभ्युपेत्य हेतुविशेषणस्य प्रयोजनमाह— **पुरोवर्तिनीति** । नन्वेवं हेतोरसिद्धिः उपायानां नानात्वेन तज्ज्ञानस्यापि नियमेन पुरोवर्तिनि प्रवर्तकत्वाभावादित्याशङ्क्य टीकायां पूर्वग्रन्थोक्तस्येष्टसाधनत्वव्याप्यरजतत्ववदिदमित्येवंरूपस्य रजतज्ञानस्य पक्षत्वात्तस्य च तत्र नियमेन प्रवर्तकत्वान्नासिद्धिः । फलस्य तु रजतजन्योपकारस्य रजतप्रतिग्रहादिनापि सिद्धेर्न तज्ज्ञानस्य नियमेन पुरोवर्तिनि प्रवर्तकत्वमिति
६३ वैषम्यमभिप्रेत्याह— **फलस्य हीति** । स्मरण इति । इष्टसाधनत्वेनानुसंधीयमानगेहगतरजतस्मरण इत्यर्थः । प्रवर्तकत्वमित्यत्र प्रवृत्तिर्न यत्नः, किं तु शरीरचेष्टेत्यभिप्रेत्याह— वाग्व्यादाविति । इच्छाद्वारा प्रवर्तकत्वं विवक्षितम्, अतो न दोष इति परिहारतात्पर्यमाह— **वाग्व्यादिर्हीति** । सत्यरजतज्ञाने पुरोवर्तिशुक्तिविषयकत्वाभावेन दृष्टान्ते साध्यवैकल्यमित्यतः सामान्यव्याप्तिरुपन्यस्ता टीकायामिति मन्तव्यम् । दृष्टं चेत्यादेरनाकाङ्क्षिताभिधानतां परिहरति— **यच्चोक्तमिति** । अनाश्वासः किं प्रवृत्त्यभाव उत प्रामाण्यानिश्चयः? नाद्यः, प्रामाण्यनिश्चयादेव प्रवृत्त्युपपत्तावर्थाव्यभिचारनिश्चयस्य तदहेतुत्वात्; नान्त्यः, अव्यभिचारनिश्चयानधीनत्वात्प्रामाण्यनिश्चयस्येत्युक्तं टीकायाम्; तद्विशदयति— **एवं हीत्यादिना** । किमर्थो व्यभिचारापेक्षा करणप्रामाण्येऽपि उत ज्ञानप्रामा-
६४ ण्यमात्रे? नाद्य इत्याह— **व्यभिचारिणामपीति** । अन्वयव्यभिचारमप्याह— **अव्यभिचारिणामपीति । कुतश्चिन्निमित्तादिति** । बाधसत्प्रतिपक्षादिना प्रमानुत्पादकत्वे फलोपहितप्रामाण्याभावादित्यर्थः । एतच्च प्रथमकल्पमात्रे दूषणम् । हेतोरपि सहकारिविरहे कार्याजनकत्वसंभवेन व्यापकव्यभिचारस्यादोषत्वेन च द्वितीयतृतीययोः कल्पयोरदूषणत्वादिति ध्येयम् । द्वितीयं शङ्कते— **भवत्विति** । अव्यभिचार एव ज्ञानस्य प्रामाण्यमिति भावः । **जन्मनैवेति** । जातस्य ज्ञानस्य ज्ञेयानवभासकत्वादर्शनेन तस्य ज्ञेयावभासेऽन्यानपेक्ष-

त्वादित्यर्थः । द्वितीये सत्यमर्थाव्यभिचार एव प्रामाण्यं तन्निश्चयश्च प्रवृत्तावुपयुज्यते । किं तु स्वप्रकाशत्वाज्ज्ञानस्य स्वगतं प्रामाण्यं स्वत एव निश्चीयत इत्युत्सर्गः । क्वचित्तु बाधकवशादपोद्यते; ततश्च स्वारसिक आश्वासः; बाधकवशात्तु अनाश्वासः; त्वन्मते सर्वप्रत्ययययाथार्थ्येऽपि क्वचिद्विशिष्टज्ञानं क्वचिदगृहीतभेदं ज्ञानद्वयमित्यभ्युपगमेनानाश्वासतौल्ये उक्तप्रकारस्यैवानुसरणीयत्वादिति वक्तुं प्रामाण्यस्य परतस्त्वं निराकरोति— **अव्यभिचारेति** । घटज्ञानगतप्रामाण्यानुमितिजनकीभूतं यत्संवादिप्रवृत्तिजनकत्वादिज्ञानं तत्किं ज्ञानान्तरेण निश्चितप्रामाण्यं सत् स्वविषयं निश्चाययति, उतानिश्चितप्रामाण्यम्, अथ वा स्वत एव निश्चितप्रामाण्यम्? नाद्य इत्याह— **ज्ञानान्तरादिति** । तत्रापि परतस्त्वावश्यंभावादिति भावः । न द्वितीय इत्याह— **अनिश्चये चेति** । जनकज्ञानेऽप्रामाण्यशङ्कया तत्रापि ६५
तदापत्तेरित्यर्थः । तृतीयं निराकरोति— **स्वत इति** । अवश्याश्रयणीयत्वादिति भावः । एवं न्यायकणिकोक्तं प्रदर्श्य तत्र समर्थितं स्वतस्त्वं लक्षणप्रमाणाभ्यां प्रपञ्चयितुमाह— **नन्विति** । स्मृतेः यथार्थत्वेऽपि प्रमाव्यवहाराभावात्तद्व्यावृत्त्यर्थं स्मृतित्वानधिकरणेत्युक्तम् । ६६
बाधाद्यन्ताभावः विषयव्यभिचाराभावः । **द्वयोरपीति** । इदमुपलक्षणम् ज्ञानग्राहकसामग्रीमात्रग्राह्यत्वं ज्ञप्तौ स्वतस्त्वमित्यप्यनुपपन्नम्, तदतिरिक्तानुमितिग्राह्यत्वस्यापि सर्वसंप्रतिपन्नत्वादित्यपि द्रष्टव्यम् । भ्रमप्रमासाधारणकारणातिरिक्तकारणजन्यत्वाभावः प्रमाया उत्पत्तौ स्वतस्त्वं ज्ञानग्राहकसामग्यतिरिक्तकारणानपेक्षग्राह्यत्वं यावज्ज्ञानग्राहकसामग्रीग्राह्यत्वं वा ज्ञप्तौ स्वतस्त्वमित्यर्थाल्लक्षणसिद्धिमभिप्रेत्य प्रमाणमाह— **उच्यत इति** । रूपप्रभायाः संयुक्तसमवायान्तर्गतचक्षुःसंयोगजन्यत्वाद्रूपजन्यत्वाच्च बाधवारणायार्थसंप्रयोगत्वानधिकरणेति चक्षुर्गतेति च साध्यविशेषणे । एतच्चानुमानं चक्षुरादिगतदोषाभाव एव प्रमाहेतुरिति मतमाश्रित्य । भूयोवयवेन्द्रियसंनिकर्षादिकमेव प्रमाहेतुरिति मते तु देवदत्तीयरूपप्रमा देवदत्तीयभ्रमप्रमासाधारणरूपज्ञानकारणातिरिक्तरूपज्ञानकारणजन्या न भवति देवदत्तीयप्रमात्वाच्छ्रोत्रजप्रमावदित्यनुमानं द्रष्टव्यम् । न च दोषाभावस्याहेतुत्वे दोषदशायामपि प्रमोत्पत्त्यापत्तिः, असति प्रतिबन्धके सामग्याः कार्यजनकत्वात्, प्रतिबन्धकाभावकारणत्वस्य च निष्प्रमाणकत्वादिति भावः । **एषा प्रमेति** । अगृहीतप्रामाण्या प्रमेत्यर्थः । अनेन स्वतस्त्ववादेऽपि गुणज्ञानेन ६९
द्वितीयवारं प्रामाण्यग्रहाभ्युपगमाद्बाधो वारितः । **तथाविधेति** । गुणज्ञानस्य प्रवृत्तिहेतुत्वं च प्रामाण्यनिश्चयद्वारा बोध्यम् । टीकायां स्मृतिप्रमोषभङ्गस्येति । भ्रमस्थले रजतमित्यादिस्मृतेस्तत्तांशप्रमोष इति यन्मतं तद्भङ्गस्येत्यर्थः । टीकायां विस्तरस्त्विति । नेदं रजतमिति निषेधानुपपत्त्यादिप्रपञ्चस्त्वित्यर्थः । **सर्वतन्त्रसिद्धोऽर्थ इति** । तथा च ७०
सिद्धान्त इत्यन्तशब्दोऽर्थपर इति भावः । **मिथ्यात्वं विवक्षितमिति** । शुक्तिकादेर्मिथ्यारजतात्मत्वविवक्षायामपि रजतवदवभासत इत्यादिव्यवहारदर्शनेन सादृश्यमिव मिथ्यात्वमपि वतेरर्थ इति भावः । वस्तुतस्तु स्वार्थिको वतिः नित्यवच्छ्रवणविरोधादित्यादिप्रयोगदर्शनेन स्वार्थिकस्यापि प्रामाणिकत्वात्, ततश्च शुक्तिका रजतमभादिति शुक्तिज्ञानेन रजततादात्म्यावगाहनान्मिथ्यात्वसिद्धिरिति ध्येयम् । आह कोऽयमित्यादिभाष्येण कथं पुनरित्याभाष्यस्य पौनरुक्त्यं परिहर्तुं टीकायां पुनरपीत्युक्तम् । तत्तात्पर्यं प्रकटयन्नाह— **एव-**

७१ **मिति।** प्रकाशत इति पक्षेऽपि किं ज्ञानविषयतया प्रकाशते, उत घटादिसंविदाश्रयत्वेन, अथ वा स्वप्रकाशत्वेन? आद्येऽपि किं स्वसमवेतज्ञानविषयतया स्वग्राह्यत्वं परात्मग्राह्यत्वं वा, नाद्यः आत्मनः स्वसमवेतज्ञानक्रियाजन्यफलशालित्वे कर्मलक्षणाभावेन कर्मत्वाभावे विषयत्वायोगादिति वक्तुं न खलु स एवेत्यादिटीकेत्याह— **नाद्य इत्याहेति।** न चैकस्याप्यात्मन औपाधिकभेदाश्रयणेन कर्मत्वनिर्वाहः कर्तृकर्मभावे स्वरूपभेदस्यैव तन्त्रत्वात्, अन्यथा देवदत्तो देवदत्तं गच्छतीत्यप्यापत्तेः। अत एव मामहं जानामीत्यादावात्मान्तःकरणयोरेव कर्तृकर्मभाव इत्यभिप्रेत्य टीकायां न च तदेव स्वं च परं च विरोधादित्युक्तम्। आत्मान्तरसमवेतज्ञानकर्मत्वे च तदात्मान्तरं ज्ञेयमुत न? नान्त्यः, येन ज्ञेयं [illegible] कस्याप्यात्मत्वं न सिध्येदिति। द्वितीयं दूषयतीत्याह— **न द्वितीय इत्याहेति।** द्वितीयं कल्पमुत्थापयतीत्याह— **संविदाश्रयत्वेनेति।** ननु टीकायामात्मनो न संविदाश्रयत्वं संभवति चिद्रूपत्वप्रतिपादकश्रुतिविरोधादित्युक्ता तत्रापि ज्ञानाश्रयत्वमेवोच्यत इत्यादिशङ्काव्युदासाय चिद्रूप एव ब्रह्मणि श्रुतीनां तात्पर्यमिति दर्शयितुमुक्तमुपपद्यते चेति। तथा हीत्यादिना च संवित्स्वप्रकाशत्वादिकमन्यदेवोच्यते नात्मनश्चिद्रूपत्वमित्याशङ्क्य संविदः स्वप्रकाशत्वं प्रसाध्य ततो भिन्नस्य जडस्य कथंचिदपि प्रकाशानुपपत्त्या तद्विवर्ततया तदभेदेनैव प्रकाशावश्यंभावेन सकलजगद्विवर्ताधिष्ठानतया श्रूयमाणस्य ब्रह्मणो युक्तमेव जन्मादिविकाररहिताभिन्नस्वप्रकाशसंविद्रूपत्वमिति वक्तुं स्वप्रकाशत्वाद्युपपादनमित्याह— **स्वप्रकाशफलस्येति।** स्वप्रकाशस्य फलस्य स्फुरणस्येत्यर्थः। वृत्तिरूपस्य तु ज्ञानस्य जडत्वमेवेति भावः। प्रकाशो जड इति पक्षेऽपि किमर्थात्मनोस्तस्मादेव प्रकाशात् स्फुरणम् उत स तज्जनिताज्ज्ञानात्? नाद्य इत्याह टीकायाम्— जडश्चेदिति। ननु जडत्वाविशेषेऽपि स्वच्छत्वास्वच्छत्वादिविशेषवत्प्रकाशकत्वतदभावविशेषोऽपि स्यादित्याशङ्क्य प्रकाशैकलोलीभावेन विना कस्यापि प्रकाशादर्शनान्नैवमित्याह टीकायाम्— अविशेषादिति। अस्तु ततः किम्? तत्राह टीकायाम्— प्राप्तमिति। ततश्चेति शेषः। आभाणको लोकगाथा। नान्त्य इत्याह टीकायाम्— न च निलीनमेवेति। अथानवस्थापरिहाराय दूरे गत्वा ज्ञानं स्वप्रकाशमिष्यते तदा आदावेवास्त्वित्याशयेनाह टीकायाम्— तस्मादिति। तथापीत्यादिटीकाग्रन्थस्य परिहारग्रन्थत्वात्तद्यावर्त्यां शङ्कामाह—

७३ **नन्वभ्युपेयत इति।** टीकायां किमायातमिति अन्यस्य स्वयंप्रकाशत्वमात्रेणान्यस्य प्रकाशेऽतिप्रसङ्गादिति भावः। संबन्धो नियामक इति शङ्कते टीकायाम्— एतदायातमिति। किं सापेक्षत्वमात्रं संबन्धः, उत नित्यसापेक्षत्वम्, अथ वा तद्धर्माविनाभूतधर्मकत्वम्? आद्यं निराकर्तुं तत्किमित्यादिटीका, तदभिप्रायं प्रकटयन्नेव द्वितीयमुत्थापयति— **अर्थात्मसंब-**

७४ **न्धिन्यामित्यादिना।** वैषम्यमेवाह— **आश्रयेति।** पितापुत्रयोः स्वरूपेण नित्यसापेक्षत्वाभावेऽपि पितृत्वादिवेषेण तदस्तीति परिहारतात्पर्यमाह— पुत्रगतेति। टीकायां सहार्थात्मेत्यादिना अर्थात्मप्रकाशाविनाभूतप्रकाशशालित्वं संबन्ध इति तृतीयं कल्पमाशङ्क्य तत्किमित्यादिना स निराकृतः। तत्र संविदर्थात्मनां त्रित्वात् प्रकाशाविति द्विवचनायोगमाशङ्क्य द्वयोरप्यर्थात्मनोर्जडत्वेनैकीकारान्न दोष इति दर्शयन्किंशब्दसूचितं विकल्पं विशदयति— **अर्थो-**

त्मनोरिति । तथा चेत्यादिटीकोक्तं दोषद्वयं विशदयन्निष्टपर्यवसायितामाह– संविद इति । द्वितीयं शङ्कत इत्याह– अभेदमाशङ्कत इति । टीकोक्तां विवक्षितार्थासिद्धिमुपपादयति– संविदतिरिक्तेति । अनुपयोग उक्त इति । अर्थस्य प्रकाशमानतायां सहभावस्यानुपयोग उक्त इत्यर्थः । उत्तरत्र हानादीनामतीतादिविषयत्वशङ्कनादिह तद्विषयत्वं बुद्धिविशेषणमित्याशयेनाह– **तद्विषयाश्च ता इति । हेताविति**। साध्ये तु बाधः स्फुट इति भावः । **तां परिह-** ७५
रतीति । विशेषणासिद्धिं परिहरति । शङ्काटढीकरणायेत्यर्थः । किं तद्विषयकत्वमात्रं तत्प्रकाशत्वे तन्त्रम् उत प्रकाशत्वविशेषितम् अथ वा तदभिन्नप्रकाशत्वम् ? नाद्यः, प्रयत्नवदात्मशरीरसंयोगस्यापि तद्विषयहानादिप्रवृत्तिजनकत्वेन तद्विषयतया तत्प्रकाशत्वापत्तेरित्युक्तं टीकायां तत्किमित्यादिना । तत्रैतद्दोषभिया तद्विषयकहानादिजनकत्वं न हानादिबुद्धीनां तद्विषयत्वे तन्त्रम्, हानादीनामपि तद्विषयत्वासिद्धेरिति यद्युच्येत तर्हि विशेषणासिद्धिरिति टीकाभिप्राय इत्याह— **अर्थविषयेति** । द्वितीयतृतीयनिराकरणपरतया नन्वयमित्यादिटीकां व्याकरोति — **प्रयत्नवदिति । अर्थे त्विति** । स्वभिन्नेऽर्थे जडरूपैव संवित्, संविदः प्रकाश- ७६
रूपतायां संविदभेदस्यैव तन्त्रत्वादिति भावः । टीकासूचितं तृतीयकल्पनिराकरणं प्रकटीकुर्वन्नाह— **अर्थस्यापीति** । अध्यासाक्षेपवादिना तस्मादित्यादिना प्रपञ्चानिर्वचनीयत्ववर्णनमयुक्तमित्यत आह— **सिद्धान्त्यभिमतामिति** । प्रकाशभेदनिरसनस्य फलं दर्शयन्नाह— **एवमिति** । टीकायां किं प्रकाशस्य स्वतो भेद उतोपाधितः, नाद्यः, सर्वेषामपि पुरुषाणामनुभवामीत्यनुभवांशे एकाकारतावभासनेन भेदाप्रतीतेः, न चायमेकाकारप्रत्ययो जात्यैक्यनिबन्धनः, लाघवेन व्यक्त्यैक्यविषयकत्वस्यैव कल्पनौचित्यात् । न चैवमिच्छामीत्याद्यनुगतप्रत्ययादिच्छादीनामप्येकत्वापत्तिः, मम तदिच्छा नष्टा इदानीमेतदिच्छा समुत्पन्नेत्युत्पत्तिविनाशानुभवेन वैषम्याज्ज्ञाने उत्पत्तिविनाशानुभवस्य तदवच्छेदकवृत्तिविषयत्वात् । न चैवमिच्छायामप्युत्पत्तिविनाशानुभवस्य वृत्तिविषयत्वम्, तत्र वृत्त्यभावाज्ज्ञानस्य सच्चिदानन्दाद्वितीयात्मरूपतया तदुत्पत्तिविनाशानानात्वानुभवनिर्वाहार्थमवच्छेदकवृत्त्यभ्युपगमेऽपि स्वरूपेणैवोत्पत्तिविनाशाद्यनुभवयोग्यायामिच्छायामवच्छेदकवृत्तिकल्पनस्य निष्प्रमाणकत्वादित्याशयेनाह टीकायाम्– न चास्येति । द्वितीये स उपाधिः किं मिथ्या उत सत्यः? नाद्यः, अध्यस्तरङ्गरजतादिभेदेऽपि शुक्तिभेदादर्शनेन मिथ्योपाधेरधिष्ठानाभेदकत्वादित्याह— न चेति । नान्त्यः, प्रपञ्चसत्यत्वस्य निराकरिष्यमाणत्वादित्याह टीकायाम्— अपि चेति । कालमात्रस्य पक्षत्वे जाग्रत्स्वप्नयोर्वृत्तिसाक्षात्कारेण सिद्धसाधनं स्यादित्यत उक्तं सुषुप्तिकाल इति । न च सुषुप्तावपि तमादायार्थान्तरम्, तत्र मनसो लयश्रवणेन तदानीमहंवृत्त्ययोगात् । न च सुखमहमस्वाप्सामिति परामर्शानुपपत्तिः, सुषुप्तिकालसाक्षात्कृतप्रत्यगात्मगोचरे परामर्शे तत्कालसमुद्भूतसाक्ष्यध्यस्ताहमर्थानुरागसंभवादित्याशयेनाह— **न च सुषुप्ताविति** । ७७
साक्षात्कारपदप्रयोजनमाह— **न च पुरुषान्तरमिति । विशेषणीयमिति** । अयोग्यनीश्वरसाक्षात्कारवानिति विशेषणीयमित्यर्थः । **तदेवेति** । प्रातिलोम्यमेवेत्यर्थः । कथंशब्दे किंशब्दसद्भावं प्रकटयति— **कथमिति** । थमुप्रत्ययान्तस्येति । 'किमश्च' इति सूत्रेण ७८
किंशब्दात्थमुप्रत्यये 'किमः कः' इति सूत्रेण किंशब्दस्य कादेशे च कथमिति रूपमि-

त्यर्थः । ननु टीकायां सर्वो हीति भाष्यमुपात्तम्, तदस्वप्रकाशत्वपक्षे दूषणाभिधानसमर्थम् एतदुक्तं भवतीत्यादिना च स्वयंप्रकाशत्वपक्षे दूषणमुच्यते, ततश्च भाष्यविरोध इत्याशङ्क्य पूर्वभाष्ये प्रत्यगात्मनीति विशेषणसूचितम् स्वप्रकाशत्वपक्षे दूषणं विशदीकुर्वन्सर्वो हीति-भाष्योक्तमस्वप्रकाशत्वपक्षे दूषणं सदातनेऽपीत्यादिना दर्शयतीत्याशयेनाह— **अप्रधानत्व-पक्ष इति** । ननु स्वप्रकाशत्वरूपमत्यन्तग्रहणं सर्वदा प्रकाशराहित्यरूपम्; अत्यन्ताग्रहणं च नेष्यते, किं तु तद्विषयकेण ज्ञानेन प्रकाशमानत्वमेव, ततश्च नाध्यासविरोध इति शङ्कते टीकायाम्— स्यादेतदिति । आत्मनो ज्ञानविषयत्वे दृश्यत्वेनेदंकारास्पदत्वेन च मिथ्यात्वादनात्मत्वापत्तेस्तस्यापि ज्ञानस्य ज्ञानान्तरविषयत्वेऽनवस्थापत्तेश्च कस्यचित्स्वप्रकाशत्वावश्यंभावे आत्मन एव तथुक्तमिति परिहारभाष्यभिप्रायमाह टीकायाम्— विषयत्वे हीति । उच्यत इत्यादि-भाष्यव्याख्याने बीजं दर्शयति— **भाष्यकारेणेति** । स्वतोविषयत्वमित्यत्र अविषयत्वमिति
७९ च्छेदः । **स्वत एवेति** । ततश्च विषयत्वाविषयत्वे उभे अप्यंशभेदेन स्वत एव स्तामिति भावः । चिद्रूपे भातीति सप्तम्यन्तम् । किमानन्दादिभाने प्रमाणाभाव इत्याशय उत तद्भाने तदुल्लेखोऽपि स्यादिति अथ वा तदुल्लेखरहिते तद्भानं दृष्टविरुद्धमिति? नाद्यः, आनन्दादेश्चिद्रूपाभेदेन तद्भाने भानावश्यंभावात्, न हि संभवति घटत्वं भासते कलशत्वं न भासत इत्याशयेनाह— **नेत्याहेति** । द्वितीयमाशङ्क्य निराकरोति— **न हीति** । न तृतीय इत्याह— **यथा खल्विति** । पूर्वेद्युर्दृष्टस्य देवदत्तादेः पुनर्दर्शने अयं देवदत्त इत्यादौ तदैक्यमपि विषयः उत्तरकालं स वा अन्यो वेति संशयादर्शनात् । अथापि सोऽयमित्येवं तत्तादनुल्लेखेन स्पष्टं न भासत इव । तथैव स्वरूपानन्दस्फूर्तावपि संसारदशायां दुःखसंमिश्रतया तत्प्रत्यनीकत्वेनाग्रहणाद्ध्यस्तापकर्षयोगाच्च न तदुल्लेखः, तद्ग्रहणदशायां तु भवत्येव कथंचिदु-
८० ल्लेखः, सुखं वर्ते सुखमहमस्वाप्समिति चेति भावः । **तत्र विद्यमानत्वादिति** । तदात्मना विद्यमानत्वादित्यर्थः । ननु बुद्ध्यादिभेदस्य कथमनिर्वचनीयत्वमबाध्यत्वादित्याशङ्क्य तस्यापि ब्रह्मज्ञानबाध्यत्वान्नैवमित्यानन्दादिवैषम्येणाह— **आनन्दादीनामिति** । आदिशब्देन नित्यत्वविभुत्वादीनां ग्रहणम् । चिदात्मनश्चैतन्यकर्मत्वलक्षणं विषयत्वमसिद्धमिति परिहरति— **तत्राहेति** । कथं तर्हि चिदात्मनोऽहमिति विषयत्वानुभवः, तदभावे वा कथं तद्व्यवहारः; ततश्च विषयत्वे युष्मत्प्रत्ययविषयत्वादनात्मत्वे अहमित्यस्मदुल्लेखश्च न स्यादित्याशङ्क्य योऽयमहमर्थे इदमंशोऽन्तःकरणं तदात्मना विषयत्वानुभवः, ततश्च न व्यवहारानुपपत्तिः, अनिदमात्मकचिद्रूपत्वेनास्मदुल्लेखश्चोपपद्यत इत्याह— **इदमात्मकत्वेनेति** । ततश्च टीकोक्तमनिदमात्मनो विषयत्वमस्मत्प्रत्ययाधीनव्यवहारयोग्यत्वमिति भावः । **तद्धर्मान्वयेति** । इदमंशधर्मः कर्तृत्वादिः, अनिदमंशधर्मश्चौदासीन्यमित्यर्थः । नन्वहंप्रत्यये किमित्यंशद्वयं कल्प्यते जीव-ब्रह्मणोर्भेदेन कर्तृत्वादिरहंप्रत्ययविषयस्य जीवस्य धर्मः, औदासीन्यं तु वेदान्तप्रतिपाद्यस्य ब्रह्मण एव धर्म इति कुतो न भवेदिति शङ्कते— **नन्विति** । ब्रह्मणा 'अनेन जीवेनात्मना' इति जीवस्य स्वरूपत्वेन कीर्तितत्वात् 'तत्त्वमसि' इत्यादिश्रुतिशतेभ्यश्च
८१ न जीवब्रह्मभेदोऽभ्युपगन्तुं युक्त इति परिहरति— **तत्राहेति** । टीकायां गृहीतभाष्यभाव-वर्णनम् जीवो हीति । अविषय इति च्छेदः । ननु स्यादेतदित्यादिशङ्कायां किं तु प्रत्यगात्मा

न स्वतो नापि परतः प्रथते इत्युक्तम्, तदयुक्तम्, स्वप्रकाशत्वाभ्युपगमविरोधादित्याशङ्क्य मतभेदान्न दोष इत्याशयेनाह— **स्वप्रकाश इति**। अप्रकाशसमर्थनेनेति। अखण्डानन्दादिस्वरूपस्येति शेषः। सर्वथा अप्रकाशमानत्वे प्रत्यगात्मनि कुतोऽध्यास इत्यध्यासाक्षेपायोगमाशङ्क्याह— **अपरोक्षत्वेति**। प्रकाशमानमात्रे किमित्यध्यासो न भवेदित्यत ८२
आह— **अपरोक्षेति**। शुक्त्यादौ तथा दर्शनादिति भावः। रूपस्पर्शविरहादिति हेतौ ८३
रूपस्पर्शपदयोरन्यतरवैयर्थ्यमाशङ्क्याह— **रूपरहितेति**। द्वितीय एवेति। प्रथमहेतोस्तत्र व्यभिचारादिति भावः। टीकायामविवेकिन इत्यस्य व्याख्यानं परदर्शितेति। टीकायां पार्थिवच्छाया तमः, तद्गतं श्यामतामित्यर्थः। मलिनतादीत्यादिशब्दनिर्दिष्टस्य शुक्लरूपस्याप्यध्यासं दर्शयति टीकायाम्— कदाचिदिति। उभयत्राप्यध्यासलक्षणयोगादध्यस्यन्तीति भाष्यमुपपन्नमित्याशयेनाह टीकायाम्— तत्रापीति। तलत्वाध्यासं विशदयति— तदेवेति। नभ एव तलरूपमध्यस्यतीत्यर्थः। आत्माध्यासस्यैव प्राधान्येन निरूपणेऽविद्यारूपत्वं हेतुरुक्तो भाष्ये। तत्र हेतोरप्रयोजकत्वं निराकरोति टीकायाम्— अविद्या हीति। रज्जुसर्पादिविभ्रमाणामप्यनर्थहेतुत्वेनाविद्यात्वादविशेषमाशङ्क्य तेषामनर्थहेतुत्वमनात्मन्यात्माध्यासाधीनमिति तस्यैव सर्वानर्थहेतुत्वमित्याशयेनाह टीकायाम्— प्रत्यगात्मनीति। तर्हि अनर्थहेतुत्वादेव तन्निरूपणं वृथेत्यत आह— तत्स्वरूपं त्विति। एवंलक्षणमिति भाष्ये एवंशब्देन जीवानुभवपरामर्शादनर्थहेतुतोक्तेति दर्शयति टीकायाम्— यस्मादिति। अशनाया बुभुक्षा। आदिशब्देन पिपासादिकं गृह्यते। **दुःखाकरोतीति**। 'दुःखात्प्रातिलोम्ये' ८४
इति सूत्रेणाभूततद्भावे डाच्प्रत्यये रूपम्। ततश्च अदुःखिनं दुःखिनं करोतीति तदर्थः। तत्र प्रत्यगात्मनि दुःखस्य सर्वानुभवसिद्धत्वाददुःखिनमित्ययुक्तमित्यतो व्याचष्टे— **वस्तुवृत्तेन इति**। टीकायाम्— अत इति। पृथग्जनैरध्यासत्वेनामननादित्यर्थः। तद्विवेकेनेति भाष्येण प्रत्यगात्मनो बुद्ध्यादिभ्यो भेदग्रहस्य वस्तुस्वरूपावधारणे उपयोग उक्तः। तत्र विवेकग्रहे सामग्रीं दर्शयन्नुपयोगप्रकारं दर्शयति टीकायाम्— प्रत्यगात्मनीत्यादिना। बुद्ध्यादिभ्यो विविक्त इत्यन्वयः। ननु टीकायां विद्यायाश्चिदात्मरूपत्वमुक्तमयुक्तं भाष्यविरोधात् स्वरूपस्य सदातनत्वेनाविद्यानिवर्तकत्वायोगाच्चेत्यत आह— **वस्तुस्वरूपं च तदिति** अभिव्यक्तमिति। अखण्डाकारवृत्त्यभिव्यक्तमित्यर्थः। ततश्च स्वरूपमात्रस्याविद्यानिवर्तकत्वाभावेऽपि सूर्यकान्तसंलग्नस्य सौरतेजस इव वृत्त्यभिव्यक्तस्य दाहकत्वमुपपद्यत इति भावः। तत्कृतेनेति भाष्ये तच्छब्देनाधिष्ठानारोप्ययोरुभयोरपि ग्रहणमित्यभिप्रेत्य व्याचष्टे टीकायाम्— अन्तःकरणादीत्यादिना। एवमपि वासनावशात्पुनरुद्भविष्यतीत्यस्य कः परिहार इत्याशङ्क्य भाष्ये अणुमात्रेणापीत्यनेन वासनाया अपि निवृत्तिरुक्तेति दर्शयति टीकायाम्— एतदुक्तं भवतीत्यादिना। ननु मिथ्याप्रत्यय एव तत्त्वावधारणं किमिति नापनयेदित्यत आह टीकायाम्— तत्त्वपक्षपातो हीति। वस्तुतत्त्वपक्षपात इत्यर्थः। हिशब्देन धियां वस्तुतत्त्वविषय एव दृढकार्यजनकत्वेन तत्प्रावण्यलक्षणः पक्षपातो लोकसिद्ध इति दर्शितम्। वस्तुतो निरुपद्रवस्यापि भूतार्थस्य तदनिर्णये विपर्ययैर्बाधो दृश्यत इत्यत आह— **भावनाप्रकर्षादिति**। बाह्याः खल्वेवमाहुः— सर्वमिदं क्षणिकमिति भावनया अनादित्वकल्पना निवर्तते;

शुद्धसुखलक्षणमिति भावनया द्रव्यगुणशब्दकर्मविशेषणविशेष्यकल्पना विनश्यन्ति; दुःखमिति भावनया रागादिदोषप्रवृत्तिसुखदुःखोपप्लवाः क्षीयन्ते; शून्यमिति भावनया विषयोपप्लवविगमः; ततश्च भावनाभेदैश्चतुर्भिश्चतुर्विधसंस्कारविरोधिभिश्चतुर्विधेषूपप्लवेषु क्रमेणाभिभूतेषु भावनाप्रकर्षपर्यन्तात्समनन्तरप्रलयात्सर्वोपप्लवविरहितं चरमं विज्ञानमुत्पद्यत इति; तदेतदाह— **भावनाप्रकर्षाद्विशदाभमिति** । विशदा स्फुटा आभा स्फूर्तिर्यस्य तदित्यर्थः । **सर्वविषयमिति** । सामस्त्येन नैरात्म्यविषयमित्यर्थः । ननु ज्ञानस्य यथाभूतकृत्स्नवस्तुविषयकत्वे भवेत्प्राबल्यम्; तदेव तु नास्ति; तथा हि— ज्ञानं न सर्वविषयं सातिशयत्वात्; न च हेत्वसिद्धिः, भावनाजन्यत्वेन तत्सिद्धेः, नैरात्म्यादिभावना सातिशयफार्यजनिका अभ्यासत्वाल्लङ्घनाभ्यासवत् इत्याशयेन शङ्कते— **नन्विति** । सातिशयप्रयत्नजन्यत्वमुपाधिरित्याशयेन परिहरति— **इति शङ्कामिति** । उपाधेः साध्यव्यापकत्वसाधनाव्यापकत्वे दर्शयति— **लङ्घनाभ्यासे हीत्यादिना** । किं च नैरात्म्याद्यभ्यासो निरतिशयोत्कर्षशालिकार्यजनकः अभ्यस्यमाने पूर्वकार्यजनकप्रयत्नाधिकप्रयत्नानपेक्षत्वे सत्युत्कृष्टकार्यजनकाभ्यासत्वात् सुवर्णपुटपाकाभ्यासवदित्यनुमानादपि ज्ञानस्य सर्वविषयत्वसिद्धिरित्याह—

८५ **वैशद्याधिक्यं चेत्यादिना**। ननु पौनरुक्त्यपरिहारार्थमहमिदं शरीरादीत्याद्यभिलपनलक्षणव्यवहार एव तत्रोक्त इत्यभ्युपगमे प्रवृत्तिलक्षणव्यवहारस्याप्यध्यासाधीनतया तदनुक्तौ न्यूनतापत्तिरित्याशङ्क्य अहंममाध्यासाभिलापस्य सर्वलोकप्रसिद्धत्वात्प्राथमिकत्वाच्च स एव तत्र कण्ठरवेणोक्तः, प्रवृत्तिलक्षणव्यवहारस्तु तत्र सूचित इति नानुक्तिदोष इत्याशयेनाह टीकायाम्— इतिशब्दसूचितमिति । टीकायाम्— निगदव्याख्यानामिति । निगदो निगदनमुच्चारणं तदेव व्याख्यानं यस्येत्यर्थः । स्पष्टार्थमेतदिति भावः । ननु तत्त्वपरिच्छेदो हीत्यादिटीकया कथं पुनरित्यादिभाष्यस्य विद्याविद्ययोर्विरोधान्नाविद्यावद्विषयत्वं प्रमाणानामित्याक्षेपाभिप्रायो वर्ण्यते; तदयुक्तम्, उच्यत इत्यादिपरिहारभाष्ये अविद्यायाः प्रमाणप्रवृत्तावुपयोगकथनेन शङ्काया अनुपयोगपरत्वौचित्यादित्याशङ्क्य विरोधानुपयोगोभयाभिप्रायतया भाष्यं व्याख्यातुमियं टीकेत्यभिप्रेत्य विभज्य व्याचष्टे— **प्रमाकरणानीत्यादिना। विरोधाभिप्रायमिति** । विद्याया अविद्याविरोधित्वादित्येवमाक्षेपाभिप्रायम् इत्यर्थः । अत एव वक्ष्यति अनेन नाविद्यावन्तामिति ग्रन्थस्थ आक्षेपः परिहृत इति । अहंममाभिमानहीनस्येति भाष्यपदम् । तत्राहमभिमानहीनस्येत्यंशं व्याचष्टे तादात्म्याध्यासहीनस्येत्यंशेनेत्यर्थः । टीकायाम्— प्रयोजनीयामिति । प्रेरणीयमित्यर्थः । प्रमाणप्रवृत्त्यनुपपत्तेरिति

८६ भाष्ये अविद्यावद्विषयाणि प्रमाणानीत्यनुषङ्गमभिप्रेत्याह टीकायाम्— भवत्यविद्यावत्पुरुषविषयत्वमिति । अत्र च विषयत्वमाश्रयत्वं विवक्षितमित्याशयेनाह टीकायाम्— अविद्यावत्पुरुषाश्रयत्वमिति । प्रमाणानामविद्यावत्पुरुषविषयत्वमाक्षिपता आत्माधिष्ठितानां प्रमाणानां प्रवृत्तिरित्यभ्युपगम्यते उत प्रवृत्तिरेव नेति अथ वा अनधिष्ठितानामेव प्रवृत्तिरिति विकल्पं मनसि निधाय प्रथमं देहेन्द्रियादिष्वित्यादिभाष्यव्याख्यानेन निराकृत्य द्वितीयमुत्थापयति टीकायाम्— अथेति । अनुपादाय अप्रवर्त्य । इन्द्रियादीनामप्रेरणेऽप्यभिलपनलक्षणव्यवहारसंभवाद्भाष्यायोगमाशङ्क्य व्यवहारशब्देन प्रमितिरुच्यत इत्याह टीकायाम्— व्यवह्रियत

इति । दण्डिनो गच्छन्तीत्यत्र कस्य पदस्य कुत्र लक्षणा अन्वयानुपपत्त्यभावाच्च किमर्थं लक्षणेत्यतस्तद्विशदयति— **यथेति** । तथा च दण्डिशब्दस्य दण्ड्यदण्डिपरतया प्रयुक्तत्वात्तात्पर्यानुपपत्त्या लक्षणेति भावः । दण्डिशब्दस्थले समुदाय इव प्रकृते प्रमाणत्वं लक्ष्यतावच्छेदकमित्याशयेन प्रमाणपदं प्रयुक्तमिति ध्येयम् । किं कर्तृभावेन क्त्वाप्रत्ययानुपपत्तिः उत तस्य समानत्वाभावेन ? नाद्य इत्याह— **अर्थाक्षिप्तेति** । द्वितीयं शङ्कते— **अनुपादायेति** । अव्यवहितेन व्यवहारेणैवानुपादायेत्यस्य संबन्धो न व्यवहितेनासंभवेनेति परिहारटीकाभिप्रायमाह— **नैवमिहेति** । तृतीयेऽपि किं प्रमाणानामधिष्ठितत्वमात्रं व्यावर्त्यमुतात्माधिष्ठितत्वमिति विकल्प्य प्रथममुत्थापयितुं किमिति पुनरित्यादिटीका । तां मतद्वयपरतया विभज्य व्याकरोति— **किमिति पुनरिति सांख्यस्य शङ्कते** । उपादत्त ८७
इत्यात्मनेपदात्क्रियाफलस्य कर्तृगामित्वावगमेन स्वप्रयोजनार्थं प्रमाता प्रमाणानि किमित्युपादत्ते? प्रमाणान्येव प्रमात्रर्थं प्रवर्तन्तामिति शङ्कातात्पर्यपर्यवसानादिति भावः । एवं च सति अथ स्वयमेवेति न तदुपपादनपरो ग्रन्थः एवकारस्वारस्यबलेन प्रयोजनानुद्देशेन स्वत एव प्रवर्तन्तामित्येवंपरत्वात्तस्य, तथा च स्वभाववादिनः शङ्केत्याशयेनाह— **अथेति** । टीकायाम्— मा भूदिति । कुविन्दरहितेभ्यो वेमादिभ्यः पटोत्पत्तिर्मा भूत् नासीदित्यतो हेतोर्न व्याप्रियन्त इत्यन्वयः । द्वितीयमुत्थापयितुमथ देह एवेति टीका; तां देहातिरिक्तमात्मानमनङ्गीकुर्वतश्चार्वाकस्य मतमुत्थापयतीत्येवंपरतया योजयति— **अथेति** । टीकायाम्— कृतमत्रेति । इन्द्रियाद्यधिष्ठातृत्वसिद्ध्यर्थं देहे आत्मनस्तादात्म्याध्यासेनालमित्यर्थः । इदानीमात्मनो देहाद्यधिष्ठातृत्वेऽपि न तत्तादात्म्याध्यासापेक्षेति नैयायिकमतमुत्थापयति टीकायाम्— स्यादेतदिति । देहादेः प्रेर्यत्वसिद्ध्यर्थमात्माध्यासानपेक्षेणऽप्यसङ्गस्यात्मनः प्रेरकत्वसिद्ध्यर्थं व्यापारवत्त्वाय तदपेक्षेति परिहारभाष्याभिप्रायमाह टीकायाम्— व्यापारवन्तो हीति । न च प्रमातृत्वमन्तरेणेति भाष्यं यद्यपि पूर्वभाष्यशेषत्वेन प्रतीयते तथापि प्रमातृत्वानुपपत्तौ प्रमाणप्रवृत्त्यनुपपत्तेरिति भाष्येण पौनरुक्त्यं परिहर्तुं युक्त्यन्तरपरतया व्याख्यायत इत्याह— **एवं प्रमाणेति** । व्यतिरेकमुखेन सूचितमध्यासावश्यिकत्वमन्वयमुखेनाह— **यदि चिदात्मेति । प्रमाश्रयत्वं हीति** । यद्यपि प्रमातृत्वानुपपत्ताविति ८८
भाष्यव्याख्यानावसरे प्रमाकर्तृत्वं प्रमातृत्वमित्युक्तं टीकायाम्, तथापि प्रमाणप्रेरकत्वेनाध्याससमर्थनार्थं तत्र तथोक्तम्, इह तु चिदचित्संवलनरूपप्रमाया एकैकाश्रयत्वानुपपत्त्या मिलिताश्रयत्वावश्यंभावनाध्याससमर्थनार्थमेवं व्याख्यातम्; अत एव टीकायां पूर्ववाक्ये चिदात्मकर्तृस्थमिति प्रमाश्रयत्वमेवोक्तमिति भावः । तामेव चेति टीकाया वैयर्थ्यमाशङ्क्य पूर्वोत्तरटीकयोः प्रयोजनभेदमाह— **अनेनेत्यादिना** । नाविद्यावन्तमित्यादिग्रन्थेन यो विद्याविद्ययोर्विरोध उक्तः स चिदचित्संवलनोक्त्या विरोधाभावेन निरस्तः, तत्त्वपरिच्छेदो हीत्यादिनोक्तश्चानुपयोगस्तदुपयोगकथनेन निरस्त इत्यर्थः । न च प्रमातृत्वमन्तरेणेति भाष्यस्य प्रमातृत्वानुपपत्ताविति भाष्येणापुनरुक्तमर्थं दर्शयितुं प्रमातृत्वेन चेति टीका । तत्र व्याख्याबीजमाह— **अनुपलक्षणे हीति** । अत्रत्येन प्रमातृत्वेन यदि प्रमाणप्रेरकत्वमुच्येत, ८९
तर्हि स्पष्टमेव पौनरुक्त्यम् । अथ तदनुकूला शक्तिस्तर्हि तस्या अतीन्द्रियायाः प्रेरणानु-

मेयतया प्रथमोपस्थितप्रेरणस्यैवाध्यासकल्पकत्वे पौनरुक्त्यतादवस्थ्यमित्यर्थः । प्रमापरत्वे तु नायं दोष इत्याह— **प्रमा त्विति** । भाष्ये अविद्यावद्विषयाण्येवेत्येवकारानुपपत्तिरिति शङ्कते टीकायाम्— **स्यादेतादिति** । किं विद्वद्व्यवहारमात्रेऽयमध्यासहेतुकत्वाक्षेप उत तदीये कर्मज्ञानकाण्डव्यवहारे? पक्षद्वयेऽपि किं देहादिव्यतिरिक्तात्मज्ञाने तत्तादात्म्याध्यासासंभवादिति हेतुरभिमत उत तदध्यासपूर्वकत्वे मानाभावादिति? नाद्यः, तस्यापातज्ञानत्वेन तदध्यासनिवर्तनाक्षमत्वादित्याह टीकायाम्— विदन्तु नामेति । न द्वितीयः, देहघातार्थसमागच्छत्खड्गिदर्शनजनितपलायनानुमितमरणभयवत्त्वेन पश्वादिवत्तदध्यासानुमानादित्याह टीकायाम्— प्रमाणप्रमेयव्यवहारे त्विति । शास्त्रीयव्यवहारे पारलौकिकफलभोक्तृनिश्चयावश्यंभावेऽपि तस्य सृष्टं देहादिभेदाविषयकतया तत्तादात्म्याध्यासानिवर्तकत्वाद्देहधर्मब्राह्मणत्वादिमत एवात्मनोऽधिकारश्रवणाच्च सिद्धं तस्याप्यध्यासपूर्वकत्वमित्येवं द्वितीयं पक्षं निराकर्तुं तं पक्षमुत्थापयति टीकायाम्— स्यादेतादिति । उद्देश्यत्यागात्मकेति । स्वत्वत्यागस्य स्वामिनैव कर्तव्यत्वादिति भावः । इदमुपलक्षणम् । फलप्रतिग्रहयोग्यतापादकतपःप्रभृतीनामपि
९० यजमानकर्तृकत्वादिति द्रष्टव्यम् । **भावनाक्षिप्तेति** । यद्यपि पचन्ति पाचका इत्यादौ न भावनाक्षिप्तेषु पाचकेषु फलम्, तथापि तत्रोत्सर्गप्राप्तकर्तृगामित्वस्य परस्मैपदबलेन बाधेऽपि न प्रकृत उत्सर्गबाध इति भावः । न केवलमुत्सर्गत एव फलस्य कर्तृगामिता, किं तु 'स्वारितञितः कर्त्राभिप्राये क्रियाफले' इति स्वरितेतो यज्यादेः कर्तृगामिनि क्रियाफले आत्मनेपदविधानादपीत्याह— **आत्मनेपदेन चेति । अनर्थकं स्यादिति** । परिक्रयस्य स्वकीयकार्यकरणार्थत्वेन लोके दृष्टत्वात्सर्वस्यापि स्वेनैवानुष्ठाने तदनर्थकं स्यादित्यर्थः । तर्हि परिक्रयोऽपि स्वस्यैवास्त्वित्याशङ्क्य विप्रतिषेधात्प्रत्यगात्मनीति सूत्रावयवं व्याचष्टे— **स्वस्मिन्निति** । आध्वर्यवादिसमाख्याबलादपि त एव कर्तार इत्याशयेनाह— **आध्वर्य-**
९१ **वादीति** । ननु यजमानस्य साङ्गप्रधानकर्तृताबोधके प्रयोगविधौ सति कथं समाख्या प्रभवेदित्याशङ्क्य तस्य स्वतन्त्रप्रयोजकरूपकर्तृद्वयसाधारणत्वान्न समाख्याबाधकत्वमित्याशयेनाह— **तस्मिन्निति** । अकर्तरि कथं प्रयोक्तेत्यादित्यत्र विपर्ययपर्यवसाने अतः कर्तैव प्रयोक्तेति स्यात्, ततश्चाभेद इत्यतो व्याचष्टे— **कर्तृत्वशक्तिरहित इति** । नन्वेवमपि शास्त्रव्यवहारो नाविद्याधीनः, विदितपदपदार्थसंगतिकस्य न्यायाभिज्ञस्योपक्रमोपसंहाराभ्यासापूर्वतादितात्पर्यग्राहकप्राहितात्पर्यकवाक्यत्वमस्यादेवाक्यादुत्पद्यमानस्याशनायाद्यतीतब्रह्मावगमस्यापेक्षाभावमात्रेण वारयितुमशक्यत्वेन व्यवहारस्यैवासंभवे तत्राविद्याधीनत्वस्य दूरोत्सारितत्वात्; किं चैवं कृत्स्नो वेदः प्रमाणं न स्यात् अविद्याधीनः कर्मव्यवहार इति तदुपघातिका च विधेयत्वंरूपपरस्परव्याहतार्थद्वयप्रतिपादकत्वादिति शङ्कते टीकायाम्— स्यादेतादिति । यथोक्तब्रह्मावगमस्य दुर्लभतया तत्पूर्वभाविनः शास्त्रव्यवहारस्य न कोऽपि विरोध इति प्रथमशङ्कानिराकरणाभिप्रायमाह टीकायाम्— सत्यमिति । द्वितीयशङ्कानिराकरणपरतया न च परस्परेतिटीकामवतारयति— **ननु ब्रह्मज्ञानेनेति** । टीकायां साध्यांशनिषेधेऽपीति । श्येनादिसाध्यशत्रुवधादेर्निषेधेऽपीत्यर्थः । टीकायां कस्य हेतो-
९२ रिति । केन हेतुनेत्यर्थः । पुरुषभेदमेव दर्शयति— अपजितेति । क्रोध एवारातिः शत्रुः

सोऽपजितो यैरित्यर्थः । 'राजा राजसूयेन—' इत्यत्र राजपदस्य क्षत्रियवाचकत्वाद्वर्णाध्यासः । गृहस्थो भविष्यन्सदृशीं भार्यां लभेतेत्यर्थः । कृष्णकेशत्वेन वयोविशेषलक्षणाद्वयोध्यासः । जलादीत्यादिपदेन महागर्तादिकं गृह्यते । प्राणत्याग इत्यादिरित्यादिपदेन महारोगेण वाभितप्तः प्राश्नीयादन्यतरां गतिं गच्छतीति व्याधिनिवृत्तिशरीरपतनान्यतरफलकत्वेन विहितं पिण्डपितृयज्ञगतप्रथमतृतीयपिण्डप्राशनादिकं गृह्यते । टीकागतेन पातकशब्देन महापातकमतिपातकं समपातकं चेति त्रयं गृह्यत इत्यभिप्रायेणाह— **पातकं ब्रह्मवधादीति** । महापातकभिन्नं महापातकत्वेनोक्तमतिपातकम् । महापातकसमत्वेनोक्तं समपातकम् । अतिदेशाविशेषेऽपि महापातकप्रायश्चित्तं पादोनमतिपातके, अर्धं समपातक इति भेदः । महापातकादीनि च मनुनोक्तानि 'ब्रह्महत्या सुरापानं स्तेयं गुर्वङ्गनागमः । महान्ति पातकान्याहुः संयोगं चैव तैः सह' इति । स्तेयं ब्राह्मणस्वर्णहरणम्, गुर्वङ्गना माता, संयोगं संवत्सरकालपरिमितम् । 'हत्वा गर्भमविज्ञातमेतदेव व्रतं चरेत् । राजन्यवैश्यावाजानावात्रेयीमेव च स्त्रियम् ॥ उक्त्वा चैवानृतं साक्ष्ये प्रतिरुध्य गुरुं तथा । अपहृत्य च निक्षेपं कृत्वा च स्त्रीसुहृद्वधम्' इति । गर्भस्याविज्ञातत्वं स्त्रीपुंसविवेकेन बोध्यम् । एतदेव व्रतं महापातकप्रायश्चित्तमेव । ईजानौ यज्ञं कुर्वाणौ, दीक्षिताविति यावत् । आत्रेयीमत्रिगोत्रोद्भवाम् । साक्ष्ये सत्यप्यनृतभाषणम् । गुरोः पित्रादेरुपरोधो बन्दीगृहप्रवेशनम् । स्त्रीशब्देन भार्यादिरुच्यते । 'अनृतं च समुत्कर्षे राजगामि च पैशुनम् । गुरोश्चालीकनिर्बन्धः समानि ब्रह्महत्यया' इति । उपपातकं गोवधादीति । तथा च मनुः—'गोवधोऽयाज्यसंयाज्यं पारदार्यात्मविक्रयौ । गुरुमातृपितृत्यागः स्वाध्यायाग्न्योः सुतस्य च' इति । समुत्कर्षे पूज्ये । अलीकनिर्बन्धः अव्याजपीडा । अयाज्या याजयितुमनर्हास्तेषां संयाज्यं याजनम् । पारदार्यं परदारगमनम् । स्वाध्यायस्य वेदस्य अग्नेरौपासनादेर्निर्दुष्टस्य सुतस्य च त्याग इत्यर्थः । अविको मेषः । यद्यपि संकलीकरणानन्तरपापं मलिनीकरणं तदनन्तरपापमपात्रीकरणमनेनैव क्रमेण प्रायश्चित्ततारतम्यस्मृतेः, तथापि क्रमानादरेण टीकायामुक्तिरिति स्वयमपि तथैवोदाहरति— **निन्दितेभ्य इति** । वाणिज्यं वृद्धिजीवनम् । असभ्यः सभायामसाधुः, सभानर्ह इति ९३
यावत् । क्रिमयो व्रणाद्युत्पन्ना जन्तवः । कीटा वृश्चिकादयः । वयांसि पक्षिणः । मद्यं मदकरं वस्तु नारिकेलासवादि । तत्संपृक्तभोजनमित्यर्थः । अधैर्यमवश्यकर्तव्येष्वित्यर्थः । मलावहमिति । मलं पापम्, तत्संपादकमित्यर्थः । मलिनीकरणमिति यावत् । ब्राह्मणस्येति । तदीयस्य मनसो देहस्य वा रुजः पीडायाः करणमित्यर्थः । अग्र्यं तालफलादि । जैह्म्यं कौटिल्याचरणम् । जातिभ्रंशकरादीत्यादिपदेन प्रकीर्णकं गृह्यते । तच्च प्रागुदाहृताष्टविधभिन्नं पापं ताडनादि । अभ्यर्हितत्वादिति उपजीव्यत्वादभ्यर्हितत्वम् । नन्वात्मनि पुत्रादिस्वामित्वस्य साक्षादेवाध्याससंभवे मध्ये किमर्थं देहतादात्म्याध्यासवर्णनमित्यत आह— **गृहीतविवेकत्वादिति । देहगतस्वामित्वस्येति** । यद्यपि पुत्रादिस्वामित्वं पुत्राद्यधीनभोगभाक्त्वं न देहे संभवति, तथापि तदधीनपोषणादिभाक्त्वमिह स्वामित्वं विवक्षितमिति न दोषः । टीकायां स्वस्य खल्विति । स्वभूतस्य पुत्रादेः साकल्येन तन्निरूपितस्य स्वाम्यस्य साकल्यादित्यर्थः । **कथं बाह्यग्रहणमिति** । देहगतस्वामित्वधर्म-

त्वेन बाह्यधर्मत्वाभावादिति भावः। बाह्यपुत्रादिधर्माणामेव शरीरे आत्मनि चारोपान्न दोष
९४ इति परिहरति— **तत्राहेति**। पुत्रादिगतानामपि साकल्यवैकल्यादीनां स्वाम्यद्वारा शरीरे संचारितानां शरीरधर्माणामेव सतामात्मन्यारोपस्य पूर्वमुक्तत्वात्तथा देहधर्मानिति भाष्यायोगमाशङ्क्याह टीकायाम्— यदा चेति। अत्यन्तविविक्तपुत्राद्यपेक्षे स्वाम्ये तद्गतेषु साकल्यादिषु च यदेयं गतिः पूर्वपूर्वाध्यासवशादात्मन्यध्याससंभवः तदा निरुपाधिकेषु कृशत्वादिष्वात्मन्यध्याससंभवे का चिन्तेत्यर्थः। कर्मेन्द्रियधर्माणां मूकत्वादीनां ज्ञानेन्द्रियधर्माणां काणत्वादीनामन्तःकरणधर्माणां कामसंकल्पादीनामप्यध्यासो धर्म्यध्यासपूर्वक एवेति दर्शयन्नध्यस्यतीति पदानुषङ्गेण भाष्यं योजयति टीकायाम्— देहादपीति। अहंप्रत्ययिनमिति पदे इतिप्रत्ययस्यार्थमाह टीकायाम्— यस्मिन्नन्तःकरणादाविति। इन्द्रियदेहावादिशब्देन गृह्येते। अन्तःकरणस्य प्रचारेति टीकायामप्यन्तःकरणादिव्यापारसाक्षिणीति द्रष्टव्यम्। **साक्षिशब्दार्थमिति**। 'साक्षाद्द्रष्टरि संज्ञायाम्' इति सूत्रेण व्यवहारफलासंस्पर्शिन्युदासीने तद्द्रष्टरि इनिप्रत्यये टिलोपे च साक्षिशब्दनिष्पत्तेरिति भावः। आत्मन्यन्तःकरणाध्यासस्य
९५ कर्तृत्वभोक्तृत्वोपपादकत्वमुक्तं तदनेनेति टीकायाम्; तद्विशदयति— **सक्रियोपाधेरिति**। **भ्रममपनयतीति**। पूर्वपूर्वाध्यासावगते अवच्छिन्नरूप एव साक्षिण्यन्तःकरणादीनामध्यासो न शुद्धे, तस्यारोपाधिष्ठानायोग्यत्वादिति भावः। भाष्ये विषयप्रयोजनयोः पूर्वं निर्देशात्कथं प्रकृतमिति टीकेत्यत आह— **उपोद्घातेति**। विद्याशब्देन साक्षात्कारस्य निर्दिष्टत्वात्प्रतिपत्तिशब्दो निरर्थक इत्यत आह टीकायाम्— प्रतिपत्तिः प्राप्तिरिति। टीकायां नापि कर्मसु प्रवृत्तय इति। कर्तृस्तावकत्वेनेति शेषः। टीकायामात्मैकत्वनिर्वचनमहंप्रत्ययागम्यत्वाय। नन्वात्मैकत्वसाक्षात्काराय वेदान्ता आरभ्यन्ते इत्ययुक्तम्, साक्षात्कारस्य शब्दाजन्यत्वात् इत्यत आह टीकायाम्— आनन्दरूपस्येति। तथा च निर्विचिकित्सपरोक्षनिश्चयजननद्वारा साक्षात्कारजनकान्तःकरणसहकारितया वेदान्तानामध्यासनिवृत्त्युपयोगित्वमुपपन्नमिति भावः। प्रहाणायेति भाष्यस्थप्रशब्दार्थकथनं समूलघातमिति। मूलाविद्यासहितमध्याससमुपपन्नन्तीति तदर्थः। एतदुक्तमित्यादिटीकायामजिज्ञास्यत्वनिरसनमनवसरदुःस्थमित्याशङ्क्याह— **एवमिति**। **प्रसिद्धत्वादिति**। एतच्चोपलक्षणम्; निष्प्रयोजनत्वादित्यपि द्रष्टव्यम्। आरम्भस्य प्रागनिष्पन्ननिष्पादनरूपत्वान्नित्यसिद्धेषु वेदान्तेषु तदसंभवमाशङ्क्य व्याचष्टे इत्याशयेनाह— **पठ्येरन्निति**। एतदुक्तमिति टीकाया अयमर्थः— अहमित्यात्मप्रत्ययस्य समीचीनत्वे तदभिन्नस्य ब्रह्मणोऽपि ज्ञातत्वेन प्रत्यक्षविरुद्धैश्च वेदान्तैरन्यपरैरशनायाद्यतीतस्य ब्रह्मणोऽनवगमादहं कर्तेत्यादिप्रत्ययस्य च समीचीनत्वे संसारस्य सत्यतया निवर्त्यत्वायोगेन विषयप्रयोजनाभावान्न ब्रह्मजिज्ञासा स्यात्। तदभावे च वेदान्तज्ञाप्यस्य कस्यचिदज्ञातस्याभावान्न वेदान्ताध्ययनं ब्रह्मज्ञानफलकं भवेत्। किं त्वविवक्षितार्थजपादाविवोपयुज्येरन्; न त्वेतदस्तीत्यर्थः। तत्र हेतुः न हीति। तदा अविवक्षितार्थत्वे। तथा चोपक्रमोपसंहाराभ्यासापूर्वतादितात्पर्यग्राहकग्राहिताद्वितीयब्रह्मतात्पर्यकानन्यथासिद्धस्वतःप्रमाणवेदान्तवाक्यजनितस्य सर्वसंसारनिवर्तकस्य ब्रह्मात्मप्रत्ययस्य प्रामाण्यान्यथानुपपत्त्या अहंप्रत्ययस्य मिथ्यात्वमास्थेयम्। ततश्च तद्विषयस्य संपिण्डितात्मस्वरूपस्य संसारस्य च मिथ्यात्वसि-

द्धिः । अप्रमाणज्ञानस्य सत्यनिवर्तकत्वादर्शनादिति भावः । केवलस्य तदनिवर्तकत्वेऽप्यभ्यस्तस्य तन्निवर्तकत्वमस्त्विति तटस्थशङ्कायामाह— **न चासाविति** । अदर्शनादेवेति परिहरति— आरोपितं हीति । सर्पधाराप्रत्यया इति । सर्पप्रत्यया धाराप्रत्यया वेत्यर्थः । अनादेः संसारस्य कथमादिना तत्त्वज्ञानेन निवृत्तिरविरोधादिति यदुक्तमाक्षेपावसरे तन्निरस्यति— मिथ्याज्ञानसंस्कारश्चेति । आदरः श्रद्धादिसाचिव्यम् । नैरन्तर्यमनुस्यूतता । तथा च प्रबलसहकारिसमवहितनिदिध्यासनजन्येनागन्तुकेनैव साक्षात्कारेण तन्निवृत्तिरिति भावः । जन्मनेति । शक्योऽपवदितुमित्यनुषङ्गः । टीकायां प्राणादीत्यादिपदेनोद्गीथादीनां ग्रहणम् । उपासनानां चित्तैकाग्र्यद्वारा आत्मैकत्वसाक्षात्कारार्थत्वात्तद्वाक्यानामपि महातात्पर्यमैक्य एवेति न दोष इति परिहरति टीकायाम्— अत आहेति । प्रपञ्चितस्यार्थस्य संक्षेपेण कथनं व्यर्थमित्यत आह— **अधिकरणमिति** । संशयतद्बीजसंगती स्वयं दर्शयति— ९६
वेदान्तशास्त्रमिति । श्रुत्यर्थविचारात्मकत्वाभावादस्याधिकरणस्य कथं श्रुतिसंगतिरित्याशङ्क्य श्रुत्याक्षिप्तत्वाच्छ्रुतिसंगतिरित्याह— **वेदान्तैरिति** । एवमपि शास्त्रप्रतिपाद्यसमन्वयाविरोधसाधनफलान्यतमप्रतिपादकत्वाभावात्कथं शास्त्रसंगतिरित्याशङ्क्य शास्त्रार्थविचारोपोद्घातत्वाच्छास्त्रादिसंगतय इत्याह— समन्वयादीति । संशयादिकथनेनैव वेदान्तानां विषयत्वं सुज्ञानमिति न पृथगुक्तम् । आशङ्कापनयपूर्वकमिति । सिद्धान्तिशङ्कापनयपूर्वकमित्यर्थः । पूर्वपक्ष्यभिमतार्थनिरासपूर्विकां सिद्धान्तिशङ्कां दर्शयति— अविवक्षितार्थत्वमिति । किं वेदान्तानामर्थपरत्वे प्रमाणाभावादविवक्षितार्थत्वम् उत सिद्धपरत्वासंभवात् अथ वा प्रमानुत्पादकत्वात्? तत्राद्यं यद्यपीत्यादिटीकाभिप्रायकथनेन निराकरोति— **अध्ययनेति । तुल्यत्वादिति** । विधिनिषेधभागयोरिव वेदान्तभागेऽपि तुल्यत्वादित्यर्थः । द्वितीयमाशङ्क्य यद्यपि चाविशिष्ट इति टीकाव्याख्यया परिहरति— **न च कार्येति । सिद्धरूप इति** । तथा च टीकायामर्थपरत्वं सिद्धार्थपरत्वं बोध्यम् । तृतीयं यद्यपि चेति टीकाव्याख्यया निराकरोति— नापीति । परिहरतीति । सिद्धान्तिशङ्कां परिहरति पूर्वपक्षीत्यर्थः । न च सर्वजनीनेति टीकां युक्त्यन्तरपरत्वेन व्याचष्टे प्रमाणेति । टीकायाम्— तस्य तूक्तेन क्रमेणेति । तथापीत्यादिभाष्यभाववर्णनावसरे इदमत्राकूतमित्यादिटीकोक्तेन प्रकारेणाहंप्रत्ययस्य प्रामाण्याभावेन श्रुतिस्मृतीतिहासपुराणबाधकत्वानुपपत्तेरित्यर्थः । हेत्वन्तरमाह टीकायाम्— श्रुत्यादिभिश्चेति । अहंप्रत्ययसिद्धं जीवस्वरूपमनूद्य तस्य कर्तृत्वभोक्तृत्वादिरहितब्रह्मभावबोधनपरैः साक्षादेव कर्तृत्वादिनिषेधपरैश्च 'तत्त्वमसि' 'न कर्ता नाकर्ता' 'क्षेत्रज्ञं चापि मां विद्धि' 'अहंकारविमूढात्मा कर्ताहमिति मन्यते' 'अहमेवाव्ययो नित्यः परमात्मात्मसंश्रयः' 'विभेदजनकेऽज्ञाने नाशमात्यन्तिकं गते । आत्मनो ब्रह्मणो भेदमसन्तं कः करिष्यति' इत्यादिभिः श्रुतिस्मृतीतिहासपुराणैस्तत्तात्पर्याभिज्ञैः समस्तैः शास्त्रकारैश्च प्रामाण्यानभ्युपगमादध्यासत्वमित्यर्थः । टीकायां किं तूक्तलक्षण इति । चैतन्यानन्दघन इत्यादिटीकोक्तः प्रत्यगात्मैव वेदान्तानां मुख्योऽर्थस्तात्पर्येण प्रतिपादनादिति भावः ॥

अथातो ब्रह्मजिज्ञासा । ननु स्वरूपज्ञानमिदानीमपि विद्यमानत्वान्न प्रयोजनम्; ९७
वृत्तिज्ञानं त्वनानन्दरूपतया न पुरुषार्थः; तथा च कथं ब्रह्मज्ञानं प्रयोजनमिति टीकेत्यत

आह— **वृत्तिव्यक्तमिति** । अनेन साक्षादव्यवधानेनेच्छाव्याप्यत्वाद्ब्रह्मरूपं यज्ज्ञानं वृत्तिव्यक्तं स्वरूपं कण्ठोक्तं सूत्रगतब्रह्मपदजिज्ञासापदप्रकृतिभ्यामुक्तम्, तदेव साक्षात्प्रयोजनं परमप्रयोजनमित्येवं टीका व्याख्याता । कर्मज्ञानवद्ब्रह्मज्ञानमपि न साक्षात्प्रयोजनमित्याशङ्कां निराकरोति टीकायाम्— न चेत्यादिना । पूजितविचारवचनेन मीमांसाशब्देन
९८ न्यायकलाप एवोच्यत इत्याशयेनाह— **सा न्यायात्मिकेति । प्रतिज्ञानादिति ।** ब्रह्मज्ञानेच्छोपदेशे अर्थाद्विषयादीनां प्रतिज्ञानादिति भावः । स्वल्पाक्षरपदानीति पृथगुपादानाल्लघुत्वमन्यथा दर्शयति— **लघूनीति** । मुख्यार्थद्वारकसूचितार्थबाहुल्येन स्वोक्ते सूत्राणां बह्वर्थत्वे कथमयं श्लोकः संमतित्वेन लिखित इत्यत आह— **सूचितार्थत्वेनेति** । बहूनामप्रस्तुतत्वादिति । आदिमं सूत्रमिति * सूत्रस्यैकस्यैव प्रस्तुतत्वादिति भावः । अथशब्दस्तेष्वानन्तर्यार्थ इत्यन्वये तेषु सूत्रपदविषये यदानन्तर्यं तदर्थ इति सूत्रानन्तर्यार्थशब्दार्थ इति स्यात्; तद्व्युदासायाह टीकायाम्— तेषु सूत्रपदेषु मध्य इति । विधास्यमानेति । 'अथैष ज्योतिरथैष विश्वज्योतिरथैष सर्वज्योतिः' इत्येतदनन्तरपाठितेन 'एतेन सहस्रदक्षिणेन यजेत' इति वाक्येन विधास्यमानेत्यर्थः । अधिकारार्थत्वं वदन्प्रष्टव्यः किं जिज्ञासाप्रारम्भार्थकत्वमुत ब्रह्मतज्ज्ञानप्रारम्भार्थकत्वम्? नाद्यः, ज्योतिरादिसंज्ञकानां कर्मणामिव शब्दानुशासनयोगानुशासनपरसूत्रसंदर्भयोरिव च जिज्ञासाया उत्तरत्राकथनादित्युक्तं टीकायाम् । द्वितीयं शङ्कते— प्रधानस्येति । **ब्रह्मतज्ज्ञानेति** । चतुर्णामप्यध्यायानां सपरिकरब्रह्मज्ञानप्रतिपादनमुखेन प्राप्तव्यब्रह्मस्वरूपप्रतिपादनपरत्वादिति भावः । किमिच्छाया अविवक्षितत्वेन ब्रह्मतज्ज्ञानयोरेव प्रधानयोरथशब्देन संबन्ध उत तद्विशेषणीभूतयोः? नाद्यः, इच्छाया अवश्यविवक्षणीयत्वादित्युक्तं टीकायाम्— ब्रह्मजिज्ञासेत्यादिना । तत्र दृष्टान्तवैषम्यं
९९ दर्शयति— **दण्डीति** । प्रैषानुवचने प्रैषे अनुवचने चेत्यर्थः । सूत्रे निर्देशमात्रेणैव ब्रह्मतज्ज्ञानयोर्विषयप्रयोजनत्वसिद्धिरिति वदन्प्रष्टव्यः किं बाधकाभावैर्न वेदान्तानां ब्रह्मप्रतिपादनपरत्वात्तत्सिद्धिः वेदान्तानामर्थपरत्वप्रतिपादनपरस्वाध्यायाध्ययनविधिबलाद्वा? नाद्यः, प्रबलाहंप्रत्ययाविरोधेन वेदान्तानां ब्रह्मात्मैक्यपरत्वासिद्धेः; नान्त्यः, अर्थपरत्वाभावेऽप्यध्ययनवि-
१०० धिपरिग्रहसंभवादिति परिहरति— **तत्राहेति** । तस्मात्प्राधान्येन ब्रह्मनिर्णयेच्छासूत्रेण एव प्रागुक्तरीत्या अहंप्रत्ययस्य दौर्बल्यहेतुन्यायसूचने प्रबलविरोधाभावेन वेदान्तसंभावितस्य ब्रह्मणः प्रागनिर्णिततया संदिग्धत्वेन विषयत्वसिद्धिः तन्निर्णयस्य फलत्वसिद्धिश्च नान्यथा; अतः सैव सूत्रे प्रधानमित्याह टीकायाम्— तस्मादिति । ब्रह्मज्ञानेच्छाया उत्तरसूत्रेष्वनुवर्तमानत्वादप्रस्तूयमानत्वमसिद्धमित्यत आह— **प्रत्यधिकरणमिति** । इच्छाविशेषणीभूतयोरेवाथशब्देन संबन्ध इति द्वितीयं निराकरोति टीकायाम्— जिज्ञासाविशेषणं त्विति । जिज्ञासाशब्दनिर्दिष्टेच्छाविशेषणं ब्रह्मज्ञानम् । इदमुपलक्षणम्, ब्रह्म वेत्यपि द्रष्टव्यम् । जिज्ञासाया मीमांसात्वात्तस्याश्च न्यायरूपाया उत्तरत्र प्रतिपादनाद्युक्तमधिकारार्थत्वमित्याशङ्क्य किं जिज्ञासापदस्य मुख्योऽर्थो मीमांसा उत लाक्षणिकः? नाद्यः, जिज्ञासामीमांसापदयोर्भिन्नार्थकत्वादित्युक्तं टीकायाम् । तत्र व्याकरणसूत्रार्थं विशदयितुमाह— **मान्बधेत्यादिना** । मान्धे इकारस्थाने तदुपरि वा नकारे मीमांसत इत्यात्मनेपदं न

सिध्येदित्यत आह— **सानुबन्धस्य धातोरिति** । प्रसिद्धिबलादिति । लोकप्रसिद्धिबलादित्यर्थः । **स्मृतिसिद्धमिति** । 'मान पूजायाम्' इति धातुपाठात् 'मानेर्जिज्ञासायाम्' इति विचारार्थे वर्तमानादेव सन्निधानाच्च सिद्धमित्यर्थः । इदानीं सूत्रपदानि योजयति— **मानित्यादीति** । विचारादिष्वर्थेषु वर्तमानेभ्य इत्यर्थः । इतोऽपि जिज्ञासामीमांसयोर्भेद इत्याह टीकायाम्— **प्रवर्तिका हीति** । द्वितीयं शङ्कते— **लक्षितेति** । किमन्वयानुपपत्त्या लक्षणा, विचारे प्रवृत्तिसिद्ध्यर्थं तत्परत्वावश्यंभावेन तात्पर्यानुपपत्त्या वा ? नाद्य इत्याह— **नेत्याहेति** । द्वितीयं निराकरोति— **अधिगतेति** । प्रवर्त्स्यतीति । प्रवर्तिष्यत इत्यर्थः । टीकायाम्— मङ्गलप्रयोजनो भवतीति । तथा च तत्प्रयोजनकत्वमात्रेण तादर्थ्यमौपचारिकमादाय 'मङ्गलानन्तरारम्भप्रश्नकात्स्न्र्येष्वथो अथ' इति निघण्टुप्रवृत्तिरिति न तद्विरोध इति भावः । टीकायाम्— पूर्वप्रकृतापेक्षोऽथशब्द इति । ततश्च पूर्वप्रकृतादर्थान्तरं ब्रह्मजिज्ञासेति सूत्रार्थ इति भावः । टीकायाम्— अथाधिकारे इति । आनन्तर्ये वर्तमानादथशब्दादन्य एव किमधिकारार्थे वर्तत इत्यर्थः । एतदेवाह टीकायाम्— अत्र विमर्शकवाक्य इत्यादिना । **किं पूर्वप्रकृतादिति** । किमयमथशब्द आनन्तर्य इति प्रथमविकल्पोपन्यासपरे पूर्ववाक्ये विकल्पधर्मित्वेन प्रकृतादथशब्दादानन्तर्यमुताव्यवहितात्तद्विकल्पादित्यर्थः । किं पूर्वप्रकृतमथशब्दमप्यपेक्ष्य ब्रूयादुतानपेक्ष्येति योजना । असमानविषयत्वे विकल्पानुपपत्तिं प्रकटयति— **एकधर्मीति** । **आनन्तर्यरूपत्वपक्षे विकल्पाप्रतिभानादिति** । यत्र विकल्पप्रतिभानं तत्रैव पूर्वविकल्पधर्म्यपेक्षयार्थान्तरे अथशब्दस्य प्रसिद्धेरिति भावः । पूर्वप्रकृतस्य सिद्धिर्निश्चयः । भवन्ती भवत्येवेति पौनरुक्त्यं परिहरन्व्याचष्टे— **अन्यदपीति** । योग्यत्वादित्यस्य स्वाध्यायाध्ययनानन्तर्यमिलस्य चापेक्षितं पूरयन्व्याचष्टे— **स्वाध्यायेति** । प्रतीकमनुपादायापि व्याख्यानं व्याख्यानेनैव व्याख्येयग्रन्थस्य ज्ञातुं शक्यत्वेन लाघवार्थमिति ध्येयम् । धर्मवदित्यस्य वाक्यादित्वेऽपि तस्य दृष्टान्तत्वात्तत्परित्यज्य ब्रह्मणोऽपीति प्रतीकं गृहीतः । लक्षणायां बीजं दर्शयन्नत्र चेत्यादिटीकां व्याचष्टे— **स्वाध्यायस्येति** । **ब्रह्मानुपादानादिति** । प्रमाणस्वरूपसाधनफलैः साभासैर्धर्मस्यैव तत्र जिज्ञास्यत्वकथनादिति भावः । धर्मजिज्ञासासूत्रे धर्मग्रहणं वेदार्थमात्रोपलक्षणम् अन्यथा निषेधवाक्यार्थविचारासंग्रहापत्तेः; ततश्च तस्मिन्नव सूत्रे वेदार्थविचारमात्रस्य वेदाध्ययनानन्तर्ये बोधिते कर्मविरोधितया जैमिनिपरित्यक्तब्रह्मविचारमात्रप्रवृत्तेरपि बादरायणेन तद्व्युत्पादितशेषशेषिभावादिन्यायानामिव प्रथमसूत्रबोधितवेदाध्ययनानन्तर्यस्याप्युपजीवनसंभवेन पुनस्तत्सूत्रणं व्यर्थमेव; अत एव 'एक आत्मनः शरीरे भावात्' इत्यधिकरणे देहातिरिक्तात्मास्तित्वस्य शास्त्रप्रथमपादे व्यवस्थापनादत्र तद्व्यवस्थापनं पुनरुक्तमिति शङ्कामुद्भाव्य शबरस्वामिना तत्र तत्कृतं न सूत्रारूढमिति समाधानं भाष्यकृता करिष्यत इत्याशयेन परिहरति— **अत आहेति** । ननु कथं यज्ञादीनां ब्रह्मज्ञाने विनियोगः इच्छायाः प्रत्ययार्थत्वेन प्रधानत्वात्; न च प्रत्ययार्थः प्रधानमिति सामान्यन्यायादिच्छेष्यमाणसमभिव्याहृताविध्यमाणं प्रधानमिति स्वर्गकामपदादिषु क्लृप्तो विशेषन्यायो बलवानिति वाच्यम्, तस्य प्रत्ययभिन्नकर्मपदादिविषयतया सावकाशत्वेन विशेषन्यायत्वासिद्धेरित्यभिप्रेत्य शङ्कते— **नन्विति** ।

१०८ इष्टस्य सर्वापेक्षया प्रधानत्वेन तच्छेषत्वमेव युक्तमिति परिहरति— **तत्राहेति । साक्षात्कारोपयोगमिति ।** ततश्च श्रवणादिकालेऽपि साक्षात्कारार्थमनुष्ठेयानि कर्माणीति तदवबोधस्यावश्यकतया तदानन्तर्यमेवाथशब्दार्थ इति भावः । टीकायां निर्विचिकित्सवाक्यार्थज्ञानजनने वाक्यस्य कर्मापेक्षेत्याशङ्क्य किं वैदिकवाक्यार्थज्ञाने सर्वत्र तदपेक्षा उत, वेदान्तवाक्यार्थज्ञानमात्रे? नाद्यः, शक्तिग्रहे शाब्दबोधहेतुन्यायपरिज्ञाने आकाङ्क्षाद्यनुसंधाने च सति कर्मानुष्ठानेन विना निर्विचिकित्सवाक्यार्थज्ञानोत्पत्तौ विलम्बादर्शनादित्याह— अकृतकर्मणामित्यादिना । विपक्षे दण्डमप्याह टीकायाम्— अनुत्पत्तौ वेति । द्वितीयमाशङ्क्य च निराकरोति टीकायाम्— न च वेदान्तेति । **असिद्ध इत्याहेति ।** प्रत्यक्षादिप्रमाणसिद्धकर्तृभोक्तृरूपस्य जीवस्य तद्रूपप्रहाणेन तद्विलक्षणब्रह्मभावबोधकत्वस्य विशेषहेतोः सत्त्वात्तदभावोऽसिद्ध इति शङ्कावाद्याहेत्यर्थः । झटिति प्रतिपत्तुमशक्यत्वे हेतुमाह टीका-
१०९ याम्— आपातत इति । अशुद्धसत्त्वैरापाततो योग्यताविरहनिश्चयादित्यन्वयः । टीकायाम्— यज्ञदानेति । यज्ञेन दानेन अनाशकेन शरीराशोषकेण तपसा च निराकृतान्तर्मला अत एव विशुद्धसत्त्वा इत्यर्थः, 'ज्ञानप्रसादेन विशुद्धसत्त्वस्ततस्तु तं पश्यते निष्कलं ध्यायमानः' इति श्रुतेरिति भावः । योग्यतावधारणे किं करणतया कर्मणामुपयोग उत सहकारितयेति विकल्प्य प्रथमं निराकर्तुं तत्किमित्यादिटीका । तां विकल्पमुखेन योजयति— योग्यतेत्यादिना । योग्यतावधारणप्रतिबन्धककल्मषनिबर्हणद्वारा कर्मणां सहकारित्वमिति द्वितीयं कल्पं निराकरोति टीकायाम्— वेदान्ताविरुद्धेति । ततश्च परिशेषात्साक्षात्कार एव कर्मणामुपयोग इत्युपसंहरति टीकायाम्— तस्मादिति । श्रुतिमयेन श्रुतिजन्येन । टीकायाम्— तर्कोपकरणेन शब्देन विज्ञायेत्यन्वयः । अस्यां श्रुतौ 'धीरः' इत्यनेन फलाभिसंधिमन्तरेणानुष्ठितयज्ञादिनिर्मलीकृतान्तःकरणत्वलक्षणं धैर्यं प्रज्ञाहेतुत्वेनोक्तमिति कर्मणामुपयोग उक्त इति द्रष्टव्यम् । टीकायाम्— श्रेयःपरिपन्थीति । ब्रह्मात्मैक्यसाक्षात्कारपरिपन्थीत्यर्थः । टीकायाम्— पुरुषसंस्कारेति । साक्षात्कारजननयोग्यताधानलक्षणसंस्कारेत्यर्थः । ब्रह्मभावनामासेवमान इत्यन्वयः । **महायज्ञै**र्ब्रह्मयज्ञादिभिः पञ्चभिः इतरैर्ज्योतिष्टोमादियज्ञैश्च जीवस्य ब्रह्मभावस्फूर्तियोग्या तनुः क्रियत इत्यर्थः । सप्त पाकयज्ञाः सप्त हविर्यज्ञाः, सप्त सोमसंस्थाः, निषेकादिश्मशानान्तानि षोडश कर्माणि, त्रीणि व्रतानि, इति चत्वारिंशत्संस्काराः । ऋणत्रयं देवऋषिपितृ-
११० संबन्धि ऋणत्रयम् । **संस्कारद्वारेति ।** ऋणत्रयापाकरणकल्मषनिबर्हणयोरपि संस्कारत्वेन त्रयाणामपि पक्षाणां भावाभावसंस्कारद्वारा कर्मोपयोगप्रतिपादकत्वादिति भावः । संयोगपृथक्त्वेनेति संयोगशब्दार्थमाह— **संयोग इति । किं काम्यैवेति ।** काम्यैव सती खादिरता नित्येऽपि किं स्यात् नित्यार्थापि स्यात्, उत न नित्यार्था किं तु काम्यैवेति संशय इत्यर्थः । **न युक्तेति ।** नित्यानित्यसंयोगविरोधादिति भावः । कृत्वज्ञताबोधकप्रमाणसत्त्वान्न विरोध इति शङ्कते— **यत्विति ।** वचनमन्यार्थमिति परिहरति— **तदिति ।** नित्येऽपि प्रयोगे खादिरत्वस्य श्रवणमस्तीति यत्त्वयेष्यते तत्काम्यस्यैव खादिरत्वस्य यूपरूपाश्रयदानार्थमित्यर्थः । सिद्धस्य यूपस्य कथं खादिरत्वाश्रयत्वम्? तदसाध्यस्य तद्भावयोगादित्याशङ्क्य क्रियाविष्टवेषेण साध्यतां दर्शयितुं पशुबन्धयुक्तेत्युक्तम् । एकस्योभयशेषत्वे संयोगपृथक्त्वं कारणमिति

सूत्रयोजनामभिप्रेत्य फलितमर्थं दर्शयन्द्वयोरपि प्रमाणयोः परस्परनैरपेक्ष्येणाभयार्थत्वबोधकत्वान्न नित्यानित्यसंयोगविरोध इत्याशयेन सिद्धान्तमाह— **एकस्य खादिरत्वस्यात्मादिना । संनिधानादेवेति ।** 'दर्भेन्द्रियकामस्य' इत्यादाविन्द्रियाद्यर्थतया विधीयमानस्य दध्यादेरिव संनिधानादेवाश्रयलाभान्न तदर्थं वाक्यान्तरापेक्षेति भावः । सूत्रगतसर्वशब्दार्थं दर्शयन्सर्वापेक्षेति पदं योजयति टीकायाम्— यज्ञेति । विशेषणत्रयशब्देनादरनैरन्तर्यदीर्घकालेनेति टीकोक्तं गृह्यत इत्याह— **आदरेति** । टीकायाम्— अविद्यातद्वासनयोः समुच्छेदः शिथिलीकरणम् । अभिव्यक्तस्वरूपस्यैव मोक्षत्वान्मोक्षापरनाम्ना साक्षात्कारयेत्युक्तम् । **शेषलक्षणादारभ्येति ।** शेषलक्षणं तृतीयाध्यायः; तत आरभ्य चतुर्भिरध्यायैः शेषत्वप्रयुक्तिक्रमाधिकारनिरूपणार्थैरुपदेशविचारः; सप्तमाद्यैश्चतुर्भिः सामान्यातिदेशविशेषातिदेशोहबाधनिरूपणार्थैरतिदेशविचारः; एकादशद्वादशाभ्यामुपदेशातिदेशसाधारणतन्त्रप्रसङ्गविचार इति विवेकः । सहितेत्यनेन कथं चातुर्थिकन्यायसंग्रह इत्याशङ्क्य प्रयोज्यप्रयोजकसंबन्धरूपस्य साहित्यस्य किं केन प्रयुज्यते अनुष्ठाप्यत इति प्रयुक्तिविचाराधीनत्वात्तेन तद्धेतुसंग्रह इत्याशयेनाह— **प्रयोज्येति । संस्कारकर्मत्वेति ।** यद्यपि संस्कारकर्मणोऽपि स्रुक्संमार्गादेर्गुणकर्मत्वमस्ति, तथापि दृष्टप्रयोजनाभावेन प्रसिद्धगुणकर्मवैषम्यात्पृथग्ग्रहणम् । ननु 'यदाग्नेयोऽष्टाकपालः' इत्यादिवाक्यबलात्कृत्स्नस्यापि पुरोडाशस्य यागीयत्वावगमात्कथं द्रव्यदानमात्रापेक्षा टीकायामुक्ता, 'चतुरवत्तं जुहोति' इति वाक्यस्य त्यक्तपुरोडाशैकदेशप्रतिपत्तिप्रक्षेपमात्रविधिपरत्वादित्याशङ्क्य वार्त्तिककारमते तथात्वेऽपि भाष्यकारमते 'यदाग्नेयः' इत्यादिवाक्यावगतं पुरोडाशस्य यागसाधनत्वं द्रव्यदानद्वारैव चतुरवत्तवाक्येन 'द्विर्हविषोऽवद्यति' इति वाक्यविहितद्रव्यदानमात्रस्यैव यागसाधनत्वेन विधानात्; ततश्च तन्मतानुरोधेन टीकेत्याशयेनाह— **आग्नेयेति** । टीकायां विकल्पासहत्वादित्यनन्तरमुत्कटानुत्कटकोटिकतया विकल्पमप्रदर्श्यैव क्रमेण कल्पद्वयं निरूपितम् । स्वयं तं विकल्पं विशदयन्नाह— **भावनासाध्य इति ।** संयवनशब्दार्थमाह— **मिश्रणस्येति ।** टीकायाम्— प्रोक्षणस्योलूखलादय इति । 'प्रोक्षिताभ्यामुलूखलमुसलाभ्यामवहन्ति' इति वचनादिति भावः । **प्राप्यं पय इति ।** 'गां दोग्धि पयः' इत्यादौ गां रिक्तीकरोति पयः प्राप्तुमिति वाक्यार्थः । अत एव 'दुह प्रपूरणे' इत्यत्र प्रपूरणं रिक्तीकरणम्, प्रस्मर्तव्यमित्यादाविव प्रशब्दस्य नञर्थकत्वादिति भावः । टीकायामिन्द्रियाद्याधेय इत्यस्य पूर्वेणान्वयः । **जडं स्यादिति ।** इन्द्रियभिन्नस्य दृश्यध्यस्तत्वेनैव प्रकाशावश्यंभावाध्यस्तस्य च जडत्वनियमादिति भावः । ननु ततो भिन्नस्येत्यादिटीकायां प्रामाण्यायोगादित्युक्तमयुक्तम्, इन्द्रियशब्दादिप्रमाणजन्यत्वेन तदुपपत्तेरित्यतस्तदभिप्रायमाह— **तथेति ।** 'न चक्षुषा गृह्यते नापि वाचा' 'यन्मनसा न मनुते' इति च श्रुतेरिति भावः । टीकायाम्— उपासनाया उत्पाद्यादिः मा भूदित्यन्वयः । टीकायां रङ्गव्यापृतेन संस्कार्या नर्तकीवेत्युक्तम् । तत्र रङ्गव्यापृतशब्दार्थमाह— **नट इति ।** शाब्दज्ञानमात्रेति मात्रशब्देन निश्चयत्वानधिकरणत्वं विवक्षितमिति दर्शयन्नाह— **उपासना किमिति ।** साक्षात्काररूपो हीत्यादिटीकाया जीवे कर्तृत्वाद्यध्यासस्तद्विरुद्धाकर्तृभोक्तृब्रह्मात्मत्वसाक्षात्कारनिवर्त्यः साक्षात्कारविपर्या-

१११ ११२ ११३ ११४

सत्त्वादित्यनुमानं सूचितम्। तस्य व्यभिचारं शङ्कते— **नन्विति**। हेतौ सोपाधिकत्वं विशेषणम्, तथा च निरुपाधिकेषु रज्जुसर्पादिभ्रमेषु न व्याभचारः, अन्तःकरणोपाधिकेषु कर्तृत्वाद्यध्या-
११५ सेषु च नासिद्धिरिति परिहरति— **सत्यमिति**। **तथाविधमिति**। दिङ्मोहादावप्यपरिशीलितप्रदेशविशेषप्राप्त्यादिरुपाधिरिति भावः। शब्दस्य साक्षात्कारजनकत्वे हेतुं सूचयितुमपरोक्षे ब्रह्मणीत्युक्तम्। तस्यायमभिप्रायः— ज्ञानस्यापरोक्षत्वमपरोक्षार्थव्यवहारानुकूलज्ञानत्वम्। अर्थस्य त्वभिव्यक्तचैतन्याभिन्नत्वम्, तच्च क्वचित्स्वाभाविकं क्वचिदाध्यासिकम्, न त्विन्द्रियत्वेनेन्द्रियजन्यत्वादिकं ज्ञानापरोक्ष्यम् अपरोक्षज्ञानविषयत्वं चार्थापरोक्ष्यमिति युक्तम्, साक्षिण्यव्याप्तेः सोऽयं देवदत्त इति तत्तायांशातिव्याप्तेर्गौरवाच्च। ततश्च शब्दजन्यमप्यपरोक्षब्रह्मज्ञानम् अपरोक्षमिति। शब्द एवेति। 'तं त्वौपनिषदम्' इति श्रुतेरिति भावः। **भ्रमत्वापातादिति**। वेदान्तवाक्यजन्यस्य च ज्ञानस्य भ्रमत्वमयुक्तमिति भावः। टीकायां तस्यैव तत्फलत्वनियमादित्यादिना प्रमाणविशेषजन्यत्वादेव ज्ञानस्यापरोक्ष्यम्,
११६ तद्विषयत्वं चार्थस्य, शब्दश्च प्रत्यक्षप्रमायामयोग्य इत्युक्तम्; तदभिप्रायमाह— **अयमभिसंधिरिति**। किमभिव्यक्तचैतन्याभिन्नत्वमात्रमर्थस्यापरोक्ष्यम्, उत तदपरोक्षव्यवहारानुकूलाभिव्यक्तिमच्चैतन्याभिन्नत्वम्? नाद्यः, यत्किंचिद्दृश्यभिव्यक्तचैतन्याभिन्नतया सर्वस्यापि प्रपञ्चस्य तदापत्तेः; न द्वितीय इत्याह— **स्वत इति**। अत एव निरतिशयानन्दरूपं ब्रह्म ममापरोक्षं न प्रकाशत इति व्यवहार इति भावः। ततश्च ज्ञानाभिन्नभावकरणकत्वमेव ज्ञानस्यापरोक्ष्यं तद्विषयत्वं चार्थस्य। यथोक्तकरणकत्वं च ज्ञानस्य यद्विषयावच्छेदेन तस्यैवापरोक्षत्वमिति न तत्तांशस्यापरोक्षत्वम्। साक्षिण्यप्यन्तःकरणजन्यसूक्ष्मान्तःकरणवृत्त्यभ्युपगमान्नाव्याप्तिः। यद्वा ज्ञानतदभावाकरणकज्ञानस्यानुभवत्वं ज्ञानस्यापरोक्ष्यम्, तज्जन्यव्यवहारयोग्यत्वमर्थस्येति न कोऽपि दोष इत्यभिप्रायेणाह— **तत्रेति**। नन्वेवमपि तस्यैव तत्फलत्वनियमादिति हेतुरयुक्तः, ब्रह्मात्मैक्यसाक्षात्कारे वेदान्तवाक्यस्य हेतुत्वावगमादिति चेत्, तत्र वक्तव्यम्— किमन्तःकरणस्य निर्विशेषब्रह्मसाक्षात्कारजननसामर्थ्यं नास्ति प्रमाणमिति ब्रवीषि, किं वा सति सामर्थ्ये इदानीमपि तं जनयेदिति, उत शब्दोऽपि तज्जननसमर्थ इति, अथ वा इदानींतनाहंप्रत्ययवत्तदानींतनस्याप्यन्तःकरणजन्यत्वाविशेषेण भ्रमत्वं स्यादिति, अपि वा तत्प्रमात्वसिद्ध्यर्थमन्यापेक्षणे परतस्त्वापात इति, आहो ब्रह्मणो मनोगोचरत्वनिषेधकश्रुतिविरोध इति, यद्वा वेदान्तवाक्यसहकृतस्यान्तःकरणस्य साक्षात्कारजनकत्वाभ्युपगमे शब्दस्य परोक्षज्ञानजनकत्वस्वाभाव्यादपरोक्षे च ब्रह्मणि शब्दजन्यस्य परोक्षज्ञानस्य भ्रमत्वापत्तौ वेदान्तवाक्यस्य प्रमाणत्वभङ्ग इति, अथ वा 'तं त्वौपनिषदम्' इत्यादिश्रुतिबलाच्चरमसाक्षात्कारे वेदान्तवाक्यस्यैव हेतुत्वमवगम्यत इति। नाद्यः, सोपाधिकसाक्षात्कारे क्लृप्तत्वेन निरुपाधिकसाक्षात्कारेऽपि तत्कल्पनादित्याह— **अन्तःकरणं चेति**। न द्वितीयः, सहकारिविरहादिदानीं तदजनकत्वेऽपि यथोक्तसहकारिसमवधानेन तदानीं ब्रह्मात्मैक्यसाक्षात्कारजनकत्वसंभवादित्याह— **तच्चेति**। न तृतीयः, क्वचिदप्यक्लृप्तेरित्याह— **शब्दस्त्विति**।
११८ **मन्धावेरिति**। त्वगिन्द्रियविकलोऽन्ध इहान्धादिशब्देनोच्यते; तस्य दशमोऽहमिति ज्ञानं शरीरांशे परोक्षमेव, बाह्येन्द्रियस्य तत्प्रत्यक्षजनकस्याभावात् अन्तःकरणस्य संनिकर्षविरहेण

तत्रासामर्थ्याज्ज्ञानस्य प्रत्यासत्तित्वानङ्गीकारात् अत एव प्रत्यभिज्ञायास्तत्रांशे नापरोक्ष्यमिति भावः । न चतुर्थः, स्वतःप्रमाणवेदान्तवाक्यजन्यभावनाया अपि तत्र हेतुत्वाभ्युपगमेन वैषम्यादित्याह– **अपि चेति** । अन्तःकरणजन्या अपरोक्षधीः वेदान्तवाक्यजज्ञानभावनाजा यतः, अतो वेदान्तवाक्यरूपमूलप्रमाणदार्ढ्येन न भ्रमत्वं प्रपद्यत इत्यर्थः । न पञ्चम इत्याह— **न चेति** । अपवादः अप्रामाण्यबुद्धिः । मूलशुद्धिर्मूलप्रमाणदार्ढ्यम् । न षष्ठ इत्याह— **दृश्यते त्विति** । ननु 'यन्मनसा न मनुते' इत्यपि श्रुतिर्दृश्यते; अत आह— **नयबृंहितेति** । 'दृश्यते' इत्यादिश्रुतेरैकाग्र्यादिविशिष्टमनोविषयतया विशेषश्रुतित्वेन विशेषशास्त्रप्राबल्यन्यायोपबृंहिततया प्राबल्यादिति भावः । न सप्तमः, ब्रह्मणि परोक्षत्वानवगाहनादित्याह— **यत्साक्षादिति । सा त्विति** । प्रत्यक्षार्थविषयकानुमितिवदिति भावः । न चरमः, क्लृप्तादन्तःकरणादेव चरमसाक्षात्कारसंभवे तदानीमपि तत्त्वमस्यादिवाक्यानुसंधानकल्पने प्रमाणाभावेन 'यतो वाचो निवर्तन्ते' 'यद्वाचानभ्युदितम्' 'न चक्षुषा गृह्यते नापि वाचा' इत्यादिश्रुतिभिः शब्दस्य साक्षात्कारजनकत्वनिषेधेन च 'तं त्वौपनिषदम्' इत्यादिश्रुतेः परोक्षज्ञानजनकत्वपरत्वादित्याशयेनाह— **इति सर्वमवदातमिति । स्वरूपप्रकाशस्येति** । जीवस्वरूपप्रकाशस्य ब्रह्माभेदसाक्षात्कारेण १२९
तदभिव्यक्तिविरोधायकाविद्यानिवृत्तिरूपामभिव्यक्तिं संस्कारमुपपाद्य व्यञ्जकान्तःकरणवृत्तेरुपपाद्यताम् न चासावनुपादितेत्यादिटीकया प्रागुपक्षिप्तामुपपादयतीत्यर्थः । **असमुच्चयमतेऽपीति** । चित्तशुद्धिद्वारैव कर्मणामुपयोगः न तु भावनासमुच्चितानां तेषां ब्रह्मात्मत्वसाक्षात्कारे हेतुत्वमिति सिद्धान्तमतेऽपीत्यर्थः । न हीत्यादिटीकायाः शाब्दज्ञानप्रकाश्यं ब्रह्म कालान्तरे स्वप्रकाशं न भवतीति न हीति योजनां निराकरोति— **स्वप्रकाशस्यैवेति । परिहारसाम्यमिति** । वृत्तिविषयत्वं स्वप्रकाशत्वं च विरुद्धमिति शङ्कायां स्वरूपेण ब्रह्म स्वयंप्रकाशमुपहितरूपेण तु न स्वप्रकाशमिति परिहारसाम्यमित्यर्थः । **ननु निरुपाधीति** । अन्यथा तस्य सर्वोपाधिनिवर्तकत्वायोगादिति भावः । **कथमुपहितमितीति** । यदुपाध्युपहितब्रह्मसाक्षात्कारः संसारनिवर्तकस्तदुपाधिनिवर्तकसाक्षात्कारेऽप्युपाध्यन्तरगवेषणायामनवस्थापातादिति भावः । टीकायाम्— तस्यैवेति । अन्ततस्तस्यैवेत्यर्थः, तदानीमुपाध्यन्तराणामपि सत्त्वात् । अत एवाह— स्वपरोपाधिविरोधिन इति । ननु कथं ब्रह्मसाक्षात्कारस्य स्वपरोपा- १३०
धिविरोधित्वम्; न च तस्य निरुपाधि ब्रह्मेत्याकारस्य निरुपाधित्वेन वेषेण सकलोपाधिव्यतिरेकविषयतया सकलोपाधिविरोधित्वमिति वाच्यम्, उपाधौ सति तदाकारत्वस्यैवायोगादित्याशङ्क्य मिथ्याभूतोपाधिसद्भावो न वास्तवनिरुपाधित्वसाक्षात्कारविरोधीत्यभिप्रायमाह— **निरुपाधीति** । ननु साक्षात्कारेण सर्वोपाधिनिवृत्तौ तदनन्तरं निरुपाधिकमेव तद्विषयः स्यादित्याशङ्क्याम् उपाधिनिवृत्त्यनन्तरं नास्त्येव साक्षात्कारः तत्सत्तायामुपाधीनां विनश्यत्त्वेव न तु विनाश इति निराकर्तुं विनश्यदवस्थस्येति टीकेत्याशयेनाह— **ततः स्वसत्तायामिति** । वृत्त्युपहितं विषय इति वदन्प्रष्टव्यः— किं वृत्तिविशिष्टमुत वृत्त्यवच्छिन्नं किं वा वृत्त्युपलक्षितमिति; नाद्य इत्याह— **वृत्तिविशिष्ट-**

स्येति । द्वितीये किं वृत्तेर्ज्ञायमानतयावच्छेदकत्वमुताज्ञायमानतया? नाद्य इत्याह— **वृत्त्यवच्छिन्नेति** । न द्वितीय इत्याह- **विशेषणेति** । विशेषकस्यावच्छेदकत्वाग्रहे तद्विशेषितस्याग्रहादित्यर्थः । ततश्च शुद्धात्मविषयकत्वमेव स्यादिति भावः । तृतीयं दूषयति— **उपलक्षितस्य त्विति** । अविद्यमानस्याप्युपलक्षणत्वसंभवादिति भावः । द्वितीयद्वितीयमादाय परिहरति— **उच्यत इति** । तत्पक्षोक्तं दोषमुद्धरति— **अतो वृत्तेति** । उपाधिसंसर्गे सति शुद्धस्यैव विषयत्वात्संसर्गपृथक्कृतं तु स्वप्रकाशत्वमित्यभ्युपगमान्न दोष इति भावः । ननु ब्रह्मण उपाधिसंबन्ध उपाधिप्रतिबिम्बितत्वम्, तच्च विषयविषयिभावनिमित्तकम्; स चोपाधिसंबन्धाधीन इति परस्पराश्रय इति शङ्कते— **नन्विति** । विषयविषयित्वलक्षण इति विषयविषयित्वं लक्षणं निमित्तं यस्येत्यर्थः । टीकायां चैतन्यच्छायापत्तेरावश्यिकत्वमुक्तम्, तावता कथमुक्तदोषपरिहार इत्यत आह— **न ब्रह्मेति** । चैतन्यप्रतिबिम्बितत्वमिति । प्रतिबिम्बितचैतन्यकत्वमित्यर्थः । आहिताग्न्यादेराकृतिगणत्वान्निष्ठान्तस्य न पूर्वनिपातनियमः । स्वत इत्यत्र
१२१ हेतुमाह- **घटादेति** । तासां ब्रह्माविषयकत्वेऽपि प्रतिबिम्बितचैतन्यकत्वदर्शनादिति भावः । चैतन्यस्य ब्रह्मभेदभ्रान्तिं वारयन्नाह— **चैतन्यं चेति** । **भ्रमत्वमिति** । संसारदशायामप्रकाशमानं ब्रह्म परोक्षमिति तत्रापरोक्ष्यावगाहित्वादिति भावः । किं स्वरूपस्य पारोक्ष्यमुत शुद्धानन्दात्मत्वादेः किं वोपाधिविरहस्य? नाद्य इत्याह— **तत्राहेति** । द्वितीयं शङ्कते— **जीवेति** । **पारोक्ष्यादिति** । जीवाभिन्ने ब्रह्मणि भासमानेऽप्यभानात्तेषां ततो भेदः, इतरथा स्वरूपस्याप्यभानापत्तौ जीवब्रह्माभेद एव न सिध्येदिति भावः । शुद्धत्वादीनां स्वरूपाभेदेऽप्यभानमुपपद्यत इत्याह— **शुद्ध्यादीनामिति** । न च शुद्ध्यादेस्तिरोधाने तदभिन्नस्य स्वरूपस्यापि तिरोधानापत्तिः, एकस्यापि स्वरूपस्य कर्तृत्वभोक्तृत्वजडत्वाद्यशुद्धिराहित्यव्यवहारानुकूलस्फुरणांशे अघटनघटनापटीयस्या अविद्यया तिरोधानेऽप्यसत्त्वाप्रियत्वादिराहित्यव्यवहारानुकूलस्फुरणांशे तदभावादिति भावः । तर्हि साक्षात्कारदशायामपि सतामुपाधीनां कथं तेन निवृत्तिरित्याशङ्कायां सहकारिसाचिव्यादिति प्रागुक्तं स्मारयंस्तृतीयं शङ्कते— **वेदान्तेति** । वेदान्तजज्ञानेन वेदान्तज्ञानजन्यज्ञानमूलकभावनापरिपाकसहकृतान्तःकरणजन्यज्ञानेनेत्यर्थः । ननूपाध्यभावस्य स्वरूपानतिरेके निरुपाधिकं ब्रह्मेति कथं तद्वस्त्वव्यवहार इत्याशङ्कां दृष्टान्तेन निराकरोति— **यथेति** । तस्मादित्यादिटीकाव्यावर्त्याशङ्कामाह—
१२२ **नन्विति** । **तद्रूपेणेति** । षड्जादीनां षड्जत्वादीनां च योग्यतया श्रोत्रेन्द्रियेण ग्रहणेऽपि नायं मध्यमः किं तु षड्ज इति व्यवहारानुकूलेन रूपेण न व्यज्यन्ते गान्धर्वशास्त्रजन्यज्ञानमूलकभावनापरिपाकसहितेन तु श्रोत्रेण व्यज्यन्त इत्यर्थः । **निषादेति** । शरीरे वीणादिषु च प्रथमं श्रूयमाणाः श्रुतिसंज्ञकास्तत्तत्स्थानभेदभिन्ना नादा द्वाविंशतिः । तत्र चतुस्त्रिद्विसंख्याकश्रुत्यवयवशालिनस्तदनन्तरभाविनो घण्टानादानुरणनसदृशाः अनुरणनात्मका निषादादयः सप्त स्वतो रञ्जकत्वात्स्वराः । तत्र षड्जमध्यमपञ्चमाश्चतुःश्रुतिकाः । ऋषभधैवतौ त्रिस्त्रिःश्रुतिकौ । निषादगांधारौ द्विर्द्विःश्रुतिकाविति विवेकः । तेषां स्वराणां समुदायाः षड्जमध्यमगांधारस्वरप्रभवा नन्द्यावर्तजीमूतसुभद्राख्यास्त्रिविधा ग्रामाः । तेषु ग्रामेषु क्रमेण स्वराणामारोहावरोहाभ्यां निवेशाः प्रतिग्रामं सप्तधा भिन्ना एकविंशतिमूर्च्छनाः ।

तदुक्तम्— 'प्रथमश्रवणाच्छब्दः श्रूयते ह्रस्वमात्रकः। सा श्रुतिः संपरिज्ञेया स्वरावयवलक्षणा॥ श्रुत्यनन्तरभावी यः शब्दोऽनुरणनात्मकः। स्वतो रञ्जयति श्रोतृचित्तं स स्वर उच्यते॥ श्रुतिभ्यः स्युः स्वराः षड्जर्षभगांधारमध्यमाः। पञ्चमो धैवतश्चाथ निषाद इति सप्तमः॥ यथा कुटुम्बिनः सर्वेऽप्येकीभूता भवन्ति वै। तथा स्वराणां संदोहो ग्राम इत्यभिधीयते॥ षड्जग्रामो भवेदादौ मध्यमग्राम एव च। गांधारग्राम इत्येतद्ग्रामत्रयमुदाहृतम्॥ नन्द्यावर्तोऽथ जीमूतः सुभद्रो ग्रामकाश्रयः। षड्जमध्यमगांधाराश्रयाणां जन्महेतवः॥ क्रमात्स्वराणां सप्तानामारोहश्चावरोहणम्। मूर्च्छनेत्युच्यते ग्रामस्था एताः सप्त सप्त च' इति। अत्रोच्यत इत्यादिनापि समुच्चयनिराकरणादस्य ततो भेदं दर्शयति— **समुच्चयपक्षमिति**। समुच्चयस्य सामान्येन निराकरणमिह, उत्तरत्र तु तद्विशेषनिराकरणमिति भावः। अत एव विकल्पयति— **तत्र किमिति**। टीकायाम्— निश्चितेऽपि तत्त्व इति। औपाधिकभ्रमस्योपाधिनिवृत्तिमन्तरा निवृत्त्यभावेन विपर्यासानुवृत्तिसंभवादिति भावः। टीकायाम्— तेनेति। विद्यासहकृतेन तेन कर्मणा अविद्यातत्कार्यसमुच्छेदश्चोपपद्यत इत्यर्थः। **सजातीयाश्चेति**। स्वपरविरोधिन इति। द्वन्द्वगर्भे षष्ठीतत्पुरुषे, ततः सजातीयपदस्य कर्मधारय इति भावः। टीकायाम्— अनाद्यविद्येति। अविद्यारूपं यत्परिणाम्युपादानं यच्च देहादि तद्व्यतिरिक्तेत्यर्थः। टीकायाम्— व्यवहारप्रत्ययानिति। व्यवहारान्प्रत्ययांश्चेत्यर्थः। टीकायाम्— मिथ्येति मन्यमान इति। दोषनिमित्तकान्मन्यमानस्तद्विषयस्य वास्तवत्वं नाध्यवस्यतीत्यर्थः। **वास्तव इति निश्चयवत इति**। अन्यथा बहुवित्तव्ययायाससाध्येषु कर्मसु प्रवृत्त्यनुपपत्तेरिति भावः। प्रमारूप एव निश्चय उक्त इति मत्वा शङ्कते— **नन्विति**। भ्रमप्रमासाधारणनिश्चयमात्रेणैव निष्कम्पप्रवृत्तिसिद्धेर्न प्रमात्वं विवक्षितमित्याशयेन परिहरति— **इत्याशङ्क्याहेति**। **क्यषन्तस्य रूपमिति**। लोहितादेराकृतिगणत्वादिति भावः। लोहितादिभ्यो डाजन्तेभ्यश्च क्यष्प्रत्ययो भवतीति सूत्रार्थः। अभूततद्भावे क्यषो विधानात् प्रकृते तमर्थं दर्शयति— **अविद्वानेवेति**। शास्त्रसिद्धेन मिथ्यात्वेन क्रियाकर्त्रादिविभागमविद्वानेव सन्यः सत्यत्वेन वेत्ति स विद्वान् विद्वदाभास इत्यर्थः। नन्वभूततद्भावस्थले पूर्वावस्थोपमर्दो नियतः, यं प्रकारमप्राप्तस्तत्प्राप्ताविति तदर्थात्; न च मृदं घटीकरोतीत्यादौ तदभावः, तत्राप्यघटावस्थायाः प्रागभावरूपायाः सूक्ष्मतारूपाया वोपमर्दसत्वात्; प्रकृते च मिथ्यात्वेनाविद्वुषस्तेन रूपेण विद्वत्तानभ्युपगमे कथं तस्मिन्नर्थे प्रत्यय इति चेत्, न; अविद्वदवस्थोपमर्दस्य प्रकृतेऽपि सत्त्वात् तावतैव विधित्सितप्रत्ययार्थसंपत्त्या विशेषणांशेऽपि तदनपेक्षणात्। अत एव जलरूपेणासमुद्रोऽपि समुद्रीभवति प्रभुरयं गम्भीरतयेत्यादिव्यवहारः। न च लोहितादिसूत्रभाष्ये 'नायं हलन्ताद्विधीयते' इति निषेधात्कथं प्रकृते विद्वस्शब्दात्क्यषिति वाच्यम्, सूत्रकारमतानुरोधेन क्यषाश्रयणात्, अन्यथा 'लोहितडाज्भ्यः क्यष्वचनं भृशादिष्विति राणि' इति वार्तिकेन लोहितशब्दादन्यतः क्यषो निषिद्धतया भाष्यपर्यन्तधावनवैफल्यात्। न चैतदपेक्षया श्येनायते काक इत्यादिवत् 'कर्तुः क्यङ् सलोपश्च' इति सूत्रविहितक्यङन्तत्वमेव युक्तमिति वाच्यम्, तथात्वे मिथ्याभूतं क्रियाकर्त्रादिविभागं सत्यत्वेन विद्वान्विद्वदाभास इत्यर्थालाभात् विद्वानिवाचरती- १२३ १२४

स्यस्य तन्निष्ठदम्भादिगुणयोगेनाप्युपपत्तेः। अत एव श्येनायते काक इत्यादौ श्येनाभासः काक इति न प्रतीयते, अत एव च सौमनस्यलेशरहितेऽपि शोकिनि व्यवहारगुणयोगेन सुमनायत इति व्यपदेश इति ध्येयम्। अतःशब्दार्थं दर्शयन्नत एवेत्यादिटीकाभिप्रायमाह— **अत एवेति**। इतिर्हेतौ। अविद्वान्कर्मकाण्डेऽधिकार्यभिमत इत्यत एव हेतोरविद्वद्विषयत्वं प्राक्चेत्यादिभाष्येण वर्णयांबभूवेत्यर्थः। अनधिकारिकृते वैदिके कर्मणि फलाभावे लौकिकेऽपि कर्मणि न प्रवर्तेतेत्याशङ्क्य वैदिके कर्मणि श्रद्धाया अप्यङ्गत्वेन तदभावे फलाभावेऽपि लौकिके यथोचितफललाभसंभवान्न प्रवृत्त्यनुपपत्तिरित्युक्तं टीकायाम्— तेन
१२५ दृष्टार्थेष्विति। **प्रतीयमानेति**। प्रत्यक्षादिभिः प्रमाणैः प्रतीयमानस्य कर्माधिकारनिमित्तस्य ब्राह्मण्यादेरित्यर्थः। **इतरथेति**। न चेष्टापत्तिः, नास्तिकविषये प्रत्यवायाधिक्येन
१२६ प्रायश्चित्ताधिक्यस्मरणादिति भावः। **भक्तिरूपेति**। यक्ष्यमाणदेवताभक्तिरूपेत्यर्थः। **विश्वासात्मिकेति**। वेदबोधितत्वादिदमित्थमेवेत्येवंरूपेत्यर्थः। 'नश्रद्दधानः' इति। नञ्समासे 'नलोपो नञ्' इति नकारलोपे अश्रद्दधान इति स्यात्, अत आह— **नकारोऽयमिति। प्रतिषेधवाचीति**। 'अमानोनाः प्रतिषेधे' इति स्मरणादभावप्रवृत्तिनिमित्तकोऽयं नशब्दो भिन्नवाचीत्यर्थः। ततश्च 'गमिकर्मीकृतनैकनौकृता' इत्यादाविव नशब्दस्यायं समासो न नञ इति भावः। अतःशब्दो न पूर्वोक्तपरामर्शी, किं तु वक्ष्यमाण-
१२७ परामर्शीत्याह— **यत एवेति। एतदिति**। अतःशब्दोक्तमेव विभजत इत्यर्थः। 'न कर्मणा' इत्यादिश्रुतेरर्थमाह— **पितृमनुष्येति**। धनशब्दलक्षिता अपरविद्या सगुणविद्या। धनशब्दश्च देवलोकातिहेत्वपरविद्यापरत्वे किं प्रमाणमित्याशङ्क्य श्रुत्यन्तरमेव प्रमाणमित्याशयेनाह— **तथा हि श्रुत्यन्तरमिति**। ज्ञानोत्पत्त्युपयोगिनां कर्मणां न प्रयाजादिवदारादुपकारकत्वं संभवतीत्यत आह— **आरादूर इति**। तथा च साक्षात्कारापेक्षया व्यवहितामिच्छां चित्तशुद्धिद्वारेणोत्पादयतामेव कर्मणां ज्ञानोत्पत्तावुपकारकत्वादिति टीकार्थ इति भावः। **प्रधानेन प्रत्ययार्थेनेति**। नन्वु ये प्रतितिष्ठासन्तित एता रात्रीरुपेयुः इत्यादौ सन्प्रत्ययवाच्येच्छाविषयीभूतायाः प्रतिष्ठाया एव फलत्वावगमाद्विध्यमाणस्य वेदनस्यैव प्रकृतेऽपि फलत्वं युक्तमित्याशङ्क्य धात्वर्थस्य समानपदोपात्तस्यापि कष्टात्मकत्वेन तदुल्लङ्घनेन भावनाया अन्यत्र पदान्तरोपात्तस्वतःसुन्दरप्रतिष्ठादिभाव्यकत्वेऽपि प्रकृते संनिहितसन्प्रत्ययोपात्ताया ज्ञानवत्फलशिरस्कत्वेन फलभूताया इच्छाया एव साधनचतुष्टयसंपन्नया बुद्ध्या जिज्ञासेतेत्यादिप्रयोग इव यज्ञादिकरणकभावनाभाव्यत्वमिति टीकाभिप्रायमाह— **आख्यातेति**। न च विषयसौन्दर्यलभ्यत्वादिच्छायास्तत्र कर्मवैफल्यम्, ब्रह्मविचारप्रवृत्तिपर्यन्तायास्तस्यास्तत्प्रतिबन्धकदुरितनिबर्हणाधीनत्वेन तद्द्वारा कर्मणामिच्छोपयोगसंभवादित्याशयेन दुरितनिबर्हकत्वं कर्मणामुक्तं टीकायाम्— एतानि चेत्यादिना। तत्र शातपथश्रुतौ 'वेद' इत्यस्य वेदनपूर्वकमाचरणमर्थः, अत एव तस्मात्सयाजित्वमित्याशयेनाह— **यो विदित्वेति**। 'स ह' इति हशब्देन पूर्ववाक्योपात्तदेवयाज्यपेक्षया आत्मयाजिन आधिक्यं प्रदर्श्यत इत्याशयेनाह— **स च देवयाजिन इति**।
१२९ पञ्चम्यन्तं पदद्वयम्। यज्ञादेः प्रकृतत्वम् 'स च देवयाजी' इत्यादिवाक्य इत्याह— **स च देव-**

याजीत्यत्रेति। श्रुतिस्मृत्योरुदाहृतत्वात्पुनस्तदुदाहरणं व्यर्थमित्याशङ्क्य कर्मणां दुरित- १२९
निबर्हकत्वे श्रुतिस्मृती उदाहृत्य तद्द्वारा ज्ञानोपयोगेऽपि श्रुत्यन्तरं सोपस्कारमाहेत्याशयेनाह— **श्रुत्यन्तरमाहेति।** कर्मणां मोक्षोपयोगस्य पूर्वमेव निराकृतत्वात्क्लृप्तेनेत्यादिटीकावैयर्थ्य-माशङ्क्य ज्ञानानन्तरं कर्मानुष्ठानासंभवात्तेषां मोक्षोपयोगः पूर्वं वारितः; इदानीं ज्ञानात्पूर्व-भाविनामेव नित्यानामिव काम्यानामपि कर्मणां विविदिषाद्वारा ज्ञाने समुच्चयं निराकर्तुमियं टीकेत्याह— **नित्यानामिति। तत्राहेति।** कर्मणां मोक्षोपयोगः 'न कर्मणा—' इत्यादिश्रुति- १३०
विरुद्धत्वाच्छङ्कितुमेवानर्हः। अथ काम्यानामपि ज्ञानहेतुत्वमस्तीति तत्राहेत्यर्थः। किं काम्यानां कर्मणां क्लृप्तेनैव द्वारेण ज्ञानोपयोग उत कल्प्येन? नाद्यः, अनाकाङ्क्षितत्वादित्याह— **नित्यानां फलमिति।** द्वितीयं निराकरोति— **तत्र यथेति।** 'समानमितरच्छेषेण' 'एतद्ब्राह्मणान्येव पञ्च हवींषि' इत्यादिवाचनिकातिदेशस्थले प्राकृतोपकारविलक्षणो नोप-कारः कल्प्यते क्लृप्तेन प्राकृतेनैव वचनस्य चारितार्थ्यात्, एवमिहापीत्यर्थः। न च 'यज्ञेन' इत्यादिश्रुत्यसंकोचाय द्वारान्तरकल्पनं युक्तम्, स्वर्गकामश्रुतेः क्लृप्ताग्निविद्यत्रै-वर्णिकविषय इव 'यज्ञेन' इत्यादिश्रुतेरपि क्लृप्तपापक्षयद्वारकनित्यकर्मविषये संकोचसंभवादिति भावः। तर्हि पापक्षयफलकत्वेन क्लृप्तानां पवित्रेष्ट्यादीनां काम्यकर्मणामप्यस्तु विविदिषावा-क्येन विनियोग इत्याशङ्क्य निराकर्तुं नित्यफलेत्युक्तम्। तथा चावश्यकर्तव्यनित्यानुष्ठान-जन्यं पापक्षयमादाय चरितार्थः 'विविदिषन्ति' इति विधिः न पापक्षयाय नियमेन पवित्रेष्ट्याद्यनुष्ठानमपि प्रयोजयति। अत एव द्रव्यार्जनप्रवृत्तब्राह्मणलाभेन चरितार्थत्वात् 'ऋत्विजो वृणीते' इति विधिर्न क्षत्रियादेरार्त्विज्यं प्रयोजयतीति भावः। ननु नित्यकर्मणां पापक्षयद्वारकल्पनावसरे नित्यकाम्यसाधारण्येनैव यत्किंचिद्द्वारकल्पनं युक्तमित्यत आह— **पापक्षयस्य चेति।** 'ततस्तु तम्' इत्यत्र ततःशब्देन 'विशुद्धसत्त्वः' इति पूर्वनिर्दिष्टचित्त- १३१
शुद्धिपरामर्शादिति भावः। ननु नित्यकर्मणामेव विविदिषाद्वाराज्ञाने विनियोगे विविदिषा-वाक्यमनर्थकं नित्यानां पापक्षयफलकत्वस्य तत्तद्विधिभिरेव सिद्धेः तद्द्वारा ज्ञानोपयोगस्य च 'ततस्तु तम्' इत्यादिश्रुतित एव सिद्धेः, ततश्च तदानर्थक्याद्दूरं काम्यसाधारण्येन द्वारान्तरकल्पनमित्याशङ्क्य निराकरोति— **न च वाच्यमिति। विशेषत इति।** नित्य-विधिबलान्नित्यानां सामान्यतः पापक्षयफलकत्वं सिध्येत् तत्र यत्किंचित्पापक्षयमादायापि पर्यवस्यति, न तु ज्ञानोत्पत्तिप्रतिबन्धकपापक्षयमेवेत्यर्थः। ननु ज्ञानोद्देशेनानुष्ठीयमानैर्नित्यकर्म-भिरर्थात्तत्प्रतिबन्धकपापक्षय एव सिध्येदित्याशङ्क्य तदुद्देशेनानुष्ठानमेवैतद्वचनलभ्यविनियो-गाधीनमित्याशयेनाह— **अर्थसिध्येति। इतरथेति।** ज्ञानमनुद्दिश्य कर्तव्यमित्येव नित्यान्य- १३२
नुतिष्ठतः प्रत्यवायपरिहारमात्रमित्यर्थः। **अनियतेति।** पूर्वस्मिञ्जन्मनि ज्ञानोद्देशेनानुष्ठितैः कर्मभिर्ज्ञानोत्पत्तिप्रतिबन्धकदुरितक्षये सति ज्ञानोत्पत्तिरितरथा नेति न नियतेत्यर्थः। तर्हि स्मृ-तिबलादेव विनियोगोऽस्तु, किं विविदिषावाक्येनेत्यत आह— **ज्ञानमुत्पद्यत इति।** एवमपि 'ततस्तु तम्' इत्यादिशास्त्रादेव विनियोगसिद्धेर्विविदिषावाक्यं व्यर्थमित्यत आह— **श्रुति-रित्यति। तुल्यत्वादिति।** कल्प्यविधिकत्वेन तुल्यत्वादित्यर्थः। **नित्यकाम्येति।** १३३
नित्यानामपि फलवत्त्वेन काम्यत्वादिति भावः। नित्येहितेनेत्युक्तमिति। ततश्च

शास्त्रनियतेच्छाविषयफलकत्वं नित्यत्वम् अनियतकामनाविषयफलकत्वं काम्यत्वमिति विवेक इति भावः । स्यादेतदित्यतः प्राक्तनटीकाया एषोऽर्थः । नित्यकर्मणां परम्परया ज्ञानोपयोगमुपपादयति— तथा हीति । पाप्मनो निवर्त्यत्वाय तस्यानर्थहेतुत्वं दर्शयति— स हीति । संसारे शरीरादौ अनभिरतिः अनासक्तिः । आरुरुक्षोरिति । योगं ज्ञानयोगं संन्यासमारुरुक्षोः वैराग्यहेतुभूतं कर्म ज्ञानकारणम्, आरूढस्य तु शम एव कारणं न कर्मेत्यर्थः । एवं च कर्मावबोधस्य तस्मिञ्जन्मनि पूर्वभावनियमाभावान्न तदानन्तर्यमथशब्दार्थ इत्याह— एवं चेति । प्राग्भवीयकर्मानुष्ठानादेव चित्तशुद्धिद्वारा वैराग्यसिद्धौ प्रमाणमाह— इममेवेति । ब्रह्मचर्यं समाप्य गृही भवेदित्यादिक्रमपक्षात्पक्षान्तरपरिग्रहार्थो यदि वेति शब्दः । इतरथेति । वैराग्ये सतीत्यर्थः । अत एवेति । उक्तश्रुतिविरोधादेवेत्यर्थः । ब्रह्मचारिण इति । संपन्नवैराग्यस्येति शेषः । ऋणापाकरणफलस्य चित्तशुद्धेः सिद्धत्वादपि न ब्रह्मचारिणा ऋणापाकरणं कर्तव्यमित्याशयेनाह— गृहस्थस्यार्पाति । ननु 'जरामर्यं वा एतत्सत्रं यदग्निहोत्रम्' इत्यादिश्रुत्या जरामरणपर्यन्तं शरीरस्य भस्मतापर्यन्तं च कर्मणोऽनुष्ठेयत्वावगमात्कथं कर्मत्याग इत्याशङ्क्य पूर्वोदाहृतविधिश्रुतिबलादनयोरर्थवादयोरविद्वद्विषयत्वमित्याह— जरामर्येति । न चेत्थमिति । ब्रह्मजिज्ञासान्वयव्यतिरेकप्रयोजकान्वयव्यतिरेकप्रतियोगीत्यर्थ इति । **हेतुहेतुमद्भावाभावेऽपीति** । ननु पूर्वतन्त्रव्युत्पादितवेदप्रामाण्यकर्मभेदशेषशेषिभावादिविचारस्य प्रकृतेऽप्यपेक्षणात्कथं हेतुहेतुमद्भावाभाव इत्याशङ्कां निराकर्तुं धर्मब्रह्मावबोधयोरित्युक्तम् । अनुष्ठानोपयोगिनः कृत्स्नकर्मावबोधस्य ब्रह्मविचारं प्रति हेतुत्वं वार्यते तदेकदेशस्य कोशव्याकरणतर्कपातञ्जलादीनामिव सत्यप्युपयोगे न तदानन्तर्यमथशब्दार्थः । ब्रह्मविचारे प्रवृत्तस्यापि यदा यदपेक्षितं तदा तदवबोधसंपादनसंभवात् अन्यथा कोशाद्यवबोधानन्तर्यमप्यथशब्दार्थः स्यादिति भावः । **आरादुपकारकत्वादिति** । तत्संभवादित्यर्थः । नियामकश्रुत्यभावादिति पूर्वपक्षहेतुरसिद्धः प्रयोगविधेरेव न्यायसहकृतस्य क्रमविशेषनियामकत्वादित्याशयेनाह— **पदार्थेति** । अग्निहोत्रहोमस्य किं प्रयोजकं द्रव्यं पाकस्य च किं प्रयोजनमित्येवं पदार्थयोः प्रयोजकप्रयोजनापेक्ष इत्यर्थः । न्यायमाह— **न चेति** । **अनुष्ठानापेक्षेति** । ततश्च प्रयोगविधिरनुष्ठानापेक्षितक्रमपरत्वमपि सभिदादिवाक्यानां गमयतीति भावः । नन्वनुष्ठानकालीनस्मरणानां मन्त्रैरेव संपाद्यत्वान्न विधिवाक्यानि तदर्थानीत्याशङ्क्य यत्र मन्त्रा न पठिता यत्र वा कर्मणि प्रतिशाखमेकैकशेन पठिताः तत्र विधिपाठक्रमोऽपि दृष्टार्थत्वायानुष्ठानक्रमनियामकत्वेनेष्यत इत्याशयेनाह— एवं पाठक्रमोऽपीति । **तद्विधानाच्चेति** । सहत्वविधानात् प्रकृतितः प्राप्तः प्रथमं सोमप्रणयनानन्तरमग्नीषोमीयस्ततः सवनीयस्ततोऽवभृथानन्तरमनूबन्ध्य इत्येवंरूपः क्रमो निवर्तत इत्यर्थः । **त्रिवृता यूपमिति** । त्रिगुणया रशनयेत्यर्थः । सूत्रव्याख्यानेन सिद्धान्तमाह— **स्थानादिति** । **ततः प्रथममिति** । आश्विनग्रहग्रहणोत्तरकालं बद्धक्रमेण तेनैव सवनीयस्योपस्थापितत्वात्तदीयमेवोपाकरणमादौ कर्तव्यमित्यर्थः । **प्रधानार्थत्वाद्**[1]**ङ्गानामिति** । अङ्गानामशास्त्रीयविप्रकर्षरहितानामेव प्रधानोपकारकत्वादित्यर्थः । मुख्यक्रमादङ्गानां क्रमानादरे अशास्त्रीयं विप्रकर्षं दर्शयितुं प्रधानसंनिकर्षस्य शास्त्रीयत्वमाह— **प्रधानस्य हीति** । ततश्च प्रयोगविध्यवगतमङ्गानां प्रधानसाहित्यं नैकक्ष-

[1] १३५ १३६ १३७

णानुष्ठेयत्वरूपं संभवतीति तत्संनिकर्षरूपं पर्यवस्यति । एवं च यस्याङ्गस्य यावद्भिः स्वप्रधानाङ्गैः प्रधानान्तराङ्गैश्च व्यवधानमन्तरा स्वप्रधानसंनिकर्षो न संभवति ततोऽधिकं व्यवधानमशास्त्रीयमित्याह— **स चेति ।** ततश्च सरस्वद्यागस्य निर्वापं प्रथममनुष्ठाय तदनन्तरं सरस्वतीयागस्य निर्वापानुष्ठाने सरस्वद्यागनिर्वापस्य सरस्वतीयागतन्निर्वापाभ्यामुभाभ्यामपि व्यवधानं स्यात् । मुख्यक्रमेण तदनुष्ठाने तु सरस्वतीयागनिर्वापस्य सरस्वद्यागनिर्वापेण तस्य च सरस्वतीयागेनेत्येकेनैव व्यवधानमिति नाशास्त्रीयव्यवधानप्रसक्तिरित्याह— **यदि त्विति ।** प्रधानान्तरस्य प्रथमप्रधानस्य संनिधौ यदि तदङ्गानुष्ठानं तदा ततः पूर्वमनुष्ठितानि द्वितीयप्रधानाङ्गानि तेनैव प्रथमप्रधानाङ्गेन शास्त्रानुमतेन व्यवधायकेन स्वप्रधानाद्विप्रकृष्येरन्नित्यर्थः । यद्यपि प्रवृत्तिक्रमोऽत्र संभवति याज्यानुवाक्याप्रवृत्तिक्रमेण पश्चाद्भाविनापि न्यायतौल्येन निर्वापादिक्रमनियमसंभवात् तथाप्यसंकीर्णोदाहरणे क्वचित्क्लृप्तो मुख्यक्रमोऽपि प्रकृते संभवतीत्युदाहृतम् । **प्रोक्षणादिधर्मा इति ।** पशुत्वपनादिधर्मा इत्यर्थः । उपाकरणानन्तरभावित्वेन प्रोक्षणस्य प्राथमिकत्वाभावादिति द्रष्टव्यम् । **प्रधानस्याङ्गैर्विप्रकर्षः स्यादिति ।** एकैकस्मिन्पशावुपाकरणादीनां सर्वेषामप्यङ्गानामनुष्ठाने प्रथमपशावनुष्ठितस्य प्रकृतौ प्रधानाव्यवहितपूर्ववर्तितया तथैव चोदकेन प्राप्तस्याङ्गस्य शास्त्रानुमतबहुव्यवधानाद्विप्रकर्षः स्यात्, एकैकस्य पदार्थस्य सर्वेषु पशुष्वनुष्ठाने तु तस्य षोडशभिरेव व्यवधानमिति न विप्रकर्षः स्यादित्यर्थः । श्रुत्यादीत्यादिशब्दादर्थपठनस्थानमुख्यक्रमा गृह्यन्ते । **अतः प्रयोगवचनेति ।** १३९ अङ्गानां परस्परसाहित्यस्यापि प्रयोगवचनावगतस्य न्यायत ऐकरूप्यावगमात्तद्भेदे प्रयोगवचनस्य कोपः स्यादिति भावः । **त्रय इति ।** 'यदाग्नेयोऽष्टाकपालः' इत्यादिवाक्यविहितौ द्वावाग्नेयौ । ततश्चाग्नेयोपांशुयाजाग्नीषोमीयास्त्रयः पौर्णमास्यया संबद्धा आग्नेयपयोदधियागास्त्रयोऽमावास्यया संबद्धा इत्यर्थः **आख्याते कर्त्रैक्यस्येति ।** तथा चाधिकार्यवस्थापन्नपुरुषबोधके स्वर्गकामपदे उद्देश्यगतत्वेनैकत्वाविवक्षणेऽपि तस्यैव कर्तृत्वावस्थावहस्योपादेयतया आख्यातेन तद्गतैकत्वविवक्षणादर्थादधिकारिणोऽप्येकत्वं सिद्धमिति भावः । **एकश्वासाविति ।** सर्वैरप्यङ्गैरेकस्यैव प्रधानगतस्य फलजननसामर्थ्योद्बोधरूपस्य स्वस्वासाधारणदृष्टादृष्टद्वारान्तरोपकारद्वारा जननाभ्युपगमादिति भावः । **समुच्चित्येति ।** साधनत्वेन तस्मिन्समुच्चित्योपनिबद्धा इत्यर्थः न तु समुच्चित्य साधनत्वमिति, तदानीं विकृतावेकाङ्गपुनःश्रवणे तस्या विकृतेरुपकाराकाङ्क्षायाः क्लृप्तोपकारप्राकृताङ्गेनैव शान्त्या न तत्र चोदकप्रवृत्तिरिति सिद्धान्तभङ्गापत्तेः, समिदादिवाक्यैः प्रत्येकमेव समिदादीनामुपकारे विनियोगाच्चेति ध्येयम् । धर्मब्रह्मविचारयोः शेषशेषिभावाभावादेकप्रयोगवचनपरिग्रहाभावेऽपि पाठक्रमात्क्रमः कुतो न भवेदित्याशङ्कां निराकर्तुं यत्र त्वित्यादिटीका । तत्रार्यमदेवताकमार्यमणं कर्म । तां टीकामधिकरणप्रदर्शनेन व्याकरोति— **एकादश इति ।** यद्यप्येतदधिकरणं पञ्चमाध्यायतृतीयपादस्थम्, तथाप्येकप्रयोगान्तर्गताङ्गप्रधानक्रमविचारपरे पञ्चमे नायं विचारो युक्तः, अत एव 'प्रयोज्यगोचरः क्रमस्ततः परं निरूप्यते' इति पञ्चमाध्यायारम्भे उक्तम् । ततश्च सौर्यादिकं किं पूर्वं पूर्वमनुष्ठायैवानुष्ठेयमुत पुरुषेच्छानुरोधेनेत्येवं प्रयोगविशेषविचारात्मक एवायं विचारः । एवं च सत्येकादशे योग्यमपि संगतिलोभात्पञ्चमे स्थितमिति ग्रन्थार्थो बोध्यः । उदाहृतं पूर्वपक्ष- १४०

सूत्रं व्याख्याय 'न वा असंबन्धात्' इति सिद्धान्तसूत्रं व्याचष्टे— **अङ्गेष्विति**। किं तु पुरुषस्येति। कदाचिद्बहुष्वपि कामनासंभवादस्ति क्रमाकाङ्क्षेत्यर्थः। अनुक्रान्तमधिकरणमिति-शब्देन समाप्य टीकागतमवर्जनीयतयेत्यादिवाक्यं व्याचष्टे— युगपदिति। कृत्वर्थत्वेति। किं कृत्वर्थत्वमपि उत पुरुषार्थत्वमेवेति संदेह इत्यर्थः। वाक्यलिङ्गाभ्यामुभयार्थत्वमिति
१४१ पूर्वपक्षमाह— **पशुकामस्येति**। वाक्येनेति। न च 'गोदोहनेन' इति तृतीयाश्रुत्या 'पशुकामस्य' इति षष्ठीश्रुत्या वा पुरुषार्थत्वसंभवात्कथं वाक्येन पुरुषार्थत्वमिति वाच्यम्, 'गोदोहनेन' इति तृतीयाया अप्रणयनक्रियाकरणताबोधित्वात् 'पशुकामस्य' इति षष्ठ्याश्च संबन्धसामान्यबाधकतया शेषशेषिभावबोधनासामर्थ्यात्। एवं च 'पशुकामस्य' इत्यनन्तरं श्रुत्येति केषुचित्कोशेषु पाठः प्रामादिकः। अत एव वाक्यात्पुरुषार्थत्वमित्येवोपसंहृतम्। अथ वा वाक्यात्प्रबलेन लिङ्गेन कृत्वर्थत्वमेव स्यान्न तु पुरुषार्थत्वमपीत्याशङ्क्य वाक्योपोद्बलनाय सामान्यसंबन्धबोधकषष्ठीश्रुतिसमभिव्याहारो वर्णित इति योज्यम्। किं तु तादर्थ्यमिति। तदुद्देश्यककृतिसाध्यत्वमेव तच्छेषत्वं न तु तदुपकारकत्वमात्रम्, दध्यानयनस्य वाजिनशेषत्वापत्तेरित्यर्थः। तर्हि पुरुषार्थेन गोदोहनेन चमसबाधे अङ्गविकलः क्रतुः स्यादि-
१४२ त्यत आह— **अङ्गापेक्षा चेति**। अन्यार्थेन क्रतूपकारसिद्धावपि चमसनियमादृष्टवैगुण्यं तदवस्थमेवेत्याशङ्क्य प्रयोगविध्यनुमतत्वान्न विरोध इत्याशयेनाह— **अन्यार्थस्यापीति**। अर्थलक्षणेति सौत्रपदस्य व्याख्या फलप्रयुक्तेति। अर्थलक्षणेत्यत्र सावधारणत्वमभिप्रेत्याह— **न विधित इति**। यथा वेति। यद्यपि नो खल्वित्यादिटीकातः प्राचीनोऽयं प्रतीकस्तथापि सौकर्याय गोदोहनविषयानुबन्धिनीं टीकां व्याख्याय तदनन्तरं श्रुतिनिराकरणेन
१४३ चेति टीकां व्याख्यातुमधिकरणानुक्रमणाय पुनस्तद्टीकोपादानमिति वेदितव्यम्। **कृत्वाश्रुतेरङ्गस्येति**। विधायकमित्यर्थः। **तच्चेति**। विधिविभक्तिप्रत्यासन्नेन यजिना सोमयागस्यैव विधेयत्वावगमात्तस्यैव दर्शपूर्णमासाङ्गत्वमित्यर्थः। **तत्कार्यस्येति**। सोमयागकार्यस्य फलस्येत्यर्थः। ततश्च फलवतः सोमयागस्य प्रत्यभिज्ञाने तस्य प्रयोजनाकाङ्क्षाराहित्यादङ्गत्वेन
१४४ विधिर्न भवेत्, कर्ममात्रप्रत्यभिज्ञाने तु नाङ्गत्वेन विधेर्विरोध इति भावः। **तद्रूपेणेति**। द्रव्यदेवताभ्यां कर्म रूप्यते निरूप्यत इति द्रव्यदेवते कर्मणो रूपम्, तेन भाव्यमित्यर्थः। **अव्यक्तत्वेनेति**। यागप्रतिसंबन्धितया देवतानुपादानरूपमव्यक्तत्वं सोमयागसादृश्यम्, तेनेत्यर्थः। **न विधिसंभव इति**। विहितस्य विधानायोगादिति भावः। बृहस्पतिसवपदं तु धर्मलक्षणार्थतया सप्रयोजनत्वान्न प्रत्यभिज्ञैकप्रयोजनकमिति न प्रकरणान्तरन्यायप्राप्तकर्मान्तरविधिस्वारस्यहानमिति वैषम्यमाह— **बृहस्पतिसवस्त्विति। उत भेदेनेति**। तथा च षडपि यागाः साङ्गाः पृथक्प्रयोज्या इति षट् प्रयोगाः, तन्त्रतायां द्वावेव प्रयोगाविति फलभे-
१४५ दः। **प्रतिप्रधानमिति**। विहितानां पुनर्विधानायोगेन फलवाक्ये कर्मोद्देशेन फलस्यैव विधानादिति **फले विधीयन्त इति**। स्वरूपेण विहितानामपि फलसंबन्धितया पुनर्विधानं तु फलस्यानुपादेयत्वात्। ततश्च विवक्षितं साहित्यमुपादेयगतत्वादिति भावः। **संग्रह इति**। फलजिज्ञास्यभेदाच्चेति भाष्ये धर्मब्रह्मजिज्ञासयोरित्यस्यानुषङ्गादिति भावः। ननु जिज्ञासायाः ज्ञानतन्त्रत्वं ज्ञानविषयकत्वं ज्ञानजन्यत्वं वा? उभयथापि न तत्फलं जि-

ज्ञानफलम् अन्यफलस्यान्यफलत्वायोगात्, न च गौणोऽयं व्यवहारः, धर्मब्रह्मजिज्ञासयोः पौर्वापर्यनियमपरिहाराय पारमार्थिकतयैव फलभेदस्य वक्तव्यत्वादित्याशङ्क्य तत्तन्त्रत्वं तत्पराधीनत्वं तदङ्गत्वरूपम् इच्छाया इष्यमाणार्थतया तदङ्गत्वात्, तथा च प्रधानफलमेवाङ्गस्यापि फलमिति भाष्ये ज्ञानफलमिच्छाफलमित्युक्तमिति टीकाभिप्रायमाह— **इच्छाया इति** । ननु भाष्ये तच्चानुष्ठानापेक्षमित्यादिना अभ्युदयनिःश्रेयसफलयोरनुष्ठानापेक्षतदनपेक्षकर्मज्ञानाधीनत्वमुक्तम् । तत्र कर्मणोऽनुष्ठानापेक्षायां ज्ञानस्य तदनपेक्षायां च को हेतुः फलस्य च साध्यत्वनियमेन साधनानुष्ठानेन विना कथं तदुत्पत्तिरित्याशङ्क्य कर्मणः क्रियात्वेन विधेयत्वादनुष्ठानापेक्षा ज्ञानस्य तु नैवं निःश्रेयसस्य च फलत्वं व्यङ्ग्यत्वमात्रेणेत्याह— **विधेयेति** । जिज्ञास्यभेदस्य टीकोक्तमात्यन्तिकत्वं स्फुटत्वमुपपादयितुं फलभेदस्यास्फुटत्वमाह— **क्वचिदिति** । साध्यत्वेन प्रतीतमिति । आप्तेः संयोगरूपत्वादिति भावः । कृतकत्वेऽनित्यत्वं स्यादिति न्यायः । 'ब्रह्मैष सन्ब्रह्माप्येति' इत्यादि वचनान्तरम् । **ननु भवतेरिति** । अकर्मकत्वेन न कर्मणि यत्प्रत्ययः भावे च यत्प्रत्यये नपुंसकलिङ्गता स्यात्, भाव्यमनेनेत्यादौ दृष्टत्वात्; कर्तरि च न यत्प्रत्ययविधानमस्ति; अतः कथमखण्डेन निरर्थकेन वा भव्यशब्देन जिज्ञास्यविशेषलाभ इत्यर्थः । 'भव्यगेय— 'इत्यादिसूत्रमदृष्ट्वा शङ्कते— **नन्विति** । **तयोरिति** । तयोर्भावकर्मणोरर्थयोः कृत्याः कृत्यसंज्ञकास्तव्यदादयः क्तप्रत्ययः खलर्थयसमानार्थकाश्च प्रत्यया भवन्तीति सूत्रार्थः । **अचो यदिति** । अजन्ताद्धातोर्यत्प्रत्ययो भवतीति विहितकृत्यसंज्ञकयत्प्रत्ययान्तस्येत्यर्थः । ननु कर्त्रर्थक एवायं यत्प्रत्ययो न भावकर्मार्थक इत्त्र किं नियामकमिति पृच्छन्तं मन्दं प्रति तद्विशदयति— **अस्य च भवतेरिति** । सुखमनुभवतीत्यादौ सोपसर्गत्वे 'वर्षा भवते मण्डूकः' इत्यादौ वर्षाः प्राप्नोतीति प्राप्त्यर्थकत्वे च सकर्मकत्वादिति भावः । **कर्त्रर्थक एवेत्यत्र** हेत्वन्तरमाह— **उत्पाद्येति** । भाष्ये निर्दिष्टो धर्म उत्पाद्य एव असिद्धत्वात् । ततश्च भूधातोर्न प्राप्त्यर्थकत्वम् । एवं च न कर्मणि यत्प्रत्ययः भव्यशब्दार्थेन विशेष्यतया धर्मापेक्षणाच्च न भावे यत्प्रत्यय इति भावः । भाष्योक्तमसत्त्वमाक्षिपति— **ननु भवितुरिति** । ननु कर्तुः कारकतया क्रियातः पूर्वं सत्त्वावश्यंभावात्कथं भवितुर्भावयितृव्यापारनिर्वर्त्यत्वमित्याशङ्क्य क्रियाद्वैविध्यकथनपूर्वकं कर्तुरसिद्धस्यापि बुद्धिस्थत्वेन सिद्धतामाश्रित्य कारकत्वं घटं करोतीत्यादौ कर्मण इवेत्यभिप्रायमाह— **भवतिर्हीति** । करोत्यर्थस्येति । घटं करोतीत्यादौ घटं भवन्तं भावयतीत्यर्थावगमाद्भावयिता देवदत्तादिर्भवितुर्घटस्य प्रयोजकः भव्यस्तु घटः प्रयोज्य इत्यर्थः । चोदनाशब्दस्य विधायकवैदिकशब्दवाचित्वाद्ब्रह्मकाण्डे तदभावात्कथं काण्डद्वयसाधारण्येन भाष्ये चोदनाशब्द इत्यत उक्तं टीकायाम्— चोदनेति वैदिकं शब्दमाहेति । **कथं वेदे इति** । अपौरुषेयत्वादिति भावः । आम्नादिस्वरूपकथनपूर्वकं तदसंभवं वेदे प्रकटयन्नुपदेशशब्द इष्टोपायताबोधकशब्दपर इत्याह— **उत्कृष्टेति** । 'तस्य ज्ञानमुपदेशः' इति सूत्रावयवं व्याचष्टे— **तस्य धर्मस्येति** । तद्विषये च यागादाविति टीकायाः स्वविषय इति भाष्यमावृत्त्या योज्यत इत्यभिप्रेत्याह— **धर्मस्येति** । या हि चोदना धर्मस्येति भाष्ये धर्मशब्दनिर्दिष्टा भावना शब्दतश्चोदनापेक्षयोपसर्जनभूतापि

१४६

१४७

१४८

प्रतिपाद्यतया चोदनापेक्षया प्रधानं स्वशब्दार्थ इत्यर्थः। यागादेर्भावनाविषयत्वमुपपादयति टीकायाम्— स हीति। विषयपदव्युत्पत्तिरिति। तथा च यागादिरपि भावनां विषिणोति बध्नाति स्वाधीननिरूपणां करोतीति विषय इति भावः। **अवबोधयतीति**। सा चोदनेत्यन्वयः। भावनाधात्वर्थयोरिति सप्तम्यन्तम्। **नियुञ्जाना चोदनेति**। नियोगं पुरुषप्रवृत्तिं कर्तुकामेत्यर्थः। ज्ञानच्छलयेन बोधनियोगयोर्हेतुहेतुमद्भावावगमादिति ध्येयम्। अत एव वक्ष्यति— **प्रवृत्तिहेतुमिति**। अध्याहारेण भाष्यं योजयति— **ब्रह्मचोदनयेति**। तथा च टीकायामवबोधस्य प्रवृत्तिराहित्यं प्रवृत्त्यहेतुत्वमिति भावः। वेदान्तानां ब्रह्मविधिपरत्वाभावेऽपि तज्ज्ञानविधिपरत्वमस्त्विति शङ्कत इत्याह— **ननु मा नामेति**। आत्मा ज्ञातव्य इत्यादीनां ब्रह्मज्ञानविधिपरत्वेऽपि 'तत्त्वमसि' इत्यादीनां सिद्धब्रह्मबोधमात्रविश्रान्तत्वमावश्यकमित्याशङ्कां निराकर्तुं तदेकवाक्यतयेति टीकावाक्यं विधेयज्ञानस्तुत्यालम्बनतया सिद्धब्रह्मबोधनान्न तत्र विश्रान्तिरित्यभिप्रायम् इति व्यावष्टे— **विध्येकवाक्यत्वेनेति**। विध्येक-
१४९ वाक्यत्वेन हेतुना स्तुत्यर्थं सिद्धवस्तुबोधनादित्यर्थः। अभिसंधिं भाष्यारूढां करोति— **भाष्य इति**। किं स्वरूपसाक्षात्कारे पुरुषो नियोक्तव्य उत वृत्तिसाक्षात्कारे? नाद्य इत्याह— तस्येति। न द्वितीय इत्याह— अकार्यत्वादिति। साक्षात्कारस्य प्रमाणाधीनत्वेन कृत्यसाध्यत्वादित्यर्थः। टीकायाम्— अत्रैवेति। प्रमाणाधीने बोधे पुरुषस्य नियोगायोग इत्यर्थः। यथा विशिष्टविधाविति। 'सोमेन यजेत' इति विशिष्टविधेर्न विशेषणे सोमनियमेऽपि तात्पर्यम्, यागेन भावयेत्तं च यागं सोमेनेति वाक्यभेदापत्तेः, किं त्वाधिकविधिविधेयत्वमेवेत्यर्थः। विषयविशिष्टप्रतिपत्तिविधिसामर्थ्यात्प्रतिपत्तिविषयमात्रसिद्धावपि तस्य पारमार्थिकत्वं न सिध्यतीति वैषम्यमाह— **विशिष्टक्रियेत्यादिना। वास्तवत्वादिति**। क्रियाविधिस्थले नियमेन तथैव दृष्ट-
१५० त्वादिति भावः। धीविषयत्वादिति। उपासनाया धीविशेषत्वादिति भावः। **तत्क्रम इति**। तयोर्ब्रह्मधीधर्मबुद्ध्योः क्रमेण एकस्मिन्नेव जन्मनि पौर्वापर्ये मानाभावात्स्नानभुज्यादिधीरिव ब्रह्मधीरपि नियोगेन धर्मबुद्धेरनन्तरा न भवतीत्यर्थः। अनित्याद्ब्रह्मण इत्यत्र ब्रह्मण इति षष्ठी। **शास्त्रश्रवण इति**। विवेको भ्रमस्येत्प्रपञ्चस्य नित्यत्वं ब्रह्मणोऽनित्यत्वं च निश्चितं भवेत्। ततश्च वैराग्याभावेन श्रवणे प्रवृत्तिर्न स्यादित्यर्थः। ननु नित्यानित्यशब्दनिर्दिष्टयोर्धर्मिणोर्वस्तुशब्दनिर्दिष्टानां नित्यत्वसुखत्वादीनां च विवेको नित्यानित्यवस्तुविवेक इति व्याख्यानेऽपि जिज्ञासावैफल्यं तदवस्थमेवेत्याशङ्क्य विशेषरूपेणानिश्चयान्न दोष इत्युक्तमेतदुक्तं भवतीत्यादिटीकया। तत्र तर्हि केन रूपेण निश्चय इत्यतस्तद्रूपमाह— **आत्मानात्मेत्यादिना**। टीकायाम्— निश्चिनोत्येवेति। संपादयत्येवेत्यर्थः। नित्यत्वानित्यत्वनिश्चयमात्रेण न वैराग्यं भवितुमर्हति, अनित्यस्यापि सुखरूपत्वे तत्परित्यज्य सुखेतरस्य नित्यस्यानुपादेयत्वादित्याशङ्क्य तत्परशुदृष्टान्तेन सत्याभिसंधस्य मोक्षः अनृताभिसंधस्य बन्ध इति प्रतिपादनात् 'यो वै भूमा तत्सुखमन्यदल्पं तन्मर्त्यं नाल्पे सुखमस्ति' इति च सत्यासत्ययोः सुखदुःखरूपत्वावगमाच्च नित्यत्वानित्यत्वनिश्चयः तत्समनियतसत्यत्वासत्यत्वसुखत्वदुःखत्वनिश्चयमुखेनैव वैराग्यहेतुरिति स्फोरयितुं टीकायां नित्यत्वं सत्यत्वमित्युक्तम्। तत्र च नाभेदो ग्रन्थार्थः भेदस्य लोकसिद्धत्वात्, रज्जुसर्पापेक्षया सत्यरज्ज्वाद्यव्यापनाच्च। अन्यथा सत्यासत्यवस्तुविवेक इत्येव वक्तुं

शक्ये व्याख्यानसापेक्षनित्यानित्यशब्दप्रयोगो भाष्येऽसंगतः स्यात्; अत एव रंहतिपादादिषु वैराग्याय कर्मफलाद्यनित्यत्वप्रतिपादनम् अतःशब्दव्याख्यानावसरे कर्मफलानित्यत्वबोधकश्रुतिप्राबल्यवर्णनं च; तस्मात्समनियतत्वाभिप्राया टीकेत्याह— **नित्यत्वस्य व्याख्येति** । नित्यत्वस्य विशेषेण सत्यत्वसामानाधिकरण्येनाख्यानं कथनमित्यर्थः । न च क्लिष्टयोजना, श्रुतिलोकसूत्रभाष्यटीकाखारस्यानुरोधेन तथैव योजनात् । अत एव यद्यपि घटादेरनित्यतावधारितेति पूर्ववाक्यमपीति ध्येयम् । ननूपादानपरित्यागनिमित्तसत्यत्वासत्यत्वादिनिश्चयशिरस्को नित्यानित्यवस्तुविवेकः कथमेतावन्तमनेहसमजायमान इदानीं जायेतेत्याशङ्कां निराकर्तुं सोऽयमित्यादिटीका । तत्रानुभवोपपत्ती विभजते— **दृष्ट इति** । अदृष्टे स्वप्नप्रपञ्चादौ सदधिष्ठानकत्वेनास्फुट इत्यर्थः । उपपत्तिमेवाह— **विगीतमिति** । गन्धर्वपुर्यः सौरालोकोऽधिष्ठानमिति न दृष्टान्ते साध्यवैकल्यम् । आदिशब्देन विमतं नित्यमूलकमनित्यत्वाच्छब्दवदित्यादिकं गृह्यते । **व्याप्त्यसिद्धिमिति** । हेतोरप्रयोजकत्वेनेति शेषः । अनृतं सर्वं सदधिष्ठानकं दृष्टम्, विगीतमप्यनृतं दृश्यत्वादनित्यत्वाच्च; ततश्च हेतूच्छित्तिरेव विपक्षे बाधकस्तर्क इति परिहरतीत्याशयेनाह— **आशङ्क्याहेति । किं तु तदभ्यास इति** । जननमरणपरिवृत्त्यादिरूपसंसारबन्धानित्यत्वादिदृढनिश्चयपर्यन्त इति शेषः । **क्रियासमभिहार इति** । 'क्रियासमभिहारे लोट् लोटो हिस्वौ वा च तध्वमोः' इति सूत्रेण पौनःपुन्याख्ये क्रियासमभिहारे सर्वलकारापवादेन लोट्स्तस्य परस्मैपदात्मनेपदयोर्यथाक्रमं हिस्वादेशयोश्च विधानेन प्रकृते खादेशस्य विधानादित्यर्थः । आभोगशब्दार्थमुक्त्वा नञ्साहित्येन फलितमर्थमाह— **अतदात्मिकेति** । अनादरात्मिकेत्यर्थः । ज्वाला एव जटा अस्य सन्तीति मत्वर्थे इलच्प्रत्यय इति दर्शयति— **ज्वाला जटाकारा इति** । श्रद्धावित्त इत्यत्र सावधारणत्वं दर्शयन्नाह— **श्रद्धैवेति । तथाभिहितमिति** । श्रद्धावित्त इत्यभिहितमित्यर्थः । अथशब्दादिति । तस्य हेत्वानन्तर्यपरत्वादिति भावः । तत्स्वरूपासिद्धिः तत्स्वरूपासंभवः । टीकायाम्— सैव त्विति । साधनसंपत्तिरेव त्वित्यर्थः । नरशिरःकपालशौचवदिति दृष्टान्तं विशदयति— **शुचि नरशिर इति** । नारं नरसंबन्धि सन्नेहं वसादियुक्तम् । टीकायाम्— विषसंपृक्तम्, मध्वन्नं वेत्यर्थः । **न्यायहीनमिति** । 'फलस्य कर्मनिष्पत्तेस्तेषां लोकवत्परिमाणतः फलविशेषः स्यात्' इति परिमितफलकत्वस्यैव न्याय्यत्वेन कर्मणामनन्तफलकत्वस्य न्यायहीनत्वादिति भावः । **आपेक्षिकेति** । महाभूतप्रलयपर्यन्तावस्थानरूपेत्यर्थः । **अत एव चेति** । अप्रकृतत्वादेव चेत्यर्थः । **तर्हीति** । ब्रह्मप्रमाणत्वाविशेषादिति भावः । नित्यानित्यविवेकादेरप्रकृतत्वं परिहरति— **हेतुमदिति** । धर्मजिज्ञासया वेदाध्ययनस्येव प्रकृतेऽपि हेतुमत्या ब्रह्मजिज्ञासया तदुपस्थापनान्न दोष इत्यर्थः । कात्यायनोक्तं तादर्थ्यसमासस्य प्रकृतिविकृतिनियममुपपादयति— **पाणिनिः किलेति** । सूत्रे चतुर्थीशब्दस्य चतुर्थ्यन्तशब्दपरतया तदर्थेत्यत्र तच्छब्देन चतुर्थ्यन्तशब्दस्य परामर्शे सति चतुर्थ्यन्तं चतुर्थ्यन्तवाचकेन समस्यत इति सूत्रार्थः स्यात्; अत आह— **चतुर्थ्यन्तशब्दार्थ इति** । योग्यत्वादित्यर्थः । तस्मा इदमिति । ततश्च चतुर्थ्यन्तः शब्दस्तदर्थहेतुभूतार्थवाचकेन समस्यत इति सूत्रार्थ इति भावः । अर्थशब्दादिनापीति । अर्थबलिहितसुखरक्षितशब्दैरपि चतुर्थ्यन्तः

१५१ १५२ १५३ १५४ १५५ १५६ १५७

शब्दः समस्यते ब्राह्मणार्थं पयः कुबेरबलिः गोहितं गोसुखम् अश्वसुखं अश्वरक्षितमित्यपि द्रष्टव्यमित्यर्थः । **सर्वप्रसङ्ग इति** । रन्धनाय स्थालीत्यादावपि तादर्थ्याविशेषात्समासप्रसङ्ग इत्यर्थः । 'विकृतिः प्रकृत्येति चेत्' इति वार्त्तिकमर्थतः पठति– प्रकृतिविकृत्योरिति चेदिति । **एवं चार्थादिति**। अस्यैव सिद्धान्तवार्त्तिकत्वादिति भावः । ननु कात्यायनमतेन चतुर्थीसमासासंभवेऽपि पाणिनिमतेन संभवत्येव, तेन तादर्थ्यमात्रे समासानुशासनात्, अन्यथा अश्वाय घासोऽश्वघास इत्यादिसमासासिद्धिप्रसङ्गात्; अत एव पूर्वतन्त्रे धर्माय जिज्ञासेति चतुर्थीसमासः समाश्रित इति शङ्कते— **नन्विति** । पाणिनेरपि प्रकृतिविकारभावस्थल एव तादर्थ्यसमासोऽभिमतः, अन्यथा तस्मिन्सूत्रे बलिरक्षितग्रहणवैयर्थ्यात् कुबेराय बलिरित्यादावपि तादर्थ्यमात्रस्य सत्त्वात्; एवं सूत्राभिप्रायं वर्णयता भाष्यकारेणाश्वघासादीनां षष्ठीसमासत्वाश्रयणात् अत एव पूर्वतन्त्रेऽपि भट्टपादैर्धर्मीय जिज्ञासेति शबरस्वामिवचनं षष्ठीसमासलब्धार्थिकार्थप्रदर्शनपरम्, न तु विग्रहप्रदर्शनपरम्, तस्य ज्ञातुमिच्छेति निगमनवाक्ये षष्ठीसमासविभावनादिति व्याख्यातमित्यभिप्रेत्य परिहरति— **कात्यायनेनैवेति** । कात्यायनकृतसूत्रव्याख्याननिराकरणेन स्वयमेव सूत्रव्याख्यानाद्भाष्यकार एव कात्यायनस्थानापत्त्या कात्यायनग्रहणेन गृहीतः । एतदर्थसूचनार्थमेव भाष्यकारेणेति वक्तव्ये कात्यायनेनैवेत्युक्तमिति ध्येयम् । **उपसंख्यातमिति**। 'षष्ठी' इति सूत्रविहितं समासान्तरमङ्गीकृतमित्यर्थः । प्रतिपत्त्यनुबन्ध इति टीकापदं व्याचष्टे— **प्रतिपत्ताविति** । जिज्ञासा प्रथमं कर्मैवापेक्षत इत्यत्र कथं प्रतिपत्त्यनुबन्धत्वं हेतुरित्यतस्तदुपपादयति— **स्वरूपेणेति** । स्वरूपसिद्ध्यनन्तरभावित्वादन्यापेक्षाया इति भावः । जिज्ञास्यान्तरं दर्शयन्भाष्यगतानिर्देशपदसूचितं परिहारं च प्रकटीकुर्वन्नाह— **नन्वित्यादिना** । निगूढाभिप्रायत्वे हेतुमाह— **ननु श्रुतेति** । ननु स्वरूपनिरूपणानन्तरभावित्वात्संबन्ध्यपेक्षायाः कथं ब्रह्मसंबन्धिनी जिज्ञासेति प्रथमं संबन्धः? असंबन्धे वा कथं संबन्धसामान्यस्य विशेषपर्यवसानमिति शङ्कते– **नन्विति** । कर्माकाङ्क्षिण्या अपि जिज्ञासाया आहृत्य कर्मत्वेन प्रतीयमानसंबन्धालाभे संबन्धित्वेन प्रतीयमानसंबन्धोऽप्यविरुद्धः तस्य कर्मत्वेनान्वयायोग्यत्वानिश्चयादिति परिहरति— **नेत्याहेति** । सुव्यवदातामिति काङ्क्षा लब्धमर्थमाह– **व्याहृतमित्यर्थ इति** । ननु कथं कर्मत्वस्य वाच्यत्वम् 'षष्ठी शेषे' इति सूत्रेण संबन्धमात्रे षष्ठीस्मरणात् 'कर्तृकर्मणोः कृति' इति सूत्रविहितषष्ठ्याश्च समासप्रतिषेधादित्यत आह— **कर्तृकर्मणोरिति** । अकारप्रत्ययान्तत्वादिति । 'अ प्रत्ययात्' इति पाणिनिसूत्रम् । तत्र अ इति लुप्तविभक्तिकं पदम् । प्रत्ययान्ताद्धातोरकारप्रत्ययो भवतीति सूत्रार्थः । ततश्च प्रकृते सन्प्रत्ययान्ताज्जिज्ञासधातोरुक्तसूत्रादकारप्रत्यये सति तस्य कृत्संज्ञकत्वात्कृद्योग इत्यर्थः । ननु कृद्योगलक्षणा षष्ठी समस्यत इति समासाभ्यनुज्ञानेन प्रतिपदविधाना षष्ठी न समस्यत इति निषेधाप्राप्तावपि 'कर्मणि च' इति सूत्रेण समासनिषेधः प्राप्नोत्येव; तथा च शेषषष्ठ्येव युक्तेत्यत आह— **यस्त्विति** । ननु प्रकृतेऽपि साधनचतुष्टयसंपन्नः कर्ता विद्यते, अत इहाप्युभयप्राप्तिरस्तीति तेनैव सूत्रेण षष्ठी स्यात्, ततश्च समासो न स्यादित्याशङ्क्य यत्र कर्तुरतिशयद्योतनार्थतया प्रयोगस्तत्रैव 'उभयप्राप्तौ कर्मणि' इति सूत्रप्रवृत्तिः, न त्वप्रयोगस्थलेऽपीत्याशयेनाह— **यत्रेति** । प्रतियोगित्वाख्यात-

मिति । चरमत्वास्फुटत्वपरतयेति शेषः, अन्यथा प्राथम्यपरोक्षत्वयोरविरोधात्कर्मत्वसंबन्धमात्रत्वयोरत्यन्तवैषम्यं न प्रतिपादितं स्यादिति भावः । ननु प्राथम्यचारम्याभ्यामेव परिग्रहपरित्यागयोः सिद्धेः स्फुटत्वास्फुटत्वाभिधानं व्यर्थमित्यत आह— **परमत इति** । लक्षणिकत्वमस्फुटत्वम् । इदमुपलक्षणम् ; स्फुटत्वं श्रौतत्वं प्रथमान्वयप्रसङ्गनार्थमित्यपि द्रष्टव्यम् । १६२

सौत्रेति । सूत्रकारोपदेशबलादिति भावः । सूत्रकारस्य परमाप्तत्वेऽपि न तत्र विश्वासः न्यायसूत्रत्वादित्याशयेन परिहरति— **नेति** । **व्यधिकरणत्वादिति** । फलविषयत्वस्य तदुपायाविषयत्व एव हेतुत्वादित्यर्थः । उक्तहेतोः फलपर्यन्तोपायविषयकत्वसाधकत्वान्न दोषः इति परिहरति— **तत्राहेति** । एवमपि कथं फलेच्छाया उपायांशविषयकत्वम् अन्यविषयाया अन्यविषयत्वायोगादित्यत आह— **फलेच्छाया इति** । उपायेच्छायाः फलेच्छाजन्यत्वादौपचारिकं फलेच्छात्वमिति भावः । ननु टीकायां भवतु ब्रह्मविषया अवगतिरित्यत्र स्वरूपसाक्षात्कार एवावगतिरुक्ता वृत्तेरपुरुषार्थत्वात्, अतः कथं तस्या ब्रह्मविषयत्वोक्तिरित्यत आह— **स्वरूपावगतिरिति** । स्वरूपावगतेः सुखरूपत्वात्कथमिष्टेति टीकाया अयोगमाशङ्क्य ब्रह्म न सुखमजिज्ञास्यत्वाद्धर्मवदिति शङ्काभिप्रायमाह— **ब्रह्मणोऽपीति** । श्रुत्यनुभवबाधितमनुमानमित्याह— **श्रुतीति** । प्रतिभानिति शत्रन्तः शब्द इति दर्शयति— **प्रतिभासमान इति** । **प्राप्यमाणत्वादिति** । तथा च पुरुषेण श्रवणादिव्यापारेण कण्ठचामीकरन्यायेन प्राप्यमाणत्वाद्ब्रह्मणोऽपि पुरुषार्थत्वमिति भावः । ननु टीकायां न च तदुच्छेदमन्तरेणेत्यादिना अविद्यानिवृत्त्यानन्तर्यं साक्षात्कारस्योक्तं तदयुक्तम्, साक्षात्कारजन्यत्वादविद्योच्छेदस्येत्यत आह— **विगलितदुःखेति** । **वृत्तिव्यक्तेति** । ततश्च जीवस्य यथोक्तब्रह्मात्मत्वेन साक्षात्कारे आविर्भावो व्यक्तता न तदुच्छेदमन्तरेणेति टीकार्थो बोध्यः । १६३

सूत्रस्यानुवादत्वेति । सूत्रार्थकथनपरे वाक्ये तव्यप्रत्ययाध्याहारेण सूत्रे कर्तव्येति पदाध्याहारसूचनादिति भावः । **किं तत्कर्तव्यतेति** । इच्छायाः कृत्ययोग्यत्वादिति भावः । ननु टीकायामिच्छामुखेन ब्रह्ममीमांसायां प्रवर्तत इत्यनेन विचारगतं कर्तव्यत्वं तन्मुखभूतायामिच्छायामुपचर्यत इत्युक्तम्, तत्र कथमिच्छाया विचारमुखत्वमित्यतस्तदुपपादयति— **ज्ञातुमिच्छा हीति** । ननु सूत्रे जिज्ञासापदस्य विचारार्थकत्वाङ्गीकारसंभवात्कर्तव्येति पदस्य किमित्यार्थिकविचारकर्तव्यतापरत्वाश्रयणमित्यत आह— **आर्थिके चेति** । **इत्युपपादनेनेति** । ब्रह्मजिज्ञासाया अनधिकार्यत्वादिति भाष्यव्याख्यानावसर इत्यर्थः । १६५

तद्विचारप्रतिज्ञापीति । 'अथातो धर्मजिज्ञासा' इत्यस्य वेदाध्ययनानन्तरं वेदस्य विवक्षितार्थत्वाद्वेदार्थविचारः कर्तव्य इत्यर्थः । तत्र सिद्धवद्धेतूपदेशेन वेदार्थो विवक्षित इति वेदार्थविचारः कर्तव्य इति च द्वे प्रतिज्ञे दृश्येते । तत्र द्वयोरपि प्रतिज्ञयोः सामान्यतो वेदार्थमात्रविषयकत्वेऽपि यथा अर्थविवक्षाप्रतिज्ञाया विशिष्य ब्रह्मकाण्डसाधारण्यमाश्रीयते तथा विचारप्रतिज्ञाया अपि विशिष्य ब्रह्मविचारपरत्वं कुतो नाश्रीयत इत्यर्थः । अनन्तरकृतयावद्विशेषपरत्वात्सामान्यशब्दस्य ब्रह्मविचारस्य च षोडशलक्षण्यां पूर्वमीमांसायामकृतत्वान्न तत्परत्वमिति परिहरति— **उपरीति** । प्रसिद्धमप्रसिद्धं वेति भाष्यस्य वेदान्तेभ्यः प्रसिद्धमप्रसिद्धं वेत्येवं विशेषपरत्वेन व्याख्याने हेतुमाह— **युष्मदस्मदिति** । १६६

आक्षिप्ते आक्षिप्तः । संमुग्धप्रसिद्धस्य संमुग्धं यथा तथा प्रसिद्धस्य आपाततो ज्ञातस्येत्यर्थः ।
१६७ टीकायाम्— साधनन्यायेति । स्वाधेयविशेषयुक्ततया विषयं साधयत एव साधनत्वमिति न्यायातिपातादित्यर्थः । वेदान्तानां निश्चायकत्वात्कथमापातज्ञानजनकत्वमित्याशङ्क्य ज्ञानस्य न संदेहरूपत्वमापाततत्वम्, किं तु अप्रामाण्यशङ्काकलङ्कितत्वमित्याशयेनाह— **यद्यपीत्यादिना । सामान्यतो दृष्टेति ।** वेदे तत्र तत्र विभक्तिव्यत्ययदर्शनाद्विभक्तीनां लुग्दर्शनाच्च 'तत्त्वमसि' इत्यादौ तस्माच्चं जात इति वा तस्य त्वमिति वा 'त्वं ब्राह्मणोऽसि' इत्यादिवत्त्वं तदसीति शरीरशरीरिभावेन सामानाधिकरण्यं वा वाक्यार्थः स्यादिति सामान्यतो दृष्टनिबन्धनवचनव्यक्त्याभासप्रतिबद्धो वेदः, तज्जनिते निश्चयेऽप्रामाण्यशङ्का फलतः
१६८ संदिग्धार्थः स्यादित्यर्थः । **उद्धरतीति ।** प्रसिद्धिपक्षावलम्बनादिति भावः । **कथं प्रतीतिपरत्वव्याख्येति ।** अवगमस्तावदस्तीति टीकायाः तथा व्याख्यानादिति भावः । टीकायां ततस्तु प्राग्देहाद्यभेदेनेति न भ्रमपरिकल्पिताभेदाभिप्रायम्, तस्य सिद्धान्त्यभिमतत्वेन निराकार्यत्वायोगात्, ततश्च संसारदशायां देहाद्यभेदाद्शुद्धत्वं मुक्तौ शुद्धत्वं च न भेदवा-
१६९ दिमते नापि चार्वाकमते तैस्तथानभ्युपगमादित्यत आह— **भेदाभेदमतेन शङ्केति ।** अनौपाधिकब्रह्मप्रसिद्धिकथनेन शङ्कापरिहारस्य जातत्वात्सोपाधिकब्रह्मप्रसिद्धिकथनं वृथेत्याशङ्क्य तत्त्वमसिवाक्यार्थज्ञानोपयोगितत्पदलक्ष्यस्वरूपनिर्णयाय तत्कथनमित्याशयेनाह— **तत्त्वमसिवाक्येति । अविद्याविषयीकृतमिति ।** जीवस्यैव तदाश्रयत्वादिति भावः । **शक्तिज्ञानाभ्यां** कारणत्वलक्षणे शक्यसंबन्धं साहचर्यं दर्शयति— **यो हीति ।** न केवलमित्युत्तरटीकानुरोधेनावतारयति— **सदेवेत्यादिवाक्यादिति । वाक्यात्प्रसिद्धस्यैवेति ।** अस्ति तावदित्यादिभाष्यबलादेव वाक्यप्रमाणकत्वसिद्धेरिति भावः । टीकायाम्— स्वहस्तयतीति । स्वहस्तवन्तं करोति, स्वहस्तगतं करोतीति यावत् । टीकायाम्— वृद्धिकर्मा हि बृहतिरिति । वृद्धिः कर्म क्रिया वाच्या यस्येत्यर्थः । बृंहतिरिति वक्तव्ये आगमानुशासनमनित्यमिति मत्वा नुमागमो न कृतः । ननु ब्रह्मपदादनवच्छिन्नमहत्त्वावगतावपि कथं नित्यत्वादिसिद्धिरित्याशङ्क्य निरवधिकमहत्त्वस्य देशतः कालतो वस्त्वन्तराच्चेति त्रिविधपरिच्छेदराहित्यरूपत्वादनित्यादिरूपत्वे च तदसिद्धेर्ब्रह्मपदबलादनित्यादिप्रतियोगिरूपसिद्धिरवि-
१७० कल्पेत्याह— **उक्तविशेषणानामिति ।** षष्ठ्योः सामानाधिकरण्ये हेतुमाह— **जीवस्य हीति ।** ब्रह्माभिन्नस्यैव सतो जीवस्य भ्रान्तिपरिकल्पिताशुद्धत्वादिव्युदासेन शुद्धबुद्धादिस्वरूपसमर्पणे ब्रह्मभावस्यानुक्तसिद्धत्वाद्ब्रह्मरूपं जीवात्पदार्थान्तरं सन्न पृथक्समर्पणीयमित्यर्थः । सर्वस्यात्मत्वादिति भाष्यगतस्य सर्वस्येति पदस्य व्यवहितान्वयेन व्याख्याने बीजमाह— **प्रसिद्धिर्हीति ।** ननु ज्ञानस्य ज्ञात्राकाङ्क्षावद्धर्मस्याप्यस्ति धर्म्याकांक्षा संनिधिस्त्वधिक इत्याशङ्क्य प्रयोजनाभावान्न तदन्वय इत्याह— **तथा सतीत्यादिना । पांसुमन्ताविति ।** तथा च मत्वर्थीयो लच्प्रत्यय इति भावः । **हालिक इति ।** तद्वहतीत्यर्थे ठक्प्रत्यय इति भावः । **साध्यहेत्वोरिति ।** आत्मत्वहेतोरप्रयोजकत्वाशङ्कायां तद्धेतुत्वसमर्थनार्थत्वात्सर्वो हीति भाष्यस्येत्यर्थः । पूर्वभाष्योक्तहेतुसाध्योभयस्फुटीकरणार्थत्वादस्य भाष्यस्य न दोष इति परिहरति— **आशङ्क्याहेति । अस्तित्वं न सिध्येदिति ।** अहंपदार्थेऽस्तित्व-

स्वविषयीकरणादिति भावः । नन्वहमस्मीति ज्ञानमेवात्मज्ञानमिति कथं मा च ज्ञासीदात्मानमिति टीकेत्यतः शङ्काभिप्रायमाह— **अहमिति प्रतीतेरिति** । नाहमस्मीति प्रतीयादिति भाष्ये नञः प्रतीयादित्यनेन व्यवहितेनान्वये हेतुमाह— **ऋजुयोजनायामिति** । **सुषुप्ताविति** । प्रसिद्ध्यभावस्य व्याप्यस्य सत्त्वादिति भावः । **शङ्कितुराशयमिति** । अहमिति १७१
प्रतीतेरहंकारमात्रविषयत्वान्नात्मप्रतीतिः सिध्येदित्येवंरूपमित्यर्थः । **समर्थितमिति** । अहंकारास्पदे कर्तृत्वचैतन्यादिचिदचिद्धर्मदर्शनादिति भावः । आत्मप्रसिद्ध्यभावे आत्मप्रसिद्ध्यनङ्गीकारे अहमिति चिदचिदुभयोल्लेखिनी प्रतीतिर्न स्यादित्यर्थः । **ननु ब्रह्मणि** वाक्यार्थे किमायातमिति शङ्कायास्तत्पदस्य त्वंपदेन सामानाधिकरण्यादित्यनेन कथं परिहार इत्यतस्तत्पदस्य ब्रह्मपरत्वादित्याशयमाह— **तत्त्वमसिवाक्य इति** । **ननु ब्रह्मात्मैक्यस्येति** । ब्रह्मपदार्थाप्रसिद्ध्या जिज्ञासाक्षेपस्य ब्रह्मप्रसिद्धिकथनेन परिहृतत्वान्ननु प्रत्येतिवि टीकायां ब्रह्मणि किमायातमित्याक्षेपो ब्रह्मणि वाक्यप्रतिपाद्ये किमायातमित्येवं जीवब्रह्माभेदस्य वाक्यार्थस्याप्रसिद्धत्वेन प्रतिपादयत्वाक्षेप एवायमिति भावः । **पदद्वयसमभिव्याहारादिति** । ताभ्यां जीवब्रह्मभ्यां गृहीतसंबन्धं यत्पदद्वयं तदिति त्वमिति च तयोः समभिव्याहाराल्लक्षणया ब्रह्मात्मैक्यलक्षणोऽपूर्वो वाक्यार्थः सुज्ञान इति भावः । तत्त्वमसिवाक्यस्य ब्रह्मात्मैक्यबोधकत्वसमर्थनं संबन्धानुबन्धकथनायेति दर्शयन्पुनराक्षेपस्य प्रयोजनमाह— **एवं तावदिति** । **असाधारण्यरूपेति** । एतच्छास्त्रैकप्रतिपाद्यत्वरूपेत्यर्थः । **लोकप्रसिद्धीति** । पण्डितपामरसाधारणपुरुषमात्रप्रसिद्ध्यभावादित्यर्थः । **इत्थंभावार्थत्वमिति** । तत्त्वमसीति वाक्यादि ब्रह्मात्मत्वेन प्रसिद्धमस्तीति टीकायां तृतीयाया इत्थंभावार्थकत्वकथनादिति भावः । हेतुतृतीयाव्याख्याने को लाभ इत्यत आह— **तदा हीति** । **तत्पदार्थमात्रस्येति** । धर्मिण इति शेषः । शुद्धत्वादेरप्रसिद्धत्वेनानुवादायोगादिति ध्येयम् । अभेदविवक्षयाप्युद्देश्योपादेयभावव्यत्यासे किं प्रयोजनमित्यतस्तदर्शयति— **अन्यत्र हीति** । १७२
उद्दिश्य विधानस्थल इति शेषः । **वस्त्वभावसाधिकेति** । परस्परविषयापहारकत्वेनैव प्रतिपत्तीनां विरुद्धत्वादिति भावः । अप्रामाण्यशङ्काशून्यप्रतिपत्तेरेव स्वविषयनिश्चायकतया प्रकृते न कापि प्रतिपत्तिर्निश्चायिकेति तद्बलादुपपन्नः संशय इति तात्पर्यमाह— **न विरुद्धेति** । **साधारणाकारद्वयाविति** । साधारणधर्मिदृश्यावित्यर्थः । नन्विहेति वाक्येऽपि धर्मपदं धर्मिपरम्; विप्रतिपत्तिजन्यसंशये साधारणधर्मदर्शनस्यानपेक्षितत्वात्केन रूपेण स धर्मी सिद्ध इत्याशङ्क्याहंकारास्पदत्वेनेत्याह— **देह आत्मेत्यादीति** । विप्रतिपत्तीनां भिन्नपुरुषाश्रयत्वाद्भिन्नाश्रया न स्युरिति कथमित्यत आह— **आश्रयशब्द इति** । धर्मिणः सर्वतन्त्रसिद्धत्वस्फोरणाय फलितमर्थं दर्शयति— **अतो विवदमानानामिति** । धर्मिमात्रस्य सिद्धत्वेऽपि शास्त्रप्रतिपाद्यस्य ब्रह्मात्मैक्यस्यासिद्धत्वात्कथं जिज्ञासेति शङ्कते— **साधारणधर्मीति** । **न हीति** । साधारणो १७३
धर्मी सर्वसंप्रतिपन्नत्वान्न शास्त्रप्रतिपाद्य इत्यर्थः । शास्त्रप्रतिपाद्यमप्यापाततः सिद्धमिति परिहरति— **तत्राहेति** । एवमपि ब्रह्मात्मैक्यस्य कथं प्रसिद्धिः लोकतस्तदनवगमात् वेदान्तानां तद्बोधकत्वस्य परैरनभ्युपगमादित्याशङ्क्य वेदान्तानां ब्रह्मात्मैक्यपरत्वं निषेधद्भिः परैरपि निषेधप्रतियोगितया ब्रह्मात्मैक्यमङ्गीकृतमिति तदपि प्रसिद्धमेवेति तात्पर्यमाह— **यस्मादित्यादिना** ।

लौकायतिकादीनामिति । लौकायतिकानां देहातिरिक्तात्मप्रतीतिर्भ्रमः । आस्तिकानामपि निरीश्वरभेदवादिनां तत्पदार्थप्रतीतिर्गौणी; सेश्वरभेदवादिनां तु तत्त्वंपदार्थैक्यप्रतीतिर्गौणी । आस्तिकशिरोमणीनामद्वैतिनां तु त्वंपदार्थधीरसङ्गसाक्ष्यालम्बना, तथा च तत्प्रतीतिर्भ्रमत्वगौणत्वादौ वादिनां विप्रतिपत्तिरित्यर्थः । चैतन्येत्यनेनापि पक्षान्तरं निर्दिश्यत इति भ्रान्तिं वारयितुं
१७४ षष्ठीतत्पुरुषमाह— **देहादीति** । ननु चैतन्यं चेतनत्वं ज्ञानम्, तच्च क्षणिकविज्ञानपक्षे न संभवति क्षणिकविज्ञाने ज्ञानान्तराङ्गीकारात्, अत आह— **आत्मत्वमित्यर्थ इति** । टीकायाम्— योग्यताविरहादिति । अनित्याशुद्धजडादिरूपस्य देहादेर्नित्यत्वशुद्धत्वचिद्रूपत्वान्वययोग्यत्वादित्यर्थः । **किं विक्रियेति** । परिणामविशेष इत्यर्थः । चैतन्यरूपभोगाभ्युपगमादाह— **सक्रियत्वरूपेति** । टीकायाम् तत्पदार्थासंगतिस्तत्पदार्थैक्याभाव इत्याह— **अतो न नित्येति** । तत्पदार्थे विप्रतिपत्तिर्दर्शितेत्येतद्ब्रह्मात्मैक्यविप्रतिपत्तेरप्युपलक्षणमित्याह— **लौकायतिकादीति** । ब्रह्मणो जीवात्मव्यतिरेकः सिद्धान्तविरुद्ध इत्यत आह— **कर्तृ-**
१७५ **भोक्तृभ्य** इति । नैयायिकाभिमतकर्तृभोक्तृरूपेभ्यः सांख्याभिमतकेवलभोक्तृरूपेभ्यश्च जीवात्मभ्यो व्यतिरेक उच्यत इति न सिद्धान्तविरोध इति भावः । टीकायाम्— सर्वस्य जगत ईष्ट इति । नियमनादिसमर्थ इत्यर्थः । सिद्धान्ते सर्वज्ञत्वादेरतात्त्विकत्वादाह— **नैयायिकेति** । टीकायाम्— तत्पदार्थ आत्मेति । स्वरूपमित्यर्थः । पक्षान्तराणामपि युक्तिवाक्यमूलकत्वे कथं तेषामप्रामाणिकत्वमित्यत आह— **आत्मा स भोक्तुरिति पक्ष इति** । **अनर्थं वेयादिति भाष्ये** वाशब्दश्चार्थ इति व्याचष्ट इत्याशयेनाह— **अनर्थं चेयादिति भाष्यार्थमाहेति** । अनिष्टप्रसञ्जनात्मकत्वाभावाद्वेदान्तमीमांसायाः कथं तर्कत्वमित्यत आह— **अर्थापत्तिरिति । वेदप्रामाण्येति** । श्रुतिलिङ्गादीनां श्रुत्यर्थादीनां वचननामधेयवोदकानां च शेषशेषिभावक्रमधर्मातिदेशबोधनमुखेन तत्तद्वेदवाक्यप्रामाण्यसमर्थनार्थत्वात्तत्परिशोधकत्वमिति भावः । ननु पूर्वमीमांसागतानां तर्काणां वेदान्तप्रामाण्ये तद्बोधितपदार्थानामङ्गाङ्गिभावादौ च भवतु वेदान्तमीमांसाया अपेक्षा, न्यायशास्त्रविचारितप्रत्यक्षादिप्रमाणप्रमेयलक्ष-
१७६ णानां कथमपेक्षेत्यत आह— **स्मृत्यादिभिश्चेति** । स्मरन्ति च बहिस्तूभयथापि स्मृतेः आचाराच्च इत्यादिसूत्रेषु प्रमाणत्वेन निर्दिष्टानां स्मृत्याचाराणां प्रामाण्याय मूलभूतश्रुत्यनुमाने समाननामरूपत्वादित्यादिसूत्रनिर्दिष्टपदपदार्थस्वरूपनिर्णये वेदस्वरूपनिर्णये चोपयोग इत्यर्थः । लक्षणानामतर्कत्वात्कथं तर्कशब्देन ग्रहणमित्याशङ्क्य लाक्षणिकोऽत्र तर्कशब्द इत्याह— **सर्वे चैत इति** ॥

जन्माद्यस्य यतः ॥ ब्रह्म जिज्ञासितव्यमित्यादिना भाष्यकारेणैव सूत्रावतारणात्स्वयं तदवतारणं व्यर्थमित्याशङ्क्य प्रथमसूत्रेण कृत्स्नस्यापि शास्त्रस्य संगतिप्रदर्शनपरा टीकेत्याह— **अनन्तरेति** । तर्हि कथं जन्मादिसूत्रस्यैव ग्रहणमित्यत आह— **सकलशास्त्रमिति** । अनया टीकया कः संबन्धो दर्शित इत्यत आह— **विषयादीति** । आदिपदेन प्रयोजनाधिकारिसंबन्धा गृह्यन्ते । किं लक्षणमिति भाष्ये किंशब्द आक्षेपार्थक इति टीकाभिप्रायमाविष्करोति— **प्रथमसूत्रेणेति** । टीकायां प्रधानप्रतिज्ञया तदुपयोगीन्यपि प्रमाणादीनि प्रतिज्ञातानीत्युक्तम्; तदुपपादयति— **मुमुक्षुणेति । अर्थादिति** । प्रमाणादिविचारमन्त-

रेण स्वरूपविचारस्य पर्यवसानाभावादिति भावः । कथमिति । 'मानाधीना मेयसिद्धिः' इति न्यायेन प्रमाणस्य प्राधान्यात्तदेव प्रथमं विचार्यमिति भावः । लक्षणेन विविक्तत्वेन ज्ञाते प्रमेये किमत्र प्रमाणमिति तत्सत्तानिश्चयाय प्रमाणापेक्षा; तथा च लक्षणेन स्वरूपमेव प्रथमं प्रतिपाद्यमिति परिहरति— **अत आहेति** । टीकासूचितौ विषयविशयावधिकरणाङ्गभूतौ दर्शयति- **यतो वा इत्यादीति** । यतो वा इत्यादिवाक्यं जगता तटस्थलक्षणेन नित्यानन्दादिना स्वरूपलक्षणेन च ब्रह्म लक्षयति उत नेत्यर्थः, इतरव्यावृत्तस्वरूपविशेषज्ञानाय शाखाग्रं चन्द्रः प्रकृष्टप्रकाशश्चन्द्र इतिवल्लक्षणद्वयस्याप्यावश्यिकत्वात् । अत एव यतो वा इत्यादिवाक्यस्य स्वरूपलक्षणज्ञापनसामर्थ्यस्फोरणाय भाष्यकारेण तस्य च निर्णयवाक्यमानन्दाख्येवेति जगत्कारणस्यानन्दरूपताबोधकवाक्यसापेक्षत्वमुक्तम् । संशये बीजमाह— **लक्षणस्येति** । तद्धर्मत्वेन तत्तादात्म्येन वा प्रसिद्धं हि लोके इतरव्यावृत्तिबुद्धिजनक- १७७
तया तस्य लक्षणं भवति, जगच्च न तथा, अशुद्धादिरूपस्य तस्य तद्विरुद्धब्रह्मतादात्म्यतद्धर्मत्वयोरयोगात् नित्यानन्दादेः स्वरूपेणाप्यप्रसिद्धत्वात्; तथा च जगतो लक्षणस्य लक्ष्यव्यावर्तकतावच्छेदकरूपेण प्रसिद्ध्यप्रसिद्धिभ्यां नित्यानन्दादेश्च स्वरूपेणापि प्रसिद्ध्यप्रसिद्धिभ्यां संशय इत्यर्थः । अधिकरणाङ्गं प्रयोजनमाह— **पूर्वाधिकरणेति** । **आक्षेपे चेति** । आक्षेपाधिकरणस्याक्षेप्याधिकरणसिद्धान्तफलेनापवादाधिकरणस्यापवाद्याधिकरणपूर्वपक्षफलेन तदर्थचिन्तायाश्च यदर्था सा तत्फलेन च फलवत्त्वाल्लक्षणस्य च लक्ष्यपरिच्छेदव्यतिरिक्तफलाभावात्कृत्वाचिन्तायाः अन्यत्रैव फलनिश्चयेन प्रकृते फलाभावनिश्चयाच्चेत्यर्थः । ननु शाखाग्रं चन्द्र इत्यादौ प्रकाशविरुद्धेनापि शाखाग्रेण चन्द्रस्येव विरुद्धेनापि जगता ब्रह्म लक्ष्यताम्, तथा च कथं टीकेत्यत आह— **सजातीयेति** । व्यावर्तकतावच्छेदकरूपेण १७८
ज्ञातस्यैव लक्षणत्वम्; शाखाग्रं च न चन्द्रस्य लक्षणमिति भावः । तादात्म्येन तद्धर्मत्वेन वा प्रसिद्धस्यैव लक्षणत्वमिति नायमस्ति नियमः, सामीप्यादिसंबन्धेन शाखाग्रादेरपि चन्द्रादिलक्षकत्वेन जगतोऽपि ब्रह्मजन्यतया तल्लक्षणकत्वसंभवात्, इतरव्यावृत्तेरप्यर्थापत्तिविधया तेनैव ज्ञापनात् । यदि च व्यावृत्त्यनुमाने हेतोः पक्षवृत्तित्वेन भवितव्यमित्याग्रहः तदानीमपि न दोष इत्याशयेनाह— **न जगदिति** । उक्तमर्थं टीकारूढं करोति— **तदुत्पन्नत्वेनेति । लक्षणमिति** । व्यावृत्तिबुद्धिजनकमित्यर्थः । अत्र भाष्यकृता जन्मादिपदं १७९
समाहारान्यपदार्थकत्वेन तद्गुणसंविज्ञानबहुव्रीहिरिति व्याख्यातम्; तदयुक्तम्, समाहारद्वारा समाहियमाणप्रतीतौ मतिक्लेशात् श्रुतौ जन्मादीनामेव निर्दिष्टत्वाच्च । अथ जन्मादीति सूत्रपदानुरोधादेवं व्याख्यानं सूत्रकारो वा किमित्येवं निरदिक्षदिति तत्रापि पर्यनुयोगात् तथा स्थितिभङ्गरूपान्यपदार्थमात्रेणैव ब्रह्मलक्षणसंभवे समस्यमानपदार्थस्याप्यन्यपदार्थगर्भप्रवेशे नास्ति कारणमित्याशङ्कानिराकरणार्थं लाघवेत्यादिटीका । तत्र समाहियमाणप्राधान्यविवक्षायां सूत्रे जन्मादयोऽस्य यत इत्यक्षराधिक्येन गौरवापत्तेः समुदायसमुदायिनोरनतिभेदेन श्रुतिविरोधाभावाच्च सूत्रकृता तथा निर्देशः कृत इति टीकाभिप्रायमाविष्करोति- **जन्म आदिर्ययोरिति । विशेषरूपेणेति** । स्थितित्वभङ्गत्वरूपपदार्थतावच्छेदकरूपेणेत्यर्थः । **सामान्यविवक्षयेति** । समाहारप्राधान्ये समाहियमाणानां पदार्थतावच्छे- १८०

च्छेदकरूपतिरोधानेन तद्गतसामान्यरूपस्यैकस्यैव विवक्षितत्वादिति भावः । अनेन च विशेषणेन नपुंसकलिङ्गत्वेऽपीतरेतरयोगद्वन्द्वे जन्मादीन्यस्येति सूत्रगौरवं स्यादिति स्फोरयितुं टीकायां नपुंसकग्रहणं तदेकवचनपरमपीति सूचितम् । एवमपि स्थितिभङ्गयोरेव समाहारो विवक्ष्यताम्, तदानीमपि सूत्रसामञ्जस्याविरोधादित्याशङ्कां निराकर्तुं तदुपपादनायेति टीका । तथा कथमुक्तशङ्कापरिहार इत्यतस्तात्पर्यमाह— **तत्रेति** । तत्र सूत्रे योऽयं नपुंसकैकवचनप्रयोगस्तदर्थमित्यर्थः । अनेन तदुपपादनायेति टीकायां तच्छब्दस्य सूत्रकृत्कृतनपुंसकैकवचनप्रयोगपरतया तदुपपादनाय योग्यं समाहारमाहेति टीका व्याख्याता। तथा च श्रुत्यर्थग्रन्थनार्थत्वात्सूत्रस्य श्रुतौ च जन्मादीनां लयाणामपि निर्दिष्टत्वात्तदानुगुण्याय सूत्रे तद्गुणसंविज्ञानसमाश्रयणमिति भावः । **सर्वस्य विशेषणत्व इति** । अन्यपदार्थस्य सामस्त्येनैव विशेषणत्वे विवक्षिते समस्यमानपदार्थादन्यपदार्थस्य भेदाभावेन समासायोगादित्यर्थः । जन्मनश्चादित्वमित्यादिभाष्यं व्याचष्टे– **अनादाविति** । **प्रतीतिमात्रमिति** । 'अस्य महतो भूतस्य' इत्यादिप्रयोगादिति भावः । 'जनिकर्तुः प्रकृतिः' इत्यनेन सूत्रेण जायमानस्य या प्रकृतिः कारणं तद्वाचिनोऽपादानसंज्ञया पञ्चमीविधानेन तादृशस्यैव श्रुतिगतस्य यत इत्यस्य सूत्रे निर्देशात्कारणनिर्देश इत्युक्तं भाष्ये। तच्च भाष्यं कारणत्वमेव लक्षणम्, तच्च जीवाविद्याविषयी-
१८१ कृतस्य धर्म इति प्राक्तनग्रन्थेनैवार्थाद्व्याख्यातमित्याह— **व्याख्यातमिति । लक्षणाव्याप्तिरिति** । लक्षणस्य ब्रह्मातीत्य परित्यज्य कालादिषु व्याप्तिः, ब्रह्मण्यसंभव इत्यर्थः । अत एव टीकायां प्रसिद्धेषु कालादिषु सत्स्वप्रसिद्धं ब्रह्म कारणमिति कुतः संभावनेत्युक्तम् । ननु टीकायां क्रियाभावशब्दनिर्दिष्टयोरदृष्टशून्ययोर्मध्ये यदृच्छास्वभावौ निर्दिष्टौ, तयोः को भेद इत्यत आह— **स्वभाव एवेति** । उत्पत्तेः प्रागत्यन्तासत्त्वमसिद्धमिति परि-
१८२-हरति— **अत आहेति** । बुद्धिसिद्धमित्येतद्वाक्यं योजयति— **यदसदिति** । टीकायाम्— ग्रहा आदित्यादयः । टीकायाम्— सूदाः पाककर्तारः । **इतरथेति** । कर्तुः फलाभावे कष्टात्मके कर्मणि विधिना तस्य प्रेरणानुपपत्तेरित्यर्थः । तथा च न्यायानुगृहीतप्रबलविध्यनुरोधेन यस्मिञ्जात इत्यादयर्थवादवाक्यं पुत्रे जाते सति य एतमिष्टिं निर्वपति स पूत इत्येवंपरतया नेयमिति भावः । सूत्रं योजयन्सिद्धान्तं दर्शयति— **यस्मि-**
१८३ **ञ्जात इति** । **प्रीत्युत्पत्तेरिति** । पशुहिरण्यादिगतातिशयादिव पुत्रगतातिशयादपि पितुः प्रीत्युत्पत्तेस्तदर्थमेव च प्रेरणासंभवान्न विधिविरोध इति भावः । भाष्यगतविशेषणबलेन टीकानुक्तमपि पक्षद्वयं निराकृतमित्याह— **अत्रानेकेत्यादिना** । टीकायाम्— इतरेतरद्वन्द्व इति । ततः प्रतिनियतपदेन कर्मधारयः, ततश्चाश्रयपदेन षष्ठीतत्पुरुषश्चेत्यभिप्रेत्य तदर्शितम् । देशादीनि चेत्यादिटीकायाः शेषमिति वाक्यशेष इत्यन्तं भाष्यं वाक्यशेष इत्यन्तायां टीकायां विशदमित्यर्थः । ननु भाष्यटीकयोः कथं जगत्कारणत्वं ब्रह्मणो लक्षणमुक्तम्, सजातीयविजातीयव्यवच्छेदकस्यैव लक्षणत्वात् ब्रह्मसजातीयस्य कस्यचिदनभ्युपगमाद्ब्रह्मणि जात्यभावेन तद्विलक्षणजातियोगिनो विजातीयस्याप्यभावात्। अत आह— **तदेवमिति** । जगत्प्रकृतित्वं कर्तृप्रधानादेः सकाशाद्ब्रह्म व्यवच्छिनत्तीत्यर्थः । सदशविसदृशव्यवच्छेदकत्वेनैव लक्षणत्वम्; तच्च पारमार्थिकं भ्रमपरिकल्पितं वेति न कश्चिद्विशेष इत्याशयेनाह–

परभ्रमपरिकल्पितेति । ब्रह्मसजातीयत्वं दर्शयितुं जगद्योनीत्युक्तम् । **विजातीयादिति।** ब्रह्मणः कारणत्वादेव हेतोः कार्यत्वाभावात् कार्यरूपात्प्रपञ्चादुक्तविधजगत्प्रकृतित्वं ब्रह्म व्यवच्छिनत्तीत्यर्थः। **त्रीणि लक्षणानीति** । स्वरूपाणीत्यर्थः । **सांख्यप्रक्रियेति** । सेश्वरसां- १८४
ख्यानां योगिनां प्रक्रियेत्यर्थः । ननु धर्मिणो हीति टीकायां धर्मलक्षणः परिणामः कटकमकुटादिरित्युक्त्वा तस्योत्पत्तिरित्युक्तम् तदयुक्तम्, उत्पत्त्युत्पत्तिमतोरभेदायोगादित्यत आह— **तत्र निरूप्यमाण इति** । ततश्च हाटकादेर्धर्मिणो धर्मलक्षणः परिणामः कटकमकुटादिरिति योऽर्थः सांख्यव्यवहारस्तत्र हाटकादुत्पन्ने कटकादौ प्रयुज्यमानस्य परिणामशब्दस्य वाच्यस्वरूपे विचार्यमाणे आकृत्यधिकरणन्यायेन तस्य तत उत्पत्तिरेव तत्परिणामशब्दालम्बनमिति टीकार्थो बोध्यः । एवं च कटकादिः परिणाम इति प्रयोगो लाक्षणिक इति भावः । **कटकादिकार्यस्येति** । अत्रापि कटकादेर्वर्तमानत्वादिरूपो यो लक्षणपरिणामः सांख्याभिमतस्तत्रापि परिणामशब्दालम्बनमुत्पत्तिरेवेति टीकार्थो बोध्यः । सोऽपीत्यनेन कटकादेरपीत्यपिशब्दस्य लक्षणपरिणामोऽपीत्यन्वयो दर्शितः । नवपुराणत्वादेरवस्थापरिणामस्य स्वरूपं प्रकटयति— **अतीतादेरेवेति** । टीकान्वयः प्राग्वत् । ननु टीकायां तच्च न मूलकारणेत्यादिना नैरुक्तवाक्यस्य मूलकारणब्रह्मप्रतिपादकत्वं प्रतिषिध्यते, तत्र को हेतुरित्याशङ्क्य पौरुषेयं वाक्यं मूलप्रमाणसापेक्षं सदेव प्रमापकम्, प्रकृते च न 'यतो वै' इत्यादिश्रुतिर्मूलम्, तस्या उत्पत्त्यादिविकारत्रयमात्रपरत्वात्, नापि प्रत्यक्षम्, महाभूतेषु ब्रह्मजन्यत्वस्य चक्षुराद्ययोग्यत्वादित्याह— **पुरुषाणा-** १८५
मिति । तर्हि स्मृत्यधिकरणन्यायेन तन्मूलश्रुत्यनुमानमस्त्वित्याशङ्क्य निराकरोति— **न चेति। अन्यथाप्युपपत्तेरिति** । ततश्च यास्कादीनां वृक्षादिगतषड्भावविकारप्रत्यक्षस्यैव मूलत्वसंभवान्न मूलान्तरानुसंधानं कल्पयितुं शक्यम्, हेत्वदर्शनाच्च इति न्यायविरोधादिति भावः । तन्मा शङ्कीत्यादि भाष्ये योत्पत्तिरित्यादिनोत्पत्त्यादीनां प्रसिद्धिरुक्ता, तां प्रकटयति— **परमकारणादिति** । न जगत उत्पत्त्यादयो वक्तव्या इत्यभिप्रेत्य ते सूत्रेणोच्यन्ते येनोत्पत्तिमात्रे निर्दिष्टे उत्पन्नस्य स्थितिभङ्गावश्यंभावेन नान्तरीयिकतयैव तद्गम्येत किं तु जिज्ञास्यत्वेन निर्दिष्टस्य ब्रह्मणो लक्षणं जगदुपादानत्वं वक्तव्यमिति, तच्च लक्षणमुत्पत्तिमात्रसूत्रणे न सिध्यतीत्युक्तं त्रिभिरित्यादिटीकया । तत्र कारणत्वमात्रस्यैव लक्षणत्वसंभवे किमुपादानत्वेनेत्याशङ्क्य ब्रह्मव्यतिरेकेण न प्रपञ्चस्य सत्तेति स्फोरयितुमित्यभिप्रेत्य टीकाशयमाह— **उत्पादकत्वमिति** । अमुमेवार्थं शङ्कान्तरनिराकरणेन दर्शयति— **नापीत्यादिना** । श्रौतप्रतिज्ञायां ब्रह्मप्रमितेः फलत्वालाभात्तल्लाभार्थमार्थिकप्रतिज्ञापरत्वेन व्याचष्टे— **ब्रह्मज्ञानायेति** । लक्षणेनापि ब्रह्मप्रमितिसंभवात्कथं संभावनामात्रमुक्तमित्याशङ्क्य किं १८६
लक्षणविधयैव तत्प्रमापकमुतानुमानविधयेति विकल्प्य नाद्य इत्याह— **लक्षणं हीति** । न द्वितीय इत्याह— **कार्येण चेति** । एकलासिद्धौ तन्मूलकं सर्वज्ञत्वादिकमपि न सिध्यतीत्याह— **तस्य यदेति** । केवलस्यानुमानस्य तन्निश्चायकत्वाभावेऽपि लाघवतर्कानुगृहीतस्य तन्निश्चायकत्वं स्यादित्याशङ्क्य तदानीमप्युत्कटकोटिकसंशयरूपतदेकत्वसंभावनामात्रहेतुत्वादित्याह— **अयमेवेति** । **संभावनासंभवन्निति** । संभावनारूपो भवन्नित्यर्थः । तर्कस्य १८८
प्रमाणानुग्राहकस्य कथं संशायकत्वमित्याशङ्क्य दृष्टविरुद्धत्वेन लाघवतर्कस्य दौर्बल्यमाह—

विचित्रेति । तर्हि दुर्बलेन तर्केण कथं संभावनापीत्यत उक्तम्— **प्रायेणेति** । स्वप्नदृष्टानां मायाविनिर्मितानां च तेषां तददर्शनादिति भावः । तथा च दृष्टविरुद्धत्वादिभिराकुलीकृतस्तर्कः श्रुतिरूपप्रबलप्रमाणावष्टम्भे सत्येव निश्चायक इत्याशयेनाह— **एवं चेति** । तर्हि प्रमाणबलादेव वस्तुनो यावत्स्वरूपप्रमिति संभवाल्लक्षणकथनं व्यर्थमित्येतदधिकरणवैफल्यं प्राप्तमित्याशङ्क्य संभावनायाः प्रमाणप्रवृत्त्युपजीव्यत्वात्तदर्थं लक्षणमित्याशयेनाह टीकाकारः— **यथाहुरिति** । न्यायसाम्येन शब्दादीनामपीदं तुल्यमिति भावः । नन्वेतदेवेति भाष्ये संभावनाहेतुत्वेनोक्तमेव जगज्जन्मादिकमनुमानविधयैव कारणस्वरूपज्ञापकमिति मन्यन्त इत्युक्तम् । तावता कथं युक्तीनां संभावनाहेतुत्वदृढीकार इत्यत इत्थं नामेत्यादिटीकाभिप्रायमाह— **नैयायिकैरपीति** । न्यायैकप्रयोजनकानामपि वैशेषिकादीनां जगज्जन्मादिविषयासु युक्तिषु प्रमाणत्वभ्रमदर्शनेन तासां प्रमाणाद्भेदः सूक्ष्म इत्यर्थः । टीकायामिच्छन्तीत्यनेन भाष्ये मन्यन्त इत्यनुमानस्य कारणमात्रसंस्पर्शित्वेऽपि तत्स्वरूपविशेषासंस्पर्शेन तन्निश्चये नास्ति सामर्थ्यमिति सूचितमित्युक्तम् । अमुमेवार्थं प्रकटयितुं सूत्रं लक्षणमुखेनानुमानप्रमाणपरमप्यस्त्विति भाष्ये शङ्का तस्या ब्रह्मणो मानान्तरागोचरत्वप्रतिपादनपरेणोत्तराधिकरणेनैव परिहारादिह तदाशङ्कापरिहारावनवसरदुःस्थाविल्याशङ्कां निराकर्तुं टीकायां सुहृद्भावेनेत्युक्तम् । तत्र सुहृद्भावेन कथनस्य प्रयोजनमाह— **उत्तराधिकरणेति** । अन्यथा शङ्काकालुष्यादेतदधिकरणार्थोऽपि न बुध्यारूढो भवेदिति भावः । ननु ब्रह्मणो वेदान्तैकगम्यत्वे सिद्धे वेदान्तवाक्यग्रन्थनार्थता सूत्राणां तदभावे तत्र प्रमाणं भवदनुमानमपि ग्रथ्यतां को दोष इत्यतः परिहारतात्पर्यमाह— **अत्रेति** । **प्रागुक्तयुक्त्या चेति** । कार्येण च कारणं किंचिदित्यादिकयेत्यर्थः । अध्यवसानशब्दस्य प्रसिद्धार्थपरित्यागेन व्याख्याने बीजमाह— **वाक्यार्थेति** । **शाब्दबोध इति** । निदिध्यासनसहितश्रवणमननरूप इत्यर्थः । त्रयाणामपि विचाराधीनत्वेन विचारणाशब्देन ग्रहणमिति भावः । **परस्तादवगतिरेवेति** । न वृत्तिरित्यर्थः । अवगतिरिह न वृत्तिसाक्षात्कारः, किंतु स्वरूपाभिव्यक्तिः; ततश्च युक्तमविद्याद्वयोच्छेदस्य मध्यवृत्तिलमित्याशयेनाह— **नायमिति** । नन्ववगतेः स्वरूपावगतिपरत्वे मध्यवर्तिनो वृत्तिसाक्षात्कारस्यैवाध्यवसानशब्दार्थत्वसंभवात्किमर्थमभावपरत्वेन व्याख्यानमित्याशङ्कां निराकर्तुं ततो ह्रीति टीका । तया अविद्याद्वयोच्छेदस्य साक्षादेव स्वरूपावगतिनिर्वर्तकत्वात्स एवाध्यवसानशब्दार्थः न तु वृत्तिः व्यवधानादित्येवं परिहारो वर्णित इति दर्शयति— **वृत्तिरूपेति** । ननु केवलस्याप्यनुमानस्य कारणस्वरूपज्ञापने सामर्थ्याभ्युपगमात्कथं तदुपजीवि चेत्यपीति टीका? अत आह— **वस्तुविशेषेति** । टीकायां मननस्वरूपकथनमनवसरदुःस्थमित्यत आह— **यदुक्तमिति** । ननु शब्दसहकृतयापि युक्त्या यदि मननरूपा प्रमा तर्हि प्राप्तं ब्रह्मणो मानान्तरागोचरत्वमित्याशङ्क्य शब्द एव बोधनसमर्थत्वात्प्रधानम्, युक्तिस्तु सहकारिणी, अतो न दोष इत्याह— **कारणस्येत्यादिना** । स्यादेतदित्यादिटीकायां ब्रह्मापुरुषबुद्धिविषयः वेदतात्पर्यविषयार्थत्वाद्धर्मवदित्यभिप्रायेण शङ्का, अनुभवायोग्यत्वमुपाधिरिति परिहारः । **अफलत्वादिति** । करणस्य फलवत्त्वनियमादिति भावः । धर्मजिज्ञासायामपि प्रत्यक्षादीनामस्त्युपयोगः यतस्त-